Kumārila Bhaṭṭa

# Tantravārttika

SARIT

SARIT

# Contents

Contents i

The TEI Header ৭৭৪

## ०.०.१ अर्थवादाधिकरणम्

सिद्धप्रमाणभावस्य धर्मे वेदस्य सर्वशः। 105
विध्यर्थवादमन्त्राणामुपयोगोऽधुनोच्यते॥§2

सामान्यतः प्रामाण्ये सिद्धेऽधुना विभज्य विनियोगः प्रतिपाद्यते। अवधृतप्रामाण्यस्य वा वेदस्येदानीं समस्तस्य विध्यर्थवादमन्त्रनामधेयात्मकस्य यथाविभागं धर्मं प्रत्युपयोगः प्रतिपाद्यते। तत्र पूर्वपक्षवाद्यभिप्रायः। चोदनालक्षणोऽर्थो धर्म इत्युपक्रमात्तस्य ज्ञानमुपदेश इति परामर्शात्तद्भूतानां क्रियार्थेन समाम्नाय इत्युपसंहाराद्विधिप्रतिषेधयोरेव प्रामाण्यं प्रतिपादितं, न च तद्व्यतिरिक्तशब्दगम्यत्वं धर्माधर्मयोः, नाप्यनधिगतार्थबोधनं मुक्त्वाऽन्यः शब्दस्य व्यापारोऽस्तीत्युक्तमेव। अतश्च यावन्त्येव साध्यसाधनेतिकर्तव्यतावाचित्वेन विधिप्रतिषेधान्तर्गतानि तेषां भवतु प्रामाण्यं यानि त्वतिरिक्तार्थान्यर्थवादमन्त्रनामधेयानुपातीनि सोऽरोदीदिषे त्वोर्जे त्वोद्भिदेत्येवमादीनि तानि सत्यप्यपौरुषेयत्वेऽर्थाभिधानसामर्थ्ये च धर्माधर्मयोरप्रमाणमतदर्थत्वात्। यथाश्रुतगृहीतानां तावत्प्रतीत्यनुपलब्धेः प्रसिद्धमेवातदर्थत्वम्। अथ कयाचिच्छब्दवृत्त्या तादर्थ्यं कल्प्येत, एवमपि व्यवस्थाहेत्वभावान्न धर्माधर्मयोरवधारणं स्यात्। यदेव हि वाक्यं गृहीतं तदेवाध्याहारविपरिणामादिभिर्यथेष्टं कल्पयितुं शक्यते। तद्यथा सोऽरोदीदित्येवमेव तावद्वाक्यं विशिष्टपुरुषाचरितोपन्यासद्वारा रोदनकर्तव्यतापरम्। अथ वा महतामप्येवंविधाः प्रमादाः संभवन्ति, 106
तस्मात्प्रयत्नेन वर्जयितव्यमिति। अतो विधिप्रतिषेधयोरस्फुटत्वाद्धर्माधर्मत्वेन निर्णये शक्त्यभावः। शास्त्रदृष्टविरोधादयश्च स्थिता एव। यत्तु भूतान्वाख्यानमात्रं यथावस्थितैः प्रतिपाद्यते तत्र यद्यपि सत्यत्वमस्त्येव तथाऽपि न तेन प्रयोजनमित्यानर्थक्यम्। अपि च। धूम एवाग्नेर्दिवेत्यादीनां स्वार्थेऽप्यप्रामाण्यं वक्ष्यते। विध्येकवाक्यत्ववशेनैव तेषां रूपभङ्गः क्रियते। न च तस्यापि किंचित्प्रमाणमस्ति। भिन्नैरपि हि तैः किंचित्प्रतिपादयितुं शक्यमेव। न च तत्प्रतिपादयतां निष्प्रयोजनतेत्यविज्ञायमानप्रयोजनवदर्थान्तरकल्पना शक्या। न हि लोष्टं पश्यतस्तद्दर्शनं निष्प्रयोजनमिति सुवर्णदर्शनता कल्प्यते। सर्वाण्येव च प्रमाणान्युपयुज्यमानमनुपयुज्यमानं वाऽर्थमात्मगोचरतापन्नं गमयन्ति। तेनैव चैषां हानोपादानोपेक्षाबुद्धयः फलत्वेन वर्ण्यन्ते। अन्यथा ह्युपादानमेवैकं फलं स्यात्। अपि च प्रमाणोत्पत्त्युत्तरकालं प्रयोजनवत्त्वमप्रयोजनवत्त्वं वा विज्ञायते न तु तद्वशेन प्रमाणोद्भूतिः। तस्माद्यो यद्रूपोऽर्थः प्रतीयते स तथैव प्रयोजनवत्त्वमप्रयोजनवत्त्वं वा प्रतिपद्यते। न हि प्रयोजनवदेव प्रमातव्यमिति कश्चिन्नियमहेतुरस्ति। यत्रापि तावत्स्वाधीनः प्रमाणविनियोगस्तत्राप्येतद्दुर्लभं किमुताबुद्धिपूर्वनित्यावस्थितवेदोत्थापितज्ञानग्राह्ये। न च वेदस्य प्रयोजनवदर्थाभिधानशक्तिः प्रथममवधृता। अयमेव हि परीक्षाकालो वर्तते कीदृशं पुनर्ब्रवीतीति। तच्च विदित्वा यथानुरूपम-

नुष्ठातुं क्षमा वयं न तु वेदं पर्यनुयोक्तुं किमयं निष्प्रयोजनमभिदधाति
तद्वाऽभिदधत्किमर्थं प्रयत्नेन धार्यत इति। सर्वपुरुषाणां केवलं प्रतिपत्तृत्वेन
पारतन्त्र्याद्वेदग्रहणोत्तरकालं च परीक्षावसरात्। न ह्यनधीतवेद एवाऽऽदौ
परीक्षितुं क्षमः। पश्चात्परीक्षमाणस्य तु नाबुद्धिपूर्वनिर्वृत्तमध्ययनं प्रकर-
णगतन्यायेन निश्चयहेतुर्भवति। तस्माद्यथैवाग्निहोत्रादिवाक्यानां गम्यमानप्र-
योजनवत्त्वादानर्थक्यं निष्प्रमाणकमिति नाऽऽश्रीयते तथैवैषां प्रयोजनवत्त्वं
107 नाऽऽश्रयितव्यम्। न हि यथावगताभ्युपगमादन्यत्किंचित्साधीयः परीक्ष-
काणाम्। योऽपि च क्लेशेन स्तुतिनिन्दात्मकोऽर्थः कल्प्येत स भावनयांऽशत्र-
त्रयानन्तःपातित्वान्न गृह्यते। तया चागृहीतं न विधिप्रतिषेधावाश्रयतः। तद-
नाश्रितं च दूरे पुरुषार्थाद्भवतीति। अपि चैवंविधेषु स्तुतिनिन्दाकल्पनायामित-
रेतराश्रयप्रसङ्गः। स्तुतिनिन्दात्मकत्वेनैव ह्येकवाक्यता तया चानुन्मीलित-
स्तुतिनिन्दोत्प्रेक्षाश्रयणम्। न चान्यतरमूलप्रसिद्धिरस्ति यतो व्यवतिष्ठेत। त-
स्मात्पृथगवस्थितानां दृष्टत्वादानर्थक्यमेवोपपन्नतरमिति। **स एष वाक्यैक-
देशस्येति**। विध्युद्देशातिरिक्तस्य सिद्धान्ताभिप्रायेणैकदेशत्वं न तु पूर्वपक्षे,
भिन्नवाक्यत्वाभ्युपगमात्। अथ वा वाक्यानां मध्य एकदेशाक्षेपः कतिप-
यानामित्यर्थः। तत्र यानि तावत्केवलविधियुक्तानि तेषु नैवाऽऽशङ्का। यान्यपि
लिङादिमन्ति प्रागर्थवादेभ्यो विधिसमर्थानि तैः संयुज्यार्थान्तरे स्तुतिस्तुत्य-
संबन्धे वर्तन्ते तेषामर्थवादाभावे तन्मात्रमेव हीयते न तु विधित्वेन पुरुषार्थ-
ताऽपि। यानि तु वर्तमानापदेशयुक्तानि स्तुतिनिरपेक्षविध्यसमर्थानि यथा
“**यस्य खादिरः स्रुवो भवति स च्छन्दसामेव रसेनावद्यति**” इत्येवमादीनि
तान्येकदेशद्वारेण समस्तान्याक्षिप्यन्ते॥ १॥ §3

वाङ्मनसयोर्विद्यमानमविद्यमानं वा स्तेयानृतवदनमुच्यमानं धर्मे स्वा-
र्थेऽपि वा न प्रामाण्यं प्रतिपद्यते। अथ त्वध्याहारादिभिरेवं कल्प्येत वाङ्मन-
सयोः सर्वशरीरेषु चेष्टाः प्रति प्राधान्यादितरभूतेन्द्रियैरपि तच्चरितमनुवर्तित-
व्यमिति। ततः शास्त्रविरोधः। तत्रैतत्स्यात्। विहितप्रतिषिद्धत्वात्षोडश्यादिव-
द्विकल्प इति। इतरस्तु कल्पनीयक्लृप्तत्वेन वैषम्यमाह। ननु चात्यन्तदुर्ब-
लोऽपि विधिस्तदधीनात्मलाभेन प्रतिषेधेन तुल्यबलो भवतीति “प्रतिषेधः
प्रदेशेऽनारभ्य विधाने च” इत्यत्र वक्ष्यते। सत्यम्। यस्य शास्त्रमन्त-
रेणाप्राप्तिरस्ति तत्रैतदेवम्। यत्पुनरर्थप्राप्तं निषिध्यते तत्र विध्यनभ्यनुज्ञ-
यैव लब्धात्मानः प्रतिषेधा बलीयांसो भवन्तीति तत्रैव वक्ष्यतेऽ**र्थप्राप्तवदिति
चेदिति**। स्तेयानृतवादयोश्च विनैव शास्त्रेण प्रवृत्तयोर्विधिनिरपेक्षोऽवस्थितः
108 प्रतिषेध इति कल्प्यं विधिं बाधते। तस्मादानर्थक्यम्। अतः परं स्वा-
र्थे नैवाऽऽनर्थक्यं प्रतिपादयति। रात्रिंदिवं धूमार्चिषोरपि दर्शनात् “धूम
एवार्चिरेवेति” चैतदद्वयमपि प्रत्यक्षविरोधादवधारणं न संभवति। अथ वा
यदनेन प्रतिपाद्यते दिवाऽग्निरादित्यमनुप्रविशति रात्रावादित्यमिति तदवधार-

७ च] ( अ॰ १॰ पा॰ ८ अं॰ १ )

णं नोपपद्यते। पूर्वोक्तस्य हेतोरसिद्धत्वात्। ततश्चाग्निसूर्ययोर्नक्तंदिवं व्यवस्थितज्योतिष्ट्वप्रतिपादनाय स्तुतिरप्यसत्यत्वान्नावकल्पत इत्येषा वाऽनवधारणा। अथ वा सूर्यो ज्योतिरिति प्रातरयं मन्त्रोऽग्निर्ज्योतिरित्येष सायमित्येषा मन्त्रयोरवधारणा न सिध्यति। अथ वा समस्तो वेदः प्रमाणमित्येषाऽवधारणा न सिध्यतीत्यभिप्रायः। शास्त्रविरोधो दृष्टविरोधद्वयं पुनः शास्त्रदृष्टविरोध इति यत्, सदृशन्यायानि सन्ति क्रमभेदेन चोद्यते तत्परिहारसूत्रक्रमभेदानुरोधेन। न चैतद्विघ्न इत्यार्षेयवरणशेषोऽभिमतः। स चायं क्रियातत्संबन्ध्यनभिधानात्तद्विषयत्वेनाप्रमाणम्। न हि ब्राह्मणत्वाज्ञानसंदेहविपर्ययाः केनचिदंशेन कर्मण्युपयुज्यन्ते। न च प्रत्यक्षविरुद्धा स्तुतिः संभवति। न च स्वतन्त्रब्राह्मणत्वाज्ञानप्रतिपादनेन प्रामाण्यम्। कथं पुनरयं दृष्टविरोधो यदा समानाकारेषु पिण्डेषु ब्राह्मणत्वादिविभागः शास्त्रेणैव निश्चीयते। नायं शास्त्रविषयो लोकप्रसिद्धत्वादवृक्षत्वादिवत्। कथं पुनरिदं लोकस्य प्रसिद्धम्। प्रत्यक्षेणेति ब्रूमः। कस्मात्पुनर्मातापितृसंबन्धानभिज्ञाश्चक्षुःसंनिकृष्टेषु मनुष्येष्वनाख्यातं न प्रतिपद्यन्ते। शक्त्यभावात्। यथा वृक्षत्वं प्रागभिधानव्युत्पत्तेः। नैतत्तुल्यं वृक्षत्वं प्रागभिधायकव्यापाराज्जात्यन्तरव्यवच्छिन्नं स्वव्यक्तिष्वनुगतं शाखादिमद्रूपेण दृश्यते। न तु ब्राह्मणत्वम्। अपि च व्युत्पन्नशब्दोऽपि निमित्तान्तरादृते नैव प्रतिपद्यते। न चोपवीताध्ययनादि निमित्तम्। वर्णत्रयसाधारणत्वात्। अध्यापनाद्यपि भिन्नाचारक्षत्रियवैश्यप्रतियोगित्वात्संदिग्धम्। सर्वं च दुष्टशूद्रेषु सभाव्यमानत्वादनिश्चितम्। 109
यस्त्वविचारितसिद्धमेव प्रतिपद्येत स शुक्तिकामपि रजतं मन्यमानः क्रीणीयात्। नैष दोषः। क्वचिद्धि काचिज्जातिग्रहण इतिकर्तव्यता भवतीति वर्णितमेतत्। तेन यथैवाऽऽलोकेन्द्रियानेकपिण्डानुस्यूतिशब्दस्मरणव्यक्तिमहत्त्वसंनिकर्षाकारविशेषादयोऽन्यजातिग्रहणे कारणं तथैवात्रोत्पादकजातिस्मरणम्। अयं चोत्पाद्योत्पादकसंबन्धो मातुरेव प्रत्यक्षोऽन्येषां त्वनुमानाप्तोपदेशाद्यवगतः कारणं भवति। न चावश्यं प्रत्यक्षावगतमेव प्रत्यक्षनिमित्तं भवति चक्षुरादेरनवगतस्यापि निमित्तत्वदर्शनात्। आन्तरालिकस्मृतिव्यवहितमपि चेन्द्रियसंबन्धानुसारि प्रत्यक्षमित्येतत्साधितम्। न च यत्सहसा सर्वस्य प्रत्यक्षं न भवति तन्निपुणतोऽपि पश्यतां न प्रत्यक्षमित्येतदप्युक्तमेव। स्त्र्यपराधात्तु दुर्ज्ञानोऽयं संबन्ध इति स्वयमेव वक्ष्यति। न च तावन्मात्रेण प्रत्यक्षता हीयते। न हि यद्गिरिशृङ्गमारुह्य गृह्यते तदप्रत्यक्षम्। न च स्त्रीणां क्वचिद्व्यभिचारदर्शनात्सर्वत्रैव कल्पना युक्ता। लोकविरुद्धानुमानासंभवात्। विशिष्टेन हि प्रयत्नेन महाकुलीनाः परिरक्षन्त्यात्मानमनेनैव हेतुना राजभिर्ब्राह्मणैश्च स्वपितृपितामहादिपारम्पर्याविस्मरणार्थं समूहलेख्यानि प्रवर्तितानि। तथा च प्रतिकुलं गुणदोषस्मरणात्तदनुरूपाः प्रवृत्तिनिवृत्तयो दृश्यन्ते। न च भर्तृव्यतिरेककृतेन वर्णसंकरोऽपराधेन जायते। दृश्यते ह्यपराधिनीमामपि स्वभर्तृनिमित्तः प्रसवः। तदपराधनिमित्तस्तु तासामशुभफलोपभोगो भवेन्न त्वपत्यानां वर्णसंकरः। न च नियोगतो वर्णान्तरैरेव सह प्रमादः। सवर्णेन

चोत्पादितस्य नैव वर्णान्तरत्वापत्तिः। संकरजातानामपि च पुनरुत्कर्षापकर्षाभ्यां सप्तमे पञ्चमे वाऽन्यतरवर्णापत्तिः स्मर्यते। तत्र त्वेतावन्मात्रमागमिकं प्रत्येतव्यम्। न ह्ययं पुरुषेयत्तानियमो लौकिकप्रमाणगम्यः। तस्मात्सत्यपि सारूप्ये यथा केनचिन्निमित्तेन स्त्रीपुंस्कोकिलादिविभागज्ञानं तथैव दर्शनस्मरणपारम्पर्यानुगृहीतप्रत्यक्षगम्यानि ब्राह्मणत्वादीनीति भवत्यज्ञानवचनस्य प्रत्यक्षविरोधः। येषामप्याचारनिमित्ता ब्राह्मणत्वादयस्तेषामपि दृष्टविरोधस्तावदस्त्येव न त्वाचारनिमित्तवर्णविभागे प्रमाणं किंचित्। सिद्धानां हि ब्राह्मणादीनामाचारा विधीयन्ते, तत्रेतरेतराश्रयता भवेत्। ब्राह्मणादीनामाचारस्तद्वशेन ब्राह्मणादय इति। स एव शुभाचारकाले ब्राह्मणः पुनरशुभाचारकाले शूद्र इत्यनवस्थितत्वम्। तथैकेनैव प्रयत्नेन परपीडानुग्रहादि कुर्वतां युगपद्ब्राह्मणत्वाब्राह्मणत्वविरोधः। एताभिरुपपत्तिभिस्त्वयं प्रतिपाद्यते। न
110 तपआदीनां समुदायो ब्राह्मण्यम्। न तज्जनितः संस्कारः। न तदभिवयङ्ग्या जातिः। किं तर्हि मातापितृजातिज्ञानामिव्यङ्ग्या प्रत्यक्षसमधिगम्या। तस्मात्पूर्वेणैव न्यायेन वर्णविभागे व्यवस्थिते मासेन शूद्रीभवतीत्येवमादीनि कर्मनिन्दावचनान्यथ वा वर्णत्रयकर्महानिप्रतिपादनार्थानीति वक्तव्यम्। पूर्ववच्चात्रापि क्लृप्तत्वात्प्रत्यक्षस्य कल्प्येनाज्ञानविधिना सह विकल्पो न संभवति। अपि च तत्रानुष्ठानात्मकत्वाद्भवेदपि न त्वत्र वस्तुरूपाणामैकात्म्येनाविकल्प्यत्वात्। को हि तद्वेदेति पूर्ववदेवाज्ञानसंशयविपर्ययाणामनौपयिकत्वादानर्थक्यम्। निश्चितवेदप्रामाण्यैश्च त्रैविद्यवृद्धैर्विज्ञायमानत्वात्स्वार्थेऽप्यानर्थक्यम्। विकल्पाभावश्चानन्तरोक्तवत्॥ २॥ §4

यदि तावद्गर्गत्रिरात्रब्राह्मणवेदानुमन्त्रणज्ञानकाले विद्यमानयोरेव मुखशोभावाजिजन्मनोः संकीर्तनं न धर्मं प्रति प्रमाणम्। अथ त्वविद्यमानयोस्ततः स्वार्थेऽपि। वर्तमानापदेशाच्च प्रत्यक्षानुपलब्धिविरोधः, कर्मानुष्ठानयोग्यपुरुषकरणाद्विद्यासंस्कारस्य दीक्षिततीर्थस्नानादिवन्निराकाङ्क्षत्वात्फलविधित्वं निराकरिष्यते। पौनरुक्त्यात्तर्ह्यत्र न विचारयितव्यमत आह तेन फलविधित्वान्निराकृतस्येहाऽऽनर्थक्यार्थवादत्वविचार इति। स्तुत्यर्थताऽपि चासत्यस्य नास्तीति व्यवस्थितमेव॥ ३॥ §5

अनन्तरेणैव पूर्णाहुत्यादिफलवचनानि व्याख्यातानि विधित्वाभ्युपेत्यवादेन
111 तु दोषान्तरमभिधीयते। पूर्णाहुतेरग्निसंस्कारत्वात्पशुबन्धस्य च ज्योतिष्टोमोपकारकत्वादश्वमेधज्ञानस्य च संस्कारत्वान्न तावत्फलविधित्वावसरः। यदि पुनरिष्यते ततोऽन्यानर्थक्यम्। समानफलान्यपि कर्माणि यानि परस्परानपेक्षाणि क्रियन्ते तेषां यथारुच्यनुष्ठानान्नान्यानर्थक्यकरत्वम्। पूर्णाहुतिपशुबन्धयोस्त्वकृतयोरितरकर्मानधिकारात्। प्रथमं वा नियम्येतेत्यनेन न्यायेनावाप्तं फले नोत्तरकर्मानुष्ठानप्रयोजनमस्तीति तद्विध्यानर्थक्यम्। तथा च दृष्टान्तोऽपि तेनैव पथा मध्वर्थिन इति यत्रान्यः पन्थाः पर्वतस्य तत्र गच्छेयुरपि न तु तेनैव गच्छन्ति। तस्माद्भूयसां क्लृप्तानां विधीनामनुग्रहाय वरं कल्प्यानामेवानर्थकत्वम्। न च फलविशेषार्थिनः पराणि कर्माण्यविशेषश्रवणात्। न हि स-

मानायां श्रुतावप्रत्यक्षः सन् फलविशेषः कर्मविशेषेभ्यः शक्यः कल्पयितुम्। न च स्तुति रसत्यत्वादिति स्थितमेव॥ ४॥ §6

त्रीण्यपि पृथिव्यादिवचनान्यप्रतिषेधभागिनमर्थं प्रतिषेधन्ति। अन्तरिक्षे दिवि च तावदप्राप्तत्वात्प्रतिषेधविषयत्वम्। अतश्च पर्युदसितव्याभावान्न पर्युदासः। अनन्तरिक्षे ह्यदिवि च पृथिव्यां नित्यं चयनं प्राप्तमिति तद्विधिरनर्थकः। अथापि नित्यानुवादस्तथाऽप्याक्रियार्थत्वमेव। पृथिवीचयनप्रतिषेधपर्युदासौ तु चयनविध्यबाधेनाशक्यौ। बाधे च विध्यानर्थक्यम्। विकल्पेऽपि पक्षे बाधः। कामसंयोगाच्चाग्नेरस्त्येव पाक्षिकत्वम्। दुर्बलश्च प्रतिषेधः। पृथिवीपरत्वे सति चयने कल्प्यत्वात्। एतदेवास्य स्वयमाकुलत्वम्। विध्यनन्तरमेव 112 हिरण्यं निधाय चेतव्यामिष्टकाभिरग्निं चिनुत एतच्चाऽऽकुलयेत्। प्ररोचनाबुद्धिस्तु नैवोत्पद्यते॥ ५॥ §7

सर्वोपाख्यानेष्वन्यपरत्वासंभवात्स्वरूपप्रतिपादनादनित्यसंयोगः। स च समस्तवेदप्रामाण्ये सति कथंचिदन्यथा नीयेत। यदा तु यथैव प्रमाणानां मध्ये शब्दस्तत्रापि च वेदः प्रमाणं तथैव वेदेऽपि विधिमात्रं युक्त्या कल्प्यते तदेतरैकदेशवदनित्यार्थैकदेशाप्रामाण्यं यथाश्रुतार्थग्रहणादापन्नं किं निवार्यते। तस्मादेवमादीनामनपेक्ष्यार्थमध्ययनमात्रादेव फलं कल्प्यम्। अथ वा यथैतान्युपेक्षाफलानि तथा तद्विषयं प्रत्यक्षमपि प्रतिपत्तव्यम्। अथ कस्मान्मन्त्रवद्यथाप्रकरणं प्रयोगकाले न प्रयुज्यते। प्रयोगरूपसामर्थ्याभावात्। न हि मन्त्राणां पाठमात्रेण विनयोगः किं तर्हि तत्सामर्थ्यात्। न चात्र तदस्ति। अथ वा यथा तेषां पूर्वपक्षे कार्यान्तरामावाद्रूपमात्रं ग्रहीष्यते तथाऽत्राप्यस्तु। यत्तु सूत्रकारेणानित्यत्वमुक्तं तत्प्रामाण्यापेक्षया नाप्रयोज्यतया॥ ६॥ §8

पूर्वपक्षोदाहृतेष्वेव वाक्येषु सिद्धान्तेऽभिधातव्ये किमर्थं वायव्यवाक्यमुपन्यस्यते। केचिदाहुः। समानन्यायत्वादिदमपि तत्र तान्यपि चेहोदाहृतानि द्रष्टव्यानीति। यद्यप्येवं तथाऽप्यपूर्वोदाहरणमभिप्रायान्तरमाकाङ्क्षति। तदभिधीयते। पूर्वोदाहृतेषु सर्वत्र स्वार्थासत्यत्वमप्याशङ्क्यते। तत्र कः प्रथममेव तत्प्रतिपादनक्लेशमङ्गीकुर्यादिति प्रासिद्धस्वार्थसत्यत्वानां स्तुतिद्वारैकवाक्यभावेन धर्मप्रमाणशेषत्वमात्रप्रतिपत्तिसौकर्यार्थं वायव्यवाक्योपन्यासः। तत्र भाष्यकाराः प्रसिद्धेनैवैकवाक्यत्वेन स्तुत्यर्थोपयोगं वदन्ति। एतावत्त्वत्र प्रथमं वक्तव्यम्। किमर्थं रूपभङ्गेन बलादेकवाक्यता पुरुषार्थत्वं वा वेदस्योच्यत इति। लौकिकवाक्ये तु दृष्टत्वादिति यद्युच्येत तत्राभिधीयते। युक्तं लोके वाक्यार्थस्य प्रमाणान्तरगम्यत्वादन्यथाऽपि कल्पनम्। इह त्वत्यन्तातीन्द्रियत्वाद्यथाश्रुतादीषदप्यन्यथात्वे पौरुषेयत्वमापद्येत। लोकेऽपि च यानि प्रमाणान्तरानवगतार्थानि आप्तप्रत्ययमात्रेण श्रोतॄणां प्रमाणानि भवन्ति 113 तेषां नैवान्यथात्वकल्पनं लभ्यते। तत्र केचिद्वदन्ति। "तुल्यं च सांप्रदायिकम्" इति यद्वक्ष्यति तेन समस्तो वेदः पुरुषार्थ इति साध्यते।

न ह्यात्मानुपकारिणं सन्तमेनं बुद्धिपूर्वकारिणः पुरुषाः प्रयत्नेन धारयेयुः। यद्यपि च केषांचिदज्ञानं भवेत्तथाऽप्यस्मत्पूर्वातिक्रान्ताऽनेकपरीक्षकप्रमादकल्पना निष्प्रमाणिका। तस्माद्यथा यथा पुरुषार्थता भवति तथा तथा भङ्क्त्वाऽपि रूपं व्याख्यायत इति। न त्वेतद्युक्तमिव। कुतः, पुरुषधीनप्रामाण्यप्रसङ्गात्। यदि ह्यक्षरानुपात्तोऽप्यर्थोऽस्मदादिभिरेवं कल्प्यते। यस्माद्वयं प्रयत्नेन धारयामस्तस्मादस्य पुरुषर्थतेति। तथा सत्यात्मचेष्टितवशेन प्रामाण्यमभ्युपगतं स्यात्। अथ पुरुषान्तरधारणमुच्येत। एवमपि तद्वशेन तैरप्येवमन्यवशेनेत्यनादित्वेऽपि सत्यन्धपरम्परान्यायेन सर्वेषां परप्रत्ययान्न क्वचित्प्रामाण्यावस्थानम्। सर्वत्र ह्येवमयं पुरुषो वेदेति प्रत्ययो नैवमयमर्थ इति। तेन यद्यपि तेषु तेष्वध्येतृषु नूनं पुरुषार्थं वेदं मन्यन्त इत्यभिप्रायोऽनुमीयते। तथाऽपि निर्मूलत्वात्तन्मात्रेणासिद्धिः। अतो यावद्वेद एव पुरुषार्थतया सकलमात्मानं न प्रतिपादयति तावदप्रमाणम्। तदुच्यते। सकलस्य तावद्वेदस्य स्वाध्यायोऽध्येतव्य इत्यध्ययनभावनाविधीयते। तत्र किं भावयेदित्यपेक्षायामध्ययनमित्यागतमपि पुरुषप्रवर्तनाशक्तियुक्तेन विधायकेनापुरुषार्थसाध्यायां भावनायां प्रवर्तनाशक्तिप्रसक्तेस्तदंशान्निराक्रियते। ततश्चाध्ययनेनेत्यविरोधात्संनिधेश्च करणांशे निविशते। तेन किमित्यपेक्षिते यच्छक्यत इत्युपबन्धादक्षरग्रहणमित्यापतति। तस्याप्यपुरुषार्थत्वात्तेन किमिति पदावधारणमित्युपतिष्ठते तेनापि पदार्थज्ञानं तेन वाक्यार्थज्ञानं तेन चानुष्ठानमनुष्ठानेन स्वर्गादिफलप्राप्तिरित्येतावति प्राप्ते निराकाङ्क्षी भवति। एवं सर्वविधीनां प्राक् पुरुषार्थलाभादपर्यवसानम्। न च सहसैव विधिदर्शनात्स्वर्गाद्येव फलं कल्प्यते। योग्यतया हि यस्य यत्रानन्तरभाविनि व्यापारो लक्ष्यते तदेव तस्य कार्यमित्यवधार्यते। तत्र यदि तावत्तदनुसारेणैव कियत्यप्यध्वनि फलमासाद्यते ततो नान्तरा कल्पनमर्हति। पारम्पर्यप्रयोजनेनापि श्रुतविध्युपपत्त्याऽन्यथानुपपत्तिलक्षणार्थापत्त्यनुत्पादात्। यत्र त्वनन्तरं दृष्टं कार्यं न स्वयं पुरुषार्थो नापि पारम्पर्येण तमाप्नोति यथा होमस्याऽऽहवनीयप्राप्तिर्भस्मसाद्भावो वा तत्र तदतिक्रमेण साक्षात्कर्मण एवादृष्टकल्पना। सर्वत्र चैतल्लक्षयितव्यम्। यत्र तु विहिते फलाकाङ्क्षिणि तदनात्मककार्यपरम्परायां सत्यामान्तरालिकं किंचित्क्रतवे पुरुषार्थाय वा चोद्यते तत्र तदेव तत्साधनं पूर्वस्य तु विधेस्तदुपकारार्थतया पर्यवसानम्। यानि तत्तरविधेः कार्याणि प्राक्तानि साध्यसाधनभावेनाचोदितत्वान्नान्तरीयकत्वेन काष्ठादीनामिव ज्वलनादीनि पूर्वविहितकर्मस्वव्यापारमात्रतया मन्यव्यानि। यत्र तु पारम्पर्यजन्यं न किंचिदन्तरा विधीयते तत्र सर्वाणि स्वव्यापारीकृत्य विधेयस्यैव स्वयं फ-
114 लसाधनता। तत्र यानि तावत्क्लृप्तकल्पयिष्यमाणपुरुषार्थसाधनविधिवाक्यानि तानि तत्प्रतिपादंन यावत्स्वाध्यायाध्ययनविधिना नीयन्ते परतस्तु फलवत्त्वं ज्ञातमेवेति न तद्यावत्प्राप्यन्ते। यानि तु तत्प्रकरणे पठ्यन्ते तान्यपि तथैवाक्षरग्रहणादिक्रमेण स्वार्थावबोधनं यावद्गतानि न साक्षात्क्रत्वङ्गं भवन्ति। कुतः। कथमित्यदृष्टोपायापेक्षेण क्रतुना दृष्टार्थत्वादक्षरादिष्वनवसजता

तद्विहितं कर्ममात्रमेव हि प्रयोजनद्वारेणोपादीयते नान्यत्। अतः प्रधानवाक्यतुल्यान्यङ्गानि भवन्ति। तद्वाक्यानि तु बाह्यतराण्यध्ययनादिवत्। एवं प्रोक्षणादिवाक्यानां व्रीह्यादिसंस्कारमात्रफलावसितानां तण्डुलपिष्टपुरोडाशद्वयवदानादिभिर्व्यवहिततरः प्रधानसंबन्धः। एवमेवानारभ्याधीतारादुपकारकसामवायिकाङ्गवाक्यानि योजयितव्यानि। तत्र त्वेतावान्विशेषः। यदप्रकरणस्थत्वादक्षराण्यस्पृशत्प्रधानमर्थैरेव संबध्यते यानि त्वाधानादिवाक्यानि तान्यपि फलवत्क्रत्वङ्गाहवनीयादिसंस्कारप्रतिपादनावसायीनि दूरस्थेनैव फलेन निराकाङ्क्षी क्रियन्ते। एतेन क्रत्वर्थकर्तृप्रतिपादनद्वारेणोपनिषदां नैराकाङ्क्ष्यं व्याख्यातम्। मन्त्रनामधेययोस्तु स्वाधिकारे योजना वक्ष्यते। तेन सर्वेषां भावनान्तर्गतिरुपपन्ना। यत्त्वर्थवादानां भावनांशत्रयानन्तःपातित्वादग्रहणमिति। तत्राभिधीयते। सत्यमतिरिक्तं न गृह्यते। अस्ति त्वन्तर्गतिः। कथम्। इह हि लिङादियुक्तेषु वाक्येषु द्वे भावने गम्येते। शब्दात्मिका चार्थात्मिका च। तत्रार्थात्मिकयाऽर्थवादा नापेक्ष्यन्ते शब्दात्मिकया तु ग्रहीष्यन्ते। सा ह्येवं प्रवर्तते। स्वाध्यायाध्ययनविधिनेतरे सर्वे विधायकाः स्वाध्यायपदोपात्तश्चाऽऽत्मा नियुज्यते भावयेदिति। तत्र लिङादीनां प्रयोजककर्तृत्वं पुरुषः प्रयोज्यस्तेन किमित्यपेक्षायां पुरुषप्रवर्तनमिति संबध्यते। अथ तु योग्यतयैव लिङादिविषया क्रियोच्यते प्रवर्तयेदिति ततः किमित्यपेक्षिते पुरुषमित्येव संबध्यते। यद्यपि चाचेतनत्वाल्लिङादिष्वेवंविधं प्रयोजकत्वं न संभवति ततोऽपि पुरुषस्य प्रयोज्यस्य प्रयोजकत्वानुपपत्तेस्तद्गतचैतन्यद्वारेण विधायकानां प्रयोजकता। यदि चैवं न कल्प्येत नैवैषां विधायकत्वव्यपदेशो भवेत्। अथ केनेत्यपेक्षिते पूर्वसंबन्धानुभवापेक्षेण विधिविज्ञानेनेति संबध्यते। कथमिति प्राशस्त्यज्ञानानुगृहीतेनेति। कुत एतत्। बुद्धिपूर्वकारिणो हि षुरुषा यावत्प्रशस्तोऽयमिति नावबुध्यन्ते तावन्न प्रवर्तन्ते। तत्र विधिविभक्तिरवसीदति तां प्राशस्त्यज्ञानमुत्तम्नाति। तच्च पुरुषार्थात्मके फलांशे सर्वस्य स्वयमेवानुष्ठानं भवतीति प्रसिद्धत्वान्न वेदादुत्पद्यमानमपेक्ष्यते। साधनेतिकर्तव्यतयोस्त्वप्रवृत्तपुरुषनियोगाच्छास्त्रमेव प्राशस्त्यप्रतिपादनायाऽऽकाङ्क्षते। तत्पुनः केन क्रियेतेति साधनापेक्षायां यदि वि फलपदेन निवर्त्येत प्रशस्तोऽयं भूतिफलत्वात्। अथ वा विधिनैव सर्वदोषाशङ्काविनिर्मुक्तवेदविहितत्वादिति। अथ वा विशिष्टद्रव्यदेवतेतिकर्तव्यतायुक्तत्वादिति। तत्र फलपदादीनामर्थान्तरोपयोगात्पुनरन्यत्राप्युपयोगो न युज्यते। विध्युत्तरकाला चेयमाकाङ्क्षा पूर्वं च 115
फलपदादिनिवेशः। तस्मादपि न तैर्निवर्त्यते। लक्षणा चैतेभ्यः कल्प्यते। न च श्रौतार्थसंभवे सा युक्ता। युगपच्चोभयवृत्तिविरोधात्प्राशस्त्यपरत्वे फलादीनि न स्युः। न ह्यन्यशास्त्रे सत्युपायमात्रत्वेनोपात्तानामेकान्तेन पारमार्थिकत्वमिति वक्ष्यते। अत एव चार्थाद्गम्यमानमन्यपरत्वाच्छब्दानां न प्राशस्त्यं प्रयोजनं भवति। न हि यद्यत्प्रतीयते तत्तच्छास्त्रफलमवसीयते। यथा पूर्वो धावतीत्युक्ते यद्यप्यपरो गम्यते तथाऽपि न कार्येण युज्यते तद्वत्प्ररोचना गम्यमानाऽपि

न कार्यान्तरोपयुक्तशास्त्रार्थत्वेनावतिष्ठते। अन्यथानुपपत्त्या चेयं तेभ्यः कल्प्येत। सर्वप्रमाणप्रत्यस्तमये चान्यथानुपपत्तिर्भवति। प्रमाणाभावश्च यःसर्वप्रकारं प्रयतमानस्य स प्रमाणम्। तद्यदि केनचिदुपदेशेन वाऽतिदेशेन वा न लप्स्यामहे ततो दर्विहोमन्यायेन विध्युद्देशस्यैव द्वे शक्ती कल्पयिष्यामः। अथ तु केनचिद्दूरस्थेनापि सेत्स्यति ततस्तदनुसारस्तावत्कर्तव्य इत्येवं साकाङ्क्षो विधिरास्ते। **तथा वायुर्वै क्षेपिष्ठा** देवतेत्येवमाद्यपि स्वाध्यायाध्ययनविधिना पुरुषार्थतयोपनीतं यच्छक्यते तत्कुर्यादित्युपबन्धाच्च सहसैव तेनासंबध्यमानमपुरुषार्थत्वेन च पूर्ववदक्षरादिष्वपर्यवस्यद्भूतान्वाख्यानवाक्यार्थं यावद्भूतम्। तत्रापि तु साकाङ्क्षमेवेति यस्तेन लक्ष्यमाणः साधनानुरूपसाध्योत्पत्तिद्वारेण क्षिप्रदेवतासाध्यं कर्म क्षिप्रमेव फलं दास्यतीति प्राशस्त्यरूपोऽर्थः सोऽनन्तरप्रवृत्तविध्युद्देशाकाङ्क्षितत्वात्पुरुषार्थे द्वारतां शक्नोति प्रतिपत्तुमिति परिगृह्यते। सोऽयं नष्टाश्वदग्धरथवत्संप्रयोगः। एवं च न प्ररोचनाऽन्यकृता कर्माङ्गम्। न चार्थवादपदैः प्रयोजनान्तरं साधनीयमित्याम्नानसामर्थ्यादुभयोर्नियमः। एतेन प्रतिषेधापेक्षितद्वेषसिद्ध्यर्थं निन्दापदसंगतिर्व्याख्याता। तत्रापि हि न द्वेषादृते विद्वान्निवर्त्तते। द्वेषश्चाप्रशस्तप्रत्ययाधीनोत्पत्तिः। न चाप्रशस्तज्ञानं नाकारादिभिः पदैः प्रशस्ताप्रशस्तानभिधानेन निषेधतत्फलेतिकर्तव्यतामात्रपर्यवसितैः शक्यमवलम्बितुमित्यनन्यप्रयोजननिन्दावाक्यगम्यमेव भवति। अतश्चैकवाक्यत्वसिद्धिः। नित्यं च विधिप्रतिषेधयोः क्रमेण वाक्यशेषाः स्तुतिनिन्दानिर्णयहेतवो भवन्ति। न हि स्तुतिनिन्दे नाम व्यवस्थिते निन्दारूपासु स्तुतिषु स्तुतिरूपास्वपि च निन्दासु विपर्ययदर्शनात्। यथा वक्ष्यति नहि निन्दा निन्द्यं निन्दितुं प्रवर्तते अपि तु विधेयं स्तोतुमिति। तथा त्रैयम्बकवाक्येषु **“यदभिघारयेत्तद्रुद्रायाऽऽस्ये पशून्निदध्यात्”** इति स्तुतमप्यभिधारणं नाऽऽश्रयिष्यते निन्दितमपि चान्ते विधिदर्शनादभिघारणमेव प्रशस्तं भविष्यति। संदिग्धस्तुतिनिन्दानामपि च प्रक्रमादेव निर्णयो यथा वक्ष्यति न वयं निन्दितानिन्दितान्वाऽसुरान्विद्मः। कदाचिद्धि यस्मादसुरानप्येषा वशीकृत्याऽऽनयति क्रिया तस्मान्नूनं प्रशस्तेति स्तुतिः स्यात्। अथ वा विध्वंसकासुरागमननिमित्तत्वादशोभनेति निन्दा। तत्रान्ते सामविधानात्तत्प्र-
116 शंसार्थमृचां निन्देति गम्यते। सर्वत्र च किंचित्पदं स्तौति निन्दति चेतराणि त्वेकवाक्यतया तादर्थ्यं प्रतिपद्यन्ते। यत्रापि तादृशं पदं न स्यात्तत्रापि लक्षणा लक्षितलक्षणा वाऽन्यथानुपपत्तेराश्रयणीया। विधिप्रतिषेधयोश्च स्तुतिनिन्दाभ्यामविनाभावादन्यतरदर्शनेनेतरदनुमाय वाक्यं पूरयितव्यम्। एवं भारतादिवाक्यानि व्याख्येयानि। तेषामपि हि श्रावयेच्चतुरो वर्णानित्येवमादिविध्यनुसारेण पुरुषार्थत्वान्वेषणादक्षरादि व्यतिक्रम्य धर्मार्थकाममोक्षाधर्मानर्थदुःखसंसारसाध्यसाधनप्रतिपत्तिरुपादानपरित्यागाङ्गभूता फलम्। त-

---

३४ म्] धर्मादीनां साध्यानां साधनप्रतिपत्तिरिति विग्रहः। धर्मादिचतुष्टयसाधनप्रतिपत्तिरुपादानाङ्गभूता। अधर्मादिचतुष्टयसाधनप्रतिपत्तिः परित्यागाङ्गभूतेत्यर्थः।

त्रापि तु दानराजमोक्षधर्मादिषु केचित्साक्षाद्विधयः केचित्पुनः परकृतिपुराक-
ल्परूपेणार्थवादाः। सर्वोपाख्यानेषु च तात्पर्ये सति श्रावयेदिति विधेरानर्थ-
क्यात्कथंचिद्गम्यमानस्तुतिनिन्दापरिग्रहः। तत्परत्वाच्च नातीवोपाख्यानेषु त-
त्त्वाभिनिवेशः कार्यः। वेदप्रस्थानाभ्यासेन हि वाल्मीकिद्वैपायनप्रभृति भिस्त-
थैव स्ववाक्यानि प्रणीतानि। प्रतिपाद्यानां च विचित्रबुद्धित्वाद्युक्तमेवैतत्। इह
केचिद्विधिमात्रेण प्रतिपद्यन्ते। अपरे सार्थवादेनापरेऽल्पेनार्थवादेनापरे मह-
ता। सर्वेषां च चित्तं ग्रहीतव्यमित्येवमारम्भः। तत्र तु केचिद्विधिप्रतिषेधाः
श्रुतिमूलाः केचिदर्थसुखादिषु लोकमूलास्तथाऽर्थवादाः केचिद्वैदिका एव के-
चिल्लौकिका एव केचित्तु स्वयमेव काव्यन्यायेन रचिताः। सर्वे च स्तुत्यर्थेन
प्रमाणम्। ये तु वाक्यशेषत्वं न प्रतिपद्यन्ते तेऽपि केचित्स्वयमेव श्रूयमाणगन्ध-
मादनादिवर्णकप्रभृतयः प्रीतिं जनयन्ति। ये तु युद्धवर्णकास्ते सर्वेषां शूराणां
भीरूणां चोत्साहकराः पार्थिवानामुपयुज्यन्ते। यत्र तु न किंचिद्दृष्टमुपलभ्यते
तत्र विशिष्टदेवतादिस्तुतिद्वारमदृष्टं कल्पनीयमित्येषा दिक्। **विध्युद्देशेनैक-**
**वाक्यत्वादिति**। केचिदाहुः। **किमर्था स्तुतिरिति चेत्कथं रोचेत नोऽनु-**
**ष्ठीयेते**त्येवं स्तुतिनिन्दाभ्यां प्रवृत्तिनिवृत्तिप्रतिपादनं लिङादिभिश्चाभिधानम-
तस्तुल्यार्थत्वम्। न च तुल्यार्थानां समुच्चयः। तत्र ये तावदर्थवादरहिता
लिङादयस्तद्रहिताश्चार्थवादास्तेषां यथाविषयं व्यवस्थितं निवर्तकत्वं प्रवर्तक-
त्वमविरुद्धम्। यत्र तु द्वयसंनिपातस्तत्रान्यतरेण कृतार्थत्वादवश्यावहेयेऽन्य-
तरस्मिन्भूयसामनुग्रहो युक्तः। त्यजेदेकं कुलस्यार्थ इतिवद्विधिप्रत्ययः प-
रित्यज्यते। केवलप्रकृतिप्रयोगाभावात्तदनुग्रहार्थप्ररोचनालब्धविधित्वानुवादेन
प्रवर्तते। यथा **सत्रादुदवसाय पृष्ठशमनीयेन यजेरन्निति** क्त्वाप्रत्ययसिद्ध-
प्रवृत्त्यनुवादकत्वं वक्ष्यते। तस्माद्वायव्यश्वेतालम्भ इत्येतावन्मात्रं विवक्षित- 117
म्। स एव च विध्युद्देशः फलादिसंबन्धोत्तरकालं स्तूयत इत्येत**द्भूतिकाम**
**इत्येवमन्तो विध्युद्देश** इत्यनेन कथ्यते। अन्यथा पुनरुद्देशग्रहणमनर्थकमेव
स्यात्। सूत्रोक्तेन तु विधिनैकवाक्यत्वं न संभवतीत्यतिक्रम्य तद्विषयः प-
रिगृह्यते। तथा चाऽऽह—**नायमभिसंबन्ध** इति। विधिविधेयसंबन्धनिषेधेन
स्तुतिस्तुत्यसंबन्धं विवक्षितं वदति **यतस्ततो भूतिरिति**। सैव च भूतिनिमित्त-
स्य योजना। **भिन्नाविमाविति** पूर्वोक्तौ संबन्धावभिधत्ते। **किमर्था स्तुतिरिति**
**चेदिति**। प्रत्ययश्चेदुत्खातस्तेनाविधीयमानस्य किं स्तुत्येति। अथ वा यदनया
साध्यते तत्प्रत्ययेनैव सेत्स्यतीति मनसि कृत्वा वदति। आचार्यस्तूत्खातेऽपि
प्रत्ययेऽर्थवादादेव तदर्थावाप्तिमुभयसंभवे चार्थवादानुग्रहं मत्वाऽऽह—**कथं**
**रोचेतेति**। इतरः प्रश्नाभिप्रायं विवृणोति। प्रागेव सिद्धेः **स्तुतिवचनमनर्थक-**
**मिति। नहीति** ग्रन्थच्छेदः। सर्वत्रावान्तरवाक्यानि महावाक्येष्वप्रमाणं म-
हासंख्यास्विवावान्तरसंख्या भवन्ति। तान्येव तु यदा केवलानि प्रयुज्यन्ते
तदा निरपेक्षत्वाद्भवन्ति प्रमाणम्। यथा पटो भवतीति। न च कदा**चिदेताव-**
**न्मात्रेण** समाप्तेर्नैराकाङ्क्ष्यदर्शनात्सर्वत्र नैराकाङ्क्ष्यम्। योग्यपदान्तरानुच्चारणेन
हि सर्ववाक्यानि पर्यवस्यन्ति। इतरथा पुनः श्रुतपदातिरेकेणापि निपुण-

दृशां भवत्येवापेक्षा। सा चानुपलब्ध्या निवर्तते। तथा च यत्रोपलप्स्यन्ते
तत्रैकवाक्यतां गमयिष्यन्ते। अन्यथा ह्यसौ तदुच्चारणेऽपि न स्यात्। तदिह
महावाक्येन विनाऽवान्तरवाक्यं प्रमाणं तत्सद्भावे तु नेत्येतदाह—**यदा न**
118 **स्तुतिपदानीति। नन्वेवं सतीति**। यत्र महावाक्यावान्तरवाक्ययोः फलं भिद्यते
यथा पटभवनरागभवने, तत्रैवं युक्तमिह त्वनतिरिक्तार्थस्य सतः किम-
वान्तरवाक्यनिराकरणमेव महावाक्यस्य युक्तं फलम्। तदेतदाह— **यस्मिन्**
**सत्यविधायकमवान्तरवाक्यं भवति मा भूत्तन्महावाक्यमिति। सत्यं विनाऽपि**
**तेनेति**। यो नाम वेदस्य कर्ता स्यात्स एवं पर्यनुयुज्येत लघुनोपायेन सिद्धे
किं महावाक्यमाश्रयसीति। तदभावान्न पर्यनुयोगः। परिहारपथग्रामगमन-
वच्च श्रमातिरेकमात्रं स्यान्नार्थानवाप्तिः। दृष्टं चैवंजातीयकेषु गौरवाश्रयण-
म्। यथा तमेवार्थं खमित्येतावता सिध्यन्तमाकाशप्रभृतिभिरभिपलन्ति न
च जाड्यं लभन्ते तथाऽत्र लिङादिभिरपि सिध्यन्तमर्थवादेभ्यो गृह्णत इति।
शक्यते चेदमिह वक्तुं यथैवानेकोपायप्रसङ्गे मन्त्रेण स्मृतं क्रियमाणमभ्युद-
यकारि भवति तथाऽन्येनापि विधिसिद्धावर्थवादप्रतिपादिताविधिविहितमिति।
**ननु सत्स्वपि स्तुतिपदेष्विति**। यत्र लघुमुपायमनुपादाय गुरूपाय आश्रीयते
तत्र तथाऽपि भवेदत्र तु पूर्वमेव लघुतर आश्रितः समर्थतरश्च तस्माद्य-
थैव प्रयुक्ते खशब्दे नाऽऽकाशादयस्तदानीमेव प्रयुज्यन्ते तथाऽत्र विधौ
सति स्तुतिर्नाऽऽश्रयितव्येति। तत्रोत्तरसाकाङ्क्षत्वात्स्तुतिपदान्यनर्थकानि स्यु-
रिति। भवन्त्विति चेत्। नोक्तेन न्यायेनार्थवत्त्वादविवक्षितार्थता युक्तेति। द्वय-
संभवे हि प्रत्यक्षादेकवाक्यत्वादर्थवादानुग्रहो युक्त इति। **ननु सत्स्वपी**त्यनेन
गतार्थत्वान्ननु **निरपेक्षा**दित्यवक्तव्यम्। तदुच्यते। तत्रार्थवादपरित्यागायोक्त-
मिदानीं तु भवतु नाभ स्तुतिसंबन्धः समस्तस्य पूर्वस्यापि तु स्वरूपावगतो
विधिसंबन्धो न बाधितव्यः। अथास्य क्व चिदपि शक्तिरपह्रियते ततः प्रतिप्रस-
वहेत्वभावात्सर्वत्राशक्तत्वप्रसङ्ग इति। तदभिधीयते। भवतु पूर्वस्य विधिशक्तिर्न
119 त्वियं क्वचिद्बाधितेत्यन्यत्रापि बाध्यते। कदाचिदाविर्भूतेति सर्वत्राऽऽविर्भवति।
यत्र त्वर्थान्तरस्तुत्यादि नोपादीयते तत्राऽऽविर्भूता शक्तिः कार्यमारभते। यत्र
त्वपवादभूतशक्त्यन्तराभिव्यक्तिस्तत्र वाक्यभेदप्रसङ्गात्पूर्वा तिरोधीयते। प्रश्नोत्त-
रत्वेनायं पूर्वोक्त एव वाक्यभेदः परामृश्यते। तस्मादेकार्थ्यात्प्ररोचनयैवात्र
विधिरिति। **प्ररोचयमाना अनुष्ठातॄणामिति**। “रुच्यर्थानां प्रीयमाणः” इति
संप्रदानत्वं कस्मान्न भवति। प्ररोचयतेः प्रकृत्यन्तरत्वादिति चेन्न। तत्रापि
रुचिसंबन्धानपह्नवात्। अथ सामान्यविवक्षया षष्ठ्युच्यते। साऽप्युपात्ते विशेषे
दुर्लभा। तस्मादनुष्ठातॄणां क्रियाया इति संबन्धः केभ्यः प्ररोचयमाना इत्य-
पेक्षितेऽर्थात्तेभ्य एवेति गम्यते। अथ चानुष्ठातॄणामुपकरिष्यन्तीति संबन्धः।
**क्रियाया** इति पञ्चमी क्रियातोऽपि हि त एव प्ररोचका इति। अथ वा
क्रियार्थमिति षष्ठ्यर्थः कल्प्यः। **कंचिदर्थं स्तुवन्तीति** शत्रन्तं कंचिदिति विधेयं
तत्संबन्धिनं वा कंचिद्वा विदधति क्रियां तत्संबन्धिनं वा तच्च स्तुतिद्वारेणेत्युप-

पन्नं प्रत्ययोद्धारेणार्थवादप्रामाण्यम्। इदं तु व्याख्यानं नानुमन्यन्ते। यदि हि प्रत्ययोत्खातिः स्यात्ततः केन स्तुतिराकाङ्क्ष्येत न तावच्छब्दभावनाकथंभावोऽस्ति। याऽपि कस्मादित्यपेक्षा कल्प्येत साऽपि विधीतिकर्तव्यताविषयैव तदनुग्रहार्थत्वात्। शब्दान्तरव्यपदेशमात्रं तु भिद्यते। साऽपि च नियुज्यमानस्यैव पुरुषस्य भवति न क्रियामात्रश्रवणात्। न हि वायव्यश्वेतालम्भ इत्युक्ते कर्तव्यताऽकर्तव्यतोक्तेः प्राक् प्रशस्तोऽप्रशस्त इति वाऽपेक्ष्यते। तदनपेक्षितं च श्रुतिमात्रेणैव वदन्तो नार्थवादाः प्रतिपादयन्ति। न च धात्वर्थेन सह कस्यचित्संबन्धोऽपेक्षा वा विद्यते। सर्वस्य भावनागामित्वात्। भावना तु प्रत्ययोद्धारेणापनीता किमपेक्षेत। तस्मात्तद्गतांशत्रयोच्छेदान्न भूतिः फलं न यागः करणं न वेतिकर्तव्यता काचित्स्यात्। उक्तेऽपि च प्राशस्त्ये कस्मादित्यनपेक्षितत्वात्प्रशस्तोऽयमित्येतावन्मात्रेऽवधृते प्रशस्तत्वादित्यनुच्यमाने कर्तव्यताबुद्धिर्नैव स्यात्। भवन्ती वा तन्निष्ठा भवेत्प्रशस्तोऽयं कर्तव्यः पटो रक्तः कर्तव्य इतिवत्। अकल्पिते विधावानर्थक्यमेव स्यात्। प्रत्यक्षं च विधिमुत्सृज्य पारम्पर्यलक्षणयाऽर्थवादेभ्यः परिगृह्यत इत्यपूर्वा वाचोयुक्तिः। न चैतत्कल्पनावसरोऽस्त्यन्यतः सिद्धत्वात्। अनुक्तो हि सन्नर्थवादादेव 120 विधिः कल्प्येत यद्यन्यथा नोपपद्येत। प्रत्यक्षप्रत्ययोपपन्नत्वान्नान्यथानुपपत्तिस्तथाऽर्थवादोऽपि यद्युपाख्यानादिष्विव प्ररोचनायां निष्प्रयोजनः स्यात्ततो दूरं नीयेत। यथोक्तेन तु न्यायेन प्ररोचनोपयोगान्नान्यत्र गच्छतीत्यवश्यकर्तव्या च प्ररोचना यद्यन्यतः सिध्येत्ततोऽर्थवादान्नापेक्षेत। साऽपि त्वनन्यगतिकत्वात्तमेवाऽऽश्रयति। सर्वत्र च वैदिकेऽर्थेऽर्थापत्त्या शब्दः कल्प्येत ततोऽर्थसिद्धिस्तेन प्ररोचनया विधिशब्दः कल्प्येत नार्थः, तत्कल्पनावेलायां च यथैन्द्रवायवादिवाक्येषु सोमेन यजेतेत्यस्मिन्नुपतिष्ठमाने नान्ययजिकल्पना तथैवाऽऽलभेतेत्यनेनान्यानुमानप्रतिबन्धः। तुल्यार्थयोश्च बाधविकल्पौ भवतः प्रत्ययार्थवादयोः पुनरत्यन्तभिन्नानुग्राह्यानुग्राहकार्थविषयत्वेनार्थभेदात्समुच्चय इत्येकवाक्यता। यदि च प्रत्ययोत्खातिः स्यात्ततः कर्तृसंख्योपग्रहविशेषावगतक्रियाफलस्वार्थपरार्थत्वाद्युच्छेदप्रसङ्गः। स्यादेतत्। विधित्वमात्रमविवक्षयित्वा शेषविवक्षया कर्तृसंख्यादिलाभ इति। एतच्चाशक्यं यतस्तदर्थमप्युपात्तः प्रत्ययः सामर्थ्याद्विधित्वं वदत्येव। प्रतीतस्य च द्वय्येवाविवक्षा विध्यसंस्पर्शो वा ग्रहैकत्ववदनुवादकत्वं वेन्द्रियकामहोमवत्। न तावद्विधेरविधित्वं नाम किंचित्। नाप्यनुवादस्तस्यामवस्थायामप्राप्तेः। न ह्येवं संभवति योऽयं वायव्यश्वेतालम्भः कर्तव्यः स प्रशस्त इति। भवति त्वेवं कर्तव्यः प्रशस्तत्वादिति। यत्तूदवसानीयवदिति तत्रापि क्त्वावशेन विधिप्रतिषेधावनपेक्ष्य क्रियामात्राक्षेपाद् विधित्वमाश्रितमेवेत्यदृष्टान्तता। यदि च विध्यविवक्षा स्यात्ततः प्रत्यासत्तेर्धात्वर्थ एव साध्यांशे निपतेदिति निष्फलत्वं स्यात्। तस्मात्सूत्राविनाशेनैव विधिनैकवाक्यत्वम्। तथा च भाष्यकारः। सविधिकमेव **भूतिकाम इत्येवमन्तो** विध्युद्देश इत्याह। अन्यथा धात्वर्थ इत्येवावक्ष्यत्। न चास्य क्रियामात्रतया विध्युद्देशत्वं शक्यते वक्तुम्। तस्मात्प्रत्यय एव

विध्यभिधायित्वाद्विध्युद्देशः। विध्यर्थेन त्वेकवाक्यत्वासंभवात्सूत्रातिरेकेणोद्देशग्रहणम्। **भूतिकाम इत्येवमन्त** इति च फलादिसंगत्युत्तरकालं स्तुत्यवसरप्रदर्शनार्थम्। नन्वेवं सति वर्तमानापदेशेष्वनाकाङ्क्षणादर्थवादा न संबध्येरन्। एवमेवैतत् तथाऽपि तु प्रमाणान्तरप्राप्त्यभावात्क्वचित्प्रयोगवचनेन क्वचित्पञ्चमलकारेण। अथवा श्रुतवर्तमानान्यथानुपपत्त्या कल्पिते विधित्वेऽर्थवादसंगतिः। यत्रापि केवलार्थवाददर्शनादेव विधित्वं तत्राप्यन्यथानुपपत्तिमात्रं शरणम्। संभवन्त्यां तु गतौ नातिगौरवं युक्तमिति। यस्त्वस्मिन्पक्षे वाक्यभेदः संबन्धद्वयाश्रयणादिति स आलभेत प्रशस्तत्वादित्येकप्रसरोपपत्तेः परिहृतः। विधीयमानस्यैव हि स्तुत्याकाङ्क्षित्वैरूप्यादुपपन्नं तन्नत्वम्। यदि चैवंविधेः संबन्धभेदैर्वाक्यं भिद्येत ततः साध्यसाधनेतिकर्तव्यतासंबन्धैरपि भि-
121 द्येत। तस्मा**न्नायमाभिसंबन्धो विवक्षित** इत्यादिभाष्यमेवं नेतव्यम्। न पूर्वत्रैव साङ्गविधिपर्यवसानं विवक्षितम्। विधित्वादिद्वारप्ररोचनाकल्पनायामतिगौरवनिमित्ताद्वाक्यभेदात्। **किमर्था स्तुतिरिति**। पूर्वेणैव प्ररोचनाऽपि सिद्धेत्याभिमानात्। **कथं रोचेतेति**—विध्यनुग्रहकथनम्। **ननु प्रागिति**—पूर्वाभिप्रायविवरणम्। **न** हीति। स्तुत्यभावे तस्य शक्तिद्वयमगत्याऽऽश्रीयते न संभवन्त्यामपीत्येतन्न तदा भूतिकामस्य विधिः समाप्यत इत्याह—**यथा पट** इति। गतार्थम्। **विधिशब्देन तदा प्ररोचनेति** विवृतं कार्यनानात्वं विधिस्तुत्योः। **नन्वेवमिति**। अस्ति चेत्प्ररोचयितुमपि शक्तिः कस्मादन्यदपेक्ष्यत इति। **सत्यमिति**। तस्माद्विद्यमाने तस्मिन्नाविद्यमाने योऽर्थः स गम्यते। कश्चासौ। **स्तुतिः प्रयोजनं तयोः**। न तस्यैव पूर्वस्यापीत्यर्थः। स्तुतिविषयोपकल्पनाच्च विधेरपि स्तुतिप्रयोजनव्यपदेशः। न हि निर्विषया स्तुतिरुपपद्यते। अर्थवादाभावे त्वगत्या केवलोऽपि गौरवमङ्गीकरिष्यति। **ननु सत्स्वपीति**। पूर्ववदेव व्याख्येयम्। **अतोऽस्माद्विधेरिति**। इदानीं षष्ठी, वाक्यशेषसंबन्धादित एवास्य स्तुतिमवगच्छामो न स्वत इत्यर्थः। **ननु निरपेक्षादपीति**। यदि क्वचिदनितिकर्तव्यताकस्य विधेः प्रवर्तनशक्तिः कस्मादन्यदपेक्षते तेन सत्स्वप्यनादरः स्यात्। आचार्यस्तु सोपहासमाह यत्रासौ केवलः प्रयुज्यमानो निरपेक्षस्तत्रं भवतु न कश्चिद्विरोधः। इह तु न तत्संभवः साकाङ्क्षैः पदान्तरैराक्षिप्तत्वात्। वाक्यं ह्येकमेकस्यैव संबन्धस्य विधायकं तत्र यदि द्वौ

---

११ न्धो] नायमभिसंबन्धो विवक्षित इत्यादि, भिद्येतेत्यन्तभाष्यस्यायमर्थः—भूतिकाम आलभेत कस्माद्यतो वायुः क्षेपिष्ठेत्यनेन यः सार्थवादकस्य विध्युद्देशस्य विधिस्तुतिसंबन्धरूपो विशिष्टोऽर्थो दर्शितः, नायं विध्युद्देशमात्रेण विवक्षितः किं तु सार्थवादकेनेति। तर्हीत्ययं भिद्येतेत्यनेनान्वेति। आलभेतेति मध्यप्रतीकेन विध्युदेशोपलक्षणम्। यतस्ततो भूतिरित्यर्थवादस्योपलक्षणम्। तथाच विशेष्यविशेषणरूपभिन्नाविभावर्थौ विध्युद्देशार्थवादाभ्यां प्रतिपाद्यमानौ यद्येकेन विध्युद्देशेन प्रतिपिपादयिषितौ तर्हि गौरवलक्षणो वाक्यभेद इति।

२३ अतोऽस्माद्विधेरिति] यतो वाक्यशेषोऽतो विधेः—विधिसंबन्धिनोऽस्माद्वाक्यशेषाद्विधेयस्य स्तुतिमवगच्छाम इत्यर्थः। नत्वनेन भाष्येण विधिरेव स्तुतिप्रतिपादक इत्युपसंह्रियते। पूर्वग्रन्थविरोधापत्तेरिति।

विध्युद्देश एव कुर्यात्तथा सति भिद्येत। विध्युद्देशोत्थापितानामेवैष हि गुणो
भवतीति प्ररोचनां दर्शयति। तस्माद्विधिनैकवाक्यत्वात्तदनुग्रहेणार्थवन्तोऽर्थ-
वादा इति॥ ७॥ § 9

चशब्दव्याख्यानार्थं परिचोदनोपन्यस्ता। आनर्थक्यमेवास्त्विति तन्नैव।
कुतः। पूर्वोक्तेन न्यायेनार्थस्यावगम्यमानत्वात्। अथ वा तन्नेत्यवच्छिद्यैवम-
र्थावगमादित्युक्तप्रकारपरामर्थः। किं च तुल्यं चेति योजना। संप्रदायानुग्र- 122
हार्थं धर्मजातम्। तत्संबन्धस्मरणात्। स्वर्गाद्यसंयोगाच्च। न चास्य प्र-
योजनवत्संनिहिताध्ययनपरित्यागेनान्यार्थत्वे प्रमाणमस्ति। संप्रदायाङ्गत्वेऽपि
चाविघ्नस्याऽऽकाङ्क्षितत्वात्। तादर्थ्यस्मरणाच्चाविघ्नार्थत्वम्। न ह्यन्यत्कल्प्य-
मानं स्वाध्यायेतिकर्तव्यतानुगुणं भवति। यदि तावत्स्वर्गः कल्प्येत ततः
पुरुषार्थत्वमेवाऽऽपद्यते। अथ पुनः क्रतुफलसिद्धिरेवं पठिते वेदे भवतीति।
एवमपि दूरस्थोपकारितैव। तस्मात्संप्रदायस्याक्षरग्रहणं साधयतो नियम-
जातमनुग्राहकम्। न च निष्प्रयोजनस्याविघ्नेन कार्यं वरं तादृशस्य विघ्न-
मेवोत्पन्नं येन क्लेशोऽपि तावन्न स्यात्। यतस्ते सप्रयोजनैर्विधिवाक्यैस्तुल्य-
मेवाऽऽद्रियन्ते। तेनावश्यं तद्वदेव प्रयोजनवन्त्यपीति। नियमस्मृतेश्च वेदमूल-
त्वाद्वेदकृत एवायमादरः। स च प्रयोजनवत्त्वादृते नोपपद्यत इति प्रयोजनव-
त्त्वमपि सामान्येनानुमाया**र्थाद्वा कल्पनैकदेशत्वा**दिति। सामर्थ्यतोऽर्थवादानां
स्तुतिर्नाम प्रयोजनविशेषो लभ्यते। **स्मरणं च दृढमित्ये**तदेवाऽऽह। अथ
वा यदेवेदं ग्रन्थस्मरणं परिपालनात्मकं तेनाध्येतृपुरुषप्रयोजनवत्त्वाभिप्राय-
प्रतिपत्तिपूर्वकं प्रयोजनवत्त्वानुमानम्। संभाव्यते च कुतश्चिद्वाक्यादियं प्र-
तिपत्तिरिति नाप्रमाणम्। अन्यथा हि निष्प्रयोजनान्येतानीति केचित्परित्य-
ज्यार्थवादान्विधिमात्रं प्रतिपद्येरन्। तत्र दृढस्मरणमेतेषु न स्यात्। अस्ति तु
तत्। तस्मान्न प्रमादपाठः। ततश्चार्थवन्त इति। तुल्यं च सांप्रदायिकमित्य-
स्यापरा व्याख्या। संप्रदायः प्रयोजनं यस्य वाक्यस्य येन प्रवर्तितः संप्र-
दायस्तस्मात्स्वाध्यायोऽध्येतव्य इत्येतत्स्वाध्यायत्वाविशेषाद्विध्यर्थवादयोस्तुल्य-
मतः प्रागुक्तेन न्यायेन प्राक् पुरुषार्थासिद्धेरवस्थातुं न लभ्यत इति शक्त्य-
नुसारेण स्थितमर्थवादानां स्तुत्यर्थत्वमिति॥ ८॥ § 10

उक्तदोषपरिहारोऽतः परम्। शास्त्रदृष्टविरोधिका याऽत्रानुपपत्तिर्विधिक-
ल्पनायामुक्तातामस्मत्पक्षमप्राप्तां मन्यामहे। अथवेदं स्तुतिव्याख्यानं ताम- 123
नुपपत्तिमप्राप्तमिति व्याख्येयं येषां ह्रस्वः पाठः। प्रयोगे ह्यनुष्ठांने रोदनव-
पोत्खननदिङ्मोहस्तेयानृतवादादीनां कल्प्यमाने विरोधः स्यात्। अस्माकं तु
पुनर्य एषां शब्दानां श्रौतोऽर्थः स नैव विवक्षितः। न चाध्याहारादिभिर्विधिः
किं तर्हि स्तुतिमात्रं विवक्षितम्। न च तद्विरुध्यते तस्मादुपपद्येत। अथ
वा **शब्दार्थस्त्विति** विधायकशब्दानुग्रहार्थः सन्नयमर्थवादो न स्वार्थानुष्ठानेन
संबध्यते प्रयोगमप्राप्तोऽप्रयोगभूतस्तस्मादुपपद्येत। त्रयोऽत्र पाठाः। अप्राप्तां
चानुपपत्तिमित्यत्र मन्यामह इति वाक्यशेषः। अप्राप्तं चानुपपत्तिमित्यप-

रस्तत्रास्मद्व्याख्यानमित्यध्याहारः। अप्राप्ता चानुपपत्तिरित्यपरस्तत्रास्मत्पक्षे
विज्ञेयेति॥ ९॥ §11

यत्र तावद्विधिस्तुत्योरेकविषयता तत्रोपपद्यतां नाम, संबन्धे विषयनानात्वे
तु कथमिति। गुणादित्याह। यत्क्रियायाः संबन्धिनि स्तोतव्ये तत्संबन्ध्यन्तरं
स्तूयते अथ वा यद्विकारे प्रकृतिसंबन्धिनि विधानार्थं स्तोतव्ये तत्संबन्ध्य-
न्तरं प्रकृतिः स्तूयते तत्र तद्द्वारेणापि लोके वेदे च स्तुतिसिद्धेः प्रकारान्तर-
ता। तस्माददोषः। एतस्यास्तु स्तुतेरर्थमुपरिष्टाद्वक्ष्यति। शान्ताभिरद्भिः संब-
द्धो विकारः शान्तिहेतुर्भवन्यजमानस्य कष्टं शमयतीति। गुणवादसूत्रेण शु-
द्धेनैव तावद्रोदनाद्युदाहरणत्रयपरिहारः। शेषसुत्राण्यप्येतदुक्तोपपादनार्थतया
124 संभन्त्स्यन्ते। तत्रोदाहृतानां गौणतानिमितं किंचिदिहैव वक्ष्यते परं तु त-
त्सिद्धिसूत्रे। सोऽरोदीदिति साकाङ्क्षत्वेनैकवाक्यता विधिस्तुत्योः प्रत्यवयवं
कथ्यते। स इति प्रकृतापेक्षः। कुतः। तत्प्रत्ययात्। तद्धि प्रकृतं प्रतीयते।
अथ वा तच्छब्दस्य प्रकृतग्राहित्वं प्रसिद्धम्। स इत्युक्ते तच्छब्दप्रत्ययात्स
एवार्थः। एवं तस्य यदश्रु तद्रजतमिति संबन्धः। सर्वा चेयमुपरितनस्य
निन्दाग्रन्थस्योपपत्तिरिति तदनन्तरं तदभिधानमुपपद्यते। कोऽसौ ग्रन्थस्तं
दर्शयति। यो बर्हिषि रजतं दद्यात्पुराऽस्य संवत्सराद्गृहे रोदनं भवेदिति।
केन हेतुना तदेवं भवतीति तदुपपाद्यते कारणानुरूपत्वात्कार्यस्य रोदनप्रभव-
रजतदानाद्रोदनोत्पत्तिस्तस्मान्न देयमिति सकलमदानस्योपपत्तिरिति। निन्द-
या तच्छेषत्वमर्थवत्। गुणवादस्तु शब्दालम्बनं रुद्रशब्दोत्थापितविज्ञानवशेन
रोदनसामान्यतोऽदृष्टकल्पना। अश्रुणश्च शौक्ल्याद्यदि नामैतत्कठिनं भवेत्त-
तो रजतसदृशं भवेदित्युत्प्रेक्ष्य तत्प्रभवनिन्दा। धनत्यागेनात्यन्तोदारस्यापि
गृहजनः पीड्यत इति तत्सामान्याद्वा रोदनोपन्यासः। एवं येन केन-
चिदालम्बनेन निन्दाविज्ञानोत्पत्तिः प्रतिषेधोपकारिणीति मुख्यार्थाभावेऽप्य-
दोषः। एवं वपोत्खननादिवाक्ययोजना। स्वात्मवपोत्कर्तनेनापि हि विशिष्ट-
125 प्रयोजनार्थं कर्माणि क्रियन्ते किमुत बाह्यधनत्यागेनेति स्तुतिः। यथा नेत्र-
मप्युद्धृत्यायं ददातीति लोकेऽपि त्यागिनं स्तुवन्तीति। वृत्तान्तपर्यवसायी च
वेदस्तत्र प्रामाण्यमप्रतिपद्यमानः स्तुतौ सत्यत्वान्नान्यत्रान्वेषणमर्हतीति निष्प्र-
योजनोपाख्यानसत्यतथा नार्थः। शब्दभावनाङ्गं वाऽर्थवादाः। सा च प्र-
वृत्तिर्विज्ञानमात्रेणैवोपयुज्यते नार्थेन। अर्थात्मिकार्या तु सर्वत्राविसंवादः सिद्ध
एव। अथोच्येत, असदन्वाख्यानेन स्तुतिनिन्दात्वमिति सुतरां तत्र प्रतीय-
ते। कामं परमार्थे वक्तारो भवन्ति काऽत्र स्तुतिर्निन्दा वा सत्यमेवैतदिति।
असत्ये तु यस्मादन्यत्र दुष्टमप्यवधृतमिह गुणवन्तमिति ब्रवीत्यतो नूनं मे
प्ररोचयति तथा गुणवन्तं सन्तं निन्दति निवर्तयितुमिति। ततश्चैवं विदित्वा यो
यस्यानतिक्रमणीयस्तदनुरोधेन स तथा प्रवर्तते। वेदश्च प्रमाणमिति स्थितम्।
तेन प्रवृत्तिनिवृत्त्यनुग्रहणीये स्वसंवेद्येऽर्थे पुंसः प्रशस्ताप्रशस्तज्ञाने भवतः।
इह ते वेदेनोत्पादिते। तस्मात्तदनुरूपं व्यवहर्तव्यमिति लोकेऽपि यां क्रियां
फलान्तरयुक्तां मेधादिहेतुत्वेनाऽऽप्तां मन्यन्ते तस्यां कंचित्प्रवर्तयन्तस्तदभिप्रेतं

सौभाग्यादिफलमसत्यमप्युपन्यस्य नियुङ्क्ते। तत्प्रवृत्तश्चेतरोऽपि क्रियाश्रयं फलं प्राप्नोति। यद्यपि च प्रतिपत्ता जानाति नैतदत्र पारमार्थिकं फलं मदभिप्रायानुसारेणैतैरुपन्यस्तं सर्वथा त्वपुरुषार्थे मां न प्रवर्तयन्ति तदसत्यं नामैतत्किमप्यन्यदवाप्स्यामीति ज्ञात्वाऽनुतिष्ठति। एवं वेदेऽपि विधिना तावत्फलमवगमितमर्थवादास्त्वसत्येन नाम प्ररोचयन्तु न तद्गते सत्यासत्यत्वे किंचिद्दूषयतः प्रवर्तनमात्रोपकारित्वात्। यत्तु परस्ताद्भविष्यति तद्विधेरुपरिगतमिति निश्चित्य नैव विद्वांसो न प्रवर्तन्ते। तस्मादुपाख्यानासत्यत्वमतन्त्रम्। न हि शुक्तिकादृष्टसत्यरजतो यदि रजतान्तरं तद्देशे लभते ततोऽभिसंधीयते। शुक्तिकावत्तु किंचिदालम्बनं श्रुतिसामान्यमात्रेण सर्वत्र योजनीयम्। यथेह महाभूतानि प्रजाः पान्तीति प्रजापतित्वेनोच्यन्ते। वाय्वादीनां यथासंख्येन 126 मध्यवर्तिनः सारावृष्ट्यादयो वपास्तामग्नाविति तेनैव क्रमेण वैद्युते वृष्टिमार्बीसे शरीरान्तर्वर्तिनि वायुमन्तश्चरत्वसामान्याद्रश्मिं लौकिके तदाप्यायनात्तस्य। ततोऽज इति बीजादीनां सामान्येनानादित्वादजत्वप्रसिद्धेः। तमालभ्य प्राप्य प्रजाः पशूनाप्नोति। सर्वप्रजानां व्रीह्यादिपरिणामप्रभवत्वादित्यालम्बनम्। एतस्मिंस्तु प्रक्रमे सत्यं सालम्बनता किं तु स्तुतित्वमेव हीयते। अतः स्तुतित्वात्यागेनैव स्वार्थसत्यतां वर्णयामः। मन्त्रार्थवादेतिहासप्रामाण्यात्सृष्टिप्रलयाविष्येते तत्र सृष्ट्यादौ प्रजापतिरेव योगी तस्मिन्काले पुण्यकर्मोद्भवाभ्युपगमेन पशूनामभावात्स्वमाहात्म्येनाऽऽत्मन एव पशुरूपमभिनिर्माय वपोत्खननादि कृतवांस्ततोऽसमाप्त एव कर्मणि तूपरः पशुरुत्थित इतीदृशमिदं कर्म प्रत्यासन्नफलम्। एवं च महता यत्नेन प्रजापतिना चरितमिति सर्वं सत्यमेव। प्रतिसृष्टि चर्तुलिङ्गन्यायेन तुल्यनामप्रभावव्यापारवस्तूत्पत्तेर्नानित्यताप्रसङ्ग इति। कर्मसु कौशलेन दीव्यन्तीति देवा ऋत्विजः, ते देवयजनाध्यवसानानन्तरं दर्शपूर्णमासयोरनभ्यस्तं सौमिकं कर्मराशिमालोक्य कथमविदितं करिष्याम इत्याकुलीभावसामान्याद्दिङ्मोहाभिधानम्। तथा च लोके कर्तव्यतासु दिशो मे परिभ्रमन्तीति वक्तारो भवन्ति। तत्र तद्व्युदासेनादितियागः प्रशस्यते कथं तु तद्व्युदसनम्। अवधारणावकाशदानात्। यावद्धि प्रायणीयायां प्राकृतानि समभ्यस्तानि कर्माणि क्रियन्ते तावदितरेषु भविष्यत्सु प्रणिधानं भवति अन्यथा सर्वस्मिन्नप्राकृते निरवकाशत्वादनवधारणं स्यात्। तेनाऽऽदित्येनैवैतज्ज्ञापितमिति मोहापनयेन स्तुतिः॥ १०॥ § 12

इह सर्वं क्रियमाणं मनसा संकल्प्य वाचा चाभिधाय क्रियते तदत्य- 127 न्तान्तरङ्गभूतयोरप्यनयोर्दूरेण हिरण्यादूनत्वं स्तेयानृतवादयोगादिति। या निन्दा तन्मात्रपर्यवसायिनी सा निषेधफला भवति। विधिपरा तु स्तुत्यर्था जायते। तदुपपादनस्य दृष्टार्थत्वात्। यथा वक्ष्यति न चेदन्यं प्रकल्पयेत्प्रक्लृप्तावर्थवादः स्यादिति॥ ११॥ § 13

३ भिप्रायानुसारेणैतै] णैवैतैरिति 'ग.' पुस्तके।

४ वादः] जै. (१०। ८। ४)

तस्माद्धूम एवेति दिवाऽग्निरादित्यं गच्छतीत्यस्योपपत्तित्वेन। तदिदं किमर्थमुच्यते। मिश्रलिङ्गाग्निहोत्रमन्त्रविधिस्तुत्यर्थम्। कथं पुनरग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेत्यनयोर्मिश्रलिङ्गत्वम्। यदा विविक्तावेवाग्निसूर्यौ देवतात्वेनोपलभ्येते। के चिदाहुः। अग्निर्ज्योतिरित्यत्र ज्योतिःशब्दः सूर्यवाची सूर्यो ज्योतिरिति पुनरग्निवाची तेनोभौ मिश्रलिङ्गाविति। तदयुक्तम्। ज्योतिःश्रुतेस्तेजः सामान्यवाचित्वेनोभयत्र सामानाधिकरण्येनोपपत्तेः। अन्यतरपर्यायश्च सन्नितरत्र न प्रयुज्येत। न हि यो यत्पर्यायः स तेनैव सह प्रयुज्यते। सूर्यवाची सन्प्रातर्मन्त्रे न प्राप्नोति। अग्निवाची सायंमन्त्रे। तस्मादुदाहरणं भ्रान्तिलिखितमितीमावुदाहर्तव्यावग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहा सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति। तद्विधेश्च स्तुतिः प्रथमविहितकेवलदेवत्यमन्त्रपर्युदासेन मिश्रलिङ्गविधानोपपत्तिरियमुच्यते। यदनयोर्मिश्रत्वं दिवाऽग्नेरनुप्रवेशान्नक्तं चाऽऽदित्यस्येति केवलेज्या न युक्तेति। अस्मिन्नपि तु व्याख्याने पर्युदसनीयत्वेनैव पूर्वमन्त्रोदाहरणम्। इतरौतु स्तुतिभागिनौ मिश्रलिङ्गाभिधानादेव ज्ञास्येते इति नोच्चारिताविति भाष्यं नेयम्। अथ वोभयोः केवलमिश्रलिङ्गयोर्मध्ये प-
128 ठितोऽयमर्थवादः। तत्र उभयदेवत्ययोरन्या प्रशंसा, इतरयोः पुनरियं, यस्माद्दिवाऽग्निरादित्यं गच्छति तस्मात्सूर्य एव तदा ज्योतिः। एवं नक्तमग्निरतस्तौ व्यवस्थितावेव यष्टव्याविति स्तुतिः। कथं तु धूम एवेत्यवधारणा। दूरस्थैर्भूम्ना दिवा धूम एव गृह्यते रात्रावर्चिरिति केनचिदंशेन स्तुत्यालम्बनम्॥ १२॥ § 14

प्रवरे प्रव्रियमाणे यजमानो **वदेद्देवाः पितर** इत्यादि। तत्प्रशंसार्थमुक्तमब्राह्मणोऽपि ब्राह्मणो भवति प्रवरानुमन्त्रणेनेति। तत्र प्रसिद्धब्राह्मणत्वानामेव ब्राह्मण्यलाभो निष्प्रयोजन इति तदुपपत्त्यर्थमुक्तं न चैताद्विद्म इति। ज्ञायमाने त्वज्ञानवचनं दुर्ज्ञानत्वात्। यत्सुखेनाज्ञानं तदज्ञानमेव। तच्च स्त्र्यपराधनिमित्तम्। सत्यपि च स्त्र्यपराधे यदि मातुरेव क्षेत्रिणो वा पुत्रः स्यात्ततस्तयोः प्रसिद्धजातित्वान्नैव दुर्ज्ञानता भवेत्। तयोरप्येवमेवं तत्पूर्वजयोरित्यनादिन्यायेन जातिरधार्यैतैव। यतस्तु माता भस्त्रा पितुः पुत्र इति स्मर्तॄणां दर्शनं जनयितुश्च नानाजातित्वोपपत्तिस्तेन वर्णसंकरः। वेदेऽपि चाप्रमत्ता रक्षत तन्तुमेनमिति जातिविच्छेददर्शनं स्त्र्यपराधे कर्तृपुत्रनिमित्तमेवोपपद्यते। अन्यथा ह्यपरिरक्ष्यमाणेऽपि नैव स्वजातितन्तुविच्छेदो भवेत्। तेनास्ति प्रशंसावकाश इति। निरूढब्राह्मण्यप्रवरसंकीर्तनात्तत्प्रभवोऽयमिति ज्ञानाद्ब्राह्मणः कृतो भवतीति स्तुतिः॥ १३॥ § 15

यत्तदानीमेवोत्पद्यते तदाकालिकम्। तच्च सर्वलोकस्याभिमतं न यच्चिरभावि। तस्मात्प्रवर्ग्यकाले दिक्ष्वतीकाशकरणं प्राग्वंशस्य प्रशस्यते। तद्धि सद्यःफलं धूमक्लेशाननुभवात्। इतरत्तु कर्मजन्यं सत्कदाचिद्भविष्य-
129 ति। कस्तद्वेद शास्त्रमात्रगम्यं हि तत्, इदं तु सर्वप्रत्यक्षम्। तदपेक्षया

च ज्ञायमानेऽप्यज्ञायमानवचनमितरप्रशंसार्थम्-। पाठान्तरमाकालिकडाद्यन्तवचन इति। अकालिकमिति वा पाठः। काल इति लोके विप्रकर्ष उच्यते। तत्र भवं कालाट्ठञिति ठञि कालिकं न कालिकमकालिकम्॥ १४॥ § 16

अध्ययनविधिशेषत्वादफलविधिः सन्यथाविज्ञातमुखशोभावाजिमत्त्वानुवादो विज्ञायते। न चैक एव प्रकारो मुखशोभायाः संस्थानं रमणीयता लावण्यं चेति। स्त्रीविषयं ह्येतत्। विदुषां पुनः पदवाक्यन्यायोद्गारि मुखं शोभते तेनाऽऽत्मना मुख्ययैव वृत्त्या शोभते। पुत्रश्च वाजवान्ब्रह्मवर्चसद्वारेण। अथापि गौणता तथाऽपि स्तुतिपरत्वाददोषः॥ १५॥ § 17

संस्कारकर्मत्वान्न फलविधिः। स्तुतेस्त्वालम्बनं निमित्ते नैमित्तिकवदुपचारात्। सर्वकामनिमित्तानां कर्मणां सामान्यसाधनभूतानग्नीनवाप्नोतीत्यर्थः। सूत्रं चैवं योज्यते। सर्वकामनिमित्तैः कर्मभिराहिताग्नित्वादिदानीमधिकृत इति वक्तव्ये सत्याधिकारिकं सर्वत्वं स्तोतुमवाप्तावुपचरितम्। ननु चाऽऽकाशगमनसुरकन्यालाभादयोऽत्यन्तासन्तः सर्वशब्देन वैदिकेषु कर्मसु निमित्तद्वारेणापि न शक्यन्तेऽनुवदितुमतः पुनः सूत्रमुच्यते। यथैवौदनादिषु सर्वशब्दोऽधिकृतापेक्षत्वान्न त्रैलोक्यं गृह्णाति तथाऽत्राग्निकर्माधिकृतफलग्राही भविष्यतीत्यदोषः॥ १६॥ § 18

तच्चैतत्समानस्वर्गादिफलेष्वग्निहोत्रादिषूपयोक्ष्यत इत्युपन्यस्तं साध- 130
नानुरूपत्वात्साध्यानाम्। सर्वे हि कामाः पूर्णाहुत्याऽवाप्यमानाः स्तोकस्तोकाः प्राप्यन्ते। तत्र फलभूमार्थिनः कर्मान्तरविधिरर्थवान्भविष्यतीति स्थिते चोद्यते। युक्तं लोके कृष्यादिफलानां प्रत्यक्षावगतत्वात्साधनानुरूपं जन्म। पूर्णाहुत्यादिषु त्वत्यन्तशास्त्राधीनत्वादविशेषश्रुते फले किंमूला विशेषकल्पना। न ह्यग्निहोत्रज्योतिष्टोमस्वर्गयोः कश्चिद्विशेषः श्रूयते। न चानुमानमीदृशे विषये समर्थम्। तदभिधीयते। विधिसामर्थ्यादेवेदं सिद्धम्। कथम्। यदि ह्यल्पान्महतश्च कर्मणः समं फलं जायेत ततोऽर्के चेन्मधु विन्देतेत्यनेनैव न्यायेनाल्पेन सिद्धे महति न कश्चित्प्रवर्तेत। तत्र विधिशक्तिबाधः स्यात्। अविहतशक्तिस्तु सन् अर्थाद्वा कल्पनैकदेशत्वादिति विधिरेव फलाधिक्यमङ्गीकरोति। अतो यथा विश्वजिदादौ फलसद्भावः प्रमाणवानेवमिह तद्विशेष इति। किं च § 19

कर्मणामल्पमहतां फलानां च स्वगोचरः।
विभागः स्थानसामान्यादविशेषेऽपि चोदिते॥ § 21

यथैव क्रमाम्नातानामङ्गाङ्गिनां प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमिति विनियोगव्यवस्था तथैव कर्मगोचरेऽल्पस्य कर्मणः परिमाणसामान्येन फलगोचरेऽल्पमेवोपतिष्ठते। मध्यमस्य मध्यमं महतो महदिति स्थान-

१० त्वादिति ] जै° (१। ४। २०)

मेव विनियोजकम्। स्मरणमप्येवमेव। चातुर्मास्यसोमेषु च फलार्थवादो **यदाऽग्निहोत्रं जुहोत्यथ दश गृहमेधिन आप्नोत्येकया** रात्रियेत्यारभ्य न्यूनाग्निहोत्रदशसंवत्सरप्रयोगादिभिरेकदर्शपूर्णमासादिप्रयोगावाप्तिवचनं कर्माल्पत्वमहत्त्वकृतं फलभेदं दर्शयति॥ १७॥ § 22

यथैव वाङ्मनसयोर्निन्दा हिरण्यस्तुत्यर्था तथा शुद्धपृथिवीनिषेधः प्रक्लृप्तावर्थवादः स्यादित्येवं हिरण्यनिधानस्तुत्यर्थो न प्रतिषेधमात्रफलः। नान्तरिक्षे न दिवीत्यौचित्येन शुद्धपृथिवीनिषेधसमर्थनायैव यथाऽन्तरिक्षे दिवि वा चयनं न प्रसिद्धं तथा हिरण्यरहितायां पृथिव्यामिति स्तवनम्। अनित्यसंयोगो
131 गतार्थः परं तु श्रुतिसामान्यमिति। प्रयोजनं रात्रिसत्रे पूर्वपक्षे स्वर्गः फलं
स्यादिति सिद्धान्ते त्वर्थवादस्थमेव फलम्॥ १८॥ § 23

इत्यर्थवादाधिकरणम्।

## ०.०.२ औदुम्बराधिकरणम्

एवमानर्थक्योपाख्यानादिप्रतियोगिष्वर्थवादेषु व्याख्यातेष्विदानीं विधिप्रतियोगिनो विचार्यन्ते। कुतः संशयः। पूर्वत्र हि स्वार्थानुपयोगित्वेन दूरलक्षितस्तुतिग्रहणमङ्गीकृतम्। तत्संभवे तु स्तुतिरप्यनर्थकतुल्याऽऽपद्यते। विध्यंशश्च न कथंचनान्यस्मात्सिध्यति। प्ररोचना पुनः कथं चिद्विध्युद्देशादप्युपपद्यत इत्युक्तं पुरस्तात्। अपि च प्रधानं विधिरङ्गं स्तुतिस्तत्र प्रधानविशेषणसंभविनस्तद्गामित्वमेव युक्तम्। समाप्ते च विध्युद्देशेऽर्थवादः प्रवर्तते तत्प्रक्रमावस्थायामेव तु भावनांशाः संनिपतन्ति। विशेषेण तु फलं प्राथम्यप्राधान्याभ्यामित्यादि मन्वानोऽपूर्वत्वादिति वदति। तदपेक्षया च स्तुतिमात्रमनर्थकं मन्यते। ननु चैवंजातीयकः फलविधिरुतार्थवाद इति विचारश्चतुर्थेऽपि **द्रव्यसंस्कारकर्मस्विति** भविष्यति। अतो नेह प्रस्तोतव्यः। तत्र केचिदाहुः। अनेन गतार्थत्वात्तत्रैवैष पर्यनुयोगो युज्यते न त्विदं पुनरुक्तमिति। सत्यमेवं यदि तु तत्कालप्रतीक्षणात्किंचित्परिहारान्तरं लभ्यतेऽतस्तत्रान्विच्छेम। अथ पुनरिहैव शक्यते वक्तुं तथा सतीदानीमप्युच्यमाने मन्दो दोष इति। अत्रापरे वदन्ति तेन फलविधित्वनिराकरणमात्रमिह त्वर्थवत्त्वाय त्वर्थवादः स्यादिति तत्र वक्ष्यति तद्विधित्वनिराकरणमात्रपरमेव द्रष्टव्यम्। तदयुक्तम्। यतस्तेन फलविधित्वात्प्रच्यावितानामानर्थक्यप्रसक्तौ पूर्वाधिकरणेनैव स्तुत्यर्थता साधिता। तथा च दर्शितं शोभतेऽस्य मुखमित्यादिषु। केचित्पुनराहुः। युक्तं वायुर्वै क्षेपिष्ठेत्यादीनां स्तुतित्वम्। ऊर्जोऽवरुद्ध्या इति पुनर्यथा फलविधित्वात्प्रच्याव्यते तथैव विसंवादेन स्तुतित्वादपीति कामं विधिर्भवतु येन कालान्तरभावित्वेन कथं चिद्विसंवादो निवर्तत इत्यारम्भः। तदप्ययुक्तम्।

१० स्विति ] जै० ४। ३। १

अपि च वेदे व्यक्तमसंवाद इति ह्यभ्युच्चयहेतुरनुरुक्तः स्यात्। अधिकरणशरीरं तु तदेव। विसंवादोऽपि च गुणवादस्त्वित्यनेन न कश्चिदपरिहृतः। पुनरपि च तावन्मात्रमेवोत्तरं भविष्यति। तस्माद्विधिर्वा स्यादित्यविशेषोपादानाच्चतुर्थे च फलश्रुतिग्रहणादिहाशेषद्रव्यगुणक्रियादिविधिसरूपास्तत्र फलविधिसरूपा एवोदाहरणमित्यपरे। तथा च विधिश्चानर्थकः क्वचित्प्रकरणे च संभवन्निति 132 चाप्सुयोनिर्वा अश्वोऽप्सुजो वेतसो यो विदग्ध इति चोदाह्रियते। अन्यथा फलविधिमात्रोपन्यासे तदसंबद्धमेव स्यात्। इहापि तस्य तावद्विशेषविषयत्वादिदमगतार्थं भवेत्। अनेन तु सामान्यतः सर्वविषयावरोधिना तत्पुनरुक्तमेवेति व्यवस्थया केचिदुदाहरन्ति। अत्र द्रव्यादिविधीनेव तत्र फलविधीनेव भाष्यकारोदाहरणमतन्त्रीकृत्योदाहरणान्तरं दातव्यमिति। अत्र वदामः। किमधिकरणद्वयमवश्यारब्धव्यं येनैवमुदाहरणव्यवस्थाऽऽश्रीयते न ह्युदाहरणभेदादधिकरणं भिद्यते। मा भूद्यथाव्यवस्थितेऽपि खादिरौदुम्बरत्वभेदादपौनरुक्त्यम्। न्यायविषयत्वेन त्वधिकरणानां तद्भेद एवापौनरुक्त्ये हेतुः।

§ 25

द्रव्यादिविधयोऽपि न सर्वे विचारिताः। केचित्तत्सिद्धिसूत्रे। केचिन्निवीताद्यधिकरणेषु। परकृतिपुराकल्पद्वारेणान्ये षष्ठे। यदृचा स्तुवत इत्यादयोऽर्थैकत्वाद्विकल्प इति नवमे। जर्तिलगवीधुकविधिसरूपा दशमे। अतश्च न पुनरुक्तता महान्दोष इत्येव वक्तव्यम्। अथ वैकस्यैव न्यायस्य क्वचित्कश्चिदंशः शोध्यत इति पुनरारम्भः। स्पष्टं वा विषयनानात्वमेवं वर्णनीयम्। सर्वविधिसरूपाणां केवलविधित्वनिराकरणेनार्थवादत्वमिह सिद्धम्। यस्तु चतुर्थे पुनरारम्भः सोऽर्थवादकल्पिते विधौ फलाकाङ्क्षावेलायामन्यार्थोपात्तमपि क्रतुप्रयोगवचनात्तदेव संनिहिततरं क्लृप्तसंबन्धस्य च विशेषमात्रं सुकरम्। इतरथा संबन्धस्तद्विशेषश्चोपकारकत्वं कल्पनीयमिति रात्रिसत्रप्रतिष्ठादिवत्फलविधित्वमपीति पूर्वपक्षाभिप्रायः। कथं चित्प्रयोजनान्तरे लभ्यमाने नैकस्यानेकार्थता युक्ता तस्मादर्थवादत्वमेवेति सिद्धान्तः। एतेन निवीताद्यधिकरणानि व्याख्यातानि। अथ वौदुम्बराधिकरणपूर्वपक्षं कृत्वा चिन्तास्ताः प्रत्येतव्याः। विधित्वाभ्युपगमेन हि कस्य शेषः क्रतोः पुरुषस्य वेत्यादि विचार्येह सिद्धेनार्थवादत्वेनोपसंहारः। तथा परकृतिपुराकल्पयोः किं तद्धोत्राणामुत सर्वपुंसामिति चिन्तितम्। एवमूहबाधप्रसङ्गेन नवमदशमगता चिन्ता, तत्सिद्धिसूत्रे तु गुणवादनिमित्तमात्रकथनम्। अथ वा फलविधावेव यत्र भेदेन स्तुतिफलपदानि भवन्ति तदिहोदाहरणम्। यथाऽत्रैवोर्गुदुम्बर ऊर्क्पशव इत्येतैरेव स्तुतिः। ऊर्जोऽवरुद्ध्या इत्यनेन फलमिति। यत्र पुनस्तावन्मात्रेणैव फलं वा स्तुतिर्वा वक्तव्येति भवति ते चतुर्थ इति। अथवा तत्र परार्थत्वादिति हेतुव्यपदेशात्प्रसिद्धेन च हेतुना व्यवहाराद्ये विज्ञातपारार्थ्यास्त उदाहरणं यथा यस्य पर्णमयी जुहूरिति। अत्र ह्यवश्यं जुह्वनुवादेन पर्णमयीत्वं विधातव्यं स्वातन्त्र्येण फलसंबन्धाशक्तेः। सर्वत्र हि गुणः फलाय चोद्यमानः कंचिदाश्रयमपेक्षते। 133

न च प्रकरणमन्तरेणाऽऽश्रयप्राप्तिः। तदिह यदि पर्णमयीत्वेन फलं भावयेदिति वचनं व्यज्येत किमाश्रितेनेत्यपेक्षायां किं संबध्यताम्। जुहूरिति चेन्न। वाक्यभेदप्रसङ्गात्। साऽपि च प्राक्क्रियालाभान्नैव निराकाङ्क्षी भवति। न च क्रियासंबन्धे प्रमाणमस्ति। तस्मादनिर्वहणादेतद्वचनव्यक्तिपरित्यागेनेतराश्रयणम्। तत्र च जुह्वा जुहोतीत्यस्याः प्रकरणे निर्ज्ञातप्रयोजनात्वादविहितजातिविशेषायास्तदाकाङ्क्षायां सत्यां यावदेव पर्णत्वजातिरुपनीता तावदविज्ञातप्रयोजनावस्थत्वादङ्गतां प्रतिपद्यते। ततश्च निराकाङ्क्षीभूतायास्तस्मिन्नेव वाक्ये फलकल्पनानिमित्तं नास्तीति युक्तमर्थवादत्वम्। इह पुनर्वैकृतपशुप्रकरणे श्रूयमाणमौदुम्बरत्वमुदाह्रियते। न च तस्य प्रसिद्धं पारार्थ्यं येन चतुर्थाधिकरणविषयता भवेत्। कथम्। अत्र हि न तावदप्राप्ते यूपे जातिविधानं शक्यम्। तत्प्राप्तिश्चेदवश्यं क्लृप्तोपकारप्रकृतखादिरत्वादिनैव निराकाङ्क्षेण भवितव्यम्। तत्कुतो जात्यन्तरस्य तादर्थ्येन विधिरतः फले विधानम्। याऽपि चाऽऽश्रयापेक्षा साऽपि प्राकृतकर्मसंबन्धिचोदकप्राप्तयूपग्रहणान्निवर्तत इत्यविघातः। तेन प्रागेव पारार्थ्यात्फलसंबन्धप्रसक्तिरवश्यं न्यायान्तरेण निराकर्तव्येत्येतदधिकरणारम्भः। इदमपरं मतम्। औदुम्बरवाक्यं जुह्वादिवाक्यं चोभयमुभयत्रोदाहरणम्। कथं, भावनांशान्तरविचारादपौनरुक्त्यम्। साध्यसाधनसंबन्धस्तावद्द्वयोरपि योग्यत्वेनोपात्तयोरवकल्पते नान्यथा। तत्र चतुर्थे साधनांशयोग्यविचारमनादृत्याभ्युपेत्य वा केवलसाध्यांशविचारः किमीदृशेन कामशब्दोपवन्धरहितेन वर्तमानफलसंबन्धाभिधायिना फलत्वं शक्यते गमयितुं न वेति विचारः। इह पुनः साध्यांशमनादृत्याभ्युपेत्य वा केवलसाधनांशविचारः। किमीदृशेन विधिविभक्तिरहितेन द्रव्यगुणक्रियाः कंचित्प्रति साधनत्वेन प्रतिपाद्यन्ते नेति। यच्च यदात्मना प्रतिपादितं भवति तत्प्रतियोगिविशेषापेक्षं सत्पदान्तराद्युपात्तेन तेन संबध्यते। तत्र साध्यमित्यवधृते परिशेषादवशिष्टं साधनं गम्यते। एवं साधनावधारणेऽपीति द्वावप्यंशौ स्वरूपेण निरूपयितव्यौ। तदिह साधनांशे विचार्यमाणे यो नाम फलांशस्य संस्पर्शः स चतुर्थे सिद्धः प्रसङ्गाद्धेतुत्वेनेति मन्तव्यः। तथा यस्तत्र साधनांशपरामर्शः स इह सिद्धस्तत्र प्रसङ्गादित्यपुनरुक्तम्। नन्वेवं सति विध्युद्देशचिन्तेयमित्यर्थवादाधिकरणेन न संबध्यते। नैष दोषः। तद्वशेनैवार्थपरिच्छेदात्। यदि ह्यसौ विधीयमानतया पूर्वेणावगतस्ततो नार्थवादत्वमथ स्तुत्यर्थतया ततोऽर्थवादत्वमिति। तत्र पूर्वपक्षाभिप्रायः। सर्वथा
134 साध्यसंनिधाने यदुच्चरितं तदाकाङ्क्षावशेन ताद्रूप्येणानुपात्तमपि साधनं भवति यथैव यागेनेत्यनुदितं संबध्यते तथैवौदुम्बरेणेति। तत्र विधिः किं कुर्यात्पुरुषं प्रवर्तयेत्। स च फलार्थितयैव प्रवृत्त इति किं विधिना। अथ वा प्रयोगवचनविहितस्य फलसंबन्धमात्रमनेन क्रियते। पञ्चमो वा लकारो विधास्यति। अर्थवादैकदेशो वेत्युक्तमेव। तस्मादूर्जोऽवरुद्ध्या इति तादर्थ्यचतुर्थ्यैवेवं कामशब्दादपि स्फुटतरं फलमुपात्तमिति तस्मिन्नौदुम्बरताविधिः।

न तु फलस्य विधानमिति ग्रहीतव्यं भावार्थाधिकरणे फलविधिनिषेधात्। ऊर्गुदुम्बर इत्यतः स्तुतिरित्यविरोधः। तस्मान्मुख्यविधिसंभवे लक्षणया न स्तुतिः प्रतिपत्तव्येति॥ १९॥ § 26

लोके तावद्बुद्धिपूर्वकारिणः पुरुषा मात्रामपि न निष्प्रयोजनां प्रयुञ्जते, तत्र च क्रेतव्येति विहिते बहुक्षीरादिभिर्गुणैः स्तुतिः प्रवृत्तिविशेषनिमित्तत्वेनाऽऽश्रीयते। न च क्षीरादयः फलविधयः प्रत्यक्षविषयत्वादतः स्तुतिः। एवं वेदेऽपि। श्रुत्यसंभवाच्च लक्षणापरिग्रह इत्यदोषः॥ २०॥ § 27

नायं दृष्टान्तः स्तुतेः प्रमाणान्तरावगत्यपेक्षत्वाल्लोके तत्संभवादुपपत्तिः। वेदे त्वविदितवादत्वान्न श्रद्दधीरन्। अथ वा लोक एव यद्यविदितं कश्चिद्वदेत्तदा नैव श्रद्दधीरन्। पूर्ववचनादिवेति। विध्युद्देशादिव। अथ वा वैधर्म्योपमा। यथाऽधिगतपूर्ववचने श्रद्दधते नैवमविदितवादे। न चोक्तिमात्रेणैते बहुक्षीरादयः प्रोचयन्ते किं तर्हि विदितत्वादेव। वेदे त्वर्थवादासत्यत्वेन विधौ जाताशङ्को न प्रवर्तेत। अथ वा यो विधमुत्क्रम्यार्थवादं प्रार्थयते नूनमस्य विधावविश्रम्भः। 135
तत्र चेदनाश्वासोऽर्थवादे कुतः प्रत्यय इति। अपि च वेदे व्यक्तमसंवादो वंर्तमानेनोर्जोऽवरोधनेनेयं स्तुतिर्न च तदस्ति। तत्राविद्यमानबहुक्षीरसंकीर्तनवदेतत्स्यात्। स्वरूपतस्तावदुदुम्बरेऽन्नत्वं पक्षधर्मेणाप्रसिद्धम्। अन्वयाप्रसिद्धेश्च हेतुत्वाप्रसिद्धिः। न हि यद्यदन्नं स स यूप इति लोके वेदे वा प्रसिद्धमित्यसंबद्धम्। तस्मादसंवादाद्वरं विधिरेव किं स्तुत्या संवादापेक्षिण्येति॥ २१॥ § 28

ऊर्गुदुम्बर इत्यादि तावदूर्जोऽवरुद्ध्या इत्यस्योपपत्तितयैकवाक्यभूतं न विच्छिन्नं स्तावकम्। न ह्यन्नमुदुम्बर इत्युक्ते पुरुषं प्रति प्रशस्तता गम्यते। ऊर्जोऽवरुद्ध्या इति तु प्ररोचयति। तदुपपत्तिरितरेति संगच्छते। तस्मात्कृत्स्नेन फलं प्ररोचना वा। तत्र यद्यपि तावल्लिङादिः स्यात्तथाऽपि सुतरामर्थवादतया गृह्णीयात्। किमुत वर्तमानापदेशो यो विधिसिद्ध्यर्थमेव। प्रकरणाच्च यागोपकारे प्रयोजने लभ्यमाने किमित्यवाचकांत्फलं कल्पयिष्यामः। प्रकरणं वाक्येन बाध्यत इति चेन्न। अविरोधात्। यदि ह्येकांशग्राहित्वेन वाक्यप्रकरणे संनिपतेतां तथा सति बाधः स्यात्। इह तु प्रकरणमौदुम्बरताविधिं गृह्णाति सोऽप्यूर्गुदुम्बर इत्यादिलभ्यां प्ररोचनाम्। तत्र तद्विशिष्टौदुम्बरत्वग्राहिणः प्रकरणस्य को विरोधः। तस्मात्फलविधिसामर्थ्याभावात्प्रकरणाबाधेन निवेशसंभवो नातिक्रमितव्यः। प्ररोचनाऽपि च वाक्यशेषादुपपद्यमाना नार्थापत्त्या विध्युद्देशादेव कल्पिता भविष्यति। अन्यत्र विधिरपि हि तावत्तां कल्पयेत। इह तु स स्वयमेव दुःस्थितः किं प्ररोचनया करिष्यतीति। न च स्तुत्युपयुक्तस्य पुनः फलेऽपि प्रतिष्ठादाविव व्यापारो युज्यते। रात्रिसत्राणां ह्यनन्यपरत्वाद्व्यर्थ्यपि कल्पनाऽऽश्रीयते। अत्र 136
तु प्रकरणादस्ति प्रयोजनसिद्धिरित्युक्तम्। जातिविशेषस्य च योग्यतयैव काष्ठाङ्गत्वं प्रसिद्धं न फलार्थता। यूपशब्दोऽपि च कर्माविष्टकाष्ठवचन इत्युपनीतमात्रमेव गृह्णाति। अतश्च प्रसिद्धे पारार्थ्येऽर्थवादता। यत्तु यूपे निराकाङ्क्षो

जातिं प्रतीति शरवद्बाधो भविष्यति। न चाबाधप्रकारोऽस्ति। काम्यपक्षेऽपि तदभ्युपगमात्। एतावांस्तु विशेषः। तव पुरुषार्थत्वाद्भिन्नविषयेण सता कथंचित्प्रसङ्गलभ्यसमानाश्रयत्वेन, मम तूभयोः क्रत्वर्थत्वात्समानविषयेणेति। न चात्र जातौ फलाय विधीयमानायां दध्न इव होम आश्रयो मनसि विपरिवर्तते। यो हि पशुयागः प्रकृतः स तावदयोग्यः। पशुनियोजनं च यूपद्वारेण योग्यं तदपि सह यूपेनाप्रकृतम्। **न चानर्थक्यात्तदङ्गेषु इति** प्रधानादवतीर्य तदङ्गमाश्रीयते। यो हि प्रधानोपकारित्वेन श्रूयते स तदङ्गेऽपि स्थित उपकरोतीत्येवं कल्प्यते न त्विह तथा। अत्र हि प्राधान्यांशभाजा गुणेनाऽऽश्रयः प्रार्थ्यते। तत्र प्रधानं संनिहितं तद्यदि न योग्यं ततो वचनव्यक्त्यन्तरमाश्रयिताम्। न चावतरणं संभवति। न चानेनैव वाक्येनाऽऽश्रयो दीयते। वाक्यभेदप्रसङ्गात्। द्वौ हि संबन्धौ तदा स्यातां गुणफलसंबन्धस्तदाश्रयसबंन्धश्चेति। युगपच्चौदुम्बरताफलयूपौ प्रत्युपादीयमानोद्दिश्यमाना विरूपा स्यात्। अथोभयोद्देशेन विधीयते तथाऽपि फलाननुरक्ता यूपेन संबध्येत यूपाननुरक्ता च फलेन। यत्तु विनैव विधायकात्स्वेच्छयैव प्रवर्तिष्यामह इति स्वच्छन्देन सह नास्ति विधिवादः। पुरुषार्थफलत्वं तु न प्राग्विधेः सिध्यति संनिहिततरौदुम्बरत्वादिसाध्यांशावरोधात्। यत्तु प्रयोगवचनो विधास्यतीति न पुरुषार्थेषु तस्य शक्तिः। **असंयुक्तं प्रकरणादिति** वक्ष्यति। यदि तु तेन विधीयते सिद्धं कर्मार्थत्वम्। पञ्चमलकाररूपं तु वर्तमानापदेशेन संदिग्धम्। तस्माद्वर्तमानफलाभिधायित्वाच्चतुर्थे चैवंकामशब्दरहितस्य फलविधित्वनिराकरणात्प्रधानफलमेवेदं प्ररोचमायै संकीर्त्यत इति युक्तम्। सर्वत्र च स्तुतिपरत्वात्तद्रुपा येषु सत्यासत्यान्वेषणं व्यर्थम्। ज्ञानमात्रौपयिकत्वात्। गुणवादेन च संवादात् साधनत्वेऽपि च प्रीतिसाधनत्वेन तृप्तिहेतुत्वेन वा संवादः॥ २२॥ § 29

137 यदि चैवंजातीयका विधयो भवेयुस्ततः पूर्वोदाहृताः सर्व एव द्रव्यगुणक्रियाविधयो भवेयुः। वायुः क्षेपिष्ठा देवता कर्तव्या, अप्सुयोनिरश्वः कर्तव्यः, अप्सुजो वेतसोऽवकाश्च कर्तव्याः, आपः शान्ताः ऊर्गुदुम्बर इत्यादि। तत्र यद्यपि के चित्क्रियादिविधयः शक्यन्ते कर्तुम्। एते त्वशक्याः स्वभावसिद्धेः प्रयत्नेनापि चानिष्पत्तेः। वायुवेतसावकादिषु स्वभावसिद्धिः। अश्वौदुम्बरादीनामशक्यता। कीदृशी स्तुतिस्तां दर्शयति। **शमयित्रीभिरद्भिरित्यादि**। तत्रासंगतेरग्रन्थ इति व्याख्यातारः समर्थयन्ते। यस्मादिहावकातत्संबन्धयोः शमयितृत्वस्य च नैवोपन्यासः कृतो वेतस उपन्यस्तः सोऽपि स्तुतिवेलायां न प्रदर्शित इति। तत्र त्वियं गमनिका। वेतसोदाहरणेनैव तुल्यत्वादवकादीन्यप्युदाहृतानि। न चायमश्वावकयोः परस्परेण संबन्धः कथ्यते। केन तर्ह्यद्भिः। तावता तु न स्तुतिः का चिदुन्मीलितेत्यर्थवादान्तरापेक्षाप्रवृत्तां तां दर्शयति—**आपो वै शान्ता इति**। अनेन हि विधित्वात्प्रच्युतेनापां प्राश-

---

६ इति] जै. ३-१-८।
१७ णादिति] जै. ३-३-४।
१२ इति] तै॰ सं॰ ५-४-४।

स्त्यमुच्यते तत्र कस्य चित्प्रसिद्धाप्संबन्धस्य तन्मात्रसंकीर्तनादेव स्तुतिर्भव-
ति। अन्येषां तु संबन्धिसंबन्धात्संबन्धः कीर्त्यते। प्रसिद्धशान्तत्वसंबन्धाभिरद्भिः
संबन्धादश्वादिरपि शान्तात्मकस्तत्संवद्धेन च कर्मणा यजमानस्य कष्टं शाम्य-
तीत्येवंविधप्राशस्त्यज्ञापनार्थम्। एवं क्षिप्रदैवतेन शीघ्रं फलप्राप्तिरन्नमयेन च
यूपेनान्नप्राप्तिरिति स्तुतित्वे सिद्धे तत्समानन्यायानामप्येवमात्मकत्वम्॥ २३॥
§ 30

विधिपक्षे चायमपरो दोषो यदि तावद्यथावस्थितवाक्यग्रहणं ततः प्र-
करणगतविदग्धोद्देशेन देवतान्तरविधानादुत्पत्तिवाक्यशिष्टदेवतापकर्षणं स्यात्,
इयं वा तामप्यपकर्षतीत्यपकर्षः। तत्र नैमित्तिकत्वादभ्युदितेष्टिवद्बाधोऽपि
कल्प्येत यद्यन्यथा न संभवेत्, सति तु संभवे न युक्तमेतत्। § 31

अथैतद्दोषभीतैरर्थलभ्यवचनव्यक्त्यन्तरं व्यवहितकल्पनयाऽऽश्रीयेत यो 138
नैर्ऋतः स विदग्धः कर्तव्य इति। ततः प्रकरणे नैर्ऋताभावाद्यत्रासौ विहित-
स्तत्र विदग्धता नीयेत। तत्र प्रकरणं बाध्येत। न चाबाधसंभवे तद्युक्तम-
तोऽर्थवादत्वादनपकर्ष इति॥ २४॥ § 32

स्तुतित्वेन विधिविभक्तिमुपजनय्य पुनस्तेनैव फलकल्पनायां वाक्यभेद-
स्तस्मादर्थवाद एवेति॥ २५॥ § 33

इत्यौदुम्बराधिकरणम्॥ २॥

## ०.०.३ हेतुवन्निगदाधिकरणम्

इह ये हेतुवन्निगदयन्ते हिशब्दादिभिर्न च परमार्थहेतवस्त उदाहरण- 138
म्। तत्र यदि तावद्धेतुत्वं विधीयते ततः पूर्वेणैव गतम्। यदिह हेतुत्वं
तच्छूर्पहोमसंबन्धं प्रति न चाविहितोऽसावस्तीति कस्य हेतुरुच्यते। अथ
भूतानुवादमात्रं तत्तु वायुक्षेपिष्ठत्ववद्गतमित्यनारब्धव्यमेतत्। उच्यते। न ताव-
दनेनैव वाक्येन हेतुत्वं विधीयते। न च भूतानुवादमात्रं किं तर्हि हेतोः
प्रसिद्धिपूर्वकत्वात्सिद्धवदुपदिष्टस्य यावत्यसिद्धयाशङ्का तत्रार्थापत्तिलभ्याद्वच-
नात्सिद्धिः। याऽपि चार्थवादाकाङ्क्षा कस्मादिति साऽप्यनेनैव हेतुना निवर्त्यत
इति मन्यते। अथाप्यर्थवादत्वं तथाऽपि तदन्तनिर्णीतहेतुत्वमेवेति सर्वान्नक-
रमेव हेतुत्वं होमस्येति वदति। **नन्वप्रसिद्धे कार्यकारणभाव इति**। केचिदा- 139
हुः। कार्यकारणयोरेवानुमानम्। तथा च दध्नेन्द्रियकामस्येत्यत्रापि वक्ष्यति।
तत्त्वयुक्तम्। अकार्यकारणभूतानामपि कृत्तिकादीनामचिरोद्गतरोहिण्यादिप्र-
तिपत्तिहेतुत्वदर्शनात्। अतो गम्यगमकत्वमेव कार्यकारणभावं मन्यते। ननु
सोऽप्यनुमानोत्तरकालीनत्वादनङ्गम्। सत्यम्। अन्यस्मिन्नेव तु संबन्धे स-
ति पश्चात्प्रसिद्धयन्तमेनमनुमानव्यवहारोपलक्षणत्वेनोपन्यस्यति। यद्वा शक्त्य-
भिप्रायं ययोरेव हि व्याप्तिग्रहणकाले गम्यगमकसामर्थ्यात्मना कार्यकार-

णभावित्वेन साऽवधृता तत्रैव हेतुता। अथ वोदाहृतविषयहेतुलक्षणमेतत्।
§ 35

अविनाभावो ह्यनेककार्यकारणस्वस्वामिसहचरभावादिप्रभेदभिन्नः, तत्रान्नकरणता होमे हेतुत्वेनोच्यमाना संबन्धान्तराभावात्कारणत्वेन स्यात्। तच्चाप्रसिद्धं तस्मान्न हेत्वपदेशः। सत्यं लोके हेतुव्यवहारकालात्प्रथमं प्रमाणान्तरेण संबन्धप्रसिद्धिरपेक्ष्यते वेदे तु हिशब्दप्रतिपादितहेतुत्वान्यथानुपपत्त्या संबन्धाभिधायि दृष्टान्तवचनं कल्प्येत यद्यदन्नकरणं तेन तेन जुहोतीति, तेन चोपपन्नं हेतुत्वम्। **किं प्रयोजनमिति**। यदि च हेतुरवतिष्ठेतेत्यनेनाभिप्रायेण। अपरस्त्वाह व्याप्तौ सिद्धायां सर्वान्नसाधनसाधनको होमः सिद्धो भवति। **कुत इति**। स एव सिद्धान्ताभिप्रायः। अथ वा कुतो दर्विपिठरादेः साधकतमत्वम्। इतरस्त्वाहान्नक्रियायां तावत्तस्यार्थवत्ताऽस्ति तावन्मात्रं वाऽऽश्रयिष्यते। **शक्यते च तेनापीति**। उपपत्तिशब्दस्यार्थः। पूर्वेण तु समानार्थता गम्यते। तेन विवक्षा। शक्त्यभिप्रायमेतत्। यदेव हि तदुपयोगिमात्रं तदेव शक्यते कथं चित्साधकतमत्वेन विवक्षितुम्। अथवाऽर्थवत्त्वं करणविभक्तिर्निर्देशालम्बनमुपपत्त्या पुनर्वर्तमानान्नक्रियस्य हेतुत्वाभिधानात्तादृशस्य होमं प्रत्यनुपपत्त्याशङ्कयोपपत्तिं वदति। **शक्यते च तेनेति**। तत्र चोदयति। एतद्धि क्रियत इत्युच्यते तत्कथं शक्यत इत्यभिधीयते। वर्तमानक्रियस्यासंभवादित्युत्तरम्। यद्वा स्वयमेवाऽऽशङ्क्य परिहरति। **यदि च न दर्विपिठरादीति**।
140 उभयोः परामर्शः। साधकतमत्ववर्तमानत्वे चेत्तत्र न विद्येते शूर्पेऽपि तथैवेति स्तुतिर्न स्यात् तेन यथा तव स्तुत्यर्थः कथं चिद्विद्यते तथा मम हेत्वर्थ इत्यविशेषः। हेतौ च श्रुतिरित्यादि, असंबद्धवाक्यसंबन्धिदोषादन्ते द्रष्टव्यम्। **स्तुतौ लक्षणेति**। अन्नकरणत्वेन सर्वजनाभिमतेन प्राशस्त्यं लक्ष्यते। **शूर्पेणेति** चास्मिन्पक्षे नित्यानुवादोऽन्नकरणसामान्येनैव प्राप्तस्य। इत्थं वा सूत्रगमनिका। तत्रार्थवत्त्वं तावदर्थवादात्प्रयोजनवत्तरत्वमुपपत्तिरित्यप्रसिद्धं, संबन्धोऽपिकाल्पनिकवाक्याश्रयणात्। तस्माद्धेतुः॥ २६॥ § 36

शूर्पेणेति तावत्करणविभक्तिश्रुत्यैवावरुद्धो होमो नानुमानिकैर्दर्विपिठरादिभिः सह बाधविकल्पसमुच्चयान्प्रतिपद्यते। § 37

होमश्च तेन निराकाङ्क्षीभूतो नान्यत्प्रार्थयते। अनुत्थितायामेव च दर्विपिठरादिश्रुतौ शूर्पं प्राप्नुवच्छ्रुत्यनुमानं प्रतिबध्नाति। तेन ब्रवीति—अचोदना च **तस्येति**। हेत्वपदेशश्च स्तुत्यैवोपपद्यमानः सन्नश्रुतदृष्टान्तकल्पनायै प्रभवति। शूर्पश्रुतिश्च विध्युद्देशपातिन्यनन्यप्रयोजना विस्पष्टा च सती परित्यक्तुं न युज्यते। तस्माद्यद्वाऽन्नकरणत्वादित्येष कर्तव्य इत्यनेनापेक्षितत्वाल्लक्षणयैतत्प्रतिपादयति प्रशस्तत्वादिति। अथ वाऽन्नकरणत्वादिति श्रुतिवृत्तमेव। तत्र यथाश्रुतं विध्युद्देशे हेतुतामप्रतिपद्यमानं तदनन्तराकाङ्क्षितार्थोपप्लुतहेत्वपेक्षप्राशस्त्यहेतुरवधार्यते, अन्नकरणत्वात्प्रशस्त इति। कल्पनाद्वयेऽपि च लोकप्रसिद्धदृष्टान्तलाभान्नाश्रुततद्वाक्यानुमानप्रसङ्गो भविष्यति। सिद्धं हि प्रशस्तानां

कर्तव्यत्वमन्नकरणानां च प्रशस्तत्वमिति। अचोदना च तस्येति व्याख्यान्तरम्। तव हि यद्यदन्नकरणं तच्चोद्यते न च दर्विपिठरादीनां करणता साधकतमस्य पाकादेः करणत्वात्। एवं चोत्तरसूत्रमापतति॥ २७॥ § 38

यत्पुनः शूर्पेऽप्यन्नकरणत्वानुपपत्तेः स्तुतिर्न प्राप्नोतीत्युक्तं किं तत्राभिधीयते॥ २८॥ § 39

अस्मत्पक्षेऽर्थोऽस्ति स्तुत्यालम्बनकरणत्वं नाम, वाक्यशेषो हि भवन्पार- 141
तन्त्र्याद्गौणत्वाद्यपि प्रतिपद्यते तदा च विधेयान्तरवशादवश्यमनुवादेन भवितव्यमनुवादश्च यथाविज्ञातस्य भवति। अतः शब्देनैवाभ्यनुज्ञातं यादृशं वयमन्नकरणत्वं शूर्पे पश्यामस्तादृशमिदं संकीर्त्यत इति। अनेन वर्तमानापदेशो व्याख्यातः। तत्रापि हि कृतं वा करिष्यमाणं वा स्तोतुं क्रियत इत्युच्यते। कथं स्तुतिः, सर्वलोकस्य भूतभविष्यदनादरेण वर्तमानोपकारानुरागाद्वर्तमानालोचनेनैव च कालान्तरेऽपि तत्र प्रीतिरिति क्रियत एवानेनान्नमित्युच्यते। अथ वाऽन्नक्रियाशक्तेर्वर्तमानतामन्नक्रियायामेवोपचर्य स्तौति। तत्रापि जनानां शक्त्यतिक्रमेणाभिव्यक्तिप्रियत्वात्क्रियत इत्युक्ते स्तुतिर्भवति। न शक्त्यभिधानात्। तव तु विधिवादित्वान्मुख्यान्नकरणत्ववर्तमानत्वयोरग्रहणे दोषः। किं कारणम्। विधानं ह्यत्यन्तानवगतार्थविषयम्। तत्र यथाश्रुतादन्यथाग्रहणं निष्प्रमाणकम्। एतदेवाऽऽह—**विधौ हि न परशब्दार्थः प्रयोजनमिति**। परशब्दार्थो हि लक्षमासु प्रयोजनम्। तदिह भूतभविष्यत्क्रियावाचिनः शक्तिवर्तमानतावाचिनो वा स्वार्थे वर्तमानान्नक्रियावाची शब्दः कल्पनीयः। § 40

तन्निमित्तमात्रे शब्दार्थे साधकतमत्ववाचिनी तृतीया। नचैवंभूतत्वं कुतश्चित्सिद्धमित्यप्रमाणकम्। अथ मुख्यार्थपरिग्रहः। तत्रोच्यते। न च वर्तमानं साधकतमं वोपदिशन्वेदः शक्यमर्थं विदध्यात्। न हि वर्तमानान्नक्रियेण शूर्पादिना साधकतमेन वा पाकेन होतुं शक्यते तस्मादुभयथाऽपि विप्रतिषिद्धम्। अस्मत्पक्षे त्वनुवादत्वात्परशब्दार्थग्रहणम्। **यथा लोके बलवान्देवदत्त** इति भूम्न्यतिशायने वा मतुप्प्रवृत्तिर्न च विशेष उपात्तोऽमुष्मात्प्रकृष्टबल इति। तत्र सर्वसत्त्वेभ्यः प्रकर्षे मुख्यः शब्दो न च तथा संभवति सिंहादीनां बलवत्तरत्वादिति देवदत्तान्न्यूनतरबलानपेक्ष्यैवमभिधीयते तथाऽत्र विप्रकृष्टतरान्नसाधनलाङ्गलाद्यपेक्षया शूर्पं साधकतममित्युच्यते। न- 142
न्वेवमापेक्षिकप्रवृत्तेर्मुख्यत्वमेव स्यात्, तथा च देवदत्ते बलवच्छब्दप्रवृत्तिं नैव गौणीं मन्यते। सत्यमेवं, यदा तावन्न्यूनमात्रापेक्षयैव प्रयुज्यते यदा त्वविशेषप्रवृत्तेस्तदधिकबलेष्वपि बलवद्बुद्धिर्जाता तदा स एव शब्दः कुतश्चिदपि न्यूनबले वर्तमानो गौणः संपद्यते। तथा यदि विध्युद्देशोपात्ते शूर्पेऽन्नकरणत्वमनूद्यते ततस्तन्न्यूनमात्रापेक्षया वा मुख्यत्वं न्यूनानुपादानाद्वा सामान्यतः प्रवृत्तस्य सर्वप्रकृष्टगामित्वबुद्धौ सत्यां गौणता। भवतस्त्वपूर्वविधानादत्यन्तसाधकतमत्ववर्तमानत्वयोः क्रियां प्रत्युपादानान्न्यूनापेक्षागौणत्वयोर्निमित्तं नास्तीत्यतिक्लेशः स्यादित्यसमानम्॥ २९॥ § 41

अभ्युपेत्यवादोऽयम्। यद्यपि हेतुविधानं तथाऽपि न दर्विपिठरादेः प्रसङ्गः। कुतः। शूर्पं हि विधायान्नकरणं हेतुरुच्यते। सोऽपि च न लोके प्रसिद्धः, शब्दमेव दृष्टान्तवाचिनमनुमाय साधयितव्यः। तदनुमाने च श्रुतहेतुत्वान्यथानुपपत्तिः प्रमाणं, सा च यावत्येव हेतुत्वमुपपन्नं ततोऽधिककल्पनायै न प्रभवति। शूर्पे च होमसंबन्धित्वेन प्रतिज्ञातेऽन्यधर्मस्याहेतुत्वादवश्यं तद्गतमेवान्नकरणत्वं वक्तव्यम्। संनिधेश्च तदवच्छिन्नमेव तद्गम्यते। लोकेऽपि च यं धर्मिणं प्रतिज्ञाय यो हेतुरुपदिश्यते स प्रथमं तावत्तद्गतविशेषात्मनैव प्रतीयते। तदात्मकस्य तु साध्यांशानुगमाभावात्सामान्यमात्रं विवक्षितमिति दृष्टान्तप्रयोगवेलायामेवावधार्यते, वेदहेतूनां पुनर्न सामान्यात्मना साध्यसंबन्धोऽवगतो न विशेषात्मना सोऽधुनैवार्थापत्त्या कल्पनीयः। § 42

तत्र विशेषस्योपादानात्सामान्याप्रसिद्धेश्च तत्परित्यागनिमित्तस्यासंभवादुपात्तविशेषमात्रोपसंहृतान्यथानुपपत्तिस्तद्गतमेव दृष्टान्तवचनं कल्पयति। तदकल्पने हि हेतुनिर्देशः श्रुतो विरुध्यते। यदि तु दर्विपिठरादिगतान्नकरणत्वहोमसंबन्धाविनाभावो न कल्प्यते। न किं चिच्छ्रुतं दृष्टं वा नावकल्पते। त-
143 स्मादीदृशं दृष्टान्तवचनं कल्प्यं यद्यच्छूर्पमन्नकरणं तेन तेन जुहोतीति। तदेतद्विशेषदृष्टमनुमानम्। लोकेऽपि तृणधूमदर्शनात्तृणाग्निरेवानुमीयते नाग्निमात्रम्। यथा च गमनं गोशब्दव्युत्पत्तिनिमित्तत्वेनोपादीयमानं सास्नादिमत्सामान्यप्रत्ययोत्तरकालं तद्गतमेव निमित्तत्वं प्रतिपद्यते न गन्तृमात्रविषयमिति गोशब्दव्यवस्था तथा शूर्पगतान्नकरणहेत्वपदेशान्नान्यगतहेतुत्वप्रसङ्गः। तत्रैतावानर्थः स्यात्। यद्यदन्नकरणसमर्थं शूर्पं तेन तेन होतव्यं न दर्विपिठरादिग्रहणम्। यथा बलवदुपध्मातेऽग्नौ दहनहेतुत्वेनोक्ते स एवानुपध्मातो न दहेन्न तु शङ्खादयो बलवदुपध्माता दहन्ति। तस्माद्व्यवस्था। यदि पुनः शूर्पगतान्नकरणव्यतिरेकेण महासामान्यं विवक्ष्यते ततो यद्यदगृहीतं तस्य तस्य का चिदन्ननिमित्तता विद्यत इत्यव्यवस्थितत्वाद्धोमाक्षिप्तद्रव्यमात्रानुवादः सन्ननर्थकोऽन्नकरणशब्दः। तस्मादन्नहेतुत्वेन स्तुतित्वमेव वरमिति॥ ३०॥ § 43

इति हेतुवन्निगदाधिकरणम्॥ ३॥

## ०.०.४ मन्त्राधिकरणम्

इहाऽऽनर्थक्यश्रवणात्केचिदेवं संदेहमुपन्यस्यन्ति किमर्थवन्तो मन्त्रा उतानर्थका इति। तत्त्वयुक्तम्। **स्पष्टे शब्दात्प्रतीतेऽर्थे नानर्थक्यं हि शङ्क्यते। अग्नौ दहति दृष्टे वा दग्धृत्वं किं विचार्यते॥** सर्वत्र हि कार्यदर्शनाच्छब्दानां शक्तयः कल्प्यन्ते। तच्चार्थप्रत्यायनं मन्त्रेष्वप्युच्चार्यमाणेषूपलभ्यते। न **चाविशिष्टस्तु वाक्यार्थ** इत्येवमादिप्रतिज्ञामात्रसाध्योत्तराः पूर्वपक्षा भवन्ति। तस्मादयुक्तोऽयमुपन्यास इति मत्वाऽऽह—**किं विवक्षितवचना मन्त्रा उताविवक्षितवचना इति**। नन्वनेनैव हेतुनेदमपि न विचारणीयम्।

नैष दोषः। अर्थवतामपि वाक्यानां द्वैविध्यदर्शनात्। उच्चारणार्थप्रत्यायने ह्यविनाभूते तन्नान्यतरविवक्षया प्रयुज्यमानेऽपि किंचिन्नान्तरीयकं भवति। यद्यर्थप्रत्यायनं विवक्ष्यते तदोच्चारणमर्थात्, अथोच्चारणविवक्षां ततोऽर्थप्र- 144
त्यायनमनुषङ्गात्। यथा जपेषु विषविद्यासु चेत्यस्ति विचारावसरः। कथं पुनरस्य प्रमाणलक्षणेन संबन्धः। पूर्वमेवोक्तमेतत्। यथाऽऽम्नायस्य क्रियार्थत्वादित्ययमेवात्र पूर्वपक्ष इति तदुत्तरेणैव च निराकाङ्क्षत्वान्न पुनरभिहितम्। एवं हि मन्यते यत्र सोऽरोदीदित्येवमादेः कथं चित्संबन्धापादनं, तत्र मन्त्रेषु कः संदेहस्तस्मादुपयोगविशेष एव चिन्तनीय इति। तत्र विधिस्तुतित्वे तावत्स्वयमेव निराकरिष्यति, अविधिसरूपत्वात्। प्रदेशान्तरविहितस्तुत्यसंभवाच्च। परिशेषात्स्वरूपप्रयोगे सत्यर्थोच्चारणयोः किं विवक्षितमिति विचार्यते। सामसु तु वाचकत्वाभावादात्मप्रयोगमात्राक्षराभिव्यक्तिपरत्वगतसंदेहः। कथं पुनः पूर्वपक्षवादिनः श्रुत्यसंयुक्तानां केषां चिन्मन्त्राणां प्रयोगसिद्धिः। केचिदाहुः। अप्रयोगार्थमेवासावविवक्षितार्थत्वे यतते। न ह्यनाश्रितार्थान्मन्त्रान्कश्चिदपि प्रयुङ्क्ते। अतो यच्च किमुच्चारणमात्रेणोपकुर्वन्तीति सिद्धवत्प्रयोगाभिधानं नैतदङ्गसैव द्रष्टव्यम्। अयं हि तत्र दुष्टोऽभिप्रायः। यदि नामोच्चारणमात्रोपकारं वक्ष्यति। तत्र शक्ष्याम्यस्याप्रयोगं वक्तुमिति। यदपि प्रयोजनकथने बर्हिर्देवसदनं दामीत्ययं बर्हिर्लवनात्प्रच्याव्यिते तदनेन प्रकारेण प्रयोगप्रच्यावनमेव द्रष्टव्यम्। अथ वा याज्ञिकदर्शनेनाविगानात्प्रयोगसिद्धिमविचार्येतरो विचारः। किमर्थं तु याज्ञिकप्रसिद्धिरुपेक्षिता यतः सैव तावद्युक्तायुक्तत्वेन न विचार्यते। तत्रायमभिप्रायः। सर्वथा तावद्दृढमेषां स्मृतिन्यायेन प्रयोगित्वमवस्थितं तत्र शक्यं बाधितुं तस्यैव त्विदं मूलं निरूप्यते। तद्यदि पूर्वपक्षो भविष्यति ततोऽन्यप्रमाणाभावाद्विनियोजकश्रुत्यनुमानेन मूलं कल्पयिष्यामः। सिद्धान्ते तु लिङ्गप्रकरणयोरेव मूलत्वाध्यवसानम्। अथ वैवं पूर्वपक्षेऽपि प्रयोगः। स्वाध्यायाध्ययनविधिनैव मन्त्राः पुरुषर्थाय नीयन्ते। तथा हि। दर्शपूर्णमासादिभिः क्रमप्रकरणाभ्यां यावत्संस्पृश्यते तत्सर्वमुपकारकत्वेन स्वीक्रियते। प्रयाजादिवाक्यानि मन्त्ररूपमपि च। § 45

तत्र प्रयाजादिवाक्यार्न्यंथ समर्प्य चरितार्थानि स्वरूपसंस्पर्शे सत्यपि प्रयोज्यतां न प्रतिपद्यन्ते। मन्त्राः पुनः कर्मानोपयिकार्थाभिधायित्वात्तेनांशेनानपेक्षिताः। स्तुतिविधिस्मृतीनां तु प्रकारान्तरेण सिद्धिरिति प्रयोगवचनेनैषां रूपमेवाङ्गीक्रियते। स्वाध्यायाध्ययनचोदनाऽपि प्रत्यासन्नतरमन्त्रस्वरूपमेव समर्प्य चरितार्थत्वान्न विप्रकृष्टमर्थाभिधानं यावद्गच्छति। प्रयाजादिबाक्येष्वपि तावद्रूपग्रहणमेव प्रसक्तमासीत्, तत्त्वभिप्रेतार्थदानेन युक्तं न त्विह 145
तथा किंचित्। शब्दे च कार्यस्यासंभवादर्थे कार्यं विज्ञायते। मन्त्राणां तु शब्द एव संभवति। अवश्यं ह्यर्थप्राधान्यपक्षेऽपि पुरुषः शब्दे नियोक्तव्यः। तद्व्यापारोत्तरकालत्वादर्थाभिधानस्य। तस्माद्रूपमेवाङ्गम्। तथा च तदर्थशास्त्रादीन्युच्यन्ते। परिहारसूत्रक्रमानुरोधेन विपर्यस्तान्युदाहरणान्यभ्यादानात्प्रभृति दातव्यानि। भाष्यकारस्तु यथातथोदाहृतैरपि कार्यसिद्धिं म-

त्वेवमुपन्यस्तवानुरुप्रथा उरुप्रथस्वेत्यादि। **यथासाक्ष इति**। नीलीरोगाद्युपहतेन्द्रियस्य चक्षुरस्त्येवेति परैर्दृश्यते, परेण तु नीयमानमुपलभ्य न पश्यतीति ज्ञायते, तथा मन्त्ररूपमालोचयतामर्थप्रकाशनशक्तिबुद्धिर्यद्यपि भवति तथाऽपि परेण विनियोगं दृष्टवा स्वयं विनियोजकशक्तिर्नास्तीति गम्यते। ततश्चार्थातन्त्रत्वम्। अन्यथा स्वयमेव विनियुज्येत। **नन्वर्थवादार्थमिति**। लिङ्गप्रकरणानुमितमन्त्रविधिस्तुत्यभिप्रायम्। **न हीतिच्छेदः**। विधिनैकवाक्यतयाऽर्थवादाः स्तुत्यर्था, कल्पिताः। प्रदेशान्तरस्थस्य तु प्रत्यक्षस्याऽऽनुमानिकस्य वा विधेरात्मनः समीपेऽर्थवादमपश्यतः स्वयं प्ररोचनाशक्त्याविर्भाविन व्यावृत्तापेक्षत्वान्न दूरस्थया स्तुत्या कार्यम्। तथाऽभ्यादाने रूपादेव प्राप्तत्वान्मन्त्राणां तां चतुर्भिरादत्त इत्यनर्थकं वचनम्। चतुःसंख्यामपि ब्रुवदेतन्मन्त्रगतामेव ब्रूयान्न क्रियागताम्। न ह्यन्यगुणोऽन्यगामी भवति। न च निष्क्रियत्वात्कर्माङ्गत्वेनोपदेष्टुं शक्यते। तेनैवं वाक्यं भेदेद्य एते चत्वारस्तैरभ्यादानं कुर्यात्ते च प्रागेव वचनाच्चत्वार इत्यानर्थक्यम्। क्रियानङ्गत्वादेव च संख्यायाः समुच्चयशब्दाभावाच्च प्रत्येकं च सामर्थ्याद्विकल्पः प्रसज्यमानो न शक्यो वारयितुम्। अस्मत्पक्षे पुनर्वचनगम्यत्वाददृष्टस्य न चतुर्भ्यः प्राग-
146 स्तित्वे प्रमाणमिति युक्तः समुच्चयः। उभयोरपि तावद्रशनयोरश्वगर्दभबन्धनार्थमादानमर्थप्राप्तत्वान्न विधीयते। यदि मन्त्रोऽपि रूपात्प्राप्तोऽनर्थकं वचनम्। परिसंख्येति परेर्वर्जनार्थत्वात्तद्विषया बुद्धिरभिधीयते। साऽपि गर्दभरशनाया आदाने वा स्यान्मन्त्रे वा। उभयथा च त्रिदोषी। विधिपरः सन्न गृह्यत इति स्वार्थं जह्यात्। परस्य च वाक्यस्य गर्दभरशनां नेत्यस्यार्थे कल्पेत। प्राप्तं च रूपादर्थाद्वा मन्त्रमादानं वा बाधेत। अदृष्टार्थत्वे त्वन्धन्यायेन यत्रैव नीयते तत्रैव वर्तिष्यते। यदि चाश्वाभिधानीमिति संबन्धः स्यात्ततः परिसंचक्षीतापि न त्वसावस्ति। कारकाणां क्रियापरिहारेणान्योन्यसंबन्धाभावात्। तेन वाक्यमपि क्रिययैव संबध्नीयात्। एका च सा। प्रकरणापूर्वसंयोगश्चाविशिष्टस्तस्मान्न परिसंख्याप्रयोजनं कथयति। **अतो न प्रमाणं बर्हिरित्यादि**। तदा हि महाप्रयोगवचनेन सर्वे मन्त्राः केवलप्रधानार्थास्तत्प्रयोगाबहिर्भाववृत्तयो नाङ्गैः संबध्येरन्। पाठक्रमानुरोधात्तु तदाऽपि नैव व्युत्क्रमेण प्रयोगः कर्माण्यनादृत्य सकृदेवानुवाकमध्यायं वा पठित्वाऽनुष्ठीयते। § 46

अग्निर्मूर्धेति योऽर्थः प्रतीयते स मूर्धाग्निरित्यनेनापीत्यनर्थको नियमः। यस्य त्वदृष्टार्थता तस्य क्रमान्यत्वे तदुच्चारणजन्यादृष्टप्रमाणाभावात्क्रमान्यत्वं न युक्तमिति नियमार्थवत्ता। अय नियतप्रत्यायनाददृष्टं कल्प्येत तदुच्चारणादेवोपपद्यते तदधीनत्वान्नियतप्रतीतेः। यस्तु दृष्टार्थेषु प्रकृतिप्रत्ययसमासेषु नियमो दृश्यते यथेन्द्राग्नी नीलोत्पलं राजपुरुषश्चित्रगुर्निष्कौशाम्बिरिति। युक्तं तत्र विपर्ययेऽपशब्दार्थान्यत्वानर्थक्यप्रसङ्गात्। अजाद्यदन्तविशेषणत्वादिनिमित्तो हि तत्र नियतः पूर्वनिपातः स्मर्यते तेना-
147 ग्नीन्द्रावित्यसाधुत्वं पुरुषराज इत्यर्थान्यत्वं कौशाम्बिनिरित्यनर्थकत्वम्। यस्त्वग्नीन्द्राविति क्वचित्प्रयोगः स च्छान्दसोऽग्नेर्वाऽभ्यर्हितत्वस्य विवक्षयेति मन्त-

व्यम्। तुल्यकक्षार्थप्रतीताविन्द्राग्नीपदमेव व्यवस्थितम्। नन्विहापि क्रमान्यत्वादमन्त्रत्वं स्यात्। तदेवार्थपरत्वे सति तदविनाशे तु किं निमित्तमिति न विद्मः। तेन मन्त्रप्रसिद्धौ वाक्यनियमादित्यपि सूत्रम्। अथ वाऽस्त्वप्रकरणाधीतवाक्यनियमात्। न ह्यर्थाभिधाने ऽन्यदीयस्याऽऽत्मीयस्य च विशेषः। § 47

अथ वा मन्त्रपौरुषेयवाक्ययोस्तुल्येऽर्थाभिधानसामर्थ्ये मन्त्रवाक्यनियमोऽदृष्टार्थः। अथ वाऽनेकध्यानादिस्मरणोपायप्रसङ्गे वाक्यनियमात्। न हि दृष्टेऽर्थे मन्त्रस्य ध्यानादेर्वा कश्चिद्विशेष इत्यदृष्टार्थता। § 48

न ह्यविद्वान्विहितोऽस्तीत्यवश्यं तावदग्नीधाऽऽत्मीयाः पदार्थाः प्रागेव कर्मप्रक्रमादवगन्तव्याः। तत्र प्रैषः पिष्टपेषणन्यायेनार्थं ज्ञापयितुमशक्नुवन्नदृष्टार्थो भवति। अथ स्मारको मन्त्र इत्युच्यते। तदपि नास्ति। ब्राह्मणज्ञानाभ्यासपाटवनिमित्तसंस्कारादेव तत्सिद्धेः। संस्काराभिव्यक्तिहेतुरपि पूर्वपदार्थसमाप्तिर्ब्राह्मणमेव वा भविष्यति नार्थो मन्त्रैः। तत्र यदुच्यते संस्कारविशेषो भविष्यतीति नासावदृष्टादन्यः संभवत्यतः पूर्वपक्षापत्तिः। यदि हि प्रतीतोऽप्यर्थो नैव दृष्टं साधयति ततो यत्तद्दूरमपि गत्वाऽवश्यं कल्पनीयं तदुच्चारणादेव वरमिति। § 49

न चतुःशृङ्गादि किंचित्कर्म तत्संबन्धि वा प्रकृतौ विकृतौ वा विद्यते। यद्यपि च गुणवादेन किंचित्स्यात्तथाऽपि तदनुष्ठानाभावान्न तत्स्मृत्या
कार्यम्। न च ज्ञायते क्व प्रदेशे प्रयुज्यतामिति। तत्र मन्त्रपाठक्र- 148
मानुरोधेनोच्चारणमापततीति सिद्धः पूर्वः पक्षः। मा मा हिंसीर्मा मा संताप्तमित्यादीनि वेदिहविर्धानादिविषयत्वादचेतनेऽर्थबन्धनादित्यत्राप्युदाहरणम्। इह त्वप्रसक्तायां हिंसायां प्रतिषेधानर्थक्यम्। § 50

ओषधे त्रायस्व, शृणोत ग्रावाण इति च संबोधनं कार्यनियोगाभिमुख्यकरणार्थम्। न चाचेतनस्याऽऽभिमुख्यं संभवति। न च पशुत्राणे प्रातरनुवाकश्रवणे वा प्रैषेण प्रवृत्तिरुपपद्यत इत्यानर्थक्यमर्थविवक्षायाम्। § 51

द्युत्वमन्तरिक्षत्वं चादितेरेकानेकत्वं च रुद्रस्य विप्रतिषिद्धम्। न चैष विप्रतिषिद्धोऽर्थः कर्मोपयिकः। कथं वाऽदितिर्देवताऽन्तरिक्षं द्यौर्वा भवेत्। न च स्तुत्यर्थतयाऽपि हेतुद्वयं परिहर्तुं शक्यं ब्राह्मणे हि विधिशेषभूताः स्तुतयोऽर्थवन्त्यो भवन्ति। मन्त्रस्तुतिस्त्वप्रयोजनत्वान्नाऽऽदर्तव्या। § 52

स्वाध्यायाध्ययनस्य कर्मार्थत्वाद्यत्कर्मण्युपयोक्ष्यते तदभ्यसितव्यं तच्चैवं विद्वांसः सन्तो वृद्धाः शिष्यानक्षरावधारण एव प्रवर्तयन्ति संनिहितेऽप्यर्थे न
तद्वचनाभ्यासे। तेनावश्यं तेषामुच्चारणमेवाङ्गत्वेनाभिप्रेतमिति। § 53 149

केचित्पदार्था ज्ञानेनाविज्ञेयाः। केषां चित्तु वाक्यार्थ एव न ज्ञायते। न च मन्त्रार्थः सत्तामात्रेणोपकरोति क्रियावेलायामस्मर्यमाण इति यदेकान्तेन शक्ये कर्तुमुच्चारणं तदेव कार्यमित्यवधार्यते। § 54

९ न] जै॰ सू॰ ( ३-८-८ )।

अर्थप्रकाशनपक्षे यस्य योऽर्थः स एव तेन प्रकाशयितव्यः। केचिच्चानित्यैरकर्माङ्गभूतैश्चार्थैरर्थवन्तो मन्त्रा लक्ष्यन्ते यथा किं ते कृण्वन्ति कीकटेषु गाव इति। अयं हि दृढेनाध्येतृणां स्मरणेन विश्वामित्रस्याऽऽर्षं गम्यते। तेन किल कर्मार्थं धनं प्रार्थयमानेनेन्द्रोऽभिहितः। त्रैलोक्याधिपते याः कीकटेषु जनपदेषु गावस्तास्तव किं कुर्वन्ति। ते हि नास्तिकाः किं क्रतुनेति वदन्तो न किंचित्कर्मानुतिष्ठन्ति। अतश्च ता नाऽऽशिरं सोमसंस्कारार्थं दुहते न धर्मं तपन्ति। न धर्मतपने पयोदानेन साधनीभवन्ति। तस्मात्प्रमगन्दस्य कीकटाधिपतेर्यद्वेदो—धनं तदस्माकं नैचाशाखं नगरमाभर। **हग्रहोर्भश्छन्दसीति** भकारः। अथ वाऽस्मान्प्रति तद्विभृहि धारय पोषय चेत्येतन्नो मघवन्रन्धया—साधयास्माकमिति। छान्दसं दीर्घत्वम्। यद्येतद्विवक्षितं तथा सत्यादिमदर्थाभिधानाद्वेदस्य कृत्रिमत्वेनाप्रामाण्यं प्रसज्यते। न चान्यो मन्त्रार्थः शक्यते वक्तुमप्रतीतेः। अतोऽर्थसदसद्भावावनादृत्याक्षरोच्चारणं फलवदाश्रयणीयमिति॥ ३१॥ § 55

150 मन्त्रोच्चारणं तावदक्षरग्रहणेन निराकाङ्क्षीकृतं न साक्षात्क्रत्वङ्गत्वं प्रतिपद्यते। अक्षराणां च द्रव्यवदनितिकर्तव्यतात्मकत्वात्प्रकरणेनाग्रहणम्। एवं पदार्थज्ञानस्य वाक्यार्थप्रत्ययेन नैराकाङ्क्ष्यादग्रहणम्। वाक्यार्थप्रत्ययस्त्वकृतार्थः प्रकरणे विपरिवर्तमानः क्रियात्मकत्वात्प्रयोगवचनाकाङ्क्षितः कर्मसमवेतानुष्ठास्यमानार्थस्मृतिफलत्वेनेतिकर्तव्यता भवति। तत्रादृष्टकल्पनानिमित्ताभावः। समाम्नानान्यथानुपपत्त्या हि तत्कल्प्येत नोपपन्नेऽर्थवत्त्वे। यद्यपि च तत्कल्पनावसरो भवेत्तथाऽपि कामं वाक्यार्थप्रत्ययादेव न त्वौपयिकेऽकार्थप्रतीतिनिराकाङ्क्षाद्वाक्यात। अवश्यं च दृष्टादृष्टयोर्विनियुज्यमानस्य प्रमाणमुपन्यसितव्यम्। इह च प्रकरणाददृष्टार्थता लिङ्गाच्च दृष्टार्थता। न च प्रकरणमशक्येऽर्थे विनियोक्तुमर्हतीत्येकान्तेनैतदापतति यच्छक्नुयात्तन्मन्त्रेण कुर्यादिति। न चासावदृष्टं शक्नोतीति लौकिकं वैदिकं वा प्रमाणं विद्यते। तस्मादुभयोर्लिङ्गप्रकरणयोर्दृष्टार्थप्रयोगेणैकवाक्यता। एवं च सति याज्ञिकप्रयोगप्रसिद्धेर्न मूलान्तरकल्पनाक्लेशो भविष्यति। अतः स्वाभाविकमेवार्थप्राधान्यवास्थितम्। नैवमिति। न दृष्टोऽर्थो निर्वृत्त इत्येतावतैव तादर्थ्यमवसीयते। पुरुषार्थानुपयोगेन स्वाध्यायाध्यनविधेरानर्थक्यात्। न च बुद्धशास्त्राविद्यमानवचनाचेतनार्थबन्धनान्मन्त्रार्थोपयोगः। तत्र यदि दूरेऽप्यदृष्टकल्पनातो न मुच्यामहे ततोऽतिक्रमकारणाभावादुच्चारणादेव कल्पनीयम्।
§ 56

उभयवादिसिद्धत्वादुच्चारणकर्तव्यतायास्तत्प्रभवत्वाच्चादृष्टकल्पनस्य। त-
त्रोच्यते यज्ञे **यज्ञाङ्गप्रकाशनमेव प्रयोजनमिति**। यद्यपि लोकवत्तैर्न संव्यव-
151 हारस्तथाऽपि तत्स्वरूपप्रकाशनमात्रमेवानुष्ठातॄणामुपकरिष्यति। अतश्च याव-
न्मात्रमेवानौपयिकं संबोधनादि कामं तन्न विवक्ष्येत न तु तद्वशेन सर्वमेव
त्यक्तव्यं न ह्यैकरूप्यं नाम केनचिन्नियतम्। तस्माद्यथादर्शनाभ्युपगमाद्व-

र्हिर्देवसदनं दामीत्येवमादीनां तावदविहतमर्थप्राधान्यम्। तां चतुर्भिरादत्त इत्यत्रापि वदामः॥ ३२॥ § 57

यद्यपि मन्त्राः प्राप्ताः सामर्थ्येन तथाऽपि चतुःसंख्यामादाने विधास्यति। तत्रारुणैकहायनीन्यायेन परस्परनियमे सति मन्त्रगतचतुःसंख्याविशिष्टमादानं चोदितं समुच्चयादृते कर्तुं न शक्यत इत्यर्थात्समुच्चयफलम्। अथ वा यावल्लिङ्गानुमिताः श्रुतयः प्रतिमन्त्रं कल्पयितुमारभ्यन्ते तावदनेन प्रत्यक्षवचनेन चतुःसंख्याविशिष्टास्ते विहितास्तेनाप्राप्तविधिरेव वचनम्। तत्र तु विनाऽप्येतेन मन्त्रेष्वर्थात्प्राप्तवत्सु तत्परत्वे मन्दं फलमित्यनन्यलभ्यचतुःसंख्यार्थं तस्योपदेशः॥ ३३॥ § 58

यावद्धि मन्त्राम्नानमनवगतप्रयोजनं प्रकरणी चाकृतार्थस्तावद्यत्तत्सिद्ध्यर्थं कल्प्यते तत्सर्वं वैदिकं भवति। नैराकाङ्क्ष्योत्तरकालं तु कल्पितमपि पौरुषेयत्वादप्रमाणं स्यात्। § 59

न च श्रुतिमकल्पयित्वा लिङ्गादेः स्वातन्त्र्येण प्रामाण्यमिति वक्ष्यते। तदेतदाह। **सति च वाक्ये लिङ्गं विनियोजकं तच्चास्य नास्तीति**। यदेव हि प्रकरणादनेन यजेत रशनां वा गृह्णीयादिति कल्पयितुमिष्यते तदेवाश्वाभिधानीमित्यनेनापहारो मन्त्रस्य। यदपि **नैवं संबन्ध इत्यादत्त इति कथं तर्हीत्यश्वाभिधानामिति**। तत्कारकसंबन्धासंभवात्क्रिययैव स- 152
ह सामान्याभिप्रायेण द्रष्टव्यम्। तस्मान्नाऽऽदानमात्रे विधीयते किं तर्ह्यश्वाभिधानीविशिष्टे। अथ वा फलतः पश्चात्तनकारकसंबन्ध उपन्यस्यते। सर्वथा दर्शशास्त्रता नास्ति। यदि हि यदेव मन्त्रवचनात्प्राप्नुयात्तदेव प्रत्यक्षवचनेनोच्यते ततो वयमुपालभ्येमहि। नन्वेवमप्राप्तविधिरेवायं संजात इति न वक्तव्यं परिसंख्येति। फलेनैवमभिधानाददोषः। सर्वत्र हि परिसंख्याशब्दादेवकाराद्वा विना न श्रुत्या परिसंख्या नियमो वोच्यते विधिरेव त्वेवंजातीयकस्य फलेनैवं व्यपदेशः। कस्तर्हि विधिनियमपरिसंख्यानां भेदः। उच्यते। **विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति। तत्र चान्यत्र च प्राप्ते परिसंख्येति कीर्त्यते**॥ विधिरेव हि केनचिद्विशेषेणैवं भिद्यते। तत्र योऽत्यन्तमप्राप्तो न च प्राप्स्यति प्राग्वचनादित्यवगम्यते तत्र नियोगः शुद्ध एव विधिर्यथा व्रीहीन्प्रोक्षतीति। यत्र तु प्राग्वचनात्पाक्षिकी प्राप्तिः संभाव्यते तत्राप्राप्तिपक्षं पूरयन्यो विधिः प्रवर्तते स नियन्तृत्वान्नियम इत्युच्यते यथा व्रीहीनवहन्तीति। तण्डुलनिष्पत्त्यर्थाक्षेपादेव तत्सिद्धेर्न तत्प्राप्तिमात्रं विधेः फलं किं तर्ह्यप्राप्तांशपूरणम्। तदप्राप्तिपक्षे च तण्डुलैरुपायान्तराण्याक्षिप्येरन्, पूरणे तु सति या तेषां निवृत्तिरसावर्थान्न वाक्यात्। न च तद्वारणं नियमः। परिसंख्या हि तथा स्यात्। प्रत्यासन्नां वाऽवहन्तिनियततामुत्सृज्य नान्यनिवृत्तिफलकल्पनावसरः। तत्प्रसक्तिद्वारा त्ववहन्तेरनियतिरासीदिति नियमान्तर्गतैवार्थान्निवृत्तिर्गम्यते। न च प्राप्ते सति विधिरयं प्रवृत्तो येनास्यान्यनिवृत्त्यर्थता कल्प्येत। प्रागेव तु प्रवर्तमानेनार्थस्य प्रापकशक्तिनिरोधादन्याप्राप्तिः कृता सा चार्थलभ्येति न तयैव व्यपदिश्यते। यः पुनः प्राङ्नियोगात्तत्र चान्यत्र च प्राप्नुयादिति संभाव्यते

यत्र वा यच्चान्यच्च सा परिसंख्या यथाऽत्रैवोदाहृते यथा च गृहमेधीये पञ्चमे पक्षे। अत्रापि च न प्राप्ते सत्येषा प्रवर्तते प्रापकस्य शास्त्रस्याननुमितत्वात्। कथं तर्हि। यद्येतद्वाक्यं नाभविष्यत्तत एनं प्राप्स्यदिति। सर्वस्य प्रत्यक्षस्य वाक्यस्य नानुमानिकवाक्यप्रतिबन्धमात्रं फलमिष्यते। किं हि तेन पठितेन यस्यान्यतोऽप्यर्थः सिध्यति तदर्थं गर्दभरशनानिवृत्तिः फलं कल्प्यते। तेनैवं कल्प्यते कृत्वाचिन्तान्यायेन यदि नामैवं वाक्यं न भवेत्ततः कीदृशमनुष्ठानं स्यात्। तत्र मन्त्रप्राप्तिस्तावदेकान्तेन सिध्येदश्वाभिधान्यां तद्वदेव तु गर्दभरशनायामपि प्रसज्येत। § 60

153 यदा त्वनेन वाक्येन प्रत्यक्षेण नैराकाङ्क्ष्यादविशेषविनियोगसमर्थवाक्यानुमानं निषिद्धं तदा केवलाश्वाभिधानीविषयत्वसिद्धिरित्यपौनरुक्त्यादर्थवद्वाक्यम्॥ ३४॥ § 61

यद्यपि प्रदेशान्तरस्थत्वान्मन्त्रविधानं न स्तूयते तथाऽपि प्रथनविधानात्तत्प्ररोचनया च सकलं वाक्यमर्थवत्। तस्य ह्येतदेवोत्पत्तिवाक्यम्। ननु च पुरोडाशान्यथानुपपत्तिप्राप्तत्वात्प्रथनं न विधातव्यम्। नैतन्नियोगतः प्राप्नोति। द्रुततरं हि पिष्टमप्रथितमपि प्रथेत। विधाने तु सति तादृशं कर्तव्यं येन प्रथयितव्यं भवति। एवं चाध्वर्युकर्तृकताऽपि सिध्यति। पठ्यमानं ह्याध्वर्यवसमाख्यां लब्ध्वा कर्तृविशेषं नियच्छति। अर्थप्राप्तं त्वसमाख्यातत्वान्न नियामकं स्यात्। एवमर्थं च यद्यप्येकान्ततोऽर्थात्प्राप्नुयात्तथाऽपि वाक्येनैव प्रापयितव्यम्। तस्मादुपपन्ना प्रथनस्तुतिः। एवमपि यज्ञपतिमेव तत्प्रथयतीत्यनेन स्तुतौ सिद्धायां मन्त्रग्रहणमनर्थकम्। न। मन्त्रस्यैव स्तुत्यर्थमुपादानात्, प्रथनं कर्तव्यं तस्य हि क्रियमाणस्यायं मन्त्रः साधनं भवति। तत्र चोरु ते यज्ञपतिः प्रथतामित्येतान्यक्षराणि प्रयुज्यन्ते तथा सति यज्ञपतिः प्रथितो भवतीति गुणो लभ्यते। **किमेतदेवास्य फलमिति नेत्याह**। स्तुत्यर्थमेव तद्द्रव्यसंस्कारकर्मस्विति न्यायात्। यद्यप्यत्र करणमन्त्राभिहितत्वात्फलं कल्प्यते तथाऽपि ब्राह्मणे तावत्तत्संकीर्तनमेकान्तेन स्तावकम्। मन्त्रोऽपि तु लिङ्गविनियोज्यो न फलकल्पनायै प्रभवति। करणविभक्तिविनियुक्तानां हि सकलोपयोगान्यथानुपपत्त्या फलसाधनता युक्ता लिङ्गानुमिता पुनः श्रुतिराकाङ्क्षावशेन क्रियाप्रकाशनमात्रविनियोगायैव ज्ञाय-
154 ते। तेनैवंजातीयको मन्त्रोऽपि प्रधानफलसंकीर्तनात्मिका स्तुतिरेवाभ्युपगन्तव्या। **कथमसति प्रथन इति** कस्यायं प्रश्नः किं विध्युद्देशवर्तिनः पुरोडाशप्रथनस्याथार्थवादगतस्य यज्ञपतिप्रथनस्येति। द्विधाऽपि चायुक्तं पुरोडाशप्रथनं तावद्विधीयमानत्वादेव न प्रष्टव्यम्। न च मन्त्राभिधानात्तस्यास्तित्वं किं तर्हि स्वरूपसद्भावादित्युत्तरमप्यसंबद्धम्। अथ पुनरितरार्थवादन्यायेन कथमरुदतीतिवत्प्रश्नः। तथाऽप्युत्तरमसंबद्धम्। **मन्त्रेणाध्वर्युः पुरोडाशमिति** पुरोडाशेन संबध्यते न यजमानेन। तस्मादग्रन्थ इति केचित्। उभयथाऽपि त्विदमदुष्टम्। अस्तु तावत्पुरोडाशप्रथने। तत्र हि याज्ञिकानां केषांचिदयं मन्त्रः कृत्वा

प्रथनमभिमर्शने प्रयुज्यते सोऽयं स्वसिद्धान्तेन पृच्छति कथमसति—वृत्ते प्रथने प्रयुज्यमानेनानेन प्रथयतीति। § 62

तत्राभ्युपेत्यवादेनोत्तरं **मन्त्राभिधानादिति**। यद्यपि प्रथनं प्रथमकृतत्वान्नास्ति मन्त्रेण नु सत्तयोच्यत इत्युपपन्नः शब्दार्थः। अथ वा सर्वप्रयोजकव्यापाराणां प्रयोज्यव्यापारपूर्वकत्वमर्थरूपेण स्थितमिति शब्दैरपि तथैव प्रवर्तितव्यम्। इह च स्तुतिविषयसिद्ध्यर्थं प्रथयतीत्येतद्विधीयत इत्युक्तम्। तत्राऽऽह नायं विधिः संभवति विषयानुपपत्तेः। प्रयोजकव्यापारो हि प्रतीयमानस्तद्गोचरः स्यात्। स चानुपात्तप्रयोज्यव्यापारत्वान्न प्रतीयते तेन यथा यजेतेत्यनुक्ते याजयतीति नोच्यते तथेह प्रथेतेत्यनुक्ते प्रथयतीति न वाच्यम्। न चेह पुरोडाशः प्रथेत तेन वा प्रथितव्यमित्युपादानमस्ति। तस्मिन्नसति प्रथयतीत्यनुपपन्नम्। तदुपपादयति **मन्त्राभिधानादिति** प्रतीकगृहीतमन्त्रोपात्तप्रयोज्यव्यापारं हि ब्राह्मणं प्रथयतीति विधत्ते। **यश्च प्रथस्वेति ब्रूत इत्यनेन** पुरोडाशकर्तृकां क्रियामध्वर्युः प्रेष्यतीत्येतद्दर्शयति। यद्यपि च संभाव्यमानक्रियाणां प्रयोज्यानामनुपादायापि व्यापारं शब्देन प्रयोजकव्यापारः सिध्यतीत्येतदप्युत्तरं संभवति तथाऽपि तूत्तरविभवादुपादानपूर्वकतैवोक्ता। अथ वाऽस्तु यजमानप्रथने **कथमसतीति** सर्वस्तुतीनां किंचिच्छब्दगतमर्थगतं वाऽऽलम्बनमुक्तम्। तदत्र किंनिबन्धना स्तुतिरिति। तदभिधीयते। मन्त्रोक्तमर्थमाश्रित्य स्तुतिः प्रवर्तिष्यते। **मन्त्रेणाध्वर्युः पुरोडाशं ब्रूत** इति न पुरोडाशप्रथनोपादानाभिप्रायं किं तर्हि पुरोडाशं ब्रवीति, उरु ते यज्ञपतिः प्रथतामिति। प्रथस्वेत्यपीतिकरणः प्रभृत्यर्थो न शब्दः पदार्थतायै। **यश्च प्रथस्वेति ब्रूत इत्यपि** तदाद्यर्थ एव। प्रथतामिति ब्रूत इत्यर्थः। यश्चैवं ब्रूते स प्रथयत्यनेनैव। गुणवादात्। अथ वा तदाचष्ट इत्येवं मुख्यमेव प्रथयतीत्यर्थमाश्रित्य प्रथमबुद्ध्या सिद्धा स्तुतिः॥ ३५॥ § 63

अदृष्टार्थोच्चारणवादिनोऽपि तन्नियमादपरमवश्यं कल्पनीयमदृष्टं तन्म- 155
मापि प्रत्यायननियमाद्भविष्यतीत्यविरोधः। एतेन मन्त्रत्वादिनियमः प्रत्युक्तः। सत्स्वप्युपायान्तरेषु विशिष्टानुपूर्वीकमन्त्रविशेषाम्नानादुपायान्तरनिवृत्तौ नियमादृष्टमात्रकल्पनया सिद्धमर्थाभिधानम्॥ ३६॥ § 64

येयं संप्रैषे अग्नीदग्नीनित्यत्र बुद्धबोधनासंभवादभिधानकर्मगर्हाऽभिहिता साऽप्यनुपालम्भः। स्मरणसंस्कारार्थत्वात्। बुद्धीनां हि क्षणिकत्वात्स्वाध्यायकालोत्पन्नानां न प्रयोगकालं यावदवस्थानं तत्रावश्यं केन चिद्धयानादिनाऽनुसंधाने कर्तव्ये मन्त्रो नियम्यते। § 65

अथ वा **संस्कारत्वादिति**। यदि हि बोध एवावतिष्ठते ततोऽनवकाशत्वं भवेदिह तु तदीयसंस्कारमात्रावस्थानात्तदभिव्यक्तिद्वारेणास्ति ज्ञानोत्पत्त्यवसर इति न मन्त्रानर्थक्यम्॥ ३७॥ § 66

चत्वारि शृङ्गेति रूपकद्वारेण यागस्तुतिः कर्मकाल उत्साहं करोति। हौत्रे त्वयं विषुवति होतुराज्ये विनियुक्तः। तस्य चाऽऽग्नेयत्वादहश्चाऽऽदित्यदेवतत्व-

२ विषु] गवामयनान्तर्गत एकाहो विषुवानिति।

156 संस्तवादादित्यरूपेणाग्निस्तुतिरुपवर्ण्यते। तत्र चत्वारि शृङ्गेति दिवसयामानां ग्रहणम्। त्रयो अस्य पादा इति शीतोष्णवर्षाकालाः। द्वे शीर्षे इत्ययनाभिप्रायम्। सप्त हस्ता इत्यश्वस्तुतिः। त्रिधा बद्ध इति सवनाभिप्रायेण। वृषभ इति वृष्टिहेतुत्वेन स्तुतिः। रोरवीति स्तनयित्नुना। सर्वलोकप्रसिद्धेर्महान्देवो मर्त्यानाविवेशेत्युत्साहकरणोपकारेण सर्वपुरुषहृदयानुप्रवेशात्। एवमनेन मार्गेणास्ति तावद्धर्मसाधनस्मृतिः॥ ३८॥ § 67

**अदितिर्द्यौरदितिरिति**। नात्र द्युत्वादीनि विवक्षितानि किं तर्ह्यदितौ प्रकाशयियितव्यायामविद्यमानविप्रतिषिद्धधर्मोपादानं स्तुत्यर्थम्। गुणवादेन त्वौदुम्बराधिकरणवत्संवादो योजयितव्यः॥ ३९॥ § 68

यद्यपि पूर्वपक्षेऽयमभिप्रायो नोपन्यस्तस्तथाऽपि संभवादुपन्यस्यते। यदि हि स्वाध्यायकालेऽर्थवचनमुपयुज्येत ततस्तदाश्रीयेत न त्वेवमस्ति कर्मभिरसंयोगात्। तदनभ्यासस्तु प्रोक्षणादिवत्सौकर्यात्॥ ४०॥ § 69

यत्तु परं कारणमविज्ञेयत्वमुक्तं तदयुक्तम्। सत एवार्थस्य पुरुषापराधेनाविज्ञानात्। तत्र चार्थप्रकरणसूक्तदेवतार्षनिगमनिरुक्तव्याकरणज्ञानान्यधिगमोपायाः। तेषां ह्येवमर्थमेव परिपालनम्। यथैव च व्याकरणेन नित्यपदान्वाख्याने क्रियमाणे लोपविकारादीनामुपायत्वेनोपादानमव्युत्पन्नाश्च
157 तैरेव पदोत्पादनमिव मन्यन्ते। तथाऽत्र नित्यवाक्यार्थप्रतिपत्तावार्षोपाख्यानमनित्यवदाभासमानमुपायत्वं प्रतिपद्यते। तत्र यथा कश्चिद्व्याचक्षाणः पदतदवयवादीनां चेतनत्वमिवाध्यस्य विशेषबाधादिव्यापारं निरूपयत्येतेनैवमुक्तोऽयमेवं प्रत्याहेति। यथा च पूर्वपक्षोत्तरपक्षवादिनौ व्यवहारार्थं कल्पितावेवमृष्यार्षेयविविषया कल्पना। अथ वा परमार्थेनैवेदमृषिभिस्तथोक्तं न तु स मन्त्रस्तैरेव कृतस्तदानीं वा पुरुषान्तरेष्वसन्नेव तेषामाविर्भूतः। किं तर्हि यथाऽद्यत्वेऽपि कश्चित्प्रकृतार्थविवक्षायां तदर्थं वाक्यमुपादित्समानस्तदर्थसरूपं मन्त्रं श्लोकं वाऽन्यदीयं स्मृत्वा स्ववाक्यस्थाने प्रयुङ्क्ते तत्प्रत्ययेन चान्ये तदर्थमवधारयन्त्येवमिहापि वेदार्थविद्भिस्तद्वासितान्तःकरणैर्भृग्वादिभिरात्मीयव्यवहारेषु श्रुतिसामान्यरूपेण विशिष्टार्थप्रत्यायनार्थं मन्त्राः प्रयुक्तास्तद्बलेन चास्मदादीनां तदनुरूपाऽनित्यार्थप्रतिपत्तिर्भवति। प्रत्ययदृढत्वार्थमेव चाऽऽर्षस्मरणम्। तत्रैवमुपाख्यानं स्मरन्ति। यथा किल भूतांशो नाम कश्चिदृषिर्जरामरणनिराकरणार्थी सृण्येवेत्येवमादिना सूक्तेनाश्विनौ स्तुतवान्। भूतांशो अश्विनोः काममप्राइति चान्ते संकीर्तनात्तस्याऽऽर्षमाश्विनं सूक्तमिति च द्योतितम्। तत्र सृणिरङ्कुशः सरणसाधनत्वात्तमर्हन्तौ तत्र वा साधू इति सृण्यावर्थात्कुञ्जरौ। आकारश्छन्दसि द्विवचनादेशः। ताविवात्यर्थं जृम्भमाणावष्टाङ्गप्रहरणव्यापृतौ जर्भरी। तुर्फरीतू हिंसन्तौ। नितोशतिर्वधकर्मा तत्कारिणौ नैतोशौ—योद्धारौ ताविव तुर्फरी—त्वरमाणा हिंसकाविति वा। पर्फरीकाशोभायुक्तौ। उदन्यतिः पिपासार्थः, तत्र जातौ, उदन्यजौ प्रावृषिजौ चातकौ जेमना—उदकवन्तौ जेमशब्दात्पामादिविहितो मत्वर्थीयो

नप्रत्ययः। तौ यथोदकलाभेन मत्तौ भवतस्तथा यौ मदेरू तौ मे जरायुम-
रायु जरामरणधर्मकमर्थाच्छरीरमजरममरं च कुरुतमिति वाक्यशेषः। तेनैवं
वाक्यार्थो यावङ्कुशचोदिताविव कुञ्जरौ सर्वतो जृम्भमाणौ शत्रूणां निहन्तारौ
भवतो हिंस्राविव च हिंसनव्यापृतौ दाक्ष्येण च शोभेते चातकाविव चोद-
कलाभेन मदात्प्रीयेते तावुभावपि जरामरणयोः कुपिताविवाजरत्वस्यामरत्व-
स्य वा प्रीतावजरममरं मे शरीरं विधत्तामिति। "अम्यक्सा त" इत्य-
गस्त्यार्षं तेन किलेन्द्रोऽमरत्वं धनं प्रार्थितस्तथा चोपरितन्यामृचि "त्वं तू
न इन्द्र तं रयिं दा" इति श्रूयते। तदेवास्यामृच्यनुषङ्गेण द्रष्टव्यम्। इयं
च च्छन्दोमद्वितीयेऽहनि मरुत्वतीये शस्त्रे विनियुक्ता। तत्राम्यगित्यमाश-
ब्दोऽव्ययं साहित्यवाची यतोऽमात्य इति भवति सहाश्वतीत्यम्यक्सा त
इन्द्र, ऋष्टिरायुधविशेषः पाणिक्षेप्यः, अस्मे इति—अस्माकं सनेमि—पुराण-
म्। अम्वं—तोयं मरुतो जुनन्ति—क्षिपन्ति। अग्निश्चिदित्युपमार्थो हि स्म,
अतसे—शुष्कतृणे शुशुक्वान्—दीप्तवान् आप इव द्वीपं दधति प्रयांसि— 158
अन्नाद्यानि। वाक्यार्थे तु प्रथमतृतीययोर्द्वितीयचतुर्थयोश्च पदानां संबन्धः। तत्र
सेत्येतदाक्षिप्तो यच्छब्दस्तृतीयपादे कल्प्यते। शुष्कतृणे दीप्तोऽग्निरिव या ल-
क्ष्यते तव सहचारिणी नित्यमृष्टिस्तव वल्लभा सा तावत्त्वत्प्रसादेनास्माकमेव।
येऽप्यमी पुराणं जलं वृष्टिरूपेण विक्षिपन्त आप इव द्वीपमन्नाद्यानि धारयन्ति
तव प्रियसखास्तेऽप्यस्माकमेव स त्वमेवं साधारणद्रव्यः सन्नमरत्वं न केवलं
देहि। एकया प्रतिधाऽपिबदितीन्द्रस्यैव स्तुतिः। एकेन प्रयत्नेनापिबत्साकं—
यौगपद्येन, सरांसि—पात्राणि सोमस्य पूर्णानि इन्द्रः काणुका—कामय-
मानःकामुकशब्दस्य च्छान्दसो वर्णव्यत्ययः। आकारस्तु विभक्त्यादेशः। अथ
वा कान्तकानीत्यादयो निरुक्तोक्ताः काणुकाशब्दविकल्पा योजनीयाः। त-
देवं सर्वत्र केनचित्प्रकारेणाभियुक्तानामर्थोत्प्रेक्षोपपत्तेः प्रसिद्धतरार्थाभावेऽपि
वेदस्य तदभ्युपगमात्सिद्धमर्थवत्त्वम्॥ ४१॥ § 70

**परं तु श्रुतिसामान्यमात्रमिति**। यजमानस्तावत्प्रार्थयिता इन्द्रश्च प्रार्थ्य-
मानः सर्वदाऽस्ति। कीकटा नाम यद्यपि जनपदास्तथाऽपि नित्याः। अथ
वा सर्वलोकस्थाः कृपणाः कीकटाः। प्रमगन्दः—कुसीदवृत्तिः स हि प्रभूत-
तरमागमिष्यतीत्येवं ददाति। नीचाशाखः—षण्ढस्तदीयं धनं नैचाशाखम्।
तच्च सर्वमयज्ञाङ्गभूतं तेषां कर्मण्यप्रवृत्तेस्तदस्माकमाहरेति। शेषं गतार्थम्॥
४२॥ § 71

आग्नेय्येत्यग्निना देवतया लिङ्गेन तदभिधानसामर्थ्येन वा य उपदेशः स
तदर्थार्हतां मन्त्रस्य द्योतयति। देवतातद्धितो ह्येष स्मर्यते यं चार्थप्राधान्येन
मन्त्रः प्रकाशयति सा तस्य देवता नाभिधानमात्रेण। एकदेवत्येऽपि म-
न्त्रेऽनेकदेवतान्तरपदप्रयोगे सति तद्देवत्यव्यपदेशाभावात्। प्राधान्याभिधानं
च नार्थपरत्वेन विनोपपद्यते॥ ४३॥ § 72

ऊहदर्शनं न माता वर्धत इति। अर्थे च पुष्टादिवृद्धेः प्रत्यक्षत्वात्प्र-
तिषेधासंभवादानर्थक्यात्तदङ्गेष्विति शब्दे विज्ञायते। तत्रापि स्थौल्यादिवृद्धय- 159

संभवादधिकार्थवाचित्वेन द्विवचनबहुवचनयोः प्रतिषेधः। स चार्थपरत्वे सर्वपशुविशेषणमात्राद्युपादित्सायां सत्यामवकल्पते। या चान्यपदवृद्धिसद्भावप्रतीतिरियं च। यद्यपि मातृप्रभृतीनां पारार्थ्यात्संबन्धिभेदादेव च भेदसिद्धेरनूह्यत्वं सदेवानुवदति तथाऽपि न्यायावगतानूहसंकीर्तनान्न्यायरहितेषूहसंप्रत्ययात्प्रकृतौ विवक्षितार्थता विज्ञायते। अन्यथा तु तददृष्टमविकृतैरेव साध्येत। तथा **यद्यप्यन्यदेवत्यः पशुराग्नेय्येवमनोता** कार्येत्यूहप्राप्तिदर्शनं, एव**मुस्राणां वपानामित्येवमादी**नां यथार्थमूहितानामेवाऽऽम्नानमपि विवक्षितार्थं भविष्यति। इतरथा प्राकृतपदत्यागेऽन्यकल्पने चादृष्टद्वयं कल्प्येत॥ ४४॥ § 73

विधिरेव च ब्राह्मणाभिधस्तत्र तत्र पर्यायैरवयवान्वाख्याननिर्वचनादिभिश्चार्थप्रकाशनपरत्वं दर्शयति। अर्थानाश्रयणे हि सर्वं तदनर्थकं स्यात्। तस्माद्विवक्षितवचना मन्त्रा इति सिद्धम्॥ ४५॥ § 74

इति मन्त्राधिकरणम्॥ ४॥

## ०.०.५ स्मृत्याचारप्रामाण्याधिकरणम्

एवं तावद्विध्यर्थवादमन्त्रनामधेयात्मकस्य वेदस्य धर्मं प्रत्युपयोगः साधित
इदानीं पौरुषेयीषु स्मर्यमाणार्थावधिषु मन्वादिप्रणीतनिबन्धनासु स्मृतिष्व-
निबद्धेषु चाऽऽचारेषु चिन्ता। तत्र किंचिदुदाहृत्य विचारः कर्तव्य इत्यष्ट-
160 कादिस्मरणानि मन्वादिस्थानि तद्ग्रन्थसमर्पितानि प्रमाणाप्रमाणविचारविषय-
त्वेनोदाह्रियन्ते। संदेहहेतुश्चाभिधीयते। § 76

पारतन्त्र्यात्स्वतो नैषां प्रमाणत्वावधारणा।
अप्रामाण्यविकल्पस्तु द्रढिम्नैव विहन्यते॥ § 78

मन्वादिवचनं स्मृत्यपेक्षं स्मृतिश्च मूलप्रमाणापेक्षिणीति नैकस्यापि वेदवन्निरपेक्षप्रामाण्यनिश्चयः। यतस्तु वेदवादिनामेवाविभागेनाविच्छिन्नपारम्पर्यपरिग्रहादार्ढ्यमतो नाप्रामाण्याध्यवसानमिति युक्तः संदेहः। तत्र पूर्वपक्षवादी वदति नैषां प्रामाण्यमेवापेक्षितव्यमिति। कुतः। § 79

पूर्वविज्ञानविषयं विज्ञानं स्मृतिरुच्यते।
पूर्वज्ञानाद्विना तस्याः प्रामाण्यं नावधार्यते।§ 81

सर्वस्मरणानि हि प्रत्यक्षाद्यवगतेऽर्थे तदानुरूप्येणोपजायमानान्यर्थं समर्थयन्ति। तदिहाष्टकादीनां स्वर्गादिसाध्यसाधनभावं प्रत्यक्षादीनि तावन्न गृह्णन्तीति साधितम्। शब्दोऽपि यथाऽग्निहोत्रादिषु प्रत्यक्षेणोपलभ्यते नैवं मन्त्राः। § 82

---

३ च] अर्थपरत्वेऽवकल्पत इत्यनुषङ्गः।

प्रत्यक्षानुपलब्धे न शब्दे सद्भावकल्पना।
धर्मास्तित्वप्रमाणाद्धि विप्रकृष्टतरा भवेत्॥§ 84

शब्दस्य तावदेकमेव प्रत्यक्षं प्रमाणम्। स चेत्तेनानवगम्यमानोऽप्यस्तीत्युच्यते ततो वरं धर्मास्तित्वमेव निष्प्रमाणकमभ्युपगतमिति। § 85

न वाऽऽनुमानमप्यस्मिन्नष्टकाश्रुतिकल्पने।
न हि स्मृतिस्तया व्याप्ता दृष्टाऽन्यद्वाऽनुमापकम्॥§ 87

यथैव धर्मे संबन्धादर्शनान्न किंचिल्लिङ्गं क्रमते तथाऽष्टकादिश्रुतावपि। § 88

न वाऽऽगमेन तद्बोधो नित्येन कृतकेन वा।
विस्रम्भः कृतके नास्ति नित्यो नैवोपपद्यते॥§ 90

यद्यप्यैन्द्रियकत्वादष्टकादिस्मृतीनां पौरुषेयागमगम्यत्वं संभवति। तथाऽपि विप्रलम्भभूयिष्ठत्वादश्रद्धेयवचनेषु पुरुषेष्वनध्यवसानम्। दृश्यन्ते ह्यनागमिकानप्यर्थानागमिकत्वाध्यारोपेण केचिदद्यत्वेऽप्यभिदधानाः। तेन मन्वादिभिरपि किमष्टकाश्रुतीरुपलभ्य वेदमूलत्वं स्वनिबन्धनानां प्रतिज्ञातमुतानुपलभ्यैव श्रद्धेयवाक्यत्वार्थमिति दुष्टपुरुषाकुलितचेतसां भवति संदेहः। तावता च प्रामाण्यविघातः। नित्यस्य वचनस्याऽऽदिमत्स्मरणमूलप्रतिपादने व्यापार एव नास्ति। न च मन्त्रलिङ्गानि स्वयं मूलत्वं प्रतिपद्यन्ते। विधिशून्यत्वात्। न च मूलान्तरं न्यायागतं सूचयन्ति। अन्यपरत्वात्। न च 161
सर्वेषां स्मृतिप्रणयिनामविगानम्। येन पौरुषेयागमबलादुपलब्धपूर्वश्रुतिमूलत्वं स्यात्। § 91

न च विज्ञायते वाक्यं कीदृशं तैर्निरूपितम्।
अर्थवादादिरूपाद्धि पश्यामो भ्राम्यतो बहून्।§ 93

यदि ह्येतदेकान्तेन गम्येत यथाविधि वाक्यान्येव मन्वादिभिरुपलब्धानीति। ततः काऽपि कल्पना स्यादद्यत्वेऽप्यन्यपरार्थवादादिवचनेभ्योऽपि भ्राम्यन्तः पुरुषा दृश्यन्ते। तेन तेष्वप्याशङ्का भवति। मृतसाक्षिकव्यवहारवच्च प्रलीनशाखामूलत्वकल्पनायां यस्मै यद्रोचते स तत्प्रमाणीकुर्यात्। तस्मान्नाऽऽगमेनापि मूलोपलब्धिः॥ § 94

उपमानं त्वदृष्टेऽर्थे सदृशे चानिरुपिते।
नैवेष्टमिति तेनापि न मूलश्रुतिसाधनम्॥§ 96

१९ म] यदुच्यते द्विजातीनां
शूद्राद्दारोपसंग्रहः। न तन्मम मतं
यस्मात्तत्राऽऽत्मा जायते स्वयम्॥
इत्यादिना विगानदर्शनादिति भावः।

अर्थापत्त्याऽपि यत्किं चिन्मूलमित्यवगम्यते।
तच्चाप्रमाणपक्षेऽपि भ्रान्त्यादि न विरुध्यते॥ § 98

यदि हि श्रुतिकल्पनेन विना स्मृतिर्नोपपद्यते ततः सम्यङ्मूला स्यात्। संभवति तु स्वप्नमूलत्वेन तेनानैकान्त्यादर्थापत्तेः सामान्यतो दृष्टस्य वाऽनवकाशः। तस्मादनुपलब्धिगोचरापन्नायां श्रुतौ सत्स्वपि मूलान्तरेष्वभिप्रेतमूलाभावान्निर्मूलत्वाभिधानम्। **ननु ये विदुरेवमितिकर्तव्यताक एवंफलकश्चासौ पदार्थः कर्तव्य इति**। अथ वा ये कर्तव्योऽसावितीत्थं विदुस्ते तथा विजानन्तस्तादृशाः कथमिवास्मान्विप्रलब्धुं न कर्तव्योऽसाविति वदेयुः। नन्वन्य एवं वदन्ति कर्तव्य इत्यन्ये न वा कर्तव्य इत्याहुः। कथमन्यत्वं यदा तेषामप्येवमयं स्मर्यत इति कथिते भवत्येवं प्रतिपत्तिः। अथ वा ये मन्वादयो विदुरकर्तव्योऽयं पदार्थ इति कथमिव ते विनाऽपराधेन लोकं वञ्चयितुं वदिष्यन्ति कर्तव्य एवायमिति। **स्मरणानुपपत्त्येति**। ये तावन्मन्वादिभ्योऽर्वाञ्चः पुरुषास्तेषां यज्ज्ञानं तत्तावदनवगतपूर्वार्थत्वान्न स्मृतिः। मन्वादीनामपि यदि प्रथमं किं चित्प्रमाणं संभाव्यते ततः स्मरणं भवेन्नान्यथा। कस्मात्पुनः पुत्रं दुहितरं वाऽतिक्रम्य वन्ध्यादौहित्रोदाहरणं कृतम्। स्थान-
162 तुल्यत्वात्। पुत्रादिस्थानीयं हि मन्वादेः पूर्वविज्ञानं दौहित्रस्थानीयं स्मरणमतश्च यथा दुहितुरभावं परामृश्य दौहित्रस्मृतिं भ्रान्तिं मन्यते तथा मन्वादिभिः प्रत्यक्षाद्यसंभवपरामर्शादष्टकादिस्मरणं मिथ्येति मन्तव्यम्। **यथैव पारम्पर्येणाविच्छेदादयं वेद इति**—वाक्यानुमानाभिप्रायेणोक्तम्। § 99

इतरस्त्वर्थस्यैवाविच्छेदस्मरणमयमाहेति मत्वा पुनर्निर्मूलत्वमाह। वेदः पुनः सविशेषः प्रत्यक्षगम्यस्तत्र घटादिवदेव पुरुषान्तरस्थमुपलभ्य स्मरन्ति। तैरपि स्मृतमुपलभ्यान्येऽपि स्मरन्तोऽन्येभ्यस्तथैव समर्पयन्तीत्यनादिता। सर्वस्य चाऽऽत्मीयस्मरणात्पूर्वमुपलब्धिः संभवतीति न निर्मूलता। शब्दसंबन्धव्युत्पत्तिमात्रमेव चेह वृद्धव्यवहाराधीनम्। प्रागपि हि वेदशब्दादन्यवस्तुविलक्षणं वेदान्तरविलक्षणं वाऽध्येतृस्थमृग्वेदादिरूपं मन्त्रब्राह्मणादिरूपाणि चान्यविलक्षणान्युपलभ्यन्ते। सर्वेषां चानादयः संज्ञा इति तद्द्वारेणोत्तरकालमपि गम्यमानानां प्रत्यक्षत्वं साधितम्। नन्वष्टकादिषु पुरुषान्तरस्थेष्वपि कुम्भकारक्रियास्विव किं चिद्विज्ञानमूलमस्ति। यदि हि कर्मस्वरूपमात्रं स्मर्येत ततः पाकादि तदिन्द्रियैरन्याननुष्ठतो दृष्टवा परे स्मरेयुः। यतस्त्विह स्वर्गादिसाध्यसाधनसंबन्धःस्मर्यते। नासौ पुरुषान्तरेषूत्पद्यमानः कश्चिद्दृश्यत इत्यन्धपरम्परान्यायेनाप्रमाणता। सर्वस्यानादिव्यवहारोपन्यासेन वेदवत्प्रसिद्ध्यभिमानो भवत्यतोऽन्धपरम्परानिदर्शनम्। वेदे हि प्रामाण्यस्यानादित्वमिहाप्रामाण्यस्य। कथम्— § 100

यो यो ग्रहीता जात्यन्धः स स्वयं नोपलब्धवान्।
स्वातन्त्र्येणागृहीते च प्रामाण्यं नावतिष्ठते॥ § 102

तादृशं वाऽष्टकादिस्मरणम्। न च चोदना मूलभूतोपलभ्यते। न चाननुभूतसंबन्धाऽनुमांतु शक्यते। यदि च वेदादुपलभ्य स्मृतयः प्रवर्तिताः स्युस्ततोऽर्थस्मरणवदित उपलभ्यायं मन्वादिभिः प्रणीत इत्यपि पारम्पर्येण स्मर्येत। स्यादेतद्। अर्थस्मरणेन कृतार्थानां निष्प्रयोजनं मूलस्मरणमनादराद्भ्रष्टमिति। तदयुक्तम्। न हि यत्कृतं प्रामाण्यं तदेव विस्मर्तुं युज्यते। अर्थस्मृतेः स्वतः प्रामाण्याभावात्। सर्वे पुरुषास्तावदेतज्ञानन्ति यथा वेदमूलज्ञानाद्विना प्रामाण्यं न निश्चीयत इति ते कथमिव तत्रानादरं कुर्युः। अपि च— § 103

येन यत्नेन मन्वाद्यैरात्मवाक्यं प्रपाठितम्। 163
कस्मात्तेनैव तन्मूलं न समर्पिता॥§ 105

यदि हि तैरप्यर्थमात्रमेवान्येभ्योऽधिगतं न वेदो दृष्ट इति ततस्तत्पूर्वकेष्वप्ययमेव पर्यनुयोग इति निर्मूलसंप्रदायत्वप्रसङ्गान्निर्मूलत्वान्न मुच्यसे। यदि तु प्रलीनशाखामूलता कल्प्येत ततः सर्वासां बुद्धादिस्मृतीनामपि तद्वारं प्रामाण्यं प्रसज्यते। यस्यैव च यदभिप्रेतं स एव तत्प्रलीनशाखामस्तके निक्षिप्य प्रमाणीकुर्यात्। अथ विद्यमानशाखागता एवैतेऽर्थास्तथाऽपि मन्वादय इति सर्वे पुरुषास्तत एवोपलप्स्यन्ते। युक्ततरा च स्वाध्यायाध्ययनविधेः साक्षाद्वेदादेव प्रतीतिरिति स्मृतिप्रणयनवैयर्थ्यं स्यात्। न च तद्विज्ञायते। कीदृशाद्वाक्यादिदं मन्वादिभिः प्रतिपन्नं किं विधिपरादुतार्थवादरूपादिति। पश्य— § 106

महताऽपि प्रयत्नेन तमिस्रायां परामृशन्।
कृष्णशुक्लविवेकं हि न कश्चिदधिगच्छति॥§ 108

न च मन्वादिवचनाद्वेदमूलत्वं निश्चिनुमः। ते हि निर्मूलमपि विप्रलम्भादिहेतोरुक्त्या लोकं वञ्चयितुमेवं वदेयुः। तस्मादप्रमाणम्॥ १॥ § 109

सर्वथा तावन्मन्वादिप्रणीताः सन्निबन्धनाः स्मृतयः शेषाणि च विद्यास्थानानि स्वार्थं प्रतिपादयन्त्युपलभ्यन्ते। मन्वादीनां चाप्रत्यक्षत्वात्तद्विज्ञानमूलमदृष्टं किं चिदवश्यं कल्पनीयम्। तत्र च— § 110

भ्रान्तेरनुभवाद्वाऽपि पुंवाक्याद्विप्रलम्भनात्।
दृष्टानुगुण्यसाध्यत्वाच्चोदनैव लघीयसी॥§ 112

सर्वत्रैव चादृष्टकल्पनायां तादृशं कल्पयितव्यं यद्दृष्टं न विरुणाद्धि न वाऽदृष्टान्तरमासञ्जयति। तत्र भ्रान्तौ तावत्सम्यङ्निबद्धशास्त्रदर्शनविरोधापत्तिः सर्वलोकाभ्युपगतदृढप्रामाण्यबाधश्च। इदानींतनैश्च पुरुषैरपि भ्रान्तिर्मन्वादीनामनुवर्तिता। तत्परिहारोपन्यासश्च मन्वादीनामित्यनेकादृष्टकल्पना। अनुभवेऽपि स एव तावदनुभवः कल्पयितव्यः। पुनश्चेदानींतनसर्वपुरुषजातिविपरीतसामर्थ्यकल्पना, मन्वादेस्तच्चैतंत्सर्वज्ञवादे निराकृतम्। पुरुषवाक्यपराऽप्यन्धपरम्परया निराकृता। न हि निष्प्रतिष्ठप्रमाणात्मलाभो दृश्य-

ते। तथा विप्रलम्भेऽपि तत्कल्पना। विप्रलिप्सा प्रयोजनं लोकस्य च तत्र भ्रान्तिस्तस्याश्चेयन्तं कालमनुवृत्तिरित्याद्याश्रयणीयम्। उत्पन्नस्य च दृढ-
164 स्य प्रत्ययस्यप्रामाण्य निराकरणाद्दृष्टविरोधः। तस्मात्सर्वेभ्यश्चोदनाकल्पनैव ज्यायसी। तत्र हि तन्मात्राद्दृष्टाभ्युपगमः। शेषास्तु महाजनपरिग्रहादयः सर्वेऽनुविधीयन्ते। संभाव्यते च मन्वादीनां चोदनापूर्वविज्ञानकारणत्वेन। तदर्थमेवाऽऽह—**तेनोपपन्नो वेदसंयोगस्त्रैवर्णिकानामिति**। यानि पुनरनुपपन्नवेदसंभावनानां म्लेच्छादीनामतीन्द्रियार्थस्मरणानि तेषां मूलकल्पनावेलायामेव चोदना संभावनापदं नाऽऽरूढेति मिथ्यात्वहेतुभूतचतुष्टयपारिशेष्यादप्रामाणत्वम्। संभावितायां पुनश्चोदनायां कारणान्तरनिषेधे कृते निर्मूलत्वासंभवात्परिशेषसिद्धं चोदनामूलत्वम्। यत्तु किमर्थं चोदना नोपलभ्यन्त इति। तत्र के चिदाहुः। नित्यानुमेयास्ता न कदा चिदुच्चार्यन्ते। यथालिङ्गादिकल्पिताः। कथमनुच्चारितानां मूलत्वोपपत्तिरिति चेत्। नैष दोषः। पाठाविच्छेदवत्पारम्पर्येण स्मरणात्तत्सिद्धेः। यथैव हि ग्रन्थः संप्रदायादविच्छिन्नोऽस्तित्वं भजते तथैव प्रतिज्ञया नित्यानुमेयश्रुतिसंप्रदायाविच्छेदसिद्धिः। तत्त्वयुक्तम्। अन्धपरम्परान्यायादेव। या हि चोदना न कदाचिदुच्चार्यते तस्याः सर्वपुरुषप्रत्यक्षादिप्रसराभावाद्दुर्लभतरमस्तित्वम्। तथा च स्मृतेरपि सैव वन्ध्यादौहित्रतुल्यता। लिङ्गादीनां तु नित्यत्वान्नित्यमनुच्चरितश्रुत्यनुमानकारणत्वमविरुद्धम्। तेन वरं प्रलीनश्रुत्यनुमानमेव। न च प्रलयो न संभाव्यते। दृश्यते हि प्रमादालस्यादिभिः पुरुषक्षयाच्चाल्पविषयत्वम्। न चैवं सति यत्किं चित्प्रमाणमापत्स्यते। शिष्टत्रैवर्णिकदृढस्मरणान्यथानुपपत्तिलभ्यत्वाच्छ्रुत्यनुमानस्य। यद्वा विद्यमानशाखागतश्रुतिमूलत्वमेवास्तु। कथमनुपलब्धिरिति चेदुच्यते—
§ 113

शाखानां विप्रकीर्णत्वात्पुरुषाणां प्रमादतः।
नानाप्रकरणस्थत्वात्स्मृतेर्मूलं न दृश्यते॥ § 115

यत्तु किमर्थं वेदवाक्यान्येव नोपसंगृहीतानीति। संप्रदायविनाशभीतेः। विशिष्टानुपूर्व्या व्यवस्थितो हि स्वाध्यायोऽध्येतव्यः श्रूयते। स्मार्ताश्चाऽऽचाराः के चित्क्वचित्कस्यां चिच्छाखायाम्। तत्रापि तु केचित्पुरुषमेवाधिकृत्याऽऽम्नायन्ते। ये तु क्रतुप्रकरणाम्नाताः केनचिन्निमित्तेनोत्कृष्यमाणाः पुरुषधर्मतां भजन्ते। यथा '**मलवद्वाससा सह न संव देत्**' '**तस्मान्न ब्राह्मणायावगुरेत्**' **इत्येवमादयः**। तत्र यदि तावत्तान्येव वाक्यान्युद्धृत्याध्यापयेयुस्ततः क्रमान्यत्वात्स्वाध्यायविधिविरोधः स्यात्। अनेन च निर्देशेनान्येऽप्यर्थवादोद्धारेण विधिमात्रमधीयीरन्कर्मौपयिकमात्रं वा। तत्र वेदप्रलयः प्रसज्येत। न चावश्यं मन्वादयः सर्वशाखाध्यायिनः। § 116

२९ देत्] तै॰ सं॰ ( २-५-१ )। ३० गुरेत्] तै॰ सं ( २-६-१० )।

ते हि प्रयत्नेन शाखान्तराध्यायिभ्यः श्रुत्वाऽर्थमात्रं स्ववाक्यैरविस्म-
रणार्थं निबध्नीयुः। न च वाक्यविशेषो ज्ञायते। यथैव हि स्मृतेर्दृढ-
त्वाद्भ्रान्तिमूलत्वं नास्त्येवमर्थवादमूलत्वमपि। शक्नुवन्ति हि ते विध्यर्थवादौ
विवेक्तुम्। तत्र स्मृतेर्विध्यात्मकत्वात्प्रकृतितादात्म्यानुमानलब्धास्पदेऽर्थवाद- 165
पूर्वकत्वं निष्प्रमाणकम्। अपि च वेदोऽखिलो धर्ममूलं ससर्वोऽभिहितो
वेद इति च स्वयमेव स्मृर्तृभिरात्मा बध्वा समर्पितस्तच्चैतन्नियोगतस्त-
त्कालैः कर्तृभिर्बुद्धिकारित्वादुपलब्धमतः सिद्धं वेदद्वारं प्रामाण्यम्। यस्तु
कर्तृसामान्यात्स्वतन्त्रमेव प्रामाण्यं वेदमूलत्वं वाऽनुमानेन साधयति त-
स्यार्थकामानुसारिभिर्दृष्टार्थैराचारैरनेकान्तः। श्रूयमाणश्रुत्यधीनप्रामाण्यापत्तेश्च
विरुद्धता तस्मादर्थापत्तिरेवात्राव्यभिचारादुपचारात्पश्चान्मानादनुमानत्वेनोक्ता।
**अस्या एव स्मृतेर्द्रढिम्न इति**। दृढत्वात्कारणानुमानमथ वा दृढत्वस्य।
**न हि मनुष्या इहैवेति**। निःशेषसंस्कारच्छिदा मरणेनान्तरित्वात्कर्मफ-
लसंबन्धानुसंधानासंभवेनोच्यते। **स्मृतिवैदिकपदार्थयोः कर्तृसामान्यादुपपन्नो
वेदसंयोगस्त्रैवर्णिकानामिति**। चोदनामूलसंभावनापदलाभार्थम्। **विस्मरणम-
प्युपपद्यत इति**। दृश्यते ह्यद्यत्वेऽप्यर्थस्मरणं ग्रन्थनाशश्च। यदा तु शाखान्तरेषु
विद्यन्त एव ताः श्रुतयस्तदाऽपि कस्यां शाखायां काः पठयन्तइत्यस्यांशस्य
विस्मरणम्। वैदिकत्वमात्रं तु प्रामाण्यसिद्धये परिपालयन्ति। तद्विशेषज्ञानं
पुनरनौपयिकत्वादनादर्तव्यमेव। **तथा प्रत्युपस्थितनियमानामिति**। आगत-
मागतं निमित्तं प्रति ये नियम्यन्ते वृद्धवयःप्रत्युत्थानादयस्तेषाम्। **दृष्टार्थत्वादेव
प्रामाण्यमिति**। एतदयुक्तम्। कुतः— § 117

धर्मं प्रति यतोऽत्रेदं प्रामाण्यं प्रस्तुतं स्मृतेः।
तस्मात्कृष्यादिवत्तेषामुपन्यासो न युज्यते।§ 119

न हि यावत्किं चिदाचरणं तस्य सर्वस्य मूलमिह प्रमाणी क्रिय-
ते। धर्मजिज्ञासाधिकारात्। यदि च गुर्वनुगमादीनां केवलं दृष्टार्थत्वमेव
स्यात्ततः कृष्यादिवद्धर्मं प्रत्यप्रामाण्यमेवेति नोपन्यसितव्याः। स्यादेतदप्र- 166
माणत्वेनैषामुपन्यास इति। न। तथा सति "हेतुदर्शनाच्च" इत्यत्रोदाहर्तव्या
भवेयुः। तस्माच्छ्रेयांप्तमिति च दर्शनं निष्फलम्। न च नियोगतः शा-
स्त्रादृते प्राप्तिः। शक्यते ह्युपायान्तरेणापि सामदानादिना गुरुरध्यापनादीनि
कारयितुम्। तत्रास्ति नियमविधेरवकाशः। सर्वत्र च यथा कथं चिल्लोक-
पङ्क्तिसहायोपादानात्मरक्षणप्रीत्युत्पादादिका दृष्टार्थता भाष्यकारोक्ता शक्या
वक्तुम्। न चावघातादीनां वृष्टिकामयागादीनां च दृष्टार्थानामवैदिकत्वम्।
तस्मात्सत्यपि दृष्टार्थत्वे संभाव्यते वेदमूलत्वं नियमादृष्टसिद्धेरनन्यप्रमाण-
कत्वात्। अतश्च गुर्वनुगमनादेर्नैमित्तिकत्वादक्रियायां प्रत्यवायः करणे च
न भवति। दृष्टं च प्रीतो गुरुरध्यापयिष्यतीत्येवमादि निष्पद्यते। निय-
माच्चाविघ्नसमाप्त्यर्थापूर्वसिद्धिः। एवं च "आचाराद्गृह्यमाणेषु तथा स्यादित्यत्र

३५ था] जै. सू. ( ६-२-१० )

सकृदसकृद्वाऽनुष्ठानमिति विचारो युक्तः। इतरथा तु दृष्टार्थत्ववशेनैवोदकपानादिवदवधारणं स्यात्। यत्तु भाष्यकारेण दृष्टार्थत्वादेव प्रामाण्यमित्युक्तं तत्पूर्वपक्षवाद्यतिशयार्थम्। एतदुक्तं भवति। यास्तावददृष्टार्थाः स्मृतयस्ताः कथं चिदप्रमाणी कुर्याद्भवान्, इमाः पुनर्गुर्वनुगमनादिविषयाः कथमिवाप्रमाणं भविष्यन्तीति। सभाप्रपादीनां यद्यपि विशेषश्रुतिर्नैव कल्प्यते तथाऽपि परोपकारश्रुत्यैव समस्तानामुपादानात्प्रामाण्यम्। तस्माच्छ्रेयांसमित्यश्वे गर्दभेनानुगन्तव्ये सिद्धवच्छ्रेयसामूनैरनुगमनं दर्शयति। यथा धन्वनि—निरुदके कृताः प्रपाः परेषामुपकुर्वन्त्येवं त्वमिति देवतास्तुतिपरे वाक्ये सिद्धवत्प्रपासद्भावस्तस्याश्च पारार्थ्यं दृश्यते। गोत्रचिह्नं शिखाकर्म तत्राप्याचारनियमस्यादृष्टार्थत्वान्नैव तावन्मात्रमेव प्रयोजनम्। शक्यं ह्युपायान्तरेणापि गोत्रं स्मर्तुं तेनान्य एवाभिप्रायः। कर्माङ्गभूतं तावच्चतुरवत्तपञ्चावत्तादिविभागसिद्ध्यर्थमवश्यं स्मर्तव्यं गोत्रम्। अतश्च तच्चिह्नार्थमपि तावच्छिखाकल्पस्मृतेः प्रामाण्यमस्तु। तन्नियमादृष्टस्य त्वेकान्तेनैवानन्यगतित्वात्पुरुषार्थता सेत्स्यतीति। तेन सर्वस्मृतीनां प्रयोजनवती प्रामाण्यसिद्धिः। तत्र यावद्धर्ममोक्षसंबन्धि तद्वेदप्रभवम्। यत्त्वर्थसुखविषयं तल्लोकव्यवहारपूर्वकमिति विवेक्तव्यम्। एषैवेतिहासपुराणयोरप्युपदेशवाक्यानां गतिः। उपाख्यानानि त्वर्थवादेषु व्याख्यातानि। यत्तु पृथिवीविभागकथनं तद्धर्माधर्मसाधनफलोपभोग-
167 प्रदेशविवेकाय किंचिद्दर्शनपूर्वकं किंचिद्वेदमूलम्। वंशानुक्रमणमपि ब्राह्मणक्षंत्रियजातिगोत्रज्ञानार्थं दर्शनस्मरणमूलम्। देशकालपरिमाणमपि लोकज्योतिःशास्त्रव्यवहारसिद्ध्यर्थं दर्शनगणितसंप्रदायानुमानपूर्वकम्। भाविकथनमपि त्वनादिकालप्रवृत्तयुगस्वभावधर्माधर्मानुष्ठानफलविपाकवैचित्र्यज्ञानद्वारेण वेदमूलम्। अङ्गविद्यानामपि क्रत्वर्थपुरुषार्थप्रतिपादनं लोकवेदपूर्वकत्वेन विवेक्तव्यम्। तत्र शिक्षायां तावद्यद्वर्णकरणस्वरकालादिप्रविभागकथनं तत्प्रत्यक्षपूर्वकम्। यत्तु तथाविज्ञानात्प्रयोगे फलविशेषस्मरणम्। मन्त्रो हीनः स्वरतो वर्णतो वेति च प्रत्यवायस्मृतिस्तद्वेदमूलम्। एवं कल्पसूत्रेष्वर्थवादादिमिश्रशाखान्तरविप्रकीर्णन्यायलभ्यविध्युपसंहारफलमर्थनिरूपणं तत्तत्प्रमाणमङ्गीकृतम्। लोकव्यवहारपूर्वकाश्च केचिदृत्विगादिव्यवहाराः सुखार्थहेतुत्वेनाऽऽश्रिताः। व्याकरणेऽपि शब्दापशब्दविभागज्ञानं साक्षाद्वृक्षादिविभागवत्प्रत्यक्षनिमित्तम्। साधुशब्दप्रयोगात्फलसिद्धिरपशब्देन तु फलवैगुण्यं भवतीति वैदिकम्। छन्दोविचित्यामपि गायत्र्यादिविवेको लोकवेदयोः पूर्ववदेव प्रत्यक्षः। तज्ज्ञानपूर्वकप्रयोगात्तु फलमिति श्रौतम्। तथा चानिष्टं श्रूयते। यो ह वाऽविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण यजति याजयति वेत्यादि। ज्योतिःशास्त्रेऽपि युगपरिवर्तपरिमाणद्वारेण चन्द्रादित्यादिगतिविभागेन तिथिनक्षत्रज्ञानमविच्छिन्नसंप्रदायगणितानुमानगूलं ग्रहसौस्थ्यदौस्थ्यनिमित्तपूर्वकृतशुभाशुभकर्मफलविपाकसूचनं तद्गतशान्त्यादिविधानद्वारेण वेदमूलम्। एतेन सामुद्रवास्तु विद्यादि व्याख्यातम्। ईदृशा वा विधयः सर्वत्रानुमातव्याः।

ईदृशे गृहशरीरादिसंनिवेशे सत्येतदेतच्च प्रतिपत्तव्यमिति। मीमांसा तु लोकादेव प्रत्याक्षानुमानादिभिरविच्छिन्नसंप्रदायपण्डितव्यवहारैः प्रवृत्ता। न हि कश्चिदपि प्रथममेतावन्तं युक्तिकलापमुपसंहर्तुं क्षमः। एतेन न्यायविस्तरं व्याचक्षीत॥ § 120

विषयो वेदवाक्यानां पदार्थैः प्रतिपाद्यते।
ते च जात्यादिभेदेन संकीर्णो लोकवर्त्मनि॥§ 122

स्वलक्षणविविक्तैस्तैः प्रत्यक्षादिभिरञ्जसा।
परीक्षकार्पितैः शक्याः प्रविवेक्तुं न तु स्वतः॥§ 124

वेदोऽपि विप्रकीर्णात्मा प्रत्यक्षाद्यवधारितः।
स्वार्थं साधयतीत्येवं ज्ञेयास्ते न्यायविस्तरात्॥§ 126

तथा च मानवेऽप्यभिहितम्— § 127

प्रत्यक्षमनुमानं च शाब्दं च विविधागमम्।
त्रयं सुविदितं कार्यं धर्मशुद्धिमभीप्सता॥§ 129

तथा—यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः॥ § 130

इत्यादिभिस्तर्कविशुद्धिराश्रिता। प्रायेण च मनुष्याणामधर्मभूयिष्ठत्वात्तज्ज्ञानप्रतिबद्धाः प्रतिभास्तेषु तेषु कुमार्गेषु प्रवर्तन्ते। तत्र लोकार्थवादोपनिषत्प्रसूतैस्तर्कशास्त्रैः सर्वविप्रतिपत्तिमुखप्रदर्शनम्। तदुपपत्तयस्तद्बलाबलपूर्वकं 168
च निश्चयद्वारं कथ्यते। अन्यथा पुनः— § 131

प्रतिमान्त्यः स्वयं पुंसामपूर्वा ह्युपपत्तयः।
भ्रान्तिं बहुमताः सत्यः कुर्युरज्ञानबोधनात्॥§ 133

सर्वासु तु प्रदर्शितासु स्वातन्त्र्येण विशोधयन्तः काश्चिदुत्सृज्यान्याः प्रमाणी करिष्यन्ति। यदपि च नित्यानित्यपृथक्त्वैकत्वसामान्यविशेषव्यतिरेकाद्येकान्तप्रतिपादनं तदपि पक्षपातादृतेऽन्यतरांशनिरूपणाशक्तेः। अवश्यं च सर्वात्मकवस्तुयुगपद्ग्रहणासम्भवात्तद्भागोपनिपातिपदविषयविवेकार्थमेकैकनिरूपणमादरेण कर्तव्यम्। अन्यथा येऽनवाप्तसामान्यविशेषाद्युपपतयः पुरुषास्ते पदप्रतिपाद्यं निष्कृष्टं वस्तुभागं लोकमात्रालोचनेन नैवाध्यवस्येयुः। मन्त्रार्थवादोपात्ताश्च स्तुतिनिन्दास्तत्तन्नित्यानित्यैकपृथक्त्वैकान्तमाश्रित्य तत्र तत्र विधिप्रतिषेधाङ्गत्वेन प्रवर्तमानाः पक्षपातप्रतिपादितवस्तुधर्मवैचित्र्यादृते निरालम्बना स्युः। याश्चैताः प्रधानपुरुषेश्वरपरमाणुकारणादिप्रक्रियाः सृष्टिप्रलयादिरूपेण प्रतीतास्ताः सर्वा मन्त्रार्थवादज्ञानादेव दृश्यमानसूक्ष्मस्थूलद्रव्यप्रकृतिविकारभावदर्शनेन च द्रष्टव्याः। प्रयोजनं च स्वर्गयागाद्युत्पाद्योत्पादकविभागज्ञानम्। सर्गप्रलयोपवर्णनमपि दैवपुरुषकारप्रभावप्रविभागदर्शनार्थ-

म्। सर्वत्र हि तद्बलेन प्रवर्तते तदुपरमे चोपरमतीति। विज्ञानमात्रक्षणभङ्गनैरात्म्यादिवादानामप्युपनिषदर्थवादप्रभवत्वं विषयेष्वात्यन्तिकं रागं निवर्तयितुमित्युपपन्नं सर्वेषां प्रामाण्यम्। सर्वत्र च यत्र कालान्तरफलत्वादिदानीमनुभवासंभवस्तत्र श्रुतिमूलता। सांदृष्टिकफले तु वृश्चिकविद्यादौ पुरुषान्तरे व्यवहारदर्शनादेव प्रामाण्यमिति विवेकसिद्धिः॥ २॥ § 134

इति स्मृत्याचारप्रामाण्याधिकरणम्॥ १॥

## ०.०.६ श्रुतिविरुद्धस्मृतीनामप्रामाण्याधिकरणम्

स्मृतिप्रामाण्यमुत्सृष्टं प्रसक्तं सर्वगोचरम्।
सति वेदविरुद्धत्वे तदिदानीमपोद्यते॥ § 137

विरोधे त्वनपेक्षं स्यादसति ह्यनुमीयते।
विरोधे वेदवाक्येन तेन चार्थेऽनधिष्ठिते॥ § 139

यावती स्मृतिः प्रत्यक्षवेदवाक्यविरुद्धा तां सर्वामुदाहृत्य संप्रधार्यते। किं पुनस्तादृश्यपि धर्मप्रमाणत्वेनावधार्यते। किं वा पर्युदस्यत इति। कुतः संशय इति चेदुच्यते। § 140

169 विरोधपरिहाराद्वा सति वा तुल्यमूलतः।
अबाधो वा भवेदस्या बाधो वा तद्विपर्ययात्॥ § 142

एकविषये विरुद्धार्थोपसंहारिणी विज्ञाने विरुध्येते बलवदबलवत्त्वनिर्णयाच्च बाध्यबाधकभावं प्रतिपद्येते। तद्यदि शङ्कितविरोधयोरपि श्रुतिस्मृत्योः केनचित्प्रकारेण भिन्नविषयत्वेन व्यवस्था सिध्येत्। विधेयप्रतिषेध्ययोर्वा विरोधाभावादेकस्मिन्नपि विषये समुच्चयसंभवादेकप्रयोगगतत्वासंभवाद्वोभयोः प्रामाण्याङ्गीकरणेन प्रयोगान्तरे चोभयानुग्रहः स्यादित्येवं विकल्पाश्रयणेऽप्यत्यन्तविरोधाभावात्प्रत्यक्षानुमितश्रुतिजनितज्ञानयोश्च वैदिकत्वाविशेषे तुल्यबलत्वकल्पनादुभयप्रामाण्यमुपपत्स्यते। ततो यथोपन्यस्तविषयेऽपि स्मृतिप्रामाण्यमपेक्षितव्यम्। अथ तु प्रयत्नेनान्विष्यमाणेऽपि न विषयान्तरकृता व्यवस्था नापि प्रमेयाविरोधात्समुच्चयो नापि विकल्पेनोभयानुग्रहः किं तर्ह्युभयपीडनादत्यन्तविरोध एव। प्रत्यक्षानुमेयश्रुत्योश्च लौकिकप्रत्यक्षानुमानवन्महान्बलविशेषस्तदा गत्यन्तराभावादभयानुग्रहासंभवे श्रुतिबलीयस्त्वेन स्मृतिप्राभाण्यमुपेक्षणीयं भविष्यतीति। § 143

किं तावत्प्राप्नुयादत्र विरोधेऽपि प्रमाणता।
अप्रामाण्यप्रसङ्गे हि मर्यादातिक्रमो भवेत्॥ § 145

अनाशङ्कितविप्रलम्भभ्रान्त्यादिमूला ह्यव्याहतवेदमूलत्वावधारणाः स्मृतयो निर्व्याजप्रामाण्याः शक्यन्ते धर्मव्यवहाराङ्गत्वेन स्थापयितुम्। यदा तु वेदविरुद्धत्वहेतुदर्शनपरस्परविगानादिना केनचिदपि च्छलेनाऽऽसामप्रामाण्यं कल्प्यते तदा बहुशाखाखिलप्रकरणादिभेदभिन्नेषु वेदेषु श्रुतिलिङ्गाद्यात्मकोपदेशनामादिद्वारातिदेशात्मकविचित्रप्रमाणभागेषु को जानाति का स्मृतिः कीदृशेन वेदभागेन विरुध्यमाना कदाऽनुमास्यत इति। अतश्चैवं जाताशङ्कैर्नैव क्वचिदपि विश्वस्येत। अविश्वासाच्चात्यन्तमेव प्रामाण्यं प्रतिहन्येत। तथा हि—
§ 146

कदाचिच्छ्रुतिमूलत्वमुक्त्वा भ्रान्त्यादिमूलता।
स्मृतिभिः प्रतिपन्ना चेत्कस्तामिन्द्रोऽपि वारयेत्॥§ 148

एकमूलव्यवस्थायां मूलान्तरनिराक्रिया। 170
अप्रमाण्यनिवृत्त्यर्थं शक्या न तदुपेक्षणे॥§ 150

किं च— § 151

परस्परविरुद्धत्वं श्रुतीनां न भवेद्यदि।
स्मृतेः श्रुतिविरुद्धायास्ततो मूलान्तरं भवेत्॥§ 153

यदा तूदितानुदिताग्निहोत्रहोमविधिवदतिरात्रगतषोडशिग्रहणवच्च सहस्रशः श्रुतयोऽप्यसंभवद्युगपदनुष्ठानार्थतया परस्परविरुद्धा दृश्यन्ते तदा यदि नाम कासां चित्स्मृतीनां स्ववेदशाखागतवचनविपरीतार्थशाखान्तरवचनमूलानामधीतवाक्यविरोधो दृश्यतेऽतस्तावतैव सर्वशाखाप्रत्ययकर्मव्यवहारिणां स्वयमश्रुतानधीतत्वमात्रेण दृढस्मरणोपस्थापितपुरुषान्तरस्थ श्रुतिनिराकरणं न शोभते न चैकं प्रतिशिष्यत इति हि सर्वश्रुतीनां सर्वपुरुषान्प्रति प्रामाण्यादध्ययनवच्च स्मृतेरपि श्रुतिधारणसामर्थ्यात्। § 154

तस्माद्यथा विरोधेऽपि पठयमानप्रमाणता।
पठितस्मर्यमाणानां तथैवेत्यवधार्यताम्॥§ 156

किं च। § 157

अविरोधे श्रुतिर्मूलं न मूलान्तरसंभवः।
विरोधे त्वन्यमूलत्वमिति स्यादर्धवैशसम्।§ 159

---

५ भागेषु] बहुशाखाश्च खिलाः प्रकरणादयश्च ये तेषां ये भेदास्तैर्भिन्नेषु वेदेषु। श्रुतिलिंगाद्यात्मकोपदेशो यश्च नामादिद्वारोऽतिदेशस्तदात्मका ये विचित्रप्रमाणभागास्तेष्विति विग्रहः।

२१ चैकं] जै॰ सू॰ ( २-४-२ )।

२७ म्] एकस्यां धर्मसंहितायामर्धस्यार्धान्तरेण वैशसं—विरोध इत्यर्थः।

मूलान्तरं निरस्तं च सामान्येनैव यत्पुरा।
तदनुप्राण्यते पश्चाद्विरोधे नेत्यतिक्रिया।§ 161

तेनाऽऽसां श्रुतिमूलत्वं सर्वदैव व्यवस्थितम्।
मूलान्तरप्रवेशे वा किं तत्प्रामाण्यतृष्णया॥§ 163

किं च भ्रान्त्यादिमूलानां संभवासंभवाश्रयः।
स्मृतीः प्रतिविरुद्धोऽयं बाधपक्षो न युज्यते॥§ 165

तेनाऽऽसां यदि वा नैव क्वचिदस्ति प्रमाणता।
सर्वत्राव्याहता वा स्यान्न त्वर्धजरतीयता॥§ 167

विरुद्धत्वं च जानन्ति स्मर्तारस्ताः स्मरन्ति यत्।
वेदमूलबलं त्यक्त्वा किमन्यत्तत्र कारणम्॥§ 169

171 गृह्यमाणनिमित्तत्वाद्यद्युच्येताप्रमाणता।
उत्प्रेक्षणीयहेतुत्वात्सा सर्वत्र प्रसज्यते॥§ 171

रागद्वेषमदोन्मादप्रमादालस्यलुब्धताः।
क्व वा नोत्प्रेक्षितुं शक्याः स्मृत्यप्रामाण्यहेतवः॥§ 173

अदुष्टेन हि चित्तेन सुलभा साधुमूलता।
दुष्टमूलात्वलाभस्तु भवत्याशयदोषतः॥§ 175

का वा धर्मक्रिया यस्यां दृष्टो हेतुर्न युज्यते।
कथंचिद्वा विरुद्धत्वं प्रत्यक्षश्रुतिभिः सह॥§ 177

लोकायतिकमूर्खाणां नैवान्यत्कर्म विद्यते।
यावत्किंचिददृष्टार्थे तद्दृष्टार्थं हि कुर्वते॥§ 179

वैदिकान्यपि कर्माणि दृष्टार्थान्येव ते विदुः।
अल्पेनापि निमित्तेन विरोधं योजयन्ति च॥§ 181

---

२ तिक्रिया] उचितां क्रियामर्तिक्रम्य क्रिया अतिक्रियेत्यर्थः।
८ ता] केनचित्पाशुपतेन सर्वजरत्या योषितोऽनुपभोग्यत्वेन सर्वतरुण्याश्च वृद्धेऽरुचिप्रसङ्गादर्धजरत्याऽऽनयने दूतः प्रेषित इति लोकप्रवादोऽत्रार्धजरतीयश-ब्देनोपमानत्वेनोक्त इति।

तेभ्यश्चेत्प्रसरो नाम दत्तो मीमांसकैः क्वचित्।
न च कंचन मुञ्चेयुर्धर्ममार्गं हि ते तदा॥[§ 183]

प्रसरं न लभन्ते हि यावत्क्वचन मर्कटाः।
नाभिद्रवन्ति ते तावत्पिशाचा वा स्वगोचरे॥[§ 185]

क्वचिद्दत्तेऽवकाशे हि स्वोत्प्रेक्षालब्धधामभिः।
जीवितुं लभते कस्तैस्तन्मार्गपतितः स्वयम्॥[§ 187]

तस्माल्लोकायतस्थानां धर्मनाशनशालिनाम्।
एवं मीमांसकैः कार्यं न मनोरथपूरणम्॥[§ 189]

यच्चाऽऽदौ श्रद्धया सिद्धं पुनर्न्यायेन साधितम्।
आज्ञासिद्धप्रमाणत्वं पुराणादिचतुष्टयम्॥[§ 191]

तत्तथैवानुमन्तव्यं कर्तव्यं नान्तरा श्लथम्।
सर्वं श्लथयतः सीदेद्दुर्नद्धशकटादिवत्॥[§ 193]

पक्षो योऽङ्गीकृतो येन तमत्रस्यन्स निर्वहेत्।
हारयेदन्तरा त्रस्यन्मीतोपद्रवकारिभिः॥[§ 195]

वेदश्च यदि दृष्टार्थं श्रूयमाणविरोधि वा।
न विदध्यात्ततस्तादृक्स्मृतिस्तन्मूलतां त्यजेत्॥[§ 197]

यदा तु हन्तिपिष्यादिकर्म दृष्टं सहस्रशः।
दृष्टार्थं विहितं वेदे तदा किं हेतुदर्शनैः॥[§ 199]

ऋत्विग्भ्यो दक्षिणादानं तानूनप्त्रादिकर्म च। 172
यदृत्विग्यजमानानां दृष्टार्थं सर्वमिष्यते॥[§ 201]

तद्वद्यवैदिकं तादृक्स्यात्ततोऽन्यदवैदिकम्।
यदा चैवंविधान्येव वेदे कर्माणि सन्ति नः॥[§ 203]

तदा किं नाम दृष्टार्थं बुद्ध्या सिध्येदवैदिकम्।
तेनाऽऽदावेव या क्लृप्ता स्मार्तानां वेदमूलता॥[§ 205]

---

१९ च] ऋत्विजां यजमानस्य च परस्परमव्यभिचारार्थं कर्मारम्भे शपथकर्म तानूनप्त्रं नाम।

निर्वोढव्येह सैकान्तात्किमिदं खिद्यतेऽधुना ॥§ 206

तस्माद्वेदविरुद्धानां दृष्टार्थानां च हेतुभिः ।
स्मृतीनां न प्रमाणत्वं विहन्तव्यं मनागपि ॥§ 208

अविशिष्टं प्रमाणत्वं सर्वासां प्राप्तमीदृशम् ।
विरोधेऽप्यधुना युक्तमेवं प्राप्तेऽभिधीयते ॥§ 210

विरोधे त्वनपेक्षं स्यात्प्रामाण्यं स्मृतिबन्धनम् ।
अविरोधे हि वेदेन तन्मूलमनुमीयते ॥§ 212

या तु वेदविरुद्धेह स्मृतिः काचन दृश्यते ।
सा तु स्याद्भ्रान्तिमूलैव न स्पष्टश्रुतिमूलिका ॥§ 214

स्वातन्त्र्येण प्रमाणत्वं स्मृतेस्तावन्न संमतम् ।
वेदमूलानुमानं च प्रत्यक्षेण विरुध्यते ॥§ 216

वेदवाक्यानुमानं च तावदेव प्रवर्तते ।
तदर्थविषयं यावत्प्रत्यक्षं नोपलभ्यते ॥§ 218

प्रत्यक्षे श्रूयमाणे तु न विद्येतानुमानिकम् ।
न हि हस्तिनि दृष्टेऽपि तत्पदेनानुमेष्यते ॥§ 220

स्मृतीनां श्रुतिलिङ्गत्वमस्ति हस्तिपदादिवत् ।
तत्प्रत्यक्षविरुद्धत्वे तद्वदेव निवार्यते ॥§ 222

तावदेव स्फुरन्त्यर्थाः पुरस्तादानुमानिकाः ।
यावत्प्रत्यक्षशास्त्रेण मूलमेषां न कृत्यते ॥§ 224

कृत्तमूलाः स्फुरन्त्योऽपि स्मृतयो न चिरायुषः ।
निराधारत्वदोषेण शाखा इव वनस्पतेः ॥§ 226

न हि साक्षात्प्रमाणत्वं स्मृतीनामुपपद्यते ।
नान्यमूलं यतस्तत्स्यात्तत्तु मूलं न विद्यते ॥§ 228

173 प्रत्यक्षप्रतिबद्धा हि श्रुतिर्नास्त्यानुमानिकी ।
नैराकाङ्क्ष्यात्प्रमातृणामनुमानं न लभ्यते ॥§ 230

प्रमेयं यत्परिच्छेद्यं भवेत्केनचिदात्मना।
तस्य स्यात्तत्परिच्छेदात्सावकाशप्रमाणता॥ § 232

ताद्रूप्येण परिच्छिन्ने तद्विपर्ययतोऽपि वा।
भूयस्तास्मिन्प्रमेये हि न प्रमाणं प्रवर्तते॥ § 234

भिन्नकक्षागते ये च प्रमाणे तत्र धावतः।
तयोः शीघ्रेण निर्णीते मन्थरं न प्रवर्तते॥ § 236

तद्धि दूरमपि प्राप्तमेकमप्यगतं पदम्।
इतरेण गतेनाऽऽदावेकान्तेनैव जीयते॥ § 238

यत्र शीघ्रतरं नास्ति तस्यार्थस्यापहारकम्।
चिरेणापि व्रजेत्तत्र दुर्बलं न निवार्यते॥ § 240

न हि येन प्रमाणत्वं लब्धपूर्वं कदाचन।
तेन तत्सर्वदा लभ्यमित्याज्ञापयतीश्वरः॥ § 242

सर्वमुत्पद्यमानं हि यद्यन्येन विरोधिना।
न रुध्यते ततस्तस्य सिद्धिः कालेन लभ्यते॥ § 244

यस्य तूत्पद्यमानस्य मूलमेव निकृत्यते।
मुखं वा रुध्यते तस्य नाऽऽत्मलाभः कदाचन॥ § 246

न च यद्बलवद्रुद्धमात्मानं नैव विन्दति।
अविरोधेऽपि तेनाऽऽत्मा न लब्धव्यः कथंचन॥ § 248

न चापि बाधकाभावाल्लब्ध आत्मेति सर्वदा।
लब्धव्यः स विरोधेऽपि पूर्वसामान्यदर्शनात्॥ § 250

उत्सर्गश्चापवादश्च सर्वत्रैवोपलभ्यते।
तत्र नोत्सर्गमात्रेण सर्वमेवावरुध्यते॥ § 252

अपवादेन वा यस्मादुत्सर्गो बाधितः क्वचित्।
तस्मात्सर्वत्र बाध्योऽसावित्येतदपि नेष्यते॥ § 254

विषयाविषयौ ज्ञात्वा तेनोत्सर्गापवादयोः।

बाधाबाधौ विवेक्तव्यौ न तु सामान्यदर्शनात्॥[§ 256]

174 यो हि सामान्यदृष्टेन व्यवहारं निनीषति।
तृष्णाच्छेदो भवेत्तस्य मृगतृष्णाजलैरपि॥[§ 258]

बाधितां मृगतृष्णां वा दृष्ट्वा ह्रदगतोऽप्यसौ।
विप्रलम्भभयादेव न स्नानादि समाचरेत्॥[§ 260]

तावदेव हि तोयादिज्ञानस्येष्टा प्रमाणता।
न तोयं मृगतृष्णेयमिति यावन्न बुध्यते॥[§ 262]

अनुमानं प्रमाणं च तावदर्थेषु जायते।
रुध्यते विषयो यावन्नास्य प्रत्यक्षजन्मना॥[§ 264]

एवं स्मृतिप्रमाणत्वे तावच्छ्रुत्यनुमानजम्।
यावत्प्रत्यक्षया श्रुत्या विषयो नावरुध्यते॥[§ 266]

अतः क्वचित्प्रमाणत्वं क्वचिदप्यप्रमाणताम्।
व्यवस्थापयता न्यायैर्न भवेदर्धवैशसम्॥[§ 268]

प्रमाणत्वाप्रमाणत्वे प्रत्यक्षमृगतृष्णयोः।
यथा तथैव ते स्मृत्योरविरुद्धविरुद्धयोः॥[§ 270]

तस्मादेवं न वक्तव्यं सर्वासां वा प्रमाणता।
अथ वा सा न कस्याश्चिद्यदि क्वचिदनाश्रिता॥[§ 272]

तेन वेदविरुद्धानां स्मृतीनामप्रमाणता।
रुद्धश्रुत्यनुमानत्वादन्यमूला हि ता यतः॥[§ 274]

विकल्पः। किं पुनस्तासां नेष्यते श्रुतिभिः सह।[§ 275]
उच्यते॥ [§ 276]

विकल्पस्याष्टदोषत्वान्न तावत्स्वभ्युपेयता।
पाक्षिके चाप्रमाणत्वे स्मृतयः सुनिराकराः॥[§ 278]

तुल्यबलविकल्पो हि तावदष्टदोषत्वादगतिकगतिन्यायेन क्वचिदेवाऽऽश्रीयते। किमुत कक्षान्तरितप्रामाण्याविषमशिष्टविकल्पः। तथा हि। [§ 279]

प्रमाणपदवीं यावन्नाऽऽरोहत्येव हि स्मृतिः।

बाध्यते तावदत्यन्तं श्रुत्याऽन्यनिरपेक्षया॥§ 281

स्मृतेर्धर्मप्रमाणत्वं न तावत्स्वत इष्यते। 175
तुल्यकक्षतया येन विकल्पपदवी व्रजेत्॥§ 283

पराधीनप्रमाणत्वान्न प्रमाणपदे स्थिता।
श्रुत्या बाधितमात्राऽसौ पुनर्नोज्जीवितुं क्षमा॥§ 285

तुल्यकक्षविकल्पोऽपि नाप्रामाण्येऽस्त्यकल्पिते।
प्रमाणस्याप्रमाणत्वकल्पना च द्विदोषभाक्॥§ 287

प्रमाणत्वं प्रतीतं यदुज्ज्वलत्तदपह्नुतम्।
एकस्तावदयं दोषः स्यात्प्रतीतिविपर्ययात्॥§ 289

तथा तदप्रमाणत्वं यदभावप्रमाणकम्।
भावे सत्यथ भावेन विनैव परिकल्प्यते॥§ 291

सोऽपि स्यादपरो दोषः प्रमाणार्थविपर्ययात्।
अङ्गीकृत्यापि तौ दोषौ पूर्वं केनापि हेतुना॥§ 293

प्रयोगान्तरकाले तु पुनर्दोषद्वयं भवेत्।
यदभावप्रमाणत्वं पूर्वमेतस्य कल्पितम्॥§ 295

संप्रत्यपह्नुवानस्य दोष एको हि जायते।
प्रत्यक्षं दृढरूपं च यत्पुरस्तान्निराकृतम्॥§ 297

एष जायेत दोषोऽन्यस्तदुज्जीवयतः पुनः।
एवमेकत्र चत्वारो दोषा वाक्ये प्रदर्शिताः॥§ 299

एत एव प्रसज्येरन्द्वितीयेऽपि प्रकल्पिते।
एवमेषोऽष्टदोषोऽपि यद्व्रीहियववाक्ययोः॥§ 301

विकल्प आश्रितस्तत्र गतिरन्या न विद्यते।
व्रीहिशास्त्रप्रवृत्तौ हि यवशास्त्रेण कृष्यते॥§ 303

श्रोता तत्र प्रवृत्तोऽपि व्रीहिशास्त्रेण कृष्यते।
द्वाभ्यामश्वमुखीवच्च श्रुतिभ्यामभितः समम्॥§ 305

श्रोतुराकृष्यमाणस्य बलाबलमपश्यतः।
एकस्मिन्नुपसंहर्तुं बुद्धिं युक्त्या न पश्यतः॥[§ 307]

उभयोरप्रमाणत्वं प्रतिघातात्प्रसज्यते।
तत्र प्रामाण्ययोग्यस्य यदप्रामाण्यकल्पनम्॥[§ 309]

तदनन्यगतित्वेन तथाऽप्यभ्युपगम्यते।
सति गत्यन्तरे त्वेतन्नैव कल्पनमर्हति॥[§ 311]

176 एकस्य वा प्रमाणत्वं परिहर्तुं न शक्यते।
तदप्रामाण्यमात्रे तु न द्वयोरप्रमाणता॥[§ 313]

सिद्धो लोकप्रवादोऽयमेकानेकाविनाशिनाम्।
सर्वनाशे समुत्पन्ने ह्यर्धं त्यजति पण्डितः॥[§ 315]

स चायमुभयोर्नाश उभयार्थापरिग्रहात्।
मिश्रैर्वा यजमानस्य मिश्राणां विध्यदर्शनात्॥[§ 317]

नियमार्थे ह्युभे शास्त्रे यवव्रीह्योर्विधातृणी।
प्राप्ते चान्यनिवृत्त्यंशः फलमर्थात्प्रतीयते॥[§ 319]

व्रीहयो निरपेक्षा हि ज्ञायन्ते यागसाधनम्।
यवाश्चैवमतस्तेषां मिश्रत्वं नावकल्पते॥[§ 321]

नैव व्रीहिभिरिष्टं स्याद्यवैर्न च यथाश्रुतेः।
मिश्रैरिज्येत चेत्तत्र भवेदुभयबाधनम्॥[§ 323]

एवमप्रतिपत्त्यैव तुल्यैषा मिश्रतामतिः।
तेनोभयाप्रमाणत्वाद्युक्तैकैकाप्रमाणता॥[§ 325]

सेयमत्यन्तमन्याय्या द्वयोरप्यनवस्थितिः।
अव्यवस्था न युक्ता हि व्यवस्था यत्र लभ्यते॥[§ 327]

सर्वत्रैव ह्येकरूपत्वावधारणेन निरूपितरूपं व्यवहर्तुं
शक्यम्॥[§ 328]

तेन यस्य प्रमाणत्वं प्रमाणं सर्वदाऽस्तु तत्।
यस्यापि त्वप्रमाणत्वमप्रमाणं तदुच्यताम्॥§ 330

तदेव तु कदाचित्प्रमाणं कदाचिदप्रमाणमिति न कथं चिदपि विश्रम्भः स्यात्तदेतद्व्रीहियवश्रुत्योरत्यन्तापरिहार्यत्वादवश्यमापतितम्। § 331

न हि तत्रैकरूपत्वे चिह्नं किंचिद्व्यवस्थितम्।
येनैकत्र प्रमाणत्वं स्यादन्यत्राप्रमाणता॥§ 333

श्रुतिस्मृत्योः पुनः स्पष्टं व्यवस्थाकारणद्वयम्।
येन श्रुतेः प्रमाणत्वं स्यात्स्मृतेश्चाप्रमाणता॥§ 335

स्वरूपेण तयोस्तावत्प्रमाणत्वाप्रमाणते।
ततोऽन्यापेक्षया स्यातामप्रामाण्यप्रमाणते॥§ 337

यो यस्य स्वरूपाश्रयो धर्मः प्राप्तः स बलवता कारणान्तरेण विपर्ययं प्रतिपद्यते। § 338

न च श्रुतिजनितप्रत्ययस्य स्मृतिजनितो बाधकत्वं प्रतिपद्यते। § 339

स्मार्तस्य बाधकः श्रौतो बलवत्त्वात्प्रतीयते। 177
प्रत्यक्षे चानुमाने च प्रागेतद्द्वयवधारितम्॥§ 341

श्रुतिलिङ्गे यथा चेष्टे व्यवस्थितबलाबले।
संनिकृष्टविकृष्टार्थे तथैवेह श्रुतिस्मृती॥§ 343

स्मृत्या प्रतीयते यावच्छ्रुत्या तावत्प्रमीयते।
विरुद्धधर्मतामेको न च धर्मः प्रतीच्छति॥§ 345

न च शीघ्रहृतेऽर्थेऽस्ति चिरादागच्छतो गतिः।
अश्वैरपहृतं को हि गर्दभैः प्राप्तुमर्हति।§ 347

स्मृत्या चार्थं परामृश्य यावत्तद्विषयां श्रुतिम्।
अनुमातुं प्रवर्तेत तावत्सोऽर्थोऽन्यतो गतः॥§ 349

किं कर्तव्यमितीदं च कर्ता यावदपेक्षते।
प्रमाणं क्रमते तावत्प्रमिते तन्न जायते॥§ 351

युगपत्प्रमिमीयातां यदि चार्थं श्रुतिस्मृती
अगृहीतविशेषत्वात्स्यातां तुल्यबले ततः॥§ 353

यद्वा यावच्छ्रुतेरर्थः साक्षादेव प्रतीयते।
तस्मिन्नेव क्षणे मूलं कल्पयेत्स्वं स्मृतिः श्रुतिम्॥§ 355

ततोऽर्थविप्रकर्षेऽपि प्रमाणत्वेन तुल्यता।
भवेदेव श्रुतिस्मृत्योरर्थः श्रुतिपरिग्रहात्॥§ 357

यतः स्मृत्या गृहीतेऽपि चिरेण श्रुतिकल्पना।
जायते क्लृप्तया तस्मात्सा बाध्येताप्रतिष्ठिता।§ 359

स्मृतिमूलानपेक्षा हि स्मृतित्वादेव हीयते।
तदपेक्षा पुनः श्रुत्या बाध्यते मूलवर्जिता॥§ 361

एष तावद्विकल्पपदमनारूढाया एव स्मृतेरेको बाधप्रकारः। § 362

द्वितीयेन प्रकारेण विकल्पपदवीं गता।
आपन्ना पाक्षिकं बाधमत्यन्तं बाध्यते स्मृतिः॥§ 364

तद्दर्शयति। विकल्पं तु वदन्पक्षे तावच्छ्रुतिप्रामाण्यमभ्युपैतीति। तदा च स्मृत्यप्रामाण्यमवश्यंभावि तस्याश्चाप्रामाण्यकल्पनायां न श्रुतेरिव तदध्यारोपः। § 365

किं तु तस्याः प्रमाणत्वं श्रुतिमूलत्वकारितम्।
यतस्तस्मादतन्मूला तदानीं साऽवधार्यते॥§ 367

श्रुतिमूलत्वविच्छेदोत्तरकालं च प्राङ्गिराकृतमूलान्तरोपप्लवादविगान-
178 स्मृतपुरुषप्रणीतत्वनिर्णयाच्च नित्यत्वद्वारनिर्मूलत्वासंभवादवश्यंभावि विप्रल-
म्भाभिप्रायादि किंचिदेकं मूलमापद्यते। § 368

श्रुतिं मुक्त्वा च यन्मूलं स्मृतेरन्यत्प्रकल्प्यते।
तेनैवास्याः प्रमाणत्वमत्यन्तं प्रतिहन्यते॥§ 370

व्रीहिश्रुतिपरिग्रहकाले हि यवश्रुतेरभूतमेवाप्रामाण्यमध्यारोपितम्। तत्प्रयोगान्तरवेलायां तुल्यसांप्रदायिकाम्नायमानत्वेन संनिकृष्टविप्रकृष्टार्थत्वादिविशेषाभावेन च पुनः सहजेन प्रामाण्येनाभिभूयते। § 371

न तु स्मृतेः प्रमाणत्वं पुनरुज्जीवितुं क्षमम्।
विच्छिन्नश्रुतिमूलत्वाद्ग्रस्तं भ्रान्त्यादिहेतुभिः॥§ 373

न ह्येकस्या एव स्मृतेः प्रत्यक्षश्रुत्यर्थापरिग्रहकालेऽनुमितश्रुतिमूलत्वं तत्परिग्रहाश्रयणे तु भ्रान्त्यादिमूलत्वमिति विरुद्धावधारणाऽवकल्पते। आह।

सत्यं यदि प्रथममेव विकल्पकारी श्रुत्यर्थं परिगृह्य द्वितीयादिप्रयोगे स्मृत्यर्थपरिग्रहणायोपतिष्ठेत। § 374

ततस्त्वदुक्तमार्गेण प्रतिहन्येत सर्वदा।
न त्वेतस्य प्रसङ्गोऽस्ति स्मृतेः पूर्वपरिग्रहे॥§ 376

योहि श्रुतिं प्रथममश्रुत्वा श्रुतिमेवैकां पश्यति तस्याप्रतिहतश्रुत्यनुमाने वृत्ते। § 377

न पश्चाच्छ्रूयमाणाऽपि श्रुतिः स्यात्प्रतिबन्धिका।
गर्दभेनापनीतं हि हरेन्नाश्वश्चिराद्गतः॥§ 379

न चैष नियमोऽस्ति जिज्ञासुभिः स्मृतिविरुद्धा श्रुतिरेव प्रथमं श्रोतव्येति। § 380

बहुजिज्ञासमानानां कदाचित्किंचिदापतेत्।
पूर्वपश्चाद्विभागेन न तद्धेतुबलाबलम्॥§ 382

आद्ये प्रपाठके येन व्रीहिशास्त्रं प्रतीयते।
द्वितीये यवशास्त्रं च न तत्तत्प्रति दुर्बलम्॥§ 384

स्वशाखाविहितैश्चापि शाखान्तरगतान्विधीन्।
कल्पकारा निबध्नन्ति सर्व एव विकल्पितान्॥§ 386

सर्वशाखोपसंहारो जैमिनेश्चापि संमतः।
न तु पूर्वावबुद्धोऽर्थो बाधेतैवोत्तरं विधिम्॥§ 388

तस्मात्पौर्वापर्यश्रवणमनाश्रित्य 'न चैकं प्रति शिष्यत' इत्यनेन न्यायेन सर्वपुरुषान्प्रति नित्यावस्थितसमस्तपठ्यमानस्मर्यमाणवेदशाखायत्तज्ञानैर्जिज्ञासुभिरात्मीयशक्तिमात्रकारितपूर्वापरग्रहणविभागैरेकवाक्यगतपूर्वो तरवर्णपदवद्बलाबलपनपेक्ष्य मातापितृप्रणीतोपदेशवन्निर्विचिकित्समेव प्रामाण्यमभ्युपगन्तव्यम्। अन्यथा हि— § 389

पूर्वप्राप्तौ प्रमाणत्वं परत्वेनाप्रमाणताम्। 179
प्रसज्यमानिकामेवं कोऽध्यवस्येत्सचेतनः॥§ 391

इत्थं च भ्रान्तिमूलत्वप्रसङ्गे कल्पिते स्मृतेः।
अविरोधेऽपि हि श्रुत्या प्रामाण्यं दुर्लभं भवेत्॥§ 393

सर्वैव श्रुतिमूलाऽतः सर्वा वा भ्रान्तिमूलिका।

स्मृतिरेवं निरूप्येत न तु स्यान्मूलसंकरः ॥§ 395

उच्यते। यद्यपि पूर्वपलब्धया स्मृत्या श्रुतिमनुपलभमानस्य प्रतिबन्धरहितश्रुत्यनुमानं क्रियेत तथाऽपि कालान्तरे श्रुतिं श्रुत्वा तत्प्रतिपक्षस्मृतेर्बाधाध्यवसानादवश्यंभाविश्रुतिमूलत्वविच्छेदवशेन मूलान्तरसंचरणम्। § 396

ततश्च पूर्वविज्ञानं मिथ्यैतदिति चिन्तयन्।
आदावेवाप्रमाणत्वं स्मृतेरित्यध्यवस्यति ॥§ 398

यो हि कूटकार्षापणेन कंचित्कालमज्ञो लोकमध्ये व्यवहरति न तेन विवेकज्ञानजनितव्युत्पत्तिनाऽपि तथैव व्यवहर्तव्यम्। न चास्य तदानीतनज्ञानमात्रबाधबुद्धिर्भवति। § 399

समानविषयत्वाद्धि पूर्वेषामपि बाधनम्।
न हि तेषाममिथ्यात्वे मिथ्येदानींतनं भवेत् ॥§ 401

ननु च प्रागवस्थायां श्रुतिर्यैवानुमीयते।
सैवेदानीं विरुद्धेति गम्यते न पुनः स्मृतिः ॥§ 403

नैतदेवम्। प्रतिप्रयोगं प्रमाणपर्यालोचनात्। यदि ह्येकप्रयोगमात्रालोचनेनैव प्रयोगान्तराण्यप्यनुतिष्ठेयुस्ततो येन व्रीहिशास्त्रमप्रमाणीकृत्य यवाः परिगृह्येरन्स यावज्जीवं तैरेव यजेतेति नैव प्रतिपुरुषमुभाभ्यां विकल्प्यमानाभ्यां व्यवहारः सिध्येत्। तेन यावत्प्रयोगभाविप्रमाणालोचनवशात्पूर्वानुमितां श्रुतिं क्वचिदप्यश्रृण्वन्पुनरपि स्मृतिमेवोपलभ्य कर्तृसामान्यलिङ्गेनैव श्रुतिमनुमिमानः प्रत्यक्षया श्रुत्याऽऽक्षिप्तचित्ततया तत्प्रामाण्येनान्यथानुपपद्यमानेन स्मृत्यप्रामाण्यं कल्पयन्पूर्वावधारितमूलव्यत्ययमेव प्रतिपद्यते न पूर्वक्लृप्तमूलस्याप्रामाण्याध्यारोपम्। अपठयमानतयैवास्य सुलभावज्ञानत्वात्। § 404

यच्चैतदनवस्थानं त्वया मां प्रति चोद्यते।
भवतोऽपि तदस्त्येव तेनाचोद्यत्वमेकतः ॥§ 406

यदा ह्यादौ श्रुतिं श्रुत्वा स्मृतेर्न्नान्याऽनुमीयते।
तदाऽन्यमूलतापत्तेरेकान्तेनैव बाध्यते ॥§ 408

कालान्तरेऽपि यो बाधः स्फुटत्वेनावधार्यते।
यत्तेनाप्यप्रमाणत्वं कृतं तन्न निवर्त्यते ॥§ 410

180 पूर्वस्मृतिग्राहिणां च स्वयं बाधमचेतयमानानामपि पुरुषान्तरस्य श्रुतिश्रवणप्राथम्यबलेन बाधसंतानोऽनुवर्तत एव। § 411

पुरुषान्तरबाधोऽपि नैवाल्पं भ्रान्तिकारणम्।
न हि द्विचन्द्रदिङ्मोहौ न बाध्येते नरान्तरैः॥ § 413

ननु यवश्रुतेरपि तर्हि प्रमाणत्वेन परिगृह्यमाणायाः पुरुषान्तरबाधस्तदानीमस्तीति मिथ्यात्वप्रसङ्गः। § 414

उच्यते पठ्यमानत्वादुन्मज्जननिमज्जने।
सर्वान्प्रति तयोस्तुल्ये विशेषोऽन्यो न गृह्यते॥ § 416

स्मृतिस्तु यावतां पुंसां प्रथमं गोचरीभवेत्।
तावतां सर्वदाऽभावान्नाप्रामाण्येनं मुच्यते॥ § 418

अप्रमाण्यपदं चैकमस्त्येवं प्रथमं स्मृतेः।
तावता लब्धमिथ्यात्वान्न श्रुतिं बाधितुं क्षमा॥ § 420

अध्यारोप्येत मिथ्यात्वमुज्ज्वलायाः श्रुतेः पुनः।
लब्धमेव स्मृतौ तच्चेत्किमर्थं कल्प्यते श्रुतेः॥ § 422

विरुद्धयोर्हि श्रुतिस्मृत्योर्विकल्पप्रसङ्गेनावश्यं कल्पनीयेऽन्यतरत्राप्रमाणत्वे यावच्छ्रुतौ पटाच्छादनन्यायेन कल्पयितुमारभ्यते तावत्स्मृतौ स्वरूपाश्रयं क्लृप्तमेवोपलभ्य संशयच्छेदे जाते न कदाचिदप्यभूताप्रामाण्याध्यारोपकल्पनोपपत्तिः। § 423

ननु श्रुत्यविरुद्धायाः श्रुतिमूलत्वनिश्चयः।
अनुमानादपि प्राप्स्यन् केनचित्प्रतिबध्यते॥ § 425

तस्मात्कारणवैषम्यान्नोभयत्रैकरूपता
सिध्येन्मूलव्यवस्था हि प्रतिपक्षानुसारिणी॥ § 427

ततश्चार्धवैशसप्रसङ्गनिवृत्तिः। § 428

यथा। § 429

प्रमाणत्वाप्रमाणत्वे लिङ्गादीनां व्यवस्थिते।
पूर्वैः सह विरुद्धत्वाविरुद्धत्वनिबन्धने॥ § 431

तथेहापि व्यवस्थेष्टा न परस्परसंकरः।
प्रतिबन्धाभ्यनुज्ञाभ्यां श्रुत्या नास्त्येकरूपता॥ § 433

यद्यप्यौदुम्बरीसर्ववेष्टनं धर्मशास्त्राध्येतृस्मृतिविलक्षणप्रत्यक्षश्रुत्यर्थोपसंहारपरसूत्रकासेपनिबद्धं तथाऽप्युपरिष्टाद्वक्ष्यमाणालान्तरत्वाभिप्रायेण पुरुषोपदिष्टत्वाविशेषाच्च स्मृतिवदेवोदाहृतम्। क्रीतराजकभोज्यान्नत्ववचनं यद्य- 181

प्यथर्ववेदेऽस्ति तथाऽपि तस्याऽऽहवनीयसंबद्धयज्ञकर्मोपकाराभावात्तदधिकृतत्रयीप्रतिपादिताग्नीषोमीयसंस्थावधिभोजनप्रतिषेधविरोधात् “प्रकरणविशेषाद्विकृतौ विरोधि स्यात्” इत्यनेन न्यायेनाधिकृतानधिकृतबलाबलविशेषाभिप्रायेण स्मृतिपक्षनिःक्षेपाद्व्याप्यकारेणोदाह्रियते। कृष्णकेशत्वं च यद्यप्यनवस्थितवयोवस्थाकालविशेषं जातपुत्रत्वपक्षे संदिग्धसमावेशं च तथाऽपि युवैव धर्ममन्विच्छेदित्येवमादिस्मरणप्रकाशितार्थं यौवनावस्थापरिग्रहादन्ततो वा वयोर्धानतिक्रमाश्रयणादष्टाचत्वारिंशद्वर्षब्रह्मचर्यप्रागुपनयनसंबद्धकालस्य च वयसः सातिरेकद्विपञ्चाशच्चतुष्पञ्चाशन्मात्रसंवत्सरपरिमितत्वेनापरिहार्यवयोर्धातिक्रमावश्यंभावित्वाद्व्यक्त एव विरोधो दृश्यते। ननु च पूर्वकृतसर्ववेष्टनोत्तरकालविहितं वेष्टिताया एव स्पर्शनं संभवतीत्यविरोधः। कथमविरोधो यदा स्पर्शनं नाम त्वगिन्द्रियद्वारं स्पृश्यसंवेदनम्। न च वस्त्रान्तरिताया औदुम्बर्याः स्पर्शो गृह्यते। न च वस्त्रे स्पृश्यमान औदुम्बरी स्पृष्टा भवति। वस्त्रौदुम्बरीजातिव्यक्तिस्पर्शानामत्यन्तभेदात्। § 434

अथ संबन्धिसंस्पर्शात्स्पृष्टैवेत्यभिधीयते।
भूमिस्पर्शेन तत्सिद्धेर्वृथा स्पर्शविधिर्भवेत्॥ § 436

ननु भूमावौदुम्बरीबुद्ध्यभावाद्वस्त्रान्तरितायां च तद्बुद्ध्यव्यतिरेकाद्दृष्टान्तवैषम्यम्। तथा हि। § 437

वस्त्रान्तरितचण्डालस्पर्शेऽप्यापतिते क्वचित्।
साक्षात्स्पृष्टवदेवेष्टा सचेलस्नानशुद्धता॥ § 439

सत्यं तत्रेष्यते स्नानं तद्वस्त्रस्पर्शकारितम्।
अशुद्धकारणं तद्धि चण्डालस्पर्शवन्मतम्॥ § 441

तथा च तद्वियुक्तेऽपि वस्त्रे तत्स्पर्शदूषिते।
स्पृश्यमाने भवत्येव दोषः संयुक्तवस्त्रवत्॥ § 443

कथं पुनरयं धर्मशास्त्रेष्वनुपनिबद्धोऽपि चण्डालस्पृष्टवस्त्रस्पर्शननिमित्तो दोषोऽध्यवसीयते। § 444

कथं वा नेष्यते दोषः काष्ठलोष्टतृणादिषु।
तत्स्पृष्टस्पृश्यमानेषु न क्रमन्तेऽत्र युक्तयः॥ § 446

तदुच्यते— § 447

यथा काष्ठतृणादीनां मारुतादेव शुद्धता।
स्मर्यते वाससो नैवं तोयप्रक्षालनाद्विना॥ § 449

नन्वमेध्येन लिप्तस्य सा शुद्धिरभिधीयते। 182
न लिप्तग्रहणं तत्र पाठेऽस्ति तु चिरंतने॥ § 451

अमेध्यस्यैवं यस्मात्पठन्ति। चण्डालस्पृष्टवाससश्चास्त्येवामेध्यता। तस्मादस्ति सलिलादिशुद्धिः। ननु च मनुष्यस्यैव चण्डालस्पर्शनिमित्तप्रायश्चित्तविधानादशुद्धिरूपममेध्यत्वं गम्यते न द्रव्यान्तरस्य गवाश्वादेः। ततश्च वस्त्रं किं गवाश्वादिवददुष्टमुत पुरुषवद्दुष्टमिति संदेहे गवाश्वादितुल्यमेवावधारयितुं युक्तम्। § 452

उच्यते— § 453

पुरुषस्य सचेलस्य स्नानं यस्माद्विधीयते।
तस्मात्पुरुषवद्वस्त्रं न गवाश्वादिवन्मतम्॥ § 455

यदाऽपि हि शुद्धेनैव हस्तादिना चण्डालः स्पृश्यते गवादीनां तु चण्डालादिस्पृष्टानां स्नानप्रक्षालनविध्यभावाच्छुद्धिर्विज्ञायत इति न तन्मध्यपातित्वम्। अतश्च नानेन प्रकारेणौदुम्बरीसंबद्धवस्त्रस्पर्शनात्तत्स्पर्शनज्ञानोपपत्तिः। यदा तु तयैवोद्गाता स्पृष्ट उद्गायेदिति विधिस्तदाऽवश्यमेवौदुम्वरीत्वचोद्गातुशरीरं प्राप्तव्यम्। उपाश्रयणाभ्युपगमपक्षोऽपि च स्पृष्टत्वापरित्यागेनैव स्थित इति न समस्ताच्छादितायामवकल्पते। पराश्रितमपि च वस्त्रमुद्गातुराश्रयत्वं प्रतिपद्यते। तेनैवौदुम्बर्याश्रितेनोद्गायेत्। तस्मादस्ति सर्ववेष्टनस्पर्शनयोर्विरोध इति युक्तं बाध्यबाधकव्यवस्थापनम्। **अथ किमर्थं नेमौ विधी विकल्प्येते इति**। स्मृतेरविधायकत्वात्स्वयमतुल्यबलत्वाच्च तदनुमितशाखान्तरपठितविधिपरिग्रहाभिप्रायेणोक्तम्। **नासति व्यामोहविज्ञान इति**। § 456

पूर्वोक्तेनैव मार्गेण व्यामोहैकान्तकल्पनाम्।
विकल्पेऽवश्यमापन्नां स्मृतावेव नियच्छति॥ § 458

व्यामोहविज्ञानं च ज्ञानान्तरगतव्यामोहत्वावधारणं तद्विज्ञानगतव्यामोहरूपं वा विवक्ष्यते। तेन षष्ठीसमासः कर्मधारयो वा योज्यः। **विकल्पं तु वदन्निति**। कदा चित्स्मृतिमूलश्रुतिविच्छेदाद्भ्रान्त्यादिमूलत्वमापादयति। तादृश्या च सकृदपि श्रौतं विज्ञानमनुज्ञातमध्यारोप्यमाणव्यामोहाविषयत्वान्न कदाचित्प्रामाण्यं त्यजतीत्यपाक्षिकत्वाभिधानम्। एवं केवलाप्रमाणत्वपक्षग्रहस्तस्य पुनर्जीवनासंभवादपाक्षिकं च सर्ववेष्टनस्मरणमित्याह—**पाक्षिकं चेति** 183 **वा**। विकल्पवादिसंमतपाक्षिकत्ववशादेव श्रुतिप्रामाण्यपक्षे स्मार्तश्रुतिकल्पनायामकृतायां मूलान्तरसंक्रान्तेः सर्वकालाप्रमाणत्वप्रसङ्गः। एकदाऽपि च लब्धप्रामाण्यावकाशा श्रुतिदुर्बलप्रतिपक्षतया न कदाचिदपि व्यामोही भविष्यतीति समर्थयमानो **यदेव हि तस्यैकस्मिन्पक्षे मूलमित्याह**। § 459

नहि प्रमादपाठत्वं शक्यं कल्पयितुं श्रुतेः।

दुःश्रुतस्वप्नविज्ञानमूला त्वापद्यते स्मृतिः॥§ 461

**तेन नैतत्पक्षे विज्ञानमिति**—प्रमाणविज्ञानमभिप्रेत्योक्तम्। **व्यामोहात्पक्षान्तरमिति**। व्यामोहकल्पनातः प्रमाणाभावपक्षान्तरसंक्रमणं प्रतिषेधति। यद्वा स्मार्तज्ञानमेव पूर्वावधारितव्यामोहात्प्रामाण्यपक्षान्तरं न संक्रान्तमिति। दुःश्रुतस्वप्नादिमूलत्वेन श्रुतिविरोधं दर्शयति—**तुल्यकारणत्वादिति**। बलीयः प्रतिपक्षनिराकृतत्वात्सर्वदैव श्रुत्यनुमानप्रतिबन्धान्न स्मृतेः प्रामाण्यपक्षसंक्रान्तिः। **अपि चेतरेतराश्रयेऽन्यतः परिच्छेदादिति**। उपरिष्टादितरेतरविरोधविवरणाद्विरोधमेवेतरेतराश्रयमाह— § 462

परस्परविरुद्धे हि विरुद्धाव्यभिचारिवत्।
प्रमाणे यत्र दृश्येते तत्रान्येनैव निर्णयः॥§ 464

प्रमाणशब्दस्य ज्ञानसमानाधिकरणत्वेन भावोत्पन्नल्युडन्तत्वेन वा नपुंसकलिङ्गत्वाद्भेदाः प्रमाणं स्मृतयः प्रमाणमितिवत्प्रमाणे स्मृतौ स्पर्शनं व्यामोह
184 इति भवितव्यम्। करणविशेषविवक्षायां वाऽभिधेयलिङ्गवचनानुवृत्तौ ल्युडन्ताट्टिड्ढाणञिति ङीपि प्राप्ते प्रामाण्यं स्मृताविति प्रयोक्तव्यम्। तमिममुभयभ्रष्टं भाष्यकारप्रयोगं समर्थयमानैरेवमनुगमः कर्तव्यः। § 465

प्रमाणमयते याति मूलभूतां श्रुतिं यतः।
क्विबन्तादयतेस्तस्मात्प्रमाणा स्मृतिरुच्यते॥§ 467

तत्र यद्यपि नित्यत्वात्क्विब्लोपः प्रथमं भवेत्।
यलोपोऽपि भवेदेव वलादिप्रत्ययाश्रयः॥§ 469

न च वर्णाश्रयत्वेन यलोपो न भविष्यति।
व्योर्वलीति यलोपो हि वलादिप्रत्ययाश्रयः॥§ 471

यद्वा योगविभागेन वेर्व्यवस्य च लुप्यते।
वकारश्च यकारश्चेत्येवं लोपो भविष्यति॥§ 473

यलोपे च कृतेऽकारो यः शुद्धः परिशिष्यते।
तदन्तावधिकात्पश्चादतष्टाप्क्रियते स्त्रियाम्॥§ 475

अकः सवर्णदीर्घत्वं परयोरन्तरङ्गतः।
सर्वेणापि ततः कृत्वा प्रमाणेत्यनुगम्यते॥§ 477

तदेतदितराश्रयं भवतीत्युक्तम्। § 478

यद्वा श्रुत्यप्रमाणत्वात्स्मृतेः प्रामाण्यमिष्यते।
सिद्धाच्च तत्प्रमाणत्वाच्छ्रुत्यप्रामाण्यकल्पना॥§ 480

तथा श्रुतिप्रमाणत्वात्स्मृत्यप्रामाण्यकल्पनम्।
तदप्रामाण्यसिद्ध्या च श्रुतिप्रामाण्यनिश्चयः॥§ 482

तदिदं विकल्पवादिन उभयत्रेतरेतराश्रयत्वमेकान्तवादिनस्त्वन्यतरत्र। § 483

तत्रान्यतः परिच्छेदाद्वाच्यं हेत्वन्तरं स्फुटम्।
भाष्यकारस्त्विहोक्त्वैवं तयोरेकैकमुक्तवान्॥§ 485

**तत्र स्पर्शनस्य कृप्तं मूलं कल्प्यं स्मृतेरिति।**§ 486

नैवात्यन्ताप्रकृतहेत्वन्तराभिप्रायेणान्यतः परिच्छेदोऽभिहितः। प्रकृतयोरपि च यत्कृतमितरेतराश्रयत्वं तद्व्यतिरिक्तधर्मदर्शनान्निश्चीयमाने भवत्येवान्यतः परिच्छेदः। § 487

स्वतः स्थितात्प्रमाणत्वाच्छ्रुतेः स्यात् क्लृप्तमूलता।§ 488

स्मृतेः श्रुत्यनुमापकप्रामाण्यात्कल्प्यमूलता ततश्च प्रत्यक्षश्रुत्यप्रामाण्यक-
ल्पनायत्तं स्मृतेः प्रामाण्यं तद्बलेन च श्रुत्यप्रामाण्यं कल्पयत इतरेतराश्रय- 185
त्वमपरिहार्यम्। § 489

न चाध्यारोप्यमाणाऽपि श्रुतेः स्यादप्रमाणता।
न च तस्यामसिद्धायां स्मृतिप्रामाण्यसंभवः॥§ 491

बलवन्तं पराजित्य यः प्रतिष्ठातुमिच्छति।
हस्तिना पादयोधीव संतिष्ठेताचिरादसौ॥§ 493

एवं तावत्स्मृतिप्रामाण्यं कल्पयन्नेव तद्वादी पराजीयते। यदा तु श्रुतिप्रामाण्यगतमितरेतराश्रयत्वमालोच्यते तदा तत्रापि प्रतिपक्षभूतस्मृत्यप्रामाण्यापेक्षया निरपवादप्रामाण्यावधारणसिद्धेः पराधीनत्वात्पूर्वसिद्धस्मृत्यप्रामाण्यलिप्सायाम् § 494

सिद्धमेवाप्रमाणत्वं स्वरूपाश्रयमादितः।
क्षणमात्रमपि प्राप्य श्रुतिः प्रामाण्यमश्नुते॥§ 496

तेन यत्तदाद्ये पदकेऽननुमितावस्थायां श्रुतावापातक्षणमात्रे स्मृतेरप्रामाण्यं दृश्यते तावतैव लब्धप्रमाणत्वा श्रुतिः सर्वदा निरपवादप्रामाण्या भवतीत्यन्यतः परिच्छेदः। § 497

तेनैकत्र श्रुतेराद्यात्प्रामाण्यादवसीयते।
स्मृत्यप्रामाण्यतोऽन्यत्र क्षणमात्रावधारितात्॥§ 499

कृत्वैकमवधिं तस्मात्सिद्धमाद्ये क्षणे दृढम्।
आनुपूर्व्या व्रजेत्तावद्यावत्सिद्धोऽपरः स्फुटः॥§ 501

तदेकेन मार्गेण दर्शयति—**कल्प्यमूलत्वात्स्मृतिप्रामाण्यमनवक्लृप्तमित्यादि यावत्स्मार्तश्रुतिकल्पनमनुपपन्नं प्रमाणाभावादिति**। § 502

द्वितीयमार्गेऽपि श्रुतिप्रामाण्यदर्शनादारभ्य तावन्नेतव्यं यावत्तदेव निरपवादं सिद्धमिति। व्रीहियवबृहद्रथंतरविधीनां त्वनन्यगतिकत्वात्कक्षान्तरितपदका इव स्थानभेदाभावात्तुल्यबलतयाऽनवस्थितविकल्पाश्रयणं प्रागुपदिष्टमेव योज्यम्। अतो नापेक्ष्यं प्रत्यक्षश्रुतिविरुद्धस्मृतिप्रामाण्यमिति॥ ३॥ § 503

186 इतश्च न प्रमाणत्वं मूलहेत्वन्तरेक्षणात्।
व्यभिचारे हि नोत्पत्तिरर्थापत्त्यनुमानयोः॥§ 505

श्रुतिविरोधभग्नप्रसरायां हि स्मृतौ पूर्वोक्तेन न्यायेन श्रुत्यनुमानप्रतिबन्धादाकाङ्क्षितमूलान्तरावश्यकल्पयितव्यत्वाच्च। § 506

क्वचिद्भ्रान्तिः क्वचिल्लोभः क्वचिद्युक्तिविकल्पनम्।
प्रतिभाकारणत्वेन निराकर्तुं न शक्यते॥§ 508

स्मृतेश्च श्रुतिभग्नायाः कारणान्तरसंभवः।
न तु श्रुतेरतः सैव तद्विरोधे हि बाध्यते॥§ 510

यथैव वेदमूलत्वमनेकान्तान्न लभ्यते।
तथाऽन्यमूलताऽपीति तदाशङ्क्येदमुच्यते॥§ 512

उपपन्नतरं चैतद्वेदवाक्यानुमानतः।
दृष्टे हि सत्यदृष्टस्य कल्पना निष्प्रमाणिका॥§ 514

श्रुतिविरुद्धस्मृतीनामप्रामाण्याधिकरणम्।

**अधिकरणान्तरं वेति**। § 516

सर्वव्याख्याविकल्पानां द्वयमेव प्रयोजनम्।
पूर्वत्रापरितोषो वा विषयव्याप्तिरेव वा॥§ 518

अपरितोषस्तावत्प्रथमेनैव श्रुतिविरुद्धत्वहेतुना बलवता सिद्धे बाधे नान्वाचयहेतुरतीव प्रयोजनवान्। अधिकरणान्तरे पुनः पूर्वोक्तहेतुनिरपेक्षः पर्याप्त एवैकः स्मृतिबाधनायेति स्वतन्त्रत्वेन प्रदर्शनम्। विरोधेन च न व्याप्तायाः स्मृतेरप्रमाणतद्वयाप्तौ नापवादान्तरोद्भवः। वैसर्जनहोमीयं वासोऽध्वर्युर्गृह्णाति इत्यग्नीषोमप्रणयनार्थं विसर्जनहोमकालसंबन्धियजमानाच्छादनं

वासोऽध्यवयुर्हरति मुक्तकमेवैतदावरणानुमितं स्मरणम्। एवं **युपहस्तिनो दानमाचरन्तीति** यूपपरिव्याणशाटकं यूपहास्तिशब्देन निर्दिश्याध्वर्युहर्तव्यतयाऽऽचारानुमितयैव स्मृत्या प्रतिपादयन्ति। § 519

तत्रापि वेदमूलत्वकल्पना नोपपद्यते। 187
कर्तृसामान्यतः प्राप्ता लोभसंभवपूर्वकात्॥§ 521

ऋत्विजो हि प्रयोगमध्यपतितं यजमानं प्रक्रान्तकर्मावश्यसमापनीयत्वनिबद्धसमाप्त्युत्तरकालभावि स्वाच्छन्द्यं च विदित्वा कार्यवत्तावेलायामेव खलगतप्राधान्यविभागव्यावृत्तभृतकवत्स्वयमुत्पाद्योत्पाद्य तानि तान्यादेयकानि श्रद्धाजनकार्थवादपुरःसरं याचन्ते। प्रत्यक्षश्रुतिविहितदेयान्तरनिदर्शनव्यामोहितश्च यजमानः श्रद्दधानतया तथैव प्रतिपद्य तेभ्यः प्रयच्छतीति तैरेषा स्मृतिः प्रवर्तिता स्यादित्याशङ्कायां वेदमूलत्वं नानुमीयते। पूर्ववच्च लोभपूर्वकत्वकल्पनमेवोपपन्नमिति निर्णयात्संदेहनिवृत्तिः। इदं च भाष्यकारेण प्रदर्शयता तुल्यकारणत्वात्पूर्वत्रापि प्रदर्शितमेवेति योजयितव्यम्। § 522

भाष्यकारीयाधिकरणाक्षेपः।

एतावच्चेहाधिकरणद्वयेऽपि वक्तव्यम्। § 524

स्मृतीनां श्रुतिमूलत्वे दृढे पूर्वं निरूपिते।
विरोधे सत्यपि ज्ञातुं शक्यं मूलान्तरं कथम्॥§ 526

शाखान्तरविप्रकीर्णानि हि पुरुषान्तरप्रत्यक्षाण्येव वेदवाक्यानि पुरुषधर्मानुष्ठानक्रमेणापठितानि वेदसमाम्नायविनाशभयात्स्वरूपेणानुपन्यस्यार्थोपनिबन्धनद्वारलभ्यानि विशिष्टध्वनिस्थानीयेन तेनैव परोक्षाण्यपि व्यज्यमानानि पिण्डीकृत्य स्मर्यन्ते। तत्र यथैवाऽऽप्तप्रत्ययादिदमिह पठ्यत इति कथितमुच्चारितमनुच्चारितं वा शिष्याः प्रतिपद्यन्ते तथैव सूत्रकारवचनान्यध्यापकवचनस्थानीयानि स्वानुरूपवेदवाक्यसमर्पणमात्रं कृत्वा निवृत्तव्यापाराणीति न ताल्वादिध्वनिप्रेरणवत्पौरुषेयत्वेन परिभवितव्यानि। § 527

वेदो हीदृश एवायं पुरुषैर्यः प्रकाश्यते।
स पठद्भिः प्रकाश्येत स्मरद्भिर्वेति तुल्यभाक्॥§ 529

अनुच्चारणकाले च संस्कारैरेव केवलैः।
तत्कृतस्मरणैर्वाऽयं वेदोऽध्येतृषु तिष्ठति॥§ 531

तेनार्थं कथयद्भिर्या स्मृतार्था कथ्यते श्रुतिः।

८ प्राधान्य ] पाठो भवितुं युक्त इति भाति।
खलगतधान्यविभागव्यापृतभृतकवादिति

पठिताभिः समानाऽसौ केन न्यायेन बाध्यते॥§ 533

स्मृतिशास्त्रं च यद्येकं भवेत्कृत्स्नमवैदिकम्।
तन्मुक्त्वैकं ततोऽन्यानि व्यवहाराङ्गतामियुः॥§ 535

188 कठमैत्रायणीयादिपठितश्रुतिमूलिकाः।
दृश्यन्ते स्मृतयः सर्वा भद्रोपनयनादिषु॥§ 537

तदा तन्मध्यपात्येकं वाक्यं किंचिदपस्मृतिः।
मूलान्तरोद्भवं वक्तुं जिह्वा नो न प्रवर्त्तते॥§ 539

बाधिता च स्मृतिर्भूत्वा काचिन्न्यायविदा यदा।
श्रूयते न चिरादेव शाखान्तरगता श्रुतिः॥§ 541

तदा का ते मुखच्छाया स्यान्नैयायिकमानिनः।
बाधाबाधानवस्थानं ध्रुवमेवं प्रसज्यते॥§ 543

यच्चैतत्सर्ववेष्टनस्मरणं स्पर्शनश्रुतिविरुद्धत्वेनोदाह्रियते। एतज्जैमिनिनैव च्छान्दोग्यानुवादे शाट्यायनिब्राह्मणगतश्रुतिमूलत्वेनौदुम्बरीप्रकरणे च शाट्यायनिनां तामूर्ध्वदशेनोभयत्र वाससी दर्शयतीति 'वेष्टुतं वै वासः श्रीर्वै वासः श्रीः सामे' इति दर्शिते तत्प्रसङ्गेनौदुम्बरीवेष्टनवाससोऽपि प्रकाशश्रुतिमूलत्वमेवान्वाख्यातम्। § 544

ततश्च श्रुतिमूलत्वाद्बाध्योदाहरणं न तत्।
विकल्प एव हि न्याय्यस्तुल्यकक्षप्रमाणतः॥§ 546

विरुद्धत्वे च बाधः स्यान्न चेहास्ति विरुद्धता।
न हि वेष्टनमात्रं नः स्पर्शश्रुत्या विरुध्यते॥§ 548

यदि द्वित्राङ्गुलं मध्ये विमुच्योत्तरभागतः।
वेष्ट्येतौदुम्बरी तत्र किं नाम न कृतं भवेत्॥§ 550

सर्वा वेष्टयितव्येति न ह्येवं सूत्रकृद्वचः।
न ह्यस्याः क्रियते कैश्चित्कर्णमूलेषु वेष्टनम्॥§ 552

परिशब्दोऽपि यस्तत्र सर्वतो वेष्टनं वदेत्।
तद्वर्जितसमन्तत्वे सोऽर्थवानेव जायते॥§ 554

लोभमूलं च यत्तस्याः कल्प्यते सर्ववेष्टनम्।
तल्लोभः सुतरां सिध्येन्मूलाग्रपरिधानयोः॥[§ 556]

अन्तरीयोत्तरीये हि योषितामिव वाससी।
स्मरेत्कौशेयजातीये नोद्गातैकं गुणैर्विना॥[§ 558]

प्राक् च लोभादिह स्पर्शः कुशैरेवान्तरीयते।
वेष्टितैषा कुशैः पूर्वं वाससा परिवेष्ट्यते॥[§ 560]

कुशवेष्टनवाक्ये च न किंचिद्धेतुदर्शनम्।
नियमेऽपि च तद्दृष्टं नैवोर्ध्वदशवाससः॥[§ 562]

क्रीतराजकभोज्यान्नवाक्यं चाथर्ववैदिकम्। 189
न च तस्याप्रमाणत्वे किंचिदप्यस्ति कारणम्॥[§ 564]

यदि यज्ञोपयोगित्वं नेहास्त्याथर्वणश्रुतेः।
अर्थान्तरप्रमाणत्वं केनास्याः प्रतिहन्यते॥[§ 566]

शान्तिपुष्ट्याभिचारार्था ह्येकब्रह्मर्त्विगाश्रिताः।
क्रियास्तया प्रमीयन्तेऽत्राप्येवाऽऽत्मीयगोचराः॥[§ 568]

न चायमपि यज्ञाङ्गविधिः शान्त्यादिशास्त्रवत्।
अतोऽस्यापि प्रमाणत्वं पुरुषार्थेन वार्यते॥[§ 570]

न ह्येतद्यजमानस्य नर्त्विजामुपदिश्यते।
सर्वेभ्यः पुरुषेभ्यो हि भोज्यान्नत्वमिदं श्रुतम्॥[§ 572]

वाक्यान्तरैर्निषिद्धं यद्दीक्षितान्नस्य भोजनम्।
तस्यैव श्रूयते पश्चादभ्यनुज्ञाविधिद्वयम्॥[§ 574]

अग्नीषोमीयसंस्थायां क्रीते वा सति राजनि।
सोऽयं कालविकल्पः स्यादाशौचच्छेदकालवत्॥[§ 576]

ननु चाशौचकालोऽपि धर्मपीडाद्यपेक्षया।
अतः समविकल्पत्वं नैव तस्यापि संमतम्॥[§ 578]

यस्य ह्यल्पेन कालेन शुद्धिर्भोज्यान्नताऽपि वा।

स कस्मात्तावता शुद्धो दीर्घकालत्वमाश्रयेत्॥§ 580

एकरात्रे त्रिरात्रे वा शुद्धस्य ब्राह्मणस्य च।
अशुद्धिरनुवर्तेत दशरात्रं कथं पुनः॥§ 582

पापक्षयो हि शुद्धत्वं धर्मयोग्यत्वमेव वा।
प्राग्दशाहात्कथं तस्य सदसद्भावकल्पना॥§ 584

एवं प्राक् पशुसंस्थानाद्दीक्षितान्नविशुद्धता।
अस्ति नास्तीति चेत्येवं सहते नावधारणम्॥§ 586

स्यादेतद्येन यः कालः पुरस्तात्परिगृह्यते।
तस्यासावेव होमस्य प्रागूर्ध्वोदयकालवत्॥§ 588

युक्तं समविकल्पत्वमुदितानुदितत्वयोः।
न काचिदत्र पूर्वोक्ता सदसत्त्वविरोधिता॥§ 590

न चानुदितहोमोक्तावुदितोक्तिरनर्थिका।
क्लेशक्षयव्ययादीनां नातिरेकोऽत्र कश्चन॥§ 592

190 इह त्वल्पेन कालेन शुद्धेर्या दीर्घकालता।
न वर्धयेदघाहानि साऽनेनापि निवार्यते॥§ 594

क्लेशप्रायं च तं पक्षं नाऽऽश्रयेतैव कश्चन।
ततोऽनङ्गीकृते तस्मिन् स्यात्तद्वाक्यमनर्थकम्॥§ 596

तेनर्ते विषयान्यत्वान्न विकल्पोऽवकल्पते।
स चोक्तो धर्मपीडाख्यस्तत्र चाह्नामवर्धनम्॥§ 598

दन्तजातानुजातान्यकृतचूडेषु च क्रमात्।
चितिक्रिया व्यहैकाहास्तत्र चाह्नामवर्धनम्॥§ 600

तथा गौतमेनाप्युक्तम्— राज्ञां च कार्याविघातार्थं ब्राह्मणानां च स्वाध्यायानिर्वृत्त्यर्थमिति। § 601

अथ वाऽन्तर्यदाऽऽशौचनिमित्तं किंचिदापतेत्।
तत्र शेषेण या शुद्धिस्तच्छेषोऽयं भविष्यति॥§ 603

न वर्धयेदघाहानि निमित्तादागतान्यपि।
पूर्वस्यैव हि कालस्य प्रसङ्गेन तदङ्गता॥§ 605

प्रवृत्तोऽनपवृक्तश्च दशरात्रादिकोऽवधिः।
अन्तः पतितमाशौचं स व्याप्नोति स्वसंख्यया॥§ 607

वितत्य दश संख्या हि तान्यहानि व्यवस्थिता।
शक्नोत्येव परिच्छेत्तुमन्तराशौचमागतम्॥§ 609

शुद्ध्यशुद्धी ह्यदृष्टत्वाद्विज्ञायेते यथाश्रुति।
नन्वेवं भोजनस्यास्ति विषयावधिकारणम्॥§ 611

तत्र दीर्घावधिर्व्यर्थः स्यादल्पावध्यनुज्ञया।
तस्मादिहापि वैषम्यहेतुर्वाच्योऽवधिद्वये॥§ 613

अत्राप्यसंभवे तस्य दीक्षिते वा ददत्यपि।
तन्नियुक्तकदत्तान्नं भोज्यं सोमक्रये कृते॥§ 615

आपद्धर्मा यथैवान्ये मुख्यासंभवहेतुकाः।
तथैव प्राणपीडायां क्रीतराजकभोजनम्॥§ 617

हन्तैवमप्रमाणत्वमुक्तमन्यप्रकारकम्।
जग्धवानापदि ह्यार्तो विश्वामित्रः श्वजाघनीम्॥§ 619

उच्यते— § 620

एकं विनाऽप्यनुज्ञानात् क्रियते गत्यसंभवात्।
क्रियतेऽनुज्ञया त्वन्यद्विशेषश्च तयोर्महान्॥§ 622

सामान्येनाभ्यनुज्ञानाद्विशेषश्च विशिष्यते। 191
विशेषोऽत्यन्तनिर्दोषः स्तोकदोषेतरक्रिया॥§ 624

तथा च मनुनाऽप्युक्तमापद्धर्मगतं प्रति।
तत्रत्यपापशेषाणामन्ते शौचं भविष्यति॥§ 626

कर्मणा येन केनेह मृदुना दारुणेन वा।
उद्धरेद्दीनमात्मानं समर्थो धर्ममाचरेत्॥ इति।§ 628

धर्मश्च प्रथमं तावत्प्रायश्चित्तात्मको भवेत्।
ततस्तेन विशुद्धस्य फलार्थोऽन्यो भविष्यति॥ § 630

यत्तु क्रीतराजकभोज्यान्नत्ववचनं तद्गत्यन्तरासंभवे निर्दोषत्वज्ञापनार्थमेव ज्ञायते। तत्रापि तु। § 631

प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते।
स नाऽऽप्नोति फलं तस्य परत्रेति विचारितम्॥ § 633

इति निन्दितत्वान्न संभवद्भोज्यान्तरेणापि लोकयात्रादिवशेन भोक्तव्यम्। § 634

यदि वा कालवैषम्यादसत्समविकल्पयोः।
अर्थभेदव्यवस्थानादविरोधोऽवधार्यते॥ § 636

दीक्षितान्नमभोज्यं स्यादक्रीते राजनि ध्रुवम्।
क्रीते त्वभोजनं नाम मनः कर्म नियम्यते॥ § 638

यथैवाश्राद्धभोजित्वं यथा वाऽमांसभक्षणम्।
श्रेयसे विहितं धर्म्यं न सर्वत्र निषिध्यते॥ § 640

श्राद्धमन्तर्दशाहं हि नियोगेन निषिध्यते।
एकोद्दिष्टं सदेकेषां न तु पित्र्यं कदाचन॥ § 642

तत्राश्राद्धभोजित्वनियमः स्वर्गायेति विज्ञायते। तथा षष्ठ्यष्टमीचतुर्दशीपञ्चदशीषु मांसभक्षणमैथुनादिक्रियाप्रतिषेधाद्गृहस्थस्यान्यत्र कामचारे प्राप्ते तदकरणनियमः श्रेयसे विहितः। यथाऽऽह। § 643

न मांसभक्षणे दोषो न मद्ये न च मैथुने।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला॥ इति § 645

ननु च वाक्यद्वयदर्शनात्तत्र संयोगपृथक्त्वं युक्तमिह त्वेकमेव दीक्षितान्नभोजनप्रतिषेधवाक्यं कथं प्राक्क्रयात्प्रतिषेधति तदुत्तरकालं च प्रागग्नीषोमीयसमाप्तेर्निःश्रेयसेन नियच्छतीति। § 646

तदुच्यते— § 647

192 स्याद्वाक्यद्वयमेवैतदवधिद्वयकल्पितम्।
यः पूर्वः प्रतिषेधोऽत्र संस्थितः क्रीतराजके॥ § 649

परोऽवधिः पुनस्तस्य नैकत्वादवकल्पते।
द्वितीयान्नादनानुज्ञादर्शनात्तेन गम्यते॥ § 651

अभोजनविधिर्नूनमस्त्यन्योऽप्यान्तरालिकः।
न हि पूर्वमनुज्ञाते स्यादनुज्ञान्तरं पुनः॥ § 653

वरणादभ्यनुज्ञाते निर्वापे किमनुज्ञया॥ § 654

यथाऽध्वर्योर्वरणवेलायामेव सर्वं यजमानेन यज्ञोपयोगि स्वयमनुज्ञातमेवेति निर्वापमन्त्रे प्रसवशब्देन तदानींतनयजमानानुज्ञाप्रकाशनं न क्रियते तथेह क्रीतराजकावस्थानुज्ञातभोजनानुज्ञावचनमग्नीषोमीयसमाप्तौ पुनरुक्तमित्यवश्यं नियमेन प्रतिषेधान्तरेण वा वारितस्यानुज्ञानार्थमित्यवगम्यते। § 655

प्रतिषिद्धाभ्यनुज्ञा च विकल्पेनैव दूष्यते।
पर्युदस्ताभ्यनुज्ञानं तस्मादिष्टं व्यवस्थया॥ § 657

दीक्षितान्नविशिष्टाभोजननियमो हि श्रेयोर्थिभ्यो विधीयते। § 658

पाश्चात्यभोजनानुज्ञा नान्यथा ह्युपपद्यते।
अदृष्टार्थप्रसङ्गित्वान्न विधिश्चायमिष्यते॥ § 660

एवं विषयनानात्वादविरोधादबाधनम्। § 661

अष्टाचत्वारिंशद्वर्षं वेदब्रह्मचर्याचरणस्यापि स्मृतावेव पक्षान्तरविकल्पोपनिबन्धनादाश्रमान्तरविषयत्वसंभवाद्वा विरोधाभावः। तथा हि— § 662

वेदानधीत्य वेदौ वा वेदं वाऽपि यथाक्रमम्।
सामर्थ्याश्रमयोग्यत्वमङ्गीकृत्यैतदुच्यते॥ § 664

गौतमेनापि द्वादशवर्षाण्येकवेदब्रह्मचर्यं चरेदिति प्रथमकल्पमाशु गार्हस्थ्यप्रतिपत्त्यर्थमुक्त्वा द्वितीयकल्पे द्वादश प्रतिवेदं वा सर्वेष्वित्यष्टाचत्वारिंशत्परिग्रहः कृतः। § 665

तत्रैवं शक्यते वक्तुं येऽन्धपङ्ग्वादयो नराः।
गृहस्थत्वं न शक्ष्यन्ति कर्तुं तेषामयं विधिः॥ § 667

नैष्ठिकब्रह्मचर्यं वा परिव्राजकताऽपि वा।
तैरवश्यं ग्रहीतव्या तेनाऽऽदावेतदुच्यते॥ § 669

उपकुर्वाणकेनैव याप्यः कालो बहुस्ततः।
संप्राप्य ज्ञानभूयस्त्वं पवित्रैः क्षीणकल्मषैः॥ § 671

सर्वाश्रमातिरिक्तेन स्वाध्यायेनैव शोधितः।
स्तोकैरप्याश्रमाचारैर्गतिमिष्टां गमिष्यति॥ § 673

193 द्वैपायनादयश्चाऽऽहुः— § 674

परिनिष्ठितकार्यस्तु स्वाध्यायेनैव हि द्विजः।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते॥ § 676

यानि च प्रतिदिनप्रयुज्यमानऋक्सामयजुर्ब्राह्मणकल्पव्याख्यानादिब्रह्मयज्ञनिमित्तानि फलानि ऋत्वधिकृतपुरुषेभ्योऽन्यानर्थक्यप्रसङ्गाद्व्यावृत्तानि जपध्यानमात्राधिकृतब्रह्मचारिपरिव्राजकविषयत्वेनावतिष्ठन्ते तान्यपि स्वाध्यायविज्ञानभूयस्त्वेन भूयिष्ठानि भविष्यन्तीति प्रतिवेदब्रह्मचर्योपदेशः। यो वा कश्चिन्मेधावितया शीघ्रमेव वेदचतुष्टयमप्यधीत्य यथोपपत्तिकालं तदर्थज्ञानाभियोगमपरित्यजन्ग्रहणान्तं वेत्येतत्पक्षाश्रयणेन गृहस्थो भवेत्तं प्रति द्वादशाष्टाचत्वारिंशद्वर्षपक्षावनेनैव स्मरणेन पूर्वपक्षीकृताविति नातीव श्रुतिविरुद्धत्वेनोदाहर्तव्यौ। § 677

तेन नैव श्रुतिस्मृत्योर्विरोधोऽतीव दृश्यते।
श्रुत्योरेव ह्यसौ दृष्टः क्व चिद्वा नैव विद्यते॥ § 679

तेनात्र यदि वा कर्मप्रयोगोऽयं निरूप्यते।
यदि वा बाध्यमानत्वमुक्तं बाह्यं स्मृतीः प्रति॥ § 681

एतद्धि जैमिनिनाऽत्यन्तं हितोपदेशिना जिज्ञासुभ्यः प्रतिपाद्यते। § 682

यावदेकं श्रुतौ कर्म स्मृतौ वाऽन्यत्प्रतीयते।
तावत्तयोर्विरुद्धत्वे श्रौतानुष्ठानमिष्यते॥ § 684

व्रीहियवादिष्वपि तावत्प्रत्यक्षश्रुतिविहितेषु यदि कश्चिद्यावज्जीवमप्येकमेव पक्षमाश्रित्य व्यवहरेन्न स कदाचिदप्युपालम्भास्पदं गच्छेत्। § 685

ततश्च तुल्यकक्षाऽपि यदि नाम स्मृतिर्भवेत्।
तथाऽपि नैव दोषोऽस्ति श्रुत्यर्थमनुतिष्ठताम्॥ § 687

यानि स्मृतिवचनान्यर्थमात्रमेव प्रतिपाद्य मूलभूताः श्रुतीरनुदाहृत्य निवृत्तव्यापाराणि तेषु श्रुत्यनुमानव्याजसापेक्षप्रामाण्येषु सत्सु वेदवचनमनपेक्षत्वात्प्रमाणतरत्वेन सुतरां विश्रम्भणीयमिति श्रद्धाविशेषेण ग्राह्यतरार्थं विज्ञायते। सूत्रार्थोऽप्येवं योजयितव्यः। श्रौतस्मार्तविज्ञानविरोधे यदनपेक्षमपेक्षावर्जितं यस्य वाऽपेक्षणीयमन्यन्नास्तीत्येवं पाठद्वयेऽपि पूर्वसूत्रात्प्रमाणशब्दमनुषङ्गेण संबन्ध्य यदनपेक्षं तत्तावत्प्रमाणं स्यादिति तदानींतनव्यवहारमात्रप्रतिपत्त्यर्थमेवोच्यते। § 688

५ कुर्यान्मैत्रो ] हिंसारहितः।

ततश्च न तावच्छाखान्तरीयविद्यमानश्रुतिमूलत्वाशङ्कायां सत्यामेवात्यन्तनिराकरणपक्षः परिग्रहीष्यते। न च प्रत्यक्षश्रुत्यर्थानुष्ठानहानिः। यदा तु क्वचिच्छाखान्तरे स्मरणमूलं श्रुतिरपि प्रत्यक्षी भविष्यति तदोभयोस्तुल्यबल- 194
त्वाद्विकल्पो भविष्यत्येव। नन्वनेनैव न्यायेन स्वशाखाविहितविरुद्धं शाखान्तरगतमप्यग्राह्यं स्यात्। सत्यम्। § 689

वार्तामात्रेण तद्यावत्तावन्नैव ग्रहीष्यते।
यदा तु श्रवणं प्राप्तं तदाऽस्मान्न विशिष्यते॥§ 691

अतश्चैवं श्रुतिस्मृत्योर्विशेषोऽनेन दर्श्यते।
नात्यन्तमेव बाध्यत्वं न चाप्यत्यन्ततुल्यता॥§ 693

## ०.०.६.१ बाह्यग्रन्थानामप्रामाण्यनिरूपणम्।

यद्वा यान्येतानि त्रयीविद्भिर्न परिगृहीतानि किंचित्तन्मिश्रधर्मकञ्चुकच्छायापतितानि लोकोपसंग्रहलाभपूजाख्यातिप्रयोजनपराणि त्रयीविपरीतासंबद्धदृष्टशोभादिप्रत्यक्षानुमानोपमानार्थापत्तिप्राययुक्तिमूलोपनिबद्धानि सांख्ययोगपाञ्चरात्रपाशुपतशाक्यग्रन्थपरिगृहीतधर्माधर्मनिबन्धनानि विषचिकित्सावशीकरणोच्चाटनोन्मादनादिसमर्थकतिपयमन्त्रौषधिकादाचित्कसिद्धिनिदर्शनबलेनाहिंसासत्यवचनदमदानदयादिश्रुतिस्मृतिसंवादिस्तोकार्थगन्धवासितजीविकाप्रायार्थान्तरोपदेशीनि यानि च बाह्यतराणि म्लेच्छाचारमिश्रकभोजनाचरणनिबन्धनानि तेषामेवैतच्छ्रुतिविरोधहेतुदर्शनाभ्यामनपेक्षणीयत्वं प्रतिपाद्यते। न चैतत्क्वचिदधिकरणान्तरे निरूपितं न चावक्तव्यमेव गाव्यादिशब्दवाचकत्वबुद्धिवदतिप्रसिद्धत्वात्। § 694

यदि ह्यनादरेणैषां न कल्प्येताप्रमाणता।
अशक्यैवेति मत्वाऽन्ये भवेयुः समदृष्टयः॥§ 696

शोभासौकर्यहेतूक्तिकलिकालवशेन वा।
यज्ञोक्तपशुहिंसादित्यागभ्रान्तिमवाप्नुयुः॥§ 698

ब्राह्मणक्षत्रियप्रणीतत्वाविशेषेण वा मानवादिवदेव **श्रुतिमूलत्वमाश्रित्य सचेतसोऽपि श्रुतिविहितैः** सह विकल्पमेव प्रतिपद्येरन्। § 699

तेन यद्यपि लभ्येत स्मृतिः काचिद्विरोधिनी।
मन्वाद्युक्ता तथाऽप्यस्मिन्नेतदेवोपयुज्यते॥§ 701

त्रयीमार्गस्य सिद्धस्य ये ह्यत्यन्तविरोधिनः।
अनिराकृत्य तान्सर्वान्धर्मशुद्धिर्न लभ्यते॥§ 703

महाजनगृहीतत्वं पित्राद्यनुगमादि च।
तेऽपि द्वीपान्तरापेक्षं वदन्त्येव स्वदर्शने॥ § 705

तत्र श्रद्धामात्रमेवैकं व्यवस्थानिमित्तं सर्वेषां स्वपितृपितामहादिच-
रितानुयायित्वात्। यैश्च मानवादिस्मृतीनामप्युत्सन्नवेदशाखामूलत्वमभ्युपगतं
तान्प्रति सुतरां शाक्यादिभिरपि शक्यं तन्मूलत्वमेव वक्तुम्। को हि श-
195 ङ्कयादुत्सन्नानां वाक्यविषयेयत्तानियमं कर्तुम्। ततश्च यावत्किंचित्कियन्तम-
पि कालं कैश्चिदाद्रियमाणं प्रसिद्धिं गतं तत्प्रत्यक्षशाखाविसंवादेऽप्युत्सन्न-
शाखामूलत्वावस्थानमनुभवतुल्यकक्षतया प्रतिमायात्। अत आह—**विरोधे
त्वनपेक्ष्यं स्यादिति**। पारतन्त्र्यं तावदेषां स्मर्यमाणपुरुषविशेषप्रणीतत्वात्तैरेव
प्रतिपन्नं शब्दकृतकत्वादिप्रतिपादनादराच्च पार्श्वस्थैरपि ज्ञायते। § 706

वेदमूलत्वं पुनस्ते तुल्यकक्षमूलत्वाक्षमयैव लज्जया च मातापितृद्वेषिदुष्टपुत्रवन्नाभ्युपगच्छन्ति। अन्यच्च स्मृतिवाक्यमेकमेकेन श्रुतिवचनेन विरुध्येत। शाक्यादिवचनानि तु कतिपयदमदानादिवचनवर्जं सर्वाण्येव समस्तचतुर्दशविद्यास्थानविरुद्धानि त्रयीमार्गव्युत्थितविरुद्धाचरणैश्च बुद्धादिभिः प्रणीतानि। त्रयीबाह्येभ्यश्चतुर्थवर्णनिरवसितप्रायेभ्यो व्यामूढेभ्यः समर्पितानीति न वेदमूलत्वेन संभाव्यन्ते। स्वधर्मातिक्रमेण च येन क्षत्रियेण सता प्रवक्तृत्वप्रतिग्रहौ प्रतिपन्नौ स धर्ममविप्लुतमुपदेक्ष्यतीति कः समाश्वासः। उक्तं च। § 707

परलोकविरुद्धानि कुर्वाणं दूरतस्त्यजेत्।
आत्मानं योऽतिसंधत्ते सोऽन्यस्मै स्यात्कथं हित इति॥ § 709

बुद्धादेः पुनरयमेव व्यतिक्रमोऽलंकारबुद्धौ स्थितः। येनैवमाह। § 710

कलिकलुषकृतानि यानि लोके
मयि निपतन्तु विमुच्यतां तु लोकः, इति। § 712

स किल लोकहितार्थं क्षत्रियधर्ममतिक्रम्य ब्राह्मणवृत्तं प्रवक्तृत्वं प्रतिपद्य प्रतिषेधातिक्रमासमर्थैर्ब्राह्मणैरननुशिष्टं धर्मं बाह्यजनाननुशासद्धर्मपीडामप्यात्मनोऽङ्गीकृत्य परानुग्रहं कृतवानित्येवंविधैरेव गुणैः स्तूयते तदनुशिष्टानुसारिणश्च सर्व एव श्रुतिस्मृतिविहितधर्मातिक्रमेण व्यवहरन्तो विरुद्धाचारत्वेन ज्ञायन्ते। § 713

तेन प्रत्यक्षया श्रुत्या विरोधे ग्रन्थकारिणाम्।
ग्रहीत्राचरितॄणां च ग्रन्थप्रामाण्यबाधनम्॥ § 715

न ह्येषां पूर्वोक्तेन न्यायेन श्रुतिप्रतिबद्धानां स्वमूलश्रुत्यनुमानसामर्थ्यमस्ति। § 716

न च शाखान्तरोच्छेदः कदाचिदपि विद्यते।

प्रागुक्ताद्वेदनित्यत्वान्न चैषां दृष्टमूलता॥ § 718

न हि यथोपनयनादिस्मृतीनां शाखान्तरदृष्टश्रुतिसंवादः। एवं चैत्यकरणतद्वन्दनशूद्रसंप्रदानकदानादीनां संवादः संभवति मूलान्तरकल्पनं च प्रागेव प्रत्याख्यातम्। § 719

लोभादिकारणं चात्र बह्वेवान्यत्प्रतीयते।
यस्मिन्संनिहिते दृष्टे नास्ति मूलान्तरानुमा॥ § 721

शाक्यादयश्च सर्वत्र कुर्वाणा धर्मदेशनाम्।
हेतुजालविनिर्मुक्तां न कदाचन कुर्वते॥ § 723

न च तैर्वेदमूलत्वमुच्यते गौतमादिवत्। 196
हेतवश्चोभिधीयन्ते ये धर्मे दूरतः स्थिताः॥ § 725

एत एव च ते येषां वाङ्मात्रेणापि नार्चनम्।
पाखण्डिनो विकर्मस्था हैतुकाश्चैत एव हि॥ § 727

एतदीया ग्रन्था एव च मन्वादिभिः परिहार्यत्वेनोक्ताः। § 728

या वेदबाह्याः स्मृतयो याश्च काश्चित्कुदृष्टयः।
सर्वास्ता निष्फलाः प्रोक्तास्तमोनिष्ठा हि ताः स्मृताः॥ § 730

तस्माद्धर्मं प्रति त्रयीबाह्यमेवंजातीयकं प्रामाण्येनानपेक्ष्यं स्यादिति सिद्धम्॥ ४॥ § 731

## ०.०.७ शिष्टाकोपाधिकरणम्

**शिष्टाकोपे**—एवं तावत्पुरुषार्थस्मृतीनामविरोधे विरोधे च प्रमाणत्वाप्रमाणत्वे निरूपिते संप्रति तु क्रत्वर्थानां यज्ञोपवीतोदकाचमनदक्षिणहस्ताचरणस्मृतीनां बहुश्रुत्यर्थमध्यपातिनीनां विरोधाविरोधमात्रमेव विचार्यते। तन्निर्णये तु कृते पूर्वाधिकरणाभ्यां प्रमाणत्वाप्रमाणत्वसिद्धिः। § 732

कथं पुनर्विरुद्धत्वं कथं वा न विरुद्धता।
श्रुत्यर्थविगुणत्वेन तदभावेन चेष्यते॥ § 734

यदि यज्ञोपवीतादीनि क्रतुमनुप्रवेश्यमानानि चोदकप्रयोगवचनाभ्यां न परिगृह्यन्ते निराक्रियन्ते वा ततो विरोधः। यदि पुनरानुगुण्यात्प्रकरणादिपठितवत्स्मृत्यनुमितवाक्यसंयोगेन क्रतुमनुप्रविशन्ति न च पूर्वगृहीतं किंचिद्बाधन्ते ततो न विरुद्धानीति। अन्यत्तु दर्शनं सत्यपि विरोधे प्रमाणप्रमेयबलाबलविसंवादात्संदेहः। तथा हि। § 735

श्रुतिस्मृत्योर्विरुद्धत्वे ज्ञातमेव बलाबलम्।
धर्मधर्मिविरोधे च धर्मिणो बलवत्तराः॥ § 737

वक्ष्यति हि “**अङ्गगुणविरोधे च तादर्थ्यादिति**”। न चेह स्मार्तः कस्यचिदपि श्रौतस्य पदार्थस्य बाध आशङ्क्यते क्रमकालपरिमाणानि तु समस्तपदार्थधर्मत्वेन निश्चितानि। तत्र यदि प्रमाणबलाबलं बलीयस्ततो बलवच्छ्रुतिप्रमेयत्वाद्दुर्बलस्वभावैरपि क्रमादिभिराचमनादीनां बाधः प्रमेयबलाबलबलीयस्त्वे तु पदार्थधर्मेभ्यः क्रमादिभ्यः पदार्थत्वेनाऽऽचमनादयो बलीयांस इति सत्य-
197 पि स्मृत्याख्यप्रमाणे दुर्बलत्वे बलवदाश्रयानपि स्वरूपेण दुर्बलान्क्रमादीनेव बाधिष्यन्ते। § 738

किं युक्तमविरुद्धत्वं क्रत्वर्थाङ्गस्मृतेरपि।
न तदर्थक्रियायां हि श्रुतं किंचन हीयते॥ § 740

यथैव विज्ञातबलाबलैरपि श्रुत्यादिभिः समाख्यापर्यन्तैर्यावन्तः शेषाः प्रमीयन्ते ते सर्वे शेषिकथंभावेन प्रार्थिता इत्थंभावेन सहानारभ्यवादाधीतैर्गृह्यन्ते। § 741

स्मृत्या तथैव संतुष्टा शिष्टाचारेण चार्पिताः।
गृह्यन्ते भावनाभाव्यैरपूर्वैः साधनांशवत्॥ § 743

कथंभावापेक्षितापूर्वोपकारस्याज्ञातपरिमाणाङ्गसाध्यत्वाद् यावत्किंचिद्येन केनचिदपि प्रमाणेन प्राप्नोति तत्सर्वमङ्गं भवति। तस्मादाचमनादीन्यपि यज्ञप्रयोगाङ्गानीत्युपन्यस्तेऽभिधीयते॥ ५॥ § 744

न शास्त्रपरिमाणत्वात्पदार्थोऽभ्यधिको भवेत्।
शास्त्रितं परिमाणं हि कोऽतिक्रमितुमर्हति॥ § 746

शास्त्रेण हि पदार्थानां परिमाणं त्रिधा गतम्।
क्रमेयत्ताशुनिर्माणरूपं तदिह बाध्यते॥ § 748

द्वाभ्यां श्रुत्यादिषड्भ्यां कालेयत्ताक्रमान्स्थितान्।
पदार्थाः प्रविशन्तो हि बाधेरन्स्मार्तलौकिकाः॥ § 750

सर्वे हि पदार्थाः प्रधानकालान्न विप्रकृष्टव्या इति प्रयोगवचनेन प्रतिपादितं तत्र स्मार्तशिष्टलोकाचारप्रमाणकपदार्थानुष्ठानविक्षेपाद्दक्षिणैकहस्ताधीनविलम्बितानुष्ठानाच्च प्रधानप्रत्यासत्तिबाधप्रसङ्गः। § 751

समस्तप्रयोगकालाश्च पूर्वाह्णमध्यंदिनादयोऽतिक्रम्येरन्। क्रमश्च यः श्रुत्यर्थपाठस्थानमुख्यप्रवृत्तिवत्क्रमैरवगतः स च वैदिकपदार्थारूढतया

विज्ञाताश्रयप्रमाणपरिमाणः सन्नन्यथात्वं क्षुतादिनिमित्ताचमनव्यवधानात्प्रतिपाद्येत। एवमायासस्त्रस्तोपवीतपुनःकरणव्यवधानेऽपि योजनीयम्। § 752

योह्यसावन्तः स्मार्तः पदार्थः क्रियते तदा।
तस्य क्रमप्रमाणं हि न श्रुत्याद्यवगम्यते॥§ 754

उक्तपरिमाणस्य क्रमस्य नान्यदपि किंचित्प्रमाणमवकल्पते। त- 198
था श्रुत्याद्यवगतप्रचयशिष्टपदार्थपरिमाणमवश्यमध्वर्य्वादिभिरविस्मृतसमस्तपदार्थनिर्माणायावधारणीयम्। ततश्च प्रथमापरिकल्पितपश्चादागतस्मार्तपदार्थानुष्ठाने पूर्वावधारणभ्रंशात्समस्तकृताकृतानिरूपणादनिवृत्तवैगुण्याशङ्कस्य सम्यक्कृतत्वदार्ढ्यनिमित्तसंस्कारपाटवाभावादपूर्वदौर्बल्येन न्यूनफललाभप्रसङ्गः। § 755

तच्चातिशयवत्सर्वं सार्थवादाद्विधेर्गतम्।
न्यूनत्वाक्षमयाऽवश्यं विरुद्धं बाधते स्मृतिम्॥§ 757

परिमितश्रुत्याद्युपदेशातिदेशात्मकाङ्गशास्त्रपरिमाणत्वाद्वा न तद्व्यतिरिक्ताङ्गशास्त्रावकाशः। सहकर्तव्यापगतेषु च पदार्थेषु सर्वात्मना त्वरमाणस्य यावानेवात्यन्ताशक्त्या कालविप्रकर्षो भवति तावन्मात्रमेव प्रयोगवचनोऽनुमन्यते। शक्तस्तु क्षणमात्रमपि यदि विक्षेपं कुर्यात्तदस्य प्रयोगवचनविधिर्न सहेत। तस्मात्त्रिविधस्यापि शास्त्रपरिमाणस्यान्यथाकरणान्नाऽऽचमनाद्यविरुद्धमिति। उच्यते॥ ६॥ § 758

तेष्वदर्शनाद्विरोधस्येति वा समाप्तिः। अनन्तरसूत्रे विप्रतिपत्त्युपात्तविरोधाभावोक्तेरनुपयुज्यमानत्वादिह च प्रक्रान्तविरोधाभावस्यावश्यवचनीयत्वात्। उपयोगसद्भावेऽपि च काकाक्षिवदनुषङ्गेण तन्त्रेण चोभयसंबन्धात्। § 759

अपिवा कारणं दृष्टं यस्मादेषु न गृह्यते।
तस्मान्नाऽऽचमनादीनां क्रतुश्रुतिविरुद्धता॥§ 761

विरोधत्याजितश्रुतिविरुद्धता। विरोधत्याजितश्रुतिमूलस्य हि स्मरणस्य यस्य मूलान्तरमिदं नामेत्येवं संभवदुत्प्रेक्षामात्रेणोपप्लवते तत्राल्पेनैव प्रयासेन निराशङ्कमप्रमाणत्वं निश्चीयते। § 762

यत्र तूत्प्रेक्षयाऽप्यन्यत्कारणं नावलम्ब्यते।
अत्यन्तानन्यमूलत्वाच्छ्रुतितस्तत्प्रमाणता॥§ 764

न वाऽऽचमनादिस्मृतेः कामक्रोधलोभद्वेषमानलज्जादिकारणं किंचित्संभाव्यते यन्मूलत्वेन श्रुतिमूलत्वमपह्नूयेत। § 765

अनन्यमूलिकायां च श्रुतौ मूलेऽवधारिते।

विरोधेऽपि प्रमाणत्वं स्मृतेः श्रुत्या न वार्यते॥ § 767

199 इयत्ताक्रमकालाश्च श्रौतत्वाद्बलवत्तराः।
पदार्थधर्मभावात्तु दुर्बलत्वादबाधकाः॥ § 769

ननु पूर्वभावित्वात्प्रमाणबलाबलमेव प्रमेयबलाबलाज्ज्यायस्त्वेन प्रतिभाति। उच्यते— § 770

नैव तावच्छ्रुतिस्मृत्योः स्वरूपेण विरुद्धता।
बलाबलपरीक्षा वा प्रमेयद्वारिका हि सा॥ § 772

प्रमेयगतं हि विरोधमालोच्य प्रमाणविरोधबुद्धिर्भवति। § 773

तद्यस्यामेव वेलायां विरोधो दृश्यते तयोः।
प्रमेययोः स्वरूपस्थं तस्मादेव बलाबलम्॥ § 775

येषां पदार्थधर्मत्वाद्दौर्बल्यं पूर्वनिश्चितम्।
न तेषां श्रुत्यवष्टम्भात्तत्पश्चादपगच्छति॥ § 777

पदार्थत्वेन येषां च बलीयस्त्वं निरूपितम्।
न स्मृतेर्दुर्बलत्वेन पुनस्तदपनीयते॥ § 779

नित्यमेवाप्रमाणं यत्तदेवं बाधमर्हति।
आपेक्षिकाप्रमाणं तु स्यात्प्रमाणमपेक्षया॥ § 781

न च प्रमेयदौर्बल्यबलीयस्त्वनिबन्धनम्।
प्राप्तं स्मृतिप्रमाणत्वं प्रमाणस्थेन बाध्यते॥ § 783

न च प्रमेयदौर्बल्ये सत्यपि श्रुतिबाधनम्।
तावता मन्दतेजस्त्वात्स्मृतिस्तां नैव बाधते॥ § 785

एतदेव श्रुतेः पार्श्वाद्बहु यत्र स्मृतिर्वृथा।
महास्मृत्याऽपि या काचिन्न शक्या बाधितुं श्रुतिः॥ § 787

युगपत्प्राप्तिहेतुश्च विरोधस्तुल्यकार्ययोः।
इह तु द्वयमप्येतन्नास्ति तेनाविरुद्धता॥ § 789

कालेयत्ताक्रमाणां हि सर्वान्ते प्राप्तिरिष्यते।
सुजघन्यप्रमाणोऽपि पदार्थः पूर्वमश्नुते॥ § 791

प्राप्तेषु हि पदार्थेषु क्रमः पश्चादपेक्षते।
यदा प्राप्तेष्वसौ क्लृप्तः केन पश्चाद्विरुध्यते॥ § 793

परिमाणमपि त्वार्थमविस्मरणसिद्धये। 200
स्वयमालोच्यते प्राज्ञैः स्मार्तैः सह तदिष्यते॥ § 795

न केनचित्प्रमाणेन पदार्थयत्ता परिच्छिद्यते। तत्र यदि तेन विनाऽन्ये समस्तपदार्थस्मृतिहेतवो न स्युस्तत एतदप्येकं कारणमिति परिमाणमपि स्थाप्येत। तस्यामपि त्ववस्थायां यथा श्रौतमात्रपरिमाणमसमाप्य समाख्यापर्यन्तप्रापितपदार्थगतपरिमाणावधारणमाश्रीयते तथा स्मृत्याचारपर्यन्तावगतपरिमाणमाश्रयिष्यत इति निर्दोषम्। § 796

कालोऽपि च प्रयोगाङ्गं सर्वान्ते सोऽपि गृह्यते।
स्मार्तैः सह ससाहित्यमाशुत्वं वा प्रपत्स्यते॥ § 798

कालो ह्ययं प्रधानस्य सर्वाङ्गसहितस्य यः।
अङ्गैरविप्रकृष्टत्वमीदृशस्यैव चोद्यते॥ § 800

तस्माद्यत्किंचनप्रमाणकसर्वपदार्थप्राप्त्युत्तरकालापेक्षितसंबन्धः कालोऽपि नैव सर्वोपसंहारविरोधीति तेषु क्रमकालपरिमाणेष्वदर्शनाद्विरोधस्येत्युच्यते। यद्वा तेष्वाचमनादिषु क्रियमाणेष्वदर्शनाद्विरोधस्येति सूत्रार्थयोजना। अपि च— § 801

शौचयज्ञोपवीतादेर्न स्वतन्त्रपदार्थता।
सर्वं ह्यङ्गप्रधानार्थं तेन न व्यवधायकम्॥ § 803

अतदङ्गेन हि तुल्यकक्षेण व्यवधानं भवति न सर्वपदार्थेन। § 804

वेदं कृत्वा यदा वेदिमकृत्वाऽऽचामति क्षुते।
वेदिमेव करोतिति स वक्तुं शक्यते तदा॥ § 806

वेदिरेव ह्यनाचम्य कुर्वतो विगुणी भवेत्।
तामेव सगुणां कर्तुं शुद्ध्या न व्यवधास्यते॥ § 808

इममेवार्थमभिप्रेत्य भाष्यकारेणोक्तं न **चैवंजातीयका अर्थाः पदार्थानां व्यवधातारो भवन्तीति**। इतरथा ह्यङ्गप्रधानार्थत्वेऽनाश्रीयमाणे शून्यहृदयवचनमेवैतत्स्यात्। § 809

तस्मादाचमनादीनां क्रतुभिः संग्रहे सति।
पश्चात्प्राप्तक्रमेयत्ताकालशास्त्राविरोधिता॥ § 811

## ०.०.७.१ ( भाष्यकारोक्तोदाहरणाक्षेपः।)

201

नन्विदं यज्ञोपवीतमुदाहर्तव्यम्। दर्शपूर्णमासादिषु **‘उपव्ययते देवलक्ष्ममेव तत्कुरुते’** इति क्रत्वङ्गत्वप्रत्यक्षविधानात्। तथा काठके चानारभ्यवादविधिना सर्वयज्ञगतयजनयाजनसंबन्धोऽध्यापनाध्ययनसंबन्धश्च श्रूयते। **‘प्रसृतेन वै यज्ञेन देवा स्वर्गं लोकमायन्नपसृतेनासुरान्पराभावयन्। प्रसृतो ह वै यज्ञोपवीतिनो यज्ञोऽप्रसृतोऽनुपवीतिनो यत्कै किं च ब्राह्मणो यज्ञोपवीत्यधीते यजत एव तत्तस्माद्यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वा यज्ञस्य प्रसृत्या इति’।** तथाऽऽचमनविधिरपि ‘दक्षिणत उपवीयोपविश्य हस्ताववनिज्य त्रिराचम्य द्विः परिमृज्य दर्माणां महदुपस्तीर्योपस्थं कृत्वा प्राङ्मुख उपविश्य स्वाध्यायमधीयीत’ इति यद्यपि ब्रह्मयज्ञप्रकरणे श्रूयते तथाऽपि वेदोच्चारणसंबन्धात्तदङ्गत्वेनापि तावज्ज्ञायमानं सर्वयज्ञानां मन्त्रवत्प्रयोगित्वात्तदङ्गं भवति। तथा च **“न सोमेनोच्छिष्टा भवन्ति”** इति प्राप्ताचमनप्रतिषेधार्थमेवावधार्यते। दक्षिणाचारत्वं तु— § 812

यत्राऽऽहत्य विधानेन स्यात्सव्याञ्जलिचोदना।
तस्मादेव निवर्तेत नान्यन्नाऽऽशङ्क्यतेऽपि तत्॥§ 814

**“यथा वै दक्षिणः पाणिरेवं देवयजनम्”** इति प्रागुदक्प्रवणविधिपरे वाक्ये देवयजनवद्यज्ञाङ्गत्वौचित्यादुपमानमवकल्पते। तेन नात्रैकमपि विरोधबाधशङ्कायोग्यमित्यनुदाहरणानि। तस्मान्नैवैतदधिकरणान्तरम्। § 815

## ०.०.७.२ ( वेदाविरुद्धशाक्यादिवचसामप्रामाण्यनिरूपणम्। )

सूत्राणि तु पूर्वाधिकरणाक्षेपपरिहारसूत्रत्वेनैव व्याख्यातव्यानि। यत्तर्हि वेदविहितं न बाधते शिष्टान्वा वेदविदो न कोपयति। विहाराराममण्डलकरणवैराग्यध्यानाभ्यासाहिंसासत्यवचनदमदानदयादि, तद्बुद्धादिभाषितं प्रमाणेनाविरुद्धमिति चेत्। **न। शास्त्रपरिमाणत्वात्।** § 816

परमितान्येव हि चतुर्दशाष्टादश वा विद्यास्थानानि धर्मप्रमाणत्वेनःशिष्टैः परिगृहीतानि वेदोपवेदाङ्गोपाङ्गाष्टादशधर्मसंहितापुराणशास्त्रशिक्षादण्डनीतिसंज्ञकानि, न च तेषां मध्ये बौद्धार्हतादिग्रन्थाः स्मृता गृहीता वा। § 817

प्रतिकञ्चुकरूपेण पूर्वशास्त्रार्थगोचरम्।

२ त्कुरुते] तै० सं० ( २—५—११ )।
६ सृत्या] तै० आ० ( २—२)।
६ रिगृहीतानि]
उपवेदाः—आयुर्वेदधनुर्वेदगन्धर्ववेदाः।
अङ्गानि—शिक्षादीनि।
उपाङ्गं—पूर्वोत्तरमीमांसाद्वयम्।
दण्डनीतिः—अर्थशास्त्रमित्यर्थः।

यदन्यत्क्रियते तस्य धर्मं प्रत्यप्रमाणता॥ § 819

तथा च प्रायश्चित्तादिदानकाले यो वाक्यमात्मीयमन्यकविकृतं वा श्लोकं 202 सूत्रं वोच्चार्य मानवादिप्रायश्चित्तं दद्यान्न कश्चिदपि धर्मार्थं प्रतिपद्येत। § 820

वेदेनैवाभ्यनुज्ञाता येषामेव प्रवक्तृता।
नित्यानामभिधेयानां मन्वन्तरयुगादिषु॥ § 822

तेषां विपरिवर्तेषु कुर्वतां धर्मसंहिताः।
वचनानि प्रमाणानि नान्येषामिति निश्चयः॥ § 824

तथा च **"मनोर्ऋचः सामिधेन्यो भवन्ति"** इत्यस्य विधेर्वाक्यशेषे श्रूयते **"मनुर्वै यत्किंचिदवदत्तद्भेषजं भेषजतायै"** इति प्रायश्चित्ताद्युपदेशवचनं पापव्याधेर्भेषजम्। § 825

न वैतच्छ्रुतिसामान्यमात्रं नित्येऽपि संभवात्।
यज्ञेऽध्वर्युरिव ह्यस्ति मनुर्मन्वन्तरे सदा॥ § 827

प्रतिमन्वन्तरं चैवं स्मृतिरन्या विधीयते।
स्थिताश्च मनवो नित्यं कल्पे कल्पे चतुर्दश॥ § 829

तेन तद्वाक्यचेष्टानां सर्वदैवास्ति संभवः।
तदुक्तिज्ञापनाद्वेदो नानित्योऽतो भविष्यति॥ § 831

प्रतियज्ञं भवन्त्यन्ये सर्वदा षोडशर्त्विजः।
आदिमत्त्वं च वेदस्य न तच्चरितबन्धनात्॥ § 833

उक्तं च— § 834

यथर्तावृतुलिङ्गानि नानारूपाणि पर्यये।
दृश्यन्ते तानि तान्येव तथा भाति युगादिषु॥ इति। § 836

इतिहासपुराणं च कृत्रिमत्वेन निश्चिते।
तथाऽप्यकृत्रिमे वेदे तद्विद्यात्वेन संमतम्॥ § 838

एवं ह्युपनिषत्सूक्तम्। **'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमथर्ववेदं चतुर्थमितिहासं पुराणं पञ्चमम्' इति**। तेन प्रतिकल्पमन्वन्तरयुगनियतनित्यऋषिनामाभिधेयकृत्रिमविद्यास्थानकारा ये वेदेऽपि मन्त्रार्थवादेषु श्रूयन्ते तत्प्रणीतान्येव विद्यास्थानानि धर्मज्ञानाङ्गत्वेन संमतानि। तथा च ऋग्वेदादिविहितयज्ञाङ्गभ्रेषप्रायश्चित्तविशेषानभिधाय **'यद्यविज्ञात इति'** प्रायश्चित्तान्तरं विदधत् त्रैविद्यवृद्धस्मृतिविहितविनष्टोद्देशेनैवविदधातीति गम्यते।

अन्यथा हि प्रत्यक्षवेदविहितं सर्वं विज्ञातमूलविशेषत्वादविज्ञातमूलत्वेनानभिधेयमेव स्यात्। यदि च स्मर्यमाणवेदमूलग्रन्थनिबन्धनानामविज्ञातृवेद-
203 विशेषपूर्वकत्वेनापि स्थितानां प्रामाण्यं नाऽऽश्रीयेत तथा सति नैवाविज्ञातमूलं किंचिद्यज्ञे क्रियत इति तद्विनष्टप्रायश्चित्तविधिर्नैवोपपद्येत। § 839

तस्माद्यान्येव शास्त्राणि वेदमूलानतिक्रमात्।
अवस्थितानि तैरेव ज्ञातो धर्मः फलप्रदः॥§ 841

यथैवान्यायविज्ञाताद्वेदाल्लेख्यादिपूर्वकात्।
शूद्रेणाधिगताद्वापि धर्मज्ञानं न संमतम्॥§ 843

तथाऽतिक्रान्तवेदोक्तमर्यादाव्यहारिणाम्।
संवादिष्वपि वाक्येषु नेष्यते धर्महेतुता॥§ 845

स्मर्यन्ते च पुराणेषु धर्मविप्लुतिहेतवः।
कलौ शाक्यादयस्तेषां को वाक्यं श्रोतुमर्हति॥§ 847

यथा कृतककर्पूरसुवर्णादिषु दीयते।
यद्बीजं तदपि व्यक्तमग्राह्यत्वात्प्रतीयते॥§ 849

तेन कर्मानुरूप्यसामान्यतो दृष्टार्थापत्तिबलात्तदभिप्रायकल्पितधर्माभासमध्यपतितं सन्मूलमप्यहिंसादि श्वदृति निक्षिप्तक्षीरवदनुपयोग्यविश्रम्भणीयं च तन्मात्रोपलब्धं भवतीत्यवश्यं यावत्परिगणितधर्मशास्त्रेभ्यो नोपलभ्यते तावदग्राह्यं भवति। § 850

यदा शास्त्रान्तरेणैव सोऽर्थः स्पष्टोऽवधार्यते।
तदा तेनैव सिद्धत्वादितरत्स्यादनर्थकम्॥§ 852

तस्माद्यावत्परिगणितवेदादिशास्त्रव्यतिरिक्तनिबन्धनं तद्धर्मप्रमाणत्वेन नापेक्षितव्यमिति। § 853

## ०.०.७.३ ( सदाचारप्रामाण्यनिरूपणम्। )

यत्त्वेतत्। **अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्,** इति सूत्रम्। अत्र सदाचारानुदाहृत्य त्रिवर्गसिद्ध्यर्थं विचार्यते। तद्विपरीतसंकीर्णव्यवहारिषु शिष्टेष्वपथ्यकारिवैद्यातुरवदविस्रम्भणीयचरितत्वात्संभाव्यमानवेदमूलत्वाच्च धर्मसंशयं दर्शयित्वा **“धर्मस्य शब्दमूलत्वादशब्दमनपेक्ष्यम्”** इति पूर्वः पक्षः क्व चिच्च **“विरोधे त्वनपेक्ष्यम्”** इत्येतन्न्यायानुसारेण। सदाचारेषु हि दृष्टो धर्मव्यतिक्रमः साहसं च महतां प्रजापतीन्द्रवसिष्ठ-

विश्वामित्रयुधिष्ठिरकृष्णद्वैपायनभीष्मधृतराष्ट्रवासुदेवार्जुनप्रभृतीनां बहूनामद्यतनानां च। प्रजापतेस्तावत् “प्रजापतिरुषसमभ्यैत्स्वां दुहितरम्” इत्यगम्यागमनरूपादधर्माचरणाद्धर्मव्यतिक्रमः। इन्द्रस्यापि। तत्पदस्थस्य च नहुषस्य परदाराभियोगाद्धर्मव्यतिक्रमः। तथा वसिष्ठस्य पुत्रशोकार्तस्य जलप्रवेशात्मत्यागसाहसम्। विश्वामित्रस्य चाण्डालयाजनम्। वसिष्ठवत्पुरूरवसः प्रयोगः। कृष्णद्वैपायनस्य गृहीतनैष्ठिकब्रह्मचर्यस्य विचित्रवीर्यदारेष्वपत्योत्पादनप्रसङ्गः। भीष्मस्य च सर्वाश्रमधर्मव्यतिरेकेणावस्थानम्। अपत्नीक- 204
स्य च रामवत्क्रतुप्रयोगः। तथाऽन्धस्य धृतराष्ट्रस्येज्या पाण्डवर्जितैर्धनैरित्यनधिकृतक्रिया। तथा युधिष्ठिरस्य कनीयोर्जितभ्रातृजायापरिणयनमाचार्यब्राह्मणवधार्थमनृतभाषणं च। वासुदेवार्जुनयोः प्रतिषिद्धमातुलदुहितृरुक्मिणी सुभद्रापरिणयनम्, उभौ मध्वासवक्षीबाविति सुरापानाचरणम्। अद्यत्वेऽप्यहिच्छत्रमथुरानिवासिब्राह्मणीनां सुरापानम्। केसर्यश्वाश्वतरखरोष्ट्रोभयतोदद्दानप्रतिग्रहविक्रयव्यवहारभार्यापत्यमित्रसहभोजनाद्युदीच्यानाम्। मातुलदुहित्रुद्वाहासन्दीस्थभोजनादीनि दाक्षिणात्यानाम्। मित्रस्वजनोच्छिष्टस्पृष्टभोजनं सर्ववर्णपरस्परस्पृष्टताम्बूलादनतदवसानानाचमननिर्णेजकधौतगर्दभारूढवस्त्रपरिधानब्रह्महत्यातिरिक्तमहापातककार्यपरिहरणादीन्युभयेषाम्। अतिस्थूलानि प्रतिपुरुषजातिकुलावस्थितसूक्ष्मस्वधर्मव्यतिक्रमणानि त्वनन्तभेदानि सर्वत्र विगानहेतुदर्शनानि च प्रायेणैव संभवन्तीति नैवंजातीयकमिश्रसदाचारधर्मत्वाध्यवसानसंभवः। किं च। § 854

के शिष्टा ये सदाचाराः सदाचाराश्च तत्कृताः।
इतीतरेतराधीननिर्णयत्वादनिर्णयः॥ § 856

ननु। § 857

सदाचारप्रमाणत्वं मन्वादिभिरपि स्मृतम्।
आत्मतुष्टिः स्मृताऽन्या तैर्धर्मे सा चानवस्थिता॥ § 859

यथाभ्यासं ह्याशयवैचित्र्येण शुभाशुभोभयहीनक्रियानुष्ठायिनामात्मतुष्टिरपि विचित्रैव भवति। तथा हि। § 860

कस्यचिज्जायते तुष्टिरशुभेऽपि हि कर्मणि।
शाक्यस्येव कुहेतूक्तिवेदब्राह्मणदूषणे॥ § 862

तथा हि। § 863

पशुहिंसादिसंबन्धे यज्ञे तुष्यन्ति हि द्विजाः।

३ स्यापि] गौतमधर्मपत्न्यहिल्यागमनरूपो धर्मव्यतिक्रमो बोध्यः।

११ उभौ] उभौ मध्वासवक्षीवौ दृष्टौ मे केशवार्जुनौ।

तेभ्य एव हि यज्ञेभ्यः शाक्याः क्रुध्यन्ति पीडिताः॥§ 865

तथा। § 866

शुद्रान्नभोजनेनापि तुष्यन्त्यन्ये द्विजातयः।
स्वमातुलसुतां प्राप्य दाक्षिणात्यस्तु तुष्यति॥§ 868

अन्ये तु सव्यलीकेन मनसा तन्न कुर्वते।§ 869

ततश्चानवस्थितत्वाद्यथैवाऽऽत्मनस्तुष्टिरेव चेत्येतन्मनुवचनं कथमप्यन्यथा नेतव्यम्। एवमाचारश्चैव साधूनामित्येतदपीति। § 870

205

स्वयमज्ञातमूलाश्च शिष्टाचारप्रमाणताम्।
वदन्तोऽपि न शोभन्ते स्मृतिकारास्ततोऽधिकाः॥§ 872

स्मृतिकारवचनार्थो हि शिष्टैराचरितव्यः शिष्टत्वाय। अन्यथा हि तदनपेक्षाः स्वातन्त्र्येण व्यवहरमाणा दुष्टा भवेयुर्न शिष्टाः। § 873

न च तेषां श्रुतिर्मूलं व्यवहारस्य दृश्यते।
यदि च स्यात्परोक्षाऽपि स्मर्यैतैव ह्यसौ ध्रुवम्॥§ 875

तस्मान्निर्मूलत्वादनपेक्षाणि शिष्टाचरणानीति प्राप्तेऽभिधीयते। § 876

**“अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्”** इति। § 877

दृष्टकारणहीनानि यानि कर्माणि साधुभिः।
प्रयुक्तानि प्रतीयेरन्धर्मत्वेनेह तान्यपि॥§ 879

शरीरस्थितये यानि सुखार्थं वा प्रयुञ्जते।
अर्थार्थं वा न तेष्वस्ति शिष्टानामेव धर्मधीः॥§ 881

धर्मत्वेन प्रपन्नानि शिष्टैर्यानि तु कानिचित्।
वैदिकैः कर्तृसामान्यात्तेषां धर्मत्वमिष्यते॥§ 883

प्रदानानि जपो होमो मातृयज्ञादयस्तथा।
शक्रध्वजमहोयात्रा देवतायतनेषु च॥§ 885

कन्यकानां च सर्वासां चतुर्थ्याद्युपवासकाः।
प्रदीपप्रतिपद्दानमोदकापूपपायसाः॥§ 887

अनग्निपक्वमाघसप्तमीपौर्णमासीफाल्गुनीप्रतिपद्वसन्तोत्सवादीनां नियमक्रियाप्रमाणं न शास्त्रादृते किंचिदस्ति। स्मृतिकाराश्चाऽऽचारश्चैव **‘साधूनां**

**देशजातिकुलधर्माश्चाऽऽम्नायैरविरुद्धाः प्रमाणमिति’** वेदाविरुद्धानामाचाराणां सामान्यतः प्रामाण्यमनुमन्यन्ते। तथाऽनध्यायाधिकार ऊर्ध्वं भोजनादुत्सव इति देशनगरोत्सवप्रामाण्याश्रयणम्। वेदेऽपि च महाव्रते प्रेङ्खमारुह्य होता शंसतीत्येतद्वाक्यशेषे श्रूयते, **यदा वै प्रजा मह आविशन्ति प्रेङ्खं तद्ध्यारोहन्तीति**। महःशब्दवाच्योत्सवप्रसिद्धिरनूदिता। यत्तु परिमितशास्त्रप्रमेयत्वाद्धर्माधर्मयोरिह च तदसंभवादित्युक्तम् तद्वेदमूलत्वानुमानात्पूर्ववदेव प्रत्यास्त्रेयम्। न च स्मृतिर्निर्मूला। विस्तरवचनानामपि प्रपाठकमात्रेणोपसंहारात्किमुत संक्षेपवचनस्य। शक्यं च स्मृत्यनुरूपमेव वेदवचनमनुमातुम्। तथा हि। § 888

शिष्टैराचर्वमाणानां सतां गोदोहनादिवत्।
फलसंबन्धमप्राप्तं बोधयच्छास्त्रमर्थवत्॥§ 890

न हि तदेवैकं शास्त्रप्रमाणकं यस्य स्वरूपमपि तत एवावगन्तव्यम्। अनेकाकारस्य हि प्रमेयस्य कश्चिदेवाऽऽकारः केनचित्प्रमाणेन प्रमीयते। 206
तत्र प्रत्यक्षाद्यवगतेऽप्याचारस्वरूपे दधिगोदोहनादिवत्फलसंबन्धः शास्त्रेणावगम्यते। यागादिष्वपि च नैव स्वरूपज्ञानेन शास्त्रमपेक्षितम्। फलसंबन्धमात्रस्यैवातीन्द्रियत्वेन तदपेक्षितत्वात्। अतो न नामोपलक्षणान्तरेण शास्त्रं प्रवृत्तमुपलभ्य शिष्टाः प्रवृत्ताः सर्वकालं तु शिष्टव्यवहारशास्त्रयोरवियोगाद्व्यवहारादेवापोद्धृत्य केचित्स्वर्गादिसाधनत्वेन नियम्यमानाः कादाचित्कत्वपरित्यागेन नित्यप्रयोज्या विज्ञायन्ते। तेषां चाऽऽर्यावर्तनिवासिशिष्टप्रयोज्यत्वमेवोपलक्षणं वेदेनापि सरस्वतीविनशनप्लक्षप्रस्रवणादिवदुपात्तमिति शक्यमनुमातुम्। § 891

ननु शास्त्रार्थकारित्वाच्छिष्टत्वं गम्यते यदा।
शिष्टत्वेन च शास्त्रोक्तिरित्यन्योन्याश्रयं भवेत्॥§ 893

नैव तेषां सदाचारनिमित्ता शिष्टता मता।
साक्षाद्विहितकारित्वाच्छिष्टत्वे सति तद्वचः॥§ 895

प्रत्यक्षवेदविहितधर्मक्रियया हि लब्धशिष्टत्वव्यपदेशा यत्परम्पराप्राप्तमन्यदपि धर्मबुद्ध्या कुर्वन्ति तदपि स्वर्ग्यत्वाद्धर्मरूपमेव। § 896

तद्यथा शुश्रुवान्विद्वाननूचानश्च वैदिकः।
पुनस्तल्लक्षितो वेदे तेनैवाध्ययनादिषु॥§ 898

तेनाहोरात्रपौर्वापर्यवदनादित्वाद्वेदतदर्थानामितरेतराश्रयत्वाप्रसङ्गः। स्मृतिरप्याचारं वेदवचनं वोपलभ्याभ्यनुज्ञानायैव प्रवृत्तेत्यदोषः। § 899

यत्तु हेत्वन्तरं दृष्टवा वेदमूलनिवारणम्।

प्रत्यक्षवेदमूलेऽपि तद्दृष्टेस्तदकारणम्॥ § 901

वेदेऽपि हि बहून्येव दृष्टार्थगन्धस्पृष्टानि विधीयन्त इति न तावता वेदमूलत्वाभावः। § 902

यानि तु म्लेच्छादिसमानानि नियतानियतक्रियान्तराण्यर्थसुखसाधनकृषिसेवावाणिज्यादीनि मृष्टान्नपानमृदुशयनासनरमणीयगृहोद्यानालेख्यगीतनृत्यगन्धपुष्पादिकर्माणि प्रसिद्धानि तेषु नैव कस्यचिद्धर्मत्वाशङ्काऽस्तीति न तत्सामान्यतो दृष्टेनेतरनिराक्रियोपपत्तिः केषांचिद्वा धर्मत्वाभ्युपगमान्न सर्वेषामेव तत्प्रसङ्गः। किं तु— § 903

देवब्राह्मणपूजादि यत्तेषामपि किंचन।
तत्रेष्टमेव धर्मत्वं चिष्टाचारमतं हि तत्॥ § 905

लोके हि कश्चिदाचारः शिष्टत्वेन विशिष्यते।
कश्चित्तु प्राणिसामान्यप्राप्तस्तैरपि संगतः॥ § 907

तत्र यः कार्यरूपेण शिष्टानेवानुवर्तते।
स एव केवलो धर्मो नेतरः प्राणिमात्रगः॥ § 909

207 एतेन वैदिकानन्तधर्मधीसंस्कृतात्मनाम्।
आत्मतुष्टेः प्रमाणत्वं प्रसिद्धं धर्मशुद्धये॥ § 911

तथैव बहुकालाभ्यस्तवेदतदर्थज्ञानाहितसंस्काराणां वेदनियतमार्गानुसारिप्रतिभानां नोन्मार्गेण प्रतिभानं संभवतीत्याश्रित्योच्यते। “यदेव किंचनानूचानोऽभ्यूहत्यार्षं तद्भवतीति”। वैदिकवासनाजनितत्वाद्वेद एव स भवति। § 912

तथा हि— § 913

यथा रुमायां लवणाकरेषु मेरौ यथा वोज्ज्वलरुक्मभूमौ।
यज्जायते तन्मयमेव तत्स्यात्तथा भवेद्वेदविदात्मतुष्टिः॥ § 915

एवं च विद्वद्वचनाद्विनिर्गतं प्रसिद्धरूपं कविभिर्निरूपितम्।
सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥
इति। § 917

बहुदिनाभ्यस्तधर्मव्याप्तात्मनो हि न कथंचिद्धर्मकरणरूपात्मतुष्टिरन्यत्र संभवतीति धर्मत्वेनाभ्यनुज्ञायते। § 918

यद्वा शिष्टात्मतुष्टीनां वचनादेव धर्मता।
पुण्यकृद्ध्यानवत्तस्मादाचारेष्वपि सा तथा॥ § 920

यथा वा वरदानादौ देवताराधनोद्भवे।
यद्वक्ष्यसि स मन्त्रस्ते विषघ्न इति मन्त्रिते॥§ 922

लोकः स्मरति तं मन्त्रं विषापहरणादिषु।
यथा वा सर्पसिद्धान्ते नकुलो यां किलौषधिम्॥§ 924

दन्तैर्गृह्णाति तामाहुः समस्तविषहारिणीम्।
यथा वा यां भुवं कश्चिदध्यावसति पुण्यकृत्॥§ 926

तत्संपर्कपवित्रत्वात्सेष्यते पुण्यकारणम्।
तथाऽऽचारात्मतुष्टयादिधर्म्यं धर्ममयात्मनाम्॥§ 928

वेदोक्तमिति निश्चित्य ग्राह्यं धर्मबुभुत्सुभिः॥ इति।§ 929

यत्तु प्रजापतिरुषसमभ्यैत्स्वां दुहितरमहल्यायां मैत्रेय्यामिन्द्रो जार आसीदित्येवमादिदर्शनादितिहासदर्शनाच्च शिष्टाचारेषु धर्मातिक्रमं पश्यद्भिः शिष्टाचारप्रामाण्यं दुरध्यवसानमिति। तत्रोच्यते— § 930

श्रुतिसामान्यमात्राद्वा न दोषोऽत्र भविष्यति।
मनुष्यप्रतिषेधाद्वा तेजोबलवशेन वा॥§ 932

यथा वा न विरुद्धत्वं तथा तद्गमयिष्यति॥§ 933

प्रजापतिस्तावत्प्रजापालनाधिकारादादित्य एवोच्यते। स चारुणोदय- 208
वेलायामुषसमुद्यन्नभ्यैत्, सा तदागमनादेवोपजायत इति तद्दुहितृत्वेन व्यपदिश्यते तस्यां चारुणकिरणाख्यबीजनिक्षेपात्स्त्रीपुरुषयोगवदुपचारः। एवं समस्ततेजाः परमैश्वर्यनिमित्तेन्द्रशब्दवाच्यः सवितैवाहनि लीयमानतया रात्रेरहल्याशब्दवाच्यायाः क्षयात्मकजरणहेतुत्वाज्जीर्यत्यस्मादनेनैवोदितेनेत्यादित्य एवाहल्याजार इत्युच्यते न तु परस्त्रीव्यभिचारात्। नहुषेण पुनः परस्त्रीप्रार्थननिमित्तानन्तरकालाजगरत्वप्राप्त्यैवाऽऽत्मनो दुराचारत्वं प्रख्यापितम्। शच्याश्च पतिभक्तिनिमित्तपुण्यातिशयजनिततन्निराकरणावाप्तप्रभावलाभः ख्यात एव। § 934

वसिष्ठस्यापि यत्पुत्रशोकव्यामोहचेष्टितम्।
तस्याप्यन्यनिमित्तत्वान्नैव धर्मत्वसंशयः॥§ 936

यो हि सदाचारः पुण्यबुद्धया क्रियते स धर्मादर्शत्वं प्रतिपद्येत यस्तु कामक्रोधलोभमोहशोकादिहेतुत्वेनोपलभ्यते स यथाविधिप्रतिषेधं वर्तिष्यते। तेन विश्वामित्रस्यापि यद्रागद्वेषपूर्वकमपि तपोबलारूढस्य चरितं

सत्सर्वं बलवतः पथ्यमित्यनेन न्यायेन महान्ति च तपांसि कृत्वा तानि क्षयं नयत उत्तरकालं वा पापविशुद्धिं प्रायश्चित्तैः प्रतिकुर्वाणस्य जीर्यत्यपि। मन्दतपसां गजैरिव महावटकाष्ठादिभक्षणमात्मविनाशायैव स्यात्। द्वैपायनस्यापि, **“गुरुनियोगादपतिरपत्यलिप्सुर्देवराद्गुरुप्रेरितादृतुमतीयात् ”** इत्येवमागमान्मातृसंबन्धभ्रातृजायापुत्रजननं, प्राक्कृतपश्चात्करिष्यमाणतपोबलेन नातिदुष्करम्। अन्योऽपि यस्तादृक्तपोवलो निर्वहेत्स कुर्यादेव। रामभीष्मयोस्तु स्नेहपितृभक्तिवशात्। विद्यमानधर्ममात्रार्थदारयोरेवं साक्षाव्द्यवहितापत्यकृतपित्रानृण्ययोर्यागसिद्धिः हिरण्मयसीताकरणं च लोकापवादभिया त्यक्तसीतागतानृशंस्याभावाशङ्कानिवृत्त्यर्थम्। भीष्मश्च। § 937

भ्रातृणामेकजातानामेकश्चेत्पुत्रवान्भवेत्।
सर्वे तेनैव पुत्रेण पुत्रिणो मनुरब्रवीत्॥§ 939

इत्येवं विचित्रवीर्यक्षेत्रजपुत्रलब्धपित्रनृणत्वः केवलयज्ञार्थपत्नीसंबन्ध आसीदित्यर्थापत्त्याऽनुक्तमपि गम्यते। § 940

यो वा पिण्डं पितुः पाणौ विज्ञातेऽपि न दत्तवान्।
शास्त्रार्थातिक्रमाद्भीतो यजेतैकाक्यसौ कथम्॥§ 942

धृतराष्ट्रोऽपि व्यासानुग्रहादाश्चर्यपर्वणि पुत्रदर्शनवत्क्रतुकालेऽपि दृष्टवानेव। शापानुग्रहसमर्था महर्षयः श्रूयन्ते। तद्यथैव तद्वचनादसावन्धो जातो विज्ञायते तथा यज्ञानुष्ठानवचनात्तावति काले दृष्टवानित्यर्थापत्त्या सुज्ञानम्।
209 यद्वा, “यजदेवपूजासंगतिकरणदानेषु” इति दानार्थ एवायं यजिर्भविष्यति क्रतुफलसमानि च दानतपश्चरणादीन्यपि श्रूयन्ते तत्कारणात्क्रतुक्रियोपचारः। § 943

या चोक्ता पाण्डुपुत्राणामेकपत्नीविरुद्धता।
साऽपि द्वैपायनेनैव व्युत्पाद्य प्रतिपादिता॥§ 945

यौवनस्थैव कृष्णा हि वेदिमध्यात्समुत्थिता।
सा च श्रीः श्रीश्च भूयोभिर्भुज्यमाना न दुष्यति॥§ 947

अत एव चोक्तम्— § 948

इदं च तत्राद्भुतरूपमुत्तमं जगाद विप्रर्षिरतीतमानुषः।
महानुभावा किल सा सुमध्यमा बभूव कन्यैव गते
गतेऽहनि॥ इति।§ 950

न हि मानषीष्वेवमुपपद्यते। तेनातीतमानुषमित्युक्तम्। अत एव वासुदेवेन कर्ण उक्तः “षष्ठे च त्वामहनि द्रौपदी पर्युपस्थास्याति” इति। इतरथा

हि कथं प्रमाणभूतः सन्नेवं वदेत्। अथ वा बह्व्य एव ताः सदृशरूपा द्रौपद्य एकत्वेनोपचरिता इति व्यवहारार्थापत्त्या गम्यते। § 951

यद्वा नार्यर्जुनस्यैव केवलस्य भविष्यति।
साधारणा प्रसिद्धिस्तु निश्छिद्रत्वाय दर्शिता॥§ 953

यथा युधिष्ठिरोपदेशात्सभामध्यमानीयमाना सहसैव रजस्वलावेषं सपुत्रकस्य धृतराष्ट्रस्यायश उत्पादयितुमात्मानं प्रख्यापयितुं द्रौपदी कृतवती तथैव केवलार्जुनभार्याया एव सत्याः श्रीत्वं च जनेनाविदितं परस्परं संघाताविशयं च भेदप्रयोगानवकाशार्थं दर्शयितुं साधारण्यप्रख्यापनमित्येवमादिविकल्पैः सुपरिहरत्वाद्रागलोभकृतव्यवहारस्य च शिष्टैरेव धर्मत्वेनापरिग्रहस्योक्तत्वादनुपालम्भः। § 954

तथा च द्रोणवधाङ्गभूतानृतवादे ‘प्रायश्चित्तं कामकृतेऽप्येके’ इत्येवमन्तेऽप्यश्वमेधः प्रायश्चित्तत्वेन कृत एवेति न तस्य सदाचारत्वाभ्युपगमः। यत्तु वासुदेवार्जुनयोर्मद्यपानमातुलदुहितृपरिणयनं स्मृतिविरुद्धमुपन्यस्तं तत्रान्नविकारसुरामात्रस्य त्रैवर्णिकानां प्रतिषेधः। § 955

सुरा वै मलमन्नानां पाप्मा च मलमुच्यते।
तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्॥ इति।§ 957

मधुसीध्वोस्तु क्षत्रियवैश्ययोर्नैव प्रतिषेधः केवलब्राह्मणविषयत्वात् “मद्यं नित्यं ब्राह्मणस्य” इति वचनात्। § 958

यदप्येतत्— § 959 210

गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा।
यथैवैका तथा सर्वा न पेया ब्रह्मवादिभिः॥ इति।§ 961

एतदपि ब्रह्मवादिशब्दस्य तच्छीलतद्धर्मतत्साधुकारित्वनिमित्तत्वाप्रवचनाश्रयणेन ब्रूञ्वदत्योरेकार्थत्वात्प्रब्रूयाद्ब्रह्मणस्त्वेषामिति नियमाद्यस्यैव प्रवचनं स एव तच्छीलस्तद्धर्मस्तत्साधुकारी वा भवति तस्माद्ब्रह्मणा एव ब्रह्मवादिनः। तथा च मद्यसामान्यप्रतिषेधाङ्गनिन्दार्थवादेऽभिहितम्। § 962

अकार्यमन्यत्कुर्याद्धि ब्राह्मणो मदमोहितः॥ इति।§ 963

तस्मादेतदुक्तं भवति यथैवैकान्नसुरा त्रयाणामप्यपेया तथा सर्वा ब्रह्मवादिभिरपेयेति। इतरथा यथैवैकेति च ब्रह्मवादिभिरिति चोभयमप्यनर्थकमेव स्यात्। श्लोकान्तरनिर्देशेनैव वर्णत्रयसंबन्धलाभात्। तेनोभौ मध्वासवक्षीबावित्यविरुद्धम्। तथा चान्यार्थदर्शनमभ्यनुज्ञानवचनम् **“यन्मात्यमासीत्तत्पश्चात्पर्यौहत सुरा वै मात्यं ततो राजन्यमसजत तस्माज्ज्यायांश्च स्नुषा च श्वशुरश्च सुरां पीत्वा विलपन्तश्चाऽऽसते पाप्मा वै मात्यं तस्माद्ब्राह्मणः सुरां न पिबेत्पाप्मना न संसृज्या इति तदेतदेतत्क्षत्रियो ब्राह्मणं ब्रूयान्नैनं**

**सुरा पीता हिनस्ति य एवं विद्वान्सुरां पिबति" इति।** मधुसीधुविवक्षयैतत्। यत्तु मातुलदुहितृपरिणयनं तयोस्तन्मातृष्वस्रीयादिसंबन्धव्यवधानेऽपि भ्रात्रादिव्यवहारादविरुद्धम्। यद्यपि वासुदेवस्वसेति सुभद्रा ख्याता तथाऽप्युत्पत्तौ बलदेववासुदेवयोरेकानंशायाश्च निजत्वान्वाख्यानान्मातृष्वस्रीया सुभद्रा तस्य मातृपितृष्वस्रीया दुहिता वेति परिणयनाभ्यनुज्ञानाद्विज्ञायते। § 964

वसुदेवाङ्गजाता च कौन्तेयस्य विरुध्यते।
न तु व्यवेतसंबन्धप्रभवे तद्विरुद्धता॥ § 966

येन ह्यन्यत्रैवमुक्तम्— § 967

मम वर्त्मानुवर्तेरन्मनुष्याः पार्थ सर्वशः।
यद्यदाचरति श्रेष्टस्तत्तदेवेतरो जनः॥ § 969

स यत्प्रमाणं कुरुते लोकस्तदनु वर्तते॥ इति। § 970

स कथं सर्वलोकादर्शभूतः सन् विरुद्धाचारं प्रवर्तयिष्यति। एतेन रुक्मिणीपरिणयनं व्याख्यातम्। यत्त्वद्यतनानामाहिच्छत्रकमाथुरब्राह्मणीनां सुरापानादि दाक्षिणात्यानां मातुलदुहितृविवाहादि स्मृतिविरुद्धमुपन्यस्तम्। तत्र केचित्तावदाहुः। स्मृत्याचारयोरितरेतरनिरपेक्षवेदमूलत्वेन तुल्यबलत्वाद्विहितप्रतिषिद्धविकल्पानुष्ठानाश्रयणाददोष इति। तत्तु वक्ष्यमाणबलाबलविभागादयुक्तम्। अन्ये त्वेवमाहुः— § 971

211 सर्वेषामेवमादीनां प्रतिदेशं व्यवस्थया।
आपस्तम्बेन संहृत्य दुष्टादुष्टत्वमाश्रितम्॥ § 973

येषां परम्पराप्राप्ताः पूर्वजैरप्यनुष्ठिताः।
त एव तैर्न दुष्येयुराचारैर्नेतरे जनाः॥ § 975

तथा मनुनाऽप्युक्तम्— § 976

येनास्य पितरो याता येन याताः पितामहाः।
तेन यायात्सतां मार्गं तेन गच्छन्न दुष्यति॥ § 978

येषां तु यः पित्रादिभिरेवार्थो नाऽऽचरितः स्मृत्यन्तरप्रतिषिद्धश्च ते तं परिहरन्त्येव। अपरिहरन्तो वा स्वजनादिभिः परिह्रियन्ते। ननु गौतमेनाऽऽम्नायविरुद्धानामाचाराणामप्रामाण्यमुक्तम्। आह— § 979

यदि वेदविरोधः स्यादिष्येतैवाप्रमाणता।
स्मृतिराम्नायशब्देन न तु वेदवदुच्यते॥ § 981

न त्वेतदपि युक्तं स्मृतिग्रन्थेऽप्याम्नायशब्दप्रयोगात्। स्मार्तधर्माधिकारे हि शङ्खलिखिताभ्यामुक्तम् 'आम्नायः स्मृतिधारकः' इति। ग्रन्थकारगतायाः स्मृतेस्तत्कृतग्रन्थाम्नायः स्मृतिग्रन्थाध्यायिनां स्मृतिधारणार्थत्वेनोक्तः। ततश्च मन्वादिवाक्यप्रतिषिद्धाचाराणां प्रामाण्यमशक्यमभ्युपगन्तुम्। आपस्तम्बवचनं तु बौधायनेन स्मृतिविरुद्धदुष्टाचारोदाहरणान्येव प्रयच्छता निराकृतम्। स्पष्टकामादिहेत्वन्तरदर्शनान्न विरुद्धाचाराणामापस्तम्बवचनस्य वा श्रुतिमूलत्वोपपत्तिः। आह। केन वा ब्राह्मणीनां सुरापानं प्रतिषिद्धम्। § 982

उच्यते— § 983

तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्॥ इत्यनेन।§ 984

ननु पुंलिङ्गनिर्देशात्स्त्रीणां न प्रतिषिध्यते।
सुरापानमतो नात्र स्मृत्याचारविरुद्धता॥§ 986

उच्यते— § 987

हननप्रतिषेधेऽपि भवेत्पुंस्त्वं विवक्षितम्।
तथा पुंस्त्ववदेकत्वविवक्षाऽपि प्रसज्यते॥§ 989

अहत्वा कंचिदेवैकं ततश्च स्यात्कृतार्थता।
एकेन च सुरापाने वर्जिते पूर्ववद्भवेत्॥§ 991

आह यत्तावदेकत्वविवक्षागतमुच्यते।
प्रत्येकव्यक्तिसंबन्धाज्जातेर्वा तन्न दुष्यति॥§ 993

एकैकस्या एव हि ब्राह्मणव्यक्तेर्यथाप्रसक्तवधपानयोः प्रतिषेधाद्विवक्ष्य- 212
माणमपि तावदनूद्यमानत्वान्नक्रियाविशेषणं वा संभवति किमुत यदा जातिगतैकत्वानुवाद एवायं विज्ञायते। आह। हननप्रतिषेधे कर्मभूतस्य ब्राह्मणस्योद्दिश्यमानत्वात्सुरापाने च कर्तृत्वेनोपादीयमानत्वात्स्वर्गकामौदुम्बरीसमानार्थयजमानवत्तुल्यविवक्षाविवक्षयोरप्रसङ्गादुदाहरणवैषम्यम्। तथा हि— § 994

यो ब्राह्मण इति ह्युक्ते हननप्रतिषेधतः।
ब्राह्मणे प्रतिषेधे वा लिङ्गं नान्यद्विधीयते॥§ 996

प्रतिषेधविधिपरो हि विधायकः शुद्धवधप्रतिषेधासंभवाद्ब्राह्मणजातिमात्रविशिष्टवधप्रतिषेधं विधाय निवृत्तव्यापारो यदि लिङ्गमपरं ब्राह्मणे वधे प्रतिषेधं वा विदध्यात्ततः प्रत्ययावृत्तिलक्षणवाक्यभेदप्रसङ्गः। येषां तु विधिप्रतिषेधौ नामात्यन्तभिन्नौ वेदवाक्यार्थौ तेषां प्रत्ययसंबन्धानुगृहीतशक्तिरभावमात्राभिधानादभ्यधिकलब्धव्यापारो नञ्विध्यर्थमपि द्वेषाद्यर्थप्राप्तं पूर्वोक्तन्याय-

विवक्षितब्राह्मणविशिष्टहननाविशिष्टं चानूदितं प्रतिषिध्य चरितार्थो न लिङ्गमपरं ब्राह्मणवधविधिषु शक्नोत्यनावर्तमानः प्रतिषेद्धुमिति श्रूयमाणमपि लिङ्गप्रतिषेधं प्रत्यनुपयुज्यमानत्वादविवक्षितं भवति। एषा ह्यत्र वचनव्यक्तिर्यत्, क्रोधादिवशेन ब्राह्मणं हन्याद्ब्राह्मणो वा हन्तव्यस्तन्नेति। विध्येकत्वपक्षे पुनरीदृशी वाक्ययोजना यद् ब्राह्मणहननं तन्न कुर्यादिति यो वा ब्राह्मणस्तं न हन्यादिति ब्राह्मणविशिष्टहननप्रतिषेधविधिः शुद्धोद्दिष्टब्राह्मणविषयवधप्रतिषेधविधिर्वेति। § 997

सर्वथा ब्राह्मणोद्देशान्नेह मुच्यामहे वयम्।
न चोद्दिष्टस्य शक्येते लिङ्गसंख्ये विवक्षितुम्॥ § 999

ब्राह्मणः सुरां न पिबेत्, न पेया ब्रह्मवादिभिरिति निमित्तदेशकालफलसंस्कार्यानुपादेयपञ्चकव्यतिरेकादेकत्राऽऽख्यातप्रत्ययोपात्तगुणीभूतोपादीयमानसंख्यापरिच्छेद्यत्वयोग्यसाधनांशविशेषणत्वेनोपादानादितरत्र च तृतीयाविभक्तिश्रुतिवचनं विवक्षितलिङ्गस्यैव प्रतिषेधकमिति दर्शयितव्यम्। § 1000

अतश्चाप्रतिषिद्धत्वान्नैव स्त्रीणां विरुध्यते।
सुरापानमहिच्छत्रब्राह्मण्यस्तेन कुर्वते॥ § 1002

नैतदेवमिहाप्येतत्पुंस्त्वं नैव विवक्ष्यते।
ब्राह्मणस्यानुवाद्यत्वात्तद्वधप्रतिषेधवत्॥ § 1004

नोपादेयत्वमेवैकं कारणत्वेन संमतम्।
विशेषणविवक्षायाः कारणं हि महाद्विधिः॥ § 1006

213 अनूद्यमानः सर्वो हि यथाप्राप्तमनूद्यते।
तत्रानाकाङ्क्षितं नान्यद्विधेयेभ्यो विधीयते॥ § 1008

यदि हि ब्राह्मणः सुरां पिबेदित्ययमवान्तरवाक्यार्थः प्राक्प्रतिषेधसंबन्धाद्विधिबुद्धिमवस्थापयेत्ततो गुणत्वोपादेयत्वविधिसमवायान्न ब्राह्मणपदे किंचिदविवक्षितं नाम स्यात्। § 1009

यतस्तु रागमोहादेः सुरापानं प्रसज्यते।
ब्राह्मणादेरतस्तस्मिन्न कश्चिद्विधिसंभवः॥ § 1011

प्रतिषेधोपसंहारिमहावाक्यातिरस्कृता।
नावान्तरविधेः शक्तिः प्रादुरस्ति कथंचन॥ § 1013

तेनेहापि यत्सुरां ब्राह्मणः पिबेत्तन्नेति वा वचनं व्यज्यते यो ब्राह्मणः स न सुरां पिबेदिति वा सुराविशिष्टपानप्रतिषेधेन प्रतिषेधविधिना वा प्रत्यवाय-

व्यावृत्त्या ब्राह्मणोऽनुगृह्यत इति नास्य पानं प्रतिषेधं वा प्रतिविधेयत्वोपपत्तिः। § 1014

लोके चैतद्यथाप्राप्तं पानं स्त्रीपुंसकर्तृकम्।
प्रतिषेधपरे वाक्ये तदवस्थमनूद्यते॥ § 1016

न च यो ब्राह्मणः पिबेदित्यनूदितं स च पुमानिति विधिव्यापाराद्विना लिङ्गविवक्षाऽवकल्पते। § 1017

न चास्य लिङ्गसंबन्धः केवलः सन्विधीयते।
न पानप्रतिषेधाद्धि विधिरन्यत्र गच्छति॥ § 1019

ततश्चोभयत्राप्यविवक्षितलिङ्गसंख्यत्वं सिद्धम्। नन्वेवं सति ब्राह्मणस्त्रीवधेऽपि पुंब्राह्मणवधवद्ब्रह्महत्याऽस्तीति यदात्रेय्यामेव केवलायां भ्रूणहत्याप्रायश्चित्तविधानं तन्नोपपद्यते। § 1020

उच्यते— § 1021

ब्राह्मणस्त्रीवधे को वा ब्रह्महत्यां निषेधति।
प्रायश्चित्तान्तरं तस्याः स्त्रीत्वमात्रनिबन्धनम्॥ § 1023

न च प्रायश्चित्ताल्पत्वेन निमित्तस्य ब्रह्महत्यात्वमपनीयते पुंवधेऽपि लघुतरप्रायश्चित्तविधिदर्शनेन ब्रह्महत्यादोषाभावप्रसङ्गात्तस्मान्न वाचनिकप्रायश्चित्ताल्पत्वेन ब्राह्मणीवधप्रतिषेध एव नास्तीत्याशङ्कितव्यम्। सुरापाने पुनः प्रायश्चित्तविशेषोऽपि न कश्चिदाम्नात इति दूरादपाकृतत्वादस्त्येवास्य स्मृत्या सह विरोधः। याऽपि चाऽऽपस्तम्बस्मृतिवचनात्तुल्यबलत्वाशङ्का भवेत्साऽपि **“तस्माद्ब्राह्मणः सुरां न पिबति”** इत्येतेन प्रत्यक्षश्रुतिविधिना निराकृतेति नैवंविधाचारप्रामाण्यमाशङ्कितव्यम्। § 1024

अथवा सदाचारप्रमाणत्वप्रतिपादनार्थं सूत्रद्वयेनाप्येतदेकमधिकरणं 214
व्याख्यातव्यम्। इह यावन्ति कृष्णमृगसंचरणोपलक्षितार्यावर्तनिवासिचातुर्वर्ण्याचरणानि तान्युदाहृत्य चिन्त्यते— § 1025

धर्मबुद्ध्या यदार्याणां चरित्रमुपलभ्यते।
किं तथैव प्रमाणं तदथ वा निष्प्रमाणकम्॥ इति। § 1027

कुतः संशयः। § 1028

उच्यते— § 1029

स्मृतिवत्कर्तृसामान्यात्प्रमाणत्वेन गम्यते।
अनिबन्धनतायास्तु भवेदप्यप्रमाणकम्॥ § 1031

ननु च स्मृतिकारैरेवैतत्प्रामाण्यमभ्युपगतं “तद्विदां च स्मृतिशीले” “आचारश्चैव साधूनां” “यस्मिन्देशे य आचारः स सदाचार उच्यते”। अतश्च

तत्प्रामाण्यादेव सिद्धम्। न। मूलाभावाहेतुदर्शनातिरेकात्। शाखान्तरगत-वेदवाक्यदर्शनमूलानि हि स्मरणोपनिबन्धनानि प्रमाणत्वेनाधिगतानि। ननु सदाचारदर्शनात्तन्मूलमात्रप्रवृत्तस्मरणानां मूलान्तरानुमानसंभवः। § 1032

यथैव च वयं तेषां द्रष्टारः केवलं तथा।
स्मृतिकारास्ततो नैषां गम्यते मूलदर्शनम्॥§ 1034

यदि हि तैर्मूलान्यश्रोष्यन्त ततो यथैवान्यानि स्मरणानि निबद्धानि तथैवैतान्यपि निबद्धान्येवाभविष्यन्यतस्तु स्वयमुपलब्धानुरूपमनिबध्य पर-प्रत्ययेनैव सदाचाराः प्रमाणमित्याहुरतो न दृष्टमूलत्वेनाध्यवसातुं शक्य-मिति विचार्यते। तत्र पूर्वाधिकरण द्वयबलेन प्रामाण्यं प्रतिज्ञायते क-र्तृसामान्याद्विधिस्मृतिविरोधरहितत्वाच्च। § 1035

न हि केचित्सदाचाराः श्रौतस्मार्तविरोधिनः।
अतस्तत्तुल्यकारित्वात्प्रामाण्येनावधारिताः॥§ 1037

स्मृतिकाराभ्यनुज्ञानं महदन्यच्च कारणम्।
तेषामज्ञातमूलानां न ह्यनुज्ञोपपद्यते॥ इति।§ 1039

तदपाकुर्वन्नाह— § 1040

न शास्त्रपरिमाणत्वाद्धर्माधर्मस्थितेरमी।
शिष्टाचाराः प्रमाणत्वं लभन्ते शब्दवर्जिताः॥§ 1042

शास्त्रपरिमेयत्वं तावत्परिमाणशब्दवाच्यं धर्माधर्मयोरवस्थितं। प-रिमितानि च शास्त्राणि वेदोपवेदादीनि न च तेषां मध्ये सदाचारशास्त्रं किंचिदस्ति। न च सदाचारः स्वयमेव शास्त्रं नापि तद्दर्शनमनुष्ठानं वाऽत्य-न्तपरायत्तत्वात्प्रमेयत्वाच्च। स्मृतेस्त्वेतद्विषयाया निर्मूलत्वमुक्तमेव। § 1043

215 किं च मूलं भवेदेकमनेकमिति चिन्तिते।
नैव द्विविधमित्येतदनुमातुं हि शक्यते॥§ 1045

न तावद्देशजातिकुलभेदाद्भिन्नानामपरिमितस्वरूपाणामेकश्रुतिमूलत्वम्। § 1046

न हीदृशी श्रुतिर्येतान् सर्वाचारान् ग्रहीष्यति।
शब्दाभिधेययोस्तेषां व्यक्त्याकृत्योरसंभवात्॥§ 1048

यावदाचारं हि वेदवाक्यानि कल्पयतां वेद एवैकः कल्पयितव्यः। एक-स्य तु वाक्यस्य नैव कस्यचिदपरिमिताचारविधायित्वमवकल्पते यत आचा-राः प्रवर्त्तेरन्। न च धर्मसूत्रकारैस्तदेव दृष्टवाऽऽचारप्रामाण्यमुपनिबद्धम्।

शेषधर्मस्मृतिवाक्यतुल्यनिबन्धनप्रसङ्गात्। न चाऽऽचारदर्शनोत्तरकालप्रवृत्ता स्मृतिस्तेषां मूलं भवति। मूलमूलिबलाबलविपर्ययप्रसङ्गात्। § 1049

अतः परिमितं शास्त्रमनुमातुं यतोऽर्हति।
नाऽऽचाराणां च तन्मूलं बहुनामित्यमूलता॥§ 1051

न च स्मृतिसरूपाऽपि श्रुतिरत्रानुमीयते।
आचाराणामतत्पूर्वप्रसङ्गात्सविपर्ययात्॥§ 1053

शिष्टाचारः प्रमाणमिति हि श्रुतावनुमीयमानायामाचारः प्रथमं सिद्धो भवेत्तत्पूर्विका श्रुतिः। § 1054

न त्वाचारस्य सा मूलमिति निर्मूलता पुनः।§ 1055

शास्त्रपरिमाणत्वादिति वा परिमिते ह्यर्थे शास्त्रं प्रवर्त्तेत। अपरिमितत्वादाचाराणामुच्छास्त्रत्वमिति। परिमितार्थविषयत्वाद्वा शास्त्रस्य, **'अप्राप्ते शास्त्रमर्थवत्'*** **इति**। § 1056

दृश्यमानान्यहेतुत्वान्नात्र शास्त्रप्रमाणता।
तस्मादर्थसुखाङ्गत्वान्नाऽऽचारेष्वस्ति धर्मता॥§ 1058

वैश्यानां सेवकानां वा वैद्यानां नगरेषु वा।
चरित्राणां यथा चार्थसुखाङ्गत्वं तथाऽस्त्विह॥§ 1060

तस्माच्छ्रुतिस्मृती एव प्रमाणे धर्मगोचरे।
शीलाचारात्मतुष्टीनां गोष्ठीहास्यादितुल्यता॥§ 1062

यद्वा सूत्रत्रयेणाप्येतदेवाधिकरणं व्याख्यातव्यम्। इहाऽऽर्यावर्तनिवासिशिष्टाचारानेवोदाहृत्य पूर्ववत्प्रामाण्याप्रामाण्यसंदेहे शिष्टाकोपेऽविरुद्धमिति सिद्धान्तस्तावदुपक्रम्यते। तथा हि— § 1063

शिष्टं यावच्छ्रुतिस्मृत्योस्तेन यन्न विरुध्यते। 216
तच्छिष्टाचरणं धर्मे प्रमाणत्वेन गम्यते॥§ 1065

यदि शिष्टस्य कोपः स्याद्विरुध्येत प्रमाणता।
तदकोपात्तु नाऽऽचारप्रमाणत्वं विरुध्यते॥ ७॥§ 1067

इति शिष्टाकोपाधिकरणम्॥ ३॥

१२ *] जै. सू. ( ६। २। ४ )

## ०.०.८ यववराहाधिकरणम्

तेष्वदर्शनाद्विरोधस्येत्येवमुपक्रमं वा सूत्रम्। शब्दार्थविषयप्रयोगशिष्टाचारविप्रतिपत्तौ संदेहः। § 1069

एकशब्दमनेकार्थं शिष्टैराचर्यते यदा।
विगानेन तदा तत्र कोऽर्थः स्यात्पारमार्थिकः॥ § 1071

यववराहवेतसशब्दाः प्रियङ्गुवायसजम्बूष्वपि किल क्वापि देशान्तरे प्रयुज्यन्ते। § 1072

तेन तद्वचनत्वे हि संदेह उपजायते।
अनिरूपिततत्त्वानां यावद्दृष्टानुसारिणाम्॥ § 1074

तत्राऽऽह नैव संदेहः कर्तव्योऽत्र मनागपि।
प्रयोगं प्रति तुल्यत्वात्सर्वलोकप्रयोगिणाम्॥ § 1076

यत्र देशे हि यः शब्दो यस्मिन्नर्थे प्रयुज्यते।
शक्तिस्तद्गोचरा तस्य वाचिकाख्या प्रमीयते॥ § 1078

तस्याश्च सर्वगामित्वं तन्न्यायत्वात्प्रमीयते।
नैकेषामेव सा ह्यस्ति केषांचिद्वा न विद्यते॥ § 1080

ज्ञाताज्ञातविभागस्तु ज्ञातृभेदेऽवकल्पते।
तस्माद्यैरपि न ज्ञाता यच्छब्दार्थस्य वाच्यता॥ § 1082

तैरप्यभ्युपगन्तव्या स्वप्रसिद्धिसमा हि सा॥ § 1083

न चाल्पत्वबहुत्वाभ्यां प्रयोक्तॄणां विशिष्यते।
वाच्यवाचकभावोऽयमक्षपादादिशब्दवत्॥ § 1085

217 विभीतकेऽक्षशब्दो हि यद्यप्यल्पैः प्रयुज्यते।
तथाऽपि वाचकस्तस्य ज्ञायते शकटाक्षवत्॥ § 1087

तथा चोक्तं शवतिर्गतिकर्मा कम्बोजेष्वेव दृष्टो विकारापन्नमार्याः प्रयुञ्जते शवमिति मृतशरीराभिधानादित्यादि। वहव एव हि धातवो नामशब्दाश्च प्रतिदेशमर्थभेदेषु व्यवस्थिता दृश्यन्ते तस्मात्समेयमभिधाने विप्रतिपत्तिः स्यात्। एवं च विकृतिषु केषां चिदर्थानां साधारणशब्दवाच्यत्वात्प्रकृताविवाविकृतप्रयोगादार्षं चोदकोऽनुग्रहीष्यते। **'तेष्वदर्शनाद्विरोधस्य'** इत्यत्रैव चैतद्व्याख्येय-

म्। इतरत्र विप्रतिपत्त्यविरोधयोरघटमानत्वात्। तस्मादाचारविप्रतिपत्तेः समत्वाद्विकल्प इति प्राप्तेऽभिधीयते॥ ८॥ § 1088

शास्त्रस्था तन्निमित्तत्वात्प्रतिपत्तिर्बलीयसी।
लौकिकी प्रतिपत्तिर्हि गौणत्वेनापि नीयते॥§ 1090

नानाविप्रतिपत्तौ हि न लोकस्येह सत्यता।
या शास्त्रानुगुणा सैव प्रामाण्येमावधार्यते॥§ 1092

लौकिकत्वे समानेऽपि शास्त्रेणाभ्यधिका हि सा।
शास्त्रस्थाः पुरुषा ये वा प्रतिपत्तिस्तदाश्रया॥§ 1094

प्रमाणत्वेन मन्तव्या सप्रत्ययतरा हि ते।
शास्त्रार्थेष्वभियुक्तानां पुरुषाणां हि सर्वदा॥§ 1096

स्तोकेनाप्यन्यथात्वेन शास्त्रार्थो निष्फलो भवेत्।
लौकिकस्त्वन्यथात्वेऽपि नार्थोऽतीव विरुध्यते॥§ 1098

रसवीर्यविपाकानां भेदाद्वैद्यैर्यवादयः।
निर्धार्याः स्वार्थतत्त्वेन धर्मसिद्ध्यैव याज्ञिकैः॥§ 1100

तस्माद्ये याज्ञिकैर्येषां वैद्यैर्वाऽर्था निरूपिताः।
तेषां त एव शब्दानामर्था मुख्या हि नेतरे॥§ 1102

अनवस्थितशब्दार्थसंबन्धः सति संभवे।
विकल्पश्चाष्टदोषत्वान्न कथंचन युज्यते॥§ 1104 218

अविप्लुतश्च शब्दार्थो यो वेदेषूपलभ्यते।
तत्रत्यनिर्णयात्तस्माल्लोके भवति निर्णयः॥§ 1106

यवमतीभिरद्भिरौदुम्बर्याः प्रोक्षणे विधीयमाने वाक्यशेषोऽयं **‘यत्रान्या ओषधयो म्लायन्तेऽथैते मोदमानास्तिष्ठन्ति’** इति बह्वीषु शाखासु श्रूयते भाष्यकारेण वारुणप्राघासिकयवमयकरम्भपात्रवाक्यशेषत्वेनोपलब्धो यः स मन्दप्रयोजनत्वात्तथा नामास्तु। § 1107

फाल्गुनेऽन्यौषधीनां तु जायते पत्रशातनम्।
मोदमानास्तु तिष्ठन्ति यवाः कणिशशालिनः॥§ 1109

प्रियंगवः शरत्पक्वास्तावद्गच्छन्ति हि क्षयम्।

यदा वर्षासु मोदन्ते सम्यग्ज्ञाताः प्रियंगवः॥§ 1111

तदा नान्यौषधिम्लानिः सर्वासामेव मोदनात्।§ 1112
एवं वराहवेतसशब्दा अपि शास्त्रस्थप्रयोगादेव निश्चीयन्ते। § 1113

नत्वेतान्युदाहरणानि लोकप्रसिद्धेरेव व्यवस्थितत्वाद्युक्तानि। तथा हि। § 1114

नैवोच्यन्ते क्वचिद्देशे यवश्रुत्या प्रियंगवः।
जम्बूं न वेतसं प्राहुर्वराहं नापि वायसम्॥§ 1116

अध्यारोप्य विचारेण किं मुधा खिद्यते मनः।
संदिग्धेषु च सर्वेषु वाक्यशेषेण निर्णयम्॥§ 1118

वक्ष्यत्येव न तेनापि पृथक्कार्या विचारणा।§ 1119

यद्यपि तत्राभिधेयसंदेहमनुदाहृत्योपादानसंदेहनिर्णयोपायव्याख्यानं क-
219 रिष्यति। यावद्वाक्यशेषमेव स निर्णयो नान्यत्र। अयं त्वभिधेयनिर्णय एकत्र
च कृतः सर्वत्र च कृत एव भविष्यतीत्येवमपुनरुक्तत्वमापद्यते। § 1120

तथाऽपि न्यायतुल्यत्वाद्यथा धृतपरिग्रहः।
वाक्यशेषात्तथैव स्याद्यवाद्यर्थविनिर्णयः॥§ 1122

तत्सिद्धिसूत्रे च सारूप्यादीनां गौणवृत्तिनिमित्तानामनुक्रमणाद्वेतससदृश-जम्बूप्रत्ययसिद्धिरशब्दार्थत्वेऽपि विज्ञायत एवेति नेहोदाहृतेन कार्यम्। § 1123

तस्मादन्यदुदाहृत्य विचार्यमिदमीदृशम्।
यत्र विप्रतिपत्तिः स्यादार्यम्लेच्छप्रयोगजा॥§ 1125

तत्र किं तुल्यता युक्ता किमेकैव बलीयसी।
समा विप्रतिपत्तिः स्याद्दृष्टार्थव्यवहारिणाम्॥§ 1127

आर्यास्तावद्विशिष्येरन्नदृष्टार्थेषु कर्मसु।
दृष्टार्थेषु तु तुल्यत्वमार्यम्लेच्छप्रयोगिणाम्॥§ 1129

सर्वो हि शब्दोऽर्थप्रत्यायनार्थं प्रयुज्यते। अर्थश्च संव्यवहारप्रसिद्ध्यर्थ-मभिधीयते। § 1130

तत्र यस्य विशिष्टस्य म्लेच्छेष्वर्थान्तराभिधा।
तत्रापि तस्य सामर्थ्यमनाद्येव प्रतीयते॥ § 1132

यथैव ह्यार्यगम्येऽर्थे संबन्धानादिता मतिः।
म्लेच्छगम्ये तथैव स्यादाविशिष्टं हि कारणम्॥ § 1134

न प्रयोगावधिस्तस्य म्लेच्छेष्वपि हि दृश्यते।
अनाद्यारेर्थशक्त्योश्च विशेषो गम्यतां कथम्॥ § 1136

यथा च म्लेच्छदेशेऽपि धूमोऽग्नेरवबोधकः।
एवं स्वार्थे प्रयोगात्तैरिष्टः शब्दोऽपि वाचकः॥ § 1138

तस्मात्पीलवादिशब्दानां वृक्षहस्त्यादिबोधने।
समा विप्रतिपत्तिः स्यादार्यम्लेच्छप्रयोगतः॥ § 1140

इति प्राप्तेऽभिधीयते। शास्त्रस्था वेति पूर्ववदेव सकलसूत्रव्याख्या योजनीया। किं च। § 1141

यथा साध्वनुरूपत्वात्प्रमादाशक्तिजेष्वपि।
जायते वाचकभ्रान्तिस्तथैव म्लेच्छभाषिते॥ § 1143

शब्दापभ्रंशवदेव गौणभ्रान्त्यादिप्रयोगनिमित्ता अर्थापभ्रंशा भवन्ति ते शास्त्रस्थैरेवाविप्लुतार्थक्रियानिमित्तपुण्यार्थिभिः शक्यन्ते साध्वसाधुकार्षापणम- 220 ध्यादिव तत्परीक्षिभिर्विवेक्तुम्। अभियुक्तानभियुक्तज्ञानयोश्चाभियुक्तज्ञानं बलवदितरस्य सुलभापवादत्वात्। § 1144

अतः शास्त्राभियुक्तत्वादार्यावर्तनिवासिनाम्।
या मतिः सैव धर्माङ्गशब्दार्थत्वप्रमा मता॥ § 1146

एतेनाऽऽर्यावर्तनिवासिमध्येऽपि— § 1147

अभियुक्ततरा ये ये बहुशास्त्रार्थवेदिनः।
ते ते यत्र प्रयुञ्जीरन् स सोऽर्थस्तत्त्वतो भवेत्॥ § 1149

स्मृत्याचारविरोधे वा साप्यवैषम्यसंशये।
समा विप्रतिपत्तिः स्यान्मूलसाम्याद्द्वयोरपि॥ § 1151

यथैव श्रुतिमूलत्वात्स्मरणानां प्रमाणता।

आचारणां तथैवेति न विशेषो बलाबले॥[§ 1153]

यद्वाऽऽचारबलीयस्त्वं फलस्थत्वात्प्रतीयते।
फलाद्वियुज्यमानं हि प्रमाणं दुर्बली भवेत्॥[§ 1155]

श्रुतिराचारमूलं या फलस्था सोपलभ्यते।
यावद्धि स्मरणं दृष्टवा श्रुतिरन्याऽनुमास्यते॥[§ 1157]

तावल्लब्धात्मकः पूर्वमाचारः प्रतितिष्ठति।
प्रतिष्ठितस्य बाधश्च कीदृशः परिकल्प्यताम्॥[§ 1159]

तेनाऽऽचारबलीयस्त्वं समत्वं वेह युज्यते।
स्मृतीनां वा बलीयस्त्वं शास्त्रास्था वेति वर्ण्यते॥[§ 1161]

उभयोः श्रुतिमूलत्वं न स्मृत्याचारयोः समम्।
सप्रत्ययप्रणीता हि स्मृतिः सोपनिबन्धना॥[§ 1163]

तथा श्रुत्यनुमानं हि निर्विघ्नमुपजायते।
आचारात्तु स्मृतिं ज्ञात्वा श्रुतिर्विज्ञायते ततः॥[§ 1165]

तेन द्व्यन्तरितं तस्य प्रामाण्यं विप्रकृष्यते।
न ह्येकैव श्रुतिः काचिदाचाराणां प्रवर्तिका॥[§ 1167]

भिन्नाभिर्विप्रकीर्णत्वान्नास्मृताभिः प्रवर्तनम्।
नैकप्रपाठकेनैव ह्याचाराणां विधिस्थितिः॥[§ 1169]

क्वचित्प्रकरणे कश्चित् कथं चिदुपलभ्यते।[§ 1170]

221 तद्यथाऽग्निप्रकरणे **‘यत्सप्तदशवतीमुपदधात्यन्नमेवोभयतो दधाति तस्मादुभाभ्यां हस्ताभ्यां परिगृह्य पुरुषोऽन्नमत्ति’** इति। सत्यपि हेतुवन्निगदत्वे प्रसिद्धिरहिते हेत्वसंभवात्। विधायिष्यते तु वेदे वचनेनेत्यनेन न्यायेन विध्यनुमानम्। न चैतन्नियोगतोऽर्थतः प्राप्तं येन ‘तस्मात्प्रजा दश मासांन्गर्भं धृत्वा एकादशमनु प्रजायन्ते तस्मादश्वतर्यः प्रजा’ इतिवत् स्वभावप्राप्तत्वेनार्थप्राप्तत्वेन वा ‘तस्मादुत्तरे वयसि पुत्रान्पितोपजीवति’ इतिवदनूद्येतेत्यतो न्यायात्पुरुषधर्मविधिः। एवम् **‘अन्नमेव तद्दक्षिणतो दधाति तस्माद्दक्षिणेन हस्तेन पुरुषोऽन्नमत्ति’ इति**। तथा **‘दीक्षितो नयनं दक्षिणं प्रथममङ्क्ते सव्यं हि मनुष्याः पूर्वमञ्जते बिधृत्यै’ इति**। तथा यूपैकादशिन्यां ‘द्वे द्वे रशने यूपमृच्छतः **तस्मात्स्त्रियः पुंसोऽतिरिक्तास्तस्मादुतैको बह्वीर्जाया विन्दते**

नैका बहून् पतीन्' इति। तथा दर्शपूर्णमासप्रकरणेऽग्नीषोमीयविधिसंबन्धलङ्घनेन त्वाष्ट्रवधनिमित्तेन्द्रगतब्रह्महत्यातुरीयविभागप्रतिग्रहप्रस्तावागतरजस्वलाव्रतानां भूमिशयनास्नानामांसभक्षणानभ्यञ्जनाञ्जनाविलेखनाकर्तनादन्तधावनानखच्छेदनारज्जुसंसर्जनादीनां त्रिरात्रविषयाणां प्रकरणातिरिक्तस्त्रीधर्मत्वावधारणम्। § 1171

एवं च विप्रकीर्णानामशक्यैकत्र संहृतिः।
स्मृतिमेव दृढां मुक्त्वा तस्मादस्त्यन्तरा स्मृतिः॥§ 1173

तेनाऽऽचारः स्मृतिं यावदनुमातुं प्रवर्तते।
स्मृतिर्लब्धश्रुतिस्तावद्धर्ममेवावधारयेत्॥§ 1175

तस्मादाचारेभ्यः स्मृतिर्बलीयसी सन्निबन्धनेति। § 1176

त्रिवृच्चर्वश्ववालादेर्लोकेऽन्योऽर्थः प्रतीयते।
वेदे तदभियुक्तैश्च तस्मादन्यो विलक्षणः॥§ 1178

तत्र किं तुल्यकल्पत्वात्पदार्थे लोकवेदयोः।
समा विप्रतिपत्तिः स्यादथ वैका बलीयसी॥§ 1180

लोके तावत्त्रिवृच्छब्दास्त्रिगुणत्वस्य वाचकः।
त्रिवृद्रज्जुस्त्रिवृद्वह्निर्वेदे तु नवके स्थितः॥§ 1182

त्रिवृद्बहिष्पवमानमित्युक्त्वा तृचत्रयमनुक्रान्तमिति स्तोत्रीयर्क्नवकवचन एव त्रिवृच्छब्दो विज्ञायते। § 1183

तथाऽयं चरुशब्दोऽपि लोके स्थालीनिबन्धनः।
याज्ञिकानां च वेदे च प्रसिद्धस्त्वोदनं प्रति॥§ 1185

अनवस्त्रावितान्तरूष्मपक्वौदनवचनो हि याज्ञिकानां चरुशब्दः प्रसिद्ध- 222
स्तथा वेदेऽपि 'आदित्यः प्रायणीयः पयसि चरुः' इति विहिते पश्चादुक्तात् 'दितिमोदनेनेतिवचनाच्चौदनवचनत्वं ज्ञातम्। एवमाश्ववालः प्रस्तर इत्यश्वजातीयवालमयः प्रस्तरो लोकप्रसिद्ध्या विज्ञायते। वैदिकवाक्यशेषात्तु काशेष्वश्ववालप्रसिद्धिः। एवं हि श्रूयते "यज्ञो वै देवेभ्योऽश्वो भूत्वाऽपाक्रामत्सोऽपः प्राविशत्। स वालधौ गृहीतः स वालान्मुक्त्वा विवेश ह। ते वालाः काशतां प्राप्ताः" कार्योऽतः प्रस्तरस्तु तैः। § 1186

ऐक्षव्यौ विधृती ये च ते इक्ष्ववयवात्मिके।

लोके सिद्धे तथा वेदे काशानामेव मूलके॥§ 1188

एवमादिषु सर्वेषु प्रतिपत्तिविपर्यये।
प्रतिपत्तेः समानत्वाद्विकल्पो हि प्रसज्यते॥§ 1190

ननु च लोकप्रसिद्धेर्धर्मं प्रत्यनङ्गत्वाद्वेदप्रसिद्धिरेव ज्यायसी॥ § 1191

नैतदेवं पदार्थेषु न हि वेदो विशिष्यते।
अदृष्टहेतुवाक्यार्थे लोकात्स ह्यतिरिच्यते॥§ 1193

तस्मादुमय्यापि त्वेषा प्रतिपत्तिः समा भवेत्।
यदि वा पूर्वभावित्वाल्लौकिक्येव बलीयसी॥§ 1195

वेदनिरपेक्षा हि लोकप्रसिद्धिरात्मानं लभते वैदिकी पुनर्लोकप्रसिद्धपदान्तरसामानाधिकरण्येन सिध्येत्। § 1196

तत्र लोकाविरुद्धा या वैदिकी सैव गृह्यते।
लोकसिद्धिं व्यतिक्रम्य साऽऽत्मानं नैव विन्दति॥§ 1198

‘तेष्वदर्शनाद्विरोधस्य’ इति च तेषु लौकिकेषु पदार्थेष्वदर्शनाद्विरोधस्यार्थवादानां चान्यपरत्वेन गुणवादप्रायत्वात्। आदित्ययूपयजनमानप्रस्तरस्वर्गाहवनीयादिवचनवत्कथमपि प्ररोचनाशेषत्वात् संज्ञासंज्ञिसंबन्धकरणव्युत्पादनव्यापाररहितत्वाच्च न पदार्थप्रतिपत्त्यङ्गत्वमध्यवसीयते तदाश्रयणे च विधिविरोधप्रसङ्गात्तेष्वेव वा दर्शनाद्विरोधस्येत्यभिप्रायः। तथा शास्त्रस्थमन्वादिप्रसिद्धिरप्यस्मत्पक्षानुगुणैव। यथाऽऽह— § 1199

कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत्।
त्रिवृता ग्रन्थिनैकेनेति॥§ 1201

223 तस्मात्समाऽपि तावद्भवति प्राप्तेऽभिधीयते— § 1202

शास्त्रस्था प्रतिपत्तिर्या सैवात्र ज्यायसी भवेत्।
धर्मस्य तन्निमित्तत्वात्ससाधनफलात्मनः॥§ 1204

अर्थवादकृताऽप्यर्थप्रतिपत्तिर्बलीयसी।
तद्ग्राह्यत्वादृते नान्यत्तस्या ह्यस्ति प्रयोजनम्॥§ 1206

गौणो वा यदि वा मुख्यो वेदेनाऽऽश्रीयते हि यः।

१९ त्रिवृत्] ‘शणसूत्रमयं राज्ञो वैश्यस्याऽऽविकमेव च’ इत्युत्तरार्धम्। मनु॰ २ अ॰ श्लो॰ ४४।
२० न्थिनैकेनेति] मुञ्जालाभे तु कर्तव्याः कुशाश्मन्तकबल्वजैः। त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा मनु॰ अ॰ २ श्लो॰ ४३।

स धर्मसाधनत्वेन पदार्थोऽध्यवसीयते॥§ 1208

त्रिवृच्छब्दः प्रयुक्तो यस्तोत्रीयानवकं प्रति।
कस्तं शक्तस्तोऽन्यत्र नेतुं जन्मशतैरपि॥§ 1210

तेन यत्र त्रिवृदग्निष्टोम इति श्रूयते तत्र तेनैवार्थेन भवितव्यम्। एवं स्तोमशब्दो यद्यपि ब्राह्मणस्तोम इत्यादिषु समुदायमात्रवचनत्वेनप्रसिद्धस्तथाऽपि 'त्रिवृदेव स्तोमो भवति पञ्चदश स्तोमो भवति' इति वेदे श्रवणात् स्तुतेश्च मानं स्तोम इति याज्ञिकस्मरणात्तथा स्तोमे डविधिः पञ्चदशाद्यर्थ इति व्याकरणशास्त्रप्रसिद्धेरवश्यमेव त्रिवृदादिषु लोकप्रसिद्धिरतिक्रमणीया। यत्तु मनुवचनं तदुभयाश्रयत्वात् समत्वेनापि युज्यते। यद्वा तत्रापि नवतन्तुकमेव त्रिवृच्छब्दात्प्रत्येष्यते तथा रशनात्रिवृत्त्वमपीति। यद्वा यथैवायं नवके दृष्टस्तथाऽयं स्तोत्रीयागतेऽपीति यत्रैव तत्संभवस्तत्रैव तत्प्रसिद्ध्यनुपाती भवति। यत्र तु संख्येयान्तरविषयत्वं तत्र वैदिकोऽर्थो गौणो गृह्यतां लौकिको वा मुख्य इति तादृशे विषये मुख्यार्थत्वाल्लौकिकप्रसिद्धिरेव ग्रहीतव्येत्युत्तरसूत्रे वक्ष्यामः "चोदितं तु प्रतीयेताविरोधात्" इति तथा चरुशब्दोऽप्यन्याय्यानेकार्थाभिधानप्रतिबद्धशक्तित्वादेकत्र नियम्यमानो याज्ञिकवेदप्रसिद्धिभ्यामोदनविषय एव भवति। आश्ववालैक्षवीशब्दौ तु यदि तावद्वैदिकप्रयोगलब्धसमुदायप्रसिद्धित्वेन लौकिकीमवयवप्रसिद्धिं जहीतस्ततः सिद्धमेव शास्त्रस्थप्रतिपत्तिबलीयस्त्वम्। अथापि श्येनजात्युपमितप्रसिद्धश्येनयागे गौणत्वद्वारा वाऽऽप्तप्रसिद्धिः **'समानामितरच्छयेनेन' इत्यादिष्विवाऽऽ**श्रीयते। तथाऽपि शास्त्रकल्पितत्वाद्धर्मं प्रति बलीयस्त्वम्। § 1211

अथापि शब्दगौणत्वं तथाऽपि बलवत्तरम्।
स्वतन्त्रस्य हि वेदस्य दृष्टं चेन्न निवार्यते॥§ 1213

गौणं लाक्षणिकं वाऽपि वाक्यभेदेन वा स्वयम्।
वेदो यमाश्रयत्यर्थं को नु तं प्रतिकूलयेत्॥§ 1215

न चात्र 'संदिग्धेषु वाक्यशेषात्' इत्येतेन तुल्यार्थत्वं प्रतिपत्तिद्वयस्याप्यसंदिग्धत्वात्। § 1216

लौकिकी प्रतिपत्तिर्हि स्वार्थे निःसंशया स्थिता। 224
वैदिक्यपि तथा स्वार्थे बाधतेऽतो विपर्ययात्॥§ 1218

तस्माच्छास्त्रास्थितैवैका प्रतिपत्तिर्बलीयसी।
न स्मा मुक्तकाचारैर्विप्रकृष्टैः ससंकरैः॥ इति॥ ९॥§ 1220

२५ शेषात्] जै° स° १—९—११।

इति यववराहाधिकरणम्॥ ४॥

## ०.०.९ पिकनेमाधिकरणम्

ये शब्दा न प्रसिद्धाः स्युरार्यावर्तनिवासिनाम्।
तेषां म्लेच्छप्रसिद्धोऽर्थो ग्राह्यो नेति विचिन्त्यते॥[§ 1223]

तथा— [§ 1224]

निरुक्तव्याक्रियाद्वारा प्रसिद्धिः किं बलीयसी।
समुदायप्रसिद्धिर्वा म्लेच्छस्यैवाथ वा भवेत्॥[§ 1226]

म्लेच्छप्रसिद्धिव्यवहर्तृदौर्बल्येऽपि समुदायरूढिबलेन स्वरूपगतेन ज्यायसी प्रतिभाति। [§ 1227]

तत्र प्रयोक्तृदौर्बल्यस्वरूपबलवत्तयोः।
किं तु न्याय्यतरं युक्तं ज्ञातुमित्यत्र चिन्त्यते॥[§ 1229]

तथा— [§ 1230]

निरुक्तव्याक्रियाद्वारा किं शास्त्रस्था वलीयसी।
किं वाऽवयवविक्षेपजननात्सैव दुर्बला॥[§ 1232]

एवं नानोपपत्तित्वात्संदेहे तावदुच्यते।
निरुक्तव्याक्रियाद्वारा प्रतिपत्तिर्बलीयसी॥[§ 1234]

शास्त्रस्था वेत्यनेनासौ कल्प्याऽपि हि बलीयसी।
सन्मूलस्य प्रमाणत्वं साध्यस्यापि वरं श्रितम्॥[§ 1236]

न सिद्धमप्यसन्मूलमाश्रयेण हि दूषितम्।
कथं वेदगतैः शब्दैर्म्लेच्छस्थोऽर्थः प्रतीयते॥[§ 1238]

येषां दर्शनमात्रेऽपि वेद एव न पठ्यते।
संभाषाऽपि च न म्लेच्छैः सहाऽऽर्यावर्तवासिनाम्॥[§ 1240]

225 तत्र तेषु प्रसिद्धोऽर्थः कथमार्यैः प्रतीयताम्।
एवं च सति यस्यापि प्रसिद्धिर्नोपलभ्यते॥[§ 1242]

तस्यापि म्लेच्छदेशेषु सर्वेष्वन्वेष्यतां व्रजेत्।

ततश्च निगमादीनां न कश्चिद्विषयो भवेत्॥§ 1244

अनन्तम्लेच्छदेशांश्च कः सर्वोऽनुपलप्स्यते।
य एव स्यादनन्विष्टस्तत्र शङ्का प्रसज्यते॥§ 1246

अनन्तेषु हि देशेषु कः सिद्धः क्वेति गम्यताम्।
निगमादिवशाद्याद्य धातुतोऽर्थः प्रकल्पितः॥§ 1248

द्वित्रेष्वहःसु बाध्येत प्रयोगान्म्लेच्छचोदितात्।
म्लेच्छाचाराप्रमाणत्वमथ त्वध्यवसीयते॥§ 1250

आर्यावर्ते ततः शक्या प्रसिद्ध्यन्वेषणक्रिया।
तस्याश्चाल्पेन कालेन सदसद्भावनिर्णयः॥§ 1252

ततश्च निगमादीनां सुज्ञातः स्वार्थगोचरः।
तस्मात्तदर्थवत्त्वाय म्लेच्छाचाराप्रमाणता॥§ 1254

धर्मे चानादरात्तेषां भ्रश्येतार्थोऽपि शब्दवत्।
न चास्ति संस्कृतः शब्दः कश्चिन्म्लेच्छापभाषणे॥§ 1256

संस्कृतप्रतिरूपा हि तद्भाषार्थान्तरे स्थिता।
न चावाचकरूपाणां वाचकत्वं कथंचन॥§ 1258

आर्याश्च म्लेच्छभाषाभ्यः कल्प्यन्तः स्वकं पदम्।
पदान्तराक्षरोपेतं कल्पयन्ति कदाचन॥§ 1260

न्यूनाक्षरं कदाचिच्च प्रक्षिपन्त्यधिकाक्षरम्।§ 1261

तद्यथा द्राविडादिभाषायामेव तावद्व्यञ्जनान्तभाषापदेषु स्वरान्तविभ-
क्तिस्त्रीप्रत्ययादिकल्पनाभिः स्वभाषानुरूपानर्थान्प्रतिपद्यमाना दृश्यन्ते। तद्य-
थौदनं चोरित्युक्ते चोरपदवाच्यं कल्पयन्ति पन्थानमतरित्युक्तेऽतर इति क-
ल्पयित्वाऽऽहुः। सत्यं दुस्तरत्वादतर एव पन्था इति। तथा पापशब्दं पकारान्तं 226
सर्पवचनमकारान्तं कल्पयित्वा सत्यं पाप एवासाविति वदन्ति। एवं मालश-
ब्दं स्त्रीवचनं मालेति कल्पयित्वा सत्यमित्याहुः। वैर्शब्दं च रेफान्तमुदरवचनं
वैरिशब्देन प्रत्याम्नायं वदन्ति। सत्यं सर्वस्य क्षुधितस्याकार्ये प्रवर्तनादुदरं वै-
रिकार्ये प्रवर्तत इति। तद्यदा द्राविडादिभाषायामीदृशी स्वच्छन्दकल्पना तदा

१९ था]
चोर्—अतर्—पाप्—माल्—बैर्—इत्येतेषां शब्दानां क्रमेण ओदन—मार्ग—सर्प—स-त्य—उदररूपेष्वर्थेषु द्राविडानामद्यत्वेऽपि प्रयोगो वर्तते।

पारसीबर्बरयवनरौमकादिभाषासु किं विकल्प्य किं प्रतिपत्स्यन्त इति न विद्मः। § 1262

तस्मान्म्लेच्छप्रसिद्धं यत्पदमार्यैर्विकल्प्यते।
न कश्चित्तत्र विश्वासो युक्तः पदपदार्थयोः॥§ 1264

निरुक्तव्याक्रियाद्वारा यस्त्वर्थः परिगम्यते।
पिकनेमादिशब्दानां स एवार्थो भविष्यति॥ इति प्राप्तम्।§ 1266

एवं प्राप्ते वदामोऽत्र पदं निपुणदृष्टिभिः।
विज्ञायेताविनष्टं यत्तत्तदर्थं भविष्यति॥§ 1268

देशभाषापभ्रंशपदानि हि विप्लुतिभूयिष्ठानि न शक्यन्ते विवेक्तुम्। § 1269

यत्तु वेदतदङ्गेषु पदं दृष्टमविप्लुतम्।
म्लेच्छभाषासु तद्रूपमर्थे क्वचन चोदितम्॥§ 1271

तत्तथैव प्रतीयेत प्रमाणेनाविरोधतः।
पिकनेमादि तद्वयेवं निपुणैरवधारितम्॥§ 1273

चोदितं ह्युपदिष्टं वा प्रयुक्तं वा क्रियागतम्।
म्लेच्छैरवधृतं पश्चादार्यैर्द्वैभाषिकैः क्वचित्॥§ 1275

तादृशं तु प्रतीयेत प्रामाण्येनेति निश्चितम्।
न तद्धर्मप्रमाणेन वेदाख्येन विरुध्यते॥§ 1277

अपि च— § 1278

पदार्थपदसंबन्धज्ञानापेक्षप्रवर्तनात्।
प्रसिद्धिर्यत्र तत्रस्था वाक्यार्थायानुगम्यते॥§ 1280

पिकादिशब्दवाच्यं वा म्लेच्छैर्यदवधारितम्।
अविरोधात्प्रमाणेन तद्विद्यावेदनोदितम्॥§ 1282

227 चोदितं वा प्रमाणेन वेदेनेत्यस्य संगतिः।
आर्यैः सहाविरुद्धत्वात् तस्य तैरप्यपेक्षणात्॥§ 1284

यथैव क्लोमादयः पश्ववयवा वेदे चोदिताः सन्तोऽध्वर्य्वादिभिः स्वयमज्ञायमानार्थत्वाद्ये नित्यं प्राणिवधाभियुक्तास्तेभ्य एवावधार्य विनियुज्यन्ते। यथा च निषादेष्ट्यां कूटं दक्षिणेति विहिते य एवैतेन व्यवहर-

न्ति तेभ्य एवार्थतत्त्वं ज्ञात्वा दीयते। तथेह पिकनेमतामरसादिचोदितं सद्भेदादार्यावर्तनिवासिभ्यश्चाप्रतीयमानं म्लेच्छेभ्योऽपि प्रतीयेत लोकावगम्यनित्यशब्दार्थाभ्युपगमाविरोधात् स्वेनैव प्रमाणेन प्रतीयेतेति। यत्तु शास्त्रबलीयस्त्वादेतदग्रहणमिति। तन्न। अविरोधे दुर्बलस्यापि ग्राह्यत्वाद्यदेवात्यन्तं प्रमाणाभासमेव मृगतृष्णाज्ञानवद्भवति तत्सर्वदैव परिहर्तव्यं, यत्पुनर्बलवद्विरोधापेक्षमप्रमाणं भवति तद्विरोधाभावात्प्रमाणमेवेत्यवधारणीयम्। न चैवमादि विरुध्यते। विपरीतार्थप्रसिद्ध्यन्तराभावात्। अत एव वैदिकवाक्यार्थस्वविषयप्रयुक्तपदार्थमात्राभियुक्ततरार्यप्रसिद्धिबलीयस्त्वाश्रयणम्। § 1285

प्रसिद्धौ विद्यमानायां तद्बलीयस्त्वमिष्यते।
असत्यां तु बलीयस्त्वं वन्ध्यासुतबलोपमम्॥§ 1287

अष्टकादिषु ह्यदृष्टार्थेषु समूलकेषु स्मर्यमाणेषु गवादिपदस्वरूपतदर्थज्ञानेषु च सत्यमार्याणामाप्ततरत्वाभियुक्तातरत्वे विद्येते। पिकादिषु त्वार्यबलेनैवावगतस्वरूपमात्रवाचकत्वेषु वाच्यविशेषज्ञानरहितत्वेनाऽऽर्येषु निर्व्यापारीभूतेषु पदवद्दृष्टार्थप्रतिपत्त्यर्थानादिशब्दप्रयोगलब्धसंबन्धप्रसिद्धिम्लेच्छप्रयोगेभ्योऽर्थनिर्णये सति न किंचिद्विरुद्धमाकाङ्क्षितपदार्थज्ञानं च सेत्स्यति। निगमनिरुक्तव्याकरणैरपि न चैवमादीनामर्थान्तरं किंचिदुदात्हृतं, यत्प्राप्य कृतार्थाः सन्त इतरेषां प्रसिद्धिं परित्यजेम। § 1288

काल्पनिक्याः प्रसिद्धेश्च या क्लृप्ता सा बलीयसी
तस्यां सत्यां हि नाऽऽत्मानमितरा लब्धुमर्हति।§ 1290

आश्रयाणां च दौर्बल्यं धर्मं प्रति निरूपितम्।
दृष्टार्थव्यवहारेषु कृष्यादाविव तुल्यताम्॥§ 1292

तस्माद्यथैव सेवादौ गृहादिषु च कौशलम्।
म्लेच्छानामधिकं तद्वदभिधेयार्थनिर्णये॥§ 1294

शब्दस्वरूपं तावत्तेनाभियुक्तत्वाच्चिरविनष्टाविनष्टत्वेन न विविञ्चीरन्। यस्तु कथमप्यविनष्ट एव शब्दस्तेषामपि प्रयोगविषयमापन्नस्तस्य चाऽऽर्यव- 228
देवानादिवृद्धव्यवहारपरम्परयाऽर्थं जानन्ति तत्किं तेषां निराकर्तुं शक्यते। § 1295

*पत्रोर्णवारबाणादि यच्च तद्देशसंभवम्।
तैरेवाकथितं नाम तच्च को वेदितुं क्षमः॥§ 1297

---

२८ *] पत्रोर्णं धौतकौशेयं बहुमूल्यं महाधनमित्यमरः।

२८ बाणादि] कञ्चुको वारबाणोऽस्त्रीत्यमरः।

तस्मान्न तेषां व्यवहारप्रसिद्धौ दौर्बल्यम्। § 1298

निरुक्तादेश्च सिद्धेऽर्थे तन्निमित्तादिमात्रके।
व्यापारो न च पूर्वर्धप्रतिपत्तौ स्वरूपतः॥§ 1300

निरुक्ते न तावल्लोकव्यवहारप्रसिद्धान्येव पदानि तद्गतक्रियानिमित्तशब्दप्रयोगभाक्त्वेन निरुच्यते। व्याकरणेनापि प्रसिद्धार्थानामेवाविनष्टस्वरूपान्वाख्यानमात्रं क्रियते तत्र प्रासङ्गिकमेव कियदप्यर्थनिरूपणम्। तानि स्वविषयादन्यत्र दुर्बलानामपि न बाधकानि। § 1301

यस्य चान्विष्यमाणाऽपि प्रसिद्धिर्न भविष्यति।
कामं प्रदर्शितद्वारा तत्र कल्प्याऽऽश्रयिष्यते॥§ 1303

विक्षिप्ता बहुरूपा च या संदेहप्रदायिनी।
अनन्योपायतामात्रे क्वचिदेव ग्रहीष्यते॥§ 1305

न चार्थप्रत्ययानङ्गनिरुक्ताद्यप्यनर्थकम्।
षडङ्गवेदविज्ञानपूर्वकर्मक्रियाफलात्॥§ 1307

यथा महाभारतनिर्वचनान्वाख्याने द्वैपायनेनोक्तम्। § 1308

महत्त्वाद्भारतत्वाच्च महाभारतमुच्यते।
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते॥§ 1310

इत्येवं निरुक्तव्याकरणाद्यङ्गानुगृहीतवेदाध्ययनजनितकर्मावबोधपूर्वकानुष्ठानायत्तत्वात् स्वर्गादिसिद्ध्यर्थापूर्वसिद्धेरव्युत्पन्नरूपे च ज्ञातेऽपि निरुक्तावगतधात्वर्थ-
229 पूर्वकनामार्थज्ञानद्वारवाक्यार्थप्रतिपत्तिपूर्वकानुष्ठानादेवादृष्टसिद्धिरिति म्लेच्छसिद्धपिकाद्यर्थग्रहणेऽपि निरुक्तादीनामर्थवत्ता सिद्धेति॥ १०॥ § 1311

इति पिकनेमाधिकरणम्॥ ५॥

## ०.०.१० कल्पसूत्राधिकरणम्

229 कल्पसूत्राण्युदाहृत्य संप्रत्येतद्विचार्यते।
किमेतेषां स्वतन्त्राणां प्रामाण्यं वेदवद्भवेत्॥§ 1314

किं वा वेदत्वमेवैषां मन्त्रब्राह्मणवन्मतम्।
वैदिकार्थप्रबन्धाद्धि नैतेषां स्मृतितुल्यता॥§ 1316

आह। के पुनः कल्पाः कानि सूत्राणीति। उच्यते। § 1317

सिद्धरूपः प्रयोगो यैः कर्मणामनुगम्यते॥§ 1318

ते कल्पा लक्षणार्थानि सूत्राणीति प्रचक्षते।
कल्पनाद्धि प्रयोगाणां कल्पोऽनुष्ठानसाधनम्॥§ 1320

सूत्रं तु सूचनात्तेषां स्वयं कल्प्यप्रयोगकम्।
कल्पाः पठितसिद्धा हि प्रयोगाणां प्रतिक्रतु॥§ 1322

बौधायनीयवाराहमाशकादिप्रबन्धवत्।
स्वसंज्ञापरिभाषाभिर्यदुत्सर्गापवादनम्॥§ 1324

हेतुदृष्टान्तवत्सूत्रं तल्लक्ष्यव्यापि लक्षणम्।
आश्वलायनकं सूत्रं बैजावापिकृतं तथा॥§ 1326

द्राह्यायणीयलाटीयकात्यायनकृतानि च।§ 1327

तत्र सकलप्रत्यक्षवदप्रतिपाद्यक्रतुप्रयोगोपनिबन्धनादन्तर्हितविप्रकीर्णानुमेयप्रायश्रुतिमूलस्मृतिबन्धनेभ्यो महानेव कल्पसूत्राणां विशेषोऽस्तीति न तत्तद्गतन्यायं व्यवस्थाप्य प्रामाण्यानि विज्ञायन्ते। § 1328

अप्रामाण्यं स्मृतीनां च यदशब्दतयोदितम्।
पूर्वपक्षे न तद्वक्तुं कल्पसूत्रेषु शक्यते॥§ 1330

प्रत्यक्षवेदशब्दत्वात्तदुक्ता नापशब्दता।§ 1331

न ह्यत्यन्तानृतं वक्तुं शक्यते पूर्वपक्षिणा।§ 1332

स्मृत्यधिकरणे चाप्रमाणत्वं मूलानुपपत्त्या पूर्वपक्षेऽभिधाय सिद्धान्तेऽनुमित-
श्रुतिमूलत्वेन प्रामाण्यं स्थापितम्। एतानि च न तत्रोदाहृतानि पूर्वपक्षहेत्वसंभ-
वात्। न चैषामिह प्रामाण्यप्रतिपादनम्। अतिरिक्तप्रामाण्यापवादप्रतिपाद- 230
नार्हत्वादधिकरणस्य। § 1333

यद्वा भवतु नामैषां तस्मिन्नपि विचारणा।
तेषां चात्रापि सर्वेषामिति प्रामाण्यवारणा॥§ 1335

यदि धर्मं प्रति स्मृतीनां प्रामाण्यमभ्युपगम्यते। तथा सति। § 1336

तासामपि हि वेदत्वे तैर्वा तुल्यप्रमाणता।

स्वातन्त्र्याच्छक्यते वक्तुं न तु मूलानुमानतः॥ § 1338

यद्वा प्रयोगशास्त्रत्वमङ्गानामभिधीयते।
वेदत्वं वा षडङ्गेऽपि वेदत्वस्मृतिरस्ति हि॥ § 1340

‘मन्त्रब्राह्मणयोर्वेद इति नामधेयं षडङ्गमेके’ इत्यङ्गान्यपि वेदशब्दवाच्यानि स्मर्यन्ते। § 1341

तस्मात्तान्यपि वेदां वा प्रमाणानि स्वतोऽथ वा।
प्रतिभान्तीति कर्तव्यमन्यथा प्रतिपादनम्॥ § 1343

यद्वा शाक्यादिशास्त्राणां स्मृतिशास्त्रत्ववारणात्।
वेदशाखासमानत्वमाशङ्क्येह निवार्यते॥ § 1345

शाक्यादयोऽपि ह्येवं वदन्त्येव। यथा ‘उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैवेषां धर्मनित्यता’ इति। § 1346

ततश्च वेदवन्नित्यास्तेऽपि चेदागमा मताः।
चोदनालक्षणो धर्मस्तदुक्तोऽपि प्रसज्यते॥ § 1348

कामं न प्रविशेद्ग्रामं वारितो दण्डपाणिभिः।
स्पष्टं महापथेनैव संप्रति प्रविविक्षति॥ § 1350

एवमेतानि चत्वार्यपि विचारस्थानान्येकमार्गपतितानि कल्पसूत्रविचारेणैव गतप्रायाणि भविष्यन्तीति मन्वानेन तदुपन्यासमात्रमेव क्रियते। § 1351

का गतिः कल्पसूत्राणामित्यस्मिन् संशये सति।
प्रयोगशास्त्रतां तावत् प्राह स्म त्यक्तसंशयम्॥ § 1353

वेदत्वं कल्पसूत्राणां न मोक्तव्यं मनागपि।
यदि वा वेदतुल्यत्वं स्वतन्त्राणां प्रतीयताम्॥ § 1355

वेदेनैवाभ्यनुज्ञाता धर्मे तेषां प्रमाणता।
वेदत्वमेव वा सिद्धं संवादादिप्रमाणकम्॥ § 1357

ननु च पौरुषेयत्वादेषामेतदुभयमप्यनुपपन्नम्। § 1358

नैतेषां पौरुषेयत्वं भविष्यति हि वेदवत्।
माशकादिसमाख्या हि प्रोक्तत्वात्काठकादिवत्॥ § 1360

231 यथैव कठादिप्रोक्ताः शाखाः काठकादिसमाख्ययाऽभिधीयन्त इत्यकृत्रिमाः स्थापितास्तथैव वेदसमाम्नातमशकादिसमाख्यातग्रन्थनियताऽपि प्रत्येतव्या। यथा सामसूक्तानामिदमस्याऽऽर्षमिदमस्येति सत्यामपि त-

न्निमित्तायां समाख्यायां न नित्यत्वप्रतिघातः। एवं प्रख्यातर्षिप्रकल्पसूत्रग्रन्थानामपि। तथा हि— § 1361

न तावदनृषिः कश्चित्स्मर्यते कल्पसूत्रकृत्।
कर्तृत्वं यदृषीणां तु तत्सर्वं मन्त्रकृत्समम्॥§ 1363

यथा **शैशवं भवति शिशुर्वा अङ्गिरसो मन्त्रकृतां मन्त्रकृदासीदित्यत्र मन्त्रकृ**च्छब्दः प्रयोक्तरि प्रयुक्त एवं तस्य तस्य कल्पस्य सूत्रस्य वा प्रयोक्तारस्तत्कारित्वेन व्यपदेक्ष्यन्ते। ब्रह्मयज्ञविधाने च 'एवं विद्वान् स्वाध्यायमधीयीत' इत्युक्त्वा तत्प्रपञ्चे 'यदृचोऽधीते यद्यजूंषि यत्सामानि यद्ब्राह्मणानि यदितिहासपुराणानि यत्कल्पान्' इति तज्जप्यमानत्वेन विधानादार्षत्वमेव विज्ञायते। पुरुषकृतानां जपनिमित्तधर्महेतुत्वेन नित्यविधिविषयत्वासंभवात्। अरुणपराशरशाखाब्राह्मणस्य च कल्परूपत्वात्सर्वयाज्ञिकैश्च स्वशाखाधीतव्यतिरिक्तकल्पसूत्रकारोपन्यस्तपक्षतुल्यबलत्वाध्यवसानात्कल्पजमन्त्राणां चेतरसमाम्नायाधीतवत्क्रतुविनियोगाश्रयणात् तुल्यत्वम्। § 1364

आर्षेयवचनं नित्यपर्यायत्वेन गम्यते।
आर्षेयत्वप्रसिद्धिश्च कल्पसूत्रेष्ववस्थिता॥§ 1366

लाटद्राह्यायणसूत्रकाराभ्यामपि च दृढकल्पप्रामाण्यापेक्षयेदं माशकमपेक्ष्य '**तत्प्रत्यक्षविहितं चाऽऽर्षकल्पेन तत्रानुमानं न विद्यते**' इति ब्राह्मणविहितादप्यार्षकल्पविहितगरीयस्त्वमङ्गीकृत्योक्तम्। कात्यायनेन च कृताक्षणसूत्रप्रणयनप्रक्रमेऽभिहितं यज्ञविषयब्राह्मणगतस्तोत्रविधिवाक्यशेषे यथा माशकं तत्प्रामाण्यात्करिष्यते न तन्निरपेक्षशुद्धब्राह्मणप्रामाण्यादिति। तथा च प्रायणीयाग्निष्टोमसाम्नि यज्ञायज्ञीयेन सह वैकल्पिकं जराबोधीयमग्निष्टोमसाम कार्यमिति पञ्चविंशब्राह्मणेऽभिहितमपि माशकानुवृत्त्या कात्यायनेनाऽऽर्भवीयगायत्रतृतीयत्वेन जरासादिति लक्षितम्। आर्भवीयगायत्रीगतगायत्रानन्तरसाम्नो हि तेन समिति संज्ञा कृता। तस्माद्य परत्वेन पदैकदेशप्रयोगेण जराबोधीयमुक्तं देशब्देन च ज्यौतिष्टोमिकाग्निष्टोमसामसंज्ञाभूतेन यज्ञायज्ञीयमेवाग्निष्टोमसामत्वेन नियतम्। यदि च कल्पाद्ब्राह्मणमतिरिक्तं कात्यायनोऽमंस्यत ततः प्रत्यक्षब्राह्मणदृष्टं विकल्पमेवावक्ष्यत्। § 1367

बहुवेदगतन्यायविवेकज्ञो यदब्रवीत्।
कात्यायनो न तद्वाच्यमन्याय्यमिति मादृशैः॥§ 1369

आचार्यवचनानां च प्रामाण्यं श्रूयते श्रुतौ। 232
अङ्गानां च प्रणेतार आचार्या ऋषयो मताः॥§ 1371

यथा च सर्वशाखानां संवादात्तुल्यकल्पता।
तथैव कल्पसूत्राणामिति प्रामाण्यतुल्यता॥§ 1373

यान्यप्यप्रत्ययितपुरुषवचनानि प्रमाणान्तरसंगतार्थानि भवन्ति तान्यपि सत्यत्वेनावधार्यन्ते किमङ्ग पुनः सत्यवाचां वचनानि। § 1374

सत्यवाचां च वाक्यानि वैदिकैः संगतानि च।
ज्ञातसत्यानि तान्येवं कोऽन्यथा कल्पयिष्यति॥§ 1376

अपि च— § 1377

वेदादृतेऽपि कुर्वन्ति कल्पैः कर्माणि याज्ञिकाः।
न तु कल्पैर्विना केचिन्मन्त्रब्राह्मणमात्रकात्॥§ 1379

तुल्यं च सांप्रदायिकं स्वाध्यायाध्ययनविधिवचनं प्राग्दर्शितं कल्पग्रहणात्। § 1380

अथ वा संप्रदातॄणामध्येतॄणां च यादृशः।
मन्त्रब्राह्मणयोर्यत्नः कल्पसूत्रेषु तादृशः॥§ 1382

*अनुयोगेषु वेदानां घटिकामार्गवृत्तिषु।
न कल्पसूत्रहीनानां लभ्यते कृत्स्नवेदता॥§ 1384

तस्मात्कर्मप्रयोगाणां शास्त्रमेतदतिस्फुटम्।
वेदो वा वेदतुल्यं वा कल्पसूत्राद्यसंशयम्॥§ 1386

एतेन धर्मस्त्राणामङ्गानां चापि वेदता।
तत्तुल्यताऽपि वा वाच्या सर्वेषां सर्वहेतुभिः॥§ 1388

धर्मशास्त्रपदं येषु सर्वकालं प्रयुज्यते।
प्रयोगशास्त्रतां तेषां वेदज्ञः को हरिष्यति॥§ 1390

अपि चाङ्गानि वेदाश्च धर्मशास्त्रं च तुल्यवत्।
विद्यास्थानानि गण्यन्ते सर्वदा वेदवादिभिः॥§ 1392

233 किं च— § 1393

कर्मणां ब्राह्मणोक्तानां यथा मन्त्राः प्रकाशकाः।

१४ *] वेदकौशलजिज्ञासार्थं तत्तद्वेदभागचिह्नलेख्यानि घटिकायां कुम्भाख्यायां निक्षिप्य तत्तद्वेद भागपरीक्षाकाले तान्याकृष्य आकृष्टलेख्यचिह्नितं पठन्त्यध्येतारो न युञ्जत इति घटिकामार्गवर्तिनोऽनुयोगाः इति।

अष्टकापार्वणादीनां दृश्यन्ते ते तथैव हि॥[§ 1395]

तथाऽवकीर्णियागादि कृच्छ्रचान्द्रायणादि वा।
वेदमन्त्रप्रकाश्यं सत्त्वयं कथमवैदिकम्॥[§ 1397]

सिद्धवह्निशिखत्वादि यच्च मन्त्रैरनूद्यते।
चौलोपनयनप्राप्तं तत्स्यात्कथमवैदिकम्॥[§ 1399]

एवं च वेदमूलत्वं किमेषामनुमीयते।
संभवत्येव वेदत्वे नित्यत्वे चापि तत्समे॥[§ 1401]

वेदं हि कल्पयित्वेभ्यः पुनस्तस्यापि नित्यता।
वक्तव्यैव वरं तेन सा तेष्वेवावधारिता॥[§ 1403]

सिद्धानां नित्यतैवैका सुबोधा वेदताऽपि वा।
असंशयितवेदार्थविषयत्वात्प्रकल्प्यते॥[§ 1405]

तस्माद्वर्षसहस्रेऽपि यस्य न ज्ञायतेऽवधिः।
न तत्कृतकतां लब्ध्वा लभते नित्यमूलताम्॥[§ 1407]

यान्येव धर्मशास्त्राणां मूलवाक्यानि मन्यसे।
तान्येवैतानि पठ्यन्त इत्येतत्कल्पितं वरम्॥[§ 1409]

मन्वादिभिरवश्यं च स्वग्रन्थप्रतिपादने।
तान्युपन्यसनीयानि शिष्याणां वेदवादिनाम्॥[§ 1411]

तेन तान्येव तैरेभ्यः संप्रत्तानीति गम्यते।
के हि तेषूपलब्धेषु गृह्णीयुः प्रतिकञ्चुकान्॥[§ 1413]

यथा च धर्मशास्त्राणां नाद्यत्वे प्रतिकञ्चुकाः।
ग्राह्यास्तथा पुराऽप्यासन्न वेदप्रतिकञ्चुकाः॥[§ 1415]

संप्रदायविनाशाच्चेद्भीतेस्तदसमर्पणम्।
मन्वादिष्वनुमीयेत स्वग्रन्थाकरणं तथा॥[§ 1417]

वेदवाक्यार्पणं येषां खण्डशो नाभिसंमतम्। 234
स्वग्रन्थकरणं तेषां वेदस्थाने कथं भवेत्॥[§ 1419]

वेदादेव च विज्ञातो वेदार्थः साधयेत्फलम्।
नान्यस्मात्पुरुषग्रन्थान्मन्त्राभासात्स्मृतो यथा॥§ 1421

कृता मन्वादिभिर्यद्वन्न मन्त्रप्रतिकञ्चुकाः।
न ह्येतेन स्मृतं कर्म सिध्यतीत्यवधारणात्॥§ 1423

तथैव तैर्न कर्तव्या ब्राह्मणप्रतिकञ्चुकाः।
नावेदविहितं कर्म फलतीति हि निश्चितम्॥§ 1425

न चैभिर्भिन्नदेशस्थवेदवाक्यसमुच्चयः।
कृत इत्यवगन्तव्यमीदृक् ग्रन्थावधारणात्॥§ 1427

ईदृगेवं क्रमश्चायं वेदग्रन्थ इतीदृशी।
युज्यते हि मतिः कर्तुं न मूलान्तरकल्पना॥§ 1429

तेन प्रयोगशास्त्रत्वं तदेवाऽऽपतितं बलात्।
धर्मं प्रत्यप्रमाणत्वं यदेवैषां न संमतम्॥§ 1431

चोदनालक्षणे धर्मे पूर्वमेवावधारिते।
अवेदस्य प्रमाणत्वं ब्राह्मणस्यापि नेष्यते॥§ 1433

तेनैषां धर्मशास्त्राणां न वा धर्मोपयोगिता।
वेदता वाऽभ्युपेतव्या गतिर्नास्त्यान्तरालिकी॥§ 1435

वदन्ति धर्ममेतानि चोदनां गमयन्ति च।
अशक्यमीदृशं वक्तुं यावदुक्तप्रमाणकैः॥§ 1437

उक्तमर्थं परित्यज्य यदनुक्तं प्रतीयते।
अनुक्तेन च सोऽप्यर्थ इति किं नोपपद्यते॥§ 1439

तस्माद्धर्मप्रयोगस्य साक्षादुक्तस्य तत्स्वयम्।
प्रमाणं धर्मशास्त्रं स्यान्न वेदव्यवधानवतः (?)॥§ 1441

शाक्यादिनिर्मिते धर्मशास्त्राभासे निराकृते।
धर्मप्रयोगशास्त्रत्वं तस्य वेदमिहोच्यते॥§ 1443

येनैवाकृतकत्वं हि वेदस्य प्रतिपाद्यते।
न्यायेन तेन शाक्यादिग्रन्थस्यापि भविष्यति॥§ 1445

बोधकत्वात्प्रमाणत्वं स्वतस्तस्यापि लभ्यते। 235
न च संदिह्यते बुद्धिर्न विपर्ययते क्वचित्॥§ 1447

अकर्तृकतया नापि कर्तृदोषेण दुष्यति।
वेदवद्बुद्धवाक्यादि कर्तृस्मरणवर्जनात्॥§ 1449

बुद्धवाक्यसमाख्याऽपि प्रवक्तृत्वनिबन्धना।
तद्दृष्टत्वनिमित्ता वा काठकाङ्गिरसादिवत्॥§ 1451

यावदेवोदितं किंचिद्वेदप्रामाण्यसिद्धये।
तत्सर्वं बुद्धवाक्यनामतिदेशेन गम्यते॥§ 1453

तेन प्रयोगशास्त्रत्वं यथा वेदस्य संमतम्।
तथैव बुद्धशास्त्रादेर्वक्तुं मीमांसकोऽर्हति॥ इति॥ ११॥§ 1455

एवं प्राप्ते वदामोऽत्र तत्रा**सन्नियमादिति**।
असन्निबन्धनं ह्येतत्पूर्वोक्तं सर्वमीक्ष्यते॥§ 1457

इहैका परमार्थेन बुद्धिरर्थेषु जायते।
अन्या भ्रान्तिरजाताऽपि त्वन्या जाताऽपि दुष्यति॥§ 1459

परेण सह केषांचिद्वाकोवाक्यानि जल्पताम्।
युक्तयः प्रातिभासिक्यो जायन्ते परवाक्यतः॥§ 1461

स्वसंवेद्यं च सिद्धान्तमात्मीयमपि जानताम्।
छायां तथाऽपि रक्षन्तो जल्पन्ति प्रतिशब्दकैः॥§ 1463

यथा मीमांसकत्रस्ताः शाक्यवैशेषिकादयः।
नित्य एवाऽऽगमोऽस्माकमित्याहुः शून्यचेतनम्॥§ 1465

प्रद्वेषाद्वेदपूर्वत्वमनिच्छन्तः कथंचन।
तन्मात्रेऽपि च भूयिष्ठामिच्छन्तः सत्यवादिताम्॥§ 1467

भूयसां वेदबाह्यत्वाद्बुद्धादिवचसाममी।
अहिंसाद्यप्यतत्पूर्वमित्याहुस्तर्कमानिनः॥§ 1469

ततश्च पौरुषेयत्वादप्रामाण्यमतीन्द्रिये।
प्रागुक्तैर्वेदनित्यत्ववागाभासैर्विमोह्यते॥§ 1471

236 यादृशतादृशमीमांसकैरप्यतीन्द्रियविषयपुरुषवचनप्रामाण्यनिराकरणादपौरुषेयत्वाध्यवसायनिराकृतकारणदोषाशङ्कनिरपवादप्रामाण्यसिद्धिं प्रतिहन्तुमशक्यां मन्यमाना निरुत्तरीभूता बालानुकरणवाक्यसदृशैः स्ववाक्यैर्व्यवलिख्यमानहृदयाः सन्तोऽपि प्रक्षीणकुहेतुवचनजालाः कन्यावरणार्थागतमूर्खवरगोत्रप्रश्नोत्तरवत्। § 1472

यदेव भवतां गोत्रं तदस्माकमपीतिवत्।
आहुः स्वागमनित्यत्वं परवाक्यानुकारिणः॥§ 1474

अस्मदीयमिदं वाक्यं भवतामिति चोदिताः।
जल्पन्त्यस्माकमेवैतच्छ्रुत्वा मीमांसकैर्हृतम्॥§ 1476

त्यक्तलज्जं ब्रुवाणो हि वाचोयुक्तिमनर्थिकाम्।
कुर्वन् परातिसंधानमश्रान्तः कोऽवसीदति॥§ 1478

तत्र शाक्यैः प्रसिद्धाऽपि सर्वक्षणिकवादिता।
त्यज्यते वेदसिद्धान्ताज्जल्पद्भिर्नित्यमागमम्॥§ 1480

धर्मस्तेनोपदिष्टोऽयमनित्यं सर्वसंस्कृतम्।
क्षणिकाः सर्वसंस्कारा अस्थिराणां कुतः क्रिया॥§ 1482

बुद्धिबोध्यं त्रयादन्यत्संस्कृते क्षणिकं च तत्।§ 1483

तथा शब्देऽपि बुद्धेर्नियमान्नाभिव्यक्तिर्द्वेधाऽपि दोषादित्येवमादिभिः सर्वदा पदार्थसंबन्धानित्यत्वप्रतिपादनात्तद्विपरीतमागमनित्यत्वमभ्युपगम्यमानं लोकोपहासास्पदमात्रमेव भवेत्। § 1484

तथा हि— § 1485

यस्तन्तूननुपादाय तुरीमात्रपरिग्रहात्।
पटं कर्तुं समीहेत स हन्याद्व्योम मुष्टिभिः॥§ 1487

यावदागमनित्यत्ववेश्मदारूपकल्पिते।
हेत्वाभासाग्निनिर्दग्धे तस्मिंस्तद्वेश्म दुष्करम्॥§ 1489

व्यवहारनित्यताशब्दश्च क्रियानित्यत्वपर्यायः तद्यस्य शब्दार्थसंबन्धानामनित्यत्वं तस्य तदाश्रयव्यवहारनित्यत्वं किमाधारं भविष्यतीत्यतिदुःसंपादम्। § 1490

न च शब्दार्थसंबन्धकूटस्थत्वमनिच्छताम्।
नित्यता व्यवहारस्य निराधाराऽवकल्पते॥ § 1492

शब्दादिषु विनश्यत्सु व्यवहारः क्व वर्तताम्।
स्थितैषां धर्मतेत्येतदर्थशून्यमतो वचः॥ § 1494

एषेत्यपि न निर्देष्टुं शक्या क्षणविनाशिनी।
किमुत स्थितया साकं एषेत्यस्यैकवाक्यता॥ § 1496

तेनानित्यशब्दवादिनामागमनित्यत्वानुपपत्तेरतीन्द्रियविषयस्य च वाक्यस्य 237
प्रयोगशास्त्रत्वाभावान्नासन्नियमादित्युच्यते। § 1497

असाधुशब्दभूयिष्ठाः शाक्यजैनागमादयः।
असन्निबन्धनत्वाच्च शास्त्रत्वं न प्रतीयते॥ § 1499

मागधदाक्षिणात्यतदपभ्रंशप्रायासाधुशब्दनिबन्धना हि ते। *मम विहि भिक्खवे कम्मवच्च इसी सवे। *तथा उकखित्ते लोडम्मि उत्वे अत्थि कारणम्। पडणे णत्थि कारणम्। *अणुभवे कारणं इमे संकडाधर्म्मा संभवन्ति सकारणा अकारणा विणसन्ति। अणुप्यत्तिकारणमित्येवमादयः। § 1500

ततश्चासत्यशब्देषु कुतस्तेष्वर्थसत्यता।
दृष्टापभ्रष्टरूपेषु कथं वा स्यादनादिता॥ § 1502

वेदेषु हि तावदेव पदवाक्यसंघातात्मकत्वादिहेत्वाभासैः कृतकत्वभ्रान्तिर्भवति। § 1503

या तद्बहिरवस्थानाद्वेदरूपं न दृश्यते।
ऋक्सामादिस्वरूपे तु दृष्टे भ्रान्तिर्निवर्तते॥ § 1505

आदिमात्रमपि श्रुत्वा वेदानां पौरुषेयता।
न शक्याऽध्यवसातुं हि मनागपि सचेतनैः॥ § 1507

दृष्टार्थव्यवहारेषु वाक्यैर्लोकानुसारिभिः।
पदैश्च तद्विधैरेव नराः काव्यानि कुर्वते॥ § 1509

प्रपाठकचतुःषष्टिनियतस्वरकैः पदैः।

---

११ *] ममापि भिक्षवः कर्म वर्तत एवाऽऽशरीरपातात्।
१२ *] तथा, उत्क्षिप्ते लोष्टे उत्क्षेपेऽस्ति कारणं पतने नास्ति कारणम्।
१३ *] अस्त्युद्भवे कारणामिमे संस्कृता धर्माः संभवन्ति सकारणा अकारणा विनश्यन्ति। उत्पत्तिमनुकारणमपेक्षन्ते।

लोकेष्वप्यश्रुतप्रायैरृग्वेदं कः करिष्यति॥ § 1511

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातममित्येतन्नृवचः कथम्॥ § 1513

किमालोच्य क्व वा दृष्ट्वा वोक्प्रतिच्छन्दमीदृशम्।
रचयेत्पुरुषो वाक्यं किं चोद्दिश्य प्रयोजनम्॥ § 1515

अग्नेः पुरोहित्वं च क्व दृष्टं येन कीर्त्यते।
ईळेशब्दप्रयोगश्च क्व दृष्टस्तोत्रगोचरः॥ § 1517

देवत्वं चास्य यज्ञस्य विहितं क्वोपलक्षितम्।
विधिनैव हि देवत्वं प्रतिकर्मावधार्यते॥ § 1519

न जात्या देवतात्वं हि क्वचिदस्ति व्यवस्थितम्।
238 होतृत्वमपि यत्तस्य देवताह्वानहेतुकम्॥ § 1521

रत्नधायितमत्वं च तन्नरैर्ज्ञायते कथम्।
अविज्ञातगुणानां च कल्पते स्तवनं न तु॥ § 1523

स्वतन्त्रो वेद एवैतत्केवलो वक्तुमर्हति।
इषे त्वेत्ययमप्यर्थः पुरुषेणोच्यतां कथम्॥ § 1525

शाखाच्छेदोपयोगश्च पुंभिरुत्प्रेक्ष्यतां कुतः।
एवमूर्जेत्ययं मन्त्रः केन शाखानुमार्जने॥ § 1527

वक्तुं शक्यो नियोक्तुं वा बुद्धिपूर्वककारिणाम्।
वायवः स्थेत्ययं मन्त्रो वत्सापाकरणं प्रति॥ § 1529

एकशो विनियोक्तव्य इति कः कथयिष्यति। § 1530

वायुशब्देन बहुवचनान्तेन मातुर्वियोज्यमान एकैको वत्सोऽभिधीयत इति नैतद्बुद्धिपूर्वकारिणा चिन्तितुं शक्यम्। § 1531

सामवेदे यदोग्नाईप्रभृतीनां प्रयुज्यते।
रूपं तत्रापि पौंस्नत्वे नाभिप्रायोऽस्ति कश्चन॥ § 1533

को नाम बुद्धिपूर्वकारी पुरुषोऽर्थाभिधानपराणामृगक्षराणां लोकव्याकरणादिष्वनवगत पूर्वमग्न इत्यस्य पदस्याकारमोकारेण प्लुतेन विकुर्यात्। § 1534

तथा वीतय इत्यस्मिन्नीकारस्यापि विक्रियाम्।
तशब्दस्य च तोशब्दं येशब्दस्यापि रूपताम्॥ § 1536

को मूढो बुद्धिपूर्वो वा नियमात्कल्पयिष्यति।
तेन वेदस्वतन्त्रत्वं रूपादेवावगम्यते॥ § 1538

किंचिदेव तु तद्वाक्यं सदृशं लौकिकेन यत्।
तत्रापि च्छान्दसी मुद्रा दृश्यते सूक्ष्मदर्शिभिः॥ § 1540

एवं च यदाध्येतारोऽध्यापयितारः पार्श्वस्था वा वेदपदवाक्यतदर्थरूपाण्यालोचयन्ति तदा स्वसंवेद्यमेवापौरुषेयत्वमध्यवस्यन्ति। § 1541

तावता तु बाह्यतार्किकाणां प्रतीतिभावना नोत्पद्यत इति तत्तत्प्रतिपादनक्षमवेदोत्थापितन्यायोपनिबन्धनान्मीमांसकैः केवलं यश एव पीतम्। § 1542

शाक्यादिग्रन्थेषु पुनर्यदपि किंचित्साधुशब्दाभिप्रायेणाविनष्टबुद्ध्या प्रयुक्तं तत्रापि प्रज्ञप्तिविज्ञप्तिपश्यतातिष्ठतादिप्रायप्रयोगात्किंचिदेवाविप्लुतं लभ्यते। § 1543

किमुत यानि प्रसिद्धापभ्रष्टदेशभाषाभ्योऽप्यपभ्रष्टतराणि भिक्खवे इत्येव- 239
मादीनि द्वितीयाबहुवचनस्थाने ह्येकारान्तं प्राकृतं पदं दृष्टं न प्रथमाबहुवचने संबोधनेऽपि। संस्कृतशब्दस्थाने च ककारद्वयसंयोगोऽनुस्वारलोपः, ऋवर्णाकारापत्तिमात्रमेव प्राकृतापभ्रंशेषु दृष्टं न डकारापत्तिरपि। सोऽयं संस्कृता धर्मा इत्यस्य सर्वकालं स्वयमेव प्रतिषिद्धोऽपि विनाशः कृत इत्यसाधुशब्दनिबन्धनत्वादित्यन्तेन हेतुना वेदत्वाकृतकशास्त्रान्तरशङ्कानिवृत्तिः। यावांश्चाकृतको विनष्टः शब्दराशिस्तस्य व्याकरणमेवैकमुपलक्षणं तदुपलक्षितरूपाणि च। § 1544

वेदे यथोपलभ्यन्ते नैवं शाक्यादिभाषिते।
प्रयोगनियमाभावादतोऽप्यस्य न शास्त्रता॥ § 1546

असन्नियमादिति च व्याकरणोक्तनियमाभावादित्यर्थः। § 1547

क्षणिकत्वनिराकृतनित्यत्वसिद्धानित्यत्वात्यन्ताविद्यमानग्रन्थनियमाभ्युपगमाभिप्रायेण वाऽसन्नियमादित्युक्तम्। § 1548

असतां वा क्षणभङ्गशून्यवादानात्मकत्वादीनामसद्धेतुभिर्वा प्रतिपादननियमात्तदेककर्तृकधर्मवचनानामप्यप्रामाण्यम्। § 1549

कर्तृस्मरणदार्ढ्याच्च नैषामकृतता मता।
तेनाकृतकगम्येऽर्थे स्वातन्त्र्यान्न प्रमाणता॥ § 1551

एवं समस्तवेदाङ्गधर्मशास्त्रेष्वपीदृशात्।

कर्तृस्मृतिदृढिम्नः स्यान्न स्वातन्त्र्येण शास्त्रता॥§ 1553

अनेन कल्पसूत्राणां प्रत्याख्याता स्वतन्त्रता।
कर्तृस्मृत्या दृढं ज्ञाता तेषामप्यसतां क्रिया॥§ 1555

येन न्यायेन वेदानां साधिताऽनादिता पुरा।
दृढकर्तृस्मृतेस्तस्य कल्पसूत्रेषु बाधनम्॥§ 1557

यथैव हि कल्पसूत्रग्रन्थानितराङ्गस्मृतिनिबन्धनानि चाध्येत्रध्यापयितारः स्मरन्ति तथाऽऽश्वलायनबौधायनापस्तम्बकात्यायप्रभृतीन् ग्रन्थकारत्वेन। § 1558

ततश्च प्रागवस्थायामसतामेव बन्धनात्।
कुतः प्रयोगशास्त्रत्वं वेदवद्वेदतैव वा॥§ 1560

न चैषां समाख्यामात्रबलादेव कर्तृत्वमुच्यते। येनाऽऽख्या प्रवचनादित्युत्तरमुच्यते पुरुषपरम्परयैव हि स्मृतेषु कर्तृषु समाख्याऽभ्युच्चयहेतुत्वेन ज्ञायते तथा च कठादिचरणैरनादिभिः प्रोच्यमानानामनादिवेद-
240 शाखानामनादिसमाख्यासंभवो नैवं नित्यावस्थितमाशकादिगोत्रचरणप्रवचननिमित्तसमाख्योपपत्तिः। माशकबौधायनापस्तम्बादिशब्दा ह्यादिमदेकद्रव्योपदेशिन इति न तेभ्यः प्रकृतिभूतेभ्योऽनादिग्रन्थविषयसमाख्याव्युत्पादनसंभवः। अतश्च माशकादिसमाख्याऽप्यविद्यमानग्रन्थनियमनादेव प्रवृत्तेत्यपि हेत्वर्थयोजना। वेदरूपनियमाविद्यमानत्वादिति वाऽत्र हेतुव्याख्या। **कामं तु वेदाङ्गानीत्यनध्यायनियमाभावादिति** वा योज्यम्। यत्तु भाष्यकारेण **स्वराभावादित्यनियमार्थं** व्याख्यानं कृतम्। § 1561

तन्मन्त्रेष्वप्यवेदत्वं कल्पाधीतेषु साधयेत्।
तथा गृह्योपदिष्टेषु च्छान्दोग्यब्राह्मणेषु च॥§ 1563

ब्राह्मणानि हि यान्यष्टौ सरहस्यान्यधीयते।
छन्दोगास्तेषु सर्वेषु न कश्चिन्नियतस्वरः॥§ 1565

तेन तेष्वप्यवेदत्वं स्वराभावात्प्रसज्यते।
तस्मादुक्तस्वसंवेद्यरूपाभावोऽत्रकारणम्॥§ 1567

स्वरोऽपि त्वस्ति रूपाशे नत्वसावेव केवलः॥ १२॥§ 1568

अतश्च वाक्यशेषोऽपि तस्मिन्नेवोपयुज्यते।
बहवो वाक्यशेषा हि येषां लोकेष्वसंभवः॥§ 1570

अबुद्धिपूर्वतासिद्धिस्तेन वेदस्य तैरपि।§ 1571

बृहस्पतिर्वै देवानामुदगायदिन्द्रो वृत्रमहनत्प्रजापतिर्वपामात्मन उदखिदत्। गावो वा एतत्सत्रमासत तासां दशसु मास्सु शृङ्गाण्यजायन्तेत्यादयः कथमिव बुद्धिपूर्वकारिणाऽर्थवादाः प्रणीयेरन्। § 1572

नित्यत्वे सति येषां हि क्लेशेन विधियोजना।
तान् कृत्वाऽध्यापयन् कर्ता सुसमत्वं व्यजेज्जडैः॥§ 1574

न च तादृशवाक्यशेषमुद्राऽपि कल्पसूत्रादिग्रन्थेषु काचिदस्ति यद्बलेनाकृतकत्वमेषामवसीयेत। § 1575

विधिशून्यतया चैषां विहिताऽऽख्यातरूपता।
गम्यते न त्वपूर्वार्थप्रतिपादनशक्तता॥§ 1577

वर्तमानापदेशोऽपि त्वर्थवादप्ररोचितः। 241
विधित्वं लभतेऽन्यत्र कल्पसूत्रेषु नास्ति सः॥§ 1579

पञ्चमेन लकारेण विधिर्यश्छन्दसि स्मृतः।
मन्त्रब्राह्मणभिन्नत्वात्सोऽप्येतेषु न युज्यते॥§ 1581

यद्यपि षडङ्गमेक इत्यनेन कल्पसूत्राणां वेदत्वं भवेत्। § 1582

तथाऽपि तर्कवत्तेषां छन्दस्त्वं नोपपद्यते।
मन्त्रब्राह्मणयोरेव च्छान्दसा विधयः स्थिताः॥§ 1584

**यथैव 'विधिर्विधेयस्तर्कश्च वेद'** इत्येतस्मिन्दर्शने सति समस्तवैदिकतर्कोपसंहारात्मिका मीमांसाऽपि वेदशब्दवाच्या भवति नत्वमन्त्रब्राह्मणरूपत्वाच्छन्दोनिबन्धनानि कार्याणि लभते तथा कल्पसूत्राण्यपीति विधिपर्यायप्रयोगशास्त्रत्वाभावः। § 1585

इतिहासपुराणाभ्यां सा त्वनैकान्तिकी स्मृता।
या त्वेषां ब्रह्मयज्ञेऽपि विधानान्नित्यतोदिता॥§ 1587

इतिहासपुराणानि कल्पानिति हि सा श्रुतिः।
तस्मात्कृत्रिममप्यत्र विद्यास्थानं ग्रहीष्यते॥§ 1589

वेदार्थोपसंहारस्य कल्पसूत्रानपेक्षैः कर्तुमशक्यत्वादवश्यं च यावद्वेदं यावत्कर्मप्रयोगं च क्रियमाणैरपि विद्यास्थानाशून्यतार्थं कैरपि कल्पसूत्रैर्भवितव्यम्। § 1590

---

१८ थेव ] विधिः—ब्राह्मणम्। दर्शनार्थः।
विधेयो—मन्त्रः। तर्को—मीमांसेति

वेदार्थकल्पनात्कल्पो नित्ययैवाऽऽख्ययोच्यते।
जपे च नित्यकर्तव्ये नित्यमेव विधीयते॥[§ 1592]

कर्माभ्यासाभिसंधानं विध्यर्थश्चात्र गम्यते।
स चार्थो नित्य एवेति नाऽऽपतेद्ग्रन्थनित्यता॥[§ 1594]

यः पुनर्वेदसंवादः स तत्पूर्वतयेष्यते।
तदर्थानुगमाच्चैषां न स्वतन्त्रप्रमाणता॥[§ 1596]

वेदशब्दाभिधेयत्वं नैषामध्येतृषु स्थितम्।
षडङ्गमेक इत्येतन्न च सिद्धान्तभाषितम्॥[§ 1598]

संवादत्वानुवादत्वमेकस्यैकान्तनिश्चितम्।
ऐकान्तिकविधित्वाच्च ब्राह्मणे तन्न युज्यते॥[§ 1600]

कल्पादावनुवादत्वमापन्नं परिशेषतः।
न च शाखान्तरन्यायस्तुल्याध्येतृकतावशात्॥[§ 1602]

242 सर्वशाखाविधित्वं हि सिद्धमध्येतृभेदतः।
प्रतिशाखं तु ये कल्पास्तदर्थप्रतिपादकाः॥[§ 1604]

समानाध्येतृकत्वात्ते न कदाचिद्विधिक्षमाः।
विवृण्वन्तश्च दृश्यन्ते हेतुभिर्ब्राह्मणोत्थितैः॥[§ 1606]

कल्पकारास्ततोऽप्येषां नैव ब्राह्मणतुल्यता।
अन्यार्थैर्ब्राह्मणैश्चान्याञ्ज्ञापयन्त्यर्थनिर्णयान्॥[§ 1608]

तस्मादपि स्वतन्त्रत्वं कल्पानां नोपपद्यते।
अर्थैकत्वेन केषांचिदक्षराणां च साम्यतः॥[§ 1610]

सादृश्याद्ब्राह्मणभ्रान्तिर्जातैवमपनीयते।
आचार्यवचसां यच्च प्रमाणत्वं श्रुतौ श्रुतम्॥[§ 1612]

श्रुतिसामान्यमात्रत्वात्तस्याप्यन्यार्थतोदिता।
व्याचक्षाणस्य वेदार्थान्वेदांश्च वदतः स्वयम्॥[§ 1614]

शिष्यान्प्रत्याप्तभावात्स्यादाचार्योक्तिप्रमाणता।[§ 1615]

आचार्यशब्दस्यार्थो मन्वादिभिरेवं व्याख्यातः। § 1616

उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः।
साङ्गं च सरहस्यं च तमाचार्यं प्रचक्षते॥ इति।§ 1618

वेदसंप्रदानकाले च शिष्यास्तद्वचःसु कथं नाम श्रद्दधीरन्नित्येवमर्थमाचार्यवचनं प्रमाणमित्युक्तं न कल्पसूत्रकारवचनविषयम्। § 1619

न च पुंवचनं सर्वं सत्यत्वेनागम्यते।
वागिह श्रूयते यस्मात्प्रायादनृतवादिनी॥§ 1621

तथाऽन्यत्राप्युक्तम्। 'तस्माद्द्वयं वाचा वदति सत्यं चानृतं च पाप्मना ह्येषा विद्धेति'॥ १३॥ § 1622

वेदादेवानृतत्वं च तद्वाचामवगम्यते।
विसंवादो हि भूयिष्ठस्तन्न्यायेन च दृश्यते॥§ 1624

सर्वत्र च प्रयुक्तत्वादित्यनेन निदर्श्यते। 243
संनिधानाच्च शास्त्रस्य विसंवादः स्फुटः स्फुटः॥§ 1626

तत्र यद्वृत्तिकारेणोदाहरणं पार्वणस्थालीपाकविषयगृह्यकारवचनश्रवणाद्दर्शपूर्णमासचरककल्पसूत्रकारवचनाध्यारोपेण दत्तं तदत्यन्ताध्यारोपाभिभवाभिप्रायप्रयुक्तमित्यनादृतम्। गृह्यकारवचनं ह्येतदक्षतहोमे तावदासायमाहुतेः प्रातराहुतिर्नात्येति। आप्रातराहुतेः सायमाहुतिरित्यतश्च यथैवेतदग्निहोत्रविषयत्वेन न कल्प्यते तथैवैतदपि **आपौर्णमास्या अमावास्या नात्येति। आऽमावास्यायाः पौर्णमासी**त्येतदपि दर्शपूर्णमासविषयं न कल्पनीयमिति। तस्मादन्यदुदाहार्यम्॥ १४॥ § 1627

इति कल्पसूत्राधिकरणम्॥ ६॥

## ०.०.११ होलाकाधिकरणम्

देशधर्मानुदाहृत्य संप्रत्येतद्विचार्यते॥§ 1629

किं व्यवस्थितमूलास्ते किं वैषां सर्वधर्मता।
विध्यर्थप्रतिषेधार्थाः क्रियावर्जनचिह्निताः॥§ 1631

इह सर्व उदाहार्या विचार्याश्च विभागशः।

प्राच्या याननुतिष्ठन्ति वर्जयन्ति च साधवः॥ § 1633

तेषामेवोपदिष्टास्ते सर्वेषां वेति चिन्त्यते।
एवं ये दाक्षिणात्यानां प्रतीच्यानां च केचन॥ § 1635

उदीच्यानां तथाऽऽचारा विचार्याः सर्व एव ते।
आद्यं सूत्रद्वयं यावदिदमप्यत्र चिन्त्यताम्॥ § 1637

गृह्यगौतम सूत्रादिव्यवस्थासर्वगामिते॥ § 1638

पुराणमानवेतिहासव्यतिरिक्तगौतमवसिष्ठशङ्खलिखितहारीतापस्तम्बबौधाय-
244 नादिप्रणीतधर्मशास्त्राणां गृह्यग्रन्थानां च प्रातिशाख्यलक्षणवत्प्रतिचरणं पाठ-
व्यवस्थोपलभ्यते। तद्यथा गौतमीयगोभिलीये छन्दोगैरेव च परिगृहीते।
वासिष्ठं बह्वृचैरेव शङ्खलिखितोक्तं च वाजसनेयिभिः। आपस्तम्बीयबौधाय-
नीये तैत्तिरीयैरेव प्रतिपन्ने इत्येवं तत्र तत्र गृह्यव्यवस्थाभ्युपगमादि दर्शयित्वा
विचारयितव्यम्। किं तानि तेषामेव प्रमाणान्युत सर्वाणि सर्वेषामिति। § 1639

किं तावत्प्रतिपत्तव्यं व्यवस्थैवेति पाठतः।
न ह्यन्यत्र स्थिताल्लिङ्गाल्लिङ्ग्यन्यत्रानुमीयते॥ § 1641

अनुमीयतेऽनेनेत्यनुमानं लिङ्गमेवोच्यते। § 1642

तच्च व्यवस्थितं दृष्टवा लिङ्गी तत्रैव गम्यताम्।
विधिर्वा प्रतिषेधो वा न हि सोऽन्यत्र लिङ्ग्यते॥ § 1644

तत्र ग्रन्थात्मकादाचारात्मकाद्वा लिङ्गल्लिङ्गिनौ विधिप्रतिषेधावनुमीयमानौ तद्विषयावेवानुमातुं शक्येते नान्यगतौ। कुतः— § 1645

अन्यवेश्मस्थिताद्धूमान्न वेश्मान्तरमग्निमत्।
प्रमीयते न चादृष्टधूमैरिति हि निश्चितम्॥ § 1647

यथोपनयनं येषामाधानं च विधीयते।
तेषामेवाग्निहोत्रादिविधिरप्यवगम्यते॥ § 1649

यथा च जातितद्भेदकुलधर्मा व्यवस्थिताः।
तथैव देशधर्मादिव्यवस्थाऽपि भविष्यति॥ § 1651

यदि स्यात्सर्वगामित्वं विधानप्रतिषेधयोः।
आचारोऽपि तथैव स्याद्व्यवस्थाहेत्वसंभवात्॥ § 1653

सर्वविषयशास्त्रप्रणीतो ह्याचारः सर्वदेशगतशक्तिमत्पुरुषैरग्निहोत्रवदेवानुष्ठीयेत। § 1654

यस्तु तं विनियोगेन कुरुते तद्व्यवस्थितम्।
तेन नूनं श्रुतिः काऽपि तेषामेवं विधायिका॥ § 1656

अन्यथानुपपत्त्या च श्रुतिरत्र प्रतीयते।
तन्मात्रानुपपत्त्या च सा तत्रैवावधार्यते॥ § 1658

यस्मादयं देशाचारोऽयं वा गृह्यादिग्रन्थोऽन्यथा नोपपद्यते यदि श्रुतिमूलकत्वं नास्तीत्यनयोपपत्त्या मूलकल्पना तस्माद्व्यवस्थितविषयैव साऽध्यवसातव्या। तथा चोक्तम्। यदि च हेतुरवतिष्ठेत निर्देशादिति। § 1659

यद्यन्नकरणं हेतुः शूर्पहोमे विधीयते। 245
**तन्मात्रगतमेवासौ दृष्टान्तमपि कल्पयेत्** ॥ § 1661

यदन्नकरणं शूर्पं तेन तेनैव हूयते।
ततश्चातिप्रसङ्गः स्यान्न दर्विपिठरादिषु॥ § 1663

एंव व्यवस्थितान् दृष्टवा देशाचारान् समंततः।
तन्मात्रविषया युक्ता तन्मूलश्रुतिकल्पना॥ § 1665

**अनुमानव्यस्थानाद्देशादिनियमादतः।**
**तत्संयुक्तं प्रमाणं स्याद्यद्वाक्यमनुमीयते॥** १५ ॥ § 1667

**अपि वा सर्वधर्मः स्यादित्यत्रोत्तरमुच्यते।**
**तन्न्यायत्वाद्विधानस्य** शक्तमात्राधिकारिणः॥ § 1669

इह स्मृतीराचारांश्चोपलभ्य मूलश्रुतिष्वनुमीयमानासु कारणानुविधायिकार्यन्यायेनावश्यमुपलभ्यमानकार्यानुरूपकारणानुमानैर्भवितव्यमिति भावनानाम**विशेष**व्यवच्छिन्नयागदानहोमोपवासादिधात्वर्थविशेषस्वर्गादिफलकारकेतिकर्तव्यताक्धियस्तावदनुमातव्याः। एवं वर्जनीयेष्वपि देहेन्द्रियमनोद्वारव्यवहारेषु प्रतिषेध्यक्रियाकारकं नरकाद्यनिष्टफलप्रतिषेधकशब्दानुमानमवश्यंभावि तावता च योग्यत्वमात्र विषयत्वान्न दिग्देशपरिच्छिन्नकर्तृविशेषाधिकारनियतप्रतिपत्तिलाभः। कुतः— § 1670

त्रिधैव ज्ञायते कर्ता विशेषेण प्रतिक्रियम्।
योग्यत्वाप्रतिषिद्धत्वविशेषोपपदान्वयैः॥ § 1672

तदिह विहितानुष्ठानयोग्यता तावत्समस्तार्यावर्तनिवासिवर्णाश्रमाणामन्धबधिरजडमूकादिवर्जमविशिष्टा। वर्जनीययोग्यत्वमपि यथोपलभ्यमानं

द्वित्रिचतुर्वर्णाश्रममात्रसंबद्धं वा तदभ्यधिकदर्शनानुमितसमस्तम्लेच्छादिविषयं वा विज्ञायते। § 1673

न ह्यत्रोपपदं किंचिद्यथाचारानुसारि यत्।
अनुमीयेत देशस्थदृष्टकर्तृविशेषणम्॥ § 1675

येऽपि च प्रतिषिध्येरन्देशान्तरनिवासिनः।
तद्वाच्यपि पदं किंचिदनुमातुं न शक्यते॥ § 1677

योग्यत्वेनाविशेषप्रवृत्तोऽप्यधिकारः केनचित्कर्तृविशेषणपदेन राजा राज-
246 सूयेन वैश्यो वैश्यस्तोमेनेत्यादिवद्विशेष्येत न चात्र दृश्यमानाचरितृवाचि किंचिदेकमनेकं संभावयितुं शक्यम्॥ कुतः— § 1678

सर्वं नामपदं तावद्व्यक्त्याकृतिनिबन्धनम्।
यद्यदेवानुमीयेत नैकार्थमपि तद्भवेत्॥ § 1680

न तावत्प्राच्यत्वदाक्षिणात्यत्वादिजातिः प्रतीच्योदीच्यादिव्यक्तिव्यावृत्ता सर्वप्राच्यादिव्यक्तिष्वनुगता काचिदुपपद्यते। यद्वचनमुपपदं होलाकाद्यधिकारं विशिंष्यात्। यास्तु मनुष्यत्वब्राह्मणत्वादिजातयस्तेषु विद्यन्ते ताः सर्वदेशवासिव्यक्तिष्वविशिष्टा इति नाऽऽचारानुरूपविशेषणसमर्थत्वेन ज्ञायन्ते। § 1681

व्यक्तिवाचि तु यन्नाम तदेकत्रैव वर्तते।
देवदत्तादिवत्तेन न सिध्येत् कर्त्रनेकता॥ § 1683

न ह्यनन्तभेदानां प्राच्यादिपुरुषव्यक्तीनां व्यस्तसमस्तानां संबन्धानुभवासंभवादेकमभिधानमवकल्पते। एतेन गुणक्रियाजातिविशिष्टपुरुषव्यक्तिवचनत्वं प्रत्युक्तम्। न हि काश्चिदपि गुणक्रियाजातिव्यक्तयः प्रतिदेशव्यवस्थितपुरुषव्यक्त्युपलक्षणयोग्याः संभाव्यन्ते। सर्वत्र तत्रापि व्यावृत्त्यविशेषात्। § 1684

व्यक्त्याकृतिविनिर्मुक्तः पदार्थो न च विद्यते।
यमाश्रित्य प्रवृत्तं स्यादधिकारिविशेषणम्॥ § 1686

एतदेव प्रतिपादयन् भाष्यकार आह। शक्तमात्रपुरुषाधिकारप्रवृत्तविधानविशेषणं येनोपपदेनानुमीयमानेन क्रियते **न तस्याऽऽकृतिवचनता न्याय्या न व्यक्तिवचनतेति**। न ह्येते होलाद्याचाराः कांचिदाकृतिमनुविधीयन्ते न व्यक्तिं न हि यावत्सु पुरुषेष्वेतेऽवस्थितास्तावतामेकेनापि व्यपदेशेनोपसंग्रहः संभवति। केषांचित्तस्याऽऽकृतिवचनता न्याय्या न व्यक्तिवचनतेति ग्रन्थस्तेषामभिप्रायः यथैव 'जातिं तु बादरायणोऽविशेषात्'

३१ थेव] जै॰ सू॰ ६। १। ८।

इति सूत्रकारः स्वर्गकामपदं यौगिकमप्युद्दिश्यमानपुंस्त्वविशेषणासंभवात्फलार्थिमात्रमनुष्यजातिविषयोपपत्तेश्च सामर्थ्याक्षिप्तजातिमात्राधिकारं वक्ष्यति § 1687

तथेहापि फलार्थित्वकर्तृशक्त्यावबोधनात्। 247
देशधर्मेषु सर्वेषु नरजातेरधिक्रिया॥ § 1689

कश्चित्पुनराख्यातशब्दार्थमुपवर्णयन्निमं ग्रन्थपाठं दूषयित्वा पूर्वमेव समर्थयमानः सूत्रगतयावच्छ्रुतविधानशब्दजनितभ्रान्तिर्विधिभावनयोश्च भेदमपश्यन्नुभयस्वरूपनिरूपणपर्यनुयोगत्रासाद्भावार्थाधिकरणसिद्धान्तं विनाशयन्नेवमाह भाव इति वाऽनाख्येयः स्वधर्मेणान्यदतः शब्दज्ञानात्कारकवदिति। § 1690

तेन यः कश्चिदाख्यातप्रत्ययार्थतत्त्वं जिज्ञासमानः पृच्छति कः पुनरयं भावो भावना चेति तं प्रत्यनन्यशब्दाख्येयत्वात् केवलप्रत्ययप्रयोगदर्शनाभावाच्च सर्वधात्वर्थसामान्यवचनकरोतिपरलिङाद्युच्चारणमात्रेणैवोत्तरं दास्यते कुर्याच्छब्द इत्यर्थः, सर्वश्चाऽऽख्यायमानोऽर्थ आकृतिरूपेण वाऽऽख्यायेत व्यक्त्याकृतिगोचरातिक्रान्तिश्च किलाऽऽख्यातशब्देनोपायरहितत्वादनाख्येयोऽस्यार्थ इति। तदेव किलानेनापि ग्रन्थेनोक्तं भाष्यकारेण। **न तस्याऽऽकृतिवचनता न्याय्या न व्यक्तिवचनतेति**। विधानशब्दो हि सूत्रे पूर्वं प्रकृतस्तमेव तच्छब्देन निर्दिश्य व्यक्त्याकृतिवचनत्वादपनयति। § 1691

कुर्यादित्युच्यमानो हि करोमीति प्रपद्यते।
न विधेर्भावना या वा सामान्यव्यक्तिरूपताम्॥ § 1693

तदिदमसंबद्धमेवानुपपत्तिकं च श्रुतिसामान्यमात्रेणान्यार्थमेव सच्चतुःशृङ्गादिमन्त्रवद्भाष्यकाराभिप्रेतार्थत्यागेन स्वप्रज्ञाविलसितं प्रकाशयताऽन्यस्मिन्नेवार्थे योजितम्। § 1694

देशाचारसर्वधर्मोपपत्तिविचारणार्थोऽयं ग्रन्थः स यदि पूर्वकृतया व्याख्ययोपपदनिराकरणविषयत्वेन वर्ण्यते तत एतत्सूत्रव्याख्यानेन संबध्यते यथोक्तन्याय मार्गेण। यदि तु तत्परित्यागेनाऽऽख्यातप्रत्ययार्थानामनाख्येयत्वापत्तिमेव व्यक्त्याकृतिरहितार्थत्वेन वर्णयेत्ततोऽत्यन्तासंबन्धानुपयुज्यमाननिरुपपत्तिकार्थत्वेन हेय एव स्यात्। § 1695

तथा हि— § 1696

यस्मादाख्यातशब्दस्य न व्यक्त्याकृतिवाचिता।
तस्मात्तद्विहितं कर्म सर्वार्थमिति विस्मयः॥ § 1698

यदि नाम लिङ्गादिप्रत्ययो भावनाया विधेर्वा व्यक्तिमाकृतिं वा वदेत्ततो होलाकादयः प्रतिनियतदेशधर्माणो भवेयुर्यतस्तु व्यक्त्याकृतिविनिर्मुक्तोऽव्य-

पदेश्योऽर्थस्तस्मात्तद्विहितधात्वर्थविषयः सर्वपुरुषधर्म इत्येवं नीयमानमसंबद्धोदाहरणे ज्येष्ठमेव स्यात्। § 1699

अनाख्येयत्वमुक्त्वा च पर्यायैः स्वविकल्पितैः।
अन्वाख्यानं कृतं तच्च पूर्वोक्तेन विरुध्यते॥§ 1701

248 विध्युपदेशकर्तव्यताभावनाशब्दानां ह्यत्यन्ताभूतमेव बहुभाषित्वप्रख्यापनापरपर्यायत्वमध्यारोप्याऽऽचक्षाणेन स्वयमनाख्येयत्वमतीव स्थापितम्। यद्यपि तावदाख्यातप्रत्ययः कर्तृशक्तितदाधारद्रव्यमात्रं वा वदेत्तथाऽपि ब्राह्मणो यजमान इति वदुपपदाधीनविशेषावस्थानत्वात्तदधीनजात्यादिवृत्तित्वमनुरुध्यमानो न स्वगतव्यक्त्याकृतिवचनत्वविचाराधीनाधिकारित्वनिर्णयः स्यात्किमुत यदा कर्त्रभिधाननिरपेक्षविधिर्भावनादिमात्रवाचित्वमेवावस्थास्यते। यदि चैतावन्मात्रमेव सर्वधर्मत्वकारणं भवेत्ततो राजसूयाश्वमेधवैश्यस्तोमादीनामप्येवमात्मकाख्यातप्रत्ययविधेयत्वाविशेषात्सर्वधर्मत्वप्रसङ्गः। अथ तेषामनिर्देश्यार्थप्रत्ययविहितानामपि राजाद्युपपदवशादसर्वधर्मत्वम्। एवं तत्राप्यसर्वधर्मत्ववादिना तदेवोपन्यसनीयम्। सर्वधर्मत्ववादिना च निराकर्तव्यम्। तच्चाऽऽचारानुरूपव्यक्त्याकृतिवचनत्वासंभवात्सामर्थ्यलभ्भमनुष्याकृतिमात्राधिकारप्रतिपत्तेर्वा निराकृतमेव। तद्यथा चोत्तरसूत्राणि लिङ्गाभावाच्च नित्यस्याऽऽख्या हि देशसंयोगादित्येवमादीन्युपपदोपन्यासप्रत्याख्यानार्थानि संगंस्यन्ते। तस्मात्सर्वाधिकारन्यायत्वाद्विधानस्य व्यवस्थितदेशाचारगृह्यधर्मसूत्रनिबद्धधर्माणामपि सर्वधर्मत्वम्॥ १६॥ § 1702

यस्तु जातिकुलगोत्रधर्मवद्व्यवस्थितविध्यनुमानमिति। § 1703

तत्रैकशब्दवाच्यानां जात्यादीनां व्यवस्थया।
दर्शनाद्विनियोगः स्यात्पञ्चावत्तादिधर्मवत्॥§ 1705

यथैव पञ्चावत्तं तु भृगूणां वसिष्ठशुनकात्रिवध्र्यश्वकाण्वसंकृतिराजन्यानां नाराशंसो द्वितीयः प्रयाजस्तनूनपादन्येषामित्यन्वयतो व्यतिरेकतश्चोपलक्षणसंभवाद्व्यवस्थितविध्यवसानं तथैव प्रतिजातिगोत्रनियतत्रिशिखैकशिखादिकल्पव्यवस्थितविधिविशेषानुमानोपपत्तिरस्तीति दृष्टान्तदार्ष्टान्तिकवैषम्यम्॥ १७॥ § 1706

व्यक्त्याकृत्यभिधेयेऽर्थे प्रत्याख्याते विशेषणे।
लोहिताक्षादिचिह्नानामधुनाऽन्या निराक्रिया॥§ 1708

249 जातिव्यक्तिवाच्युपपदा भावेऽपि कर्तृगतसंस्थानवर्णादिगुणविशेषोपलक्षणेन कृष्णकेशाधानवदधिकारनियमः सेत्स्यतीत्याशङ्क्य निराक्रियते— § 1709

**लिङ्गाभावाच्च नित्यस्य** नास्ति कर्तुर्विशेषणम्।

१६ लिङ्गाभावाच्च] जै॰ सू॰ १। ३। १९।

नियतेन हि लिङ्गेन नित्यः कर्तोपलक्ष्यते॥§ 1711

यच्चिह्नं दाक्षिणात्यानां लोहिताक्षादि कल्प्यते।
अन्येषामपि तद्दृष्टं तदनाचरतामपि॥§ 1713

दृष्टमाचरणं चैतत्तच्चिह्नरहितेष्वपि।
तस्माद्व्यवस्थितैश्चिह्नैर्नाधिकारो विशेष्यते॥§ 1715

यस्तु लिङ्गविशेषणं नित्यशब्दं मन्यते तस्योपसर्जनीभूतलिङ्गसापेक्षत्वादसमर्थसमासप्रसङ्गः। ननु लिङ्गशब्दस्य नित्यसापेक्षत्वात्स्वार्थाक्षिप्तसंबन्ध्यन्तरत्वेन सामर्थ्यविघाताभावाद्भवितव्यमेवेह समासेन देवदत्तस्य गुरुकुलमिति यथा। § 1716

नैतत्तुल्यमनेनेष्टमपेक्षान्तरसंगतेः।
नित्यं नापेक्षते लिङ्गं देवदत्तं यथा गुरुः॥§ 1718

गुरुशब्दस्य हि शिष्यापेक्ष एवाऽऽत्मलाभ इति देवदत्तशब्दोपात्तशिष्यसंबन्धानतिरेकान्तर्णीतस्वार्थत्वान्नाभ्यधिकापेक्षाकृतसामर्थ्यप्रतिबन्धप्रसङ्गः। § 1719

इह लिङ्गस्य लिङ्गत्वं गम्यते लिङ्ग्यपेक्षया।
न च लिङ्ग्यभिधाय्येतन्नित्यस्येति पदं मतम्॥§ 1721

यद्यपि चैष गम्यगमकसंबन्धे सति लिङ्गशब्दः प्रवर्तते तथाऽपि गुरुशिष्यपितापुत्रादिसंबन्धवन्नास्य तदपेक्षप्रवृत्तिनिमित्तसंबन्धिशब्दत्वप्रसिद्धिः। § 1722

लिङ्गी यौगिकशब्दत्वात्सदा लिङ्गमपेक्षते।
लिङ्गशब्दस्तु धात्वर्थं मुक्त्वा नान्यदपेक्षते॥§ 1724

लिङ्ग्यतेऽनेनेति हि क्रियायोगनिमित्तो यद्यपि लिङ्गशब्द इति न संबन्धिशब्दत्वेनोच्यते तथाऽपि तु क्रियामतकारकान्तरापेक्षां न मुञ्चतीति कामं ‘लिङ्गिनो लिङ्गदर्शनम्’ इत्यादौ भवेदप्यसामर्थ्यपरिहारः। नित्यत्वं पुनर्लब्धस्वार्थलिङ्गापेक्षितं तद्धर्मतया षष्ठयोपनीयत इति तत्संबन्धापेक्षायामपरिहार्योऽसामर्थ्यप्रसङ्गः। तस्मान्नित्यस्येति नियतचिह्नोपलक्ष्यकर्तृविशेषणमेवाधिकारविशेषणं वा नियतस्य कर्तुर्नित्यस्याधिकारस्य वा न प्रतिपादकं किंचिच्चिह्नमस्तीति न तदभिधाय्युपपदविशेषितव्यवस्थितहोलाकादिविधानोपपत्तिः॥ १८॥ § 1725

इदानीं तु यदाचारमत्यन्तमनुवर्तते। 250
तत्प्राच्यादिसमाख्याख्यमुपन्यस्तं विशेषणम्॥§ 1727

सर्वे हि देशाचाराः प्राच्यदाक्षिणात्यादिसमाख्यातैः पुरुषैः क्रियन्ते समाख्यावर्जितेषु च नोपलभ्यन्ते। तस्मात्समाख्याविशिष्टविध्यनुमानात्तत्संयुक्तप्रमाणपक्ष एव ज्यायानिति। तत्र समाधिः। § 1728

आख्या हि देशसंयोगाद्यस्मात्कर्तृषु वर्त्तते।
आचाराणामतः प्राप्तो विधिर्देशविशेषणः॥ § 1730

देशश्च दिग्विशिष्टः स्याद्दिग्रूपं चानवस्थितम्।
न च तद्देशसंबन्धादनाचारोऽनुवर्तते॥ § 1732

निर्गतेष्वपि दृष्टत्वात्तद्गतेष्वप्यदर्शनात्। § 1733

समाख्यायास्तावन्न देशादन्यन्निमित्तमस्ति तद्विशिष्टविधिविहिताश्चाऽऽचाराः केवलमेव तद्देशसंबन्धमनुवर्तेरन्। उभयथाऽपि तु व्यभिचारान्न देशनिमित्तसमाख्याविशिष्टविधानकल्पना घटते॥ १९॥ § 1734

अपरस्त्वनयैवोपपत्त्या लब्धात्मीयपक्षोपपत्तिः प्रत्यवतिष्ठमान आह—'**न स्याद्देशान्तरेष्विति चेत्**' इति। § 1735

यदि देशनिमित्तत्वात्समाख्या दूषिता त्वया।
शक्यमन्यनिमित्तत्वं वक्तुमम्या मया पुनः॥ § 1737

सति देशनिमित्तत्वे न म्याद्देशान्तरेष्वियम्।
251 तस्मात्किमपि जात्यादि ध्रुवमस्या निबन्धनम्॥ § 1739

अस्तु वा निर्निमित्तैव विशेक्ष्यति तथाऽपि तु।
लब्धाचारनिमित्तानां किं निमित्तान्तरेण नः॥ § 1741

तस्मादनिमित्तया समाख्ययैवाधिकारविशेषसिद्धेर्न व्यभिचारिदेशनिमित्तत्वमस्याः कल्पयितव्यमित्युक्तेऽभिधीयते॥ २०॥ § 1742

संबन्धैर्बहुभिर्देशसमाख्या हि प्रवर्तते।
निवासभवजातत्वतदागमनहेतुभिः॥ § 1744

'सोऽस्य निवासः' तत्र भवस्तत्र जातस्तत आगत इत्येवमादिनिमित्तपरित्यागेन न कदाचित्प्राच्यादिसमाख्या वर्तते। न चैषा देशसंयोगं व्यभिचरति। न चैनामाचारोऽनुवर्तते तन्निवासिनामपि केषांचिदनाचरणाच्चिरनिर्गतपुत्रपौत्रादीनां च देशान्तरेष्वप्याचरणादिति न समाख्यया नियतविधिसिद्धिः। यत्तु मथुरामभिप्रस्थितो माथुर इति भाष्यकारेणोक्तं 'तत्तद्गच्छति पथि

३ सोऽस्य] पा॰ सू॰ ( ४—३—८९ )।
३ त्र] पा॰ सू॰ ( ४—३—५३ )।
३ त्र] पा॰ सू॰ (४—३–२५ )।
३ त] पा॰ सू॰ ( ४—३—७४ )।
७ कारेणोक्तं] पा॰ सू॰ ४—३—५।

दूतयोरिति वा दूतविषयं कल्पयितव्यमप्रत्ययितोक्तत्वाद्वोपेक्षितव्यम्। सर्वस्मिन्नपि प्रस्थिते तद्धितस्मरणाभावात्॥ २१॥ § 1745

इदानीं कर्तृविशेषणविशिष्टविध्यनुमानात्प्रतिहतः कर्माङ्गभूतप्राग्देशादिविध्यनुमानसंभवं मन्यमान आह—**'कर्मधर्मो वा प्रवणवत्'** इति। § 1746

प्रागुदक्प्रवणो यद्वत्प्राचीनप्रवणोऽपि वा।
देशो भवति कर्माङ्गं प्राग्देशादिस्तथा भवेत्॥ इति॥
२२॥§ 1748

**'तुल्यं तु कर्तृधर्मेण'** तच्चिह्नमनवस्थितम्। 252
दिक्कृष्णमृत्तिकाप्रायप्रभृतिव्यभिचारतः॥§ 1750

प्राग्देशो यो हि केषांचित्सोऽन्येषां दक्षिणापथः।
तथोदक्प्रत्यगित्येवं नैकरूप्येण गम्यते॥§ 1752

मृत्तिकाद्यपि यच्चिह्नं तत्रान्यत्र च तत्समम्।
होलाकादिविधिस्तस्मान्न तेनापि विशेष्यते॥§ 1754

पुरुषापेक्षयाऽऽचारस्तस्मिन्नपि न दृश्यते।
अन्यस्मिन्नपि दृष्टश्च तस्माद्देशोऽप्यकारणम्॥ इति॥
२३॥§ 1756

इति होलाकाधिकरणम्॥ ७॥

## ०.०.१२ व्याकरणाधिकरणम्

एकस्मात्पदात्प्रयोगनानात्वदर्शनादनेकार्थप्रतिभाने सति विकल्पदोषभयादनेकादृष्टशक्तिकल्पनाप्रसङ्गाच्च गौणमुख्यविभागमाश्रित्य व्यवस्थितशास्त्रप्रयोगबलेनाव्यवस्थिते लौकिकप्रयोगबाधाद्व्यवहारादिशब्दानामर्थनिर्णयः प्रतिपादितः। एवं पुनरेकस्मिन् गवादावर्थे गोगाव्यादयो बहवः शब्दाः प्रयुज्यन्ते तत्र वृद्धव्यवहारावगतप्रतिशब्दसमवायिवाचकशक्तिभेदोपपत्तेः शास्त्रस्थसर्वशब्दप्रयोगाणां च लौकिकशब्दैरविरोधात्पदपूर्वकत्वाच्च वाक्यात्मकशास्त्रव्यापारसिद्धेर्न पदगतसाध्वसाधुत्वप्रतिपादने व्यापारो भवति, इतरेतराश्रयत्वप्रसङ्गात्। तथा हि— § 1758

लोकप्रसिद्धशब्दार्थवशं शास्त्रं प्रवर्तते।

अतो न लौकिकेष्वस्मात्साध्वसाधुत्वनिर्णयः॥§ 1760

वाक्यार्थेषु हि श्रुतिस्मृत्याचारविरोधदर्शनाद्बलाबलमानुपूर्व्येणावधृतमिह तु न विपरीतक्रमत्वात्। § 1761

253 लोकादेवाधिगन्तव्या शब्दानां साध्वसाधुता।
वाचकावाचकत्वेन सा च नित्यं व्यवस्थिता॥§ 1763

ध्वनिमात्राण्यसाधूनि वर्णा वा केवलात्मनाम्।
संघातोऽर्थानपेक्षो वा मातृकाद्युपदेशवत्॥§ 1765

तेन भेरीशङ्खादिशब्दा गकारककारादयः प्रत्येकं तद्वर्गा वाऽनर्थकत्वादपशब्दा इति लोकव्यवहारादेवार्थं न साधयन्तीत्यसाधवो गम्यन्ते। गाव्यादयः पुनर्गवादिवदेव साधयन्त्यर्थं तेभ्योऽपि वा शीघ्रतरं प्रसिद्धतरत्वादर्थप्रतीतिमुत्पादयन्तीति सत्यप्येकविषयानेकशब्दत्वे हस्तकरपाण्यादिशब्दवदर्थसाधनत्वात्साधुत्वेनावधार्यन्ते। § 1766

ततश्चावाचकत्वेन यद्यसाधुत्वमुच्यते।
तस्य लोकविरुद्धत्वान्न ग्राह्यत्वं प्रतीयते॥§ 1768

अदृष्टविषया चेत्स्यादेतेषां साध्वसाधुता।
वेदवाक्यैरनिर्दिष्टा न साऽस्त्यन्यप्रमाणिका॥§ 1770

प्रत्यक्षेण तावदुभयत्राप्यविशेषेण वर्णाः शुद्धाः प्रतीयन्ते। न तद्गते तत्समुदायगते वा साधुत्वासाधुत्वे। न वाऽननुभूतसंबन्धादनुमीयेते। तन्निराकरणाच्च तत्पूर्वकपुरुषवचननिराक्रियाऽपि सिद्धा। वेदवचनं पुनर्वस्तुस्वरूपतद्गतगुणदोषान्वाख्यानपरं विधिप्रतिषेधानपेक्षं नैव किंचित्प्रमाणत्वेन संभवति। साधुत्वासाधुत्वयोरननुष्ठानात्मकत्वाद्विधिप्रतिषेधाविषयत्वम्। अभिधाभावनाकरणभूतयोर्विधेयत्वप्रतिषेध्यत्वसंभव इति चेन्न। प्रतिशब्दमनन्तविधिप्रतिषेधवाक्यानुमानकल्पनानुपपत्तेः। § 1771

यो हि प्रतिपदं पाठं साधूनां नाध्यवस्यति।
विधिवाक्यानि तावन्ति स कथं प्रतिपत्स्यते।§ 1773

अपशब्दाश्च शब्देभ्यो भूयस्त्वेन व्यवस्थिताः।
न कलञ्जादिवत्तेषां प्रतिषेध्यत्वसंभवः॥§ 1775

व्रीह्यादीनि हि कलञ्जादीनि च नियतजातिगुणादिरूपेण परिज्ञायमानप-
254 रिमाणत्वाद्विधिप्रतिषेधगोचरीमवन्ति न तु गवादिगाव्यादीनां जातिरूपेण व्यक्तिरूपेण वा विधिप्रतिषेधावुपपद्येते। न तावत्साध्वसाधुत्वे जातिगुणाद्यात्मकसामान्यरूपेण सर्वव्यक्त्यनुगते विज्ञायेते यदालम्बनौ द्वावेव विधिप्रतिषेधावनुमीयेयातां साधुभिर्भाषेत नासाधुभिरिति। § 1776

अविभक्ता हि शब्दत्वजातिः शब्दापशब्दयोः।
न त्ववान्तरसामान्ये केचिद्वर्गद्वयस्थिते॥ § 1778

तेन यद्येकैका व्यक्तिर्विधीयेत प्रतिषेध्येत वा ततो यावत्पदं वाक्यान्यनुमिमानस्त्रैलोक्यपूरणादप्यधिकानि स्मृतिमूलभूतानि वेदवाक्यान्यनुमिमीते। न च तावतां कोटिशतभागोऽप्याम्नातुं शक्यते। न चानाम्नातस्य स्मृतिमूलत्वम्। नित्यानुमेयश्रुतिमूलप्रतिषेधात्। न च वाचकत्वावाचकत्वनिबन्धनौ विधिप्रतिषेधौ संभवतः। सर्वेषां वाचकत्वात्। § 1779

वाचकैर्भाषितव्यं हि प्राप्तत्वान्न विधीयते।
अवाचकनिषेधश्च नाप्राप्तेरवकल्पते॥ § 1781

न ह्युदकं पिबेदग्निं न पिबेदिति च विधिप्रतिषेधौ संभवतः। अवश्यं च व्याकरणस्मृतिमूलभूतसाधुविधिश्रुतिरसाधुप्रतिषेधश्रुतिरुभयं वा संयोगपृथक्त्वात् कल्पनीयम्। त्रिष्वपि च पक्षेषु साध्वनुशासनमात्रमेव सौकर्यादाश्रितम्। यदि ह्यपशब्दप्रतिषेधमूलं व्याकरणं ततस्तेषां बहुत्वादव्यवस्थितरूपत्वाच्च न स्वरूपमवगन्तुं शक्यत इति ‘पञ्च पञ्चनखा भक्ष्या’ इति स्मृतिन्यायेनानुगतविपरीतभाषणप्रतिषेधोऽर्थापत्तिसिद्धः स्मर्यते। साधुविधिपक्षे तु त एव स्मर्तव्याः। उभयपक्षे तु तदनुगमादेवेतरसिद्धेः प्रतिषेधविषयज्ञानोपपत्तिः। स एष व्याकरणस्य पक्षत्रयेऽप्येकानुगमनिबन्धनत्वात्कथंचित्संक्षेपोऽवकल्पते। ननु प्रतिशब्दं विधिप्रतिषेधावक्लृप्तिः। अनन्तवाक्यपाठासंभवादिष्टासंभवदर्शनार्थमेव होलाकाधिकरणेऽभिहितम्। **न तस्याऽऽकृतिवचनता न्याय्या न व्यक्तिवचनतेति**। तस्मादसंभवन्मूलत्वादपस्मृतिः। § 1782

अथ प्राप्तश्च योऽर्थः स्यान्न स शास्त्रस्य गोचरः।
सिद्धः शब्दप्रयोगश्च लोकादेवार्थलक्षणः॥ § 1784

अथार्थलक्षणत्वेऽपि शास्त्रेण धर्माय प्रयोगनियमात्प्रयोगोत्पत्तिशास्त्रत्वं स्यादिति। तदनुपपन्नम्। नियमविषयासंभवात्। § 1785

यस्य ह्यनियता प्राप्तिस्तच्छास्त्रेण नियम्यते।
नित्यप्राप्तप्रयोगस्तु न शब्दो नियमास्पदम्॥ § 1787

यस्याप्यत्यन्तमप्राप्तिस्ततोऽन्यो न नियम्यते। 255
तव चात्यन्तमप्राप्तिर्गाव्यादेः प्राप्तता मम॥ § 1789

तेन पक्षद्वयेऽपि नियमानुपपत्तिः। कीदृशश्चात्र नियमः कल्प्येत। किं साधुभिरेव भाषितव्यमुत साधुभिर्भाषितव्यमेवेति। § 1790

---

१४ इति] पञ्च पञ्चनखा भक्ष्या ब्रह्मक्षत्त्रेण राघव। शल्यकः श्वाविधो गोधा शशः कूर्मश्च पञ्चमः। वा॰ रा॰ कि॰ का॰ सर्ग १७॥ श्लो॰ ३७।

यदि साधुभिरेवेति नासाधोरप्रसङ्गतः।
नियतं भाषितव्यं चेन्मौने दोषः प्रसज्यते॥ § 1792

यदि ह्येकार्थाः साध्वसाधवोः विकल्पेन प्राप्नुयुस्ततः साधुनियमावकाशः स्यात्। त्वन्मते तु पुनः— § 1793

अत्यन्तावाचकत्वात्तु नैवासाधुः प्रसज्यते।
यन्निवृत्तिफलः साधोर्नियमोऽत्रार्थवान्भवेत्॥ § 1795

अथ प्रमादाशक्तिकृतप्रसङ्गनिवृत्तिर्नियमं प्रयुञ्जीत। तदसत्। § 1796

न हि शास्त्रशतेनापि प्रमादाशक्तिकारितात्।
निवर्त्यन्ते प्रयोक्तारः प्रयोगादिति दृश्यते॥ § 1798

दृष्टोऽपशब्दानामर्थाभिधाने प्रयोग इति चेत्। उच्यते— § 1799

अन्योऽप्यक्षिनिकोचादेः प्रयोगोऽर्थेषु दृश्यते।
तन्निवृत्तिफलः कश्चिन्नियमो न च दृश्यते॥ § 1801

न च नियमानां प्रतिपक्षनिवृत्तिः प्रयोजनम्। परिसंख्याप्रयोजनत्वात्। न चायं परिसंख्याविषयो युज्यते। युगपत्प्राप्त्यभावात्। § 1802

न वा दृष्टार्थतैवास्य प्रयोगस्योपपद्यते।
न हि दृष्टनिराकाङ्क्षाददृष्टमपि गम्यते॥ § 1804

न हि तादृशेष्वदृष्टकल्पनायामर्थापत्तिः प्रभवति। परार्थत्वाच्च फलश्रुतेरर्थवादत्वम्। न चासति फले शक्यमपूर्वं कल्पयितुम्। § 1805

न चेदं नियमापूर्वमाश्रितं क्वेति गम्यते।
शब्दार्थश्रोतृतत्तद्बुद्धिवक्तुच्चारणगोचरे॥ § 1807

शब्दस्य तावदत्यन्तपरार्थदृष्टार्थत्वान्ना पूर्वेण कश्चिदुपकारः। सत्यपि चाभिधानकर्मत्वेनार्थस्य प्राधान्ये दृष्टार्थेषु लोकव्यवहारेषु विनाऽप्यपूर्वेणाङ्गभावादपूर्वोपकारानुपयोगः। श्रोतुः पुनर्नियमविधिसंस्पर्शानन्तर्गतत्वादेवासंस्कार्यत्वम्। बुद्ध्योश्च क्षणिकत्वान्न कालान्तरावस्थाय्यपूर्वाधारत्वोपपत्तिः। § 1808

वक्ता तु भाषणे सर्वो गुणभूतो विधीयते।
न तस्य नियमापूर्वसंस्कार्यत्वनिरूपणम्॥ § 1810

न प्रधानपदं चात्र विद्यते स्वर्गकामवत्।
256 न च षष्ठ्युक्तसंबन्धात्स्वामित्वेन प्रधानतः॥ § 1812

यत्तु दिङ्नियमापूर्वं भोजनादिषु कल्पितम्।
पुरुषार्थक्रियाद्वारं तदर्थं तत्प्रतीयते॥ § 1814

न चेहोच्चारणमुच्चारयितॄर्थं येन भोजनादिसमत्वं प्रतिपद्येत। स्वरूपेण पुनर्भङ्गित्वाद्बुद्धिवदेवासंस्कारार्हम्। § 1815

एवं चावेदमूलत्वान्न धर्मनियमार्थता।
युक्ता शब्दस्मृतेर्वक्तुं न चास्याः शास्त्रता स्वयम्॥ § 1817

तदुक्तं 'प्रयोगशास्त्रमिति चेन्नासन्नियमात् ' इति। § 1818

नहि व्याकरणादीनां वेदत्वेन स्वतन्त्रता।
पुरुषाधीनवृत्तेश्च सापेक्षस्याप्रमाणता॥ § 1820

सर्वत्र हि पौरुषेयाद्वचनादेवमयं पुरुषो वेदेति प्रत्ययस्तेन कर्त्रभिप्रायप्रकाशनमात्रोपयुक्तत्वाद्व्याकरणान्नैव शब्दगतसाध्वसाधुविभागः प्रतीयते। § 1821

न च स्मृत्यन्तरं किं चिद्दृष्टं तत्कार्यगोचरम्।
दृढं श्रुत्यनुमानं स्याद्येनोपनयनादिवत्॥ § 1823

प्रायेण मनुगौतमवसिष्ठादिप्रणीताः समानेष्वर्थेषु धर्मसंहिता वर्तन्ते। तेनाविगानात्ताभ्य एव श्रुतयः स्वनुमानाः। न च व्याकरणस्य ताभिः समानार्थत्वम्। § 1824

परस्परेण चाऽऽचार्या विगीतवचनाः स्थिताः।
सूत्रवार्तिकभाष्येषु किं तत्राध्यवसीयताम्। § 1826

न तावत्सूत्रकारेण किंचिदुक्तं प्रयोजनम्।
कथं चैतावति ग्रन्थे स्यात्प्रयोजनविस्मृतिः॥ § 1828

येष्वपि तद्ग्रन्थेषु विस्पष्टान्यादित एवाऽऽरभ्य प्रयोजनानि ज्ञायन्ते न चैषां श्रवणग्रहणधारणेषु महान्खेदस्तेष्वपि जिज्ञासूत्साहार्थं पूर्वं प्रयोजनान्येव निबध्यन्ते, 'धर्मं व्याख्यास्यामो,' *'यज्ञं व्याख्यास्यामः' इत्येवमादिभिः। इह पुनरत्यन्तकष्टं व्याकरणं प्रणयता सूत्रकारेण धर्मार्थकाममोक्षाणां न कस्यचित्प्रयोजनत्वमाश्रितम्। न च सर्वप्रधाने वस्तुन्यनादरो युक्तः। सुज्ञातत्वं पुनरीदृशं येनाद्यापि विवदन्ते। § 1829

धर्मश्च फलसंबद्धं कर्म यागादि वर्ण्यते।
न च व्याकरणे किंचित्तादृक्कर्मोपदिश्यते॥ § 1831

२४ *] आपस्तम्बपरिभापासूत्रम्। १। १

धर्मत्वं यच्च विज्ञानशास्त्रपूर्वप्रयोगयोः।
यथेष्टं वर्णितं तच्च न शास्त्रसदृशं मतम्॥§ 1833

शास्त्रार्थो हि निरूपितरूपो भवति। इह च ज्ञानधर्मत्वमुपन्यस्याधर्म-
257 प्रसङ्गभीतेन शास्त्रपूर्वप्रयोगेऽभ्युदय इति वार्तिककारेणोक्तम्। भाष्यकार आह—**अथ वा पुनरस्तु ज्ञाने धर्म इति**। न चैवमनियमेन धर्मत्वावधारणं युक्तम्। § 1834

संबद्धयोश्च धर्मत्वं यदेकस्यावधार्यते।
तदेतरत्तदर्थत्वान्न धर्मत्वेन गम्यते॥§ 1836

तदिह यदि तावज्ज्ञानमेव धर्मत्वेनावधारितं ततो लोकप्रसिद्धस्यैव प्रयोगस्य ज्ञानात्तु निष्पादितत्वेन सत्यामप्युपकारनिर्वृत्तौ वाजिनादिवत्प्रयोजकत्वाभावः। शास्त्रपूर्वकप्रयोगपक्षे तु ज्ञानस्य तदङ्गत्वेन निराकाङ्क्षभूतत्वात्। असत्यां प्रयोजनान्तराकाङ्क्षायां यद्यपि काचित्फले श्रुतिर्भवेत्साऽपि ‘द्रव्यसंस्कारकर्मसु’* इत्यनेन न्यायेनार्थवादतया ज्ञायते। न हि समानाध्वनोः परस्मिन्फलवति ज्ञाते पूर्वस्यापि फलवत्ता ज्ञायत इति वर्णितमेतत्। **“योऽश्वमेधेन यजते य उ चैनमेवं वेद” इति**। किं च— § 1837

आदिमत्त्वाच्च धर्मत्वं नैव ज्ञातप्रयोगयोः।
न हि व्याकरणापेक्षा वर्तते वैदिकी श्रुतिः॥§ 1839

यन्नाम ज्ञानं नित्येन वेदेनैव क्रियते तत्र तत्पूर्वकप्रयोगविधानं फलायोपपद्यते। व्याकरणज्ञानं तु पौरुषेयं ग्रन्थाधीनत्वान्मन्त्रार्थवादगतानित्यसंयोगपरिहारन्यायेनानादिवेदविषयत्वेन नावधार्यते। § 1840

न च व्याकरणं नित्यं कथंचिदवगम्यते।
कर्तृस्मृतिद्रढिम्ना हि नित्यपक्षनिराक्रिया॥§ 1842

अथापि व्यवहारनित्यतान्यायेन पौरुषेयव्याकरणपरम्पराऽनादिः कल्प्येत तथाऽपि **उक्तं तु शब्दपूर्वत्वम्** इत्यस्य न्यायस्य स्थितत्वात्। अनेकपुरुषकृतमपि सद्व्याकरणं वेदालम्बनत्वं न प्रतिपद्यते। § 1843

न च व्याकरणत्वाख्या जातिः काचिद्व्यवस्थिता।
अनित्ये वाक्यसंघाते सा जातिः क्वावतिष्ठताम्॥§ 1845

अथ ‘लक्ष्यलक्षणे व्याकरणम्’* इति सत्यपि लक्षणांशकृत्रिमत्वे लक्ष्यांशेन नित्येन नित्यो विधिरुपपत्स्यत इति। तदनुपपन्नम्। कुतः— § 1846

१३ *] जै॰ सू॰ ( ४—३—१ )।
२४ थाऽपि] जै॰ सू॰ ( १—१—८ )
२८ *] म॰ भा॰ पस्पशाह्निके।

अत्यन्तभिन्नरूपत्वाल्लक्ष्याणां लक्षणादिना।
नैकमालम्बनं किंचिद्विधेरस्तीत्युदाहृतम्॥§ 1848

ननु वेद एव व्याकरणनित्यत्वं दृश्यते। यथाऽऽह—**तस्मादेषा व्याकृता वागुद्यत इति***। नैतदस्ति। § 1849

व्याकृता संप्रदायेन वाणी नित्यैव वैदिकी। 258
अनूदितोच्यमानेयं कर्मस्वाध्यायकालयोः॥§ 1851

अव्याकृताया हि लौकिक्या वाचः शिष्याचार्यसंबन्धेन स्वरवर्णमात्राक्रमैरविप्लुतरूपैर्निरूपिताकारैरेव वैदिकी व्याकृतेत्युच्यते। तस्याश्च मन्त्रब्राह्मणात्मिकायाः कर्मसु ज्ञाने प्रयोगे च धर्मोऽस्त्येव। यदपि **चैकः शब्दः सम्यग् ज्ञातः सुप्रयुक्तः शास्त्रान्वितः स्वर्गे लोके कामधुग्भवतीति** तदपि स्वाध्यायप्रशंसाशेषभूतमेव। **'अहरहः स्वाध्यायमधीयीत"** इत्यत्र **'अप्येकामृचं यजुः साम वा'** इत्येतदवश्यकर्तव्यतानियमार्थमुक्तम्। § 1852

योऽपि मन्त्रं समस्तं हि नाधीयीताप्यशक्तितः।
तस्य शास्त्रान्वितः शब्द एकोऽपि स्वर्गकामधुक्॥§ 1854

**शास्त्रान्वित** इति च यथास्वाध्यायमनुगत इत्यर्थः। **सम्यक्प्रयुक्त** इति चोपनयनोपसदनगुरुशुश्रूषादर्भपवित्रपाणित्वादीतिकर्तव्यतोपपन्नत्वाश्रयणेनोक्तम्। यदपि च **"तस्माद् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्दः"** इति, तत्संप्रदायागतवैदिकशब्दविनाशप्रतिषेधार्थमेव। वैदिकाद्यपेतत्वाल्लौकिकस्यापशब्दत्वं संभवति। सुज्ञानं च। न च लौकिकादप्यपेतोऽपशब्दो नाम कश्चिदस्ति। गाव्यादीनामपि शब्दानां श्रोत्रग्राह्यत्वेन शब्दशब्दवाच्यत्वशब्दबुद्धिग्राह्यत्वशब्दत्वानुगमदर्शनात्। अथाप्यवश्यं लौकिकादप्यपेतोऽपशब्द आश्रयणीयः। तथाऽपि **"न म्लेच्छभाषां शिक्षेत"** इत्येवमादिस्मृत्यनुसरणेन हिमवद्विन्ध्यान्तरालकृष्णमृगसंचरणाद्युपलक्षितधर्माधिकृतार्यावर्तनिवासिव्यतिरिक्तबर्बरादिभाषागतस्य म्लेच्छितत्वसमानाधिकरणापशब्दत्वज्ञानात्तेन भाषणं प्रतिषिध्यते। युक्तं च तस्याशेषतदीयाचरणवत्परिहरणीयत्वं नत्वार्यावर्तनिवासिप्रयुक्तेषु गाव्यादिषु म्लेच्छतिधात्वर्थानुगमः कश्चित्। येन तदनाचारितत्वेनापवृत्तवदपशब्दत्वं निरूप्यते। यदपि च "आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत् " इति। तदप्यनृतवादवैदिकशब्दविनाशम्लेच्छभाषाप्रयोगाश्रयमेव वेदितव्यं न तु व्याकरणानुगतव्यतिरिक्तशब्दप्रयोगविषयम्। तथाहि— § 1855

कथं नामेदृशात्कार्यात्सर्व एवाऽऽहिताग्नयः।
प्रवर्त्तेरन्कथं चान्यैर्न निन्द्येरन्नशिष्टवत्॥§ 1857

४ *] तै॰ सं॰ ( ६—४—७ )।
९ ग्] म॰ भा॰ ( ६६—१—८४ )।

प्रायेण हि शिष्टानां धर्माचारप्रणिहितचेतसां कश्चिदेव प्रमादादल्पोऽनाचारो भवति। गाव्यादिशब्दप्रयोगेषु पुनर्न केषांचिदप्यनाचारबुद्धिः।
259 न च कलञादिभक्षणवद्विचिकित्सा गर्हा वा दृश्यते। न चाऽऽहिताग्निसहस्रेऽप्येकस्त्वदभिमतसाधुशब्दैरेव व्यवहरमाणो दृश्यते। § 1858

कल्पसूत्रस्मृतिग्रन्थमीमांसागृह्यकारिणः।
शिष्टा दृष्टाः प्रयुञ्जाना अपशब्दाननेकशः॥§ 1860

‘ समानमितरच्छ्येनेन ’ इत्यादितकारान्तप्रथमान्तनपुंसकप्रयोगेषु मशकेन तत्र तत्र प्रयुक्तं, **“समानमितरं ज्योतिष्टोमेन” “समानमितरं गवा ऐकाहिकेन” इति**। सूत्रकारेणाप्यभिहितम् “अहीने बहिष्पवमानैः सदसि स्तुवीरन्” इति कर्त्रभिप्रायक्रियाफलवर्जितेऽप्यृत्विक्कर्तृके स्तवने “यजन्ति याजका” इतिवत्परस्मैपदे प्रयोक्तव्ये व्याकरणमनपेक्ष्याऽऽत्मनेपदं प्रयुक्तम्। तथाऽऽश्वलायनेन “प्रत्यसित्वा प्रायश्चित्तं जुहयुः” इति समासेऽपि ल्यमप्रयुक्तः। “आज्येनाक्षिणी आज्य” इत्यसमासेऽपि प्रयुक्तः। तथा शिक्षायां नारदेन “प्रत्यूषे ब्रह्म चिन्तयेत्” इति गाव्यादिशब्दतुल्य एव प्रयुक्तः। तथा मनुनाऽपि “ज्ञातारः सन्ति मेत्युक्त्वा” इत्यत्र सन्ति म इत्युक्त्वेति वक्तव्ये व्याकरणमनपेक्ष्यैव संहिता कृता। तथा मीमांसायामपि **गव्यस्य च तदादिषु’** इति गोर्विकारावयवविषयसाधुप्रयोगयोग्यः शब्दोऽन्यत्रैव गवामयने प्रयुक्तः। तथा **‘द्यावोस्तथेति चेत्’* इति** द्यावापृथिव्योरिति वक्तव्ये लक्षणहीनमेव बहु प्रयुक्तम्। तथा गृह्यकारेण मूर्धन्यभिघ्राणमिति वक्तव्ये मूर्धन्यभिजिघ्राणमित्यविषये जिघ्रादेशः प्रयुक्तः। कात्स्न्र्येऽपि व्याकरणस्य निरुक्ते हीनलक्षणाः प्रयोगा बहवो यद्वद्ब्राह्मणो ब्रवणादिति। संवत्सरं शाशयाना इत्येतन्मन्त्रगतमण्डूकविषयब्राह्मणशब्दनिर्वचने क्रियमाणे वचनशीलत्वनिमित्ततां दर्शयता ब्रुवो वचिरिति वच्यादेशमकृत्वैव ब्रवणादिति प्रयुक्तम्। § 1861

अन्तो नास्त्यपशब्दानामितिहासपुराणयोः।
तथोभाभ्यादिरूपाणां हस्तिशिक्षादिकारिणाम्॥§ 1863

युगपदुभाभ्यां दन्ताभ्यां यः प्रहारः स उभाभ्य इति सर्वैः पालकार्यराजपुत्रादिभिर्व्याकरणानपेक्षमेव प्रयुक्तम्। § 1864

वेदेष्वपि प्रयोगास्ते भूयांसोऽध्येतृसंमताः।
सामान्यं छान्दसं वाऽपि येषां नास्त्येव लक्षणम्॥§ 1866

न हि ते सुप्तिङुपग्रहादिव्यत्ययेन नापि कतिपयाधिकारदृष्टेन ‘बहुलं छन्दसि’ इत्यनेन सिध्यन्ति। तद्यथा **मध्यं आपस्य तिष्ठति। नीचीनवारं**

९ म्] छान्दोग्यसूत्रकारेणेत्यर्थः।
१७ पि] अ० ८ पा० २ सू० १८।
१८ *] जै० सू० ( ९—६—५ )

**वरुणः कबन्धमिति**। न ह्यपामित्यस्य नित्यस्त्रीलिङ्गबहुवचनविषयव्यञ्जनान्त-प्रातिपदिकपरपष्ठयाऽन्वाख्यानादापस्येत्येतद्रूपं लक्षणानुगतं दृश्यते। नापि द्वारशब्दस्य स्थाने लाटभाषातोऽन्यत्र वारशब्दः संभवति। तेनानारम्य एवायं विषयव्याप्त्यसंभवात्। § 1867 260

शब्दानुगमरूपोऽर्थो यत्र व्याकरणं कृतम्।
येऽपि व्याकरणस्यैव परे पारे प्रतिष्ठिताः॥§ 1869

सुतरां तेऽपि गाव्यादितुल्यानेव प्रयुञ्जते।
सूत्रवार्तिकभाष्येषु दृश्यते चापशब्दनम्॥§ 1871

अश्वारूढाः कथं चाश्वान्विस्मरेयुः सचेतनाः।§ 1872

सूत्रे तावत् ‘जनिकर्तुः प्रकृतिः’* इत्यत्र हि द्वावपशब्दौ जनिशब्देन हि इक्श्तिपौ **धातुनिर्देश** इत्यनेन लक्षणेनान्वितो धातुरेव निर्दिश्यते। न च तस्य कर्तुः प्रकृतेरपादानसंज्ञेष्यते। जायमानस्य पुनरर्थस्य जनिशब्दो वाचकतया नैव लक्षणेनानुगतः। तेनायं दरिद्र इवाश्वशब्दो जनिमात्रवाचित्वात्तदर्थं प्रत्यसाधुरेव विज्ञायते। तथा। **‘तृजकाभ्यां कर्तरि’* इति** प्रतिषिद्धषष्ठीसमासप्रयोगाद्व्याकरणफलपरित्यागः। एवं **तत्प्रयोजक इति** प्रतिषिद्ध एव समासः। तथा वार्तिकेऽपि दम्भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धमिति। तथा ‘आन्यभाव्यं तु कालशब्दव्यवायात्’ इति। अत्र क्लेशेन समासं कल्पयित्वा ततः समाससंज्ञया गुणवचनसंज्ञायां बाधितायां ‘गुणवचनब्राह्मणादिभ्यः’* इति लक्षणेनासंसृष्ट एव ष्यञ्प्रयुक्तः। भाष्येऽप्यविरविकन्यायेनेति द्वंद्वगर्भे तत्पुरुषे पूर्वसमासपूर्वपदस्थायाः सुपः **‘सुपो धातुप्रातिपदिकयोः’* इति** प्रत्यक्षोपदिष्टोऽपि लुङ् कृतः। तथाऽन्यथा कृत्वा चोदितमन्यथा कृत्वा परिहार इति। ‘अन्यथैवं कथम्’* इत्यन्वाख्यातसाधुत्वोऽपि णमुल् न प्रयुक्तः। न चैषां निपातनैः साधुत्वसिद्धिः। कुतः— § 1873

येषामनुगमो नास्ति ते सिध्येयुर्निपातनैः।
अन्यथानुगतानां तु प्रयोगं बाधते स्मृतिः॥§ 1875

स्मृत्याचारविरोधे हि स्मृतिरेव बलीयसी।
प्रत्यक्षप्रतिषेधाच्च जनिकर्त्राद्यसाधुता॥§ 1877

१ था] ऋ॰ सं॰ ( ४—४—३० )।
१० *] पा॰ सू॰ ( १—४—३० )।
१४ *] पा॰ सू॰ ( २—२—१० )।
१५ एवं] पा॰ सू॰ (१—७—५५ )।
१८ *] पा॰ सू॰ ( ५—१—१—२४ )
२० *] पा॰ सू॰ ( २—४—११ )।
२२ *] पा॰ सू॰ ( ६—४—२७ )।

प्रत्यक्षस्मृतिविरोधे तु लक्षणरहितस्यापि प्रयोगादेव शिष्टाचारभूतादवयवानुगमस्मृतिमनुमाय निपातनात्साधुत्वसिद्धिः। न च लक्षणशब्दानां स्वात्मनि क्रियाविरोधादात्मार्थत्वाभावाद्वा लक्षणानुगतिरनादरणीया। § 1878

प्रदेशान्तरसिद्धेन लक्षणेनानुगम्यते।
देशान्तरस्थितः शब्दो लक्ष्यभूतोऽन्यशब्दवत्॥§ 1880

261 तथा च 'कुत्वं कस्मान्न भवति वृद्धिः'* इति। कोऽयं शब्द इत्यादिषु लक्षणानुगमादरः सर्वत्राऽऽश्रितः। यदि च लक्षणशब्देषु लक्षणं न प्रवर्तेत, ततः सर्वं व्याकरणमपशब्दैरेव निबद्धं स्यात्। अर्धवैशसदर्शनात्तु प्रमाणत्वहानिः। अथोच्येत यज्ञप्रयोगविषय एव साधुभाषणनियमो न सूत्रकारव्याख्यानादिक्रियास्विति। तदसत्। **स्वर्गे लोके कामधुगिति** फलवत्त्वोपन्यासात्। सारस्वतीविधावाहिताग्निग्रहणार्थवत्त्वात्। इतरथा ह्याहिताग्निरेव यज्ञेष्वधिक्रियत इति तद्वोचरेऽपशब्दप्रयोगे निष्प्रयोजनमेवाऽऽहिताग्निग्रहणं भवेत्। योऽपि च ज्योतिष्टोमप्रकरणे वाजसनेयिनां "**तस्माद्ब्राह्मणो न म्लेच्छेत्**" इति प्रतिषेधः कर्माङ्गत्वेन ज्ञायते सोऽपि गुरुसंप्रदायक्रमागतमन्त्रप्रयोगविनाशविषय एव म्लेच्छभाषाप्रतिषेधार्थो वेति पूर्ववदेव नेतव्यः। यदपि च 'केषां शब्दानाम्'* इति प्रश्नानन्तरं 'लौकिकानां वैदिकानां च' इति विवेककथनं तदपि बहूनां ताव त्प्रत्यक्षप्रत्यभिज्ञानाल्लोकवेदयोरभेदे सति स्तोकप्रविभागापेक्षं नैवेदमत्यन्तभेदाश्रयसदृशमभिधीयमानं शोभते न च लौकिकमध्ये गौरश्वः पुरुषो हस्तीत्येवमादयः सर्वे वेदसाधारणा वेदादेव वोद्धृत्य लोकेन प्रयुक्ता उदाहर्तुं न्याय्याः। य एव हि भाषायामित्येव स्मर्यन्ते, न च क्वचिदपि वेदे दृष्टपूर्वा इत्येवं संभावयितुं शक्यन्ते त एवोदाहर्तव्याः। वैदिकोदाहरणेष्वपि च लोकप्रसिद्धा एव शमादय उदाहृताः। न च वाक्योदाहरणेन लौकिकेभ्यो भिद्यन्ते। वाक्यानां व्याकरणेनानन्वाख्यानात्। अतश्छान्दसान्येव कानि चित् "**गृभ्णामि**" "**दत्वायाथ**" इत्येवमादीन्युदाहर्तुं योग्यानि न "**शंनो देवीः**" इत्येवमादीनि। छान्दसोदाहरणं च कुतः 'सिद्धे' 'लोकत'* इत्यनेन प्रत्यासन्नेनैव व्याहन्येत। यदि च लौकिकानामन्वाख्यानं क्रियेत्, ततः सुतरां गाव्यादय एवान्वाख्येयास्तेषां व्यवस्थितं लौकिकत्वं वेदेष्वप्रगोगात्। पुनरध्येतृभिर्वेदादेवोद्धृत्योद्धृत्य प्रयुक्ता इति शक्यं वक्तुम्। तथा च मनुनाऽप्युक्तम्। वेदशब्देभ्य एवाऽऽदौ पृथक् संस्था विनिर्ममे इति। दृश्यन्ते चाद्यत्वेऽपि श्रोत्रिया लौकिकेऽप्यर्थे विवक्षिते तद्भाषासमानार्थान्सकलमन्त्रानप्युदाहरन्तः किमङ्ग पुनः पादान्पदानि वा। न चाऽऽश्रितप्रतिपदपाठानां वैदिकानां लक्षणेन कार्यम्। न

६ *] म० भा० (१—१—१ आ० ३)।
१६ *] म० भा० पस्प०।
२६ *] सिद्धे शब्दार्थसंबन्धे, लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु इति महावार्तिके।

चैषां गुरुमुखात्साधीयो लक्षणमस्ति ‘दृष्टानुविधित्वाच्छन्दस’ इति स्वयमेव लक्षणस्याऽऽम्नानाधीनत्वेन मन्दप्रयोजनत्वमुक्तम्। § 1881

यथैव लोकसिद्धत्वात्कृष्यादेर्लक्षणं वृथा।
तथैव वेदसिद्धानां शब्दानां लक्षणं वृथा॥§ 1883

रक्षाद्यपि यदत्रोक्तमन्वाख्यानप्रयोजनम्।
न तदप्यन्यतः सिद्धेरल्पसिद्धेस्ततोऽपि वा॥§ 1885

शिष्याचार्यसंबन्धो हि महान्वेदरक्षाहेतुर्व्याकरणानधीनस्यापि वेदक्रम- 262
स्याध्ययनेनैव रक्ष्यमाणत्वात्। तद्विनाशेऽपि च विशिष्टतरदोषप्रसङ्गात्। उक्तं च— § 1886

निराकाङ्क्षी भवेल्लक्ष्यं येन तन्नाम लक्षणम्।
शतांशमात्रसिद्धौ तु तेन मन्दं प्रयोजनम्॥§ 1888

समाम्नायप्रसिद्धेऽपि सामवेदेऽस्ति लक्षणम्।
तद्युक्तं कृत्स्नसिद्धित्वात्कर्तव्यार्थेन चार्थवत्॥§ 1890

औच्छिक्ये हि सर्वाणि सामपर्वाणि यथाक्रमं लक्षणेनानुगतानि ततश्च समस्तसामरूपसिद्धेर्निराकाङ्क्षत्वं भवति। ब्राह्मणविधिवशेन च, ऋगन्तर-संचारणायां प्रस्तावादिपञ्चधाविभागेन लक्षणोपयोगः। पदानुगममात्रनिवृत्त-व्यापारेण तु व्याकरणेन विशिष्टपदरचनात्मकवाक्यसंघातरूपाणामसंभवत्क-र्तव्यपदवाक्यानां मन्दमिव रक्षितव्यं दृश्यते। § 1891

लक्षयेद्यः समाम्नायात्पदवाक्यक्रमान् बहून्।
स लक्षयेत्तरामल्पं प्रकृतिप्रत्ययक्रमम्॥§ 1893

किं च— § 1894

यदि व्याकरणाद्रक्षां मन्वीरन्वेदवादिनः।
वैयाकरणगेहेषु छिन्द्युस्ते वेदसंशयान्॥§ 1896

कक्षावलम्बिनं नित्यं को नाम करकं वहन्।
तमनादृत्य शौचार्थमन्यतः कर्तुमर्हति॥§ 1898

लोके यस्य यदर्थत्वमाप्ता वा यत्र ये मताः।
तेन तेभ्यश्च तद्वस्तु यथावदवगम्यते॥§ 1900

आयुर्वेदं चिकित्सासु प्रायेण विनियुज्यते।

व्याधितत्त्वौषधज्ञानं वैद्येभ्यश्चोपलभ्यते॥ § 1902

न तु वेदाध्यायिनां कदाचिदप्यभियुक्ततरसहाध्यायिव्यतिरेकेण वेदवर्णपदवाक्याज्ञानसंदेहविपर्ययव्यावृत्तौ व्याकरणं वैयाकरणा वोपयुज्यन्ते। § 1903

सहाध्यायिभिरेवातो वेदः कार्त्स्न्येन रक्ष्यते।
स्वराक्षरविनष्टोऽपि द्वेषादन्यैर्न मृष्यते॥ § 1905

तस्मात्प्रीतेरुपाध्यायैर्द्विष्टैः कारुणिकादिभिः।
न विनाशयितुं वेदो लभ्यते तेन रक्ष्यते॥ § 1907

तस्माद्वेदरक्षार्थं तावन्नाध्येयं व्याकरणम्। § 1908

लोके तु सर्वभाषाभिरर्था व्याकरणादृते।
सिध्यन्ति व्यवहारेण काव्यादिष्वप्यसंशयम्॥ § 1910

263 यदि तु संव्यवहारवाक्येष्वनुपयुज्यमानमपि काव्यनाटकलक्षणप्राकृतव्याकरणद्विपदीरासकादिलक्षणन्यायेन संस्कृतकाव्योपयोगार्थं व्याकरणमाश्रीयेत, तथाऽपि काव्यप्रयोगनियमोत्पत्त्यशास्त्रत्वाद्यथेष्टभाषाभिः प्रबन्धकरणसंभवाच्छब्देषु च व्यवस्था स्यादित्युच्यते। § 1911

काव्यशोभास्वपि त्वेतन्नैवातीवोपयुज्यते।
वैयाकरणदोषाद्धि कष्टाञ्छब्दान्प्रयुञ्जते॥ § 1913

न च लक्षणमस्तीति प्रयोक्तव्यमलौकिकम्।
लोकसिद्धप्रयोगे तु लक्षणं स्यादनर्थकम्॥ § 1915

तेन लोकेऽपि न कदाचिद्व्याकरणेन शब्दरक्षा। § 1916

ऊहार्थमपि शब्दानां न व्याकरणमर्थवत्।
ऊहस्याप्यन्यतः सिद्धेरूह्यानूह्यविभागवत्॥ § 1918

तथा च— § 1919

मुख्यदृष्टार्थतास्वार्थसमवेतार्थतादिभिः।
प्रयुक्ताः प्रकृतौ मन्त्रा गताः कार्यातिदेशतः॥ § 1921

विकारेऽथ निषिद्धोहाः कार्यापन्नेषु पञ्चधा।
अर्थान्तरेऽष्वपूर्वार्थद्वारेणोहं व्रजन्ति नः॥ § 1923

एतावत्यन्यतो यस्य विना व्याकरणान्मतिः।
जायेत स कथं तत्र पदं योग्यं न लप्स्यते॥ § 1925

वेद एव हि सर्वेषामादर्शः सर्वदा स्थितः।
शब्दानां तत उद्धृत्य प्रयोगः संभविष्यति॥ § 1927

अथ वा योऽपि गाव्यादिर्लोकेनार्थे प्रयुज्यते।
सोऽप्यर्थद्वारतः प्राप्तप्रयोगः केन वार्यते॥ § 1929

देवतापदानि तावत् **'विधिशब्दस्य मन्त्रत्वे भावः स्यात्'*** इत्येतेन **न्यायेन** सर्वानेव साध्वसाधुत्वसंमतान्पर्यायान्परित्यज्य विधिगतप्रयोगानुसरणेनैव तद्वाक्यशेषवाक्यान्तराधिगतार्थाभिधानरूपेण प्रयुज्यन्ते तेषु ह्यस्त्येव कर्माभिधानार्थमेव प्रयोगोत्पत्तिशास्त्रत्वम्। यानि तु द्रव्यतद्गुणादिपदानि संनिहितार्थपर्युपस्थापितसमस्तरूपाणि प्रयोगवचनगोचरमागच्छन्ति तेष्वसंनिहितार्थपदनिवृत्तिन्यूनसाकाङ्क्षमन्त्रवाक्यनिराकाङ्क्षीकरणाय स्मृतेऽप्यर्थे प्रयुज्यमानेषु प्रयोगोत्पत्त्यशास्त्रत्वान्न व्यवस्था स्यादित्युच्यते। प्रकृतौ हि मन्त्राणां प्रयोगोत्पत्तिः शास्त्रवती, विकृतौ पुनरर्थवशाद्भवन्ती न व्याकरणानुगतेष्वेवावतिष्ठते। व्याकरणस्याप्यसंभाव्यमानमूलशास्त्र-
स्य कृतकाविधायकेष्ट्युपसंख्यानाद्यावापसूत्रप्रत्याख्यानानवस्थितप्रमाणत्व- 264
स्य यथारुचिविकल्पितप्रकृतिप्रत्ययपरिमाणादिदोषग्रस्तस्य निश्चितस्मर्यमाणपाणिन्यादिमतसापेक्षस्य नैवानादियज्ञगतशब्दप्रयोगनियमोत्पत्तिशास्त्रत्वमवकल्पते। § 1930

तेनोहे कर्मकर्माङ्गवाक्यार्थज्ञानकौशलैः।
लोकवेदप्रयोगाच्च सिद्धे व्याकरणेन किम्॥ § 1932

अपि च व्याकरणेनोहकरणमशक्यमेवेति मन्वानैष्टीकाकारैरप्युक्तम्—
§ 1933

अङ्गानि ज्ञातिनामान्युपमा चेन्द्रियाणि च।
एतानि नोहं गच्छन्ति अध्रिगौ विषमं हि तत्॥ § 1935

आगमो यस्तु निर्दिष्टः प्रयोजनविवक्षया।
कर्मणां नोच्यते तत्र किं वेदाध्ययनं फलम्॥ § 1937

सर्वस्य हि ह्यनुष्ठातव्यस्याऽऽगमो मूलत्वेनाऽऽख्यायते न प्रयोजनत्वेन।
§ 1938

अथैतेनैव युक्तं स्यादागमोक्तं प्रयोजनम्।
तदप्यसदनाम्नानान्निष्कारणतयाऽपि च॥ § 1940

---

५ *] जै॰ सू॰ (१० ४ २३)।
२३ अध्रिगौ] दैव्याः शमितार आरभध्वमित्यादिः पशुविशसनप्रपमन्त्रोऽध्रिगुशब्दवत्त्वेनाध्रिगुरित्युच्यते।

निष्कारणषडङ्गवेदाध्ययनोपन्यासेन हि सुतरां व्याकरणस्य निष्प्रयोजनत्वमुक्तम्। § 1941

आगमो वेदवाक्याच्च नान्यः कश्चन विद्यते।
कथं चाऽऽदिमतां सिध्येद्वेदेनानादिना विधिः॥ § 1943

तस्मात् 'स्वाध्यायोऽध्येतव्यः' इत्येतत्केवलवेदाध्ययनविधानं शतपथादिषु दृष्टमुपपन्नं च नित्यार्थालम्बनत्वात्। व्याकरणाद्यङ्गाध्ययनविधानं पुनर्न कस्यांचिच्छाखायां श्रूयते। न चाऽऽदिमदर्थविषयं सदनादित्वाधीनं वेदत्वं प्रमाणत्वं वा लभते। § 1944

न च वेदाङ्गभावोऽपि कश्चिद्व्याकरणं प्रति।
तादर्थ्यावयवाभावाद्बुद्धादिवचनेष्विव॥ § 1946

श्रुतिलिङ्गादिभिस्तावत्तादर्थ्यं नास्य गम्यते।
अकृत्रिमस्य वा कश्चित्कृत्रिमोऽवयवः कथम्॥ § 1948

तस्मादवयवविषयमेवैतदेवं वर्णयितव्यम्। § 1949

षडङ्गो वेद इत्युक्तं श्रुतिलिङ्गाद्यपेक्षया।
तैः षड्भिः प्रविभक्तः सन्स हि कर्मविबोधनः॥ § 1951

ननु बाह्याङ्गानपेक्षत्वे वेदस्वरूपान्तर्गतश्रुत्याद्यपेक्षया विशेषणमनर्थकं प्रसज्यते। तथा हि— § 1952

संभवव्यभिचाराभ्यां स्याद्विशेषणसंभवः।
श्रुत्याद्यव्यभिचारात्तु तैरङ्गैः किं विशेष्यते॥ § 1954

265 उच्यते— § 1955

यस्तानि प्रविभक्तानि हेतुरूपफलैः पृथक्।
ज्ञात्वाऽधीते स एवास्य विधेरर्थं करोति नः॥ § 1957

अधिगन्तव्य इत्येतदध्येय इति चोच्यते।
तेन श्रुत्यादिमान्वेदो वेदितव्यो विधेरतः॥ § 1959

ध्यायतेरेव वा रूपं ध्येय इत्येतदाश्रितम्।
श्रुत्याद्यर्पितसर्वार्थः स ध्यातव्यः सदा द्विजैः॥ § 1961

ततश्च मीमांसाद्वारा वेदार्थानुचिन्तनविधिरेवायमिति ज्ञायते न व्याकरणाध्ययनविधिः। § 1962

वेदे व्याकरणादीनि सन्त्येवाभ्यन्तराणि नः।

भवेद्वा तदभिप्राया षडङ्गाध्ययनस्मृतिः॥ § 1964

**‘तद्दध्नो दधित्वम्’** इत्येवमादीनि हि वैदिकार्थवादान्तर्गतान्येव हि निरुक्तव्याकरणादीनि तैः विधायको वेदोऽध्येतव्य इति स्मृत्यर्थो भवेत्। § 1965

प्रातिशाख्यानि वा यानि स्वाध्यायवदधीयते।
गृह्यमाणतदर्थत्वादङ्गत्वं तेषु वा स्थितम्॥ § 1967

यानि हि वेदव्यापारपराण्येव तेषु लिङ्गेन शक्यमङ्गत्वमध्यवसातुम्। ननु कतिभयस्पृष्टवेदवाक्योदाहरणच्छद्ममात्रेषु पाणिनिप्रभृतिप्रणीतेषु प्रातिशाख्यानीव प्रयोगशास्त्राणीति चेत्। न। तेषां पदस्वरूपेष्वेव व्यापारात्। पाणिनीयादिषु हि वेदस्वरूपवर्जितानि पदान्येव संस्कृत्य संस्कृत्योत्सृज्यन्ते। प्रातिशाख्यैः पुनर्वेदसंहिताध्ययनानुगतस्वरसंधिप्रयतिविवृतिपूर्वाङ्गपराङ्गाद्यनुसरणाद्वेदाङ्गत्वमाविष्कृतम्। § 1968

पूर्वोक्तेनानुसंधानमागमस्य च नास्ति ते।
आगमोऽध्ययनप्रायः प्राक्च शब्दानुशासनम्॥ § 1970

**ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येय*** इति विहितो ज्ञाने धर्मः शास्त्रपूर्वप्रयोगेऽभ्युदय इति च व्याहताभिधानम्। यदपि च शब्दापशब्दज्ञानलाघवं प्रयोजनत्वेनोपदिष्टं तन्निराकृतप्रयोजनान्तरस्य लाघवमात्रमेवावशिष्यत इति सत्यमेवोक्तम्। § 1971

यदि वा गौरवस्यैव लघुत्वमुपचर्यते।
विपर्ययापदेशेन शूरे कातरशब्दवत्॥ § 1973

लोकप्रसिद्धानामेव शब्दानामत्यन्तविषमधातुगणोणादिसूत्रादिभिरलौकिक-
संज्ञापरिभाषानिबद्धप्रक्रियैरनवस्थितस्थापनाक्षेपसिद्धान्तविचारैः क्लेशेनानन्तं ग-
त्वा यथावस्थितानुवादमात्रमेव क्रियते, तत्रापि चोदाहरणव्यतिरिक्तेषु कस्य- 266
चिदेव लक्षणयोजनसामर्थ्यं दृश्यते। तेनात्यन्तगुरुः सन्नयमुपायस्तुत्यर्थमेव
लघुरित्युपचरितः। **यदपि केन चिदुक्तम्—** § 1974

तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते॥ इति। § 1975

तद्रूपरसगन्धस्पर्शेष्वपि वक्तव्यमासीत्। § 1976

को हि प्रत्यक्षगम्येऽर्थे शास्त्रात्तत्त्वावधारणम्।
शास्त्रलोकस्वभावज्ञ ईदृशं वक्तुमर्हति॥ § 1978

अत एव श्लोकस्योत्तरार्धं वक्तव्यम्। § 1979

तत्त्वावबोधः शब्दानां नास्ति श्रोत्रेन्द्रियादृते॥ इति। § 1980

---

१४ *] म. भा. पस्पशाह्निके।

न ह्यत्र कश्चिद्विप्रतिपद्यते बधिरेष्वेवमदृष्टत्वात्। § 1981

असंदेहश्च वेदार्थे यदप्युक्तं प्रयोजनम्।
तदप्यसद्यतो नास्मात्पदवाक्यार्थनिर्णयौ॥§ 1983

यतः पदार्थसंदेहास्तावद्बहवो वृद्धव्यवहारादेव निवर्त्तन्ते। शेषाश्च निगमनिरुक्तकल्पसूत्रतर्काभियुक्तेभ्यः सर्वेषामर्थप्रतिपादनपरत्वात्। व्याकरणेन पुनरतन्त्रीकृत्यार्थं पदस्वरूपमात्रेऽन्वाख्यायमाने दूरादपेतमेवार्थज्ञानम्। तथा हि— § 1984

धातुभ्यः कल्पिते नाम्नि क्रियायोगोऽनुगम्यते।
न चाभिधानवेलायां तत्प्रतीतिर्मनागपि॥§ 1986

**'गमेर्डोः'*** इत्येतद्व्युत्पत्त्यनुसारी हि गन्तृमात्रमेव गोशब्दवाच्यमध्यवस्येत्। जातिशब्दश्चायं वृद्धव्यवहारेऽवस्थितो यत्र प्रसिद्धस्तत्रान्वाख्यातव्यः। तथा च— § 1987

कुशलोदारशब्दादेर्यावत्यनुगमः स्थितः।
न तावत्येव शब्दार्थप्रसिद्धिर्व्यवतिष्ठते॥§ 1989

अश्वकर्णाजकर्णादौ समासानुगमे सति।
अपेतावयवार्थोऽर्थो दृश्यते वृत्तशब्दवत्॥§ 1991

एवं राजन्यशब्दादेरयतत्वाद्यनादरः।
व्याक्रियाविपरीतोऽपि स्थितो लोकप्रसिद्धितः॥§ 1993

तथा वेदविरुद्धेऽर्थे दृष्टं शब्दानुशासनम्।
तत्तथा यदि गृह्येत वेदाङ्गत्वं विरुध्यते॥§ 1995

**'कलेर्ढक्'*** **'वामदेवाड्ड्यड्ड्यौ' इति*** कलिवामदेवदृष्टसामाभिधानप्रतिप-
267 त्तिर्वैयाकरणस्य भवति। वेदे तु **"ततो वसु वामं समभवत् तस्माद्वामदेव्यम्"** **"यदकालयत्तत्कालेयस्य कालेयत्वम्"** इत्याद्यर्थव्युत्पत्तिदर्शनं व्याकरणानुसारिणीं प्रतिपत्तिं बाधते। तथा कल्पसूत्रकारैः **कृष्णशं वासः कृष्णवलक्षे अजिने** इत्येवमादिषु कृष्णदशादिविवरणाश्रयणाद्व्याकरणशतेनाप्यनवगता अर्था वेदार्थवित्परम्पराप्राप्ता वेदवाक्यपौर्वापर्यावगतयूपादिशब्दार्थाश्च व्याख्यायन्ते। यथा चैवमादिषु व्याकरणानपेक्षाणामेव निःसंशयार्थप्रतिपत्तिस्तथा स्थूलपृषत्यादिशब्दार्थेष्वपि व्याख्यातृपरम्परैव निर्णयक्षमेति न व्याकरणमपेक्षितव्यम्। किं च— § 1996

---

१० *] उणादिसू॰ २३५।
२१ *] पा. सू. (४—२—८)
२१ *] पा. सू. (४—२—९)।

वाक्यार्थेषु च संदेहा जायन्ते ये सहस्रशः।
नैषां व्याकरणात्कश्चित्पूर्वपक्षोऽपि गम्यते॥§ 1998

यदि वेदार्थासंदेहप्रयोजनं व्याकरणं भवेत्ततः किमर्थवादाः स्वतन्त्राः कंचिदर्थं प्रतिपादयन्त्यथ विधिशेषभूताः। तथा किमूर्गवरोधनमौदुम्बरत्वस्य फलमुत प्रशंसार्थमुपात्तमिति। तथा हेतुविधिहेत्वर्थवादमन्त्रप्रयोगदृष्टादृष्टार्थत्वादिषु ग्रहैकत्वविवक्षादिषु च संदेहानपनयेत्। अथैवमादिषु मीमांसासिद्धत्वाद्व्याकरणेऽनुपन्यासस्ततः कल्पसूत्रकारवचनसिद्धकतिपयस्थूलपृषत्याद्यर्थनिर्णयप्रयोजनता सुतरां नाऽऽश्रयणीया। अपि च— § 1999

लक्षणोत्थेऽपि संदेहे व्याख्यानादेव निर्णयः।
वेदशब्देष्वपि व्याख्या नैव दण्डैर्निवार्यते॥§ 2001

**‘व्याख्यानतो विशेषप्रतिपत्तिः’*** इत्यनयैव परिभाषया न हि **संदेहादलक्षणम्**इतिवन्न हि संदेहादवेद इत्यपि शक्यं वक्तुम्। § 2002

न चागृहीतशब्दार्थैः कैश्चिद्व्याकरणाश्रयात्।
व्याख्यातुं शक्यते वेदो यतः स्यात्तेन निश्चयः॥§ 2004

यथैवावस्थितो वेदस्तथा व्याख्याऽपि सर्वदा।
अतः स्थूलपृषत्यादिव्याख्या व्याकरणादृते॥§ 2006

न च लोके प्रयुक्तानां पदानां दृश्यते स्वरः।
व्यवहाराद्बहिर्भूतात्स्वरान्नातोऽर्थनिश्चय॥§ 2008

वृद्धव्यवहाराधीनं शब्दार्थावधारणं तत्र च समासान्तोदात्तत्वपूर्वपदप्रकृतिस्वरत्वादिप्रयोगविभागाभावान्न तत्कृताऽर्थविशेषव्यवस्था। § 2009

यत्र त्वस्ति स्वरज्ञानं वेदवाक्येष्वविश्रुतम्।
तत्र नैव पदार्थानामवधारणसंभवः॥§ 2011

तत्रापि निर्णयो यः स्यादर्थप्रकरणादिभिः। 268
तत्र तैरेव सिद्धत्वान्न स्वरस्याभिधाङ्गता॥§ 2013

तेनादृष्टार्थ एवायं स्वरपाठोऽवगम्यते।
सर्वदा ब्रह्मयज्ञाङ्गद्रव्ययज्ञजपेषु च॥§ 2015

व्याकरणानुगमोऽपि चास्य यदि नाम कथंचित्तदुपयोगार्थ एव भवेन्नतु लौकिकप्रयोगार्थः। अत्यन्ताप्रयुक्तत्वात्। § 2016

११ *] म॰ भा॰ (प्रत्याहाराहनिके लण्सूत्रे)

न च व्याकरणोक्तेन स्वरेणार्थस्य निर्णयः।
शब्दानुशासनं ह्येतद्दृष्टं नार्थानुशासनम्॥§ 2018

तस्मादसंदेहार्थमपि नाध्येयं व्याकरणम्। न ह्येतदर्थनिश्चयाङ्गभूतस्वरविशेषप्रयोगोत्पत्तिशास्त्रम्। यान्यपि च ‘इमानि भूयः शब्दानुशासनस्य प्रयोजनानि’ इत्येवमुपन्यस्तानि तेषामपि कानिचित्प्रयोजनत्वयोग्यान्येव न संभवन्ति, कानिचित्प्रयोजनाभासानि, कानिचिदप्रमाणकानि। अपि च—
§ 2019

अर्थवत्त्वं न चेज्ज्ञातं मुख्यैर्यस्य प्रयोजनैः।
तस्यानुषङ्गिकेष्वाशा कुशकाशावलम्बिनी॥§ 2021

तत्र यस्तावत्तेऽसुरा इत्याद्यसुरपुराकल्पार्थवादप्रक्रमेऽपशब्दप्रतिषेधः प्रयोजनत्वेनोपन्यस्तः स यथावस्थितस्तथोक्तं प्राक्। दुष्टः शब्द इत्यत्रापि बहुजनप्रसिद्धशिक्षाकारपठितमन्त्रपदोद्धारेण शब्दपदं प्रक्षिपता स्वपक्षानुरागो दर्शितः। दुष्टमन्त्रप्रयोगे त्विष्यत एव यजमानस्य प्रत्यवायः। **‘यद्धोता जहाति वाग्घि तद्यजमानं जहाति’** इत्येवमादिभिः सर्वर्त्विक्प्रयोज्यमन्त्रविनाशेषु यजमानगामिदोषदर्शनात्। तथा च **‘इन्द्रशत्रुर्वर्धस्व’** इति मन्त्रप्रयोगविनाशदोष एवोदाहृतः। यत्तु निरुक्ते **‘यदधीतमविज्ञातं निगदेनैव शब्द्यते’*** इत्युक्तं, तदस्माभिः प्रथमसूत्र एवार्थशब्दं व्याचक्षाणैः स्नानस्मृत्यतिक्रमकारणत्वेनोपवर्णितम्। **‘अनतिक्रामन्तो वेदमर्थवन्तं सन्तमनर्थकमवकल्पयेम, दृष्टो हि तस्यार्थः कर्मावबोधनम्’** इति। ततश्चाव्याख्यातेन वेदेनार्थप्रकाशनाकरणात् **‘न तज्ज्वलति कर्हि** चित्’ इति। सत्यमेवैतत्। न तु व्याकरणस्य तत्रोपयोगः। कर्मप्रयोगोत्पत्तिं प्रत्यशास्त्रत्वात्। शब्दशास्त्रमेतदिति चेत्तेष्वपि पूर्वोक्तेन निर्मूलत्वेन न व्यवस्था स्यात् तस्मात्कल्पसूत्रनिरुक्तमीमांसानामेवाधीतमन्त्रब्राह्मणार्थविज्ञानोपयोग-
269 क्षमत्वादेतत्प्रयोजनं युक्तं, न तु व्याकरणस्य। ***यस्तु प्रयुङ्क्ते इत्येतदपि मन्त्रब्राह्मणशब्दस्य** सम्यक्प्रयोगप्रयोजनमेव विज्ञायते। यथासमाम्नातादन्यथाकरणाच्च **“दुष्यति चापशब्दैः”** इति। स्वाध्यायाध्ययनाध्यापनयजनयाजनगत**वेदशब्दविनाशे**ऽपि **‘यदृक्तो यज्ञ आर्तिमियात्’ इत**। एतद्वचनादवगतदोषानुवादोऽपीत्यवगम्यते। **वाग्योगविदिति** च बहुलोकव्यवहारदर्शनाद्विदितपदपदार्थसंबन्धः पुमान्, **ब्राह्मण**वाक्येषु चोद्दिश्यमानोपादीयमानगुणप्रधानादिनिरूपणावधृतवचनव्यक्तिविशेषो **मन्त्रेषु** चावगतचोदिताचोदितस्वार्थपरार्थप्रकाशनार्हत्वानर्हत्वविदेव च वाग्योगविदित्युच्यते न वैयाकरणः।

१७ *] अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचिदिति शेषः।
२४ *] यस्तु प्रयुङ्क्ते कुशलो शब्दान्यथावद्व्यवहारकाले। सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः। म. भा.।

वैयाकरणस्यैवंविधप्रयोगोत्पत्त्यशास्त्रत्वात्। **यदप्यविद्वांस** इति, **प्रत्यभिवादे** नामान्त्यस्वरप्लुतानभिज्ञनिन्दावचनं, तत्प्लुतस्य त्रिमात्रस्य लोकप्रसिद्धत्वान्मन्वाद्युपदिष्टनामान्त्यप्रयोगसिद्धौ लब्धायां तत्प्रयोगोत्पत्त्यशास्त्रत्वम्। न च तावता मन्वादि**भिरनेन** चोदाहृतेन श्लोकेन प्रकृतिप्रत्ययादिविभागद्वारेण शब्दापशब्दविवेकज्ञान तदुपयोगो वाऽऽश्रीयते। **यच्च ‘प्रयाजाः सविभक्तिकाः कर्तव्याः’** इति तद्याज्ञिकोपदेशसिद्धत्वाद् ब्राह्मणे च षडहविभक्तयः **“अग्निर्वृत्राणि जङ्घनत्” “अग्निं वो वृत्रहन्तमम्” ‘अग्निनाऽग्निः समिध्यते’** इत्येवमादिविभक्तविभक्तिप्रयोगदर्शनादन्तरेणापि व्याकरणं वैभक्तिकमात्रालोचनेनापि वा सविभक्तिकप्रयाजप्रयोगसिद्धेरशास्त्रं व्याकरणम्। **“यो वा इमां पदशः स्वरशो वाचं विदधाति स आर्त्विजीनो भवति”*** इति सम्यग्वेदाध्याय्येवमभिधीयते। तथा **“चत्वारि वाक्परिमिता पदानि”** इति यानि तावदोंकारमहाव्याहृत्यादिचतुष्टयबाहुल्यप्रयोजनानुसरणेन नैरुक्तैरप्यक्षरवर्णसाम्यान्निर्ब्रूयादितिवत्प्रपञ्चितानि, न तत्र व्याकरणस्य कश्चिदधिकारः। यत्तु नामाख्यातोपसर्गनिपातचतुष्टयानुगतं वैयाकरणमतमाश्रितं तदपि चतुष्टयस्य लोकसिद्धत्वादेव नातीव व्याकरणापेक्षम्। एतद्विषयत्वे च वर्ण्यमाने **“तुरीयं वाचो मनुष्या वदन्ति”** इत्यसंबद्धमेव स्यात्। चतुर्णामपि पदजातानां मनुष्यैरुच्यमानत्वात्। तस्मादयमस्य मन्त्रस्यार्थः पौर्वापर्यसंगतो वर्ण्यते। **“चत्वारि वाक्परिमिता पदानि”** इति यैर्वाक्पद्यते गम्यते तानि चत्वारि प्रत्यक्षानुमानोपमानार्थापत्त्याख्यानि प्रमाणान्यभिधीयन्ते। तत्र यानि प्रतीकविधिप्राकृतवैकृतवाक्यसारूप्यदृष्टानुपपद्यमानादिप्रभवैरनुमानोपमानार्थापत्त्याख्यैस्त्रिभिर्गम्यन्ते, तानि तत्सिद्धत्वादेव नेङ्गयन्ति नोच्चारयन्ति। यस्तु भागस्तैरशक्यः प्रतिपादयितुं तं तुरीयं प्रत्यक्षसमधिगम्यमध्येतारो मनुष्या वदन्ति समामनन्तीत्यर्थः। षट्प्रमाणीमध्याच्च प्रमाणद्वयं वाक्पदत्वादपोद्धृतम्। अभावस्तावदभावविषयत्वादेव वाक्पदं न भवति। आगमस्य पुनर्वागात्मकत्वात्पद्यमानवागाश्रितस्य पदत्वाश्रयणमनुपपन्नम्। प्र- 270
त्यक्षपक्षनिक्षिप्तत्वात्पृथक्त्वेनानिर्देशः। *चत्वारि शृङ्गेत्यस्य तु विषुवति होतुराज्ये प्रयुक्तस्य योऽर्थः स मन्त्राधिकरणे व्याख्यातः। न चात्र काचिद्व्याकरणापेक्षा। यत्तु चत्वारि पदजातानि शृङ्गाणीत्येवमादिसंख्यासामान्यमात्रेण कर्मविनियोगानपेक्षमर्थान्तरं वर्ण्यते, तद्व्याकरणकृतवाक्कौशलमात्रम्। तादृशं च वैशेषिकादिष्वपि तदभियुक्तैः शक्यं योजयितुमित्यनादरणीयम्। **“उतत्वः पश्यन्”*** इत्यपि लोकनिरुक्तकल्पसूत्रमीमांसाश्रयोत्पन्नपदार्थवाक्यार्थज्ञानप्रशंसार्थ एव मन्त्रो विज्ञायमानो न व्याकरणमद्रियते। एवं **“सक्तुमिव तित-**

---

१ द] अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदः। कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत्। इति महाभाष्ये व्याकरणस्य स्त्रीसाम्यपरिहारप्रयोजनत्वकथनार्थमुपन्यस्तः श्लोकः।

१० *] ऋ० सं० (२—३—२२)।

२६ *] ऋ० सं० (३।८। १०)।

३१ *] ऋ० सं० (८।२ २३)।

**उना**”* इत्येषोऽप्यविप्लुतस्वाध्यायाध्ययननिर्मलवेदाक्षरार्थज्ञानप्रशंसार्थं पूर्ववदेव वर्णनीयः। “**आहिताग्निरपशब्दं प्रयुज्य**”* इति, व्याख्यातमेवैतत्। यदपि नामकरणे, घोषवदाद्यन्तरन्तस्थं द्विचतुरादिवर्णकृदन्तपरिग्रहतद्धितवर्जनवचनं, तत्कृत्तद्धितसंज्ञयोर्व्याकरणेऽपि पूर्वप्रसिद्धयोरेवोपादानाद्वर्णपरिमाणस्य च प्रत्यक्षपूर्वकस्मृत्यधीनत्वाद् घोषवत्त्वादीनां च शिक्षाप्रातिशाख्येष्वनुक्रमणात्सर्वैश्च श्रोत्रियैरक्लेशेन नामकरणान्न व्याकरणं नाम प्रयोगोत्पत्तिशास्त्रत्वेनापेक्षणीयम्। “**सुदेवोअसि वरुण६**” इत्यत्र यद्यपि तावत्सप्त विभक्तस्य एव सप्त सिन्धव इति व्याख्यायन्ते तथाऽपि तासां विभक्तिसंज्ञामात्रं व्याकरणेन क्रियते प्रसिद्धमेव वा गृह्यते। यानि तु प्रयोगरूपाणि तानि लोके वेदे च विभागशः प्रत्यक्षाण्येवेति न व्याकरणापेक्षयैवमभिधीयन्ते। यदा पुनः सप्त सिन्धवो नद्य एव यज्ञर्त्विग्यजमानप्रशंसापक्षे वा सप्त होत्रागता वाचः सप्त सामस्वरगतास्तद्भक्तिंगता वा परिगृह्यन्ते, तदैतिहासिकयाज्ञिकगोचरापन्नत्वादविषय एव व्याकरणस्य। § 2022

संस्कृतानां च शब्दानां साधुत्वे परिकल्पिते।
वक्तव्यः कस्य संस्कारः कथं वा क्रियते पुनः॥ § 2024

व्याकरणेन शब्देषु संस्क्रियमाणेषु न ज्ञायते किं वस्तु संस्क्रियते को वा संस्कार उत्पत्तिप्राप्तिविकारापूर्वसाधनसामर्थ्याधानानां क्रियत इति। § 2025

न तावदस्ति शब्दत्ववर्णत्वव्यक्तिसंस्क्रिया।
सर्वत्रातिप्रसङ्गेन न व्यवस्था हि सिध्यति॥ § 2027

शब्दत्वे संस्कृते स्याद्धि ध्वनीनामपि साधुता।
वर्णत्वेऽप्येकवर्णानां गाव्यादीनां च तुल्यता॥ § 2029

एतेन वर्णव्यक्तिसंस्कारः प्रत्युक्तः। § 2030

271 गवादिषु गकारादिर्यः सकृत्संस्कृतः क्वचित्।
गाव्यादिषु स एवेति साधुरेव प्रसज्यते॥ § 2032

एवं प्रत्येकसंस्कारे न कस्यचिदसाधुता।
समुदायस्तु नैवास्ति तेषामयुगपच्छ्रुतेः॥ § 2034

येषां तावद्वर्णव्यक्तयः प्रध्वंसिन्य एव तेषां विनष्टानुत्पन्नानां संस्कारायोग्यत्वमेव। § 2035

---

१ *] ऋ° सं° (८। २। २२)।
२ *] म° भा° पस्पशाह्निके।
३ स्थं] अवृद्धं त्रिपुरुषानूकमनरिप्रतिष्टितं तद्धि प्रतिष्ठिततमं भवति इति शेषः म° भा° पस्प°। ६ ऋ° सं° (६। ५। ७)।

वर्तमानाऽपि संस्कारक्षणं नैवावतिष्ठते।
तावदेव विनश्येत्सा यावत्संस्कर्तुमिष्यते॥§ 2037

न च तां संस्कृतां भूयः कश्चन द्रक्ष्यति क्वचित्।
सक्तूनामिव संस्कारो होमेनैष प्रसज्यते॥§ 2039

यथैव होमसंस्कृतानां भस्मसाद्भावात्सक्तूनां पुनर्दर्शनविनियोगासंभवाद्द्वितीयाप्रतिपादितसंस्कार्यत्वपरिग्रहे सक्तवो होमस्तद्भावनाविधिरिति सर्वेषामनर्थकत्वं प्रसज्यत इति संस्कारानाश्रयणं, तथैव क्षणिकशब्दव्यक्तिसंस्कारपक्षे सर्वानर्थकत्वप्रसङ्गः। ततश्च योऽप्ययमनियमोऽभिहितो यद्येवं नित्यः शब्दोऽथापि कार्य उभयथाऽपि लक्षणं प्रवर्त्यमिति स एवमेव न्यायनिरूपणभयमात्राविष्करणार्थः शिष्यव्यामोहनार्थो वेति न युक्तः परिग्रहीतुम्। § 2040

अदूरविप्रकृष्टे च वस्तुन्यनियमो भवेत्।
शीतोष्णानियमं ब्रूयात्को नु वह्नेः सचेतनः॥§ 2042

उत्पादश्चैव संस्कारः कार्यपक्षे भवेदयम्।
ततश्च सुतरां प्राप्ता प्रयोगोत्पत्त्यशास्त्रता॥§ 2044

व्याकरणप्रक्रियानुगृहीतेन वैयाकरणेनोत्पाद्यमानेषु साधुशब्देषु नित्यवेदमूलत्ववेदाङ्गत्वनिराकरणं स्वयमेवाऽऽपादितम्। § 2045

अथ व्याकरणोत्पन्नैः शब्दैर्वेदोऽपि निर्मितः।
ततो व्याकरणस्येव वेदस्याप्यप्रमाणता॥§ 2047

शब्दश्चोत्पाद्यमानत्वे क्षणान्न स्यात्क्षणान्तरे।
तादृशस्य च संस्कारो न शक्यो नोपयुज्यते॥§ 2049

तस्मादनियमं मुक्त्वा नित्यः संक्रियते यदि।
विक्रियाख्योऽपि संस्कारस्ततो नैवास्य संभवेत्॥§ 2051

विना व्याकरणादाप्तिः सिद्धा श्रोत्रसमाश्रया।
अदृष्टार्थस्तु संस्कारो विध्यभावान्न गम्यते॥§ 2053

दृष्टार्थेषु च शब्देषु नादृष्टेन प्रयोजनम्। 272
न हीष्टं भोजनार्थानां व्रीहीणां प्रोक्षणात्फलम्॥§ 2055

कर्मप्रकरणाम्नाता न च व्याकरणक्रिया।

येनापूर्वप्रयुक्तानां शब्दानां संस्कृतिर्भवेत्॥ § 2057

हन्त्यादिविधिवन्नापि संभवी व्याक्रियाविधिः।
पौरुषेयं कथं वस्तु विदध्याच्छाश्वतो विधिः॥ § 2059

तेनानारभ्यवादेऽपि विधिर्नैवास्ति तादृशः।
अनारभ्य विधित्वे च न कर्मार्थत्वसंभवः॥ § 2061

ऐकान्तिकं हि संस्कार्यं यत्क्रतौ स्यात्स्रुवादिवत्।
तद्द्वारेण क्रतुप्राप्तिर्न लोकव्यभिचारिणः॥ § 2063

लोकवेदगतत्वाच्च शब्दानां व्यभिचारिता।
अतो न व्याक्रिया गच्छेत्तदुपस्थापितं क्रतुम्॥ § 2065

आकाशेऽवस्थितः शब्दः संस्कर्तुं शक्यते कथम्।
नित्यत्वान्मूर्त्यभावाच्च व्योमाश्रितविभुत्ववत्॥ § 2067

वर्णसंस्कारमात्रं च यदि व्याकरणाद्भवेत्।
प्रत्याहारेण तत्सिद्धेर्नोत्तरेण प्रयोजनम्॥ § 2069

समुदायस्त्ववस्तुत्वान्नैव संस्कारमर्हति।
प्रत्येकं च भवेद्यद्वदग्निधर्मः प्रतीष्टकम्। § 2071

न च स्थलवदारम्भो वर्णैः शब्दस्य कस्य चित्।
येन तत्संस्कृतिः सिध्येत्स हि पूर्वं निराकृतः॥ § 2073

स्फोटगोशब्दताङ्गत्वप्रभृतौ पदकल्पना।
गकारादिपदव्याख्याद्वारेणैव निराकृता॥ § 2075

सर्ववर्णसमूहोऽपि न संस्कार्यः कथंचन।
न तस्यार्थप्रयुक्तत्वमस्ति ह्यनभिधानतः॥ § 2077

अथ त्रिचतुरा वर्णाः संस्क्रियन्ते पदे पदे।
संख्यामात्रस्य साधुत्वं तच्च स्यादितरेष्वपि॥ § 2079

संस्क्रियेतानुपूर्वी चेच्छब्दधर्मो न सेष्यते।
ग्रहणोच्चारणस्थत्वाद्गाव्यादिषु च संभवात्॥ § 2081

ग्रहणोच्चारणे एव संस्कार्ये यदि मन्यसे।
कर्मणः कर्मसाध्यत्वमुपरिष्टान्निषेत्स्यते॥ § 2083

वक्ष्यति हि— § 2084 273

**कर्तृगुणे तु कर्मासमवायाद्वाक्यभेदः स्यादिति***। § 2085

ताल्वादिश्रोत्रसंस्कारो न च व्याकरणाद्भवेत्।
वैद्योपदिष्टसंस्कारसंस्कार्यत्वावधारणात्॥ § 2087

मनो वा पुरुषो वाऽथ संस्कारास्पदमिष्यते।
शब्दानुशासनं शास्त्रमिति व्यर्थं तदा भवेत्॥ § 2089

शिष्यानुशासनत्वं हि शास्त्राणामुपपद्यते।
शब्दस्याननुशास्यत्वाद्व्यर्थं तदनुशासनम्॥ § 2091

स्फोटशब्दे च संस्कारः सुतरां नोपपद्यते।
असन्तौ तत्र हि स्यातां प्रकृतिप्रत्ययावपि॥ § 2093

वाक्यस्फोटश्च यैरिष्टः सर्वावयववर्जितः।
नामाख्यातादि संस्कार्यं तेषां शशविषाणवत्॥ § 2095

अपोद्धारेण संस्कारो यद्यत्राभ्युपगम्यते।
शृङ्गं शशादपोद्धृत्य किं न संस्क्रियते मनाक्॥ § 2097

अन्यावयवसारूप्यादपोद्धारो यदीष्यते।
खरशृङ्गेण सारूप्याच्छशशृङ्गस्य किं न सः॥ § 2099

गवयादिषु नाङ्गानां सादृश्यं यन्निदर्शितम्।
सत्यावयवसामान्यात्तादिहापीष्यते तथा॥ § 2101

वाक्याधिकरणे चैतद्विस्तरेण निराकृतम्।
तेनापोद्धारसंस्कारकल्पनाऽपि न युज्यते॥ § 2103

अन्वाचक्षीत शास्त्रं चेच्छब्दानसदपोद्धृतान्।
एतेनैवाप्रमाणत्वमस्य माहेन्द्रजालवत्॥ § 2105

४ *] जै॰ सू॰ ( ३—१—१० )।
१४ नामाख्यातादि ] आदिशब्देन निपातोपसर्गयोः परिग्रहः।

अंशिष्यत्वादशास्त्रत्वमेवं तावत्पदं प्रति।
वाक्यानुशासनं नैव कृतं व्याकरणेन च॥§ 2107

अर्थेन च प्रयुक्तानां शब्दानां संस्क्रियोदिता।
वाक्यमेवंविधं चेष्टं न पदान्यर्थवर्जनात्॥§ 2109

ब्राह्मणार्थो यथा नास्ति कश्चिद्ब्राह्मणकम्बले।
देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः॥§ 2111

इति बहुप्रपञ्चमुक्त्वा केवलस्य चाप्रयोगादर्थप्रयुक्तत्वं निराकृत्य
वाक्यान्वाख्यानार्थमेव व्याकरणमपि व्याख्यानं युक्तमासीत्तदनाश्रयणात्तु
274 सूत्रवार्तिकभाष्यकारवदेव पूर्वापरविरुद्धमभिदधानैष्टीकाकारैरपि सुतरां
व्याकरणस्याप्रत्ययितपुरुषप्रणीतत्वं दर्शितम्। § 2112

अतो विगानभूयिष्ठाद्विरुद्धान्मूलवर्जितात्।
निष्फलाच्च व्यवस्थानं शब्दानां नानुशासनात्॥§ 2114

ततश्च— § 2115

स्वाध्यायाध्ययनं मुक्त्वा तत्प्रयोगश्च कर्मसु।
शेषशब्दप्रयोगेषु न व्यवस्थोपयुज्यते॥§ 2117

तेन सर्वैर्भाषितव्यं सर्वे साधव इति। अत्रानुमानप्रयोगाः— § 2118

गावीगोण्यादयः शब्दाः सर्वे गोत्वस्य वाचकाः।
वृद्धैस्तत्र प्रयुक्तत्वाद्गौरुस्रेत्येवमादिवत्॥§ 2120

एवं साधुत्वमेतेषां सर्वेषामर्थसाधनात्।
श्रोत्रत्वान्नापशब्दत्वं पूर्वदृष्टान्तदर्शनात्॥§ 2122

अनादित्वं च सर्वेषामवध्यनवधारणात्।
वक्तुर्वक्तुः पुरो वृत्तेः शक्यं वक्तुं गवादिवत्॥§ 2124

साधुभिर्भाषमाणानां नादृष्टफलसंभवः।
दृष्टार्थत्वाद्यथा धूमादग्निं देशेऽवगच्छताम्॥§ 2126

अशास्त्रविहितत्वाच्च बुद्धशब्दाभिधानवत्।
शास्त्रं नावेदरूपत्वात्प्राकृतव्याक्रियादिवत्॥§ 2128

वेदमूलतयाऽप्यस्य प्रमाणत्वं न कल्पते।

अवेदविषयार्थत्वान्नाटकादिनिबन्धवत्॥ § 2130

शास्त्राङ्गमपि नैवैतदतादर्थ्यात्कथादिवत्।
अतादर्थ्यं विनाऽप्यस्माद्वेदेनार्थावबोधनात्॥ § 2132

न च शब्दप्रयोगाङ्ग सिद्धे तस्मिन्प्रवर्तनात्।
यदीदृशमनङ्गं तद्दृष्टं नेत्रानुमानवत्॥ § 2134

यथा हि चक्षुरादिग्रहणानपेक्षरूपादिविज्ञानसिद्धौ तज्जनितार्थापत्तिप्रभवं चक्षुराद्यनुमानमुपजातमपि न पूर्वज्ञानस्याङ्गमेवं लोकवेदसिद्धशब्दप्रयोगोत्तरकालप्रणीततया व्याकरणमप्यनङ्गम्। § 2135

तस्मात्पर्यायशब्दत्वाद्गाव्यादेस्तरुवृक्षवत्।
आचारेण प्रयोज्यत्वं न शास्त्रस्थैर्निवारितम्॥ २४॥ § 2137

275

एवं प्राप्तेऽभिधीयते— § 2138

अनैकान्तिकता तावदर्थापत्तेरिहोच्यते।
अन्यथाऽप्युपपन्नत्वात्प्रयोगार्थावबोधयोः॥ § 2140

वाचकत्वादृते यस्तु न कथंचित्प्रयुज्यते।
प्रयोगप्रत्ययायत्ता तत्र वाचकता ध्रुवम्॥ § 2142

संशयप्रतिबद्धे च पूर्वपक्षार्थनिर्णये।
इष्टार्थनिश्चयः शक्यः सुखं सिद्धान्तहेतुना॥ § 2144

दृढविपर्ययज्ञानानन्तरं सहसैव च सम्यग्ज्ञानोत्पादातिभाराद्वारैकदेशावतारणार्थं संशयोत्थापनामात्रमेव तावद्युक्तम्। अथ वा— § 2145

संसिद्धव्यवहारत्वादनादित्वं यदाश्रितम्।
अपराधप्रसङ्गेन तत्रैषा संशयक्रिया॥ § 2147

यदि ह्येकान्तेन यादृशः परमुखाच्छब्दः श्रूयते तादृगेव सर्वेण सर्वदोच्चार्येत ततो वृद्धव्यवहारपरम्परायां सत्यां गवादिभिरिव न गाव्यादिभिः कश्चिदपि कालः शून्य आसीदित्यध्यवसायादनादित्वमङ्गीक्रियेत। अपराधजस्य शब्दस्य संभवात्तु तदाशङ्कायां सत्यां नैकान्ततः सर्वेषामनादित्वम्। प्रयत्ननिष्पत्तेरिति पूर्वोक्तन्यायावधारितप्रयत्नाभिव्यक्तिरेव हेतुत्वेनोपदिश्यते। अपर आह। अप्रयत्ननिष्पत्तेरपराधस्य भागितेति। यो ह्यस्खलितप्रयत्नः शब्दमभिव्यनक्ति तस्य परम्परागतशब्दोच्चारणमात्रात्सर्वे समानविधाना भवेयुः। यदा त्वप्रयत्ननिष्पत्तिरपि शब्दे संभाव्यते तदा तत्रापराधजरूपान्तरापत्तिप्र-

सङ्ख्यान्न नियोगतः सर्वशब्दानां समानविधानत्वम्। अथ वा शब्दविषयस्य प्रयत्नस्यैव या निष्पत्तिस्तस्यामपराधः सुनिपुणानामप्यविकलकरणानां दृश्यते किमुतानिपुणविगुणकरणानाम्— § 2148

यश्च प्रयत्ननिष्पत्तावपराधः कृतास्पदः।
शब्दे स तदभिव्यङ्ग्ये प्रसजन्केन वार्यते॥ § 2150

अतश्चानपराधेन व्यज्यमानेषु साधुता।
सापराधेष्वसाधुत्वं व्यवस्थैवं च तत्कृता॥ § 2152

276 लोकेऽपि च— § 2153

अविनष्टे विनष्टे च दृश्येते साध्वसाधुते।
तथा सति च तद्द्वारा सिद्धिः शब्दापशब्दयोः॥ § 2155

यद्वा सत्यत्वमेवेदं साधुत्वमभिधीयते।
असत्यत्वमसाधुत्वं धर्माधर्मोपयोगवत्॥ § 2157

धर्माधर्मव्यवस्था हि सत्यानृतनिबन्धना।
विहितप्रतिषिद्धत्वात्तयोश्चेष्टा सशास्त्रता॥ § 2159

अर्थसत्यं यथा वाच्यं शब्दसत्यं तथैव हि।
शब्दानृतं न हातव्यमर्थानृतवदेव नः॥ § 2161

एवं सति व्यवस्थाने भक्ष्याभक्ष्यविभागवत्।
प्रयोगोत्पत्त्यशास्त्रत्वादिति हेतोरसिद्धता॥ § 2163

अथ वा यदुक्तम्। § 2164

साधोर्नित्यप्रसक्तत्वादसाधोरप्रसङ्गतः।
न धर्मनियमोऽस्तीति तत्रेदमभिधीयते॥ § 2166

अपराधस्य भागित्वादुभयं सावकाशकम्।
साधोरनियता प्राप्तिरसाधोश्च प्रयोज्यता॥ § 2168

यदि हि साधुः प्रयुज्यमानो न कश्चित्कदाचिदपि विनश्येत्ततस्तस्य नित्यप्राप्तत्वान्निवर्त्यापशब्दाप्राप्तेश्च नियमशास्त्रमनर्थकं भवेत्। यदा त्वपराधभागित्वे सति द्वयोरप्यनियता प्राप्तिस्तदा साधुनियमकारिणः शास्त्रस्य न विषयव्याघातः। एक एवायं शब्दः पुरुषाशक्तिप्रमादकारणादिभेदात्तां तां वर्णन्यूनातिरेकक्रमान्यत्वाद्यवस्थामनुपतंस्तेन तेनापभ्रंशरूपेण गृह्यमाणस्तमेवार्थं

प्रतिपादयतीति न पर्यायकल्पनया वाचकशब्दान्तरत्वैकान्तसिद्धिः। किं च। § 2169

देवदत्तादिनामानि निःसंदिग्धानि यानि च।
बालैस्तत्तादिरूपेण नाश्यन्ते तैश्च संशयः॥§ 2171

तत्तादिशब्दादपि हि बालप्रयुक्तात्तदनुकारिकठोरबुद्धिप्रयुक्ताद्वा देवदत्ताद्यर्थप्रत्ययमुपलभमानः कथमिव प्रयोगप्रत्ययदर्शकाभ्यामेव वाचकत्वमध्यवस्येत्। § 2172

अपभ्रंशाश्च ये केचिद्रूढा गाव्यादयो जने।
तेऽपि गाव्यादिरूपेण नाश्यन्ते व्यभिचारिताः॥§ 2174

कतिषुचिदेव गाव्यादिषु चिरापभ्रष्टत्वाद्रूढयाशङ्कया साधुत्वभ्रान्तिर्भवेत्। ये 277
तु संप्रत्येव जडप्रायज्ञानकरणैरभिनवगाव्यादिरूपेण विनाश्यशब्दाः प्रयुज्यमानाः प्रकृत्यनुसरणद्वारेण वाऽर्थं प्रत्यापयन्त उपलभ्यन्ते तेष्वपि प्रयोगप्रत्ययदर्शनमस्तीत्यनैकान्तिकता। § 2175

ततश्च त्वत्प्रयुक्तोऽयं हेतुरप्यपराधभाक्।
अनैकान्तिकतादोषान्न ह्यसौ साधनक्षमः॥§ 2177

अन्यथोच्चार्यमाणश्च शब्दोऽपभ्रश्यते यथा।
तथा हेतुरनैकान्ताद्धेत्वाभासत्वमृच्छति।§ 2179

तस्माद्दृष्टप्रयोगेऽपि पुनरस्ति विचारणा।
वाचकोऽयं न वेत्येवं सति वाऽन्येन निर्णयः॥ २५॥§ 2181

संशयापादनात्परपक्षे जितेऽपि स्वपक्षसिद्धिर्दुर्लभैवेत्येवमर्थमुत्तरसूत्रम्—**अन्यायश्चानेक शब्दत्वमिति**। कथं पुनरिदमन्याय्यम्। तदुच्यते— § 2182

वाच्यवाचकसामर्थ्यनियमो योऽभिधागतः।
संबन्धस्तदनेकत्वे स्वरूपात्सोऽपि हीयते॥§ 2184

एकात्मकयोरेव हि वाच्यवाचकयोरन्योन्याक्षेपात्परस्परनियमः संभवत्यन्यतरस्यापि त्वनेकत्वे सति व्यभिचारान्नियमहानिः। किं च— § 2185

सामर्थ्यं सर्वभावानामर्थापत्त्याऽवगम्यते।
एकसामर्थ्यसिद्धेऽर्थे नानेकं तच्च लभ्यते॥§ 2187

अत्यन्तादृष्टा हि वाच्यप्रत्ययान्यथानुपपत्तिमात्रप्रमाणिका वाचकशक्तिरेकत्रैव कल्पिता तदनुसार्यपभ्रंशेष्वपि चेदनुगम्यते को नाम तन्निरपेक्षवाचकशक्त्यन्तरकल्पनां लभेत। § 2188

नाम च व्यवहारार्थमर्थस्याभ्युपगम्यते।
तेनैकेनैव सिद्धेऽर्थे द्वितीयादि च निष्फलम्॥§ 2190

किं च— § 2191

विकल्पस्याष्टदोषत्वं पुरस्तादेव वर्णितम्।
स चेहानेकशब्दत्वे निश्चयेन प्रसज्यते॥§ 2193

278 नामान्तरे श्रुते चार्थस्तद्भिन्नोऽन्यः प्रतीयते।
संज्ञा चोत्पत्तिसंयोगादित्यत्रैतद्वदिष्यते॥§ 2195

या तु हस्तः करः पाणिरित्यत्रानेकशब्दता।
अनन्यगतिकत्वेन सा दृढस्मरणेन च॥§ 2197

एकशक्त्यनुसारेण यावत्त्वस्ति गतिः क्वचित्।
उपमानानुमानाभ्यां तावत्सैवानुगम्यते॥§ 2199

तस्मात्स्वरूपसंबन्धशब्दार्थत्वनिरूपणे।
एकैकनियमादेव गतिः स्यान्नान्यगोचरा॥§ 2201

यथा च प्रकृतिसारूप्यद्वारेणापभ्रंशाः प्राकृतीमेव शक्तिमाविर्भावयन्तोऽर्थप्रतिपत्तावुपयोगं गच्छन्तिं तथा **तदशक्तिश्चानुरूपत्वा**दित्यत्र वर्णयिष्यते। § 2202

तेनानेकप्रयोगेऽपि कश्चिदेवार्थसंगतः।
तदुपस्थापनेनान्ये बोधकास्तदशक्तिजाः॥ २६॥§ 2204

तुल्यप्रयोगप्रतिपत्तीनामन्यतरावधारणमशक्यामिति चेदत आह—**तत्र तत्त्वमभियोगविशेषात्स्यादिति**। कः पुनरभियोगः को वा तद्विशेषः कथं वा तेन वाचकत्वनिरूपणमिति। तदुच्यते— § 2205

लक्षणश्रवणाभ्यासादभियोगः प्रवर्तते।
तेन लक्ष्यान्तरज्ञानं तद्विशेषोऽभिधीयते॥§ 2207

प्रतिपदपाठो ह्यानन्त्यादत्यन्ताशक्यस्तदभावे च लक्षणानुसरणमेवैकमशेषलक्ष्यनिरूपणक्षमत्वेनावधार्यते। § 2208

तस्मान्न लोकवेदाभ्यां कश्चिद्व्याकरणादृते।
वाचकाननपभ्रष्टान्यथावज्ज्ञातुमर्हति॥§ 2210

---

७ संज्ञा] जै॰ सू॰ ( २—२—८ )। १५ था] जै॰ सू॰ ( १—३—८ )।

तत्सामस्त्यापरिज्ञाने पारिशेष्यानिरूपणात्।
अर्थापत्त्याऽपशब्दानां निश्चयो नोपपद्यते॥§ 2212

लक्षणानुगमाद्यांस्तु बहिरेव प्रयुञ्जते।
नियतप्रतिपक्षत्वात्तेष्वर्थापत्तिसंभवः॥§ 2214

तेनोभयज्ञानस्यापि व्याकरणमेवोपाय इति तद्गताभियोगविशेषाश्रयण- 279
म्। यत्तु प्रयोगोत्पत्तिशास्त्रत्वादिति लक्षणे तन्मूलासंभवादितरेतराश्रयत्वमुक्तं तल्लोकव्यवहारप्रसिद्धप्रतिपादकत्वमात्रेणानिर्णीतपारमार्थिकवाचकत्वैरपि व्याकरणावयवभूतैः पदैः केषांचित्साधुत्वमन्वाख्याय पुनस्तैरप्यन्वाख्यापकशब्दसाधुत्वनिर्णयात्परिहरिष्यते। § 2215

यदि वाचकतैवाऽऽदौ न स्याद्व्याकरणादृते।
न विज्ञायेत वा तत्र भवेदन्योन्यसंश्रयम्॥§ 2217

निर्ज्ञाते वाचकत्वेऽपि तदपभ्रंशसंकरात्।
विवेकप्रतिपत्त्यर्थमिष्टा च व्याक्रिया स्मृतिः॥§ 2219

तेन संकीर्णासंकीर्णवाचकज्ञानोपायत्वाल्लोकव्याकरणयोर्भिन्नविषयत्वेनापुनरुक्तता, वेदे साधुशब्दमात्रदर्शनादनर्थकं व्याकरणमिति चेत्। न। अकृत्स्नविषयत्वात्। § 2220

केचिद्व्यवस्थिता एव साधवो लोकवेदयोः।
सर्वशाखागतान्विद्यात्को वा साधारणानपि॥§ 2222

यथैव लौकिकप्रतिपदपाठस्याशक्यत्वमेवं वेदेऽपि सर्वशाखागतान्सकृदपि श्रोतुमशक्तिः किमुताध्येतुम्। § 2223

प्रकृतिप्रत्ययानन्त्याद्यावन्तः पदराशयः।
लक्षणेनानुगम्यन्ते कस्तानध्येतुमर्हति॥§ 2225

एतेन पुरुषार्थक्रत्वर्थादृष्टसाधुशब्दप्रयोगज्ञानसाध्यसाधनभावविधिवाक्यगतपदव्याक्रिया तस्याश्च पूर्वप्रसिद्धतन्मूलत्वकल्पनागतेतरेतराश्रयत्वप्रसङ्गः प्रत्युक्तः। यदि ह्येकान्तेन "तस्मान्न ब्राह्मणेन म्लेच्छितवै" "एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः शास्त्रान्वितः स्वर्गे लोके कामधुग्भवति" *"तस्मादेषा व्याकृता वागुद्यते" इति चैवमादिक्रतुपुरुषगतनियमविधिदर्शनोत्तरकालमेव व्याकरणेन प्रवर्तितव्यमिति पौर्वापर्यव्यवस्था भवेत्तत एवं पर्यनुयोगः प्रसज्येतापि व्याकृतत्वाश्रयो वेदविधिर्वेदविध्याश्रयं च व्याकरणं कथमवकल्पिष्यत इति। यदा

२७ *] तै॰ सं॰ ( ६—४—७ )

तु किंचिद्ग्रन्थोपनिबद्धप्रकृतिप्रत्ययादिविभागद्वारप्रक्रियात्मकव्याकरणस्मृतिव-
र्जितकालाभावादन्वाख्यानान्वाख्येयान्वाख्यातविधिप्रयोगानन्वाख्यातप्रतिषेधव-
र्जनषड्कस्याप्यवगम्यमानवेदविधिमूलत्वादनादित्वे सति सर्वेषां वेदवेदियूपाह-
वनीयाध्वर्युगोदोहनादिस्वरूपतत्कार्यतत्साधनविधीनामिव सर्वदाऽनवगत-
280 पूर्वापरविभागसंबन्धेऽत्यन्तादृष्टार्थत्वमेव केवलं शास्त्रप्रत्ययाधीनं, तदा स-
र्वकालव्याक्रियमाणविद्यमानशब्दनियमविधेर्न किंचिदनुपपन्नम्। यत्तु वाच-
कत्वावाचकत्वव्यतिरिक्तसाध्वसाधुताभावाद्वाचकावाचकत्वयोश्च लौकिकप्र-
योगप्रतिपत्तितद्विपर्ययमात्रशरणत्वाद्गाव्यादिशब्दानामवाचकत्वप्रतिज्ञाने लोक-
विरोधान्न भेर्यादिशब्दमातृकाक्षरपाठप्रसिद्धन्यूनातिरिक्तविपर्यस्तवर्णपदव्य-
तिरिक्तप्रसिद्धमध्ये कश्चिदपशब्दो नामास्तीति। तत्राभिधीयते— § 2226

संमुग्धवाचके लोके लक्षणाद्वाचकः स्फुटः।
गम्यते स्मरणं चोक्तमाचाराद्बलवत्तरम्॥ § 2228

लोकव्याकरणाभ्यां हि मिश्राभ्यामविप्लुतवाचकसिद्धिरिति तावदेव लोकव्यवहाराद्वाचकत्वज्ञानं जायते यावद्व्याकरणानुगतत्वं नाभ्युपगम्यते। § 2229

यदा तु तयोर्मार्गभेदेन प्रतिपत्तिस्तदा ‘तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्तिः स्यात्’* इत्युपन्यस्य ‘शास्त्रस्था वा तन्निमित्तत्वात्’ इत्यनेनैवोत्तरेण व्याकरणाख्यशास्त्रगतप्रतिपत्तिबलीयस्त्वं तदभियुक्तपुरुषबलीयस्त्वं वा पूर्वमेव स्थापितम्। § 2230

तर्केणावाचकत्वं च वदँल्लोकेन बाध्यते।
स्मर्यमाणविरोधस्तु ब्राह्मणाब्राह्मणादिवत्॥ § 2232

यथैव तुल्यशिरःपाण्याद्याकारेष्वपि संकीर्णलोकदृष्टिग्राह्येषु ब्राह्मणादिषु मातापितृसंबन्धस्मरणादेव वर्णविवेकावधारणं भवति तथा साधुशब्दावधारणमपीति लोकविरोधाभावः। § 2233

यथा च तुल्यपाण्यादिरूपत्वाद्वर्णसंकरम्।
वदतः स्मृतिबाधः स्यात्तथा वाचकसंकरम्॥ § 2235

आदितश्च स्मृतेः सिद्धः प्रत्यक्षेणापि गम्यते।
साध्वसाधुविभागोऽयं कुशलैर्वर्णभेदवत्॥ § 2237

यो नाम स्मृतिप्रतिपादितोऽर्थः कर्मफलसंबन्धवदनियतकालत्वान्न ज्ञायते कदा भविष्यतीति सोऽत्यन्तं प्रत्यक्षाद्यविषयत्वात्केवलशास्त्रमूलत्वेन स्थाप्यते। यस्य त्वादौ स्मरणजनितविवेके कृते तदनन्तरमेव प्रत्यक्षमपि विचाराभ्यासजनितसंस्कारस्य रागाभ्यासजनितषड्जादिविभागविषयमिव साध्वसाधुशब्दरूपगोचरमुपजायते। § 2238

---

१६ *] जै० सू० ( १—३—४ )

तस्मै तर्केण यो नाम साधयेच्छब्दसंकरम्।
तस्य प्रत्यक्षबाधोऽपि वर्णसंकरबाधवत्॥ § 2240

तेनापशब्दगतवाचकत्वापादनस्यैव समस्तप्रमाणविरोधः शक्यो वक्तुं न स्मर्यमाणशब्दसाधुत्वपक्षस्येति निरवद्यता। तेनादृष्टार्थप्रत्यायननियमप्रतिषेधद्वारं धर्माधर्मसाधनत्वकृतमपि साध्वसाधुत्वज्ञानमुपपत्स्यते। यस्त्वाह— 281
साधुत्वं नेन्द्रियग्राह्यमित्यादिश्लोकम्। तं प्रत्येवं वक्तव्यम्। § 2241

साधुत्वमिन्द्रियग्राह्यं लिङ्गमस्य च विद्यते।
शास्त्रस्य विषयोऽप्येष प्रयोगोऽप्यस्त्यसंकरः॥ इति। § 2243

ग्रस्तनिरस्ताम्बूकृतादिदोषवर्जितनियमह्रस्वादिकालाभिव्यङ्ग्ययथालक्षितक्रमग्राह्यवर्णानां स्मर्यमाणाविनष्टवाचकरूपविषयश्रोत्रज्ञानेनोदात्तादिवदिन्द्रियग्राह्यत्वम्। तदुत्तरकालप्रवृत्तव्यवहारगतार्थप्रतिपत्तिसहितलक्षणगतप्रकृतिप्रत्ययलोपागमविकारादेशादिलिङ्गमप्यव्यभिचारि विद्यते। शास्त्रस्य च द्विविधस्यापि श्रुतिस्मृतिरूपस्य स्वर्गलोकयज्ञोपकारसिद्धिसाधनभावप्रतिपादनार्थस्यार्थानर्थकार्यस्वरूपज्ञानार्थस्य चायमेवंविध एवान्योऽपि विषयः। अविनष्टैः शब्दैर्भाषमाणस्य स्वर्गयज्ञोपकारौ भवतः। याज्ञे च कर्मण्यपशब्दैर्भाषमाणस्यानृतमिव वदतः प्रतिषिद्धाचरणनिमित्तक्रतुवैगुण्यप्रसङ्गः। यथोक्तं "वाग्योगविद्दुष्यति चापशब्दैः" इति। एतौ द्वावप्यर्थौ न शास्त्रादृतेऽन्येन प्रतिपादयितुं शक्येते इत्यतीव शास्त्रविषयः। द्वाभ्यामेव च विधिप्रतिषेभ्यामविनष्टैः शब्दैः स्वर्गयज्ञोपकारकामो भाषेत न विनष्टैरिति न प्रतिशब्दापशब्दमनन्तविधिप्रतिषेधकल्पनप्रसङ्गः। न च विधिप्रतिषेधविषयेणैव शास्त्रेण भवितव्यं न प्रमेयस्वरूपज्ञापनार्थेनेत्येतदीश्वराज्ञासिद्धम्। न हि 'अविनाशी वा अरे अयमात्माऽनुच्छितिधर्मा' इत्यादि, 'चतुस्त्रिंशदाश्वीनानि सरस्वत्या विनशनप्लाक्षप्रश्रवणे' इत्येवमादिवाक्यशेषाणां च शास्त्रगतानामर्थतत्त्वप्रतिपादनपरत्वं न लभ्यते। नापि तत्प्रतिपादने शास्त्रशब्दवाच्यत्वबाधः। अथापि विधिप्रतिषेधात्मकेनैव शास्त्रेण भवितव्यमिति का चित्परिभाषा तथाऽप्येवंविधाः साधुशब्दाः प्रत्येतव्या इतीदृशो विधिः संभवत्येव। यो वाक्यान्तरावगतादृष्टफलार्थी यद्यविनष्टैः शब्दैर्भाषितुमिच्छेत् स चैतानेवंरूपानेतत्क्रममांत्रांश्च वर्णानुपाददीत नाधिकान्न न्यूनांश्चेति यावद्रूपं विधिप्रतिषेधौ शक्यौ दर्शयितुमिति शास्त्रविषयत्वसिद्धिः। निःसंदिग्धवृद्धबालप्रयुक्तदेवदत्ततत्तादिशब्दोपमयाऽपि च सर्वशब्दानां विनष्टाविनष्टरूपैरवश्यं भवितव्यमिति शक्यं विज्ञातुम्। एवं व्याकरणानुगतवैदिकशब्दाविनाशसादृश्यादपि तद्विधलौकिकाविनष्टत्वोपमानं दर्शयितव्यम्। तथा लौकिकार्थप्रत्ययोत्थापितवाचकत्वार्थापत्तिलभ्यस्तावदेकः साधुत्वनिश्चयः। ततः संभवत्प्रमादालस्यकरणवैगुण्यनिमित्तापभ्रष्टरूपवर्जितकेवलसाध्वन्वाख्यानस्यान्यथानुपपद्यमानत्वादपरयाऽप्यर्थापत्त्या सिद्धमेव साधुत्वज्ञानम्।
§ 2244

अपभ्रंशेषु साधुत्वं तुल्यार्थत्वाद्यदुच्यते।
लक्षणाभावमार्गेण तस्याभावोऽपि निश्चितः॥ इति॥§ 2246

282 षण्णामपि प्रमाणानां साध्वसाधुत्वनिर्णये।
व्यापारोऽस्तीति को जल्पेत्साधुत्वं निष्प्रमाणकम्॥§ 2248

यद्यप्यनभियुक्तानां प्रयोगोऽस्ति ससंकरः।
अभियुक्ता विवेक्ष्यन्ते तथाऽपि ब्राह्मणादिवत्॥§ 2250

यथा च पद्मरागादीन्काचस्फटिकमिश्रितान्।
परीक्षका विजानन्ति साधुत्वमपरे तथा॥§ 2252

यथा रत्नपरीक्षायां साध्वसाधुत्वलक्षणम्।
तथा व्याकरणात्सिद्धं साधुशब्दनिरूपणम्॥§ 2254

पौरुषेयव्याकरणागमपरम्परायामपि च तदनुगतसाधुत्वानन्तरदर्शनात्पूर्वदृष्टविवेकज्ञानमात्रपरत्वाद्वा नान्धपरम्परावचनन्यायप्रसङ्गः। यावानिह दृष्टार्थांशः स वैदिकविधिप्रतिषेधद्वयादेवोपपन्नः। तत्सिद्धयर्थाविनष्टशब्दरूपज्ञानं वेदशिष्टप्रयोगसंवादिव्याकरणान्वाख्यानपारम्पर्येण सद्यः फलत्वात्सुलभमिति न पुरुषकृतत्वनिमित्तदोषप्रसङ्गः। यत्तु दृष्टार्थत्वात्स्वसामर्थ्यप्राप्तत्वादेव 'अप्राप्ते शास्त्रमर्थवत्' इति वाचकभाषणविधानमनुपपन्नमिति तत्राधिकरणेनैवोत्तरं दास्यते 'नियमार्था वा श्रुतिरुच्यते' इति। यत्त्ववाचकत्वेनापशब्दानामप्रसङ्गाद्व्यावर्त्याभावे नियमानुपपत्तिरिति। तत्रोच्यते— § 2255

नियमः परिसंख्या वा न व्यावर्त्याद्विनेष्यते।
नित्यतामात्रकारी तु नियमः किं न लभ्यते॥§ 2257

सति भाषितव्ये कदाचिदविनष्टेन भाषेत कदाचित्प्रमादाशक्तिजापभ्रंशेनाप्यक्षिनिकोचनादिना वा शब्दरहितेनैव प्रत्यापयेत्। § 2258

अत्र श्रेयोऽर्थिनोऽवश्यं साधुभाषा नियम्यते।
नियोगेन हि तां कुर्वन्नपूर्वं साधयिष्यति॥§ 2260

---

१६ त्वादेव] जै॰ सू॰ ( ६—२—४ )। १७ ते] जै॰ सू॰ ( ४—२—९ )।

यद्यपि च नियमेऽन्यनिवृत्तिरवश्यं कल्पनीया तथाऽपि साधुशब्दस्मृतिव्यवहितानां कालरूढरूपभ्रान्तिवाचकत्वगृहीतानां चापशब्दानां संभवति प्रयोगप्रसङ्गे साधुनियमेन व्यावृत्तिः। § 2261

अथ वा नैवापशब्दानामपृथक्त्वे केचिदेकक्रियाविषयानेकद्रव्यगुणादिवदभिधायां प्राप्नुवन्ति ये साधुनियमेन व्यावर्त्येरन्। किं तु। § 2262

साधूनेव प्रयुञ्जाना नाशयेयुरयत्नतः। 283
मा विनीनशदित्येवं नियमस्तान्नियच्छति॥§ 2264

तद्यथा। 'यो विदग्धः स नैर्ऋतः' इत्येवमादिदोषनिन्दापूर्वकम् 'अविदहता श्रपयितव्यः' इति नियम्यते। तथा 'दुष्टः शब्दः स्वरतो वर्णतो वा' इत्यादिना निन्दितत्वात्, 'तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्दः' इति प्रमादादिनिमित्तविनाशेन शब्दकार्यादर्थसाधनादपेतोऽयं म्लेच्छः, *'म्लेच्छ अव्यक्तायां वाचि' इति स्मरणात्स न प्रयोक्तव्य इति प्रतिषेधः। 'तस्मादेषा व्याकृता वागुद्यते' इति च विधिरविनष्टप्रयोगनियमार्थः। § 2265

ननु चाशक्तिजा दोषाः प्रमादजनिताश्च ये।
परिहर्तुमशक्यत्वान्निषेधस्याप्यगोचराः॥§ 2267

उच्यते— § 2268

प्रमादमेव मा कार्षीः सामर्थ्याय यतस्व च।
एवमर्थो निषेधोऽयं नाऽऽद्रियेतान्यथा ह्यसौ॥§ 2270

अन्ये सुखमुखारूढा न क्लेशेन विवक्षवः।
शक्ताश्चैवाप्रमत्ताश्च वदेयुरनिवारिताः॥§ 2272

अशक्तैर्नाशिताश्चान्ये दाक्षिण्याद्यनुवर्तनात्।
जानन्तोऽपि प्रयुञ्जीरन् यदि शास्त्रं न वारयेत्॥§ 2274

अन्येऽपि प्राकृतालापैरशक्तैर्व्यवहर्तृभिः।
सह व्यवहरन्तस्तानुपेत्यापि प्रयुञ्जते॥§ 2276

तत्कथं नाम यत्किंचित्स्यादपभ्रंशकारणम्।

२ हितानां] विप्रकर्षाभिधायिकालशब्दोक्तानामपशब्दानां, रूढपदपरामृष्टो योऽस्मर्यमाणावधिदीर्घकालप्रयोगो यश्च रूपशब्दोक्तम्लेच्छभाषणविलक्षणसाधुशब्दसादृश्यात्मकोऽर्थः, तदुभयात्मककारणजन्यया भ्रान्त्याऽऽधुनिकैर्वाचकत्वेन गृहीतानामित्यर्थः।
१२ *] मा॰ धा॰ ( २०५ )।

दूरात्परिहरेयुस्तदिति यत्नो नियम्यते॥ § 2278

यत्तु दृष्टार्थप्रत्यायननिराकाङ्क्षत्वाददृष्टार्थप्रयोगोत्पत्त्यशास्त्रत्वमिति। तत्रोच्यते— § 2279

दृष्टे सत्यपि सर्वत्र नियमादृष्टमिष्यते।
क्रत्वर्थं पुरुषार्थं च तत्संयोगपृथक्त्वतः॥ § 2281

*‘एकस्य तूभयत्वे संयोगपृथक्त्वं' तच्चेह प्रकरणानारभ्यवादाभ्यामवगतं, तत्र— § 2282

क्रत्वर्थांशे परार्थत्वादर्थवादः फलश्रुतिः।
पुरुषार्थे तु निर्देशात्फलमात्रेयदर्शनात्॥ § 2284

क्रत्वर्थं ह्यतिर्ज्ञातोपायत्वात्सर्वादृष्टोपसंग्रहक्षममिति नियमापूर्वमात्मसात्कुर्वत्पुरुषार्थांशे फलश्रुतिमर्थवादी करोति। पुरुषार्थस्य नियमस्य त्ववश्यकल्पनीयप्रयोजनत्वादर्थप्रतिपत्तेश्चापभ्रंशेऽप्यक्षिनिकोचादिभ्यो वा सुतरां
284 सिद्धत्वादनाकाङ्क्षितनियमापूर्वोपजीवनसामर्थ्यं नास्तीत्यवश्यमर्थवादोपात्तमेव स्वर्गलोके कामधुगाद्येव फलत्वेनाऽऽश्रयणीयम्। यत्तु न ज्ञायते क्वेदं नियमापूर्वमाश्रितमिति, तत्राभिधीयते— § 2285

क्रत्वर्थं तावदङ्गेषु तदर्थेष्वेव संश्रितम्।
अनङ्गत्वाभिधानार्थं स्यात्क्रत्वर्थं नराश्रितम्॥ § 2287

*‘प्रकरणविशेषाद्वा तद्युक्तस्य तत्संस्कारो द्रव्यवत्’ इति हि ज्योतिष्टोमप्रकरणगतब्राह्मणशब्दलक्षिततदपूर्वसाधनयजमानसंस्कारत्वात्साधुभाषणनियमापूर्वस्य ‘याजमानास्तु तत्प्रधानत्वात्कर्मवत्’ इत्यनेन न्यायेन फलप्रतिग्रहणयोग्यत्वाधानार्थं तदाश्रितमेव विज्ञायते। पुरुषार्थवाक्येऽपि सम्यग्ज्ञातसुप्रयुक्तत्वाक्षिप्तज्ञातृप्रयोक्तृपर्युपस्थापनात्क्रियाफलयोश्च तद्गामित्वात्प्रधानयागाद्यपूर्ववदेव ज्ञातृप्रयोक्त्राश्रितं निष्पद्यते। § 2288

तृतीयोक्तिक्रियागम्यगुणभावेऽपि वक्तरि।
संस्कार्यत्वात्प्रधानत्वं स्यात्प्रयाजाज्यशेषवत्॥ § 2290

यथैव ‘प्रयाजशेषेण हवींष्यभिघारयति’ इति सत्यपि शेषस्य तृतीयानिर्देशे कार्योपयोगित्वात्संस्कार्यत्वावधारणमेवं ब्राह्मणस्यापीत्यदोषः। § 2291

यदि वा ब्राह्मणेनेति तृतीया यागकारिणि।
कामधुक्छब्दयोगाच्च बहिः प्राधान्यकल्पना॥ § 2293

---

६ *] जै° सू° ( ४—३—३ )।
९ नात्] जै° सू° ( ४—३—६ )।
१८ *] जै° सू° ( ३—४—९ )।
२० स्य] जै. सू. ( ३—८—२ )।

नैव म्लेच्छनकारित्वात्तृतीयेयं प्रतीयते।
कुर्वता यागमित्येवं ब्राह्मणेनेति योज्यते॥ § 2295

यागे यो गुणभावश्च संस्कारे सा प्रधानता।
न ह्यारादुपकारित्वं संयुक्तस्योपयोगिता॥ § 2297

तच्चोपयोगित्वं प्रकरणतृतीयाविभक्तिश्रवणाभ्यामवगतं शेषस्वीकरणसमर्थं भवति। बाह्यपुरुषार्थत्वेऽपि कामधुक्छब्दस्य पुरुषोपभोग्यकाम्यमानार्थसाधनवचनत्वात्पुरुषप्राधान्यप्रतिपत्तिः। यद्यपि च साधुशब्दोच्चारणमुच्चारयित्रर्थं क्रत्वर्थं च न भवति तथाऽपि तद्गतनियमप्रतिषेधयोरेव क्रत्वर्थपुरुषार्थत्वे भविष्यतः। न हि यदर्थे कर्मणि यौ नियमप्रतिषेधौ तावेव केवलौ तदर्थौ भवतः। तथा हि— § 2298

स्त्र्युपायमांसभक्षादिपुरुषार्थमपि श्रितः।
प्रतिषेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयात्॥ § 2300

क्रत्वर्थात्खादिराचेष्टा वीर्यसिद्धिर्विधानतः।
भोजनाच्चाप्यतिथ्यर्थादपूर्वं दातृसंश्रितम्॥ § 2302

अतश्च परार्थोच्चारणाश्रितावपि नियमप्रतिषेधौ स्वप्रयोजनाकाङ्क्षावेलायां संनिहितपुरुषप्रधानौ विज्ञायेते। § 2303

अतश्च वेदमूलत्वे सत्येवं प्रतिपादिते। 285
प्रयोगोत्पत्त्यशास्त्रत्वं यदुक्तं तदसत्कृतम्॥ § 2305

यच्चास्य कृत्रिमत्वेन स्वतः शास्त्रत्वबाधनम्।
तत्प्रसिद्धिविरुद्धं स्यादचन्द्रशशिवाक्यवत्॥ § 2307

शास्त्रशब्दो यदि तावद्रूढस्ततश्चतुर्दशसु तावद्विद्यास्थानेषु शास्त्रस्थानामेव प्रसिद्धस्तदन्तर्गतत्वाच्च व्याकरणस्य शास्त्रत्वनिराकरणानुपपत्तिः। अथापि शिष्यतेऽनेनेति शास्त्रत्वमन्वर्थमिष्यते तथाऽपि व्याकरणेन साधुशब्दाः शिष्यन्ते तदनुगमोपाया वा प्रकृतिप्रत्ययादयस्तदभियुक्तशिष्यजनो वेति सर्वथा शास्त्रशब्दप्रवृत्तिरविहता। § 2308

प्रसिद्धमपि शास्त्रत्वं यस्तु तर्केण वारयेत्।
वेदस्यापि स नित्यत्वाद्व्योमवद्वारयिष्यति॥ § 2310

यथैव हि व्याकरणादीनां कृत्रिमकाव्योपनिबन्धसाधर्म्याच्छास्त्रत्वं प्रतिषेद्धुमध्यवसीयते, तथाऽऽकाशदिक्कालात्मनां परमाणुदृष्टान्तबलेन नित्य-

त्वाद्वेदस्याशास्त्रत्वमप्ययत्नेनैव क्रियेत। यो हि नागरिकभाषाभिज्ञतया ग्रामीणैर्मातापितरावपि शुक्कवचनैरभिदधीत स केनान्येन वार्येत। § 2311

परत्राविनयं कुर्वन्पितृभ्यां वार्यते सुतः।
तयोरेवाविनीतस्य को भवेद्विनिवारकः॥§ 2313

तथा बहिरसंबद्धं वदन्वेदेन वार्यते।
साङ्गेन तं पुनर्निघ्नन्केनान्येन निवार्यते॥§ 2315

क्रुद्धो यो नाम यं हन्ति स तस्याङ्गानि कृन्तति।
कृत्ताङ्गस्य ततस्तस्य विनाशः कियता भवेत्॥§ 2317

तेन त्रयीं द्विषन्पूर्वं वेदाङ्गान्येव लुम्पति।
ततस्तेनैव मार्गेण मूलान्यन्यस्य कृन्तति॥§ 2319

श्रुतिस्मृतिप्रमाणत्वे हेतुपूर्वं निरूपिते।
अङ्गानामप्रमाणत्वमशास्त्रत्वं च को वदेत्॥§ 2321

यत्त्वितरस्मृतीनां प्रायेण सारूप्याद्व्याकरणस्य तद्विलक्षणत्वात्तन्मध्यपातित्वमसंभाव्यमिति। तत्रोच्यते। सर्वधर्मसूत्राणां वर्णाश्रमधर्मोपदेशित्वाद्धर्माणां चैकरूपप्रायत्वात्परस्परसंवादित्वं युक्तं, व्याकरणस्य त्वन्य एव साधुशब्दतत्त्वनिर्णयरूपो विषयस्तत्रास्य व्याकरणान्तरेणैव संगतिः स्यान्न धर्मसूत्रैः। स्मृतित्वं त्वङ्गानां धर्मसूत्राणां चाविशिष्टम्। § 2322

286 अथापि स्मृतिशब्देन नाङ्गानामभिधेयता।
तथाऽप्येषां न शास्त्रत्वप्रमाणत्वनिराक्रिया॥§ 2324

पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम्॥§ 2325

इति हि तुल्यवत्प्रामाण्यस्मरणम्— § 2326

अपि वा कर्तृसामान्यादुक्तो न्यायश्च यः स्मृतेः।
प्रमाणत्वे समानोऽसौ वेदाङ्गेष्वपि गम्यते॥§ 2328

प्रमाणषट्कमूलत्वं पूर्वं चैषां प्रदर्शितम्।
दृष्टादृष्टफलत्वेन तस्मान्नास्त्यप्रमाणता॥§ 2330

---

२ पि]
शुक्कवचनमिति—निष्ठुरवचनमित्यर्थः।

२२ वा] जै॰ सू॰ (१-३-१)

एकस्य च यदा युक्त्या समूलत्वं निरूपितम्।
पौरुषेयान्तरग्रन्थमूलताऽपि तदेष्यते॥ § 2332

असंभावितमूलं हि पौरुषेयं यदुच्यते।
मूले तस्याप्रतिष्ठत्वं रूपे जात्यन्धवाक्यवत्॥ § 2334

इह तु समूलत्वादेकान्तरितप्रामाण्यसिद्धिः। यत्तु सूत्रवार्तिकभाष्यकाराणामन्योन्यविगीतवचनत्वादप्रमाणत्वमिति। तत्राभिधीयते— § 2335

स्मृतीनामप्रमाणत्वे विगानं नैव कारणम्।
श्रुतीनामपि भूयिष्ठं विगीतत्वं हि दृश्यते॥ § 2337

विगीतवाक्यमूलानां यदि स्यादविगीतता।
तासां ततोऽप्रमाणत्वं भवेन्मूलविपर्ययात्॥ § 2339

मूलानुरूप्येण हि स्मृतीनां प्रमाणत्वं तदविगानेन— § 2340

परस्परविगीतत्वमतस्तासां न दूषणम्।
विगानाद्धि विकल्पः स्यान्नैकत्राप्यप्रमाणता। § 2342

धर्मसाधनतांशे च विगानं नैव विद्यते।
अन्वाख्यानविगानं तु लक्ष्यभेदान्न दुष्यति॥ § 2344

पुनरुक्तत्वादिना हि यत्सूत्रप्रत्याख्यानं तस्य च पुनः समाधानम्। § 2345

तस्यावैदिकमूलत्वान्न किंचिदपि दुष्यति।
ये चापीष्ट्युपसंख्याने ते च स्मृत्यन्तराश्रिते॥ § 2347

न चाधिकोपसंख्यानान्न्यूनस्यास्त्यप्रमाणता॥ § 2348

तद्यथा। वाजसनेयिशाखायामाध्वर्यवं चरकशाखासु च बह्वित्येतावता नाल्पविषयमप्रमाणीकुर्वन्ति। तस्मादयमपि न दोषः। यस्तु सूत्रकारस्य प्रयोजनानभिधानोपालम्भः। § 2349

स श्रुतिस्मृतिसिद्धत्वान्नोपालम्भत्वमर्हति। 287
ग्रन्थान्ते च स्वसंवेद्यं सुज्ञानं तत्प्रयोजनम्॥ § 2351

सत्यवचनं च सर्वश्रुतिस्मृतिषु स्वर्गसाधनत्वेन यागसाधनत्वेन च नियतम्। सत्यं च द्विविधं शब्दसत्यमर्थसत्यं च। तत्र यथैव यथावस्थिताविप्लुतार्थवचनं श्रेयःसाधनमेवं यथावस्थितशब्दसत्यवचनमपि, यथा चार्थसत्यविपर्ययः प्रत्यवायायैवं विनियोगकालप्रयुक्तशब्दानृतवचनमपि। शब्दसाधुत्वज्ञानं च व्याकरणाभियोगविशेषादित्युक्तम्। § 2352

तस्माद्विज्ञायमानत्वान्नोक्तं मूलकृता स्वयम्।
शास्त्रेण सर्वशब्दानामन्वाख्यानप्रयोजनम्॥§ 2354

न च व्याकरणप्रयोजनाभिप्रायं प्रति केचिद्विवदन्ते। स एव त्वभिप्रायः किं न्याय्यो नेत्यर्थान्तरमेतत्। § 2355

*धर्माय नियमं चाऽऽह वाक्यकारः प्रयोजनम्।
वेदमूलस्तु तत्रैक एको व्याकरणाश्रयः॥§ 2357

नियमद्वयप्रयुक्तं व्याकरणम्। साधुशब्दज्ञानात्तत्पूर्वप्रयोगाद्वा स्वर्गयज्ञोपकारसिद्धिरित्येतत्तावद्वेदमूलमनन्यप्रमाणकत्वात्। अतश्चायं तावद्वेदाख्येन शास्त्रेण धर्मनियमः। § 2358

तथा व्याकरणाख्येन साधुरूपं नियम्यते।
अविशेषेण सिद्धिः स्याद्विना व्याकरणस्मृतेः॥§ 2360

तेन वेदावगतसम्यग्ज्ञातसाधुशब्दप्रयोगात्मकधर्माङ्गत्वेन व्याकरणप्रक्रियेतिकर्तव्यतया नित्यवाचकशब्दरूपज्ञाननियमः क्रियते। यच्च कात्यायनेन ज्ञाने धर्म इति चेत्तथाऽधर्म इति तन्त्रेण प्रसङ्गेन वाऽपशब्दज्ञानादधर्मत्वापत्तिदोषमभिधाय शास्त्रपूर्वप्रयोगेऽभ्युदय इति निःश्रेयससिद्ध्युपायेऽवधारिते यत्पुनः परावृत्त्य भाष्यकारेणोक्तम्, *'अथ वा पुनरस्तु ज्ञाने धर्म इत्यभ्युपेत्यवादमात्रं तत्पूर्वोक्तदोषपरिहारसामर्थ्यप्रदर्शनार्थं कृत्वाचिन्तान्यायेनोक्तम्। परमार्थतस्त्वन्यानर्थक्यप्रसङ्गविज्ञातपारार्थ्यापादितार्थवादत्वात्फलश्रुतिर्न फलप्रतिपत्तिक्षमा विज्ञायते। यथा 'योऽश्वमेधेन यजते य उ चैनमेवं वेद' इति ज्ञानमात्रादेव ब्रह्महत्यातरणं यदि सिध्येत्को जातुचिद्बहुद्रव्यव्ययायाससाध्यमश्वमेधं कुर्यात्। तद्विधानं तानर्थकमेव स्यात्। एवं शब्दज्ञानाच्चेद्धर्मः सिध्येत्को नामानेक-
288 तात्वादिव्यापारायासखेदमनुभवेत्। तस्मात्क्रतुवदेव ज्ञानपूर्वप्रयोगस्यैव फलं कारणे कार्यवदुपचारात्तण्डुले देववर्षणवज्ज्ञाने धर्मवचनमापादिताधर्मपरिहाराभिधानशक्तिमात्रप्रदर्शनार्थमेवोपन्यस्तं न फलवत्त्वप्रतिपादनाय। 'द्रव्यसंस्कारकर्मसु परार्थत्वात्'* इत्यनेन न्यायेन ज्ञानस्य पुरुषशब्दसंस्कारत्वेन निराकाङ्क्षस्य फलसंबन्धासंभवात्। § 2361

सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्यते।

५ *] लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः।
१४ र्म] म॰ भा॰ पस्पशाहिनके।
१५ भिधाय] शास्त्रपूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देन।
१६ *] म॰ भा॰ पस्प॰।
२४ ण्डुले] देवो वर्षति तण्डुलान् इत्यत्र यथा तण्डुलशब्दो वृष्टावुपचर्यते इति दृष्टान्तार्थः।
२६ *] जै॰ सू॰ ( ४—३—१ )।

पराङ्गं चाऽऽत्मविज्ञानादन्यत्रेत्यवधारणात्॥ § 2363

आत्मज्ञानं हि संयोगपृथक्त्वात्क्रत्वर्थपुरुषार्थत्वेन ज्ञायते तेन विना परलोकफलेषु कर्मसु प्रवृत्तिनिवृत्त्यसंभवात्। तथा ‘य आत्माऽपहृतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' तथा ‘मन्तव्यो बोद्धव्यः’ तथा ‘आत्मानमुपासीत’ इति कामवादलोकवादवचनविशेषैर्जिज्ञासामननसहितात्मज्ञानकेवलावबोधपर्यन्तस्पष्टात्मतत्त्वज्ञानविधानापेक्षितवाक्यान्तरोपात्तद्विविधाभ्युदयनिःश्रेयसरूपफलसंबन्धः। ‘स सर्वांश्च लोकानाप्नोति सर्वांश्च कामानाप्नोति तरति शोकमात्मवित्तथा स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति तेन पितृलोकेन संपन्नो महीयते’ इत्यादिना योगजन्याणिमाद्यष्टगुणैश्वर्यफलानि वर्णितानि। तथा ‘स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न स पुनरावर्तते’ इत्यनिरावृत्त्यात्मकपरमात्मप्राप्त्यवस्थाफलवचनम्। अप्रकरणगतत्वेनानैकान्तिकक्रतुसंबन्धाच्च नाञ्जनखादिरस्रुववाक्यादिफलश्रुतिवदर्थवादत्वम्। § 2364

न च ज्ञानविधानेन कर्मसंबन्धवारणम्। § 2365

प्रत्याश्रमवर्णनियतानि नित्यनैमित्तिककर्माण्यपि पूर्वकृतदुरितक्षयार्थमकरणनिमित्तानागतप्रत्यवायपरिहारार्थं च कर्तव्यानि। न च तेषां भिन्नप्रयोजनत्वाद्भिन्नमार्गत्वाच्च बाधविकल्पपरस्पराङ्गाङ्गिभावाः संभवन्ति। शब्दज्ञानस्य त्वेकान्तेन प्रयोगाङ्गत्वात्पूर्वतरभावित्वाच्च न पृथक् फलसंबन्धसंभव इति ज्ञानपूर्वप्रयोगफलवत्त्वमेव निश्चीयते। यत्त्वादिमद्व्याकरणज्ञानतत्पूर्वकप्रयोगफलसंबन्धोऽनादिविधिमूलो नावकल्पत इति। तत्र यूपादिकरणवद्व्याकरणपरम्परानादित्वादनुपालम्भः। ‘तस्मादेषा व्याकृता’ इति च व्याकरणव्यवहारनित्यत्वमुक्तम्। § 2366

न चैषा संप्रदायेन व्याकृतेत्यभिधीयते।
तत्र ह्युच्यत इत्येव व्याकृतेति तु निष्फलम्॥ § 2368

यदपि च मनुना पङ्क्तिपावनमध्ये केदादेवोपलभ्योक्तम्। ‘यश्च व्याकु- 289
रुते वाचं यश्च मीमांसतेऽध्वरम्’* इति तेनापि पूर्वपश्चादुक्ताधीतवेदत्वयज्ञमीमांसनव्यतिरिक्तविषयेण सताऽवश्यमेतदेव व्याकरणज्ञानमाश्रयितव्यमिति तन्नित्यत्वसिद्धिः ॥ २७॥ २८॥ २९॥ § 2369

---

२७ *] यश्च व्याकुरुते वाचं यश्च मीमांसतेऽध्वरम्। तावुभौ पुण्यकर्माणौ पङ्क्तिपावनपावनौ।
२९ सिद्धिः] अत्रच वार्तिककारैः ‘तदशक्तिश्चानुरूपत्वात्’ इति सूत्रं प्रसङ्गात्पूर्वमेव ‘अन्यायश्चानेकशब्दत्वम्’ इति सूत्रव्याख्यानान्ते ‘यथा प्रकृति सारूप्यद्वारेणापभ्रंशा’ इत्यादिग्रन्थेन व्याख्यातत्वान्न व्याख्यातम्। एवं ‘एकदेशत्वाच्च विभक्तिव्यत्यये स्यात्’ इति सूत्रं च भाष्यकारैः सुस्पष्टं व्याख्यातत्वादुपेक्षितमिति वेदितव्यम्।

इति व्याकरणाधिकरणम्॥ ८॥

## ०.०.१३ आकृत्यधिकरणम्

इह नामाख्यातोपसर्गनिपातानां मध्यान्नामानि परिगृह्यन्ते, तेषामपि जातिगुणक्रियाद्रव्ययदृच्छासर्वनामशब्दानां मध्याज्जातिशब्दाश्चिन्त्यन्ते। तेषामप्येकं गोशब्दमुदाहृत्यविचार्यते किं पुनरयमाकृतेर्वाचकोऽथ व्यक्तेरिति, ततः। § 2371

( लोकवेदयोः शब्दार्थानामनन्यत्वनिरूपणम्। ) § 2372

एतत्सान्यासिकं कृत्वा वक्ष्यमाणं तु सांप्रतम्।
290 उपायफलसिद्ध्यर्थमिदं तावद्विचार्यते॥ § 2374

किं य एव लौकिकाः शब्दास्त एव वैदिकास्त एव चैषामर्था उतान्य इति। आह— § 2375

किं लोकवेदशब्दानामेकत्वप्रतिपादने।
प्रयोजनं यतः पूर्वं तावत्तत्प्रतिपाद्यते॥ § 2377

उच्यते— § 2378

फलमस्य विचारस्य वैदिकेषु भविष्यति।
लोके च निर्णयोपायस्तेनैकत्वाय यत्यते॥ § 2380

यदि शब्दार्थानामनन्यत्वं लोकवेदयोर्भवेत्तत एतस्या व्यक्त्याकृत्यभिधानचिन्ताया वृद्धव्यवहारस्थानेकप्रयोगानुसरणद्वारेणाभिधेयानभिधेयत्वनिर्णयः शक्यते कर्तुम्। § 2381

प्रयोजनं तु लोकस्य न किंचिदपि सिध्यति।
आकृतिव्यक्तिवाच्यत्वपरमार्थनिरूपणात्॥ § 2383

संमूर्छितानेकार्थसंनिधाने हि शब्दः प्रयुक्तः कियत्यप्यर्थजाते प्रत्ययं करोति तेन चाविविक्ताभिधेयगम्यमानांशेनापि समस्तधर्मोपेतेन कार्यसिद्धौ क्रियमाणायां प्रयुक्तः। § 2384

यद्युच्यमानया कार्यं यदि वा जातिगम्यया।
समस्तं क्रियते व्यक्त्या को विवेकधियो गुणः॥ § 2386

यद्युच्येतेहापि वेदवत्सामान्यविशेषलक्षणबाधसिद्धिरेव प्रयोजनमिति। तदुच्यते— § 2387

सर्वं हि दधिदानादि लोके कर्मार्थलक्षणम्।
तद्वज्ज्ञात्क्रियमाणे तु न चिन्त्ये श्रुतिलक्षणे॥§ 2389

तेन लोके विचारोऽयं जायते निष्प्रयोजनः।
स्यात्प्रयोजनवान्वेदे ज्ञानोपायस्तु दुर्लभः॥§ 2391

तेन शब्दार्थभिन्नत्वे व्यक्त्याकृतिविचारणा।
वाच्यावाच्यविवेकाय न कर्तव्या कथंचन॥§ 2393

अभेदे सति लोकस्थैः कृतः शब्दार्थनिर्णयः।
तस्मिन्ननुपयुक्तोऽपि फलं वेदेषु दास्यति॥§ 2395

तेन लौकिकवैदिकशब्दार्थैकत्वे सत्याकृत्यधिकरणमुपपत्तिमत्त्वात्प्रवोजनवत्त्वाच्चाऽऽरब्धव्यम्। भेदपक्षे त्वानारभ्यमित्यवधृत्य भेदपक्षस्तावत्प्रतिपाद्यते। नियतानियतस्वरच्छान्दसप्रकृतिप्रत्ययलोपागमवर्णविकारसदसद्भावकृत- 291
रूपभेदादध्यायानध्यायोपनीतानुपनीतत्रैवर्णिकचातुवर्ण्यप्रयोज्याप्रयोज्यत्वगुरुशुश्रूषाराधितगुरुसंप्रदाययदृच्छाप्रयुक्तवाक्यंत- दर्थान्यत्ववद्यदि पदपदार्थान्यत्वं लोकवेदयोस्ततो लौकिकानामेव व्यवहारोपनिपातादर्थवत्ता, वेदे त्वानर्थक्यान्न चोदनालक्षणो धर्मः। स्वरेण रूपभेदं मन्यते। § 2396

अध्यायानध्यायतया वृत्रहननाद्यर्थयोगेन चाविदग्धवाक्यवदुत्तानवहनवाक्यभङ्गः। सर्वेषां च वैदिकानामन्यत्वान्न ततोऽपि पौर्वापर्येणार्थावगतिः। ग्राह्यत्वादिधर्मभेदनियतानियतपदवाक्यरचनाद्वारा व्यपदेशरूपभेदाभ्यां सर्वशब्दानामर्थानां लौकिकानां वैदिकानां च भेद इति प्राप्तेऽभिधीयते— § 2397

प्रयोगचोदनाभावादेकत्वं तेषु गम्यते।
तस्मात्सिद्धिः फलत्वाच्चेदविभागाद्भविष्यति॥§ 2399

भेदे सत्यपूर्वात्सर्ववैदिकपदानामनवगतसंबन्धत्वेनार्थशून्यत्वात्क्रियाकारकसंसर्गात्मकप्रयोगचोदनानामभाव एव स्यात्। § 2400

एकत्वे सति सद्भावादिति वा हेतुवर्णना।
अर्थैकत्वं प्रधानत्वाद्वस्त्वभेदोऽथ वोच्यते॥§ 2402

शब्दार्थैकत्वमिति वक्तव्येऽर्थैकत्ववचनं फलादेव शब्दैकत्वोक्तिसिद्धिं मत्वैवमुक्तम्। अथ वा वस्तुमात्रपर्यायत्वादुभयसाधारण्याभिप्रायेणैवार्थैकत्वोक्तिः। प्रयोगचोदनाभावप्रसङ्गः परपक्षे स्वपक्षे वा तद्भावसिद्धिर्वेद-

३ लोके] जै॰ सू॰ ( ११—१—४ )।

292 वादिनैव सह विवादेऽवकल्पते नान्येनेत्यत आह—**प्रयोजनमिदं** तत्प्रमाणमभिधीयतामिति। तदुच्यते। प्रत्यभिज्ञारूपप्रत्ययविभागाज्ज्ञायमानोभयप्रमेयरूपाविभागाद्वा वाक्यतत्समूहमात्रनिबन्धनापन्नपदवर्णविषयत्वव्यपदेशाविभागाद्वा तथोच्चारयितॄणां स्थानकरणप्रयत्नाविभागाद्वा लक्षणविदां वा बहुतरानुगमनाविभागादिति हेत्वर्थविकल्पाः। § 2403

प्रत्यक्षप्रत्यभिज्ञानाच्छब्दैकत्वं प्रतिष्ठितम्।
एकशब्दोत्थितज्ञानग्राह्यत्वाच्चैकवाक्यता।§ 2405

यथाश्रुतगवादीनां याऽपि वाच्यान्तरे श्रुतिः।
अर्थैकत्वाविरोधेन गुणमात्रपरा तु सा॥§ 2407

यथा हि वामना गावो नराश्शिपिटनासिकाः।
कर्णप्रावरणाश्चान्ये नरार्थत्वाच्च न च्युताः॥§ 2409

एवं सत्येव गोत्वादौ धर्मो यदि विलक्षणः।
नैतावताऽर्थभेदोऽस्ति विशेषानभिधानतः॥§ 2411

न च या एव देवानां गावस्ता एवावश्यं सर्वत्र वैदिकस्य गोशब्दस्य वाच्या भवन्ति। मनुष्यगवीषु दक्षिणादिसाधनेषु सुतरां प्रयुज्यमानत्वात्। § 2412

एवं हिरण्यपर्णत्वं मेरौ यदि वनस्पतेः।
देवलोके ततः शब्दः किमर्थान्तरवाच्ययम्॥§ 2414

यच्चैतद्धृतमस्माकं देवानां मध्विदं यदि।
रसवीर्यादिभिस्तत्र न शब्दार्थोऽन्यथा भवेत्॥§ 2416

न च सर्वाप्रसिद्धत्वे गम्येतैकोऽपि कश्चन।
तेनासिद्धैरसिद्धानां नास्त्यन्यत्वनिरूपणम्॥§ 2418

293 अतोऽवश्यमेतेषामेव गवादीनां देवसंबद्धानामुत्तानवहनप्रतिपादनमिति वक्तव्यम्। अथ वा भूमिष्ठानामेव सतां केनापि गुणवादेन पृथिवीगोलकत्रैलोक्यभ्रमणादिना वा पुराणोक्तेन दृष्टिवशाद्यथैव वयमुपरि देवान्पश्याम एवमधो द्युपरिवर्तनादयमपि लोको देवैरुपरि दृश्यत इति उत्तानवहनदृष्टिः। तस्माल्लोकवेदयोरभिन्नाः शब्दार्था इति सिद्धं। § 2419

विचार्यते किमाकृतिः शब्दार्थोऽथ व्यक्तिरिति। § 2420

द्वौ च पक्षावुपन्यस्तौ भाष्यकारेण यद्यपि।

व्याख्यातारस्तथाऽप्यत्र कुर्युः पक्षान्तराण्यपि॥ § 2422

नियोगेन विकल्पेन द्वे वा सह समुच्चिते।
संबन्धः समुदायो वा विशिष्टा वैकयेतरा॥ § 2424

एते पक्षाः पुनर्योज्या व्यतिकीर्णाः परस्परम्।
लिङ्गकारकसंख्याभिः संहतासंहतात्मभिः॥ § 2426

पुनर्जात्यादिपक्षाणां तादृश्येवात्र योजना। § 2427

प्रथमं तावदष्टपक्ष्येवं दर्शयितव्या। गोशब्दस्यार्थः किमाकृतिरेव, व्यक्तिरेव, उताऽऽकृतिर्वा व्यक्तिर्वा, अथाऽऽकृतिश्च व्यक्तिश्च, किमुभयोः संबन्ध उत समुदायः, किमाकृतिविशिष्टा व्यक्तिरुत व्यक्तिविशिष्टाऽऽकृतिरिति। तथा किमाकृत्यैव विशिष्टः संबन्धः किं व्यक्त्यैव आकृत्या वा व्यक्त्या वा, अथ समुदायेनाप्याकृतिविशिष्टया व्यक्त्या, अथ व्यक्तिविशिष्टयाऽऽकृत्या, अथ परस्परविशिष्टाभ्यां द्वाभ्यामिति। तथा किमाकृत्यैव विशिष्टः समुदाय इत्याद्यपि पूर्ववदेव संबन्धविशिष्टसमुदायपक्षमात्रातिरिक्तं योजनीयम्। एवं किमाकृत्यैव विशिष्टः संबन्ध एव, उत व्यक्त्यैव, अथवाऽकृत्या वा व्यक्त्या वा, अथ समुदायेन किमन्यतरविशिष्टयाऽन्यतरया, अथोभाभ्यामित्येवं समुदायविशेषणत्वपक्षाः पूर्ववदेव योज्याः। § 2428

एवं किं संबन्धेनैव विशिष्टाऽऽकृतिरथ समुदायेनैवाथ विकल्पमानाभ्यामुत समुच्चिताभ्याम्। तथैतद्विशिष्टा किमाकृतिरेवाथ व्यक्तिरेव, अथ विकल्पिते किं समुच्चिते किमिति। तथा किमाकृतिविशिष्टसंबन्धविशिष्टा व्यक्तिरेवाथ व्यक्तिविशिष्टसंबन्धविशिष्टाऽऽकृतिरेवाथ विकल्प उत समुच्चयः। एवं समुदायेनापि योज्यम्। तथा संबन्धविशिष्टव्यक्तिविशिष्टाकृतिरेवाथ संबन्धविशिष्टाकृतिविशिष्टा व्यक्तिरेवाथ विकल्पोऽथ समुच्चयः। एवं समुदायविशिष्टपक्षाः कल्पयितव्याः। तथा किं जात्यैव विशिष्टेन संबन्धेन विशिष्टा व्यक्तिः, अथ व्यक्त्यैव विशिष्टेन संबन्धेन विशिष्टा जातिरथ विकल्पोऽथ समुच्चयः। एवं समुदायेनापि विशिष्टता योज्या। तथा किं संबन्धेनैव विशिष्टया जात्यैव विशिष्टा व्यक्तिरुतैवंविधया व्यक्त्यैव विशिष्टा जातिरथ विकल्पोऽथ समुच्चयः। § 2429

एवं समुदायेनैव विशिष्टयेत्यपि योजयितव्यम्। एवं जातिलिङ्ग- 294
योर्जातिकारकयोर्जातिसंख्ययोश्च प्रत्येकं जातिव्यक्तिपक्षविकल्पितसमुच्चितपक्षोत्थानं दर्शयित्वा व्यक्तेर्लिङ्गादीनां च दर्शयितव्यम्। तथा लिङ्गसंख्या लिङ्गकारकसंख्या कारकयुगलान्यपि विकल्प्य प्रत्येकद्वित्रिलिङ्गादिसहितैकजातिव्यक्तिविकल्पास्त्रियोगपञ्चयोगाश्रया दर्शयितव्याः। § 2430

एवं शब्दस्वरूपस्य पुनर्जात्यादिभिः सह।

एकद्वित्रिचतुष्पञ्चषड्भिः सह विकल्पना॥§ 2432

एते चात्यन्तनिष्कृष्टाः पक्षा यद्यपि न स्थिताः।
बुद्ध्या तथाऽपि भिद्यन्ते जातिद्रव्यगुणादिवत्॥§ 2434

सर्वत्रेन्द्रियलिङ्गाभ्यां भेदः स्तोकोऽवगम्यते।
शब्देन तु सुसूक्ष्मोऽपि वस्तुभागो विभज्यते॥§ 2436

पदात्प्रभृति चैवं या प्रज्ञा ज्ञातुर्विजृम्भते।
पुष्पिता सा पदार्थेषु वाक्यार्थेषु फलिष्यति॥§ 2438

अत्र चाऽऽकृतिरेवेति दृढः पक्षोऽयमेकतः।
इतरे त्वन्यतः सर्वे व्यक्तिपक्षानुयायिनः॥§ 2440

व्यक्तौ निराकृतायां च समस्तानां निराक्रिया।
सुलभेति न सर्वेऽमी भाष्यकारेण दर्शिताः॥§ 2442

न चैतस्मान्न सन्त्येव न चैते निष्प्रयोजनाः।
विकल्पिता हि जिज्ञासोः प्रज्ञाविकसनक्षमाः॥§ 2444

दर्शितेष्वपि सर्वेषु विचारः क्रियते द्वयोः।
का शब्देनाऽऽकृतिव्यक्त्योरुच्यते काऽनुगम्यते॥§ 2446

**ततश्च—** § 2447

विचारमुखसिद्ध्यर्थं स्वरूपं तावदेतयोः।
प्रश्नपूर्वमुपन्यस्य याथात्म्येन निरूप्यते॥§ 2449

ननु प्रथमपाद एवाऽऽकृतेर्निरूपणादिदानीं प्रश्नोत्तरे मन्दप्रयोजने। उच्यते— § 2450

सत्यमेवाऽऽकृतिः पूर्वं प्रत्यक्षेण निरूपिता।
संस्थानाशङ्कया त्वत्र सामान्यात्मा निरूप्यते॥§ 2452

295 **द्रव्यगुणकर्मणां सामान्यमात्रमाकृतिरिति।** § 2453

द्रव्यादीनां च सामान्यं परापरविभागवत्।
वस्तुत्वं प्रथमं तत्र द्रव्यत्वाद्यपरं तथा॥§ 2455

पुनर्वायुत्वतेजस्त्वजलत्वात्मत्वभिन्नता।
पृथिवीत्वाद्घटत्वं च तद्व्यक्तिषु समाप्यते॥§ 2457

वृक्षत्वात्परतश्चेष्टं शिंशपात्वादि केवलम्।
शरीरत्वाच्च गोवाजिहस्तिपुंस्त्वादि गम्यते॥§ 2459

वाजिकत्वादि चाश्वत्वात्कर्कादिस्तु गुणो मतः।
हस्तित्वाद्भद्रमद्रादिदिङ्नागकुलजातयः॥§ 2461

पुंस्त्वाद्ब्राह्मणकौण्डिन्यकठत्वादि समाप्यते।
तथा गुणत्वकर्मत्वरूपता जन्मतादि यत्॥§ 2463

ततः शुक्लादि तद्व्यक्तिगुणेषु प्रतितिष्ठति।
कर्मणामपि यागत्वहोमत्वादिविभागतः॥§ 2465

अपर्यायस्मृतेरुक्तं धातुभिः प्रविभज्यते।
पुनर्विधानसंख्याख्या गुणप्रकरणान्तरैः॥§ 2467

अन्ये तु भेदमाचार्याः कर्मणामेव मन्वते।
अपि वाऽव्यतिरेकात्स्याद्देशादेरेकरूपता॥§ 2469

रूपशब्दाविभागाच्च वक्ष्यत्येतद्धि जैमिनिः।
एवं प्रपञ्चितं सर्वमर्थसामान्यमाकृतिः॥§ 2471

न संस्थानं कुतो ह्येतदात्मादिगुणकर्मसु।§ 2472

सर्वेषु हि पार्थिवेषु गवादिघटादिषु संस्थानं भवेत्। अग्नितोयवाय्वाकाशादीनां तु पार्थिवद्रव्यपरिग्रहवशादाकारानुवृत्तिः कल्प्येत न स्वातन्त्र्येण, दिक्कालात्ममनसां तु गुणकर्मणां च न कथंचिदपि संस्थानं संभवति। सामान्यमात्रं तु सर्वस्वविशेषानुवृत्तिरूपं संभाव्यते। तस्मादेतदेवाभिधेयाकृतिलक्षणं नावयवरचनासंस्थानाकृतित्वमवकल्पते। § 2473

संस्थानस्य च नाशित्वात्प्रतिव्यक्ति च भेदतः।
सामान्यव्यवहारित्वं नाऽऽकृतित्वेऽवकल्पते॥§ 2475

अथ संस्थानसामान्यमाकृतित्वेन गृह्यते।
अश्वादिष्वपि तुल्यत्वाद्भवेदाकृतिसंकरः॥§ 2477

न चावान्तरसंस्थानं सर्वगोपिण्डवृत्ति यत्।

१३ ब्दाविभागाच्च ] जै. सू. ( ६—३—४ ) इत्येत्रेति शेषः।

अश्वादिभ्यो निवृत्तं च गोशब्दालम्बनं भवेत्॥ § 2479

296 तस्य ह्युपलक्षणमालोच्यमानं न जातेरन्यल्लभ्यते ततश्च जातिरेव सामान्यमिति न्यायेनाऽऽपद्यते। तेन प्रथमपादे रुचकस्वस्तिकवर्धमानकोदाहरणात्संस्थानाकृत्यभिधानाशङ्काक्षयादर्शनवदासीदित्येताभ्यां प्रश्नोत्तराभ्यां व्यावर्त्यते। अतश्च द्रव्यगुणकर्मणां यावत्किंचित्प्राग्व्यक्तिभ्यः सामान्यं तत्सर्वमाकृतिरेवेत्यभिप्रेत्य मात्रशब्दः प्रयुक्तः। **असाधारणविशेषा व्यक्तिरिति**। केचिदाहुः। असाधारणा विशेषा एव व्यक्तिः। विशेषव्यतिरिक्तव्यक्त्यभावादिति। § 2480

तत्तु नैवं विशेषेभ्यो व्यक्तिरन्यैव हीष्यते।
खण्डमुण्डादयः सर्वे विशेषत्वेन संमताः॥ § 2482

ते चान्यत्रापि दृश्यन्ते तथा जात्यन्तरेष्वपि।
शाबलेयादिभेदोऽस्ति तदपत्यान्तरेष्वपि॥ § 2484

खण्डमुण्डादयस्तावदन्या अपि व्यक्तयो भवन्त्येव गवयमहिषादिव्यक्तयश्च। शाबलेयोऽपि यथैकस्तथाऽन्योऽपि यः शबलापत्यत्वेन गम्यते स सर्वः शाबलेयः। एतच्चोभयवर्णनिमित्तं वा यादृच्छिकं वा नामान्यत्रापि विनियोगवशाद्वर्तत एव। तदपत्ये च शाबलेय इत्यसाधारणव्यपदेशानुपपत्तिः। विशेषव्यक्तिशब्दयोर्बहुवचनैकवचनान्तयोः सामानाधिकरण्यप्रयोगवचनभेददोषः। तस्मादसाधारणा विशेषा यस्यां सा व्यक्तिरित्येवं व्याख्येयम्। ननु पूर्वोक्तेन न्यायेन खण्डादीनामपि बहुव्यक्तिसाधारण्याद्व्यक्तिव्यतिरिक्तानां चान्येषां केवलैकैकव्यक्तिगतानां विशेषाणामसंभवाद्बहुव्रीहिरप्यनुपपन्नः। उच्यते। नैव विशेषाणां प्रत्येकमसाधारणत्वमाश्रित्य व्यक्तिविशेषणत्वेनोपादानम्। कथं तर्हि साधारणरूपाणामप्येकद्वित्रादिभेदेन क्वचिदुपलब्धानां यदेकत्र पिण्डीकृतानां ग्रहणं तदपेक्षमसाधारणविशेषत्वाभिधानम्। § 2485

प्रविभक्ता हि ये दृष्टा दृश्यन्ते संहताः पुनः।
पिण्डासाधारणत्वेन तैर्व्यक्तिरुपलक्ष्यते॥ § 2487

न चैकस्यां व्यक्तौ ये समुदिता दृष्टास्त एव व्यक्त्यन्तरेऽप्यन्यूनानतिरिक्ता दृश्यन्ते। य एवादृष्टपूर्वस्तस्मिन्समुदाये संप्रति दृश्यते स एवासाधारणतामापादयति। अनन्तभेदास्वपि व्यक्तिषु नात्यन्तापूर्वविशेषणोपलक्षणोपादानं किंचिदुत्कर्षापकर्षमात्रेण च सर्वत्रासाधारणोपलक्षणलाभात्परसामान्यापेक्षया च सर्वाण्येवावान्तरसामान्यानि विशेषव्यपदेशं प्राप्नुवन्ति। संघातावस्थायां च व्यक्तिविशेषणत्वात्तेषु विशेषशब्दः। एतच्च व्यक्तेर्विशेषाणामन्यत्व-
297 मुपरिष्टाद्भाष्यकारोऽपि वक्ष्यत्येव, **योऽर्थः सामान्यस्य विशेषाणां चाऽऽश्रयः सा व्यक्तिरिति**। तत्र केचिद्गोत्वादिषु विशेषत्वमङ्गीकृत्य सामान्यवाचिना

शब्देनानभिधेयत्वाद्यदेव महासामान्यं सत्तावस्तुभावशब्दाभिधेयं तदेव शब्दस्वरूपव्यवच्छिन्नं गोत्वादिविशेषव्यवच्छिन्नं वा गोसत्ताख्यमाकृत्यभिधानपक्षे वाच्यमिति मन्यन्ते। यथाऽऽहुः— § 2488

अस्त्यर्थः सर्वशब्दानामिति प्रत्याय्यलक्षणम्।
अपूर्वदेवतास्वर्गैः सममाहुर्गवादिषु॥ इति।§ 2490

तत्तु कक्ष्याविभागेन सामान्यानां निरूपणात्।
अयुक्तं न गवादीनां तत्र वाचकशक्तता॥§ 2492

प्रतिनियतार्थविषया हि शब्दानां वाचकशक्तिरर्थापत्त्या गम्यते। तत्रानन्तरावान्तरसामान्यवचनानां द्रव्यगुणकर्मशब्दानामेव तावदसंकीर्णार्थत्वात्सत्तार्थत्वमनुपपन्नं किमुत दुरान्तरितार्थगवादिशब्दानाम्। § 2493

सत्तामेते वदन्तश्च न शुद्धां सविशेषणाम्।
वदन्तीत्यभिधातुं हि शक्यं द्वेधाऽप्यसंभवात्॥§ 2495

शुद्धवचनत्वे तावत्सर्वेषामेकार्थप्रत्यायनात्पर्यायत्वप्रसङ्गः। पुनरुक्तत्वाद्यास्तिशब्दप्रयोगानुपपत्तिः। § 2496

गौर्नास्तीति प्रयोगश्च विरोधान्नावकल्पते।
न हि सत्तैव नास्तीति कथंचित्संप्रतीयते॥§ 2498

देशकालाद्यपेक्षायामपि नैव सत्तायां नास्तित्वमभिधातुं युक्तम्। विभुत्वनित्यत्वाभ्यां सर्वदेशकालव्यापित्वात्। § 2499

रुढिशब्दश्च नैवायं लोकदृष्टया प्रतीयते।
तेन द्रव्यादिसामान्यं सत्तेत्येतन्न युज्यते॥§ 2501

य एव ह्यस्तिशब्देन द्वितीयो भावविकार उच्यते। जायमानविप-
रिणामाद्यवस्थसर्ववस्तुषु विनश्यत्तापर्यन्तेषु वस्त्वाकृतिप्रतिपत्तिर्दृश्यते। तेन
यदि नाम महासामान्यमभिधेयं प्रतिज्ञायते ततो वस्त्वर्थः सर्वशब्दानामिति
प्रत्याय्यलक्षणमिति कामं वक्तव्यं नास्त्यर्थ इति। न चावयवार्थपरित्यागेन
सच्छब्दसत्ताशब्दो वर्तेते इति भवच्छब्दवदेवास्तीति सद्भावः सत्तेति न तु 298
वैशेषिकपरिभाषया यतो द्रव्यगुणकर्मसु सदिति प्रतीतिः सा सत्तेति। एवंल-
क्षणा जातिः प्रतिपत्तव्या॥ § 2502

६ तु] कक्ष्याशब्दः कोष्ठवाची, द्रव्यत्वगुणत्वकर्मत्वान्येकस्यां सत्तावांन्तरसामान्यकक्ष्यायां, पृथिवीत्वादीनि द्रव्यत्वावान्तरसामान्यकक्ष्यायां, रूपत्वादीनि गुणत्वावान्तरसामान्यकक्ष्यायां च वर्तन्त इति कक्ष्याविभागो ज्ञेयः।

२१ ते] जै. सू. ( ६—३—४ ) इत्येत्रेति शेषः।

सेयमव्ययशब्देन वस्तुपर्यायवाचिना।
भवत्साधारणार्थेन प्रसिद्धिरुपपादिता॥§ 2504

अस्तित्वमस्तितेत्येवं दृश्येते प्रत्ययौ यतः।
स वस्तुवचनः शब्द आख्यातप्रतिरूपकः॥§ 2506

अप्रातिपदिकत्वाद्धि नाऽऽख्यातात्त्वतलौ स्मृतौ।
अस्तिक्षीरा समासश्च तेन सद्वाचिनेष्यते॥§ 2508

अस्तिक्षीरा गौरिति तिङन्तसमासत्वेनानुपसंख्यानादवश्यंभाविप्रत्ययलक्षणद्वारसुबन्तत्वयोग्याव्ययपदेन सह क्षीराशब्दस्यान्यपदार्थे बहुव्रीहिरभ्युपगन्तव्यः। तत्र चायं सदर्थवचनः सक्षीरा गौरिति प्रत्ययोत्पादात्। ततश्च वस्तुनि सति च प्रयुज्यमानमस्तिशब्दमुपलभ्य तदर्थानुसरणप्रत्यासन्नं सच्छब्दं च **देवात्तलिति** च स्वार्थिकं देवतेतिवत्तलमिहाप्यस्तिधातुवाच्यार्थविशिष्टकर्तृप्रतीतिमनङ्गीकृत्य शुद्धधात्वर्थमात्रवचनावेव सच्छब्दसत्ताशब्दौ गृहीत्वैवं तार्किकैः कल्पितं सच्छब्दवाच्या सत्ता महासामान्यमिति। *तदुक्तान्तगमनेऽनादराच्च पदवाक्यविद्भिरप्युपेक्षितं प्रसिद्धमिवेमामवस्थां प्राप्तं गवादिशब्दवाच्यत्वेनापि संभाव्यते। § 2509

न त्वर्थाद्गम्यमानस्य वस्तुत्वस्यापि वाच्यता।
धर्मान्तरत्ववृत्तेस्तु सत्तायाः कुत एव सा।§ 2511

वस्तुशब्दो हि रूढित्वाद्व्यक्तिजात्यन्तराश्रितम्।
सामान्यं यद्ब्रवीत्येतद्गम्यतेऽर्थैर्गवादिभिः॥§ 2513

शुद्धाभिधानपक्षस्य दुष्टत्वात्तैर्विशेषितम्।
महासामान्यमिष्टं चेद्वाच्यं तदपि दुर्लभम्॥§ 2515

यदेवाऽऽकृतिविशिष्टव्यक्त्यभिधानपक्षे व्यक्तिविशिष्टाकृतिपक्षे वा निराकरणकारणं तदत्रापि सुलभम्। विशेषणस्य पूर्वतराभिधानप्रसङ्गात्। § 2516

गोसत्तां चापि गोशब्दो यदि नाम ब्रवीत्ययम्।
गोजात्या वा विशिष्टां तां वदेद्व्यक्तिभिरेव वा॥§ 2518

---

१३ *] तदुक्तेति—यावद्यावद्विवादाय मुक्तकं दीयते मनः। अनवस्थादिदोषेण तावत्तावद्विहन्यते। इत्यनेन न्यायेन चिरनिखाततडागादिगतशैवालवच्छुष्कतर्कस्याप्रतिष्ठितत्वेन निराकृतस्यापि पुनः पुनरुद्रवेन समापयितुमशक्यत्वात्तार्किकोक्तस्यान्तगमने—समापने, अनादरादभियुक्तैरुपेक्षितत्वात्प्रसिद्धं सदिमां—युक्तायुक्तविचारावस्थां प्राप्तमित्यर्थः।

१७ वृत्तेस्तु] धर्मान्तरेति—जात्याख्याद्धर्माद्धर्मान्तरत्वेन—द्वितीयभावविकारत्वेन वर्तमानत्वादित्यर्थः।

तत्र— § 2519 299

गोत्वजातिविशिष्टा चेत्सत्ताऽनेनाभिधीयते।
उक्ताद्विशेषणादेव तत्सिद्धेः सा किमुच्यते॥§ 2521

विशेषणमनभिधाय तद्विशिष्टविशेष्याभिधानासंभवाद्विशेषणस्य च विशेष्येणात्यन्तसंबन्धात्पूर्वतराभिहितविशेषणभूतगोत्वसंबन्धादेव सत्तावगमसिद्धेर्न तत्राभिधानशक्तिकल्पनायामर्थापत्तिरप्यन्यथाऽप्युपपद्यमानफलत्वप्रतिहता सती न प्रवर्तते। तथा व्यक्तिविशिष्टसत्ताभिधानेऽप्येष एव निराकरणहेतुः। अनित्यसंबन्धज्ञानानन्तशब्दशक्तिव्यक्त्यभिधानपूर्वकैकसत्ताभिधानकल्पनायाश्च केवलव्यक्त्यभिधानपक्षवदनुपपत्तिः। यत्तु अपूर्वदेवतास्वर्गैः सममाहुरिति। § 2522

तत्राभिधीयते— § 2523

नैवापूर्वादिशब्दानां सत्ता वाच्येत्यवस्थितम्।
विशेषानेव तेऽप्याहुरर्थापत्त्यादिकल्पितान्॥§ 2525

केचिच्छ्रुतार्थापत्त्या केचिद्वाक्यशेषवाक्यान्तरपर्युपस्थापितार्थविशेषवचना एव सन्तोऽत्यन्ताव्यभिचारिस्वार्थद्वारेण सत्तां गमयन्तोऽनभिधायकत्वेनावधार्यन्ते न सत्तापदार्थो व्यभिचरतीति लक्षणयैव तेभ्यः सत्ताप्रतीतिः। § 2526

कार्यसामर्थ्यमिन्द्रादिनिर्मिश्रसुखसंगतिः।
सामान्येनाप्यपूर्वादि सत्तातोऽन्यत्तु लभ्यते॥§ 2528

सर्वपदार्थानामिव कार्यार्थापत्तिगम्यानि सामर्थ्यानि सन्ति यागादिजनितं च पुंसां फलप्राप्तिसामर्थ्यमपूर्वशब्दवाच्यं यागानुष्ठानात्पूर्वमभूतमनुष्ठानोत्तरकालं चापूर्वं जायत इति यौगिकत्वादेवापूर्वशब्दाभिधानं सर्वत्र लभ्यते। तथा दीव्यन्ति द्योतन्ते वा चन्द्रादित्याग्निग्रहनक्षत्रातारकादिरूपेण वायवश्च सततगत्या स्तूयन्ते सर्वैर्मन्त्रैरिति देवाः सुज्ञानशब्दसंबन्धा विशेषरूपैरेवेति न सत्तागोचरत्वं प्रतिपद्यन्ते। तथा स्वर्गशब्देनापि नक्षत्रदेशो वा वैदिकप्रवादपौराणिकयाज्ञिकदर्शनेनोच्यते यथा हि वेदे 'ये हि जनाः पुण्यकृतः स्वर्गं लोकं यन्ति तेषामेतानि ज्योतींषि नक्षत्राणि तथा चैष ज्योतिष्मन्तं पुण्यलोकं जयति' इति। यदि वेतिहासपुराणोपपन्नं मेरुपृष्ठम्। अथ वाऽन्वयव्यतिरेकाभ्यां विभक्तं केवलमेव सुखं यत्संवत्सरादिष्वनुभूयमानं दुःखसाधनशीतोष्णक्षुत्पिपासादिसमस्तद्वंद्वरहितार्थापत्तिसिद्धदेशान्तरानुभवनीयं, तच्च यद्यपि तादृशमदृष्टपूर्वं तथाऽपि मिश्रानुभवादेव विवेकेनोद्धृत्य स्वर्गशब्दार्थत्वेन ज्ञायमानं सत्तां गमयतीति न तदभिधानमपेक्ष्यते। § 2529

तेनापूर्वादिशब्दार्थाः समाः सत्यं गवादिभिः। 300
स्वशब्दाभिहिताः सन्तः सत्तां लक्षयितुं क्षमाः॥§ 2531

अतश्च नैव गोशब्दो गोसत्तामभिधास्यति।
गोत्वाख्याकृतिवाच्यत्वसंदेहात्तु विचार्यते। § 2533

कुतः संशय इत्येतत्कार्ययोग्यार्थनिर्णयात्।
व्यक्तिमात्रपदार्थत्वं मन्यमानेन चोद्यते॥ § 2535

उच्यते कार्ययोगित्वाद्गम्यते व्यक्तिवाच्यता।
शब्दशक्त्यनुरोधात्तु नाऽकृतेर्व्यतिरिच्यते॥ § 2537

शक्तिकार्यविसंवादादेव शब्दार्थगोचरात्।
किं समञ्जसमित्येवं नाविचार्यावधार्यते॥ § 2539

किं तावत्प्राप्तम्— § 2540

प्रयोगचोदनाभावाद्व्यक्तिर्वाच्या न तूभयम्।
अर्थैकत्वं यतो युक्तमविभागाद् द्वयोर्गतिः॥ § 2542

नित्यं यथैव शब्दानामाम्नातानां प्रयोजने।
अर्थप्रत्यायनार्थत्वात्तद्वशेनावधारणा॥ § 2544

एवं सर्वपदार्थानां वाक्यार्थप्रत्ययाङ्गता।
यथा सिध्येत्तथा कार्यं तेषां रूपनिरूपणात्॥ § 2546

आकृतिर्यदि शब्दार्थः कस्य स्युः प्रोक्षणादयः।
केन चेज्येत न त्याग आकृतेरुपपद्यते॥ § 2548

अमूर्ता ह्याकृतिर्नित्या नावघातादिभाजनी।
तद्विधिः प्रतिषेधो वा तेनास्या नावकल्पते॥ § 2550

‘व्रीहीनवहन्ति’ ‘पशुं संज्ञपयति’ ‘सोममभिषुणोति’ ‘पावयति’ सोमेन पशुना व्रीहिमिश्च यजत इति यावन्त एवमादयो विनाशिमूर्तिमद्विषयाः संस्काराः प्रयोजनसिद्ध्यर्था वा तेषां प्रयोगचोदनाया आकृतावभावाद्व्यक्तौ तु भावात्कार्यप्रधानत्वाच्च पदार्थप्रतीतेर्विध्यधीनत्वाच्च सर्वपुरुषचेष्टानामवश्यं विधिविषयत्वयोग्यवाक्यार्थपूरणसमर्थपदार्थकल्पनमङ्गीकर्तव्यम्। तथा यदपि ‘ब्राह्मणो न हन्तव्यः’ ‘न कलञ्जं भक्षयितव्यम्’ इत्यादिप्रतिषेधविधानं तदपि प्राप्तिपूर्वकत्वेन सापेक्षत्वाद्व्यक्तौ च प्राप्तिसंभवादाकृतेश्चानधिकारादसत्यां प्राप्तावनर्थकमेव स्यात्। तस्माद्येन § 2551

301 शब्दार्थेन प्रयोगचोदनानां भावो भवति स एवाभ्युपगन्तुं न्याय्यो न तत्त्वज्ञानमात्राद्दृष्टिसिद्ध्यर्थपदार्थकल्पना युक्तेति। स्यादेतत्, व्यक्तिसंभव-

त्प्रयोगचोदनासु व्यक्त्यर्थस्ततोऽन्यत्राऽऽकृत्यर्थ एव भविष्यतीति। तदसत्। न्यायेन हि स्थितमेकस्य शब्दस्यार्थैक्यमनवस्थितसंबन्धानेकादृष्टवाचकशक्तिकल्पनविकल्पदोषप्रसङ्गात्। संबद्धानां चार्थानामन्यतराभिधानेनैवेतरत्र प्रतिपत्तिसिद्धेः। कथं तर्ह्याकृतिप्रत्यय इति चेदत आह—**अविभागात् इति**। यतस्तु नित्यमेव व्यक्त्याकृत्योरविभागस्तस्माद्व्यक्तिरभिहिता सती शक्नोत्येवाऽऽकृतिं गमयितुम्। तदुक्तं तद्भूताधिकरणे। यस्य तु पदस्य योऽर्थोऽभिधेयत्वेनाऽऽश्रितस्तस्य तत्परिहारासंभवादवश्यं तत्रस्थस्यैवार्थान्तरं लाक्षणिकत्वेनाभ्युपगन्तव्यमिति। अपि चाऽऽकृतिपदार्थकस्य व्यक्तिषु साधारणानैकान्तिकत्वान्निर्णयो न स्याद्व्यक्तिपदार्थकस्य पुनरत्यन्तान्तर्भूताकृतिनिश्चयसिद्धेर्न शब्दव्यापारकल्पनोपपत्तिः। तस्माद्व्यक्तिरेव शब्दार्थो नाऽऽकृतिः। न च विकल्पसमुच्चयसंबन्धसमुदायान्यतरविशिष्टान्यतराभिधानपक्षाः संभवन्त्यविभागादेव सर्वेषामपि ज्ञानसिद्धेः॥ ३०॥ § 2552

अपि **चाद्रव्यशब्दत्वाद्व्यक्तेरेवाभिधेयता।**
सामानाधिकरण्यं हि नाऽऽकृत्यर्थगुणार्थयोः॥§ 2554

गोशब्दादीनामाकृतिवचनत्वे गौः शुक्लः, ‘अरुणया पिङ्गाक्ष्यैकहायन्या गवा क्रीणाति’ इति ‘षड्गावो देयाः’ ‘एकां गां दक्षिणां दद्यात्’ इत्येवमादिषु प्रयोगेषु सर्वेषां जातिगुणमात्रवचनत्वात्सामानाधिकरण्यं न प्राप्नोति। § 2555

गोत्वस्य न हि संबन्धः शुक्लत्वारुणिमादिभिः।
येन षष्ठ्यपि तावत्स्यात्कुतस्त्वेकार्थवृत्तिता॥§ 2557

न हि गोत्वात्कृतिः शुक्ला नारुणा नापि षड्गुणा।
व्यक्तिस्त्वेवंगुणा तस्माद्व्यक्तेरेवाभिधेयता॥§ 2559 302

मम हि व्यक्तिशब्दत्वात्सिध्यत्येकार्थवृत्तिता।
तव त्वद्रव्यशब्दत्वाद्भवेद्भेदो गवाश्ववत्॥§ 2561

जातिगुणविशिष्टव्यक्तिवचनत्वेन शुद्धव्यक्तिवचनत्वेन वा प्रत्यक्षे भवति सामानाधिकरण्यं, तच्च तत्र द्रव्यम्। एवंविधमपि समानद्रव्यशब्दत्वं त्वत्पक्षे न स्यादिति नञा तदभावप्रसङ्गं दर्शयति। यत्तु भाष्यकारो विपरीतार्थेन द्रव्यशब्देनैव तदाश्रयगुणलक्षणया नञश्चासमर्थसमासमङ्गीकृत्य न द्रव्याश्रयवचनः शब्दो भवेत्। आकृतिवादिन इत्याह। तदतिक्लिष्टं व्यधिकरणनिर्दिष्टगुणप्रयोगार्हं चेत्युपेक्षितव्यम्। तत्रापि चैवमक्षरार्थमात्रसंभवयोजना। द्रव्याश्रयस्य गुणस्य यः शब्दोऽद्रव्यशब्दः स आकृतेर्निर्गुणत्वादेकवाक्यसंब-

---

६ दुक्तं] जै° ( १-१-७ )।
७ श्यं] तत्रस्थस्येति तस्मिन्नेवार्थे वर्तमानस्य शब्दस्येत्यर्थः।

न्धं गोत्वं शुक्लमित्यादिवन्न प्रतिपद्यते। सामानाधिकरण्यचोद्यं तु स्वपक्षेऽप्य-
विशेषात्तदानीमप्यनुपपन्नमेवेति पूर्वैव व्याख्या कर्तव्या॥ ३१॥ ३२॥ § 2562

किं च नैवेष्टकाभिराकृतिसंपादनमभ्युपगतं यतः स्वभावात्स्नाय्वाद्यार-
ब्धद्रव्यसमवायित्वेनोपालम्भः स्यात्पिष्टपिण्डसिंहवत्सादृश्यसंपत्तिः पक्षद्वयेऽपि
चोदनार्थः। सा त्वाकृत्यन्तरविलक्षणश्येनाकृत्या स्यान्न तु व्यक्त्यन्तरविलक्षण-
श्येनविशेषेणासाधारणेन वा। निर्विकल्पत्वात्सामान्यविशेषानपेक्षं व्यक्तिमात्र-
सादृश्यमविधेयं, सर्वद्रव्येषु तुल्यत्वात्। एकव्यक्तिपरिग्रहाच्च व्यक्त्यन्तरेण सा-
303 दृश्यं न कार्यं स्यात्। तस्माच्छ्येनचित्क्रिया व्यक्तौ शब्दार्थे न संभवति।
**न साधकतम इति**। न ह्येवं स्मृतिः श्येनैश्चीयत इति श्येनचित्, 'कर्म-
ण्यग्न्याख्यायाम्'* इति हि सा। श्येनं चयनेन साधयेदितीप्सिततमत्वम्।
तत्रापि 'मुख्यासभवात्सादृश्यपरिग्रहः। असाधारणे शब्दप्रवृत्त्यसंभवात्'*
304 अव्यपदेश्यत्वेन च सर्वत्राविशेषात्, सामान्याकारेण च निरूपणे विकल्पात्,
व्यापकापेक्षया, व्याप्यसामान्यस्य नैव विशेषव्याप्यापेक्षयेतरत्राऽऽकृतिः। त-
त्र विशेषपक्षे संबन्धानन्वाख्यानव्यभिचारसामान्यबुद्ध्यभावप्रत्यर्थशक्तिकल्प-
नादयो दोषाः। न च यत्र संशयस्तत्प्रत्याय्यं भवतीति निर्विषयता शब्द-
स्य। एतेन स्वतन्त्रोभयाभिधानमार्गः प्रत्युक्तः। व्यक्तिविशिष्टाकृतिमार्गोऽपि
'नागृहीतविशेषणा' इति न्यायाद्व्यक्तेः प्रथमग्रहणप्रसङ्गात् संबन्धसमुदाय-
योरपि स्वरूपप्रत्ययाभावात्सर्वत्र चाविशेषादवश्यं संबन्धिसमुदायिविशेषण-
ताऽभ्युपगन्तव्या भवति। तत्रापि शक्तित्रयकल्पना। व्यक्त्यंशे चोक्तदोषप्रस-
ङ्गः। न च व्यक्त्याकृत्योर्भिन्नकार्ययोर्गुणप्रधाननानावस्थयोः समुदायोपगमनं
युक्तम्। अनत्यन्तभेदाच्च भिन्नधर्मौ संबन्धसमुदायौ न युक्तौ। आकृतिविशि-
ष्टोऽपि व्यक्तिविशेषो नैव प्रतीयते। व्यक्तिविशेषबुद्ध्यभावाद् व्यक्तिमात्र-
मिति चेन्न। तदानीं तस्याऽऽकृतितोऽन्यत्वेनानिरूपणात्। मात्रशब्दो हि
सामान्यवाचीत्याकृतिरेवोच्यते। नानाकारेषु च वस्तुषु तद्भेदानुसारित्वाच्छ-
क्तीनामन्वयव्यतिरेकाभ्यां गोत्वाकारनिबन्धनैव गोशब्दवाच्यत्वशक्तिर्गम्यते त-
देकाधारसामान्यान्तरावगतिर्विशेषाकाङ्क्षा वेत्यर्थव्याप्यव्याप्तिम्याम्। अनत्य-
न्तव्यतिरेकाच्चाऽऽकृतेरमूर्तत्वाद्याश्रयदोषाप्रसङ्गः। सा हि प्रतीयते निष्कृष्ट-
रूपा, क्रियायोगिनी तु व्यक्त्युपेता भवत्येवेति प्रोक्षणावेक्षणादि तु न कथंचिन्न
305 संभवति। विशसनाद्यपि तु व्यक्त्यव्यतिरेकापेक्षया संभवत्येव। तथा हि—
पश्वादिष्वपनीताङ्गेषु विशेषबुद्ध्यभावात्सामान्यरूपैव विशसनादिविशिष्टा बु-
द्धिर्दृष्टा। नन्वेवमनित्याऽऽकृतिः स्यात्। तेनांशेनेष्टैव। आश्रयान्तराविनाशात्तु

---

१ च] 'अन्यदर्शनाच्च' इति पूर्वपक्षसूत्रगतं भाष्यं स्पष्टत्वादुपेक्ष्य, 'आकृतिस्तु क्रियार्थत्वात्' इति सिद्धान्तसूत्रगतं 'श्येनचितं चिन्वीत' इति वचनमाकृतौ संभवतीति भाष्यं यथाश्रुतार्थमसंगतमिव मन्वानो दुष्टत्वेन बुद्धिस्थं दूषयितुमुपक्रमते—किंचेत्यादिना।
८ *] पा॰ सू॰ ( ३। २। ९२ )।

९ *] असाधारणेत्यारभ्येतरत्राऽऽकृतिरित्यन्तो वार्तिकग्रन्थः यथा आकृतिःशब्दार्थ इत्यारम्भ—शक्यत आश्रयितुमित्यन्तभाष्य-ग्रन्थव्याख्यानार्थस्तथान्यायसुधाया विस्तरः।

सर्वैरप्यविनाशोऽवश्यमेवैष्टव्यः। तेन यत्तावन्मात्रमेव तस्य विनाशोऽनेकदेशस्य तु न कथंचिद्विनाशः स्यादित्युभयथा व्यवहारः। अत्यन्तव्यतिरेके तु नैव धर्मविधिविषयो व्यवतिष्ठेत। न च पशुत्वममूर्तत्वात्। तदुपलक्षितं तु यद्द्रव्यं तद्द्रव्यत्वादृते न तादूप्येण गम्यत इत्येकार्थसमवायाद्व्यापकत्वाच्च द्रव्यं गमयितव्यं, तत्राप्यमूर्तत्वं दोषः। आश्रयोपलक्षणाच्च द्रव्यमात्रप्रसङ्गः। विशेषस्तु पशुत्वस्य वा द्रव्यत्वस्य वाऽव्यापकत्वादगम्यः। न वाऽप्रतीतं विधिना संबध्यते। न च यत्र संशयस्तत्प्रतीतम्। न चान्यत्रोक्तो धर्मस्तत्रासंभवादन्यत्र कार्यः। तस्मान्न सामान्ये कृतो विशेषेषु युक्तः, विशेषा अपि व्यपदेशात्सामान्यमेवेत्यमूर्तता। असाधारणेन तु नैव व्यवहारस्तस्मादनिरूप्यो धर्मविधिविषयः। सामानाधिकरण्यादि च प्रसिद्धिविपरीतं लक्षणया कल्प्यम्। भाष्यकारेण तु व्यतिरेकाभ्युपगमेनाऽऽश्रयमात्रगतिरुक्ता विशेषरूपा न कदाचिद् व्यक्तिः प्रतीयते। योऽप्याश्रयाश्रयिभावः सोऽप्यौपचारिकः। सामान्याच्च विशेषलक्षणं तत्र नाऽऽश्रयितव्यम्। आक्षेपमात्रभावादथ वैतद्विषय एवायं प्रपञ्चः किं शब्देनाऽऽकृत्या वेति। अन्वयव्यतिरेकाभ्यां चाऽऽकृत्येति निर्णयः। यो हि धूमादग्निमत्त्वं प्रतिपद्यते तस्य तैक्ष्ण्येऽप्याकाङ्क्षा सिद्धा। **मानसादपचारादिति**। यो हि जाड्यात्सामान्यवाचितां हित्वा कंचिदेव विशेषं यत्र संबन्धानुपवस्तं वाच्यं मन्यते तस्य सामान्याप्रतीतेर्न विशेषान्तरापेक्षा भवति। अथ वा यथा शब्दात्स्वतन्त्रामाकृतिं बुध्यते नैवं कदाचिदाकृतिमबुद्ध्वा व्यक्तिमिति। केन तर्हि गोत्वागोशब्दयोर्विशेषः। व्यतिरेकांशस्यैकत्र विवक्षा। गोत्ववानिति तु स्फुटं प्रत्ययेन जातिमदभिधानं विभागोपपत्तेः। सामान्यस्य वोपलक्षणत्वान्न भेदपक्षदोषः। भेदानामेव चायं प्रत्येकं सर्वेषां वाचकः। यस्तूपादीयमानत्वे संशयः स संख्याधारविषयः। उद्दिश्यमानेषु निर्णय एव। गवादिशब्दग्रहणं सर्वनामाख्याशब्दानामन्तर्भावार्थम्। प्रयोजनं सामान्यविशेषशब्दयोरेकविषयत्वात्सामान्यशिष्टस्य विशेषशिष्टेनाबाधः पूर्वपक्षे। एवं वा— § 2563

गौरित्येवंविधाः शब्दाः साधुत्वेन निरूपिताः। 306
तेषामेवाभिधेयेऽर्थे व्यापारः क्वेति चिन्त्यते॥§ 2565

*चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः।
क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः॥§ 2567

तयोरर्थाभिधाने हि व्यापारो नैव विद्यते।
यदर्थद्योतकौ तौ तु वाचकः स विचार्यते॥§ 2569

---

२८ *] नामाख्यातोपसर्गनिपातरूप इत्यर्थः।

वाचकत्वेऽपि पाश्चात्यमनुयात्येवमादिषु।
प्रतीयते विशेषो यः संशयेन स नाऽप्यते॥ [§ 2571]

यदि ह्यर्थद्वये बुद्धिर्निपातोच्चारणाद्भवेत्।
ततो विचारो जायेत न सामान्यधिया विना॥ [§ 2573]

आख्यातस्यापि नन्वत्र न युक्ताऽर्थविचारणा।
द्वितीयादावियं यस्माद्विस्तरेण करिष्यते॥ [§ 2575]

कः पुनर्भाव इत्यादौ विवेकेनार्थनिर्णयः।
आख्यातस्य कृतस्तेन तच्चिन्ता नोपपद्यते॥ [§ 2577]

प्रत्ययार्थस्य भावस्य वाच्यता प्रतिपादिता।
प्रकृत्यर्थविवेकार्थं विचारः क्रियतेऽधुना॥ [§ 2579]

प्रत्ययस्यापि वा तत्र भावार्थत्वे निरूपिते।
सामान्यं वा विशेषो वा किं वाच्यमिति चिन्त्यते॥ [§ 2581]

या चोक्ता भाष्यकारेण यागादेरभिधेयता।
सिद्धा सेह विवेकार्थं तत्र भावस्य भाषिता॥ [§ 2583]

यज्याद्यर्थेऽपि वा वाच्ये किं सामान्यविशेषयोः।
अभिधेयमिति प्राप्ता चिन्ता कर्तुं क्रियापदे॥ [§ 2585]

अपूर्वं भावशब्देभ्यो द्रव्यादिभ्यः किमिष्यते।
एषा तत्र च चिन्तोक्ता शेषा प्रासङ्गिकी कथा॥ [§ 2587]

नामाख्यातपदे तेन कस्यार्थस्याभिधायके।
किमाकृतेरुत व्यक्तेरिति चिन्ता प्रवर्तते॥ [§ 2589]

प्रयोगस्य प्रतीतेश्च तुल्यत्वाच्छब्दलक्षणे।
व्यक्तिपक्षाभिधानाच्च संशयः प्रतिभाति नः॥ [§ 2591]

307 कथं लक्षणसंबन्धश्चिन्तायाः प्रकृतेन वा।
स्मृतिमूलविचारेण वक्तव्यं त्विदमादितः। [§ 2593]

---

७ कः ] जै° सू° २-१-१ इत्यत्र भाष्यकारेण।

इयं प्रासङ्गिकी चिन्ता साधुशब्दे निरूपिते।
उदाहृतस्य तस्यैव क्रियतेऽर्थविनिश्चयः॥§ 2595

वक्तव्यः पूर्वमर्थश्चेच्छब्दरूपनिरूपणात्।
न हि वाच्यमविज्ञाय साधुत्वमवधार्यते॥§ 2597

अनिश्चितेऽपि वाच्यत्वे व्यक्त्याकृत्योर्विवेकतः।
साधुत्वं शक्यते ज्ञातुं तेन वाच्यमिहोच्यते॥§ 2599

वाच्यमात्रे हि साधुत्वमविज्ञाते न लभ्यते।
न चाऽऽकृत्या न च व्यक्त्या विना तन्नोपपद्यते॥§ 2601

अथ वोक्तेन मार्गेण सर्वा व्याकरणस्मृतिः।
प्रमाणमिति सिद्धस्य किंचिदत्र विचार्यते॥§ 2603

व्यक्तिर्वाच्येति विज्ञानं न सन्मूलमसंभवात्।
तेन व्याकरणेऽपीदृग् न प्रमाणं स्मृतिर्मता॥§ 2605

स्मृतेस्तेनापवादोऽयं प्रामाण्यस्य क्वचित्कृतः।
युक्तो लक्षणपादाभ्यां पूर्वया चापि चिन्तया॥§ 2607

ननु चाऽऽकृतिपक्षेऽपि व्यक्तावेव क्रियाक्रिये।
शब्दार्थे संभवात्तेन किमर्थैषा विचारणा॥§ 2609

यद्यप्येवं न भेदोऽस्ति वेदार्थकरणे नृणाम्।
दधि विप्रेभ्य इत्यादौ फलं लोके भविष्यति॥§ 2611

व्यक्तिपक्षे विकल्पः स्यात्कौण्डिन्ये दधितक्रयोः।
सामान्यवाक्यदौर्बल्यात्तक्रमेवेतरत्र तु॥§ 2613

वेदेऽपि च विशेषोऽस्ति व्रीहिप्रोक्षणचोदके।
दध्नेत्यादिषु भेदश्च जायते होमचोदके॥§ 2615

प्रोक्षणं पूर्वपक्षेऽपि कर्तव्यं लौकिकेष्वपि।
व्रीहिषु श्रुतिसामर्थ्याद्बाधित्वा संनिधिक्रमम्॥§ 2617

प्रकृतेष्वेव सिद्धान्ते श्रुतिसंनिध्यनुग्रहात्।

तत्रापि कृत्स्नमस्त्येव व्रीहित्वं हि श्रुतीरितम्॥§ 2619

एवं होमेऽपि दध्यादौ प्रकृतेऽप्रकृतेऽथ वा।
प्रकृते श्रुतिवाच्यस्य होमत्वस्यापि संभवात्॥§ 2621

308 सोपपत्तिकमन्यच्च वक्तव्यमनया दिशा।
कर्तव्या तेन यत्नेन चिन्तेयं सप्रयोजना॥§ 2623

ननु गौरितिशब्दादौ सर्वमेतद्विचारितम्।
तेन तेन गतार्थत्वात्पुनश्चिन्ता न युज्यते॥§ 2625

आकृतेरभिधेयत्वप्रतिज्ञा केवला कृता।
तत्रेदानीं सहेतुत्वं तस्या एवाभिधीयते॥§ 2627

यथा चाऽऽकृतिरित्यादौ भाष्यकारेण चोदितम्।
पुनरस्याः प्रतिज्ञाया हेतुरप्यभिधास्यते॥§ 2629

यद्वोक्तास्तत्र सद्भावः शब्दार्थत्वमिहोच्यते।
या तु शब्दार्थता प्रोक्ता सेह सिद्धा न चिन्तिता॥§ 2631

उक्ते वाऽप्यभिधेयत्वे जातेः सद्भावसिद्धये।
व्यक्तिर्वाच्या न वेत्येतदगतार्थं विचार्यते॥§ 2633

एतच्चिन्ताप्रसिद्ध्यर्थमिदं तावद्विचार्यते।
शब्दार्थौ लौकिकौ वेदे किमन्याविति संशयः॥§ 2635

एकत्वे सति कर्तव्यो विचारः शब्दवाच्ययोः।
भेदे तु संशयाभावान्न चिन्तावसरो यतः॥§ 2637

शब्दार्थेन न कार्यं हि व्यवहारेऽर्थलक्षणे।
लौकिकव्यवहारार्थं तेनेदं न विचार्येत॥§ 2639

वेदे तु प्रत्यभिज्ञाने शब्दार्थविषये सति।
विवेकः शक्यते ज्ञातुं प्रतीतेर्वाच्यगम्ययोः॥§ 2641

६ म] जे सू. ( १-१-५ ) इत्यत्र वृत्तिकारमतानुवादे शब्दार्थसंबन्धाक्षेपपरिहारग्रन्थे भाष्यकारैरिति शेषः।

अलौकिके च शब्दार्थे वाच्यवाचकरूपयोः।
अज्ञातयोर्न जायेत संदेहो वाच्यवस्तुनि॥[§ 2643]

तेन प्रतीतशब्दार्थे निर्णयार्थमिदं पुरा।
एकत्वं विद्यते नेति चिन्त्यं शब्दाभिधेययोः॥[§ 2645]

*संख्याभावादिति ह्येतन्ननु स्पष्टं निरूपितम्।
शब्दस्य प्रत्यभिज्ञानान्नान्यतोच्चारणान्तरे॥[§ 2647]

अभेदकारणं चात्र प्रत्यभिज्ञानमेव ते।
अन्यत्तूपचयत्वेन तेन चिन्ता न युज्यते॥[§ 2649]

लौकिकेष्वेव शब्देषु तत्राभेदः प्रसाधितः। 309
वैदिकानामभेदार्थं चिन्तनीयमिदं पुनः॥[§ 2651]

व्यपदेशादिभेदाच्च कथं भेदो न जायते।
तत्रानुक्तमिदं वक्तुं विचारोऽयं प्रवर्तितः॥[§ 2653]

एकत्वेऽपि च शब्दस्य सिद्धे तत्रेह चिन्त्यते।
किमर्थो भिद्यते नेति तेनाप्यपुनरुक्तता॥[§ 2655]

अर्थाभेदे च चिन्तेयं शब्दाभेदे तु सत्यपि।
घटते कस्य वाच्यत्वं व्यक्त्याकृत्योर्द्वयोरपि॥[§ 2657]

व्यपदेशादिभेदेन शब्दे च प्रत्यभिज्ञया।[§ 2658]

भेदाभेदनिमित्ताभ्यां क्रियते संशयोद्भवः।
किं प्राप्तमुच्यते भिन्नौ शब्दार्थौ लोकवेदयोः॥[§ 2660]

व्यपदेशस्य भिन्नत्वादाख्याया लक्षणस्य च।
स्वरोच्चारणभेदाच्च लोपव्यत्ययदर्शनात्॥[§ 2662]

स्वरुयूपादिशब्देश्च स्पष्टभेदैः सह श्रुतेः।
अनध्यायादिभेदाच्च शूद्रोच्चारणवर्जनात्॥[§ 2664]

अश्ववालादिशब्दानां स्पष्टार्थान्तरदर्शनात्।

---

५ *] जै॰ सू॰ ( १-१-६ )।

अग्न्यादीनां च भिन्नत्वं भाष्ये यदभिधीयते॥[§ 2666]

तदयुक्तं क्रियाभेदे कर्तृभेदो हि नेष्यते।
हन्तिकर्तृत्वमग्नेश्च पदार्थेभ्यः प्रतीयते॥[§ 2668]

अशाब्दं वहनिशब्दस्य तद्वाच्यं कथमुच्यते।
हननं किं कृतं नेति प्रमाणं चात्र नास्ति नः॥[§ 2670]

असता कथमन्यत्वं कर्मणाऽतः प्रतीयते।
अपूर्वे वृत्रशब्दार्थे क्रियाशब्देऽप्यलौकिके॥[§ 2672]

हन्तिकर्तरि वहनित्वं कथमध्यवसीयते।
स्तुतिमात्रपरत्वाच्च न वह्नित्वं विधीयते॥[§ 2674]

अक्रियत्वाच्च भाष्योक्तैर्वाक्यैरित्यभिधास्यते।
तेनोक्तस्यैव शब्दस्य त्रिवृदादेर्नवादिषु॥[§ 2676]

वृत्तिरर्थेष्वपूर्वेषु वक्तव्या भेदसिद्धये।
*यच्चान्यदिदमित्याह रूपभेदं क्रियाश्रुतेः॥[§ 2678]

तदसत्यं न शब्दस्य भेदोऽर्थगुणकारितः।
310 तेन स्वरादिभेदेन वक्तव्या भिन्नरूपता॥[§ 2680]

पूर्वोक्तेनैव मार्गेण नार्थभेदनिबन्धना।
तस्माच्छब्दार्थयोर्भेदः स्पष्ट इत्यवधारिते॥[§ 2682]

तावेव वेदे शब्दार्थौ लोके याविति भाष्यते।
वेदस्यैव प्रसज्येत सकलस्याप्रमाणता॥[§ 2684]

अविज्ञातार्थसंयोगात्स्थितप्रामाण्यबाधया।
प्रयोगस्याग्निहोत्रादेश्चोदनायाश्च जायते॥[§ 2686]

अभावः प्रत्ययार्थस्य विधेरप्रतिपादनात्।
अर्थान्तरे च शब्दस्य न प्रयोगो विधीयते॥[§ 2688]

---

१३ *] लोकवेदयोः इति शेषः।
शब्दार्थानामनन्यत्वनिरूपणावसरे भाष्यकार

वेदेनाशास्त्रहेतुत्वात्संबन्धस्येति हि स्थितम्।
किं चाविभक्तरूपत्वं प्रत्यभिज्ञायते स्फुटम्॥§ 2690

वैदिकेष्वपि शब्देषु प्रत्यक्षेण पुनःपुनः।
यद्वा विभागशब्देन शब्दस्योच्चारेण सति॥§ 2692

गोत्वबुद्धेः समानत्वान्न भेद इति कीर्त्यते।
लक्षणस्याविभक्तत्वं शब्दानां वेदमुच्यते॥§ 2694

सर्वथा शक्यते भेदो न वक्तुं शब्दवाच्ययोः।
एकत्वे याज्ञिकानां च प्रसिद्धिरनुगृह्यते॥§ 2696

मीमांसा चापि वेदार्थतत्त्वनिर्णयकारणम्।
व्यपदेशादिभेदैश्च न भेदोऽत्रानुमीयते॥§ 2698

प्रत्यक्षप्रत्यभिज्ञाने वेदशब्देऽन्यरूपता।
व्यपदेशादिभेदश्च स्वरभेदादिकारितः॥§ 2700

स्वरादयश्च भिद्यन्ते वेदत्वात्किमिहोच्यते।
स्वरुयूपादिशब्दानामन्यत्वेनेतरत्र च॥§ 2702

नान्यत्वं युज्यते बाधात्प्रत्यक्षप्रत्यभिज्ञया।
वचनाद्धर्मभेदस्तु शूद्रवर्जितताऽपि वा॥§ 2704

धर्मावुच्चारणस्यैतौ न शब्दस्य स्वरश्च यः।
अश्ववालादिशब्दार्थभेदे वचनकारिते॥§ 2706

न च भिन्नत्वमन्येषु प्रज्ञातार्थेषु युज्यते।
उत्तानानां च केषांचिद्वहतां न विधीयते॥§ 2708

गोत्वं तेषामसिद्धत्वात्पदार्थाग्रहणादपि। 311
विधेरन्यस्य शेषत्वात्स्तुतिरेषाऽवगम्यते॥§ 2710

उत्तानेत्यादिका तेन नातो भेदः प्रतीयते।
तस्माद्यावेव शब्दार्थौ लोके पूर्वं निरूपितौ॥§ 2712

१ म्] जै° सू° ( ३-२-२ ) इत्यत्र।

वेदे तावेव विज्ञेयाविति सिद्धं प्रमाणवत्।
यद्वा चैवं तदा युक्ता चिन्तेयं क्रियतेऽधुना॥[§ 2714]

किमाकृतेः पदार्थत्वं किं व्यक्तेः किं द्वयोरिति।
बहवः प्रतिभान्त्यत्र पक्षाः प्रतिपदं च ये॥[§ 2716]

ते च सर्वेऽभिधीयन्ते व्यामोहविनिवृत्तये।
गौरित्युच्चरिते सप्त वस्तूनि प्रतिभान्ति नः॥[§ 2718]

जातिर्व्यक्तिश्च संबन्धः समूहो लिङ्गकारके।
संख्या च सप्तमी तेषामष्टपक्षी द्वयोर्द्वयोः॥[§ 2720]

किं जातिरेव शब्दार्थो व्यक्तिरेवाथ वोभयम्।
किं विकल्पोऽथ संबन्धः समुदायो निरूप्यताम्॥[§ 2722]

जातिर्व्यक्तिविशिष्टा वा व्यक्तिर्जातिविशेषिता।
जातिसंबन्धयोरेवं सामान्यसमुदाययोः॥[§ 2724]

जातिकारकयोश्चैवं संख्यासामान्ययोरपि।
लिङ्गसामान्ययोरेवमेकैकस्येतरैः सह॥[§ 2726]

अष्टौ पक्षा नियोक्तव्याः षड्भिः प्रत्येकमुक्तवत्।
एवमानन्त्यमेतेषां पक्षाणामिह गम्यते॥[§ 2728]

पूर्वपक्षेऽपि चत्वारो भाष्ये चैते प्रदर्शिताः।
व्यक्तेरेवाभिधेयत्वं द्वयोर्वा स्वप्रधानयोः॥[§ 2730]

व्यक्तेर्जातिविशिष्टाया विपरीतमथापि वा।
उपन्यासेन चैतेषां ज्ञेयाः सर्वे प्रपञ्चिताः॥[§ 2732]

निराकरणयुक्त्या च निषिद्धा इति नोदिताः।[§ 2733]

तेनाऽऽद्यौ द्वावेव पक्षौ विचार्येते किमाकृतिः शब्दार्थो व्यक्तिरिति।
भाष्यकारेण च संशयकारणमुक्तं **सामान्य**प्रत्ययाद्व्यक्तौ च **क्रियासंभ-
वादिति**। एतदयुक्तं, व्यक्तेरपि प्रतीयमानत्वात्कथं जातेरेव प्रतीतिरुपन्य-
स्यते। यदि च व्यक्तिर्न संप्रतीयेत ततः संशय एव न स्यात्किम-
312 भिधीयतेऽनेनेति। न च क्रियासंभवोऽभिधेयत्वे कारणं व्यक्त्यन्तराणाम-
पि प्रसङ्गात्। तेन पूर्वोक्तमेव संशयकारणं मन्तव्यम्। प्रयोगप्रतीत्योः
साधारणत्वाच्छास्त्रान्तरे व्यक्तिपक्षाभ्युपगमात्संशयः। यद्वा शब्द उच्चारिते

सामान्यप्रत्ययाद् व्यक्त्याकृत्योः सामान्यात्तुल्यात्प्रत्ययाद् व्यक्तौ च शब्दादाकृतावालम्भनस्पर्शनश्येनसदृशचयनादिक्रियासंभवात्सामान्ये व्यक्तौ च प्रत्ययात्क्रियासंभवादिति चोक्तम्। **का पुनराकृतिः का व्यक्तिरिति**। कथं पुनरयं प्रश्नो यदा गौरित्येतस्य शब्दस्य कोऽर्थ इत्यत्र जातिर्निरूपिता। नैष दोषः। येनैतन्न ज्ञातमसौ पृच्छति का पुनराकृतिः का व्यक्तिरिति। संदेहाद्वाऽत्र पुनरुभयस्मिन्प्रतीयमाने का व्यक्तिः कियती वा जातिरिति। वैपरीत्येन वा कश्चित्पृच्छति यदा शाबलेयादिपिण्डान्न किंचिद् व्यक्तं वस्त्वन्तरं भिन्नमुपलभ्यते तदा कुतोऽयं विवेको व्यक्तिरियं जातिरियमिति। अथ वा व्यवहारार्थं सर्वैव चिन्ता क्रियते जातेश्च पदार्थत्वेऽपि व्यक्तौ क्रियासंभवान्निष्प्रयोजना चिन्ता यतस्त्वसौ प्रयत्नेनैतद्विचारयति। तेन नूनं काऽप्यस्य पिण्डादत्यन्तभिन्नव्यवहारयोग्या जातिरभिप्रेतेत्यभिप्रायः। तत्राऽऽह। **द्रव्यगुणकर्मणां सामान्यमात्रमाकृतिरिति**। यौ तावदज्ञानसंशयवादिनौ तयोः स्वरूपकथनमात्रेणैव निराकरणं वक्तव्यम्। यस्तु विपरीतवादी तस्यैव निराकरणमभिधीयते। यद्यपि जातिर्व्यक्तेरत्यन्तभिन्ना नोपलभ्यते तथाऽपि शबलाकारे तस्मिन्नुपलभ्यमाने सामान्यबुद्धेरालम्बनं प्रथमपादोक्तेन न्यायेनाऽऽकृतिरितरा व्यक्तिः। न चानेन ग्रन्थेन जातेः सद्भावः प्रमाणं वा प्रतिपाद्यते व्यक्तेर्विवेकः केवलः कथ्यते। तेनैवाभिप्रायेण मात्रशब्दप्रयोगोऽन्यथा तस्य गतार्थतैव भवेत्। यदप्युक्तं नूनं काऽप्यत्यन्तभिन्ना जातिरभिप्रेतेति। तस्याप्युत्तरं द्रव्यगुणकर्मणां सामान्यमात्रमाकृतिरभिप्रेता नात्यन्तव्यतिरिक्तेति। द्रव्यादीनां च सर्वेषां यत्सामान्यं सत्तारूपं तदनेन निर्दिश्यते, तन्निर्देशेनावान्तरसामान्यानामपि निर्देशसिद्धिः। यद्वा सामान्यशब्दस्य प्रत्येकं संबन्धाद्द्रव्यत्वादीनि त्रीणि सामान्यानि निर्दिश्यन्ते सत्तया व्यवहाराभावात्। अथ वा मात्रशब्दप्रयोगाद्द्रव्यादिषु यावन्त्यवान्तरसामान्यानि महासामान्यं च तत्सर्वमभिधीयते। **असाधारणविशेषा व्यक्तिरिति** बहुव्रीहिः। असाधारणा विशेषा यस्यां व्यक्तौ सेयमसाधारणविशेषा, न त्वसाधारणाश्च ते विशेषाश्चेति सामानाधिकरण्यं संभवति। उपरिष्टाद्विशेषाधारस्य व्यक्तित्वाभिधानात्। स्मृतेश्च। तेन सम्यगभिहितं किमाकृतिर्वा व्यक्तिरिति। किं प्राप्तम्। आलम्भनप्रोक्षणविशसनादिप्रयोगचोदनाया व्यक्तिपक्षे भावादाकृतिपक्षे चाभावात् 'ब्राह्मणो न हन्तव्यः' 'सुरा न पातव्या' इत्यादिप्रतिषेधचोदनायाश्च व्यक्तिपक्ष एव संभवाद्देवदत्त गामभ्याजेत्येबमादिलौकिकव्यवहारचोदनायाश्चोपपत्तेर्व्यक्तिः शब्दार्थ इति निश्चीयते। संख्याकारकोपपत्तेश्च। यदि हि व्यक्तिः शब्दार्थो भवति ततो वृक्षौ वृक्षाभ्यामिति प्रातिपदिकाभिहितासु व्य- 313
क्तिषु प्रत्ययाभिहितद्वित्वादिसंख्याकरणादिकारकं वोभयमुपपद्यते, इतरत्र तु जातेरसंख्येयत्वादकारकत्वाच्चोभयमप्यनुपपन्नम्। लाक्षणिकव्यक्त्याश्रयणं चाऽऽपद्येताम्। तथा च सर्ववैदिकवाक्यार्थानां लाक्षणिकत्वं स्यात्। व्यक्तिप-

२७ स्मृतेश्च ] नित्यद्रव्यवृत्तयो विशेषा इति स्मृतिः।

क्षे च पुरुषो देवदत्त इति मुख्यशब्दसामानाधिकरण्योपपत्तिः। जातिपक्षे
लाक्षणिकद्वारं सामानाधिकरण्यं कल्पयितव्यं भवेत्तेनापि व्यक्तेः पदार्थ-
त्वमवसीयते। ‘पशुमालभेत’ इति च श्रुतेर्हृदयजिह्वादिभिर्व्यक्त्यवयवैरुप-
रिष्टाद् व्यवहारो दृश्यते न जांत्या कर्मभिश्च द्रव्यस्यापेक्षितत्वाद्। व्य-
क्तिपक्षेऽपेक्षिताभिधानं नेतरत्र, सिद्धस्वरूपायाश्च व्यक्तेरभिधेयत्वं युक्तं नाप्र-
सिद्धाया जातेरतो व्यक्तिः शब्दार्थः। किमित्युभयं वाच्यं नाऽऽश्रीयते प्रयोग-
प्रतीतिक्रियोपपत्तेरिति चेत्। न। अनेकशक्तिकल्पनाप्रसङ्गादेकाभिधानेनैव
संबन्धादितरत्र प्रतीतेरुपपन्नत्वाद् व्यक्तेरेवाभिधेयत्वम्। सामान्यप्रत्ययः क-
थमिति चेद् व्यक्तिसंबन्धादुपपत्स्यते। यत्रैव क्रियानुपपत्तिस्तत्रैवार्थापत्त्या
व्यक्तिवचनत्वं युक्तम्, अन्यत्र तु पूर्वप्रतीतेर्जातिवचनत्वमेव न्याय्यमिति
चेत्। न। उक्तमार्गेणानेकशक्तिकल्पनादिदोषप्रसङ्गात्। अवनस्थितशब्दार्थ-
संबन्धापत्तेः संशयापत्तेश्च। व्यक्तिवादिनः कथं निर्निमित्तता व्यक्त्यन्तरे श-
ब्दस्य प्रवृत्तिरिति चेदाकृतिचिह्ननिमित्तत्वाद् व्यक्त्यन्तरे प्रयोगस्याविरोधः।
भाष्यकारस्तु **कथं सामान्यावगतिः—इत्युपन्यस्य, आकृतिश्चिह्नभूता भविष्य-
तीत्युत्तरं** ददाति, तदसंबद्धम्। कथं सामान्यप्रत्ययः कारणे पृष्टे व्यक्त्यन्त-
रप्रयोगनिमित्तं कथ्यते। तेनाध्याहारेणैतद् व्याख्येयम्। कथं सामान्यावग-
तिरिति चेत्। व्यक्तिसंबन्धात्। कथं व्यक्त्यन्तरे प्रयोगः, चिह्नत्वादाकृतेरित्येव-
म्। यद्वा कथं सामान्यावगतिरिति तेदित्युपन्यस्ते पूर्वपक्षवादी सामान्याव-
गतिमपह्नोतुमशक्नुवन्नाकृतिविशिष्टव्यक्त्यभिधानपक्षं परिगृह्णात्याकृतिश्चिह्नभूता
विशेषणभूताऽभिधेया भविष्यति। अतश्च तत्प्रतीतिरचोद्या। तेन केवला वि-
शिष्टा वा व्यक्तिः शब्दार्थः। तथा च ‘षड् देया’ इत्येवमादिषु षडादिका
संख्योपपत्स्यते। अन्यं तद्वर्णमिति च व्यक्त्यन्तरेऽन्यशब्दोपपत्तिस्तद्धर्मता
च भविष्यति। अन्यथा व्यक्त्यन्तरानयनेऽपि जातेरनन्यत्वादगुणत्वाच्चोभय-
मनुपपन्नं, तस्माद् व्यक्तिः शब्दार्थ इति प्राप्तेऽभिधीयते। नैतद् व्यक्तिः
शब्दवाच्येति किं त्वाकृतिः पदार्थ इति विज्ञायते। ‘श्येनचितं चिन्वीत’
इति श्रवणात्। अत्र हि श्येनव्यक्तिं चयनेन कुर्यादाकृतिं वेति वाक्या-
र्थौ स्याताम्। यावदिष्टकाभिः श्येनव्यक्तेः कर्तुमशक्यत्वात् स्नाय्वादिभिर-
प्यनिर्वृत्तेरिष्टकाबाधाच्छेनव्यक्तेः प्रयोजनकल्पनाच्चिनोतेरमुख्यार्थत्वात् ‘क-
र्मण्यग्न्याख्यायाम्’* इति स्मृतिपरित्यागप्रसङ्गाच्च चयनेन श्येनव्यक्तिं कु-
314 र्यादित्येवं तावन्नोपपद्यते। तथाऽऽकृतेरपीष्टकाभिः कर्तुमशक्यत्वाद्दैवनिर्मित-
त्वात्प्रयोजनकल्पनाच्चिनोतेरयथार्थत्वप्रसङ्गात्स्मृतिबाधाच्चाऽऽकृतिं कुर्यादित्य-
पि नोपपद्यते। परिशेषाच्छ्येनमिव चितमग्निस्थलं चयनेन निर्वर्तयेदिति वा-
क्यार्थः, ततश्च यया कया चिच्छ्येनव्यक्त्या सदृशस्याग्नेश्चेतुमशक्यत्वात्सर्वव्य-
क्तिसादृश्यासंभवादतीतानागतव्यक्तिसादृश्यानुपपत्तेश्च श्येनाकृतिसादृश्यसंप-
त्तिसंभवाच्चाऽऽकृतिः शब्दार्थ इति निश्चीयते। § 2734

२९ *] पा॰ सू॰ ( ३—२—९२ )।

अथ कस्माच्छ्येनव्यक्तिभिश्चयनचोदनेयं नाऽऽश्रीयते ‘श्येनचितं चिन्वीत’ इति। तत्र भाष्यकारेणोत्तरं दत्तम्। **ईप्सिततमो ह्यसौ श्येनशब्देन निर्दिश्यत इति**। तदयुक्तम्। न ह्यत्र श्येनशब्दः स्वार्थो, न च सकलश्येनचिच्छब्दोत्तरकालं श्रुतत्वाद् द्वितीयायास्तदन्तो, येनेप्सिततमार्थप्रतिपादकः स्यात्। तेन कर्मण्यग्न्याख्यायामिति स्मृतेः श्येनशब्दार्थस्य करणत्वं निषेद्धव्यम्। कर्मणि हि कारके चिनोतेः क्विप्प्रत्ययः स्मर्यते यदि चिनोतिरग्न्याख्या भवति। न च चिनोतेः केवलस्याग्निवचनत्वं संभवति। तेन क्विबन्तचिनोतिश्रुतेः श्येनचिच्छब्दस्य सकलस्याग्निवचनत्वं निश्चीयते न श्येनशब्दस्य पृथगर्थता। तेन श्येनशब्दार्थः करणतया विज्ञायते। यदि वाऽसौ करणं स्यात्ततो लक्षणाभावात्तृतीयासमासवचनानुपपत्तिर्भवेत्। तृतीया चाश्रुता काल्पनीया। श्रुतकरणत्वे इष्टकापरित्यागश्च स्यात्। सत्यां च गतौ प्रतिषिद्धानेकश्येनव्यक्तिहिंसा जायते तेन करणत्वानुपपत्तेः श्येनमिव चितमग्निं चिन्वीतेति वाक्यार्थोऽतश्चोक्तेन न्यायेनास्य वाक्यस्याऽऽकृतिपक्षे संभवादाकृतिः पदार्थ इति। नैतदेवम्। न हि चयनक्रियासंभवमात्रेणाऽऽकृतेरभिधेयत्वं लभ्यते। व्यक्तिपक्षेऽभ्युपलम्भनादिक्रियासंभवात्। बहुत्वाच्चालम्भनादिवाक्यानां तदन्यथानुपपत्त्या व्यक्तेरेव पदार्थत्वमवसीयते। अथाऽऽकृतिपक्षेऽपि व्यक्तिलक्षणया तान्युपपत्स्यन्त इत्युच्यते तदेतदपि शक्यमेव वक्तुं श्येनवाक्ये व्यक्तिराकृतिलक्षणार्थेति। युक्ता चैकत्र लक्षणा नेतरेषु बहुषु। अगत्या वा तृतीयासमासाश्रयणं श्येनवाक्ये करीष्यते। संख्याकारकाद्युपपत्तिश्च व्यक्तिपक्षे तेन व्यक्तिः शब्दार्थ इति स्थितेऽभिधीयते जातिरभिधेयेति। कुतः—
§ 2735

पूर्वं सामान्यविज्ञानाच्चित्रबुद्धेरनुद्भवात्।
गामानयेतिवाक्याच्च यथारुचिपरिग्रहात्॥§ 2737

गोशब्दोच्चारणे हि पूर्वमेवागृहीतासु व्यक्तिषु सामान्यं प्रतीयते तदाकारज्ञानोत्पत्तेपश्चाद्व्यक्तयः प्रतीयन्तेऽतश्चाऽऽकृतिप्रत्ययस्य निमित्तान्तराभावाद्व्यक्तिप्रत्यये च पूर्वप्रतीतसामान्यनिमित्तत्वादाकृतिः शब्दार्थ इति विज्ञायते। यदि च व्यक्तयोऽभिधेया भवेयुस्ततस्तासां चित्रखण्डभुण्डादिविशेषस्वरूपग्रहणाद्विचित्रा शब्दोच्चारणे बुद्धि स्यात्। एकाकारा तूत्पद्यते। तेनाप्याकृतिः शब्दार्थ इति निश्चीयते। गामानयेति चोदितेऽर्थप्रकरणाभावे 315 यां कां चित्सामान्ययुक्तां व्यक्तिमानयति न सर्वां न विशिष्टाम्। यदि च व्यक्तेरभिधेयत्वं ततः सर्वासां युगपदभिहितत्वादशेषानयनं स्यात्। या वाऽभिधेया सैवैकाऽऽनीयेत यतस्त्वविशेषेण जातिमात्रयुक्ताऽऽनीयते तेनापि सामान्यस्य पदार्थत्वं विज्ञायते। व्यक्तिपक्षे च सर्वा वा स्वतन्त्रा व्यक्तयोऽभिधीयेरन् व्यक्तिविशिष्टो वा समुदायः का चिद्वैका व्यक्तिरिति। तत्र सर्वव्यक्त्यभिधानं तावदयुक्तम्। अनेकवाचकशक्तिकल्प-

४ द] नच श्येनशब्दो द्वितीयान्त इत्यर्थः।

नाप्रसङ्गादनित्यशब्दार्थसंबन्धापत्तेरशेषव्यक्तिग्रहणाशक्तेश्च संबन्धाग्रहणे सति व्यवहारानुपपत्तेः। नित्यवद् गोशब्दस्याष्टशब्दवद्बहुविषयत्वादेकवचनद्विवचनश्रुत्यसंभवाद्गोशब्दाभिहितासु च सर्वव्यक्तिषु शुक्लगुणाभावे गौः शुक्ल इति सामानाधिकरण्यासंभवात्। ‘**पशुना यजेत**’ इति च पशुशब्दोपात्ताभिः सर्वव्यक्तिभिर्यागस्य कर्तुमशक्यत्वात्ततश्च वेदाप्रामाण्यप्रसक्तिः। एवं समुदायपक्षोऽपि न संभवति। तत्रापि हि विशेषणत्वेन व्यक्तयोऽभिधातव्यास्ततश्चोक्तदोषप्रसङ्गः। व्यक्तिव्यतिरिक्तसमुदायकल्पना, तेन च व्यवहाराभावादभिधानानर्थक्यं समुदायिविनाशे च तस्याप्यनित्यत्वादनित्यशब्दार्थसंबन्धप्रसङ्गः। **समुदायस्य चैक**त्वादद्विवचनबहुवचनानुपपत्तिः सामानाधिकरण्यासंभवश्च। तेन चामूर्तेन यागाद्यसंभवाद्वेदस्याप्रामाण्यम्। अथैका व्यक्तिरभिधीयत इत्युच्यते तत्रापि संबन्धानित्यत्वं, काऽसावभिधीयत इत्यज्ञानाद्व्यवहाराणामसंभवः सामान्यप्रत्ययानुपपत्तिर्द्विवचनबहुवचनाभावप्रसङ्गः। प्राक् चाभिधेयव्यक्त्युत्पत्तेरुत्तरकालं च प्रयोगासंभवः। समाने च गोत्वे प्रतीतौ चेयमभिधीयते नेयमिति विशेषकारणं नास्ति। अतः परं भाष्यार्थः। यदि चैका व्यक्तिरभिधेया भवेद्व्यक्त्यन्तरे प्रयोगो न स्यादभिधेयव्यक्ते स्तत्राभावादत्यन्तविलक्षणत्वाच्च, सामान्यविशेषविनिर्मुक्ता हि व्यक्तिरित्युच्यते। न च सामान्यविशेषौ मुक्त्वा व्यक्त्यन्तरेऽन्यदस्ति येन शब्दप्रयोगः स्यात्। ननु च यथैवैका सामान्यविशेषविनिर्मुक्ता तथा द्वितीया यतश्च यथैवैकस्यां सामान्यविशेषविनिर्मुक्तायां शब्दस्य प्रवृत्तिरेवमविशेषादितरत्रापि भविष्यति। यदि सामान्यरूपं विशेषरूपं वा व्यक्त्यन्तरं स्यात्ततो विलक्षणत्वाच्छब्दो न प्रवर्तते, यदा तु तदप्युभयविनिर्मुक्तं रूपं तदा तुल्यरूपत्वादयुक्ता शब्दस्य प्रवृत्तिरिति। यद्येवं सामान्यविशेषविनिर्मुक्तत्वादेकत्रेतरत्र च शब्दो वर्तते हन्त तर्हि सामान्यविशेषविनिर्मुक्तत्वमेव सामान्यं शब्दस्याभिधेयं स्यादिति सिद्धो नः पक्षः। तस्याऽऽकृतिशब्दवाच्यत्वे केवलं भवतः प्रद्वेष इति। पूर्वपक्षवाद्याह नैवं मयोच्यते सामान्यविशेषविनिर्मुक्तत्वाद्व्यक्तौ शब्दो वर्तते व्यक्त्यन्तरे वेति, किं तु सामान्यविशेषव्यतिरेकेणान्यापोहवद्व्यक्तिः कथ्यते। तत्र कथं सामान्यमेव तर्हि वाच्यमित्युच्यते यो ह्यर्थः सामान्यस्य विशेषाणां चाऽऽश्रयः सा व्यक्तिर्न सामान्यविशेषौ। ततश्च यथैवैकस्यां सामान्यविशेष-
316 व्यतिरिक्तायां व्यक्तौ शब्दस्य वृत्तिस्तथाऽन्यस्यामपि भविष्यति। सिद्धान्तवाद्याह—यदि तावत्सामान्यविशेषविनिर्मुक्तत्वाच्छब्दो वर्तते ततः सामान्यमेव वाच्यम्। अथ समानं निमित्तं नास्ति तदा व्यक्त्यन्तरे वृत्तिर्न प्राप्नोति। तदभावेऽपि चेद्वर्तेत ततोऽश्वव्यक्तावपि वृत्तिप्रसक्तेरतिप्रसङ्गः स्यादिति। नैवम्। सामान्यनिरपेक्षायामेव शब्दप्रवृत्तौ प्रयोगकृतव्यवस्थाश्रयणान्नातिप्रसङ्गो भविष्यति,। यद्येवं प्रयोगवशेन शब्दो वर्तेत ततोऽद्य जातायां गवि न दृष्ट इति शब्दो न प्रवर्तेत तेन प्रयोगकृता चेद्व्यवस्था क्व चिदप्रसङ्गो न चेदतिप्रसङ्ग इति। यत्तु भिन्नासु व्यक्तिषु सामान्यप्रत्ययो न प्राप्नोत्ययमपि गौरयमपीति तदिहातिप्रसङ्गापादनेन न संबध्यत इति व्यक्त्यन्तरे प्रयोगो न प्राप्नोतीत्य-

स्मिन्नवसरे वक्तव्यम्। शक्त्या तर्हि व्यवस्था भविष्यति, यत्र शक्तः शब्दस्तत्र वर्तिष्यते प्रयोक्ष्यते च यत्र तु शक्तिर्नास्ति तत्र प्रयोगप्रवृत्ती न भविष्यतस्ततश्च गोव्यक्तिष्वेव शक्तेः प्रयोगव्यवस्था भविष्यति। नैवमपि व्यवस्था लभ्यते। प्राक् प्रयोगाच्छब्दशक्तेरविज्ञानात्प्रयोगप्रतीत्यधीनं हि शब्दशक्तिज्ञानं तत्कथमिवानुत्पन्नं प्रयोगकाले व्यवस्थाकारणत्वेनाऽऽश्रयितुं युक्तम्। यद्यपि श्रोता प्रयोगाच्छक्तिं जानाति तथाऽपि प्रयोक्ता कथं ज्ञातं गोव्यक्तावयं शक्तः शब्दो नाश्वव्यक्ताविति, तेनाश्वव्यक्तावपि प्रयोगः प्राप्नोति। जात्या किमिति व्यवस्था नाऽऽश्रीयते यत्र गोत्वमुपलक्षणं तत्र शब्दो वर्तिष्यते यत्र तन्नास्ति तत्राश्वव्यक्त्यादौ वृत्तिर्न भविष्यति ततश्च व्यवस्थासिद्धिरिति। सत्यमेवं सिध्यति, किं त्वापन्नो भवानस्मत्पक्षमाकृतिर्वाच्येति। न ह्यनभिधाय गोत्वमुपलक्षणं गोव्यक्तावेव प्रयोगव्यवस्था लभ्यते तच्चेदभिहितं सिद्धमाकृतिशब्दार्थत्वमिति। पूर्वपक्षवादी तु द्वितीयं पूर्वपक्षमुपन्यस्यति सत्यमाकृतिरभिधीयते किं तु गुणत्वेन स्थिता व्यक्तिः प्राधान्येन शब्दार्थः। न चाऽऽवयोरुभयं नाभिधीयत इति प्रतिज्ञा। कस्य चित्प्राधान्येन किं चिदभिधेयतया विवक्षितं किं चिद्गुणत्वेन, तदुक्तं **व्यक्तिः प्राधान्येनाभिधेयेति**। एवं सति प्रयोगव्यवस्थोभयप्रतीतिश्च तथाऽऽलम्भनादिक्रियोपपत्तिश्च भविष्यति। इतरस्त्वाह— मैवं लभ्यते। जातिश्चेत्पूर्वमभिधेयत्वेनाभ्युपगताऽत्रैव शब्दस्योपक्षीणशक्तित्वान्न व्यक्तिवचनता लभ्यते। न चाऽऽकृतिसंवेदनेनापि व्यक्तिप्रतीतेरन्यथाऽप्युपपन्नत्वात्सत्यां गतावनेकार्थता युज्यतेऽभ्युपगन्तुम्। अर्थापत्त्या च शब्दस्य वाचकशक्तिः कल्प्यते। सा च यदा व्यक्तिप्रतीतेरन्यथाऽप्युपपन्नत्वात् क्षीणा तदा वाचकशक्तिकल्पनायां प्रमाणं नास्ति। न च सामान्यविशेषवचनत्वं शब्दस्य दृष्टमक्षादिशब्दानामनेकसामान्यवचनत्वात्। अन्वयव्यतिरेकाभ्यां च व्यक्तेरशब्दार्थत्वं निश्चीयते। अनुच्चरितेऽपि शब्दे प्रतीतसामान्यस्य व्यक्तिप्रतीतेः श्रुतिशब्दस्यापि चागृहीतसामान्यस्य व्यक्तिप्रत्ययाभावात्तेनाऽऽकृतिरेव शब्दार्थ इति। सांप्रतं पक्षान्तरमुपन्यस्यति। अथ व्यक्तिविशिष्टायामाकृतौ 317
किमिति न वर्तते। तदेतत्प्रयोगप्रतीतिक्रियासंभवत्वेन वा पक्षान्तरमुपन्यस्तम्। यद्वा व्यक्तेरेव शब्दार्थत्वं साधयितुमिदमुच्यतेऽनेनाभिप्रायेण, कदा चित्सिद्धान्तवाद्याकृतेः शब्दार्थत्वमनेनाभ्युपगतमेवाऽऽलम्भनादिक्रियासंभवश्च भविष्यतीत्यनेनाभिप्रायेण व्यक्तेरपि गुणत्वेनाभिधानमिच्छति ततोऽहं पूर्वं तावद्विशेषणे वर्तितुमर्हतीति व्यक्तिवचनत्वमेव साधयिष्यामीति। इतरस्तु तदभिप्रायं ज्ञात्वोत्तरं वदति व्यक्त्यन्तरविशिष्टायां प्रयोगो न प्राप्नोतीति। यदि हि व्यक्तिविशिष्टा जातिरभिधीयते ततो व्यक्त्यभिधानपक्षोक्तदोषप्रसङ्गः, अनेकशक्तिकल्पनादिरूपो व्यक्त्यन्तरे प्रयोगश्च न प्राप्नोति विशेषणस्यान्यत्वादिति। तेन जातिरेव शब्दार्थः। ननु गुणभूता प्रतीयतेऽतश्चान्येन प्रधानेनाभिधेयेन भवितव्यमिति। नैवं शब्देन तावत्सैवाभिधीयते। यदि विवक्षावशेनार्थाद्गुणत्वं प्राधान्यं वा भवति भवतु नाम न तावता शब्दाभिधेयत्वं व्याहन्यते। यदा चासौ शब्देनाभिधीयते तदा गुणत्वं नैव प्रतीयते तेनार्थाद्गुणत्वप्रतीतिरदोषः।

ननु पूर्वपक्षोक्तैः कारणैर्व्यक्तेरेव शब्दार्थत्वं युक्तं व्यक्त्यन्तरे प्रयोगो न प्राप्नोतीति चेत्। आकृतिश्चिह्नभूता भविष्यति। यथाऽनभिधीयमानमपि काकनिलयनं देवदत्तगृहशब्दस्य स्वार्थमभिदधतश्चिह्नभूततां प्रतिपद्यते तद्वदाकृतिश्चिह्नं व्यक्त्यभिधाने भविष्यति। भाष्यकारेण तु दण्डिशब्दो दृष्टान्तत्वेनोपात्तो यथा तेन न नाम किल दण्डोऽभिधीयते। अथ च दण्डविशिष्टः पुरुषः प्रत्याय्यते तद्वदाकृतावपीति। ननु दण्डिशब्दे प्रकृत्या दण्डोऽभिधीयत एव कथमुच्यते न च तावद्दण्डोऽभिधीयत इति। कथं चोपलक्षणत्वेनाऽऽकृतावुप-
318 न्यस्तायां विशिष्टः प्रत्याय्यत इति विशेषणं दृष्टान्ततयोपन्यस्तमिति। नायं दोषः। विशेष्याभिधायकप्रत्ययाभिप्रायत्वाद्दण्डानभिधानस्य। यथा प्रत्ययेन न च तावद्दण्डोऽभिधीयते। अथ च तद्विशिष्टः पुरुषः प्रत्याय्यते तथेहापि भविष्यतीत्यभिप्रायः। यत्तूपलक्षणोपन्यासे विशेषणस्य दृष्टान्तता न युक्तेति। तदुपलक्षणस्यापि विशेषकत्वान्न चोद्यम्। यद्वा केनचित्सामान्येन दृष्टान्तता भविष्यत्यनभिधेयत्वेन विशेषकत्वेन चेत्यदुष्टं, ततश्च सम्यगभिहितं यथा दण्डिशब्दे तद्वदत्रापि भविष्यतीति। एवं चाप्रसङ्गातिप्रसङ्गौ न भविष्यत इति। तदेतन्न युज्यते। युक्तं देवदत्तगृहस्य पुरुषस्य च केवलस्याभिधानं विशिष्टप्रतीतावपि काकनिलयनदण्डयोः प्रत्यक्षदण्डशब्दावगतयोर्विशेषणत्वोपपत्तेः। न तु गोत्वस्यासंनिहितस्येहोपलक्षणत्वं युज्यते। अप्रतीतविशेषणे विशेष्याप्रतीतेः। न च दण्डिशब्दवत्तदवयवेन गोत्वाभिधानं प्रतीमो येन द्वितीयावयवेन व्यक्तेरेवाभिधानं स्यात्। अतश्च यदि तावद्गोत्वमभिधीयते ततस्तदेवोक्तेन न्यायेन वाच्यं भवेत्। अप्रतीतस्य विशेषणत्वासंभवात्। उक्तवदतिप्रसङ्गः शब्दप्रयोगस्य प्राप्नोति। न च यथा दण्डिशब्दः केवले दण्डे **न प्रयुज्यत** इति विशिष्टवचनोऽवधार्यते तद्वदाकृतौ प्रयोगाभावाद्विशिष्टवचनोऽवधारयितुं शक्यते। श्येनचित्यादावाकृतौ प्रयोगदर्शनादन्वयव्यतिरेकाभ्यां च जातिरेव वाच्येत्यवधार्यते श्येनचिद्वाक्ये केवलायामाकृतौ प्रयुक्तत्वात्। क्वचिदपि चाऽऽकृत्या विना व्यक्तिमात्रे प्रयोगादर्शनादेवं येऽपि संबन्धसमुदायादयः पूर्वपक्षास्तेऽप्युक्तेन न्यायेन निराकृतास्तेनाऽऽकृतिरेव शब्दार्थ इति॥ ३३॥

§ 2738

319 ये त्वाऽऽलम्भनादिचोदनाभावादयो **'न क्रिया स्यात्'** इत्येतत्सूत्रानुभाषिताः पूर्वपक्षोक्ता हेतवस्तेषां सर्वेषामनेन सूत्रेण परिहारोऽभिधीयते—**'तदर्थत्वात्प्रयोगस्याविभागः'** इति। तदर्थत्वात्—अपूर्वार्थत्वादालम्भनप्रोक्षणाद्यङ्गानामपूर्वसाधने प्रयोगेण भवितव्यं द्रव्यं चापूर्वसाधनं यागेन स्वसिद्ध्यर्थमाक्षिप्तत्वान्नाऽऽकृतिरसमर्थत्वात्तदभिधानं तु द्रव्यनियमार्थं प्रतिपत्तव्यं न स्वार्थं जातेरनपेक्षितत्वाददृष्टार्थत्वप्रसङ्गात्साधनत्वाप्रतीतेश्च। यदपि जातेः प्रातिपदिकाभिहितायाः करणत्वं प्रतीयते तदपि द्रव्यनियामकत्वेनैव न साक्षादयोग्यत्वात्। तेनाऽऽकृत्यभिधानस्य द्रव्यनियमार्थत्वाद्द्रव्ये वाऽऽलम्भनप्रोक्षणसंख्याकारकसामानाधिकरण्यादिसंभवाददुष्टता। तदाह—प्रयोगस्याविभाग इत्याकृतिपक्षेऽप्यालम्भनादिप्रयोगस्य द्रव्यादविभ-

क्ततैवेति। अथवाऽऽकृत्यभिधानस्य द्रव्यनियमार्थत्वादुक्तवत्प्रयोगस्याविभाग इति। यद्वा। आकृतिव्यक्त्योरत्यन्तभेदाभावात्कदा चिद्व्यक्तिरूपेण द्रव्यमभिधीयते कदा चित्सामान्यरूपेण यथा विवक्षितं तथा शब्दस्योभयरूपवस्त्वर्थत्वाद्व्यक्त्यभिधानेऽपि न प्रयोगस्य विभागो नानारूपतेति। जातेर्वा व्यक्तितोऽत्यन्तभेदाभावाद् व्यक्तौ कृता धर्मा जातौ कृता एव भवन्तीति न प्रयोगम्य विभागेन प्रयोजनमिति। यद्वा। आकृतिव्यक्त्योरुभयोर्यागार्थत्वाद्धर्माणां च यत्र क्व चन यागसाधने कृतानां प्रयोजनवत्त्वादद्रव्यादविभक्ततेति। 320
§ 2739

तस्मादाकृतिपक्षेऽप्यालम्भनादिसंभवादाकृतिरेव शब्दार्थ इति सिद्धम्॥ ३५॥ § 2740

इति आकृत्यधिकरणम्॥ ९॥।

इति श्रीभट्टकुमारिलस्वामिकृतौ मीमांसावार्तिके प्रथमस्याध्यायस्य तृतीयः पादः।

## ०.०.१४ उद्भिदधिकरणम्

एवं स्मृतिसहितस्य वेदस्य प्रामाण्ये सिद्धेऽधुना वाक्यार्थव्याख्यानावसरे सत्यपरिसमाप्त्यैव प्रमाणलक्षणं केन संबन्धेन नामधेयचिन्तायाः प्रस्तावः क्रियते। के चित्तावदाहुः। किमुद्भिदादयो गुणस्य प्रमाणमुत क्रियाणामेव नामधेयत्वेनेति। तदयुक्तम्। एवं सति हि समस्तमेव शास्त्रं प्रमाणलक्षणादभिन्नं स्यात्। सर्वत्र ह्येतद्विचार्यते, किमिदं वाक्यमस्यार्थस्य प्रमाणमुतान्यस्येति। येऽपि चैते द्वे अपि सूत्रे पूर्वोत्तरपक्षौ परिकल्प्यैकाधिकरणत्वेन व्याचक्षते तैरपि ‘उक्तं समाम्नायैदमर्थ्यमित्यनेन सूत्रेण कः सिद्धान्तानभिप्रेतः पूर्वपक्षानुगुणोऽर्थो विधीयत इति वक्तव्यम्। न ह्युक्तैदमर्थ्यान्तर्भावचनमुद्भिदादीनामनिष्टम्। तस्माद्द्वयोरप्यधिकरणयोरनुमितपूर्वपक्षयोरुत्तरपक्षसूत्रद्वयमेतदिति व्याख्येयम्। तत्र प्रथमं तावदुद्भिदादीनुदाहृत्य संदेहः क्रियते, किमेते कं चिद्धर्मं प्रत्युपयोगं गच्छन्त्युत नेति। किं तावत्प्राप्तम्। ‘आम्नायस्य क्रियार्थत्वात्’* इत्यानर्थक्यम्। आह च। § 2743

त्र्यंशवेदप्रमाणत्वादुद्भिदादि ततोऽधिकम्। 321
धर्मायानुपयुक्तं सदानर्थक्यं प्रपद्यते॥ § 2745

नह्येते विध्यादिष्वन्तर्भवन्ति। साध्यसाधनेतिकर्तव्यतानभिधायित्वात्तावच्चोदनाबाह्यत्वं, स्तुतिबुद्ध्यभावादर्थवादातिरेकः, कर्माङ्गभूतैवंसंज्ञकप्रकाश-

१२ *] जै॰ सू॰ ( १-२-१ )।

यितव्यार्थाभावान्मन्त्रकार्यनिवृत्तिः। न चान्यद्बेदप्रयोजनमस्तीत्यप्रमाणमेवंजातीयका इति। अत्राभिधीयते— § 2746

सर्वस्य त्रिविभागत्वाद्बेदस्योक्तेन हेतुना।
उद्भिदाद्यप्रमाणत्वमतिरेकान्न सिध्यति॥ § 2748

यदा तदर्थत्रयान्यतमार्थमिति स्थितं तदा विचारः किमर्थमिति। न तावदर्थवादत्वं वाक्यशेषत्वाभावात्। कथं पुनरयं न वाक्यशेषो यावता 'वायुर्वै क्षेपिष्ठा' इत्यादिवदेकवाक्यताऽवगम्यते। नैतदस्ति। विधातव्यस्य हि यः शेषः सोऽर्थवादः। अयं तु विध्युद्देशादेव नातिरिच्यत इत्यवाक्यशेषः। तत्संभविनश्च स्तुत्युपयोगित्वं न युज्यत इत्युक्तमौदुम्बराधिकरणे। न चैकपदेन स्तुतिर्दृष्टा। न चेह तां प्रतिपद्यामहे। यदप्युद्भेदनं पशूनामनेन क्रियत इत्येवं प्राशस्त्यं कल्प्येत तदपि तृतीयान्तसमुदायाश्रयबलवत्तरकरणत्वप्रसिद्ध्या बाध्यते। अन्यथा हि प्रातिपदिकप्राधान्याद्वा 'वायुर्वै क्षेपिष्ठा' इतिवत्प्रथमैव प्रायोक्ष्यत। न चास्य मन्त्रत्वं, ताद्रूप्येणाप्रतीतेः। अध्येतृस्मरणाभावाच्च। न चैकपदत्वात्साकाङ्क्षत्वं करणप्रतीत्या वा स्मारकत्वम्। न चैतदभिधेयः कश्चित्प्रयोगसमवाय्यर्थो दृश्यते। न चासमवेतप्रकाशने कर्माङ्गत्वम्। मान्त्रवर्णिकद्रव्यकल्पनायामपि गौरवम्। न चास्य सूक्तवाकवद्विनियोजिका श्रुतिरस्ति येन मान्त्रवर्णिकद्रव्यकल्पना स्यात्। न चास्य रूपं प्रयोगार्हम्। अतश्चाविनियुक्तत्वात् 'इषे त्वा'दिवदपि नाध्याहारेण निराकाङ्क्षीकृत्य प्रयोगः। स्फुटं च ब्राह्मणेनैकवाक्यत्वमित्यमन्त्रत्वम्। तस्माद्विध्युद्देशान्तर्गतस्यैवोत्तराधिकरणेन विचार्यते गुणविधिर्नामधेयमिति। तत्र तावत्— § 2749

प्रसिद्धेर्बलवत्त्वेन प्रयोजनवशेन च।
322 अधिकत्वात्प्रवृत्तेश्च गुणरूपं विधीयते॥ § 2751

प्रातिपदिकं तावदुद्भेदनसमर्थे द्रव्ये खनित्रादाववयवप्रसिद्ध्यां प्रवर्तते। न च समुदायोऽर्थान्तरवाची लोके प्रसिद्धः। न च लोकादनवगतोऽर्थो वेदादवगम्यते संबन्धस्य शास्त्राहेतुत्वात्। तृतीयाऽपि च करणवाचिनी, क्रियायाश्च शक्तिमद् द्रव्यं तदाधारा वा शक्तिः करणं, तेनोद्भित्साधनको यागोऽवगम्यते। न च यागस्योद्भित्त्वं करणत्वं वा क्वचित्प्रसिद्धम् अर्थवत्त्वात्प्रवृत्तिविशेषकरत्वम्। विधायकोद्भित्पदपुरुषाणां प्रवृत्तौ विशेषः। अन्यथा ह्यनुच्चरितसमैव प्रवृत्तिरेषां स्यात्। अथ वा प्रसिद्धत्वाद्गुणविधिरर्थवत्त्वमभिधेयवत्त्वं नामधेयत्वे त्वर्थो न विज्ञायत इति योज्यते। अथ वा भेदेनार्थवत्त्वं हेतुः, उद्भित्पदस्य यजितः फलान्तरत्वात्। ततश्च विधिपुरुषयोः प्रवृतिविशेष इति वाच्यम्। ननु नामधेयमपि क्रतुं विशिंषदर्थत्प्रवृत्तिविशेषकरं च स्यात्। नैतदस्ति। कुतः— § 2752

आकृतेरविधेयत्वाद्धातुना व्यक्तिराश्रिता।
सा च नाम्नाऽभिधीयेत जातिश्चेन्नैव नामता॥§ 2754

यदा तावद्धातुनैव लक्षणया विधिविषयत्वयोग्यत्वाद्यागविशेषः प्रतिपाद्यते तदा किमपरं तत्र नाम करिष्यति। अथ सामान्यमात्रमभिधीयते ततस्तस्यानिष्टमेवैतन्नामेत्यसंबद्धं सिद्धत्वादेव च विशेषस्य न नामधेयं विधायिष्यत इति वक्ष्यति। यदा च केनापि प्रकारेणोद्भिदादीनां विशेषवचनत्वं तदा तदत्यन्ताविनाभूतसामान्यवचनत्वेन यजेरनर्थकत्वम्। लाघवं च विधेर्गुणविधौ भविष्यति। यागानुवादात्। यद्येवं गुणाक्षिप्तत्वाद्विधिशक्तेर्न तर्हि कर्म विधीयते, तथा चाविहिते कर्मणि कस्य गुणो विधीयत इत्यानर्थक्यमत आह—**प्रकृतौ ज्योतिष्टोम इति**। ननु गुणविधिपक्षे ज्योतिष्टोमेनेत्यस्यापि तत्परत्वादविहितमेव कर्म। गत्यभावादिदमेकं कर्मविधानं भविष्यति। तद्व्यावृत्ते च विधायके च गुणस्य विधातुमशक्यत्वाज् ज्योतिष्टोमपदमेवैकं नामधेयम्। अथ वा तदेकं गुणविशिष्टं कर्मविधानमितराणि कर्मानुवादेन गुणविधानानि। नन्वेवं सति सर्वा एकाहाहीनसत्रचोदना ज्योतिष्टोमस्यैव गुणविधिद्वारेण प्रकरणादनतिरिक्ता इति कर्मान्तराभावान्न ज्योतिष्टोमः कस्यचित्प्रकृतिरिति तच्छब्देन नाभिधातव्यः। सिद्धान्ताभिप्रायेणाऽऽहेति केचित्। अथ वा प्रक्रियत इति प्रकृतिः, प्रकृतज्योतिष्टोम इत्यर्थः। अथ 323
वा 'अथैष ज्योतिः' इत्येवमादीनां करणविभक्त्याख्यातसंस्पर्शाभावाद्गुणविधित्वानुपपत्तेरेकान्तेन भेदकतया कर्मनामत्वं तदपेक्षया च ज्योतिष्टोमः प्रकृतिः। ननूत्पत्तिवाक्यशिष्टेन सोमेन ज्योतिष्टोमेन वाऽवरोधाज्ज्योतिष्टोमे गुणान्तरविधानमयुक्तम्। काम्यत्वादुद्भिदादयो बाधका भविष्यन्ति। नित्ये प्रयोगे च पूर्वगुणस्यार्थवत्ता। अथ वा विशिष्टविहितमपि कर्म स्वरूपमात्रं निष्कृष्य गुणान्तरे विहितं नौत्पत्तिकाद्विशिष्यते। अन्यथा गत्यसंभवाद्विकल्प इति मन्यते॥ १॥ § 2755

यदुत्पत्तौ प्रथमज्ञानेऽर्थान्तरपूर्वकत्वेनैकान्ततो न प्रसिद्धमुद्भिदादि तद्वैदिकव्यवहारे प्रथमोपनिपातात्सामानाधिकरण्येन नामधेयं स्यात्। अथ वैवमपूर्वं कर्म विदधदर्थवद्भविष्यति। अथ वा कस्य नामधेयमिति संदेहेऽभिधीयते। यस्योत्पत्तावपूर्वं निष्पद्यते यागस्येत्यर्थः। किं कारणम्—
§ 2756

गुणो विधीयमानो हि फले कर्मणि वा भवेत्।
विशिष्टविधिबुद्ध्या वा सर्वथा च न युज्यते॥§ 2758

फलं प्रति तावद्विधीयमाने परपदसंबन्धविधानं व्यवहितकल्पना धातोः पारार्थ्यमौत्पत्तिकसोमबाधोऽनदनीयेन च खनित्रादिनाऽत्यन्ताप्रसिद्धेन याग इति दोषास्तथा यागं प्रति गुणविधौ फलपदानर्थक्यम्। सार्वकाम्यप्राप्तज्योतिष्टोमविशेषणत्वे वाक्यभेदः। प्रत्ययव्यापारविप्रकृष्टता धातुपारार्थ्यानद-

नीययागसोमबाधविकल्पाश्चात्यन्तायुक्ताः। तथा विशिष्टविधौ सर्वपारार्थ्यमनेकविधिशक्तिकल्पना मत्वर्थलक्षणा, गम्यमानसामानाधिकरण्यत्यागोऽनदनीययागश्चेति दोषाः। तस्मान्न गुणविधिः। तद्दर्शयति—**इतरथा श्रुतिरुद्भिदादीन् वक्ष्यति तद्वतो लक्षयेत्। वक्ष्यन्ती लक्षयेत्** इति वा ग्रन्थः। प्रातिपदिकसामर्थ्यमुक्त्वा विभक्तिसंबन्धादप्येतदेवावगम्यत इति दर्शयति—**यागेन कुर्यादित्यादिना**। किं च— § 2759

324 विधाने चानुवादे च यागः करणमिष्यते।
तत्समीपे तृतीयान्तस्तद्वाचित्वं नु मुञ्चति॥§ 2761

**यत्करणाभिधायिन्या तृतीयया** इत्येवमादिषु कारकाणां विभक्त्यर्थत्वाभ्युपगमात्कथं **करणवाचिनो हि प्रातिपदिका**दित्युच्यते। नैष दोषः। करणाश्रयवाचिनो हीत्यभिप्रायः। अथ वा करणशब्दो यादृशमर्थं ब्रवीति तादृशस्य प्रातिपदिकं वाचकमेव। कृदन्तेन हि कारकविशिष्टं द्रव्यमेवोच्यते न विभक्तिवन्निष्कृष्टा शक्तिः। तथा च करणं करणेन करणायेति च कारकान्तरयोगो दृश्यते। अन्यथा हि विभक्त्यभिहितेनैवैकेन कारकेण वशीकारान्न द्रव्यं कारकान्तरयोगं प्रतिपद्येत। शक्तेस्तु शक्त्यन्तरं नास्त्येव। तस्माच्छक्त्युपसर्जनद्रव्यवचनत्वात्कृदन्तानामुपपन्नं करणशब्दार्थवाचित्वं प्रातिपदिकस्य। तेनैतदुक्तं भवति। यदस्मिन् वाक्ये करणं तद्वाचिनः प्रातिपदिकात्तृतीययोत्पत्तव्यं यागश्चात्र फलभावनायाः करणं न द्रव्यमिति वक्ष्यति। ततश्च यद्युद्भित्पदं यागवचनमेवं तृतीयान्तं सदेकवाक्यतां यास्यत्यर्थान्तरवचनत्वे त्वसंबद्धं स्यात्। ननु च— § 2762

प्रत्यक्षं द्रव्यवाचित्वमुपन्यस्तं कथं पुनः।
करणत्वानुमानेन बाध्यते व्रीहिसोमवत्॥§ 2764

यथैव ‘व्रीहिभिर्यजेत’ ‘सोमेन यजेत’ इत्यादीनां करणभूतयागैकवाक्यत्वे सति तृतीयान्तत्वं वैयधिकरण्येऽप्यविरुद्धमेवमिहापीति। **हठ इति**—
325 चिरंतनतडागोदकाच्छादितहरितद्रव्यमुच्यते। यथा तदुत्सार्यमाणमपि स्वच्छन्दतः पुनःपुनरुदकं छादयत्येवं योऽन्योऽपि स्वच्छन्दव्यवहारः स हठ इति प्रसिद्धः। तदुच्यते— § 2765

---

१ विधौ] सर्वपारार्थ्येति—विशिष्टविधानेऽपि विशिष्टस्यापदार्थत्त्वेन सर्वेषां नामधात्वाख्यातानां विशिष्टसमर्पणात्पारार्थ्यमित्यर्थः।
१० थं] अभ्युपगमादिति—‘इह हि गुणमरुणिमानममूर्तं सन्तं क्रियायाः करणमिति शब्द उपदिशति यत्करणाभिधायिन्या तृतीयाविभक्त्या संयुज्य निर्दिशति—अरुणयेति,। इत्याद्यरुणाधिकरणस्थभाष्यविरुद्धमिदं भाष्यमित्याशयः।
१८ ति] जै. सू. ( २-१-१ ) भावार्थाधिकरणे इति शेषः।

पदमज्ञातसंदिग्धं प्रसिद्धैरपृथक्श्रुति।
निर्णीयते निरूढं तु न स्वार्थादपनीयते॥§ 2767

व्रीह्यादयो ह्यत्यन्तरूढास्ते स्वार्थमपरित्यजन्तः सामानाधिकरण्यमप्रतिपद्यमाना गत्यन्तराभावाद्गुणविधयो विज्ञायन्ते। ये पुनरुद्भिदादयो यौगिकास्तेषां येनैव प्रकारेण यत्नेन द्रव्यवचनत्वं तेनैव कर्मवचनत्वमप्युपपद्यत इति प्रत्यक्षप्रसिद्धावनुदासीनायामनुमानेनाप्यज्ञानसंशयव्युदासकरणं न दुष्यति। सर्वशब्दार्थावधारणे ह्ययमभ्युपायो, यत्प्रसिद्धसामानाधिकरण्यं नाम। प्रधानं च करणत्वं यागे लब्धात्मकं शक्नोति प्रातिपदिकमात्मविषयमापादयितुम्। किं च— § 2768

विभक्त्यर्थानुवादाच्च विधेः स्यान्नाम्नि लाघवम्।
गुणपक्षे विधेयत्वं संख्याकारकयोरपि॥§ 2770

त्वत्पक्षे ह्यवश्यं काचिद्विभक्त्यर्थेऽपि प्रत्ययस्य विधिशक्तिः कल्प्या स्यात्। तस्मादवयवद्वारेणास्ति कर्मण्यपि प्रसिद्धिः। ज्योतिष्टोमादेरपि स्वफलोद्भेदनकारित्वादेतन्नामप्रसङ्ग इति चेत्। न। सामानाधिकरण्यावधारितविषयविशेषस्यावयवान्वाख्यानात्। न चास्य ज्योतिष्टोमादिभिः समभिव्याहारोऽस्ति। अथवाऽर्थापत्तिवशेनैतद्विशेषविषयमेवोद्भेदनं निमित्तं, न चान्यत्र तदस्तीति व्यवस्था। यथा सास्नादिमद्गतगमनविशेषनिमित्तत्वं गोशब्दस्य। **अविधायकत्वा**दित्यस्य व्याख्या **न नामधेयं विधायिष्यत** इति। संज्ञासंज्ञिसंबन्धरूपेण 'वृद्धिरादैच्'* इत्यादिवदविधानं सामानाधिकरण्यावयवप्रसिद्धिभ्यां तत्सिद्धेः। न तु नामधेयार्थो न विधीयते तदधीनत्वाद्यागविशेषसिद्धेः। इह हि यद्यपि संज्ञासंज्ञिसामानाधिकरण्यं नास्ति तथाऽप्यात्मरूपव्यवच्छिन्नमेवार्थं संज्ञा गमयतीति विशेषणविशेष्यभावान्न भिद्यते। नन्वेवं शब्दस्वरूपाभिधानं प्रस- 326
ज्येत।प्रत्यक्षावगतस्वरूपविशिष्टार्थाभिधानादप्रसङ्गः। सर्वत्र ह्यगृहीतविशेषणा विशिष्टबुद्धिर्न दृष्टा, न त्वन भिहितविशेषणा। न चैतावता शब्दस्वरूपारोपप्रसङ्गः। तदनुरोधेन विद्यमानार्थांशविशेषोद्धरणादित्युक्तं प्राक्। नाम्नैव चैवमादीनां प्रकृतितो भेदोऽन्यथा हि तदनवच्छिन्नो यजिर्गुणफलाद्यर्थं पुनः श्रुतिः प्रकृतिगामित्वान्नैव कर्म भिन्द्यात्। अथ वा सर्वनामधेयेषु किंचिदर्थगतमपि विशेषणमस्तीत्यरुणैकहायन्यादिवदेव विशेषणविशेष्यता। न च यज्युच्चारणमन्तरेणास्य यागविशेषनामत्वमिति न सामान्यस्यार्थकत्वम्। परस्परसंनिधानेन हि नामापि यागविषयं यागोऽप्येतदवच्छिन्नो न सामान्यमात्रं प्रकृतो वेति लभ्यते। तस्मादुभयोरर्थवत्ता विशिष्टभावनाविधानाच्चोभयोरपि विधानमिति नानुवादत्वम्। एवं च सति न नामत्वं विधित्वमात्रप्रतियोगीति, ये पूर्वपक्षे विध्यन्तर्भावं सिद्धान्ते तु विध्यर्थवादमन्त्रातिरेकं नाम्नां वर्णयन्ति तेषामयुक्तमेव। अशेषव्यवहाराङ्गभावाच्च नाप्रवृत्तिविशेषकरता। नह्यृत्विग्वर-

१ क्श्रुति ] अपृथक्श्रुतीति—सामानाधिकरण्यनिर्दिष्टं सदित्यर्थः।
१९ *] पा° सू° ( १। १। १।)

णादिध्वनेनाहं यक्ष्य इति लघुराख्यानोपायः स्यात्। 'दर्शपूर्णमासावारप्स्यमानः समे दर्शपूर्णमासाभ्याम्'* इति गुणोपबन्धो दर्शपूर्णमासाभ्यां स्वर्गकाम इति च फलोपबन्धोऽन्यथा न स्यात्। तस्मान्नामधेयान्येवंजातीयकानीति सिद्धम्॥ २॥ § 2771

इत्युद्भिदधिकरणम्॥ १॥

## ०.०.१५ चित्राज्याधिकरणम्

327 इदानीमयौगिकेषु व्रीह्यादिवल्लोकरूढेषु जातिगुणशब्देषु चिन्ता। न ह्यानुमानिककरणत्वानुरोधेन प्रत्यक्षप्रसिद्ध्यभावः संभवतीति पूर्वाधिकरणेनासिद्धिः। ननु 'आज्यैः स्तुवते' 'पृष्ठैः स्तुवते' 'बहिष्पवमानेन स्तुवते' इत्युत्पत्तिवाक्यत्वादेतान्युदाहर्तव्यानि। तथा हि— § 2773

उत्पत्तौ नामधेयं वा गुणो वाऽप्यवधारितः।
व्यवहाराङ्गतां याति सैवोदाहरणक्षमा॥ § 2775

सा तु नोदाहृता सूत्रकारेण 'यस्मिन् गुणोपदेश' इति गुणवाक्यस्याऽऽश्रितत्वात्। अथ किमर्थं तेनैव तदाश्रितम्। यत्र क्व चन प्रतिपादिते फलाविशेषात्। पूर्वपक्षनिराकरणहेतुर्वा वाक्यभेदस्तत्रं संभवतीत्युदाहृतम्। अथ वोत्पत्तिवाक्यस्थस्याऽऽज्यादिपदस्य पक्षद्वयेऽपि साकाङ्क्षत्वादेकस्यापि निश्चयहेतुर्नास्तीत्यन्यतः सिद्ध्यपेक्षणादनुदाहरणत्वम्। घृतवाचित्वात्तावन्न स्तोत्रनामत्वं विज्ञायते। यान्याज्यानि तैः स्तुवत इति च श्रूयते तत्र कान्येव नामानि कथं वा तेनाभिधीयन्त इति सहाऽप्युत्पत्तिवाक्येनान्यतः सिद्धिरवाप्तव्या। उत्पत्तिवाक्यस्थितमेव चाऽऽज्यादिपदं यथा रूढिं परित्यज्य स्तुतिनामतां प्रतिपद्यते तथा हेतुर्वाच्य इत्यपेक्षा। गुणविधित्वेऽपि घृतस्य स्तुतावकरणत्वात्तत्संबद्धमन्त्रलक्षणयाऽवश्यं संबन्धकृद्वाक्यमपेक्षणीयम्। इह विधाने मत्वर्थलक्षणाप्रस ङ्गात्। अनुवादत्वे तु नायं दोषो भवति। तेन स्तोत्राणामप्याज्यवत्ताऽन्यत एव लब्धव्येति तदुभयपक्षेऽपि

२ *] नामधेयस्य भाष्यकारोक्तं
गुणफलोपबन्धेनार्थवत्त्वं
प्रयोजनान्तरोपलणार्थमित्याह—अशेषेति।
कानि प्रयोजनान्तराणीति चेत्। ---
संज्ञायाः कर्मभेत्तृत्वं द्वितीये यद्वदिष्यते।
यच्चेष्टौ यागषट्कस्य फलवत्त्वं वदिष्यते।
सोमयागस्य च ज्योतिष्टोमेऽध्याये चतुर्थके।
यश्चाग्निहोत्रधर्माणां प्रवेशः कौण्डपायिने॥
सप्तमे वक्ष्यते सर्वं तन्नाम्नां फलमिष्यते।
वाक्यान्तरोत्पादिते च कर्मण्यङ्गं विधीयते॥
फलं वा यत्र तत्रास्मान्नर्ते कर्म विशेषधीः।
द्रव्यदैवतशून्यायां यागोत्पत्तौ च नामतः॥
विना निर्धारणाभावाद्विशेषस्याविधेयता।
धर्मप्रमोपयोगित्वमप्यस्येत्थं च सिध्यति॥
यागेनानेन यक्ष्येऽहं तेन याजय मामिति।
नाम्ना विनैवमादिश्च व्यवहारो न सिध्यति॥
मीमांसाविधिवाक्यार्थज्ञानानुष्ठानलक्षणे।
त्रिविधे व्यवहारेऽस्मिन् सर्वस्मिन्नाम
कारणम्। इत्येवं प्रदर्शितान्यनुसंधेयानि।

सापेक्षता। ततश्च स्तुवत इत्येतावन्मात्रमत्र विवक्षितमित्याज्यादिशब्दोऽन्यतो निर्णीयते। पवमानशब्दस्तु यौगिकत्वात्पूर्वाधिकरणसिद्धेरनुदाहरणमिति केचित्। अपरे तु मन्यन्ते। नोद्भिदादिवत्पवनक्रियां प्रति कर्तृत्वं स्तोत्रस्योपपद्यते, सोमो हि तत्र पवते। ततश्च न कर्मण्यवयवप्रसिद्धिरस्तीति पवमानार्थमन्त्रकत्वाल्लक्षितलक्षणा मत्वर्थलक्षणातो दुर्बलतरेति वाक्यभेदेनैव सिद्धेरुदाहरणम्। तत्र प्रसिद्ध्यादयः पूर्वपक्षे पूर्ववदेव व्याख्येयाः। चित्रेत्युत्त- 328
रपक्षे द्योतनादग्नीषोमीये गुणविधिरिष्टः। अत्र कारणमुच्यते— § 2776

चित्रत्वस्त्रीत्वयोगो हि प्राणिजातौ स्वभावतः।
तेनैते प्राणियागाङ्गं प्रकृतिं दैक्षमाश्रिते॥§ 2778

स्त्रीत्वादिविभागो हि प्राणिव्यतिरिक्तेऽर्थे शब्दानुकरणमात्रेण विज्ञायते पश्वादिषु त्वर्थरूपेण। प्रकृतं च दध्यादिद्रव्यात्मकत्वान्नैतद्योग्यं कर्मेत्युत्कृष्यमाणे वाक्याद्यागमात्रसंबन्धिनी प्रसक्ते सामर्थ्यात् प्राणियागमाकाङ्क्षन्ती 'प्रकृतौ वा द्विरुक्तत्वात्'* इत्यनेन न्यायेन सर्वप्राणियागपरमप्रकृतिमग्नीषोमीयं गच्छतः। तत्र यद्यप्युत्पत्तिवाक्यशिष्टं कृष्णसारङ्गलोहितसारङ्गादिगुणान्तरं पुंस्त्वं च बाधकं संभाव्यते, तथाऽपि पूर्ववदेव बाधविकल्पौवक्तव्यौ। साप्तदश्यपूर्वपक्षन्यायश्चात्र द्रष्टव्यः। एकपदोपात्तानेकार्थविधानाच्चैककारकनिबन्धनत्वादवाक्यभेदाभिप्रायः। पशुकाम शब्दोऽपि च स्वर्गकामाधिकरणपूर्वपक्षन्यायेनार्जनाङ्गत्वादनुवादोऽभिमतो न यागफलम्। न हि पशुयागः पशुमकामयमानेनानुष्ठातुं शक्यते। **यागानुवादो विज्ञातत्वादिति**। § 2779

सर्वत्राऽऽख्यातसंबद्धे श्रूयमाणे पदान्तरे।
विधिशक्त्युपसंक्रान्ते स्याद्धातोरनुवादता॥§ 2781

यावद्यावद्विधेयान्तरमुपादीयते तावत्तावत्पूर्वत्रा नेकशक्तिकल्पनाभयादनुवादत्वाकाङ्क्षा भवति। अगत्या तु तत्रापि विध्यङ्गीकरणम्। अस्ति चात्र स्त्रीत्वचित्रत्वभागग्नीषोमीययाग इत्यनूद्यते। **गुणे फलकल्पनायां यजतेरविवक्षेति**। किमर्थं गुणाविधित्वपक्ष एव सन्निराक्रियते। सिद्धान्तग्रन्थोऽयं प्रमादाल्लिखित इति केचित्। अपरे त्वाहुः। फलसंबन्धे किल प्रधानत्वाद्गुणोक्तिविघातः स्यादिति। तदयुक्तम्। सर्वथा नामधेयप्रतिपक्षो गुणविधिः स च फलसंबन्धेऽप्यनपगतः। तथा च वक्ष्यति **स्थित एतस्मिन्नधिकरणे गुणविधिर्नामधेयमिति विचार इति**। फलसंबन्धे ह्येकान्तेन यागसामानाधिकरण्याभावाद्गुणविधिरेव स्यादिति। तेनैवं वाच्यम्। इह तु त्रयः पक्षाः प्रतिभान्ति। गुणविधिः फले, यागे वा नामधेयं वेति। एकैकस्य च द्वयं द्वयं

७ क्षे] चित्रो गुणो विधीयमान इत्यादि सिद्धान्तभाष्येणाग्नीषोमीये गुणविध्यभिप्रायस्य प्रकटीकरणादित्यर्थः।
१३ *] जै॰ सू॰ ( ३-६-१ )।
२८ च] जै॰ सू॰ ( २-१-१ ) इत्यत्र भाष्यकार इति शेषः।

329 निराकर्तव्यम्। तत्र पूर्वपक्षस्थ एव दुर्बलतरत्वात्तृतीयं पक्षं निराकरोति। धातुपारार्थ्यप्रसङ्गादिति। अतश्च 'व्रीहिभिर्यजेत' इतिवद्यागे गुणविधानम्। करणभूतस्यापि च याग स्योत्पत्तिवाक्यावगतकरणत्वार्थाक्षिप्तसाध्यांशानुवादेव गुणे विधीयमाने न मत्वर्थलक्षणा। गुणवादेव वाऽनभिभवसमर्थ यागे गुणविधानमाश्रयति। फले गुणविधिकल्पनायां पूर्वाधिकरणोक्तदोषप्रसङ्गादिति। तथा 'पञ्चदशान्याज्यानि' इत्यत्र 'अस्तिर्भवन्तिपरः'* इति सत्तोपकल्पनं प्रयोगवचनाच्च विधिः। ननु च पञ्चदशानि सप्तशानीति चैवंरूपः शब्दो न संख्यामात्रवाची 'स्तोमे डविधिः पञ्चदशाद्यर्थः'* इति स्मरणात्। न हि स्तोम इति स्तोत्रीयासंख्यातोऽन्या विधीयते। नैष दोषः। स्तोत्रसाधनमात्रपरिच्छेदेन स्तुतिमानात्मकस्तोमसिद्धेः सदृशमृक्परिच्छेदे घृतपरिच्छेदे च स्तुतिमाननिमि त्तस्तोमवाचित्वम्। न चात्र मत्वर्थलक्षणा। कुतः— § 2782

श्रूयमाणस्य वाक्यस्य न्यूनाधिकविकल्पने।
लक्षणावाक्यभेदादिदोषो नानुमिते ह्यसौ॥ § 2784

इह तावदाज्यादीनां श्रुतवाक्यसंयोगाभावादवश्यं प्रकरणाम्नानानुमितवाक्यसंबन्धपूर्वकः प्रयोगवचनविधिराश्रयितव्यः। तेन मत्वर्थ एव प्रतिपाद्यत इति न लक्षणा। तत्रैतत्स्यात्। द्रव्यत्वादाज्यादीनां कर्तव्यताविशेषात्मकेतिकर्तव्यतार्थिना प्रकरणेन न ग्रहणमिति। सत्तैवात्र क्रियेत्यनुपालम्भः। प्रधानदेशत्वाच्चाङ्गानामाज्यादिभिरवश्यं स्तोत्रसमीपे भवितव्यम्। अतश्च यथैव 'अग्निमुपनिधाय स्तुवते' इत्यत्राग्निः सत्तामात्रेणोपकरोत्येवमिहापीति निर्दोषं, तस्माद्गुणविधानमिति। अत्राभिधीयते। 'प्रधानतोऽभिसंबन्ध' इति। अनेकार्थविधानं हि प्रधानकर्मविधाने सत्युपपद्यते। अत्र पुनः कर्मानुवादेन गुणो विधीयते। न च गुणानां परस्परं संबन्धो विद्यते। तत्रैकगुणविधाने गुणान्तरानाक्षेपादर्थापत्त्यभावे श्रौतानेकविधिव्यापारकल्पनायां पुनः पुनरुच्चारणं प्रत्ययस्य कर्तव्यमिति वाक्यभेदः स्यात्। आह च— § 2785

अर्थादनेकमप्यर्थं विधापयति भावना।
विशेषणविधिस्त्वन्यन्न गृह्णाति विशेषणम्॥ § 2787

एकपदोपात्तेऽपि चानेकविधिशक्तिकल्पनागौरवमस्त्येव। उत्पत्तिवाक्यशिष्टे गुणान्तराविरोधाच्चाशक्तिः। तथा हि— § 2788

330 उत्पत्तिवाक्यविज्ञातं कर्म सर्वं ह्यनूद्यते।
न चाऽऽश्रितगुणे शक्यं तद्विरोधि गुणान्तरम्॥ § 2790

६ *] प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति इति शेषपूरणम् पा सू ( २-३-१ ) अत्रत्यं कात्यायनस्मरणम्।

८ *] पा सू ( ५-१-५ ) अत्रत्यं वार्तिकम्।

यत्रानूद्यमान एवावश्यं गुणोऽप्यनुवदितव्यस्तत्र नैरपेक्ष्यदर्शनादाकाङ्क्षाधीनसंबन्धगुणान्तरविधानानुपपत्तिः। न च निष्कृष्य क्रियामात्रं गुणविधिः शक्यः कर्तुम्। कुतः— § 2791

प्रथमं हि स्ववाक्यस्थैर्गुणैः संबध्यते क्रिया।
वाक्यान्तरगतैः पश्चान्न शुद्धा सा ह्यवाप्यते॥§ 2793

यानि परस्परनिरपेक्षाणि व्रीहियवादिवाक्यवत्प्रवर्तन्ते तेषां तुल्यबलवत्त्वाद्भवति विकल्पः। इह चोत्पत्तिवाक्यमन्यनिरपेक्षं विदध्यान्नोत्पन्नवाक्यम्, अनुत्पन्नेऽनुवादानुपपत्तेः। पशुकामसंबन्धाच्च पदान्तरगतार्थग्रहणनिमित्तोऽपि वाक्यभेदो विद्यते। यद्यपि च फलं न विधीयते तथाऽपि तत्र कर्मविधानात्कर्मणि च गुणाविधेरस्त्येव गौरवम्। अपि च कर्मणः फलगुणौ प्रति युगपद्विध्यनुवाददोषोऽपरः स्यात्। न च पशुकामपदमर्जनाङ्गत्वात्प्राप्तमनूद्यते। कथम्— § 2794

पुरुषार्थो हि सर्वेण स्वरसादेव काम्यते।
तत्साधनतदङ्गेषु प्रवृत्तिः प्रार्थनादृते॥§ 2796

न हि साधनभूतं पशुं कश्चित्कामयते विनैव तु कामेन प्रार्थितान्यथानुपपत्त्या तमुपादत्ते। गौणी वा तस्य काम्यता भवेत्। अतः स्वातन्त्र्येण यन्मुख्यया वृत्त्या काम्यते तदेव कामशब्दोपबन्धात्फलं प्रतीमः। विस्तरेण चैतद् **‘असाधकं तु तादर्थ्यात्’** इत्यत्र वक्ष्यामः। फलं चाग्नीषोमीयस्य क्रत्वङ्गत्वान्नैतदन्यद्वाऽस्तीत्यनुवादासंभवः। प्रकरणं च बाध्येत प्राजापत्यस्य यागस्य। नामधेयत्वे तु कर्मफलसंबन्धमात्रकरणान्न कश्चिद्दोषः। ‘पञ्चदशान्याज्यानि’ इति द्रव्यसंख्ययोरुभयोः स्तोत्रेष्वप्राप्तत्वान्नान्यतरानुवादेनेतरविधानसंभवः। कर्मान्तरस्थं च न प्रतीयते। तदनुवादेन च विधावकर्माङ्गत्वप्रसङ्गः प्रकरणबाधश्च। न च विशिष्टद्रव्यविधिरुपपद्यत इति वक्ष्यते ‘तत्रैकत्वमयज्ञाङ्गभूतम्’* इति। न चाक्रियाविशेषणं विधीयते, विधायकस्य नामपदैः साक्षादसंबन्धात्। न चेह क्रियोपात्ता, या विधीयमानाऽर्थादनेकमपि गुणमाक्षिपेत्। न चैषां स्तुतिप्रयोगवचनेन ग्रहणम्, अक्रियात्मकत्वात्। आह च। § 2797

नात्रान्तरक्रियायोगादृते वाक्योपकल्पितात्। 331
गुणद्रव्ये कथंभावैर्गृह्णन्ति प्रकृताः क्रियाः॥§ 2799

न च भवतिक्रियां प्रत्यङ्गत्वमुपपद्यते। सर्वोऽपि हि लब्धात्मकोऽन्यत्र व्याप्रियते। सत्तायास्तु वस्त्वात्मलाभमात्रापवर्गान्न साध्यत्वम्। तद्व्यतिरिक्तसाध्यान्तरानपेक्षणाच्चोपकारासंबन्धान्नेतिकर्तव्यतात्वम्। यत्तु रथंतरं

१८ द्] जै॰ सू॰ ( ६-१-१ )। २४ *] जै॰ सू॰ ( ४-१-५ )।

भवतीत्येवंचोदितानामपि प्रकरणेन ग्रहणं तददतिदेशप्राप्तावान्तरक्रियासंबन्ध-विज्ञानात्। न वाऽऽज्यादीनां लोके सत्ता न सिद्धा येनेदानीं भाव्येत स्तुतिप्रयोगसंनिधिस्थापनभावना करिष्यत इति चेत्। न। अचोदितत्त्वात्। **‘अग्निमुपनिधाय’ इति** तु स्पष्टं विधानम्। आत्मलाभव्यतिरिक्ता चेयं क्रिया शक्यते कथंभावेन ग्रहीतुम्। सिद्धान्ते च वाक्यस्यार्थवत्त्वान्नान्यथानुपपत्त्या विनियोजकवाक्यकल्पना। यदि तु आज्यैः स्तुवते’ इत्यनेन विहितानां पञ्च-दशत्वविधिरुच्येत ततः पूर्वाधिकरणन्यायेन सैव मत्वर्थलक्षणेति मत्वा वदति—अपि चाऽऽज्यानि स्तोत्राणीत्यादि। संसर्गिद्रव्यत्वाच्चाऽऽज्यानां साक्षात्प-ञ्चदशत्वयोगाभावादश्रुतपलादिपरिमाणकल्पनाऽवश्याश्रयितव्या भवेत्। तेनैवं ज्ञायते यद्यप्युत्पत्तौ नामत्वं न ज्ञातं गुणवाक्ये च तस्यानधिकारः। त-थाऽप्येतद्गुणविधानमेवं सिध्यति। यद्युत्पत्तावाज्यशब्दो नामधेयं नान्यथेति।
§ 2800

गुणवाक्योपपत्त्यर्थं समभिव्याहृतेन च।
अन्वाख्यानार्थवादाच्च नामधेयत्वमाश्रितम्॥§ 2802

**यदाजिमीयुस्तदाज्यानामाज्यत्वमिति**। यस्माद्देवाः प्रजापतिवचनादेतेषु
स्तोत्रेष्वाजिमधावन्। ततस्तदर्हत्वादेतान्याज्यानीति। तथा ‘तासां वायुः पृ-
ष्ठे व्यवर्तत’ इति यस्मादपां वायुनां पृष्ठे स्पृष्टे रथंतरादीनि जा-
332 तानि तस्मात्तानि पृष्ठानीत्यर्थवादाद्विज्ञातम्। तत्प्रकृतित्वाच्च वामदेव्यादिषु
पृष्ठशब्दप्रसिद्धिः। **द्वावेतावर्थविकस्य वाक्यस्याशक्या**वित्यस्यानन्तरम्, अथ
**कस्मान्न पञ्चदशसंख्याविशिष्टानी**त्येवमादि **द्रष्टव्यम्**। **विशिष्टानां वाचक-
स्याभावादिति**—प्रधानाख्यातानुच्चारणाभिप्रायम्। **ननु पदद्वयमिति**—भव-
तिक्रियासंबन्धाभिप्रायम्। **नैतत्पदद्वयमपि विधायकमि**ति। प्रधानक्रिया हि
विशेषणानि पिण्डीकरोति सत्तायास्तु प्रत्येकवर्तित्वान्न समुदाये वाक्यप-
रिसमाप्तिः। अतश्च परस्परसंबन्धाभावः। पञ्चदशानि यानि कानिचिद्भ-
वन्ति, आज्यान्यपि यावन्ति तावन्ति भवन्तीति कल्पना तस्मान्नोभ-
यं विधायकम्। न चानुवादकं, स्तोत्रेषु तादृशस्याभावादनर्थकत्वप्रस-
ङ्गाच्च। तस्मादेकानुवादेनेतरविधिर्नामधेयत्वेऽवकल्पते। विधायकमिति चात्र
विधेयार्थोपनयनव्यापारात्पुनः पुनरभिहितं न तु नामपदस्य विधिशक्तिरस्ति।
पञ्चदशानीति च स्तुतिसाधकतमस्तोत्रीयाक्परिच्छेदान्मुख्यं स्तुतिमाननिमित्तं
स्तोमत्वमिति शब्दसामञ्जस्यं भविष्यति॥ ३॥ § 2803

इति चित्राज्याधिकरणम्॥ २॥

## ०.०.१६ तत्प्रख्याधिकरणम्

ननु सर्वत्र द्विप्रकारमेव नामपदं सांविज्ञायिकं यौगिकं च। उभयमपि चाधिकरणद्वयेन प्रतिपादितं, किमिदानीमवशिष्यते येन पुनर्विचार्यते। उच्यते। यौगिकानामेव मत्वर्थलक्षणापरिहारेणात्र चिन्ता, उत्तराधिकरणे तु सांविज्ञायिकानां वाक्यभेदासंभवात्। तत्राग्नये होत्रमस्मिन्निति सिद्धान्तेऽप्य- 333
भ्युपगमादन्यसमासार्थानुपलब्धेश्चान्तर्णीतमत्वर्थो बहुव्रीहिरखेदेन गुणं विधत्ते। त एव च प्रसिद्ध्यादयो हेतवः सत्यामपि च सायं होमेऽग्निप्राप्तौ तद्वर्जं प्रातर्होमे होममात्रानुवादाद्वा सर्वदर्विहोमेष्वविहितदेवताकेषु विधास्यति वाक्यसामर्थ्यात्। तथाऽऽघार्यत इत्याघार इति धारणसमर्थं द्रव्यमाज्यपयःप्रभृत्यभिधीयते। तच्च द्वितीयानिर्देशात् क्षारणक्रियासंस्कार्यत्वेनाध्यवसीयमानमनुपयुज्यमानसंस्कारानुपपत्तेः प्रयोजनमपेक्षते। धर्ममात्रं चास्य क्षारणं शब्दार्थमात्रापवर्गित्वान्नाशेषक्षारणं करोति। तत्क्षारितैकदेशेन किं कर्तव्यमित्यस्त्यपेक्षा। लोकेऽपि च द्रवद्रव्याणां क्वचित्पानादावुपयोक्ष्यमाणानामीषत्क्षारणसंस्कारं कुर्वन्ति। तेनाभिषवयुक्तपूतीकवद्भक्षणयुक्तफलचमसवच्च संस्कार्यं द्रव्यं कर्ममात्राभिलाषि। प्रकरणवशेन दर्शपूर्णमासप्रधानान्युपसर्पति। तत्रापि चाऽऽग्नेयादीनां विहितद्रव्यकत्वादुपांशुयाजः केवलः साकाङ्क्ष इति तादर्थ्यं प्रतिपद्यते। आह च— § 2805

श्रुतसंस्कारसंबन्धं मुख्यैर्यद्यप्यसंगतम्।
अन्यथा तदयोग्यत्वात्प्रकृतैर्याति संगतिम्॥§ 2807

अथ वा यत्करोतीति प्रत्ययार्थमात्रं साकाङ्क्षत्वादेवोपांशुयाजभावनामनूद्याऽऽघारद्रव्ये वाक्येन विधीयमाने तत्साध्यत्वादेव धात्वर्थः प्राप्तोऽनूद्यते। ध्रौवप्राप्त्यैव वा तस्य क्षरणात्मकत्वे विज्ञाते क्षरणसमर्थमात्रपयःप्रभृतिविधिं मन्यते। न च धात्वर्थादेव सिद्धेर्नाम्ना प्रयोजनम्। न च संस्कारकर्माणि क्वचिन्नामवन्ति दृश्यन्ते। **श्रुत्यैव गुणो विधीयत** इति। द्वितीयाश्रुत्यैव संस्कार्यत्वादवश्यं क्वचिदस्य गुणत्वमित्यवगमाभिप्रायम्। अत्रोच्यते— § 2808 334

विधित्सितगुणप्रापि शास्त्रमन्यद्यतस्त्विह।
तस्मात्तत्प्रापणं व्यर्थमिति नामत्वमिष्यते॥§ 2810

अत्र वदामः— § 2811

सायं होमे यदि ब्रूयादाघारे च परो विधिम्।
ततः शास्त्रान्तरप्राप्तेर्विधिः स्यान्निष्प्रयोजनः॥§ 2813

यदा त्वदेवते होमे देवताविधिरुच्यते।
द्रव्यं चोपांशुयाजस्य तदा तत्प्रख्यता कथम्॥§ 2815

उच्यते— § 2816

विधिश्चेदग्निहोत्रं स्यात्ततोऽस्य विषयैषिणः।
निवेशः प्रकृते वा स्याद्युक्तेरप्रकृतेऽपि वा॥§ 2818

अग्नेर्होत्रेण संबन्धे कृतेऽन्येन प्रवर्तनात्।
अग्निहोत्रपदे स्पष्टमनुवादत्वलक्षणम्॥§ 2820

अनूद्य चापि धात्वर्थं गुणः सर्वो विधीयते।
न चानुवादः प्रकृतात्कर्मणोऽन्यत्र लभ्यते॥§ 2822

प्रकृतं चेदनूद्यायं गुणो होमे विधीयते।
तत्र तत्प्रख्यताऽन्यत्र न विधिस्तत्परिग्रहात्॥§ 2824

न च धात्वनुवादोऽत्र कथं चिदुपपद्यते।
प्रकृताप्रकृताभावात्तस्मात्कर्म विधीयते॥§ 2826

सायमूर्ध्वादिसंयुक्तैर्गुणो वाक्यैर्विधीयते।
शुद्धं न श्रूयते कर्म प्रकृतं नास्ति तेन तत्॥§ 2828

335 दूरस्थस्यानुवादश्च व्यवधानान्न युज्यते।
तस्य बुद्धावनारोहात्कौण्डपायिनहोमवत्॥§ 2830

विधीयतां विशिष्टं चेत्कर्मेत्येवं विकल्प्यते।
न चेदन्येन शिष्टाः स्युस्तत्प्रख्यं चेति चोत्तरम्॥§ 2832

न चतुर्थीसमासस्य लक्षणं चात्र विद्यते।
न च तेन विना शक्या देवताविधिकल्पना॥§ 2834

यः कश्चिदेव संबन्धः षष्ठीतत्पुरुषाद्भवेत्।
अनुवादेऽन्यतः सिद्धे कथ्येताप्यश्वघासवत्॥§ 2836

विधातव्यश्च संबन्धो भवेत्परपदार्थयोः।
प्रातर्होमेऽपि तेनैष वह्निर्नैव विधीयते॥§ 2838

एकदेशेऽपि च ज्ञानान्नानुवादोऽपगच्छति।
आघारस्यापि संबन्धः क्लेशेनोपांशुकर्मणा।§ 2840

सामानाधिकरण्यं वा साध्यांशेनेह कर्मणः।

विस्पष्टं द्रव्यनामत्वं न चाऽऽघारस्य गम्यते॥ ४॥§ 2842

इति तत्प्रख्याधिकरणम्॥ ३॥

## ०.०.१७ तव्द्यपदेशाधिकरणम्

'अथैष ज्योतिः' इत्यादिवर्जमुदाहरणम्। तेषां तृतीयानिर्देशाभावाद्गुणविधित्वानुपपत्तेः। तेऽपि च वाक्यान्तरेषु यदा तृतीयानिर्देश प्रतिपद्यन्ते तदा विचार्यन्ते। अथ वा प्रथमानिर्देशेन द्रव्यमपि प्रस्तुत्य पश्चात्तत्साध्योपन्यासः संभवतीत्येतेऽप्युदाहरणमेव। तत्र तैरेव प्रसिद्ध्यादिभिर्गुणविधिः। न चात्र कर्मणि प्रवृतिनिमित्तं किं चिदस्ति। वत्यर्थोपादानेन कर्मणि प्रवृत्तौ चात्य- 336
न्तविप्रकृष्टा गौणता स्यात्। तत्र वरं मत्वर्थलक्षणा। साधनं हि प्रतीतमत्यन्तविनाभावात्स्वसाध्यां क्रियामक्लेशेन प्रतिपादयति विनैव मतुब्लोपेन। किं च— § 2844

मत्वर्थो वाक्यवेलायामेकवाक्यवशाद्भवेत्।
इवार्थः पदवेलायां गृह्यमाणोऽतिदुर्बलः॥§ 2846

गुणविधिपक्षे हि स्वार्थापरित्यागेनैव श्येनपदं तद्वन्तमुत्तरकालं लक्षयति। आत्मोच्चारणकाले तु स्वार्थमेव विनियुङ्क्ते। भवतस्तु श्येनार्थानुपयोगादादित एव सादृश्यविवक्षया पदं प्रवृत्तमित्युपगमाच्छ्रुतिबाधप्रसङ्गः। तदुच्यते— § 2847

विधेयं स्तूयते वस्तु भिन्नयोपमया सदा।
न हि तेनैव तस्यैव स्तुतिस्तद्वदितीष्यते॥§ 2849

श्येनादिवाक्येषु हि यथा वै श्येनो निपत्याऽऽदत्त एवमयमपीत्युपगमान्न स्तुतिर्दृश्यते। तया च विधीयमानस्य भवितव्यम्। गुणविधाने च श्येनद्रव्यं विधीयत इति तदेव स्तोतव्यम। न च तस्याऽऽत्मनैवोपमानं युक्तम्। अथोच्येतानन्यत्वेन सुतरां स्तुतिर्भवति, अनन्यसंभविचरितत्वात्। यथा— § 2850

"रामरावणयोर्युद्धं रामरावणयोरिव"। इति।§ 2851

भवति हि लोके काल्पनिकमवस्थादिगतभेदमाश्रित्यैवमपि स्तुतिः संभवति भेदे न युक्ता। नामधेयत्वे तु यागश्येनस्य द्रव्यश्येनोपमोपपत्तेराञ्जस्यम्।

२४ तु] श्रुतिर्हि नामधेयत्वे, लक्षणा गुणविधौ इति भाष्यं यथाश्रुतार्थमनुपपन्नमिति मत्वाऽन्यथा व्याचष्टे नामधेयत्वे त्वित्यादिना—गौरवमित्यन्तेन।

इतरथा हि द्वौ मत्वर्थवत्यर्थौ लक्षयितव्यौ। काल्पनिकश्च भेद इति गौर-
वम्। न च यागस्तुत्या तदाश्रितद्रव्यस्तवनमवकल्पते, यागविधेरनिराकृत-
337 त्वात्। अविधेयगता हि स्तुतिरन्यत्र संचार्येत यागस्तु स्वयमेव विधिभागत्रेति
न द्रव्यं स्तूयते विधीयते वा। पुनरपि च यागेन द्रव्यलक्षणाद्विप्रकृष्टता।
समभिव्याहाराच्च द्रव्यवदेव यागवचनत्वं मुख्यम्। विधौ च तव लक्षणा
ममानुवादे। गुणवचनेभ्यश्च मतुब्लोपः स्मर्यते न द्रव्यवचनेभ्यः। इवार्थस्तु
परशब्दस्य परत्र प्रयोगात्स्वयमेवोपजायते। मत्वर्थलक्षणा च स्वयं कल्प-
नीया, क्लृप्तस्तु वत्यर्थः। 'यथा वै श्येन' इत्यादिना। पूर्वोक्ताश्च धातुपारार्थ्य-
प्रत्ययविप्रकर्षादयो दोषा वक्तव्याः॥ ५॥ § 2852

इति तद्व्यपदेशाधिकरणम्॥ ४॥

## ०.०.१८ वाजपेयाधिकरणम्

तन्त्रसंबन्धेनाऽऽख्यातपदस्य धात्वर्थः फलं प्रति करणं गुणं च प्रति साध्यो भवन्न विरोत्स्यते। तेनोद्भिदा यागं यागेन च पशून् भावयेदिति युगपद्विधिव्यापाराद्विनैव मत्वर्थलक्षणया संबन्धसिद्धिः। तथाऽऽज्यादिपदस्य तन्त्रेण स्तोत्रसंख्यादियोगः। तस्मात्सर्वत्र त्वत्परिकल्पिते नामधेये गुणश्रुतेः प्रसिध्यादिभिर्गुणप्रत्ययानपगमात्तद्विधानमेव भवत्वलं नामधेयत्वेनेति यथासंभवं सर्वाधिकरणाक्षेपेणेदमारभ्यते। तत्रेदमपि वाक्यं शुद्धं भविष्यतीति वाजपेयोपन्यासः। सर्वाण्येव त्विहोदाहर्तव्यानि। आह च— § 2854

करणेषूपदिष्टेषु याऽर्थात्साध्यत्वकल्पना।
तस्यां गुणविधानेन नास्ति मत्वर्थलक्षणा॥ ६॥ § 2856

वाजपेये तावदयं विशेषोऽभिधीयते— § 2857

338 वाजपेयं यवागू स्यादौषधद्रव्यता ततः।
द्रव्यसारूप्यसामान्यादैष्टिकत्वं प्रसज्यते॥ ७॥ § 2859

तन्त्रत्वमेकरूप्येण भवेत्तुल्योपकारतः।
उपकारान्यथात्वे तु भवत्यावृत्तिलक्षणम्॥ § 2861

द्विधा हि तन्त्रं भवति प्रत्येकं वा समुदाये वा वाक्यपरिसमाप्तावाख्यातगुणत्वप्राधान्यापेक्षया। तदिह द्रव्यं यागे विधीयते न फलमफलत्वप्रसङ्गात्। उद्दिश्यमानं हि सर्वत्र फलं भवति, तच्चेत्क्रियां प्रत्युपादीयेताङ्गमेव स्यात्। यागोऽपि फलं प्रत्युपादातुं शक्यते न द्रव्यं प्रति, तत्संस्कारत्वप्रसङ्गात्तृतीयानिर्देशबाधाच्च। न च यागसंस्कृतस्य द्रव्यस्यान्यत्रोपयोगो

विद्यते येनैवमाश्रीयेत। एतेन यागफलयोर्द्रव्यं प्रत्युपादानं प्रत्युक्तम्। न च फले यागद्रव्ययोरुपादानम्। एकेन निराकङ्क्षे फलेऽन्यस्याविधानात्। यथा वक्ष्यति “यदेकस्मादपूर्वं तदेतरत्तदर्थम्” इति। न च द्रव्योपसर्जनो यागः फले विधीयते, मत्वर्थलक्षणादिप्रसङ्गात्। तत्रैतदेवाऽऽपतति यागेन फलं यागं च द्रव्येणेति। ततश्च फलेनोपादेयविधेयगुणभूतयागग्रहणाद्गुणेन चोद्दिश्यानूद्यप्रधानभूतापेक्षणात्तन्त्रत्वाभावः। एकमार्गाश्रयणेऽन्यतरस्यासंबन्धात्। तत्र युगपदाश्रयणे वाक्यभेदात्। अवश्यं हि यत्रोद्दिश्यमानादिरूपं यत्र चोपादीयमानाद्यात्मकता तत्र यागस्यैते द्वे वाक्ये कल्पनीये। ननु द्वे एवैते इति तन्त्रपदमभितो दर्शयन् ब्रवीति—**चत्वारि पदान्युप- लभेमहीति**। अतुल्यार्थत्वादतन्त्रत्वाभिप्रायेण। परस्य तु शब्दरूपाभेदात्साधारण्याभिमानः। **नैतदस्तीति**—कार्यप्राधान्याच्छब्दरूपस्य तद्गतवैरूप्याद्भेदाप- 339 त्तिः। **आह यदिदमुक्त**मिति—वैरूप्यं परिहरति। गुणविध्यंशेऽपि ह्यवश्यमाख्यातं विधिरूपमेवाभ्युपगन्तव्यम्। वाजपेयपदस्यानाख्यातत्वेनाविधायकत्वात्। **यद्युभत्र विधिरिति**—द्रव्यसंस्कार्यत्वप्रसङ्गमनादृत्याऽऽख्यातगुणभावकृतप्रत्येकवाक्यपरिसमाप्तिनिमित्तपरम्परासंबन्धोपन्यासः। प्रकरणानुरोधात् ‘व्रीहिभिर्यजेत’ इत्यादिवद्व्यवस्थेति चेत्। न। **वाक्येन यागमात्रे विधाना**दिति—तन्त्रसंबन्धे हि परस्परनिरपेक्षयोर्यागेन संबन्धः। एकविशेषितेतरसंबन्धे वाक्यभेदप्रसङ्गात्। तत्रानिष्पन्ने स्वाराज्ययागप्रकरणे गुणो विधीयमानः शुद्धयजतिसंबन्धात्सार्वत्रिकोऽपूर्वयागसंबन्धो वा विज्ञायते। दर्शपूर्णमासादिवाक्यैस्तु निष्पादिते प्रकरणे विधीयमाना व्रीह्यादयोऽवतिष्ठन्त इति वैषम्यम्। तेन स्वाराज्यकामैर्यागैकवाक्यता गम्यमाना नोत्सृष्टा भविष्यतीति नामधेयता॥ ८॥ § 2862

इति वाजपेयाधिकरणम्॥ ५॥

## ०.०.१९ आग्नेयाधिकरणम्

एवं सिद्धेषु नामधेयेषु नामधेयकार्येषु चेदानीमपवादः प्रस्तूयते। कस्मात्पुनरिहैव दर्विहोमपदं न विचार्यते, विचारितमेतदपि तत्प्रख्यमित्य- 340 नेन। विध्युद्देशगतानां चेह विचारस्तत्र त्वर्थवादगतानां ‘यदेकया जुहुयाद्दर्विहोमं कुर्यात्’ इति। सिद्धे वा कर्मनामधेयत्वे तद्विशेषविचारस्तत्र। इह पुनः सामान्यचिन्तेति नोपन्यस्तम्। या तु तत्र गुणविध्याशङ्का साऽधिकरणमध्ये परिचोदनामात्रं सर्वमेवैतत्प्रासङ्गिकम्। अष्टमे च पूर्ववदपूर्वचिन्ताधिकारात्। केन पूर्वविहितानां कर्मणामाग्नेयादीनां नामधेयत्वमाशङ्क्य-

३ ति] जै° सू° ( २—१—१ ) इत्यत्र भाष्यकार इति शेषः।

ते। तदुच्यते। अष्टाकपालो भवतीत्यादिभिर्द्रव्यमात्रयुक्ताः क्रमवत्यो भावनाः प्रतिपाद्यन्ते। तासां च स्थानक्रमेणाग्न्यादिदैवत्यानि याज्यानुवाक्यायुगलान्याम्नायन्ते। तानि क्रमविनियुक्तानि सन्ति मान्त्रवर्णिकीः कर्माङ्गभूता देवताः कल्पयन्ति। न ह्यन्यथा ते मन्त्राः कर्मोपयोगं गच्छेयुः। क्रियास्वरूपप्रकाशनेन तत्संबन्धिप्रकाशनेन वा मन्त्राः कर्मोपयोगितां गच्छन्ति। न चैतैः क्रिया द्रव्यं चाभिधीयते। यदग्न्याद्यभिधीयते तस्य संबन्धित्वं न ज्ञातं तत्रासंबन्ध्यग्न्यादिप्रकाशनेऽनङ्गत्वप्रसङ्गः। तेनावधारिताङ्गत्वमन्त्रानुरोधेनैवं विज्ञायते यानेते वदन्ति ते नूनमग्न्यादयः क्रियाङ्गमिति ते च मन्त्रेषु प्राधान्याभिधानाद्देवतात्वेन प्रज्ञाता इति तदवैलक्षण्यात्कर्मस्वपि देवता भवन्ति। पुरोडाशादिभिरपि च हविरात्मकत्वाद्योग्यतया यागसाधनत्वेनोपप्लवमानैर्देवतैवाऽऽकाङ्क्षितेति द्रव्यदेवतासंबन्धनिष्पत्तेरनुमितानां यागानां 'तत्प्रख्यं चान्यशास्त्रम्'* इत्याग्नेयादीनां नामधेयत्वम्। अथ वाऽष्टाकपालादीनां हविष्ट्वात् 'द्विर्हविषोऽवद्यति' इति ह्यवदाने गृहीते चोदनान्तरेण च तत्संस्कारार्थोपस्तरणाभिघारणग्रहणाच्चतुरवत्ते निष्पन्ने 'चतुरवत्तं जुहोति'* इति वचनाद्यावद्द्रव्यं निष्पन्नानां होमानां तथैवाग्न्यादिषु प्राप्तेषु नामधेयत्वम्। एवं चानेकार्थविधिदोषो न भविष्यति। तथा प्राप्तेऽभिधीयते— § 2864

न चेदन्येन शिष्टाः स्युर्यागाः शब्देन केनचित्।
ते गुणाश्चोपदिश्येरन्विधिना ह्यविभागतः॥§ 2866

341 न तावद्द्रव्यदेवतासंस्कारसंयोगेन यागविधिरुपपद्यते। कथम्। § 2867

न द्रव्यस्य स्वरूपेण मन्त्राकाङ्क्षाऽवकल्पते।
न चान्यवाचिना तस्य संबन्धः संप्रतीयते॥§ 2869

नाष्टाकपालो भवतीत्येतावता कश्चित्पुरुषव्यापारो विधीयते योऽनुष्ठानाय स्मृतिकरणं मन्त्रमपेक्षेत। न च पुरोडाशभवनं पुरुषस्यानुष्ठेयं, प्रतिनियतकर्तृत्वात्क्रियाणाम्। नापि द्रव्यं, स्वरूपेण सिद्धात्मकत्वादकर्तव्यं, येन स्मर्येत। न च 'अग्निर्मूर्धा' इत्यादिभिर्द्रव्यं तद्व्यापारोवाऽभिधीयते येनाऽऽकाङ्क्षयाऽपि संबध्येरन्। अग्न्याद्यभिधायिनां न कश्चित्तैः संबन्धो विद्यते। § 2870

न च यागो हविष्टवं वा पुरोडाशेऽवधारितम्।
येन स्याद्देवताकाङ्क्षा तन्मन्त्राणां च संगतिः॥§ 2872

यदि हि प्रथमं यागत्वमवधार्येत ततो देवताकाङ्क्षायां सत्यां देवतावाचिनो मन्त्राः संबध्येरन्, न तु तद्भवतिशब्देनोक्तम्। न च यागसंबन्धात्प्राक् पुरोडाशादीनां हविष्टवमवधार्यते। संबन्धिशब्दो ह्ययं न द्रव्यस्वरूपप्रयुक्तः। तदेव हि द्रव्यमयागसंबद्धं पयःप्रभृति न लोके हविःशब्दवाच्यं भवति। एतेन चतुर-

११ *] जै॰ सू॰ ( १। ४। ३ )    १४ *] तै॰ सं॰ ( २। ६। ८ )।

वत्तचोदनाकल्पितकर्मनामत्वं प्रत्युक्तम्। आघारादिषु तु क्रियात्मकत्वान्मन्त्राकाङ्क्षायां वचनविनियोगवशाच्च भवति मान्त्रवर्णिकदेवताकल्पना। सर्वजघन्यश्चायं देवताविधिः सर्वज्येष्ठे तद्धितदेताविधौ संभवति किमित्याश्रीयते। अन्यथानुपपत्तिमूलश्चासौ। न च तद्धिते संभवत्यन्यथानुपपत्तिः। तस्मादनेनैव कृते द्रव्यदेवतासंबन्धेऽर्थवादपुरःसरेण भवतिशब्देन विहिते विशेषार्थं क्रमेण मन्त्राम्नानम्। अगत्या चानेकार्थविधिरङ्गीक्रियते। **विधानार्थे तद्धितान्ते शब्द इति**—विधिप्रयोजनत्वाभिप्रायेण। सर्वं चैतत्तस्मादविभक्तं गम्यते। देवता तावत्प्रातिपदिकेनोक्ता तद्विशिष्टं द्रव्यं तद्धितेन संबन्धोऽपि तत्रैवार्थगृहीतस्तत्सामानाधिकरण्याच्चाशेषात्मीयोपसर्जनयुक्तमष्टाकपालपदं विशेषणत्वेन तत्रैवान्तर्गतम्। द्रव्यस्य चाऽऽग्नेयत्वेन भवनमभाव्यमानस्य न सिध्यतीति तदाक्षिप्ता भावनाऽपि तत्रैव। न च यागेन विनाऽऽग्नेयत्वं भावयितुं श- 342
क्यमिति पुरुषव्यापारविशेषोऽपि यागस्तदन्तर्गतः। ततश्च तद्धितान्तपदोपात्तविधिना सर्वमन्यदर्थादाक्षिप्यमाणं न वाक्यं भिनत्ति। भावनाविधिपूर्वकश्च सर्वत्र धात्वर्थकारकविधिर्भवतीत्यश्रूयमाणाऽपि सैव तावद्विशिष्टा विधीयते। ततो विशेषणान्यथानुपपत्त्या सर्वसंसर्गात्मकत्वाच्च तामेव संबन्धशब्देनाभिधत्ते, न त्वव्यापारात्मकत्वाद्द्रव्यदेवतासंबन्धः शक्यते विधातुम्। 'अविभागत्' इति—अर्थाक्षेपहेतुः। 'न चेदन्येन' इति—अन्यथानुपपत्तिशरणाभिधानम्॥ ९॥ § 2873

इति आग्नेयाधिकरणम्॥ ६॥

## ०.०.२० बर्हिराज्याधिकरणम्

नामधेयप्रस्तावेन द्रव्यनामसु निमित्तं प्रत्यधिकरणत्रयमारभ्यते। तुल्यहेतुत्वात्पुरोडाशोऽप्युगाहृतः। तत्र 'शास्त्रस्था वा तन्निमित्तत्वात्'* इति याज्ञिकानां संस्कृतेषुप्रयोगात्साऽर्वत्रिकत्वादविगीतत्वाच्च संस्कारनिमित्तता। तथा हि— § 2875

पुरोडाशादिभिर्लोके व्यवहारो न दृश्यते।
तस्माद्यूपादिवद्वेदात्तेषां संस्कारहेतुता॥ § 2877

तन्नास्ति। कुतः। § 2878

एकदेशेऽपि यो दृष्टः शब्दो जातिनिबन्धनः। 343
तदत्यागान्न तस्यास्ति निमित्तान्तरकल्पना॥ § 2880

२ *] जै॰ सू॰ ( १—३—४ )

य एव लौकिकाः शब्दास्त एव वैदिकास्त एवामीषामर्था इति स्थितत्वाल्लोकप्रसिद्धिप्रतीक्षे वेदे यत्रैकदेशेऽपि जातिनिमित्तता लभ्यते न तत्र पुनर्निमित्तान्तरशक्तिकल्पना संभवति। संस्कृतेष्वपि जातेरनपगमात्तन्निमित्ततातिक्रमो न शक्यो वक्तुम्। अतश्च शास्त्रस्थैरप्यविरोधान्न बाधः। किं च। § 2881

वेदेनापि च संस्कारात्प्रागेव च्छेदनादिकात्।
तद्विधौ जातिशब्दत्वमाश्रितं लोकसंमतम्॥§ 2883

तेन जातिमेते न व्यभिचरन्ति। व्यभिचरन्ति तु संस्कारान्, अविहितत्वाल्लेकव्यवहारवेलायां संस्काराणामभावात्। § 2884

न च यूपादितुल्यत्वमन्यथाऽप्युपपत्तितः।
लोकादलभ्यमानार्थास्ते ह्यगत्या तथाऽऽश्रिताः॥§ 2886

यदि हि च्छेदनविधिवेलायां बन्धनविधौ वा कश्चिल्लौकिकोऽर्थो लभ्येत ततः किमेवं व्यवस्थितवचनव्यक्तिविपर्ययेण कल्प्येत यच्छिद्यते स नूनं यूप इति। अस्ति च बर्हिरादेर्गतिस्तस्मादतुल्यता॥ १०॥ § 2887

इति बर्हिराज्याधिकरणम्॥ ७॥

## ०.०.२१ प्रोक्षण्यधिकरणम्

344 ननु समुदायप्रसिद्धेः श्रुतिस्थानीयत्वाद्वाक्यस्थानीयावयवप्रसिद्धिर्दुर्बला स्यात्। तथा हि। § 2889

अक्षरैरेव बुध्यन्ते समुदायप्रसिद्धिषु।
अर्थभागोपसंहारादितरा विप्रकृष्यते॥§ 2891

सत्यमेवमेतत्। अवश्यं त्ववयवानामपि स्वार्थे शक्तिराश्रयणीया तदनाश्रयणेऽवयवप्रसिद्धित्वाभावात्। तत्र च। § 2892

असत्स्ववयवार्थेषु योऽन्यत्रार्थे प्रयुज्यते।
तत्रानन्यगतित्वेन समुदायः प्रसिध्यति॥§ 2894

लब्धात्मिका हि समुदायप्रसिद्धिरवयवप्रसिद्धिं बाधते तस्यास्त्वात्मलाभो यत्र प्रमाणान्तरेण पूर्वानुभूतावयवार्थरहितेऽर्थे शब्दप्रयोगो दृश्यते यथाऽश्वत्वकर्णत्वरहिते वृक्षेऽश्वकर्णशब्दस्य। न ह्यत्र पूर्वशक्त्यनुसारेण प्रतीतिरुपपद्यत इत्यर्थापत्त्या शक्त्यन्तरं कल्प्यते। ततश्चोभयसंभवेऽवय-

१ इति] लोकवेदाधिकरण इति शेषः।

वार्थानुसंधानाद्विक्षिप्ताया अवयवप्रसिद्धेरक्षरश्रवणमात्रलभ्यत्वादियं बलीयसी भवति। अत्र पुनरप्सु प्रकर्षसेचनक्रियाकरणत्वसंभवादवयवशक्तिभिरेव वाक्यवत्प्रयोगोपपत्तेः शक्त्यन्तरे प्रमाणाभावात्समुदायप्रसिध्द्यभावः। तथा हि। § 2895

भवेतां यदि वृक्षेषु वाजिकर्णौ कथंचन।
अदृष्टां समुदायस्य कः शक्तिं जातु कल्पयेत्॥ § 2897

तस्मान्नाप्सु समुदायप्रसिद्धिरिति द्रवद्रव्यमात्रसाधारणता। ननु संस्कारनिमित्तत्वेऽप्यप्सामानाधिकरण्यकृतत्वादीकारस्य घृतान्निवृत्तिः स्यात्। यदि हि प्रागीकारात्संस्कारनिमित्तताऽवगम्येत ततः स्त्रीप्रत्ययोऽयमाश्रयलिङ्गनिमित्त इत्यवधारणादन्यलिङ्गान्निवर्तेत। अयं पुनरन्यप्रयोगः संस्कारेष्वीका- 345
रान्त एवानवगतविभागो वेद्यादिवत्प्रयुक्त इत्यन्यादृशस्य वाचकत्वं नावधार्येत तस्मादीकारान्तः स्यात्। यौगिकत्वे तु प्रागीकाराद्योगो गम्यत इति स्त्रीप्रत्ययोऽयं निमित्ताभावादघृते न प्रयोक्ष्यते, चोदकप्राप्तं तु प्रातिपदिकमात्रं प्रयोक्तव्यम्। न च द्रव्येष्वर्थसमवायाद्विधिशब्दप्रयोगनियमो, यतः प्रोक्षणशब्दबाधेन जातिपक्षवद् घृतमित्येव प्रयोगः स्यात्॥ ११॥ § 2898

इति प्रोक्षण्यधिकरणम्॥ ८॥

## ०.०.२२ निर्मन्थ्याधिकरणम्

निर्मन्थ्येऽपि पूर्वाधिकरणवज्जातिसंस्कारनिमित्तपक्षावुद्भाव्यानन्तरेण यौगिकत्वंसाधनीयम्। § 2900

वैद्युताश्माभिघातोत्थसूर्यकान्तादिजन्मनाम्।
निवृत्तौ चरितार्थः सन् निर्मन्थ्योऽभिनवः कथम्।§ 2902

*'**लोके कर्मार्थलक्षणम्**' इत्यशब्दार्थेनापि व्यवहाराद्भवेदचिरनिर्दग्धघृतप्रतीतिः। सर्वघृतानां च नवनीतविकारत्वात्पुनः श्रुतेरचिरनिर्दग्धनवनीतार्थता स्यात्। इह तु शब्दप्रमाणकेऽन्यक्रियाजनितनिवृत्तमात्रचरितार्थो निर्मन्थ्यशब्दाश्चिरविशेषोपादानासमर्थः कथमचिरनिर्मथितविषयः कल्प्यते। नह्यत्राचिरत्वमपि योगेऽन्तर्गतं, क्रियायोगमात्रनिमित्तत्वात्। तस्मादसदेतत्। नैष दोषः। § 2903

पाकेनाग्नेरुपात्तत्वाद्विशेषणपरा श्रुतिः।
तच्च पाकाङ्गभूतत्वात्तद्देशादौ करिष्यते॥ § 2905

---

५ *] जै० सू० ( ११-१-३ )

यथैव लोहितोष्णीषादिविधिषु विशेष्याणां प्राप्तत्वाद्विशेषणपरत्वमेवमिहापि विशेष्यानुवादेन विशेषणभूता क्रियैव पाकाङ्गत्वेन विधीयते। अङ्गानां च प्रधानेनैकदेशकालकर्तृत्वं वक्ष्यते। तेनाचिरनिर्मथितेनादूरनिर्मथितेनानन्यकर्तृनिर्मथितेनेति वक्तव्ये प्रदर्शनार्थमचिरग्रहणम्॥ १२॥ § 2906

इति निर्मन्थ्याधिकरणम्॥ ९॥

## ०.०.२३ वैश्वदेवाधिकरणम्

346 तद्धितोपात्तत्वान्मत्वर्थम्य न लक्षणा। न चानेकार्थविधिर्येन वाक्यं भिद्येत। न च समस्तेषु कर्मसु तत्प्रख्यानशास्त्रसद्भावः। न् च यथाऽग्निहोत्रे समासोऽनभिव्यक्तस्तथाऽत्र तद्धितः। सर्वत्र ह्येवंरूपा एव देवताविधयो भवन्ति। न च श्येनयागवद्विश्वैर्देवैः कस्यचिद्व्यपदेशः। न च फलपदाश्रवणाद्वाजपेयवद्वैरूप्यं यज्ञेः, शक्यते हि केवलयज्यनुवादेन देवता विधातुमित्यारम्भः। सर्वत्र च नामचिन्तानुसारान्न बर्हिराज्यादिविचारेण व्यवधानम्। अथ वा नामधेयान्यपि यौगिकानि निर्मन्थ्यादिष्वप्राप्तार्थत्वाद्विधिफलानि दृष्टानि वैश्वदेवशब्दोऽपि तथाऽस्त्वित्यनन्तरं संबन्धः। तत्र विकल्प इति गुणविधेः फलेन प्रतिज्ञानम्। एवं हि शङ्क्यते। यद्ययं गुणविधिर्न तर्हि कर्म विधीयते। न चापि दूरस्थमनुवदितुं शक्यते तत्र प्रकृताग्नेयादिकर्मानुवादेनाशक्यं देवताविधानमुत्पत्तिवाक्यशिष्टदेवतान्तरावरोधादत आह—विकल्पस्ताभिः सह भविष्यति। न चाद्यापि सूत्रकारभाष्यकाराभ्यामौत्पत्तिकबलीयस्त्वं क्वचिद्दर्शितमिति तुल्यबलत्वं मन्यते। किं च। § 2908

न समस्तानुवादस्य किंचिदस्ति प्रयोजनम्।
विश्वे देवा न च प्राप्ताः प्रत्येकं संहतेषु वा॥ § 2910

यदि हि गुणं न विदध्यात्ततः समस्तमेव वाक्यमनर्थकं स्यात्। विश्वेदेवसंबन्धश्च न प्रकृतानां प्रत्येकमस्ति, न समुदाये येनानूद्येत। न चाऽऽमिक्षायागस्य केवलस्य यजिना ग्रहणम्। न च वैश्वदेवशब्दस्तद्विषयत्वेनेष्यते। तस्मात्सप्तसु यागेषु गुणविधिः। तत्रैतत्स्यात्। एक एव शब्दः सप्तसु विधिरामिक्षायां चानुवाद इति विप्रतिषिध्येत। तन्न। § 2911

प्रकृतत्वाविशेषेऽपि यत्र प्राप्तिर्न विद्यते।
विधेस्तत्रोपसंहारान्न वैरूप्यं भविष्यति॥ १३॥ § 2913

347 अत्रोच्यते। नायं प्रकृतेषु गुणविधिरुपपद्यते। कथम्। § 2914

३ ते] जै॰ सू॰ ( ११-२-१ ) इत्यत्रेति शेषः।

गुणान्तरावरुद्धत्वान्नावकाश्यो गुणोऽपरः।
विकल्पोऽपि न वैषम्यात्तस्मान्नामैव युज्यते॥ § 2916

अग्न्यादयो ह्युत्पत्तिवाक्ये तद्धितश्रुत्याऽष्टाकपालादीनां देवता, विश्वेदेवा वाक्येन। नन्वत्राप्यष्टाकपालादिसंबन्धाद्वाक्यमेव। न। तद्धितेन द्रव्यविशेषस्य कृते देवतासंबन्धे वाक्येन विशेषणविशेष्यभावमात्रकरणात्। वैश्वदेवशब्देऽपि तथेति चेत्। न। यागलक्षितद्रव्यसंबन्धकल्पनाविप्रकर्षात्। न तावद्वैश्वदेवेनेति प्रकृतमप्रकृतं वा द्रव्यं देवतासंबन्धि श्रूयते। तत्र यजेतेति सामानाधिकरण्यादेवं तावद्विज्ञायते वैश्वदेवेन यागेनेति। ततश्चान्यथा यागसंबन्धानुपपत्त्या तत्साधनं द्रव्यं लक्षणया देवता स्कन्दति। वाक्येन च यागमात्रसंबन्धे सति प्रकरणादिदं कल्पनीयं तेनैवाऽऽग्नेयादिना यागेन वैश्वदेवेन यजेत नान्येनेति। न त्वग्न्यादिविधौ काचिल्लक्षणापेक्षा प्रकरणापेक्षा वेति वैषम्यम्। **नहि प्रकरणं द्रव्यस्येति**। यदा द्रव्यस्याग्न्यादिसंबन्धो विधीयते न तदा प्रकरणापेक्षेत्यर्थः। अथ वा यद्द्रव्यस्य प्रकरणं न तद्वैश्वदेववाक्येनाऽऽश्रितम्। भाष्ये तु द्रव्यशब्दो वस्तुवाची। न हि श्रौतस्याग्न्यादिद्रव्यस्य देवताभूतस्य प्रकरणं बाधकं, वैयधिकरण्यं वा, द्रव्यस्य यत्संबन्धित्वेन श्रुतमग्न्यादि तस्य प्रकरणं न बाधकमिति। प्रकृतयज्ञिबुद्धेश्च न दूरस्थानुवादेन गुणविधिर्विशिष्टापूर्वकर्मविधानं वा। विप्रकीर्णयागैकीकरणाच्च समुदायानुवादोऽर्थवान्। न हि 'वसन्ते वैश्वदेवेन' 'प्राचीनप्रवणे वैश्वदेवेन' इत्यादि विधानं परस्परसहितानामष्टानां हविषां समुदायपदादृतेऽवकल्पते। तस्मादेकदेशस्थैरपि विश्वैर्देवैरुपलक्षितानां छत्रिन्यायेन तत्प्रख्यतयैव सर्वेषां नामधेयम्॥ १४॥ § 2917

वैश्वदेवमुपादाय देवता नोपदिश्यते।
सह विध्यनुवादौ हि नैकः शब्दः समश्नुते॥ § 2919

अथ वा यदुक्तं निर्मन्थ्यादिवन्नामैव सद्गुणमपि विधास्यतीति। त- 348
त्राभिधीयते। मिथश्च नामगुणविध्यर्थयोरसंबन्धः। निर्मन्थ्यस्तु गुणविधिरिति॥ १५॥ § 2920

पूर्वेणैकसूत्रमपि संभवति। मिथः सह प्रदाने क्रियमाणे त्रिंशत्संपत्त्यभावादनर्थसंबन्धः स्यात्। कुतः। § 2921

हविषो गुणभूतत्वान्न कर्मावृत्तिहेतुता।
देवतैक्यात्सह त्यागो लाघवाद्धि प्रसज्यते॥ § 2923

तेन सकृत्त्यागः कर्तव्य इति सत्यां सहप्रदानशक्तौ नाऽऽवृत्तिर्युक्ता। संप्रतिपन्नदेवतात्वाच्च सहप्रदानमविरुद्धं शक्यं कर्तुं ततश्च त्रिंशत्त्वविरोधः। त्रिंशत्पूरणं च केषांचिदेवं, नव प्रयाजाः, नवानुयाजाः, द्वावाघारौ, द्वावाज्य-

भागौ, अष्टौ प्रधानाहुतय इति। अपरेषां तु स्विष्टकृद्वाजिनेज्याग्रहणादाघारौ न गणितौ। सर्वथा तु प्रधानाहुतिभेददर्शनसिद्धिः॥ १६॥ § 2924

इति वैश्वदेवाधिकरणम्॥ १०॥

## ०.०.२४ वैश्वानरेष्ट्यधिकरणम्

गुणविधिनामधेयविचारे पर्यवसितेऽधुना केवलगुणविधित्वमेवास्ति न वेति विचार्यते। अथ वाऽष्टाकपालत्वस्य वैश्वानरसामानाधिकरण्याद्द्वादशत्वान्तर्गतेस्तत्प्रख्यत्वेन नामधेयत्वमाशङ्क्य गुणविधिः प्रसिद्ध्यादिभिः प्रकृतयजिबुद्धेस्तत्प्रख्यत्वाभावाच्च समर्थनीयस्तमपि निराकृत्यार्थवादता पूर्वसिद्धैवोपसंहरिष्यते। तत्र पूर्ववतां विधानेनार्थवत्त्वमपूर्वाणां नामधेयत्वावधारणात् 'यदुत्पत्तावपूर्वम्'* इति। तस्माद्गुणविधयोऽष्टत्वादयइति केचित्। तदयुक्तम्। न ह्यपूर्वत्वान्नामधेयत्वं सिद्धम्। अपूत्वाद्धि यथैव लौकिकार्थापरिज्ञानान्न गुणविधित्वमेवं वैदिककर्माभिधायित्वं सुतरामप्रसिद्धामिति नामधेयत्वमपि न स्यात्। सत्येव च सर्वत्र लौकिकेऽर्थे समभिव्याहारादिभिर्नामधेयतोक्ता। तस्माद्यथाभाष्यमेव सूत्रार्थः। § 2926

349

पूर्वज्ञातार्थवाचित्वे नामधेयार्थवादते।
अप्राप्तत्वादिहैते स्युर्वैश्वदेवविकल्पवत्॥ § 2928

यदि हि वैश्वानरयागेऽष्टत्वादयः कुतश्चित्प्राप्ता भवेयुस्ततः संवादद्वारेण नामधेयत्वमर्थवादता वा स्यान्न तु प्राप्तिरस्ति केवलद्वादशत्वविधानात्। तथा हि। § 2929

यद्यप्यर्थात्मनाऽस्त्येव महासंख्यास्ववान्तरा।
अपरिच्छेदकत्वात्तु नासौ कर्मविशेषणम्॥ § 2931

न हि सत्तामात्रेण संख्या व्याप्रियते किं तर्हि संख्येयपरिच्छेदेन। द्वादशत्वेन च कपालेषु परिच्छिद्यमानेषु नाष्टत्वादीनां परिच्छेदकत्वमित्यविद्यमानता। यद्यपि च यथाकथंचिदस्तित्वमाश्रीयते तथाऽप्येतावन्मात्रं भवेदष्टौ भवन्तीति न तु यदष्टाकपाल इति। संस्कृततद्धितो ह्येषः, तद्धितार्थनिमित्तश्च समासस्तौ च सति समार्थ्ये भवतः। सामर्थ्यं चान्यनिरपेक्षत्वे भवति। सापेक्षाश्च द्वादशत्वेनाष्टत्वादय इति न द्वादशकपालोऽष्टाकपालादिशब्दाभिधानीयकं लभते। तेन स्वरूपसंकीर्तनस्यासत्त्वात्प्ररोचनमसंबद्धतरमापद्येत। न च द्वादशत्वविलक्षणोऽष्टत्वादेः कर्मोपयोगः संभवति,

६ *] जै° सू° ( १-४-१ )।

संख्यात्वात्। यद्यपि चाष्टत्वस्तुत्या द्वादशत्वं स्तूयते न त्वष्टाकपालस्तुत्या द्वादशकपालस्य स्तुतिः। विशेषणविशेष्ययोरत्यन्तभेदात्। अपि चास्त्येव द्वादशत्वस्याऽऽत्मीया स्तुतिः ‘जगत्यैवास्मिन्’ इति। तस्माद्द्वादशत्वेन सह विकल्पमाना गुणविधय एवैतेऽपि। सर्वं चेदं वैकल्पिकानेकसंख्याविशिष्टवैश्वानरविधानादेकमेवोत्पत्तिवाक्यमिति न बलाबले विशेषः। तस्मात्**सामर्थ्यमिति** 350
च पूर्वप्रकृतयोग्यापेक्षत्वाद्वैश्वदेवपूर्वपक्षातिदेशः। तदीयं हि सामर्थ्यमस्मिन्समाम्नायेऽस्ति, न च तदुक्तः परिहारः। तस्माद्विधानार्था इति॥ १७॥ § 2932

प्रकृताप्रकृते षागे तथा द्रव्येऽपि वा गुणः।
द्रव्यं गुणवदेवं च न कथंचिद्विधीयते॥ § 2934

प्रकृते तावद्द्वादशत्वावरोधान्नाष्टत्वादयो विधीयन्ते। न च दूरस्थे, तदुपादानशब्दाभावात्। न च कर्मान्तरं केवलाष्टत्वादिगुणकं संभवति। द्रव्यदेवतासंयोगप्रत्यक्षयागाश्रवणात्। एतेन पुरोडाशे संख्याविधिस्त्रेधाऽपि प्रत्युक्तः। तथाऽष्टाकपालादिपुरोडाशविधानम्। न हि द्वादशकपालपुराडाशावरुद्धो यागः पुरोडाशान्तरं गृह्णाति। नाप्यननूदिते कर्मणि स्वशब्देनाप्रकृते पुरोडाशविधानं फलतत्साधनासंबद्धं क्वचिदुपयुज्यते। नाप्यव्यापारात्मकत्वाद्द्रव्यं विधातुं शक्यते। अत एव विश्वजिदादिवदपि नाध्याहारेण फलं कल्प्यते। § 2935

वैश्वानरपदं नापि यागायान्नानुषज्यते।
विभक्त्यन्तरयोगित्वान्न चर्तेऽस्मादनर्थकम्॥ § 2937

स्यादेतत्। वैश्वानरपदानुषङ्गादष्टाकपालादिद्रव्यदेवतासंबन्धविधेर्यागान्तरसिद्धिरिति। तन्नास्ति। प्रथमान्तेषु द्वितीयान्ताननुषङ्गात्। न च विभक्तिविपरिणामः। अन्यथाऽप्युपपद्यमानत्वात्। यदि ह्यनुषङ्गविपरिणामावन्तरेणाष्टत्वादिश्रवणमनर्थकं स्यात्ततः किं वा न क्रियेत, तत्तु स्तुत्यर्थत्वेनोपपन्नतरत्वान्नानर्थकम्। तदा चानुवादत्वाद्विपरिणतविभक्तिसंबन्धेऽप्यदोषः। तस्मान्न पुरोडाशविधानम्। न च द्वादशकपालेऽष्टाकपालादयः पुरोडाशाः स्वात्मभिर्विभक्ता विद्यन्ते। अष्टत्वादिमात्रविशेषदर्शनात्। ते चाष्टत्वादयो न यागे नापि पुरोडाशे विधीयन्त इत्युक्तम्। न चाष्टत्वादीनां द्वादशकपालेनैकवाक्यता तवोपपद्यते। नानाविधेयप्रयोजनवशेनार्थैकत्वाभावात्। न च नानाविधानां विभज्यमानानां साकाङ्क्षत्वं विद्यते। यदि चैकं वाक्यं भवेत्ततः सर्व- 351
विशिष्टैकभावनाविधानान्न विकल्पः स्यात्। अष्टत्वादीनां च गुणत्वान्न प्रत्येकं वाक्यपरिसमाप्त्या पृथगनुष्ठानोपपत्तिः। न च संख्यानां समुच्चयः संभवति। संख्यान्तरोपजननेन सर्वभावप्रसङ्गात्। संख्यान्तरानुपजननसमुच्चयस्तु द्वादशत्वेऽष्टत्वाद्यन्तर्भावात्। तथाभूतानां च द्वादशत्वविधिनैव प्राप्तेरनुवादत्वापत्तिः। तेनैतैर्भिन्नैर्वाक्यैः स्वतन्त्रा विधीयन्त इत्यवश्यं भवताऽभ्युपगन्तव्यम्। ततश्च द्वादशत्वमुत्पत्तिवाक्यशिष्टमितराणि तु वाक्यान्तरैः प्रकरणापेक्षैर्दुर्बलानि सन्ति

न संबन्ध्यन्ते। एवं तावद्वैश्वानरयागो बलवत्तरगुणावरोधान्नाष्टत्वादीन्प्रतीच्छति। अपि चाष्टत्वादयोऽपि नैवातिसोढास्तेऽपि हि पुरोडाशेनैकवाक्यभूतत्वान्नैव वैश्वानरयागस्य प्राप्नुवन्ति। तत्प्रकरणं बाधित्वा न तस्य भविष्यन्ति। तथा चातद्गुणाः केवलपुरोडाशसंबन्धे प्रयोगे स्युरनर्थकाः। **न हि तं**—पुरोडाशं प्रत्यर्थवत्ताऽस्ति। अथ वा कथमतद्गुणा इत्यत आह—**न हि तं**—यागमन्यावरुद्धं प्रत्यर्थवत्ताऽस्तीति॥ १८॥ § 2938

अष्टत्वाद्यविधानत्वाद्वयर्थ्येयं तत्प्ररोचना॥ १९॥ § 2939

तस्मादवयवद्वारं द्वादशत्वं प्ररोच्यते॥ § 2940

यद्विधेयमवधार्यते तदेव स्तोतव्यं द्वादशत्वं चात्र विधेयं तस्माद्यथाकथंचित्तदेव स्तोतव्यम्। तत्सामीप्याच्च शक्नुवन्त्यष्टादिशब्दास्तदेकदेशप्रतीतिं कर्तुम्। एकदेशस्तुतिद्वारेण चैकदेशी स्तुतो भवति। तेनैतदुक्तं भवति, ईदृशोऽयं द्वादशकपालो महाभागो यस्मिन् क्रियमाणेऽष्टाकपालादयोऽपि संभाविता भवन्ति ते चाष्टत्वादयो ब्रह्मवर्चसादिसिद्धिप्रशस्तास्तस्मात्प्रशस्तोऽयमिति। यत्त्वस्त्येव द्वादशत्वस्यान्या स्तुतिरिति। नैष दोषः। कुतः। § 2941

स्तुतेरपरिमाणत्वाद्यावती हि प्रतीयते।
तां सर्वामेकरूप्येण विध्युद्देशः प्रतीच्छति॥ § 2943

352 सर्वत्र ह्यल्पैर्बहुभिर्वाऽक्षरैः स्तुतयो दृश्यन्ते, श्रोतृप्रकारानेकत्वाच्च क्वचित्काश्चिदर्थवत्यो भवन्ति। यथैव केषांचिद्विध्युद्देशमात्रेण प्रवृत्तौ सिध्यन्त्यामन्यार्था स्तुतिराश्रीयते तथैवाल्पस्तुत्युपपन्नेऽपि कार्ये महास्तुत्याश्रयणमिति॥ २०॥ § 2944

जनकत्वेन पूतादेरष्टत्वादीनि कारणम्।
तेषां कारयितृत्वाद्वा पूतादेः कारणभिधा॥ § 2946

यदुक्तं द्वादशत्वावरोधादनर्थकमष्टत्वादिविधानं स्तवनं चेति। तन्नानर्थकम्। नित्यं हि द्वादशकपालता। यस्तु गुणफलानि ब्रह्मवर्चसादीनि प्रार्थयते तस्याष्टत्वादीनि द्वादशत्वोपमर्देन निवेक्ष्यन्ते। तथा हि— § 2947

पुरुषार्थसमासत्तेः काम्यं नित्यस्य बाधकम्।
विशेषतश्च सामान्ये पूर्वप्राप्ते प्रवर्तनात्॥ § 2949

पुरुषार्थसिद्ध्यर्थो हि सर्वः प्रयास इति तत्प्रत्यासन्नं वस्तु बलीयो भवति। दूरे च द्वादशत्वं पुरुषार्थस्य तत्साधनयागद्रव्यसंस्कारार्थकपालपरिच्छेदात्। अष्टत्वादयस्तु तदाश्रिताः सन्तः साक्षाद् ब्रह्मवर्चसादि साधयन्तीति प्रत्यासत्तेर्बलीयांसो भवन्ति। तस्मादर्थवन्त इति। ननु च— § 2950

ब्रह्मवर्चसयोगादि फलत्वेन यदीष्यते।
स्तुत्यभावाद्विधिः केन वर्तमानापदेशिनाम्॥§ 2952

तत्र केचिदाहुः।औदुम्बराधिकरणपूर्वपक्षन्यायेनात्र प्रत्यवस्थानमिति। तन्न युक्तम्। तत्रैव दत्तोत्तरत्वात्। अतोऽयमभिप्रायः। 'पूत एव स तेजस्वी' इत्यादिना फलमुच्यते। 'गायत्र्यैवैनम्' इत्यादिस्तुतेः प्रात्यात्मिको विधिः। 'यदष्टाकपाल' इत्यादिभिः सार्थवादकैः प्रत्येकं विहितानां यथासंख्येन पूत एवेत्यादिभिः फलसंबन्धः क्रियते॥ २१॥ § 2953

वाक्यानि यावदर्थं स्युर्गुणेभ्यः फलकल्पने। 353
एकोपक्रमसंहारादेकं चेदं प्रतीयते॥§ 2955

पुत्रे जाते द्वादशकपालमिति यदेवोपक्रान्तं तदेवाष्टत्वादीनामन्ते 'यद्द्वादशकपालो भवति' इति 'यस्मिञ् जात एताम्' इति चोपसंह्रियमाणं पश्यामः। तावति च नाष्टत्वादयः पृथग् भवितुं लभन्ते तदेकवाक्यता च न स्तुत्या विनोपपद्यते। अर्थान्तरपरतायामानर्थक्यात्। यदि हि कर्तृसंबन्धीन्येतानि भवेयुस्ततस्तस्य कारणानि प्रयोजकानि स्युः। वैश्वानरसंबन्धीनि त्वेतानि। तस्माद्गुणार्थोऽन्यासंभवादिति स्तुत्यर्थो विधीयते। पूत एव स इत्येवमादीनां च तच्छब्दयुक्तानां यस्मिञ् जात इत्यनेनापेक्षितत्वान्न पूर्वैः सह फलत्वेन संबन्धः। न चात्रानुपयोगो येन बलादाच्छिद्य नीयेरन्। न चाष्टत्वादिब्रह्मवर्चसादीनामेभिर्विभागेन संबन्धः। यत्र तु विभागो 'गायत्र्यैवैनम्' इत्यादौ तत्र स्तुतित्वमभ्युपगतमेव। अतो या नाम पूत इत्येवमादीनां फलकल्पना सा यागमेव प्रति नाष्टत्वादीन्। प्रथमोपनिपाते तु यागस्यापि स्तुतिरेव। एवं कामकाररहितत्वेन फलविध्यसरूपत्वात्। एतैरेव स्तूयमाने यदष्टाकपाल इत्यादीनामुपपत्त्यर्थता। तस्मान्न गुणविधय इति सिद्धम्॥ २२॥ § 2956 354

इति वैश्वानरेष्ट्यधिकरणम्॥ ११॥

## ०.०.२५ तत्सिद्धिपेटिका

**तत्सिद्धिः**। अर्थवादप्रसङ्गात्तदुपकारिगुणवादाविधितल्लक्षणं तत्र नोक्तमिदानीमभिधीयते। ननु च तत्रैव 'रूपात्प्रायाद्'* 'दूरभूयस्त्वात्'* इति निमित्तं कथितम्। सत्यं कथितम्, न तु लक्षणत्वेन। कथं तर्हि, इह सिद्धं तत्रोदाहृतार्थवादलक्ष्यविषयव्यवहारार्थं नीतम्। अत्र तु सर्वगौणवृत्तीनां लक्षणमुच्यते। ननु च सहचरणस्थानादीन्यन्यान्यप्यक्षपादप्र-

२ *] तत्सिद्धीत्यारभ्य, इति गुणाश्रया इत्यन्तस्यैकसूत्रत्वेऽपि भाष्ये प्रत्येकं प्रथमान्तसूत्रोपन्यासो व्याख्यासौकर्यार्थ इति न विरुध्यते।
२ *] जै॰ सू॰ (१-२-१)

भृतिभिर्गौणनिमित्तान्युक्तानि। लोके च दृश्यते यष्टीः प्रवेशय, मञ्चाः क्रोशन्ति, अश्वसहस्रेणामुको राजा जित इति। तान्युपसंहर्तव्यानि। लिङ्गसमवायेनैवोपसंहृतानीति के चित्। छत्रिसमवेतेतरप्रत्ययवद्धि यष्टिसहचरितादिप्रत्ययो भवति। अथ वा गौण्या वृत्तेरिह निमित्तमभिधीयते न लक्षणायाः। किं चानयोर्भेदोऽप्यस्ति। बाढमस्ति। कुतः— § 2958

अभिधेयाविनाभूते प्रवृत्तिर्लक्षणेष्यते।
लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता॥ § 2960

तत्र यथैवाऽऽकृतिवचनः शब्दस्तत्सहचरितां व्यक्तिं लक्षयति तथैव यष्टिमञ्चाश्वादयस्तत्संबद्धपुरुषलक्षणार्था भवन्ति। अग्निर्माणवक इति तु नाग्नित्वाविनाभावेन माणवकः प्रतीयते। किं तर्हि— § 2961

वह्नित्वलक्षितादर्थाद्यत्पैङ्गल्यादि गम्यते।
तेन माणवके बुद्धिः सादृश्यादुपजायते॥ § 2963

सर्वत्र च तत्सिद्धिकरादावियमेव प्रस्तरप्रभृतौ यजमानादिशब्दानां वृ-
त्तिरिति त उदाहृताः। अत्रापि च सामानाधिकरण्यादेकतरस्य नामधेय-
त्वं, निमित्ताभावादनेकशक्तिकल्पनाभयाच्च तदनुपपत्त्या कार्यलक्षणाद्वारं प्र-
योजनवत्तरत्वेन गुणविधित्वं, अशक्तेर्वा तदसंभवादर्थवादत्वमिति त्रय एव
355 पक्षाः। तत्र गुणविधिवादी मन्यते। न काचित्प्रस्तरयजमानयोरितरेतरसम-
भिव्याहारेण स्तुतिः प्रतीयते। न च स्तोतुमपि परशब्दः परत्र वर्तते। न च
प्रवृत्तिनिमित्तमस्ति। न च प्रवृत्तस्य प्रयोजनमन्यत्कार्यलक्षणातः। तस्मात्
'यो होता सोऽध्वर्युः' इत्यादिवदन्यतरः कार्यलक्षणार्थः। तत्रापि 'मुख्यं वा
पूर्वचोदनात्'* इति यजमानशब्दः स्वार्थवृत्तः प्रस्तरशब्दः स्रुग्धारणादिकार्य-
लक्षणार्थ इति गुणविधिः। अत्रोच्यते— § 2964

न तावत्कार्ययोगित्वमेकस्याप्युपपद्यते।
विरोधाद्यजमानस्य प्रस्तरादेरचोदना॥ § 2966

एककपालवत् 'सूत्रवाकेन प्रस्तरं प्रहरति' इति यजमाने प्र-
ह्रियमाणे सर्वतन्त्रविलोपप्रसङ्गः। तस्मादेकवाक्यगतोत्तरसादनसर्वहोम-
356 विधिस्तुत्यर्थः संवादः। कथं पुनः परशब्दस्य परत्र सामानाधिकरण्य-
म्। *किमाकारा वा स्तुतिरिति। यजमानो हि सर्वाभ्यर्हितस्तदंशत्वाद्ब-
र्हिष उपरि प्रस्तरः सादयितव्यः। स्वर्गत्वेन संस्तुते चाऽऽहवनीये सकलो
यजमान आरोपितो भवत्येककपालेनाखण्डितेनेति स्तुतिः। गुणाच्च शब्द-
वृत्तिः। **कथमगुणवचन इति**—वाचकत्वमभ्युपेतं मन्वानस्य प्रश्नः। सिद्धान्त-

२१ *] जै० सू० (१२-२-८)
२८ *] किमर्थं चेति प्रश्नोत्तरभाष्यं विध्यर्थवादचिन्तोपक्रमेण संवादस्य स्तुत्यर्थत्वावसायादयुक्तमिव मत्वा स्तुतिप्रकारप्रश्नविषयतया व्याचष्टे—किमाकारेत्यादिना।

स्तु, *अजहत्स्वार्थाः सर्वाः शब्दप्रवृत्तयः पूर्वशक्त्यनुसारसंभवे शक्त्यन्तरकल्पने प्रमाणाभावात्। संभविष्यति चात्र सिंहत्वावगतव्यक्त्युपस्थापितप्रसह्यकारित्वाद्यनेकधर्मप्रत्ययाद्देवदत्तप्रत्यय इति पूर्वैव शक्तिर्निमित्तमिति न संशयहेतुत्वेन व्यवहारोच्छेदकारणं प्रसिद्धहानाप्रसिद्धकल्पनमाश्रयणीयम्। *अन्येषां तु दर्शनं सर्व एव हि सिंहादिशब्दा जातिगुणक्रियासमुदायवाचिनः समस्तार्थासंभवे देवदत्तादिषु कतिपयगुणक्रियायोगादुपचर्यन्त इति। तत्राभिधीयते— § 2967

समुदायार्थवाचित्वे नैकदेशे भवेद्गतिः।
शतशब्दान्न पञ्चाशन्मुख्यरूपेण गम्यते॥ § 2969

भवति तु जातिमात्रे दृष्टे सर्वक्रियागुणप्रत्ययस्तमयेऽपि प्रयोगः। प्रत्ययश्च मुख्यात्म नैव न देवदत्तादिष्विव सिंहशब्दादुपचरितः। सामान्यवाचिता चाऽऽकृत्यधिकरणसिद्धा बाध्यते। क्रियागुणानां चाऽऽनन्त्यान्न शक्यः प्र- 357
तिव्यक्ति संबन्धोऽनुभवितुम्। § 2970

एकस्यामेव च व्यक्तौ बाल्यादिषु गुणक्रियाः।
अन्याश्चान्याश्च शक्यन्ते नाभिधातुमसंगतेः॥ § 2972

न चासामान्यात् सामान्यं शक्यते कल्पयितुं जात्यन्तरेऽपि क्वचित्कासांचित्सद्भावात्। § 2973

तत्र सिंहत्वमेवाऽऽसां व्यवच्छेदकरं भवेत्।
तच्चानभिहितं नैवमुक्तं चेन्नान्यवाचिता॥ § 2975

न ह्यनभिहितं सिंहत्वं गुणक्रियाणां व्यवच्छेदकरं भवति। अप्रतीतेः। अभिहितं चेत्तु प्रत्ययादेवाशेषगुणक्रियावगमादभिधानशक्त्यनवसाय इति समुदायवाचिनामेकदेशेषु न गौणत्वसंभवः। *कश्चित्पुनराह-समारोपिततद्भावो गौण इति। तस्यैतन्मतम्। न कथंचन परशब्दस्तया जात्या स्वनिबन्धनभूतया विनाऽत्यन्तानभिधेयक्रियागुणमात्रद्वारेणान्यत्र वर्तितुमर्हति। न च सिंहशब्देनाप्रवर्तमानेन सिंहो देवदत्त इति सामानाधिकरण्यप्रयोगो घटते। कथं तर्हि— § 2976

अर्थेष्वर्थान्तरात्मानमध्यारोप्योपपादितम्।

---

१ *] अजहत्स्वार्था हति° न जहाति शब्दः स्वमर्थं यासु वृत्तिष्विति विग्रहः। इदं च 'सर्व एवैते गौणाः' इत्यादिभाष्यस्य, प्रसिद्धार्थपरित्यागेनाप्रसिद्धगुणवाचित्वरूपपरोक्तगौणीलक्षणनिराकरणपरस्य व्याख्यानार्थं वेदितव्यम्।
५ *] यदपरं, समुदायवाचिनः पदस्य लक्षणयैकदेशवृत्तित्वरूपपरोक्तलक्षणदूषणार्थं, 'न च सर्वे गुणसमुदायवचनः' इति भाष्यं तद्व्याख्यांतुमारभते—अन्येषां त्वित्यादिना।
२२ *] अध्यारोपितार्थवृत्तित्वरूपपरोक्तलक्षणदूषणार्थमन्यद्भाष्यं, 'नचासति सिंह' इति, तद्व्याख्यास्यति—कश्चित्पुनरित्यादिना।

वाच्यमासाद्य शब्दानां स्वयमेव प्रवर्तनम्॥§ 2978

सिंहादिसदृशक्रियागुणदर्शनेन हि देवदत्तादयः सामस्त्यपरिकल्पनया सारूप्यमापद्यन्ते। ततश्च स्वार्थ एव शब्दः प्रयुज्यते। न चैतावता मुख्यप्रसङ्गोऽर्थस्य, अध्यारोपितत्वात्। यत्र तु स एवार्थो न समारोप्यते तत्र मुख्य इत्यदोषः। तत्रेदमुच्यते। नैतत्, कल्पनाया अशक्यत्वात्। तथा हि—
§ 2979

असंकीर्णस्वभावं सद्वस्तुवस्त्वंन्तरात्मना।
आरोप्यतेऽभिधानार्थं कथं न भ्रान्तिवर्जितैः॥§ 2981

358 यदा तावद्भ्रान्त्या मृगतृष्णायां तोयमध्यारोप्य शब्दं प्रयुङ्क्ते, तदोभयोर्मुख्यार्थाध्यवसानरूपेणे तोयप्रतीतेर्भ्रान्तिमुख्यत्वम्। अथापि वक्ता विवेकी सन्नितरवञ्चनार्थं प्रयुङ्क्ते, श्रोता च न विविङ्क्ते, तदाऽप्येकस्य विवेकेनाध्यारोपाभावादितरस्यान्त्याध्यवसानान्नैकमपि प्रति गौणत्वोपपत्तिः। यदा तु द्वावप्यभ्रान्तौ तदोभयोः सादृश्यादिनिमित्तान्तर्णीतवत्यर्थाध्यवसानादारोपाभावः। तथा हि— § 2982

द्वावपि प्रतिपद्येते सिंहपुंसोर्विविक्तताम्।
नाध्यारोपयितुं शक्तिस्तेनैकस्यापि विद्यते॥§ 2984

यथैव ह्यसदृशानामर्थानां तिक्तमधुरादीनां न कथंचिदपि प्रतीत्यभावात्परम्पराध्यारोपणमेवं सदृशानामपि विवेकज्ञानं नोपपद्यते। न ह्यर्थाध्यवसानादन्यादृशं नाम ज्ञानं व्यवहाराङ्गं भवतीति। किं च— § 2985

शब्द एव यदा तावदनिमित्तो न वर्तते।
बुद्धिदुर्ललिता तत्र भवेन्निर्विषया कथम्॥§ 2987

न चार्थरहिता बुद्धिरात्माकारमात्रमनुभवन्ती जायत इत्युक्तं शून्यवादे। अपि च— § 2988

पूर्वानुभूत एवार्थः स्मर्यते प्रथमं पदात्।
तेन मुख्ये प्रतीतेऽर्थे क्वाध्यारोपो भविष्यति॥§ 2990

सर्वथा तावदयं गौणमुख्यविभागः श्रोतॄणामर्थविशेषावधारणे व्याप्रियते। ते च पदवेलायामनध्यारोपितस्वार्थवृत्त्येव सिंहादिपदमध्यवसाय देवदत्तादिपदसामानाधिकरण्यान्यथानुपपत्त्या गौणतां कल्पयन्ति। तत्र चैषां स्वयमनारोप्यैव सिंहत्वं तत्सादृश्यादिप्रतीतिर्भवति। सा च किं शब्दादथार्थादित्यन्विच्छतामन्वयव्यतिरेकाभ्यामाकृत्यधिकरणन्यायेनार्थादिति निश्चयो जायते। कथम्— § 2991

२२ वादे] (अ॰ १ पा॰ १ सू॰ ४) अत्रत्यवृत्तिकारमतानुवादे भाष्य इति शेषः।

सिंहशब्दे ह्यनुक्तेऽपि सिंहार्थात्सदृशे मतिः।
जायते न त्वबुद्धेऽर्थे सिंहशब्दे श्रुतेऽपि नः॥§ 2993

यदा च श्रोतृणां स्वयमध्यारोपाभावस्तदा वक्तर्यपि नैवैषामेवं कल्पना भवति, यथा नूनमनेन सिंहत्वमध्यारोपितमिति। कथं तर्हि सिंहत्वाविनाभूतानेकक्रियागुणसमुदायोऽनेन विवक्षितः, यत्वगौरवभयान्न स्वैरभिधानैर्ब्रवीति। न चास्य समस्तस्य किं चिदेकं वाचकं पदमस्ति तेनाविनाभावितया कथं नु सिंहत्वात्तत्प्रतीतिर्भवेदिति तत्तावदभिधीयते। यतः स्थितया शब्दशक्त्या पुंसां व्यवहारो न तद्वशेन शक्त्यन्तरोपजन इति। किंच— § 2994

यद्यध्यासेन वक्तृणां गौणी वृत्तिः प्रकल्पते।
वेदे सा न कथंचित्स्यादध्यारोपयितुर्विना॥§ 2996

*तस्माद्गुणप्रवृत्तिप्रयोजनो गौण इत्येव लक्षणं न्याय्यं नान्यथा। न- 359
न्वेवं सति खपु- ष्पादीनां स्वार्थाविनाभूतगुणाभावाद्गौणप्रयोगाभावप्रसङ्गः, सांख्यादिकल्पितप्रधानादिनिषेधे च बौद्धादेर्विनाऽध्यारोपेण प्रयोगासंभवोऽनभ्युपगते हि प्रतिषेधानर्थक्यमभ्युपगते तद्विरोधः स्यादध्यारोपितनिषेधे त्वदोष इति। अत्राभिधीयते। तवैवायं दोषः। कुतः— § 2997

अध्यस्यते खपुष्पत्वमसत्कथमवस्तुनि।
प्रज्ञातगुणसत्ताकमध्यारोप्येत वा न वा॥§ 2999

यत्तावत्खपुष्पस्थानीय आत्मा, खपुष्पं भवत्सिद्धान्त इत्यादिप्रयोगः। तत्र कतरत्खपुष्पमन्यत्त्वया सिंहत्ववदवधारितं यदध्यारोप्येत। तेन खपुष्पस्वरूपमेव तावदध्यारोपात्मकमभ्युपगन्तव्यं न चैतस्य लोके गौणत्वप्रतीतिर्मुख्यार्थान्तराभावात्। प्रथमप्रतीतत्वाद्धि खपुष्पादिस्वरूपं न मुख्यत्वादपैति। कथमसतो मुख्यत्वमिति चेत्, तुल्यमिदं गौणत्वेऽपि। यत्र त्वध्यारोप्यते स गौणः, न योऽध्यारोप्यते। खपुष्पं वाऽऽरोप्यमाणं विषयान्तराभावात्स्वयमेवाध्यारोप्यते वा। तत्रैतत्स्यात्। विद्यमानघटादिरूपं तत्राध्यारोप्यते न गौणत्वमिति। तदयुक्तं, खपुष्पादौ सद्रूपप्रत्ययानुत्पादात्। अवश्यं हि यादृक्संबन्धकालेऽर्थोऽनुभूतस्तादृगुत्तरकालं ग्रहीतव्यम्। न च शशविषाणाद्यर्थः सद्रुपेणानुभूतपूर्वः, न चार्थान्तरसद्रूपग्रहणेन खपुष्पादेः

१२ *] परपरिकल्पितानां गौणीवृत्तिलक्षणानां वेदाप्रामाण्याप्रतिपादकत्वेऽपि नास्मदभिमतस्येति निष्कृष्टं लक्षणमाह—तस्मादित्यादिना। तस्मात्—गुणयोगनिमित्तायाः शब्दप्रवृत्तेर्गौणत्वेनेष्टत्वात्। गुणानां स्वशक्यसिंहादिवृत्तिधर्माणां, देवदत्तादिरूपार्थान्तरे, प्रवृत्तिः—योगः, प्रयोजनं—शब्दप्रवृत्तौ निमित्तं यस्य शब्दस्य स गौण इत्यर्थः। तत्त्वं तु, स्वसमानजातीयधर्मवत्त्वाध्यारोपितत्वान्यतरसंबन्धेन स्वंशक्यवृत्तिधर्मवत्त्वं गौणीलक्षणं विज्ञेयम्।

संबन्धो गृह्यते ययोस्तदवयवयोरर्थसंबन्धोऽनुभूतस्तयोर्नैव गौणत्वं मुख्यात्मनाऽवबोधात्। कथं तर्हि शशविषाणं नास्तीत्युच्यते यदि तत्सद्रूपेण न प्रतीतपूर्वम्। सद्रूप्रतीतस्य वा कथमत्यन्तप्रतिषेधोपपत्तिः। पश्य— § 3000

अन्यत्र ज्ञातसद्भावः पदार्थोऽन्यत्र वार्यते।
न त्वेकत्रैव सद्रूपमसद्रूपं च गम्यते॥ § 3002

तेनैवाध्यारोप्यत इति चेत्, न। अध्यारोप्यस्याप्येवमेव प्रदेशान्तरसद्भावाधीनत्वात्। न चान्यसद्भावेनान्यस्याध्यारोपः सिध्यति, असंबन्धात्। कथमूषरसद्भावेन तोयरूपाध्यारोप इति चेत्। प्रदेशान्तरे तोयसद्भावप्रतीतेर्वैषम्यम्। कथं तर्हि शशविषाणं नास्तीति प्रयोगः। पूर्वेणैवाभावेऽवगते नास्तिश-
360 ब्दोऽनुवादक इति केचित्। अथ वा सामान्येन प्रागभावादिषु नास्तिशब्दः प्रवर्तमानः शशविषाणशब्देन विशेष्यते न शशविषाणमव्यभिचारात्तेनेत्यदोषः। अथ वा येनावयवार्थौ गृहीतौ समासाच्च राजपुरुषादिवत्सामान्यतो दृष्टेन षष्ठ्यर्थस्मृतिः प्रसक्ता, न च कदाचिच्छशः शृङ्गरहितत्वेनावधारितपूर्वस्तस्यैतत्संसर्गानुसंधानं वार्यते। अथ वा विनैव समासेन शशमधिकरणत्वेन निर्दिश्य विषाणं च गवादिगतं विनैध्यारोपेणानयोः संबन्धो नास्तीति कथिते तेनैवानूभूतसंबन्धस्य शशविषाणशब्दस्तमेवाभावं गमयिष्यति। अथ वा शशमूर्धवर्तिनां पृथिव्यवयवानामुपर्युपरि चीयमानानां दृढदीर्घसंनिवेशरूपेण परिणतानां नीचैर्वृत्ताकारेण यदवस्थानं सोऽस्य वाक्यस्याध्यासमन्तरेणोक्तविषयः संभवतीत्यविरोधः। तथा चाऽऽह— § 3003

यां निषेधाः क्रियामाहुर्न यातीत्येवमादयः।
तिष्ठतीत्यादिभिः सैव वस्तुरूपा प्रतीयते॥ § 3005

तेन लब्धमुख्यार्थानां शशविषाणादीनामन्यत्रापि प्रसिद्धयन्यथास्थायिन्यर्थे सिद्धो गौणप्रयोगः। तव तु मुख्याभावात् दूरीभूतो गौणः। यदि च स्वार्थ एव गौणता ततोऽर्थान्तरेणैव वृत्तेरत्यन्ताभावः स्यात्। न ह्यग्निशब्दो माणवके गौणीभूतस्तदद्वारेण पुनरन्यत्र गौणतां प्रतिपद्यते तथा च वक्ष्यति 'न प्रतिनिधौ समत्वात्'* इति। येऽपि प्रधानत्वादीनां प्रतिषेधास्तेऽपि नाध्यारोपनिमित्ताः। किं तर्हि— § 3006

परमाणुशरीरादिकारणात्मादिवादिभिः।
ततोऽन्यादृक् प्रधानात्मरूपं नास्तीति वर्ण्यते॥ § 3008

प्रधानादिशब्दा जगत्कारणादिविषयास्तत्रैव बौद्धादिभिः परमाण्वाद्यात्मककारणाभ्युपगमात्। शरीरसंतानाद्यात्मककल्पनाच्च तद्व्यतिरिक्तकार-

२२ त्रापि] सद्रूपत्वेन या प्रसिद्धिस्ततोऽन्येन प्रकारेण—असद्रूपत्वेनावस्थानं यस्येत्यर्थः।

२६ *] जै॰ सू॰ ६-३-१४)।

णादिनिषेधः क्रियते, परमाणुशरीरादिष्वेव प्रधानात्मादिशब्दवृत्तिरिति यावत्। 361
तस्मात्स्वार्थाभिधानेनैव गौणत्वमित्यदुष्टम्। अतश्च यजमानः प्रतीतः स्वार्थ-
सिद्धिकरत्वं लक्षयति, प्रस्तरैककपालावपि च पारम्पर्येण यजमानार्थसिद्धिं
कुरुत इति कार्यापत्तेस्तच्छब्देन स्तूयेते। एतेन जातिसारूप्यादीनि व्या-
ख्यातानि। § 3009

**जातिः**। तत्राऽऽग्नेयादिशब्दानां ब्राह्मणादिषु मुख्यत्वमेव येन केनचित्संब-
न्धेन तद्धितोत्पादात्। देवतासंबन्ध एव वाऽस्ति न हि यदेव त्यज्यते तस्यैव
केवलं देवतासंबन्धः त्यक्तुरपि तेनैव संबन्धेन सैव देवता भवति। यथा च
वक्ष्यति 'भवति पुरुषस्यापि यष्टुः सा देवता'* इति। तस्मादनुदाहरणत्व-
म्। अतो यत्राग्निर्वै ब्राह्मण इत्यादिप्रयोगास्तदुदाहर्तव्यम्। अग्निर्हि प्रतीतो
मुखप्रभवत्वसामान्येन ब्राह्मणादीनुपस्थापयति। जातिरिति चात्र जन्मोपादानं 362
विवक्षितं, यद्यपि च तथा वस्तु नास्ति तथाऽप्यर्थवादान्तरे तथोक्तत्वादिह
तच्छब्दनिमित्तता प्रतिपत्स्यते। § 3010

**सारूप्यम्**। ननु सर्वत्रैव सारूप्यनिमित्तं गौणत्वम्। सत्यमेवम्। इह तु
चक्षुर्ग्राह्यशब्दविवक्षया पृथगुपादानम्। चाक्षुषं हि यूपस्योर्ध्वत्वमञ्जननिमित्तं च
तेजस्वित्वं तद्द्वारेण यजमानादित्यशब्दाभ्यां स्तूयते। यजमानस्य हि पशुधार-
णे विनियुक्तस्य निखातस्य च स्वपदार्थकरणविरोधः। सहस्ररश्मेस्त्वशक्य-
मेव यूपकार्यमाधातुम्। यदि च कश्चिन्नास्तिक्याद्दाहप्रतिकृतिमुपादद्यात्तस्यापि
गौणतापत्तिर्विधिविषया स्यात्तद्वरं स्तुतावेव तदाश्रयणमित्यविधित्वं स्यात्।
§ 3011

**प्रशंसा**। ननु सर्वत्र प्रशंसानिमित्तत्वं गुणवादस्योक्तम्। सत्यं, फलमन्य-
त्र गुणवादस्य प्रशंसा। अत्र तु गुणसारूप्यादिवत्प्रवृत्तिनिमित्तम्। कथमिति
चेत्— § 3012

गवाश्वादिगतां पूर्वमुपादाय प्रशस्तताम्।
तदभावोऽन्यपश्वादौ नञ्समासेन कथ्यते॥ § 3014

न तावन्महिषादीनां पशुत्वस्वरूपाभावः शक्यते वक्तुं, प्रत्यक्षविरोधात्।
कार्यप्रतिषेधः कल्प्येत, तदपि तत्र तत्र वचनविहितत्वान्न शक्यमेव। न
च विकल्पो, वैषम्यात्। कल्प्यो ह्यत्र विधिरितरत्र क्लृप्तः स्तुत्या वाऽर्थ-
वत्त्वान्नागत्या तदाश्रयणम्। तुल्यश्च मुख्यार्थत्यागः, 'पशवो गोअश्वा' इति 363
च पुनरुपादानमनर्थकम्। न च पशुत्वैकार्थसमवायिनः क्रियागुणाः शक्याः
प्रविवेक्तुम्। अथ गवाश्वसमवायिनो विशेषाः प्रतिषिध्येरन्, एवमपि मन्दं
फलम्। अन्यशब्देनैव च तावानर्थः सिद्ध इत्यनर्थकम्। अवश्यं चोत्तरपदेन
प्रतिषेध्येऽर्थे प्रथममुपात्तेन तत्रानुवर्तितव्यं, विषयरहितप्रतिषेधासंभवात्। न
च प्रशस्तत्वादन्यदुपादीयमानमुपयुज्यते।शक्नुवन्ति च गवाश्वादिसंबन्धात्तद्गतं

१ *] ( अ॰ ५ पा॰ ४ अ॰ ६ सू॰ १९ ) इत्यत्र भाष्यकार इति शेषः।

प्राशस्त्यं गमयितुम्। यद्यप्यप्रशस्तत्वमपि शक्नुवन्ति तथाऽपि प्रक्रमापेक्षया तदिहानाकाङ्क्षितमिति प्राशस्त्यमेव निषिध्यते। तत्प्रतिषेधमात्रमपि च नैवौपयिकमिति तद्द्वारेणान्येषां प्रशस्ततरत्वं कथ्यते। एतदुक्तं भवति। गवाश्वादीनपेक्ष्य नैवान्यस्य प्राशस्त्यं विद्यत इत्येवमन्यगतप्रशंसानिमित्तः प्रतिषेधः। सा चेह प्रथमतरमाश्रितेत्यनन्यप्रयोजनतया पश्चादवगम्यते। अन्यत्र पुनरुत्तरकालमेवैषा भवन्ती निमित्तत्वेनोच्यते। § 3015

**भूमा**। यदि ‘सृष्टीरुपदधाति’ इत्याख्यातप्रत्ययबलाद्विधिराश्रीयते तत्र न जात्या धर्मविशेषेण वा काश्चिदिष्टकाः सृष्टयो नामान्याभ्यो विलक्षणा विज्ञायन्ते, या एवंविधलिङ्गैर्मन्त्रैरुपधीयन्ते ता एव सृष्टयः, तत्रोपधानमात्रमुद्दिश्यं मन्त्रेषु विधीयमानेषु सकलप्राप्तेः प्रत्यक्षवचनाविनियुक्तलिङ्गप्रकरणविनियोज्यमन्त्रानर्थक्यप्रसङ्गः। तस्मात्प्रकरणपाठादेव सर्वत्र मन्त्रेषु प्राप्तेष्वेकदेशानुवादः सृष्ट्यभिधाननिमित्तार्थवादार्थः। अत्र चोदयन्ति। चयनचोदनयैवोपधानस्य प्राप्तत्वाल्लिङ्गप्रकरणानुमितया च श्रुत्या मन्त्रप्राप्तेः प्र-
364 देशान्तरस्थार्थवादानुपपत्तिरेकवाक्याधीनत्वादर्थवादप्रवृत्तेः। तथा च प्रथनार्थवादे व्याख्यातम्। न चान्यो गुणः श्रूयते यदर्थता कल्प्येत तत्र परिसंख्यार्थतैव प्राप्नोति। ततश्च तदवस्थमानर्थक्यमिति वाच्यं पुनःश्रुतिप्रयोजनम्। तत्र केचिदाहुः। उपधानमेवात्र विधीयते तन्माहात्म्यप्रदर्शनार्थं च मन्त्रग्रहणम्। इत्थमिदं प्रशस्तं यदेवंरूपैर्मन्त्रैः क्रियत इति। चयनेनार्थगृहीतमुपधानमिति चेन्न। संहतस्थापनेनापि चयनोपपत्तेः। नन्वेवं संहतानामेवोपधानं स्यात्। न। तस्येष्टकाः प्रत्युपादीयमानस्य प्रतिप्रधानावृत्तिन्यायसिद्धेः। अपि च— § 3016

प्राप्नुवन्त्यपि वक्तव्या पुनरेवंविधा क्रिया।
आध्वर्यवसमाख्यानं तथा हि प्रतिपद्यते॥ § 3018

ततश्चाध्वर्युकर्तृकत्वं च लभ्यते। अर्थगृहीतायां त्वनियमः स्यात्। न चावश्यमुपधान एव सर्वे मन्त्रा विनियुज्येरन्। अविशिष्टसामर्थ्या हि केचिद् ग्रहणाद्यपि कुर्युः। अपि च— § 3019

प्रत्यक्षब्राह्मणोक्तानां मध्यमा चितिराश्रयः।
तदर्थमपि संबन्धः कार्यो मन्त्रोपधानयोः॥ § 3021

ये त्वौपानुवाक्याकाण्डाधीनास्तेषां वाक्यादृते संबन्ध एव नास्तीत्यर्थवदेव वचनम्। न चावश्यमनेन सूत्रेणार्थवादत्वं प्रतिपाद्यते तल्लिङ्गात्तल्लिङ्गेषु भूयस्त्वनिमित्तशब्दप्रवृत्तिमात्रकथनादतो नातीव सृष्टिनामविधानमादर्तव्यम्। § 3022

भाष्यकारेण तु विधौ लक्षणां परिहरताऽनुवादत्वमाश्रितम्। ‘एकया स्तुवते’ इति ह्यनुवाकाद्यस्यैवासृष्टिलिङ्गत्वादात्मपरित्यागेनेतरलक्षणार्थता

स्यात्, तल्लक्षयित्वा च पुनरात्माऽपि प्रतिपादनीय इत्यतिगौरवम्, उपधानस्तुत्यर्थत्वेन पुनरनुवादत्वाददुष्टा लक्षणा। § 3023

**लिङ्गसमवायः**। सृष्टिवदेव प्राणभृदादिषु चोद्यपरिहारावल्पैरेव लिङ्गैर्भूय-
सामनेवंलिङ्गानां लक्षणमित्युदाहरणभेदः स्वार्थापरित्यागाच्चोभयत्र लक्षण- 365
स्यापि ग्रहणमुपादीयमानत्वादिति। § 3024

आह च— § 3025

यत्र लक्षणमुद्दिश्य लक्ष्ये कार्यं नियुज्यते।
तन्मात्रग्रहणं तस्मिन्नुपादाने द्वयोरपि॥ २३॥ § 3027

इति तत्सिद्धिपेटिका॥ १२॥

## ०.०.२६ अक्ताधिकरणम्

विधिस्तुत्योः सदा वृत्तिः समानविषयेष्यते।
तस्मादेकत्र संदिग्धमितरेणावधार्यते॥ § 3030

किं पुनरत्र संदेहकारणं, विधौ सामान्यग्रहणमिति केचित्। तदयुक्तम्। तत्र तावन्मात्रनिर्णयात्। स्यादेतत्। कथं निर्विशेषं सामान्यं संभवतीति, घृतवदिति वदामः। तत्रापि च नवपुराणगव्यमाहिषादिसंदेहस्तदवस्थः। तेन यथाऽत्र घृतमात्रनिर्णयादसंदेहो विशेषानभिधानेऽपि सर्वैः कार्यसिद्धिरेवमिहापि स्नेहनसमर्थद्रव्यमात्रग्रहणादसंदेहः। तस्मादर्थवादे घृतश्रवणात्संशय इत्यपरे। तथाऽपि न युक्तः, विशेषप्रतिपत्त्या निर्णीतत्वात्। न हि गौरानीयतां शुक्ल इत्यत्र कैश्चित्संदिह्यते। विषम उपन्यासः। § 3031

कथम्— § 3032 366

विधौ यदि विशेषः स्यात्संदेहः कस्य वा भवेत्।
स्तुतिस्थे त्वितरस्यापि तुल्यैवैषा विचारणा॥ § 3034

यदि ह्येवं भवेत् ‘अक्ताः शर्करा उपदधाति’ घृतेनेति। ततो नैव किंचिद्विचार्येत। अथ त्वञ्जनवाक्यवदिहाप्येवं श्रूयेत गामानय शुक्लः प्रशस्त इति ततोऽस्त्येव संदेहकारणमित्येतदप्युदाहरणमेव स्यात्। अतोऽन्यत्र सामान्यमन्यत्र च विशेष इत्येतस्मात्संदेहः। केचिच्च संशयदर्शनादेव विधिस्तुत्योर्वाक्यान्तरत्वमाचक्षते। § 3035

यदि ह्येकं भवेद्वाक्यं विशेषे तत्समाप्यते।
विशेषावगमात्तत्र न संदेहः प्रसज्यते॥ § 3037

वाक्यभेदे पुनरेकं सामान्ये परिसमाप्तमन्यद्विशेषपरमिति युक्तः संदेहः। यत्तु ‘विधिना त्वेकवाक्यत्वात्’* इति तदङ्गप्रधानवाक्यानामिव पश्चात्संबन्धसद्भावाभिप्रायेण। तथा हि— § 3038

स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया।
वाक्यानामेकवाक्यत्वं पुनः संहत्य जायते॥§ 3040

न त्वेतद्युक्तमिव, ये हि पदसंघाताः कर्मौपयिकेष्वर्थेषु पर्यवस्यन्ति तेषां नानावाक्यत्वं युक्तम्। न त्वर्थवादानामेकवाक्यत्वात्प्राक्प्रयोजनलाभ इति प्रथममेवैकवाक्यता। दुर्लभतरश्च संदेहः स्यादन्योन्यनिरपेक्षयोः सामान्यविशेषयोरितरत्रेतरत्र च पर्यवसानात्। यदेव हि यत्रोपात्तं तदेव तत्रासंदिग्धं गृह्यते सामान्यसमाप्तश्चात्र विधिः पश्चाद्विशेषः स्यात्। मन्त्रवर्णवदिति चेत्, एवमपि तदधिकरणविषयत्वात्पौनरुक्त्यप्रसङ्गः। तस्मादेकवाक्यतायामेवोपक्रमोपसंहारयोः सामान्यविशेषविषयत्वेन विप्रतिपत्तेरवश्यंभाव्येकगोचरत्वाच्च किमधीना कस्य प्रवृत्तिरिति जायते संदेहः। कस्य सामञ्जस्यमिति—यच्छ्रुतिवृत्तं तत्समञ्जसं न लक्षणावृत्तम्। तत्र च— § 3041

स्तुतीनां विध्यधीनत्वादनुवादाच्च लक्षणा।
मुख्यत्वात्तु विधेर्नासावविरोधाच्च कल्प्यते॥§ 3043

367 विधीयमानं हि स्तोतव्यं न तु स्तुत्यं विधेयमप्राप्तार्थश्च विधिरिति न श्रौतार्थात् प्रच्यवते। यद्यपि तावदर्थवादोपक्रमत्वं भवेत्ततः प्रथमज्ञानानुरोधेन कदाचिद्विधिर्वशीक्रियेत विध्युपक्रमं त्विदं ‘अक्ताः शर्कराः’ इति। तस्मान्निर्दिष्टसामान्ये यद्यर्थवादो न तादर्थ्यं प्रतिपद्यते ततोऽनर्थको भवतीत्यशक्तः स्वतन्त्रीभवितुं, विनाऽपि चार्थवादेन विध्युद्देशः समर्थत्वान्न युक्तस्तद्वश्यः कर्तुम्, अर्थवादस्त्वगतित्वाद्विधिवशेन वर्तते विशेषश्च सामान्यमव्यभिचाराच्छक्नोति लक्षयितुं, न सामान्यं व्यभिचाराद्विशेषं तस्माद्धृतशब्दः स्नेहमात्रलक्षणार्थः। § 3044

कामं वा सोऽर्थवादोऽस्तु सामान्यस्थो घृते विधिः।
विना स्तुत्या विधानं तु स्नेहद्रव्यान्तरे भवेत्॥§ 3046

यथा ऐन्द्रेणापि मन्त्रेण सोमो गृह्यमाणो न केवलं तदर्थो भविष्यत्यन्यदेवत्यस्यामन्त्रग्रहणोपपत्तेरेवमनर्थवादकं तैलवसयोर्विधानं, यत्रैव चांशे स्तुतिर्दृश्यते तत्र विध्युद्देशस्य प्ररोचनाशक्तिरपगच्छति, अन्यत्र त्वविहतशक्तिना विधानमिति सर्वस्नेहग्रहणम्। उच्यते— § 3047

समाप्यते विधिः कश्चित्कदाचिन्नाप्ररोचितः।

---

२ *] जै॰ सू॰ ( १-२-१ ) ३० )
११ पि] ( अ॰ ६ पा॰ ८ अ॰ १० सू॰

घृते प्ररोचनां दृष्टवा विधिस्तत्रानुमीयते॥§ 3049

यद्यपि तावद्विधिप्रक्रमे तैलवसयोरप्युपादानं, तथाऽपि प्ररोचनातो विधिर्घृते दृश्यते नेतरयोरित्यनुपादातव्ये कल्पयितव्या च तद्विषया विधेः प्ररोचनाशक्तिः कॢप्ता च घृते। तस्यां च सत्यां काल्पनिकी वाक्यं भिनत्ति घृते च कॢप्तां गृह्णन्नितरत्र च कल्पयन् वैरूप्येणापि विधिर्भिद्येत। तस्माद्विध्युद्देशोऽपि तैलादिभ्योऽपनीयते। यद्यपि च सामान्यशब्दः स्यात्तथाऽपि न कश्चिद्विशेषः। तत्र सामान्यान्यथानुपपत्त्या यत्र क्वचनानुश्रुते विशेषेऽपेक्षिते वाक्यशेषाद् घृत एव प्रत्ययो भवति, घृते च शब्दार्थे यदि श्रुत्यनुरोधेनात्यन्ताश्रुततैलादित्यागः क्रियते किं विरुध्यते संदेहमात्रं हि तत्र बाधितं न तु प्रमाणं किंचित्। क्रियामात्रमेव चेह चोदितं द्रव्यं तत्र न यावत्किंचित् द्रव्यमाक्षिप्येत 368 यदि कश्चिदपि श्रुतिलेशो न स्यात्। घृतार्थवाददर्शनात्त्ववश्यकर्तव्यायामश्रुतद्रव्यविधिकल्पनायां नान्यत्र प्रमाणमस्तीत्यङ्गीकृत्य घृताञ्जनविधिर्गम्यते। तत्र भ्रान्त्युत्पन्नतैलाद्याकाङ्क्षा निर्मूलत्वाद्बाध्यमाना न दुष्येतेत्यविरोधः, तैलादिग्रहणे च लक्षणात्रयं स्यात्। क्रियया द्रवद्रव्येण च विशेषो घृतशब्देन च सामान्यं लक्षयितव्यम्। तस्माद्घृतग्रहणं प्रमाणमिति सिद्धम्। *वृत्त्यन्तरे त्वत्रैव मन्त्रवर्णोऽप्युदाहृतः। तत्र तु घृतेन किं करिष्यत इति वक्तव्यम्॥ २४॥ § 3050

इत्यक्ताधिकरणम्॥ १३॥

## ०.०.२७ सामर्थ्याधिकरणम्

अथ यत्रेति संदिग्धे वाक्यशेषो न विद्यते।
तत्र सामर्थ्यसिद्धेन विध्यंशेनैव निर्णयः॥§ 3053

देवताप्रसादाभयप्रार्थनादौ संहतहस्तसंयोगमात्रमञ्जलिः, 'नाञ्जलिना वारि पिबेत्' इत्यादौ व्याकोशः। सक्तुहोमचोदनायां शब्दात्संदेहे सत्यसति चाऽऽकोशस्य वाक्यशेषेऽन्यथानुपपत्तेरेवाऽऽकोशाश्रयणम्। नन्वनेनैव न्यायेन यथा शक्नुयादिति वाक्यशेषादन्धादीनामाज्यावेक्षणादिरहितः कर्माधिकारः स्यात्। न। असंदेहात्, संदिग्धनिर्णयार्थात्त्वेवं कल्पना भवति। न चाधिकारे संदेहः समस्तधर्मोपेतं यथा शक्नुयात्तथा कुर्यादिति वाक्यशेषात्। सन्ति च तादृशस्य कर्तारश्चक्षुष्मदादय इति न प्रयोगचोदनान्यथानुपप-

१५ *] अस्मिन्नधिकरणे वृत्त्यन्तरोदाहृतमन्त्रवर्णापेक्षणे भाष्यकृतोऽभिप्रायमाह—वृत्त्यन्तरे त्विति। भिन्नवाक्यतयाऽवगतप्रमाणभावानां मन्त्राणामप्यत्रैव संदिग्धार्थनिर्णायकत्वे व्यवस्थापिते षष्ठान्त्ये पशुच्छागाधिकरणे निर्णयार्थाभावेन तदधिकरणमनर्थकमापद्येतेति भावः।

369 त्तिः। यत्र तु यावज्जीवचोदनादावेवं भविष्यति तत्र शक्तिकृताङ्गत्यागेऽपि सत्यवैगुण्यं प्रधानस्य चोदितमित्याश्रयिष्यामह एव। तस्माद्यावदेव लब्धात्मको विधिस्तावद्यत् कल्पते तद्वैदिकं, सिद्धे तु तत्कल्पनं पौरुषेयत्वादप्रमाणं सामर्थ्याधीनत्वाद्वाक्यशेषसिद्धेः। आह च— § 3054

यथैव पाठः प्रतिपत्त्युपायस्तथैव सामर्थ्यमपि श्रुतीनाम्।
तेनैव चैता न समामनन्ति सहस्रभागास्तु समामनेयुः॥ § 3056

इति कृतबहुमार्गं मन्त्रविध्यर्थवादैः स्मृतिपरिखमुदारं
वेदशालोपगूढम्।
अनभिभवसमर्थं धर्मदुर्गं प्रविश्य प्रविभजति
समस्तामर्थचिन्तामिदानीम्॥ २५ ॥ § 3058

इति सामर्थ्याधिकरणम्॥ १४ ॥

इति श्रीभट्टकुमारिलविरचिते मीमांसभाष्यव्याख्याने तन्त्रवार्तिके
प्रथमस्याध्यायस्य चतुर्थः पादः।

समाप्तः प्रथमाध्यायः॥

## ०.०.२८ भावार्थाधिकरणम्

370 संबन्धं तावल्लक्षणद्वयस्य करोति तत्र **प्रथमेऽध्याये प्रमाणलक्षणं वृत्तमित्युक्तम्**। तत्कुतः, नैव हि प्रथमेऽध्याये सूत्रकारेण किं चन लक्षणेन प्रमाणादेः स्वरूपमुपवर्णितम्। तन्नाम लक्षणमुच्यते येन तद्व्यतिरिक्तेभ्यस्तस्य स्वरूपं व्यावृत्ताकारं निरूप्यते। न चेह प्रमाणादीनां लक्षणमुक्तम्। अनुमानादीनि तावन्नैव सूत्रितानि। प्रत्यक्षमपि धर्मं प्रत्यनिमित्तत्वेनोपन्यस्तं न लक्ष्यत्वेनेति व्याख्यातम्। न च शब्दोऽपि कश्चिद्धर्मप्रमाणभूतो लक्षितः, अस्मिन्नेवाधिकरणे तस्य लक्ष्यमाणत्वात्। यदपि च वृत्तिकारेण सर्वेषां लक्षणं प्रदर्शितं न तदध्यायार्थत्वेनोपसंहर्तुं युक्तम्। सूत्राध्यायार्थानुपसंहारात्। कथं च समस्तलक्षणार्थव्यतिरिक्त एवार्थे सूत्राणि क्षीयेरन्। अपि च वृत्तिकारेण योऽप्युक्तः षट्कः प्रत्यक्षपूर्वकोऽपरीक्ष्यतया सोऽपि नैव लक्षणगोचरः, लोकप्रसिद्धार्थानि हि तान्यपरीक्ष्यत्वेनोक्तानि न प्रथमाध्यायविषयत्वेनोपसंहारमर्हन्ति। तस्माद्यत्प्रथमाध्याये वृत्तं तदालोच्यैतद्व्याप्यं नेयम्। तत्र प्रमाणलक्षणं तावच्चोदनालक्षणाश्रयणस्य, विध्यादितत्त्वनिर्णीतिः प्रमाणेनैव स्थिता। समस्तो

हि प्रथमः पादश्चोदनासूत्रपरिकरः। तत्र च धर्मस्य चोदनालक्षणत्वमुक्तम्। अतोऽवधारितार्थलक्षणशब्दसाहचर्यात्प्रमाणशब्दः प्रतिपाद्यत इत्येवं व्युत्पाद्य धर्मविषय एव व्याख्येयः। सत्यपि प्रमेयमात्रवाचित्वे, अस्मिञ्शास्त्रे जिज्ञास्यत्वेन धर्मः प्रमेयः प्रक्रान्त इति स एव गृह्यते। अथ वा करणमेव प्रमाणं तस्यैव लक्षणमुक्तम्। यद्यपि च सर्वप्रमाणानां तन्नोक्तं तथाऽपि धर्मप्रमाणस्य चोदनात्वं लक्षणमित्येतावतैवोक्तं मन्यते। न चावश्यं सर्वात्मनैव लक्षिते लक्षणत्वम्। विशेषरूपाणामानन्त्येन सर्वलक्षणाभावप्रसङ्गात्। अपि चौत्पत्तिकसूत्रेण विशेषोऽप्युक्त एव येनाऽऽगमविशेषो गम्यते। अथ वोपन्यस्तस्य चोदनात्मकस्य प्रमाणस्य लक्षणं प्रामाण्यकारणमित्युपसंहारः। तथा यद्यपि विधेरिदं रूपमिदमर्थवादस्येदं मन्त्रस्येत्येवं नोक्तं तथाऽपि धर्मं प्रत्युपयोगाभिधानात्तत्वं निर्णीतम्। अवसराभावात्तु तत्स्वरूपं न निर्दिष्टम्। श्रुतिमूलत्वं विज्ञानस्य स्मृतिप्रामाण्ये तत्त्वम्। नामधेयस्य चोदनान्तर्गतत्वात्प्रमाणत्वम्। संदिग्धार्थनिर्णये वाक्यशेषसामर्थ्ययोः प्रामाण्यमित्येवं समस्त- 371
मध्यायं प्रमाणलक्षणमाचक्षते। तन्न प्रस्मर्तव्यमिति। अविस्मृतप्रामाण्यो हि भेदादिप्रतिपादनम् **अविशेषादनर्थकं हि स्यात् इति** क्रियमाणं सहते। अन्यथा ह्यनर्थकं नामेत्येव प्रत्यवतिष्ठेत। ननु प्रधानाप्रधानचिन्ता तृतीयचतुर्थयोर्विषयः कथमत्रोपन्यस्यते। के चिदाहुः। इह द्रव्यकर्मणोरुत्तरत्र तु कर्मणामेव गुणप्रधानत्वविचारादपौनरुक्त्यमिति। तदयुक्तम्। *‘द्रव्यगुणसंस्कारेषु’ इत्यत्र सर्वाभिधानात्। तेनैवं वाच्यम्— § 3062

> लक्षणार्थोऽत्र तत्त्वेन भेदः शब्देतरादिभिः।
> तमन्वपूर्वभेदोऽपि प्राधान्यं तत्प्रसिद्धये॥ § 3064

कर्मभेदस्तावदौत्सर्गिको लक्षणार्थस्तदपवादत्वेनाभेदः। तदनुनिष्पादिनौ त्वपूर्वभेदाभेदौ। तत्र प्रतिकर्मभेदमपूर्वभेदप्रसक्तौ तृतीयसिद्धः प्रधानाप्रधानविचारः पुनरपवादत्वेनाऽऽरप्स्यते। सत्यप्यवहन्त्यादीनां शब्दान्तरादिभिर्भेदे कर्माकाङ्क्षितदृष्टप्रयोजनपर्यवसानान्न क्रियाजन्यापूर्वान्तरोत्पत्तिः। यत्तु नियमापूर्वं तत्क्रियाकृतं न भवतीति न तया व्यपदिश्यते। तेन यत्रैव द्रव्यादीनि प्रति क्रियाणां प्रधानत्वं तत्रैव तद्भेदनिमित्तापूर्वभेदसिद्धिः। अस्य च विवेकार्थं यद्गुणप्रधानलक्षणं वक्ष्यते तदपवादार्थं धर्ममात्रे तु ‘स्तुतशस्त्रयोः’ इति चाधिकरणद्वयं प्रस्तोष्यते। ततश्चाऽऽख्यातद्वैविध्ये विचारिते प्रसङ्गात्तृतीयं प्रकारमभिधायकत्वं प्रतिपादयितुं मन्त्रप्रस्तावः, तल्लक्षणादीनि तु प्रसक्तानुप्रसक्तेन यावत्पादसमाप्ति। ततः शब्दान्तराभ्यासाभ्यां भेदमुक्त्वा पौर्णमास्यधिकरणेनाभ्यासापवादः करिष्यते समुदायानुवादत्वात्।

१५ म्] ( अ॰ २ पा॰ २ अ॰ २ सू॰ २ )।
१८ *] ( अ॰ ३ पा॰ १ अ॰ ३ सू॰ ३ )।

२९ यं] द्व्यन्तरितं त्र्यन्तरितं चाधिकरणद्वयमित्यर्थः।

ततस्तदपवादार्थमुपांशुयाजाघाराग्निहोत्रपशुसोमाधिकरणानि। ततः संख्यासंज्ञागुणैर्भेदः। तावच्च गुणगतो विचारो यावत्प्रकरणान्तराधिकरणम्। ततस्तन्न्यायानुवृत्तिराशाखान्तराधिकरणात्। तत्र च षड्भातिरिक्तभेदकारणव्युदासः संज्ञाभ्यासगुणप्रक्रियाणां चाऽऽशङ्कानिवृत्तिरित्येतावान् भेदलक्षणार्थः। एष एव चार्थोऽवश्यं वक्तव्योऽङ्गाङ्गित्वाद्यवधारणार्थम्। न चान्यस्येदानीमवसरोऽस्तीत्यमेवाध्यायसंबन्धः। कुतः— § 3065

शेषशेष्यादयः सर्वे कर्मभेदनिबन्धनाः।
कार्ये ज्ञातेऽधिकारः स्यादुपदेशेऽतिदेशधीः॥§ 3067

372 प्राक्तावत्प्रमाणलक्षणाद्वेदार्थविचारात्मकत्वान्न कस्यचिद्भेदलक्षणादेः प्रस्ताव इत्युत्तरकालमारम्भः। तत्रापि शेषशेषित्वं प्रयोजकाप्रयोजकत्वं क्रमश्च भिन्नानां भवतीति न भेदलक्षणात्प्रागारभ्यते। तथाऽधिकारः कर्मस्वरूपेऽवधारिते तद्योग्यतया शक्यो निरूपयितुमिति पश्चापि लक्षणानि प्रतीक्षते। तथोत्तरः षट्कोऽतिदेशविषयत्वादुपदेशज्ञानाधीनसिद्धिः समस्तः समस्तं पूर्वषट्कमपेक्षते। ततश्च परिशेषसिद्धोऽयं भेदलक्षणस्य संबन्ध इत्यत्राऽऽरभ्यते। **षड्विधः कर्मभेद** इति—साधनभेदोपचारात्। वक्ष्यमाणसूत्रक्रमानुरोधान्नामधेयं संख्यानन्तरं पठितव्यं सदनादरादन्ते पठितम्। इतिकरणो हेत्वर्थः। षड्विधः कर्मभेद एतैः कारणैरिति यावत्। अथ वा करणे भेदशब्दं व्युत्पाद्य।सामानाधिकरण्येनैव शब्दान्तरादीनि व्याख्येयानि। संज्ञाशब्दान्तरयोः संख्यागुणयोश्चापौनरुक्त्यं स्वस्थाने वक्ष्यामः। सर्वदा चैषां भिन्नविषयत्वान्न श्रुत्यादिवद्बलाबलचिन्ता भविष्यतीति तद्भेदप्रतिपादनमात्रं तात्पर्येण। अन्यदुपोद्घातप्रसक्तानुप्रसक्त्यादिना। तत्र— § 3068

चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं प्रचक्षते।
प्रसक्तानुप्रसक्तादि प्रस्तुतादुपजायते॥§ 3070

यथेदमेवाधिकरणं प्रकृतानुनिष्पाद्यपूर्वभेदानुसारसिद्ध्यर्थमुपोद्घातत्वेन भविष्यति कतरस्मात्पदात्फलेन संबध्यमानादपूर्वभेदाभेदावनुगन्तव्याविति। यदा निरवयवौ वाक्यवाक्यार्थौ स्यातां ततः किं प्रतिपदं धर्म इत्यादिरसंबद्ध एव विचारः स्यादत आह **वाक्ये च पदानामर्था** इति। अत्रापि चोद्यते § 3071

चोदनालक्षणत्वेन वाक्यार्थोऽवस्थितो यदा।
धर्मः प्रतिपदं वाच्यः कथमाशङ्क्यते तदा॥§ 3073

यदि हि धर्मस्वरूपमभिधीयेत ततः **किं पदेन पदेनो**च्यत इति विचारो
373 युज्यते लाक्षणिके त्वयुक्तः॥ तदुच्यते— § 3074

धर्मत्वं फलसंबन्धात्पदार्थस्यैव युज्यते।

तत्किमेकस्य सर्वेषामिति युक्ता विचारणा॥§ 3076

न चात्र यो धर्मः स किं पदेन पदेनोच्यत इत्येवं विचार्यते किं तर्हि यः पदेन पदेनोच्यते स किं फलसंबन्धोत्तरकालं वाक्यार्थात्मना गम्यमानो धर्मो भवति, अथेतरपदार्थानुगृहीत एकः पदार्थ इति। तथा च सर्वैरेकस्य धर्मत्वं प्रतिपादितं भवति। साक्षात्फलसाधनमात्रस्य धर्मत्वाभ्युपगमात्। न तु सर्वेषामेकः कश्चिदर्थोऽस्ति यः सर्वैरेक इत्येवमाश्रीयेत। यच्च फलपदेन सह संबध्यते तस्यार्थं धर्ममपूर्वसाधनं च मन्यन्ते। तेन किं सर्वाणि पदानि फलेन संबध्यन्ते किं वैकमिति विचारः। किं प्राप्तं, **प्रतिपदमिति**। कुतः—
§ 3077

ऐकरूप्येण संबन्धः प्रधानेन च सिध्यति।
तस्मात्फलपदेनैव सर्वं संबध्यते पदम्॥§ 3079

यदि हि विशेषो गम्येतेदं फलसंबन्धयोग्यमिदं नेति ततः किंचिदेव संबध्येत, अनवगम्यमाने तु सर्वाणि पदानि फलेनैव संबध्यन्ते। यदि चैकं फलसंबन्धीतराणि च तत्संबन्धीनीति कल्प्यते ततो वाजपेयाधिकरणन्यायेनैकस्य फलं प्रत्युपादानविधानगुणभावादितरत्तु प्रत्युद्देशानुवादप्राधान्याद्वैरूप्यनिमित्तवाक्यभेदप्रसङ्गः। सर्वेषां तु फलं प्रत्युपादीयमानानामैकरूप्यात्तत्त्वसंबन्धोपपत्तिः। सर्वश्च सतिसंभवे गुणमतिलङ्घ्य प्रधानेनैव नित्यं संबध्यते। तस्मात्सर्वेषां फलसंबन्धाद्धर्मत्वं, तत्र तु किं सत्रिवत्प्रत्येकं कृत्स्नं फलं साधयन्ति, अथ दर्शपूर्णमासवत्संहत्य, तथा किं विकल्पेन समुच्चयेन वेत्यादि यथेष्टं कल्पनीयम्। तत्र फलभूमगरीयस्त्वादेकशब्दोपादानाभावात्सत्रिवत्प्रत्येकं साधनशक्त्यवगमात्सर्वेभ्यः पृथक्फलमिति पक्षः। अथ वाऽरुणादिन्यायेनैकवाक्योपादानात्संहतानां फलम्। अथ वैकनिराकाङ्क्षत्वान्न तदानीमेवेतरसंबन्धोपपत्तिस्तस्माद्विकल्प इति। अत्राभिधीयते— § 3080

फलेन यस्य संबन्धस्ततोऽपूर्वं प्रकल्प्यते॥§ 3081

तदल्पत्वोपपत्तौ च न युक्ता बहुकल्पना॥§ 3082

यदि हि फलसंबन्धमात्रपर्यवसाय्येव वाक्यं भवेत्ततः कदा चिदपि स- 374
र्वाणि फलेन संबध्येरन्। इह तु तावन्मात्रेणासिद्धेरपूर्वमन्यत्कल्पयितव्यं तच्चानुपपत्तिप्रमाणकं, तत्रैकापूर्वकल्पनयोपपन्ने नादृष्टान्तरकल्पनाप्रमाणमस्ति। यो ह्यनेकान्यपूर्वाणि कल्पयति कल्पयत्यसावेकं, तच्चेत्कल्पितमर्थवत्त्वाद्वाक्यस्य क्षीणान्यथानुपपत्तिर्नापूर्वान्तरस्य प्रमाणं भवति। तस्मादेकमेव

१४ र] ( अ° १ पा° ४ अ° ५ )।
३१ माणं] अनेन च अदृष्टानुमानस्य प्रसङ्गो यस्यां कल्पनायां साऽल्पीयसी भविष्यतीति भाष्यार्थः सूचितः।

फलसंबन्धि तस्माद्यापूर्वमितरत्फलवदुपकारीत्यध्यवसीयते। न चात्र विरोधो भविष्यति नामधेयत्वेन परिहारात्। अगत्या वा ‘दशापवित्रेण ग्रहं संमार्ष्टि’ इतिवन्मत्वर्थलक्षणाश्रयणात्, अर्थाक्षिप्तसाध्यांशद्वारेण वा धात्वर्थैरात्मीयकरणग्रहणसिद्धेः। एवं स्थिते कतरदेकं संबध्यतामिति सर्वथाऽनेकादृष्टकल्पनापरिहारादनियमप्राप्तावुच्यते— § 3083

प्रधानं फलसंबन्धि तत्संबन्ध्यङ्गमिष्यते।
प्रधानाङ्गत्वमेकस्य न चैकत्रावकल्पते॥§ 3085

न ह्येकस्मिन्वाक्ये तदेव कदा चित्फलसंबन्धात्प्रधानं कदा चित्फलवदुपकारादङ्गं युज्यते नियतरूपत्वादङ्गाङ्गिभावस्य। तस्मान्नियोगेनैवाऽऽख्यातपदान्नामपदाद्वाऽपूर्वप्रतीतिः। **कः पुनर्भावः के वा भावशब्दा** इति। यावन्तः फलसंबद्धेषु वाक्येष्वाख्यातशब्दा यजतिजुहोतीत्येवमादयस्तेषु प्रत्यार्थप्राधान्यात्कर्तरि च लकारोत्पत्तेर्यागादिविशिष्टकर्त्रभिधानं, कथं चिद्वा विपर्ययात्कर्तृविशिष्टयागाद्यभिधानं मन्वानस्य प्रश्नः। *सत्यामपि चैकपर्यनुयोगेनोभयपर्यनुयोगसिद्धौ योऽयं यजनमिज्या याग इत्याद्युदाहृत्यैव भावार्थतां ब्रवीति तन्नूनं केऽप्यलौकिका भावशब्दा अपीत्युभयप्रश्नः। सिद्धान्तवादी तु भवतेर्णिजन्तात् ‘एरच्’ इत्यच्प्रत्यये कृते भावनावाचिनं भावशब्दं व्युत्पाद्याऽऽख्यातस्य चान्वयव्यतिरेकाभ्यां तत्परत्वं कर्त्रभिधानप्र-
375 तिषेधं चाभिप्रेत्योदाहरति—**यजति ददातीति**। परः पुनर्भवतेर्णिजन्तादन्येन नैषोऽर्थोऽभिधीयते, न चाऽऽख्यातप्रत्ययस्यात्र व्यापारो, धात्वन्तरार्थत्वात्। कामं तुल्यजातीयत्वेन धातवो ब्रूयुस्तेऽपि तु यागादिवचनत्वादसमर्था इति मत्वाऽऽह—**ननुयागदानहोमशब्दा** इति। अत्रोच्यते— § 3086

यागदानाद्यनुस्यूतो भावनात्माऽवगम्यते।
नित्यमाख्यातशब्देभ्यस्तस्माद्भावार्थतेष्यते॥§ 3088

यावानेवह्यनन्यलभ्योऽर्थः शब्दाद्गम्यते स सर्वः शब्दार्थः। सर्वत्र चाऽऽख्याते धात्वर्थश्च तदनुरक्ता च भावना विज्ञायते। तस्माद्भावार्थत्वव्यपदेशः। तद्व्यतिरिक्तास्तु द्रव्यगुणशब्दा विज्ञायन्त एवेति न पृष्टाः। तत्र द्रव्यादिशब्दानां निष्पन्नार्थाभिधायिनां करणार्थत्वयोग्यत्वात्प्राप्नोति फलसंगतिः। सर्वत्र हि फलं साध्यत्वात्सिद्धरूपं साधनमपेक्षते न साध्यान्तरं,

१३ *] कः पुनर्भाव इत्यनेनैव भाष्येण भावनाक्षेपद्वारा तद्वाचिशब्दाक्षेपसिद्धेः के पुनर्भावशब्दा इति पुनराक्षेपोऽयुक्त इति मत्वा तदभिप्रायमाह॑सत्यामपीत्यादिना। अयमाशयः। यदिकश्चिद्भावोत्पन्नल्युडादिप्रत्यान्तधातुवाच्यस्य भावत्वाभ्युपगमेनार्थपर्यनुयोगं परिहरेत्तं प्रति श्येनेन यजेतेत्याद्येतदधिकरणविषयभूतेषु वाक्येषु तादृग्भावशब्दाभावादन्य एव भावो भावशब्दाश्चाभिमता इति प्रत्युत्तरसूचनायोभयप्रश्न इति। न केवलं भाव एवालौकिकः किं तु भावशब्दा अपीत्यपिशब्दार्थो ज्ञेयः।
१६ न्तात्] पा° सू° ( ३-३-५६ )।

नामार्थश्च सिद्धत्वात्तदपेक्षापूरणमर्थो नाऽऽख्यातार्थः स्वयमेव तावत्साध्यत्वात्। तस्माद्द्रव्यादिभिः फलमिति प्राप्ते सूत्रेणोत्तरं दीयते— § 3089

भावार्थः कर्मशब्दा ये तेभ्योऽपूर्वक्रियागतिः।
तैः कुर्याद्यजिना स्वर्गमेष ह्यर्थो विधीते॥§ 3091

फलसंबन्धो हेतुरपूर्वप्रतिपत्तेः। संबन्धश्चाऽऽकाङ्क्षापूर्वकः। सा च भाव- 376
शब्देभ्यः प्रसर्पन्ती दृश्यते न द्रव्यगुणशब्देभ्यः। तस्मादाख्यातेभ्योऽपूर्वभावना गम्यते। तत्र च धात्वर्थस्य करणत्वप्रतिपत्तिः प्रत्यासत्तेः। अतस्तेनैव फलकरणभूतेनान्यथानुपपत्त्याऽपूर्वं भाव्यत इत्यवधार्यते। कथं पुनर्यज्यादीन्पृथक्कृत्य केवलप्रत्ययवाच्य एव भावनार्थो लभ्यते भावयेदिति। कुतः— § 3092

अभिदध्युः स्वशक्त्या हि विधिमात्रं लिङादयः।
ण्यन्तस्य भवतेरर्थः केनांशेनाभिधीयते॥§ 3094

न च धात्वन्तरार्थं यज्यादयः प्रतिपादयन्ति। स्वार्थमात्रव्यापृतत्वात्। अतः शब्दरहितमेवेदमारोप्यते भावयेदिति। किं च। § 3095

शब्दान्तरस्य योऽप्यर्थः पर्यायैरभिधीयते।
न स तेनैव सहितस्तस्मिन्नर्थे प्रयुज्यते॥§ 3097

तद्यथा पिकमानयेत्युक्ते यो नामार्थं न प्रतिपद्यते तस्मै कोकिलशब्दमेव केवलं प्रयुञ्जते न कोकिलः पिक इति, तथाऽत्र यद्याख्यातस्य करोतिर्ण्यन्तो वा भवतिः पर्यायः ततस्तदर्थकथने तन्मात्रमेव प्रयोक्तव्यं नाऽऽख्यतप्रत्ययोऽपि, न हि तदानीं विविच्य ज्ञायते केनांशेन क्रिया प्रत्याय्यत इति। अत्र तु भावयेत्कुर्यादिति वा पुनरपि लिङ् प्रयुज्यत एव। अतश्च योऽनेन यजतेः परेणार्थः प्रतिपादितोऽसौ भावयतेरपि परेण तेनैवेत्यधिकावाप एव भावयतिः। तस्मादवैदिक इति। अत्राभिधीयते। सर्वत्रैव तावत्— § 3098

सिद्धकर्तृक्रियावाचिन्याख्यातप्रत्यये सति।
सामानाधिकरण्येन करोत्यर्थोऽवगम्यते॥§ 3100

इह केभ्यश्चिद्धातुभ्यः परा तिङ्विभक्तिरुच्चार्यमाणा कर्त्रात्मलाभमात्रमेव व्यापारं प्रतिपादयति यथाऽस्तिभवतिविद्यतिभ्यः। अपरेभ्यस्तु सिद्धे कर्तर्यन्यात्मलाभविषयव्यापारप्रतीतिः। यथा यजति ददाति पचति गच्छतीति। द्रव्यमेव च विशिष्टशक्त्युपेतं प्रचलितात्मतत्त्वं विप्रकीर्णस्वभावं पूर्वाप- 377
रीभूतं प्रथमावस्थातः प्रच्युतं परामवस्थामप्राप्तं व्यापारशब्दवाच्यं भवति। तत्र कदाचित्कर्तैवैवमवस्थः प्रतीयते, कदाचित्सिद्धे कर्तर्यन्यः। तद्यदा कर्तुरेवैषाऽवस्था भवति तदाऽसौ स्वयमेवान्यस्मादात्मलाभमपेक्षमाणः पर-

२ प्राप्ते ] अनेन प्रतिपदाधिकरणपूर्वोत्तरपक्षयोस्सूत्रत्वमुक्तं भवति।

निष्पत्तावव्याप्रियमाणत्वान्न करोतिशब्दवाच्यतां प्रतिपद्यते। यदा तु लब्धात्मकोऽन्यत्र व्याप्रियते तदा करोतीत्येवमपदिश्यते। तथा च किं करोति पठति गच्छतीति सामान्यविशेषरूपेण सामानाधिकरण्यप्रयोगो दृश्यते, न तु किं करोति भवत्यस्ति वेति प्रयुज्यते। तस्माल्लब्धात्मककर्तृव्यापारवचनानि करोत्यर्थवन्त्याख्यातानि। तत्र च क्रियमाणेन केनचिदवश्यं भवितव्यम्। कुतः— § 3101

करोतिः क्रियमाणेन न कश्चित्कर्मणा विना।
भवत्यर्थस्य कर्ता च करोतेः कर्म जायते॥§ 3103

करोतेर्नित्यं सकर्मकत्वाद्यावत्क्रियमाणं न लभ्यते न तावदर्थः पर्यवस्यति। सर्वकारकाणां चावान्तरक्रियासु कर्तृत्वं प्रतिपद्यमानानां प्रधानक्रियासु कर्मादिविभागो जायते। प्रतिक्रियं योग्यताभेदादवान्तराक्रियावैचित्र्यं भवति। तत्रान्वयव्यतिरेकाभ्यामिदमवगतं भवतिक्रियायाः कर्ता करोतेः कर्म संपद्यत इति। तथा हि— § 3104

नित्यं न भवनं यस्य यस्य वा नित्यभूतता।
न तस्य क्रियमाणत्वं खपुष्पाकाशयोरिव॥§ 3106

य एव हि प्रवृत्तभवनः संभावितभवनो वाऽन्येन प्रयुज्यते स एव क्रियमाणत्वेनावधार्यते नान्यः। तथा च न कश्चित्खपुष्पमाकाशं वा कुर्वन्नुपलभ्यते। यत्रापि पादौ कुर्वित्यादिषु निष्पन्नानां कर्मत्वप्रयोगो दृश्यते तत्राप्यनिष्पन्नसंस्कारादिविवक्षया पादादिशब्दप्रयोगादव्यभिचारः। सत्यपि च करोतेरनेकार्थत्वे सर्वत्र गन्धनावक्षेपणादौ किंचिदनुत्पन्नोत्पादनसामान्यमवगम्यते। अथ वा यदाऽस्योत्पादनाभिधायित्वं तदैव विशिष्टाख्यातसामानाधिकरण्यं दृष्टमिति तद्गतस्योत्पाद्यमानमेव कर्म भवतीत्युपपन्नम्। तेन भवतिक्रिया तावल्लब्धा। ततश्च— § 3107

करोत्यर्थस्य यः कर्ता भवितुः स प्रयोजकः।§ 3108

भविता तमपेक्ष्याथ प्रयोज्यत्वं प्रपद्यते।§ 3109

भवतिकरोत्योः शक्तिभेदाद्विक्लिदिपचत्योरिव नियतं प्रयोज्यप्रयोजकव्यापारवचनत्वम्। तत्र च कदाचिदभिधीयमानकर्मशक्त्याऽऽक्षिप्तप्रयोज्यव्यापारो वा स्वयमेवाऽऽक्षिप्तप्रयोज्यव्यापारो वा केवलं प्रयोजकव्यापार
378

२८ व्यापारो] घटं करोतीत्यादौ द्वितीयाभिहितया कर्माख्यया, शक्त्या, आक्षिप्तः प्रयोज्यस्य घटस्य, भवनाख्यो व्यापारो यस्य धातोरित्यर्थः। करोतिमात्रप्रयोगे कथमाक्षेप इत्याशङ्कायामाहस्वयमेवेति। घटो भवतीत्यादौ प्रथमाभिहितकर्तृशक्त्याक्षिप्तः प्रयोज्यव्यापारो यस्मिन्नित्यर्थः। तथा च प्रयोज्यप्रयोजकव्यापारयोरन्यतरवाचिधातुष्वितरप्रतीतिराक्षेपेणैवेति न तस्मिन्नपि शब्दव्यापारकल्पनावसर इति भावः।

एव विवक्ष्यते कटं करोति, ओदनं पचतीति। कदाचिदाक्षिप्तप्रयोजकव्यापारं प्रयोज्यव्यापारमात्रं, घटो भवति, विक्लिद्यन्ति तण्डुला इति। कदाचिदुभौ भिन्नौ समुच्चित्य प्रयोगः, करोति कटं देवदत्तः स च भवति। कदाचिदुपसर्जनीभूतप्रयोजकव्यापारः प्रयोज्यव्यापारः क्रियते देवदत्तेनेति स्वयमेवेति वा प्रयोगे। कदाचित्पुनः समानपदैकदेशोपात्तोपसर्जनीभूतप्रयोज्यक्रियः प्रयोजकव्यापारो विवक्ष्यते तदा च करोतिपचत्योस्तादात्म्येनाशक्तेरप्रयोगाद्भूविक्लिद्योश्च केवलप्रयोज्यक्रियानिष्ठत्वान्न साक्षात्प्रवर्तितुं शक्तिरस्तीति वाचकत्वेन द्योतकत्वेन वा णिजपरः प्रयुज्यते भावयति विक्लेदयतीति च। तथा चाऽऽह— § 3110

प्रयोज्यकर्तृकैकान्तव्यापारप्रतिपादकाः।
ण्यन्ता एव प्रयुज्यन्ते तत्प्रयोजककर्मसु॥§ 3112

न च तेषामण्यन्तानामशक्तिरित्यन्येषामशक्त्या भवितव्यम्। अन्येषां वा शक्तिरित्येषामपि तद्वद्भवितव्यम्। कुतः— § 3113

शक्तयः सर्वभावानां नानुयोज्याः स्वभावतः।
तेन नाना वदन्त्यर्थान्प्रकृतिप्रत्ययादयः॥§ 3115

एवं करोत्यर्थद्वारेण सर्वाख्यातेषु भावयत्यर्थः सिद्धः। § 3116

तेन भूतिषु कर्तृत्वं प्रतिपन्नस्य वस्तुनः।
प्रयोजकक्रियामाहुर्भावनां भावनाविदः॥§ 3118

यत्तूक्तं न विधित्वव्यतिरिक्तं लिङादयोऽर्थं वदन्तीति। तदयुक्तम्। कुतः— § 3119

अभिधाभावनामाहुरन्यामेव लिङादयः।
अर्थात्मभावना त्वन्या सर्वाख्यातेषु गम्यते॥§ 3121

यदा हि सर्वाख्यातानुवर्तिनी करोतिधातुवाच्या पुरुषव्यापाररूपा भावनाऽवगता भवति तदा तद्विशेषाः सामान्याख्यातव्यतिरिक्तशब्दविशेषवाच्या विधिप्रतिषेधभूतभविष्यद्वर्तमानादयः प्रतीयन्ते। तथा च सर्वत्र सामान्यतः करोत्यर्थोऽवगम्यते, किं करोति पचति, किमकार्षीदपाक्षीत्, किं करिष्यति पक्ष्यति, किं कुर्यात्पचेत्, किं न कुर्यान्न पचेदिति। तत्रार्थात्मिकायां भावनायां लिङादिशब्दानां यः पुरुषं प्रति प्रयोजकव्यापारः सा द्वितीया शब्दधर्मोऽभिधात्मिका भावना विधिरित्युच्यते। विशेषतश्चेयमर्थवादाधिकरणे वर्णिता यत्तु पर्यायस्थित्यतिलङ्घनं प्रत्ययापरित्यागादभिहितम्। तत्रोच्यते— § 3122

केवलस्याप्रयोगित्वात्कर्तृसंख्यादिसंग्रहात्। 379

रूपाविनाशसिद्धेश्च प्रत्ययोऽपि प्रयुज्यते॥§ 3124

यदि हि केवलः करोतिर्भावयतिर्वा प्रयोगार्हौ स्यातां ततः कोकिलशब्दप्रयोगे पिकशब्दवत्प्रत्ययो न प्रयुज्येत, न तु केवलायाः प्रकृतेः प्रयोगः, अपभ्रंशत्वप्रसङ्गात्। तेन यस्मिन् कस्मिंश्चित्प्रत्यये प्रयोक्तव्ये यस्यैवार्थः कथ्यते स एवानुवादभूतः प्रकृत्यनुग्रहार्थं प्रयुज्यते नान्योऽभ्यधिकार्थान्तरापत्तिप्रसङ्गात्। ननु च, इक्श्तिपौ धातुनिर्देशे विहितावतस्तद्युक्तौ करोतिभावयती प्रयुज्येयाताम्। नैतदस्ति। तथा सति शब्दपदार्थकत्वान्नैव ताभ्यामाख्यातार्थः कथ्येत। यत्तु क्वचिदर्थेऽपि धातुमिक्श्तिबन्तं प्रयुञ्जते यजिः, यजतिः, इति च। तत्, शब्देऽभिहिते लक्षणयाऽर्थप्रतीतिरित्यवगन्तव्यं, न चेह किंचिल्लक्षणाश्रयणे प्रयोजनमस्ति येनावाचकः प्रयुज्येत। तत्रान्यदेवानिष्टमापद्येत कृभ्भुवौ धातू तिङाऽभिधीयेते इति। तस्मादर्थपरत्वसिद्ध्यर्थमाख्यातप्रत्ययसहितावेव प्रयुज्येते। यदि च भावनैवैका प्रत्ययार्थः स्यात्करोतिभावयती वा समस्तप्रत्ययार्थोपादानसमर्थौ भवेतां ततः केवलप्रयोगोऽप्याशङ्क्येत, न तु तदुभयमप्यस्तीति करोतिभावयतिभ्यां कथितेऽपि भावनार्थे कर्तृसंख्यादिप्रत्यायनार्थं पुनः प्रत्यय उच्चार्यते। यस्तु तत्र भावनाभिधानांशः स प्राप्तत्वादनूद्यते, अन्यथा हि भावनैवैका प्रत्ययार्थः करोतिभावयती वा कर्तृसंख्यादीनामप्यभिधायकाविति भ्रान्तिः स्यात्। नित्यं च पूर्वापरीभूता भावनाऽऽख्यातेनोच्यते। तत्र यदि प्रत्ययान्तरं प्रयुज्यते ततः करोतिभावयतिभ्यां द्रव्यवदुपसंहृतरूपोच्यमाना नैवाऽऽख्यातसदृशी कथ्येत। तस्मादवश्यं तदपि प्रयोक्तव्यमिति। किं च— § 3125

भावना गम्यमाना च धातुप्रत्ययसंनिधौ।
कस्य वाच्येति विस्पष्टं न कदाचित्प्रतीयते॥§ 3127

यदि ह्येकान्तेनास्याः प्रत्ययार्थत्वमवधार्येत ततः करोतिभावयतिभ्यां प्रत्ययपौनरुक्त्याशङ्का स्यान्न तु तदस्ति, उभयसंनिधौ गम्यमानत्वात्। केवलप्रकृतिप्रत्ययप्रयोगाभावाद्धि न विवेको विज्ञायते। शक्यते हि वक्तुं धातुसहितेन प्रत्ययेनोच्यत इति। अथवा प्रत्ययानुगृहीतेन धातुना, अथ वोभाभ्याम्। न च शक्तिकल्पनायां विशेषः, सर्वथाऽर्थापत्तिसाम्यान्न च विवेकज्ञानप्रयोजनमस्ति। स्यादेतत्, कृदन्ताद्धातोरप्रतीतेस्तिङौव्यभिचारिण्येव नेति। तदयुक्तम्। अस्तिविद्यतिभवतिपरेषु प्रत्ययेष्वप्यदर्शनात्। न वा कृदन्तेष्वप्यत्यन्तं भावना नास्ति किंचिदपकृष्यमाणरूपप्रतीतेः। कृत्येषु तावद्भोक्तव्यम् यष्टव्यमिति किंचिन्न्यूनाऽऽख्याताद्गम्यते। तत्रापि कर्मोत्पन्नेषु द्रव्य-
380 प्राधान्याद्ब्राह्मणो न हन्तव्य इति भावोत्पन्नेभ्यो न्यूनतरा। न हि तत्र प्रयोजकव्यापारप्राधान्यम्। एकत्र धात्वर्थप्राधान्यादपरत्र स्वव्यापारविशिष्टप्रयोज्यपरत्वात्। एतेन भावकर्मोत्पन्नलकारास्तिङोऽपि व्याख्याताः। तेष्वपि हि प्रयोजकव्यापारगुणत्वप्रतीतिरविशिष्टा। अतो न तिङन्तानां तुल्यकल्पत्वम्। तथा ‘अव्ययकृतो भावे भवन्ति’ इति स्मरणाविशेषेऽपि स्वसंवेद्यमीष-

न्न्यूनभावनाविज्ञानम्। *‘अभिक्रामंजुहोति’ ‘दर्भतरुणकेनोपघातं जुहोति’ ‘अभिषुत्य हुत्वा भक्षयन्ति’ ‘पुरा वाचः प्रवदितोः’ इति सर्वत्र श्रुत्यैव भावनान्तरसापेक्षा भावनाऽवगम्यते। पक्कः पक्कवानित्यपि निर्वृत्तरूपभावनोपसर्जनद्रव्यप्रतीतिः प्रत्यक्षा। एवं पाचकादिष्वपि द्रष्टव्यम्। तथा च सर्वत्र कारकापेक्षा दृश्यते। अन्यथा हि रूढितद्धितसमासोष्विवेयं न स्यात्। न च निर्व्यापाराणामेते व्यपदेशा भवन्ति। न चास्ति स व्यापारो यत्र किंचिदसन्न जन्यते। ततश्च सिद्धः करोतिभावयत्योरर्थः। शक्यते च सर्वत्र सामानाधिकरण्यमपि दर्शयितुं विनाऽपि पूर्वापरीभूतत्वेन। तद्यथा किं कर्तव्यं पक्तव्यं, कथंकारं जुहोति अभिक्रामम्, किं कृत्वाजुहोति अभिषुत्य, किं कृतवान् पक्कवान्, किं कृतं पक्कं, किंक्रियो देवदत्तः पक्ता, केयं क्रिया पाक इति। न च करोतिसामानाधिकरण्यातिरिक्तमाख्यातेष्वपि भावनाप्रमाणं विद्यते। तस्माद्धातवोऽपि भावनां न मुञ्चन्ति। तथा चाऽऽहुः करोतिरर्थेष्विव सर्वधातूनिति। यत्त्वस्याः प्राधान्यं तत्कामं तिङाऽभिधेयं द्योत्यं वाऽन्वयव्यतिरेकाभ्यामस्तु न स्वरूपम्। नन्वेवमपि यागेनेति धात्वर्थे निष्कृष्टे तेनैव भावनाऽप्युपात्तेति भावयेदिति पुनः प्रयोगो न प्राप्नोति। नैष दोषः। तथा हि। व्यर्थस्य जातोर्भेदेनार्थे कथ्यमाने यागेनेति विशेषरूपं करणात्मना निष्कृष्टम्। इतरत्तु भावनात्मकं सामान्यरूपः शब्दान्तरेण भावयेदित्यनेन कथ्यते। अथवा केचित्करणाशकर्तृसंख्यादयः प्रकृतिप्रत्यययोर्भेदेन वाच्याः। भावना तु समुदायाव्यभिचारात्समुदितयोरेवार्थ इत्यपि शक्यं वक्तुम्। तथा च सूत्रकारभाष्यकाराभ्यां भावार्थाः कर्मशब्दा इति सामानाधिकरण्यमेवाऽऽश्रितं न भावार्थत्वेन प्रत्ययाः कथिताः। शास्त्रे तु सर्वत्र प्रत्ययार्थो भावनेति व्यवहारः। तत्रायमभिप्रायः— § 3128

प्रत्ययार्थं सह ब्रूतः प्रकृतिप्रत्ययौ सदा।
प्राधान्याद्भावना तेन प्रत्ययार्थोऽवधार्यते॥ § 3130

यद्यप्यन्यद्विवेककारणं नास्ति तथाऽपि प्राधान्यं प्रत्ययार्थधर्मं दृष्ट्वा नूनमियं प्रत्ययार्थ इत्यवगम्यते— § 3131 381

तथा क्रमवतोर्नित्यं प्रकृतिप्रत्ययांशयोः।
प्रत्ययश्रुतिवेलायां भावनात्माऽवगम्यते॥ § 3133

न केवलमेतावेवान्वयव्यतिरेकौ यौ परस्परपरित्यागेन लक्ष्येते तस्मिन्नेव हि पदे ‘तदागमे हि तद्दृश्यते’ इत्यनेन न्यायेन विवेकोऽवधार्यते। यत्त्वस्त्यादिपरः प्रत्ययोऽपि भावनां जहातीति तुल्यं धातुसमुदायपक्षयोरप्येतत्। सर्वथा यत्र प्रतीयते तत्र तावत्प्रत्ययार्थत्वं निश्चीयते। अन्यत्र त्वयं विचार एव

१ *] तै. सं. ( २-६-१ )
१२ चाऽऽहुः ] सर्वधातूनां करोत्यर्थवाचित्वे वृद्धसंमतिमाहतथा चाऽऽहुरिति। विभज्य सेनां परमार्थकर्मा सेनापतीश्चापि पुरंदरोत्थः। नियोजयामास स शत्रुसैन्ये करोतिरर्थेष्विव सर्वधातून्॥ इति।

नास्ति। क्वचिद्व्यभिचारस्य चोत्तरमुक्तं तद्भूताधिकरणे। अथ वा नैवात्रापि व्यभिचारः। कुतः— § 3134

अस्त्यादावपि कर्त्रंशे भाव्येऽस्त्येव हि भावना।
अन्यत्राशेषभावात्तु न तथा सा प्रकाशते॥§ 3136

यद्यपि कर्तुरनिष्पन्नत्वाद्व्यतिरिक्तभावयितव्याभावादस्त्यादिषु प्रयोजकव्यापारो नातीव लक्ष्यते तथाऽपि प्रत्ययसामर्थ्याद्भावयतीत्यवगम्यते। किमित्यपेक्षिते चानिष्पन्ने कर्तर्यन्यत्किंचिदित्यकल्पनादात्मानमित्येव संबध्यते केन, भावनेन, कथं, अवयवजननादिप्रकारेणेति। त्रयोऽपि तत्र भावनांशा भवनेनैव पूर्यन्ते व्यापारान्तरासंभवात्। तत्र केचिदवयवा भावनव्यापृताः प्रयुज्यन्ते केचित्सिद्धभवनाः प्रयोजकाः। सिद्धभवनासिद्धभवनवर्ति च सामान्यमुभयसंपर्काद्भावनेत्युच्यते। एतेन जायते निष्पद्यते सिध्यतीत्यादीनि व्याख्यातानि। अस्तिः पुनर्जनिसमानार्थाद्भवतेरुपरितनीमवस्थामभिलपन्सत्तयाऽऽत्मभवनं भवद्भावयतीत्येवमाख्यातप्रत्ययं लभते। तत्रापि तु कालकृतभेदपूर्वोत्तरसामान्यसत्तारूपेण पूर्ववदेव प्रयोज्यप्रयोजकव्यापारकल्पनाऽनुसर्तव्या। सत्यामपि त्वेवमादिषु भावनायां निष्पन्नचेतनकर्तृविषयत्वाद्विधिप्रतिषेधयोरसंभवः। स्यादेतत्। दृष्टो विधिरपि 'तस्मात्प्रायणीयस्याह्न ऋत्विजा भवितव्यम्' 'रथंतरं भवति' 'अत्राध्वर्युः स्यात्' 'इहोक्थ्यानि स्युः' इति। सत्यं दृश्यते न त्विह पूर्वेण तुल्यो भवत्यर्थः। सिद्धो हि पुरुषः कर्मसंबन्धनिमित्तमृत्विक्त्वं भवदन्यैरेव वाक्कायमनोव्यापारैर्भावयेदित्युच्यते। तथा रथंतरादिषु सत्यपि श्रुत्या भवनविधिसंबन्धे तत्र संभवादनुमीयमाना भावनैव विधीयते। यत्र त्विहामुको भवेदिति प्रयोगस्तत्र भवतेस्तिष्ठत्यर्थवाचित्वात्संभवत्येव व्यतिरिक्तं भावयितव्यमित्येवं विज्ञायते। स्थानेनान्यत्किंचिद्भावयेदिति। तेन भूतभविष्यद्वर्तमानापदेशमात्रेष्वेवापारमार्थिकं भवितृव्यापारस्य भावनात्वं न विध्यादिषु।
382 भूतादिकथनेऽपि यदा समस्तं व्यापारं धातुरेवोपादत्ते नावयवकालादिकृतभेदाश्रयणं तदा विस्पष्टाद्विरोधाद्धात्वर्थमात्रं कर्तृसंख्यादयश्चाऽऽख्यातपदार्थत्वेनावधार्यन्ते न भावना। न च भावनाव्यभिचारेण दोष इत्युक्तम्। यत्तु कृदन्तेष्वपि धातवो भावनां न व्यभिचरन्तीति। सत्यं धात्वर्था न व्यभिचरन्ति तैरेव तु गम्यमानत्वादनभिधेयत्वमपि शक्यं वक्तुम्। तथा हि— § 3137

धात्वर्थकारकैरेव गुणभूतोऽवगम्यते।
भावनात्मा कृदन्तेषु तस्मान्नैवाभिधीयते॥§ 3139

यथैव भावप्रधानत्वादाख्याते तत्संबन्धादेव गुणभूतकारकप्रतीतिसिद्धेर्न कर्तृकर्मणोरभिधानं भविष्यत्येवं कर्ताद्यभिधानादेव तदन्यथानुपपत्त्या भाव-

---

१ मुक्तं] ( अ° १ पा° १ अ° ७ )     अत्रेति शेषः।

नासिद्धेरनभिधानं, गम्यमानापेक्षयैव च करोतिसामानाधिकरण्यं यथा पचतिशब्दस्य देवदत्तशब्देन, अतथाभूतयैव च कारकसंबन्धोऽप्युपपत्स्यते। अथ वा भावनोपसर्जनधात्वर्थनिष्पत्त्यर्थत्वात्कारकाणां धात्वर्थेनैव संबन्धसिद्धिः। स एव हि तानि स्वसिद्ध्यर्थमपेक्षते भावनाऽपि च तथाभूतान्येव तानि गृह्णातीत्यविरुद्धः संबन्धः। कृत्यानां तु प्रैषवाचित्वात्सत्यपि भावनानभिधाने तावत्स्वार्थपर्यवसानं नास्ति यावदंशत्रयपरिपूर्णा भावना न लब्धा। कुतः— § 3140

स्वव्यापारे हि पुरुषः कर्तृत्वेन नियुज्यते।
प्रैषैस्तस्य च व्यापारो भावनांऽशत्रयात्मिका॥ § 3142

न हि पुरुषः स्वव्यापारं मुक्त्वाऽन्यदनुष्ठातुं शक्तः प्रैषाश्चैनमनुष्ठापयन्ति। ते यदि तद्व्यापारं कथंचिन्नोपाददीर्न नियोक्तुं शक्नुयुरित्येवमपि भावनाक्षेपसिद्धिः। यावांश्च ब्राह्मणगतः कश्चित्प्रैषः स सर्वः प्राप्त्यभावाद्विधिरेव भवतीति विनाऽपि स्मरणेन कृत्यानां विधायकत्वम्। अयमेव च विधिप्रैषयोर्विशेषः। § 3143

प्रवर्तनस्मृतिः प्राप्ते प्रैष इत्यभिधीयते।
अप्राप्तप्रेषणं सर्वं विधित्वं प्रतिपद्यते॥ § 3145

तस्मात्प्रत्ययार्थो भावनेत्युपपन्नम्। ननु च यदि प्रयोजकव्यापारो भावनेष्यते ततः पचावधिश्रयणादीनि, यजौ च मानसः संकल्प इत्यादीनां भावनात्वं त एव धात्वर्था इति धातुवाच्यैव भावना स्यात्। नैष दोषः— § 3146

धात्वर्थव्यतिरेकेण यद्यप्येषा न लभ्यते।
तथाऽपि सर्वसामान्यरूपेणान्याऽवगम्यते॥ § 3148

सर्वत्र ह्यधिश्रयणादौ करोतीत्यपि सामान्यव्यापारांशः प्रतीयते पचत्यादिवाच्या विक्लित्त्यधिश्रयणादयः कर्मस्थाः कर्तृस्थाश्च। तत्र यदौदासीन्यप्रच्युतिमात्रेण परिस्पन्दरूपं निरूप्यते सा भावना। ये तु तदनुरञ्जनसमर्थाः 383 कर्तृकर्मगता विशेषास्ते तस्या एव करणेतिकर्तव्यतांशयोर्निविशन्ते। एवं तर्हि धात्वर्थसामान्यं भावनेत्येतदापन्नम्। सत्यं साध्यतया सामान्यं न तु गोत्वादिरूपेण। कथम्— § 3149

अन्यदेव हि यागादौ सामान्यं करणात्मकम्।
अन्यच्च भावना नाम साध्यत्वेन व्यवस्थितम्॥ § 3151

भावनाया हि स्वयमेव प्रतिपुरुषं सामान्यविशेषौ भवतः। तथा तत्करणभूते यागादौ समवेतं भावनाकरणांशापेक्षितं धात्वर्थसामान्यं नाम यत्कर्मशब्देनाभिधीयते। विशेषणभावाच्च यागादयो भावनाविशेषा इत्युच्यन्ते

न तद्व्यक्तित्वेन। शास्त्रप्रदेशे तु क्रियाकर्मशब्दौ कदा चिद्धात्वर्थे प्रयुज्येते कदाचिद्भावनायां कदाचित्तु प्रत्यासत्त्योभयत्रापि प्रयोगो न स्वरूपाभिधानेन। कुतः— § 3152

याद‍ृशी भावनाऽऽख्याते धात्वर्थश्चापि याद‍ृशः।
नासौ तेनैव रूपेण कथ्यतेऽन्यैः पदैः क्वचित्॥§ 3154

भावनाशब्दो हि निष्पन्नात्मिकां सत्त्वरूपापन्नां लिङ्गसंख्यायोगिनीमभिधत्ते न चासावाख्याते ताद‍ृश्यभिधीयते लिङ्गसंख्यारहितरूपेण गम्यमानत्वात्। एवं धात्वर्थोऽपि वेदितव्यः। तथा करोति भावयतीत्येताभ्यामपि श्रुत्या तावदन्याद‍ृगेवार्थः प्रतीयते कुम्भावयत्यर्थकरणिका भावना न चैवंरूपाऽसौ यजेतेत्यादिष्वस्तीत्यपर्यायत्वम्। तत्रानन्तरप्रत्ययोत्थापितभावनान्तरबुद्धिमविवक्षित्वाऽर्थसंवादः कर्तव्यः। तेनादूरविप्रकर्षमात्रेणैष प्रयोगो नार्थसाम्येनेत्यवस्थितमनन्यशब्दवाच्यत्वं भावनायाः। सा तु प्रतीतमात्रैव प्राधान्यादपेक्षान्तरानधीनत्वाच्च प्रथमं तावत्साध्यांशमपेक्षते भावयेत्किमिति। तत्र यावती विध्युपेता भावना तस्यां पूर्वप्रतीतमपि विधित्वं तावन्नाऽऽश्रीयते यावदंशत्रयपूर्णा भावनाऽनुष्ठानयोग्या न भवति। विधित्वप्रक्रमाच्च प्रथममेवैतज्ज्ञायते याद‍ृशैरंशैः पूर्णेयं विधानमर्हति ताद‍ृशैः पूरयितव्येति। न च बुद्धिपूर्वकारी पुरुषः पुरुषार्थरहितं व्यापारं वचनशतेनाप्युक्तोऽनुतिष्ठति। न च पुरुषार्थः साध्यव्यतिरिक्तांशपातित्वेन कैश्चित्प्रार्थ्यते ततोऽभ्यर्हिततरस्यान्यस्य साध्यस्याविद्यमानत्वात्। तत्र यद्यस्यां भावनायामपुरुषार्थः साध्यः स्यात्ततः पुरुषेष्वप्रवर्तमानेषु प्रत्ययस्य प्रयोजकशक्तिर्बाध्येत। तेन यद्यपि समानपदोपादानप्रत्यासत्तेर्धात्वर्थः साध्यांशपूरणायोपप्लवते तथाऽप्ययोग्यत्वान्निराक्रियते, न हि प्रत्यासत्तिरेवैका संबन्धकारणं, योग्यत्वाद्यपि। तथा च वक्ष्यति यस्य येनार्थसंबन्ध इति। किं च— § 3155

384 संबन्धमात्रमुक्तं च श्रुत्या धात्वर्थभावयोः।
तदेकांशनिवेशे तु व्यापारोऽस्या न विद्यते॥§ 3157

संबन्धमात्रं कृत्वा निवृत्तव्यापारायां श्रुतावन्यतरांशनिवेशो योग्यत्वादाश्रयितव्यः। तद्यदि साध्यांशादेकप्रत्ययोपात्तेन प्रत्यासन्नतरेण विधित्वेन प्रच्याव्यते ततोऽशान्तरेण नूनं संपत्स्यत इत्येवं प्रतीक्ष्यते। किं च— § 3158

साध्यांशे पुरुषाणां च प्रत्ययो न नियोजकः।
स्वयमेव हि जानन्ति कर्तव्यं पुरुषाः सदा॥§ 3160

यत्र हि शास्त्राधीना पुरुषप्रवृत्तिस्तत्र तत्संनिकर्षविप्रकर्षावपेक्ष्येते, साध्यं पुनः स्वर्गपशुपुत्रग्रामादि प्रागेव शास्त्रात्सर्वे पुरुषाः प्रतिपद्यन्ते। ततश्च भाव-

---

२२ ति] यस्य येनार्थसंबन्धो दूरस्थस्यापि तेन सः। अर्थतो ह्यसमर्थानामानन्तर्यमकारणम्। इत्यादिना विश्वजिदधिकरणे पूर्वाचार्यो वक्ष्यतीत्येवं वृद्धसंमतिमाहतथा चेत्यादिना।

येत्किमित्यपेक्षितमात्रे विनैव तावच्छास्त्रेणैतावदवगतं पुरुषार्थः कश्चिदिति। तत्र विशेषमात्रमनवगतत्वादपेक्ष्यते। तदपि च न साध्यात्मना, किं तर्हि, एतद्भावनाविषयत्वेन। ततश्च दूरस्थस्यापि स्वर्गादेरेव कृतास्पदस्य संगतिः। धात्वर्थसंबन्धस्त्वनपेक्षितः क्रियेत विध्यानर्थक्याच्च बाध्येततरां श्रुतिः। किं च— § 3161

भवने यस्य कर्तृत्वं कथंचिदवधारितम्।
स्ववाक्ये वाऽन्यवाक्ये वा स साध्यत्वं प्रपद्यते॥§ 3163

न चात्र धात्वर्थादेर्भवनक्रियासंबन्धोऽवगतः स्वर्गादीनां तु कामशब्दोपबन्धाद्भवनसंबन्धो विज्ञायते। कुतः— § 3164

स्वर्गो मे स्यादितीत्थं हि स्वर्गादिः प्रार्थ्यते भवन्।
तेनासौ भावनापेक्षः प्रयोज्यत्वेन गम्यते॥§ 3166

ततोऽवधृतस्वर्गादिसाध्यांशा भावना केन भावयेदित्येवं करणमपेक्षते। तत्र च शास्त्राधीनप्रवृत्तित्वात्तत्संनिकर्षादावाश्रीयमाणे प्रमाणान्तराच्च योग्यायोग्यत्वयोरज्ञानाद्विध्यविरोधाच्चात्यन्तप्रत्यासत्त्युपस्थितधात्वर्थातिक्रमकारणाभावात्सर्वफलभावनानां च केनचिद्धात्वर्थविशेषेण विनाऽनुपपत्तेर्यागेनेत्येवं विज्ञायते। यद्यपि च यागः स्वयमेव तावदनिष्पन्नस्तथाऽपि स्वसाधननिष्पादितः सन्साधयिष्यति सर्वमेव च कदाचिन्निष्पन्नं कदाचिदनिष्पन्नम्। न च प्राक्छास्त्रप्रवृत्तेर्निष्पत्तिः क्वचिदुपयुज्यते फलसिद्धिकालमात्रोपयोगित्वात्करणनिष्पत्तेः। प्रमाणवशाच्च त्रिकालवर्तिनामपि साधनत्वाविरोधः। तस्माद्यागादीनां करणत्वं तच्चापूर्वद्वारेणेति तच्छब्देभ्योऽपूर्वप्रतीतिः। अतश्चैवमपि सूत्रार्थः संभवति। ये भावार्थाः—भावनाप्रयोजनाः, कर्मशब्दाः यज्यादयः तेभ्यः क्रिया प्रतीयेतेति। ननु चोक्तेन कर्मकरणसंबन्धन्यायेन सकर्मकधातुयुक्तादेवाऽऽख्याताद्भावनाऽवगतिः प्रा- 385
प्नोति। तथा हि— § 3167

येनेप्सिततमैर्भावैः किमित्यंशोऽवरुध्यते।
तद्योगी तेन धात्वर्थो न कश्चित्स्यादकर्मकः॥§ 3169

यदि वा सर्वधातूनां सकर्मकत्वापत्तिरथ वाऽकर्मकेभ्यो भावनया न भवितव्यम्। नैष दोषः। कुतः— § 3170

अन्यदेव हि धात्वर्थप्राप्यं कर्म सकर्मके।
अन्यदेव च सर्वत्र प्रत्ययार्थनिबन्धनम्॥§ 3172

ओदनं पचति ग्रामं गच्छतीति धात्वर्थापवर्गलभ्यमेकं कर्म, अपरं पुनर्भावनाकर्म। तत्र कदाचिद्धात्वर्थकर्मैव भावनाकर्मत्वमपि प्रतिपद्यते पाकेनौदनं भावयतीति। कदा चित्पुनः स्वकर्मविशिष्टधात्वर्थयुक्ता भावना

कर्मान्तरेण युज्यते ग्रामगमनेन स्वार्थं भावयेदिति, ओदनपाकेन चेति। तच्चैतद्धात्वर्थात्परतस्तदवाप्यमात्रत्वेन गम्यमानं धात्वर्थान्तरतिरोहितं भावनाकर्मतया सर्वत्रावधार्यते। तच्च प्रायेणैवं कामशब्देनैव संबन्धमापद्यते। सुखकाम आसीत, स्वास्थ्यकामः शयीतेति। सत्यपि आसिशेत्योरकर्मकत्वे यः प्रत्ययेन करोत्यर्थोऽभिहितस्तत्कर्मत्वेन च स्वादीन्यवधार्यन्ते। तेन करोतेः सर्वदा सकर्मकत्वादकर्मकाख्यातानामपि च तत्सामानाधिकरण्यदर्शनात्किं करोत्यास्ते, किं करोति शेत इति सिद्धेवमादिष्वपि सकर्मिका भावना। § 3173

यजेरपि तु यत्कर्म पूज्यत्वाद्देवतेष्यते।
तदुज्झित्वैव पुत्रादेः कर्मत्वं भावनाश्रितम्॥ § 3175

तस्मात्सकर्मकाकर्मकयोरविशेषादासनेन भावयेदित्यपि प्रयोगसिद्धिः। कस्तर्हि सकर्मकाकर्मकयोर्भेदः। उच्यते— § 3176

साक्षादव्यभिचारेण धात्वर्थो यत्र कर्मभाक्।
सकर्मकः स धातुः स्यात्पारम्पर्ये त्वकर्मकः॥ § 3178

आसनशयनादौ हि न नियमेनाऽऽनन्तर्येण वेदं तदिति वा कर्म निरूप्यते, तेनाकर्मका अभिधीयन्ते। पचिगम्यादीनां तु विक्लिद्यत्तत्संयुज्यमानसाक्षात्संबन्धिकर्माव्यभिचारात्सकर्मकत्वं, न तु भावनाविशेषणे कश्चिद्विशेषः। सेयं भावनांऽशद्वयपरिपूर्णा सती सर्वकरणानामुपायाननुगृहीतानां करणत्वानुपपत्तेः कथं भावयेदितीतिकर्तव्यतामपेक्षते। सा च प्रत्यक्षादीनामनुग्राहकदर्शनशक्त्यभावादत्यन्तशास्त्रगम्येति यथासंनिकर्षं तदसंभवाद्वा यथाकथंचिदुपस्थाप्यमाना शास्त्रानुसारेण श्रुत्याद्युपदेशेन चोदनासामान्याद्यतिदेशेन वाऽत्यन्तादृष्टोपकारद्वारेणान्यथानुपपत्त्या कल्प्यते। ततः परिपूर्ण-
386 त्वादनुष्ठातुं योग्येति विधीयते। तद्विधानाच्चार्थापत्त्या यागादिविधानमित्युपपन्नं भावार्थसूत्रम्। **भवन्ति केचित्कर्मशब्दा** यागो यजनमिज्येत्युदाहर्तव्ये तत्सामानाधिकरण्यसिद्धश्येनैकत्रिकाद्युदाहरणं यागादिकरणत्वचोदनोत्तरकालभाविकर्मशब्दत्वेन पारतन्त्र्यात्सुज्ञानम्। स्वतन्त्राणां कथंचिदपि भावार्थत्वाशङ्कासंभवात्। यागादयो हि स्वातन्त्र्येणापि कदा चिदनुमानाद्भावार्थाशङ्काविषयाः स्युरिति। **के चिद्भावार्था न कर्मशब्दा** यथा भावयेत्कुर्यादिति चोदाहरणं भूत्यादयस्तु प्रयोज्यव्यापारवचनत्वान्नैव यथावर्णितभावार्था इत्यनुदाहरणम्। तत्र यथाकथंचिण्णिजन्तव्युत्पत्त्या भावशब्द एको नीयेत नेतरौ। तावपि तु प्रयोज्यव्यापारांशेन कथंचिदौभावार्थावित्युदाहृतौ। अथ वा द्वितीयसूत्रार्थव्याख्यानेन भावनाप्रयोजनत्वमंशवाचित्वेनास्तीति विनाऽपि सकलार्थाभिधानाद्भवन्ति भावार्थाः। कथं पुनरमी न कर्मशब्दा यदा धातुमात्रं कर्मशब्दत्वेनोक्तं, निर्विशेषस्य सामान्यस्यानुष्ठातुमशक्यत्वादकर्मशब्दत्वम्। अतो विशेषवाचिनामेव धातूनां कर्मशब्दत्वग्रहणादचोद्यमेत-

त्। यदि हि श्येनचित्रादर्शपौर्णमासशब्दाः फलैः संबध्येरंस्ततो यागकरणत्वाभावात्तत्सामानाधिकरण्यनिमित्तनामधेयत्वानुपपत्तेः प्रसिद्ध्यादिभिर्गुणविधित्वमेव स्यादतः **स्थित एतस्मिन्नधिकरणे** इत्याह। कस्मात्पुनरिदं तत्रैव न नीतं प्रमाणलक्षणेनासंबन्धात्। अथ नामधेयत्वं कस्मादत्र नाऽऽनीयते भेदलक्षणेनासंबन्धात्। तस्माद्यथान्यासमेव स्थितयोरर्थात्पौर्वापर्यसिद्धिः। **न चैषामर्थिनेति**फलपदाभिप्रायम्। **विविभक्तित्वादिति**। संबन्धनिमित्ताख्यातविभक्तिविगमादथ वा निष्पन्नार्थाभिधायिसुब्विभक्तिविशेषयोगो विविभक्तित्वम्। तस्मान्न द्रव्यादिशब्दानां फलसंबन्ध इति। आह च— § 3179

साध्यसाधनसंबन्धः सर्वदा भावनाश्रयः। 387
तेन तस्य न सिद्धिः स्याद्भावनाप्रत्ययादृते॥ १॥§ 3181

न तावत्प्रत्ययस्येष्टमपूर्वप्रतिपादनम्।
न च धातोः स्वतस्तत्स्यान्नाम्नो वा परतः समम्॥§ 3183

यदि हि भावनावचनस्यैवापूर्वप्रतिपादकत्वमिष्यते धातोर्वा प्रत्ययनिरपेक्षस्य ततो नामपक्षो दुर्बलः स्यादिह तु यथैव धातोः प्रत्ययसंबन्धानुगृहीतस्य भावनानुरञ्जननिमित्तं करणवाचित्वं भवत्येवं नामपदस्यापीत्यविशेषः॥ २॥ § 3184

यदुक्तं यदेकस्मादपूर्वं तदेतरत्तदर्थं भविष्यतीति तद्गतं तावद्वस्तुधर्मेण विशेषं दर्शयति। कथम्— § 3185

बह्वदृष्टप्रसङ्गाद्धि धर्मो नेष्टः पदे पदे।
नाम्नः फलेन संबन्धे परिहारो न तस्य च॥§ 3187

एकस्माददृष्टे कल्पिते यदीतरद् दृष्टार्थत्वेन तादर्थ्यं भजते ततो लाघवं लभ्यते। अस्य तु तादर्थ्यसिद्धये ततोऽपि पुनरदृष्टं कल्प्यत एव ततो वरं फलेनैव सर्वाणि संबद्धानि। न च संबन्धवैरूप्यक्लेशाश्रयणं, नाम्नश्च फलसंबन्धेऽवश्यं धात्वर्थस्तदनुग्रहार्थोऽभ्युपगन्तव्यः। स च स्वयं निष्पाद्यः सिद्धरूपस्य नामार्थस्य न शक्नोति दृष्टेनोपकर्तुम्। न हि नामार्थस्तमपेक्षते शब्दप्र- 388
योगवेलायामेव निष्पन्नतया गम्यमानत्वादपेक्षणीयस्य वा सिद्धत्वेनायोग्यत्वात्प्रयुज्यतेऽस्मिन्निति चाभिधेय एव प्रयोगः। तदाधारैव हि निष्पन्नरूपोपलब्धिरनुत्पन्नत्वे क्रियारूपस्य वक्तव्ये विनाशित्वप्रदर्शनं निष्पन्नस्यापि क्षणिकत्वेन पुनः पुनर्निष्पत्त्यपेक्षोपपत्तेः। तेभ्यः पराकाङ्क्षा—अन्याकाङ्क्षा, निष्पाद्यत्वेन वा प्रधानाकाङ्क्षा न विद्यत इत्यध्याहारः। अथ वा तेभ्यः परा—दूरे, आकाङ्क्षेत्यर्थः। कुतः, भूतत्वादेवेति। स्वरूपकथनार्थमुपन्यस्तं निष्पन्नत्वादेवेति। पुनरन्ते तदेव हेतुत्वेनोद्दिष्टं सूत्रकारेण॥ ३॥ § 3188

---

१४ धानाकाङ्क्षा] निष्पाद्यत्वेन प्रधानस्य सतो या साधनाकाङ्क्षा सा न विद्यते निष्पाद्यत्वाभावादित्यर्थः।

आख्यातवर्ती धात्वर्थः साध्यरूपः प्रतीयते।
तस्मिन्फलवतीष्टे तु नाम्नो दृष्टार्थतेष्यते॥ § 3190

धात्वर्थस्तावत्प्रकृत्यैव साध्यात्मको विशेषतस्त्वाख्यातगतेन धातुनोच्यमानः। स यदि फलसाधनत्वेन चोद्यते ततोऽसिद्धरूपत्वात्तस्य साधनाकाङ्क्षायां सत्यां नामपदं गुणविधित्वेन नामधेयत्वेन वोभयथाऽपि दृष्टेनैव तादर्थ्यं लभते। ननु नामधेयपक्षे नामपदमपि साध्यार्थं भविष्यतीति धातुतुल्यं स्यात्। न। तस्य फलसंबन्धे गुणविधित्वेन सिद्धार्थत्वात्। अपि च— § 3191

389 साध्यात्मकोऽपि धात्वर्थो यदा नाम्नाऽभिधीयते।
तदा द्रव्यवदेवासौ निष्पन्नात्मा प्रतीयते॥ § 3193

यद्यपि वस्तुस्वरूपेण धात्वर्थः साध्यस्तथाऽपि नामपदेनोच्यमानो लिङ्गसंख्यायोगित्वात्सिद्धरूपोऽभिधीयते। अभिधानकृता चाऽऽकाङ्क्षोत्पत्तिर्न वस्तुकृता। तस्माद्युक्ता धातोरेवाऽऽकाङ्क्षा न नाम्न इति। **किंचाऽऽश्रितत्वात्प्रयोगस्य** इति। अधुना शब्दप्रत्यासत्तिकृतो विशेषोऽभिधीयते। पुरुषव्यापारात्मिकायां भावनायां धात्वर्थोपश्लेषोऽपि पुरुषेणाऽऽश्रितस्तदतिक्रमहेत्वभावाच्च न नामपदग्रणम्। तस्मादस्ति विशेषः॥ ४॥ § 3194

इति भावार्थाधिकरणम्॥ १॥

## ०.०.२९ अपूर्वाधिकरणम्

390 सिद्धं कृत्वाऽपूर्वं तत्प्रतिपत्त्युपायशब्दविशेषविचारः कृतः। तस्य सिद्धत्वमेवाप्रसिद्धमतस्तदेव तावत्प्रतिपादनीयमित्यत आह— § 3196

फलाय विहितं कर्म क्षणिकं चिरभाविने।
तत्सिद्धिर्नान्यथेत्येवमपूर्वं प्रति गम्यते॥ § 3198

वेदवाक्योपात्तस्वर्गयागादिसंबन्धान्यथानुपपत्त्या चोदनयैवापूर्वमपि चोदितं भविष्यतीति प्रमाणवत्। तस्मादस्त्यपूर्वमिति। अत्रापरे निपुणंमन्यास्तन्निराकरणमाहुः— § 3199

प्रमाणपञ्चकाज्ञानादपूर्वं षष्ठगोचरः।
तस्मादन्वर्थनामैतन्न वस्तुत्वेन गम्यते॥ § 3201

वस्त्ववबोधनार्थानि प्रत्यक्षादीनि पञ्च प्रमाणानि। तद्यत्र तानि न प्रवर्तन्ते तदभावेनाभावात्मनैवावगम्यते। न चापूर्वे तानि प्रवर्तन्ते। तस्मात्सर्वप्रमाणापूर्वत्वादन्वर्थनामैवासद्रूपमपूर्वं प्रतिपत्तव्यम्। तत्र प्रत्यक्षेण ताव-

न्नावगम्यते, रूपाद्यनात्मकत्वेन चक्षुरादिभिरसंबन्धात्। नाप्यनुमानेन, केनचिल्लिङ्गेन सहादृष्टसंगतित्वात्। न हि विशेषतः सामान्यतो वाऽस्य केनचित्संबन्धोऽनुभूतपूर्वः। सर्वत्रैव च वस्तुसत्ताबोधायानुमानमपर्याप्तमित्युक्तं प्राक्। § 3202

पदवाक्ये न चैतस्य वाचके शृणुमः क्वचित्।
शब्दगम्यत्वमप्यस्य तेन नैवोपपद्यते॥ § 3204

आगमिकत्वमप्यस्य पदेन वोच्यमानस्य स्याद्वाक्यगम्यस्य वा। तत्र पदं न तावत्किंचित्साक्षादेतस्य वाचकमस्ति। यत्त्वपूर्वमिति तदन्वर्थत्वात्सुतरामस्तित्वं बाधते। न च प्रमाणान्तरानवगतेऽर्थे पदं प्रवर्तते। न च स्वातन्त्र्येण प्रमाणमिति स्थितम्। तथा च वाक्यस्यावाचकत्वादेवाप्रामाण्यम्। न च केचित्पदार्थाः श्रूयन्ते येषां भेदः संसर्गो वाऽपूर्वं भवेत्। येऽपि शब्दान्तरादयः श्रुतिलिङ्गादयश्च शब्दप्रकारास्तेऽपि च स्वभावसिद्धे वस्तुनि भेदे विनियोगे वा कारणं न सद्भावे कस्यचिदित्यपूर्वं प्रत्यप्रमाणम्। उपदेशानवगते चातिदेशोऽपि न प्रवर्तते। विधिप्रतिषेधविषयत्वाच्च समस्तस्य वेदस्य न क्वचिद्वस्तुस्वरूपप्रतिपादनार्थत्वं भवतीति नाऽऽगमगम्यमपूर्वम्। न चादृष्टपूर्वस्यादृष्टसदृशस्य चोपमानविषयत्वम्। कामं वाऽनुपलभ्यमानशशविषाणादिसारूप्यादभावात्मकत्वोपमानप्रसङ्गः। तस्मादसद्रूपेणोपमेयम्। § 3205

अर्थापत्त्याऽपि नैवैतदस्तीत्येवं प्रतीयते। 391
अन्यथाऽप्युपपन्नत्वात्फलयागादिसंगतेः॥ § 3207

दृष्टार्थापत्तिस्तावद्धर्मास्तित्ववदेवात्रापि निराकर्तव्या। स्वभावादिनाऽपि ईश्वरदरिद्रादिवैचित्र्योपपत्तेः। श्रुतार्थापत्तिरपि कीदृशी भवति यत्र प्रत्यक्षेणैवानुपपत्तिर्दृश्यते। न च कल्प्यमानोऽर्थः केन चिद्विरुध्यते, तद्यथा 'स्रुवेणावद्यति' इत्युक्ते न च कथंचिदपि मांसपुरोडाशादीनि तेनावदातुं शक्यन्त इति। प्रत्यक्षगम्यत्वात्। अपि च तत्रापि प्रसक्तेरेवं कल्प्यते द्रवाणामिति। न चैषा कल्पना केन चिद्विरुध्यते श्रुतहान्यश्रुतपरिकल्पनाभावात्। अपूर्वं तु न कदाचित्फलसाधनत्वेन संभाव्यते। यतोऽन्यकारणनिषेधे सति तद्विषया परिशेषसिद्धिः स्यात्। § 3208

यदि त्वन्यनिवृत्त्यैव परिशेषः प्रकल्प्यते।
शशशृङ्गनिमित्तत्वं फलानां किं न गम्यते॥ § 3210

न हि कारणान्तरप्रतिषेधमात्रेणापूर्वनिमित्तता गम्यते, शशविषाणादिभिरनैकान्तात्। अपि च यदि तावदपूर्वं यागस्य साध्यमिष्यते ततः श्रुतं स्वर्गं परित्यज्याश्रुतं परिकल्पितं भवेत्। अथ फलं प्रति साधनभूतं, ततः

३ मित्युक्तं] सत्ता च नानुमानेन कस्यचित्सप्रतीयते इत्यनेन प्रत्यक्षसूत्रे श्लोकवार्तिके उक्तमित्यर्थः।

श्रुतयागपरित्यागात्सैव गतिः। न चाऽऽकारान्तरेण तन्निरूपयितुं शक्यते। तेनाऽऽगमप्रामाण्याद्यागादेव फलेन भवितव्यम्। कथं नष्टः साधयतीति चेत्। यदि शास्त्रादेवं गम्यते किं भवतो विरुध्यते। ध्रियमाणेन वा फलं साधनीयमित्यत्र किं प्रमाणम्। अपि चाऽऽकाशादीनि नित्यावस्थितानि कस्मात्फलं न साधयन्ति। यदि च श्रूयमाणातिरेकेणावस्थायित्वसंभवादपूर्वेण फलं साध्यत इति कल्प्यते ततो वरमाकाशादेरेव कल्पितं, तस्य हि स्थानसद्भावावपि तावत्प्रसिद्धौ केवलं फलनिमित्तत्वमाश्रयणीयम्। अपूर्वे तु सद्भावप्रभृति सर्वं निष्प्रमाणकं कल्पनीयम्। अथ यागसंबन्धिना केनचिदवस्थितेन फलं दातव्यमित्यभिप्रायः। तथा सत्यपि— § 3211

यष्टुरेवाऽऽत्मनो यागैः संगतस्य स्थितस्य च।
निमित्तत्वं वरं क्लृप्तं लाघवं हि तथा सति॥§ 3213

यदि यागस्य विनाशित्वादन्येन तत्संबन्धिना फलं साध्यमानं यागेन साधितं भवति ततो लाघवादतिक्रान्तयागेनाऽऽत्मनैव वरं साधयितव्यम्। § 3214

यद्वा कर्मविनाशोऽयं फलं नः साधयिष्यति।
भङ्गियागविधानाद्धि तदयत्नेन कल्प्यते॥§ 3216

392 विनाशिनि हि कर्मणि चोदिते किं दृश्यते, कर्म च विनष्टं शास्त्रप्रत्ययाच्च कालान्तरे फलं भविष्यतीति निश्चीयते। यच्च यत्, प्रतीत्योपजायते तत्र तस्य निमित्तत्वमित्यवधार्यते। तस्मादभावनिमित्तमेव फलमस्तु। स्यादेतत्। न क्वचिदवस्तुनः साधकत्वं दृष्टमिति। तदुच्यते। अपूर्वस्य वा क्व दृष्टं येनात्राऽऽश्रीयते तदवश्यकर्तव्ये लौकिकनिमित्तधर्मातिक्रमे किमपूर्वनिमित्तत्वं कल्प्यतामुताभावनिमित्तत्वमिति, क्लृप्ताभावनिमित्तत्वातिलङ्घनेन काल्पनिकापूर्वनिमित्तत्वपरिग्रहो न युज्यते। किं च— § 3217

यदि चैकान्ततो ब्रूयुः शब्दाः कालान्तरे फलम्।
ततस्तेनैव कल्प्येत निमित्तं वस्तु किंचन॥§ 3219

क्रियाफलसंबन्धप्रतिपत्तिमात्रचरितार्थासु चोदनास्वनुपात्ते कालान्तरे कर्मस्वभावादानन्तर्ये गम्यमाने कुत एतत्कालान्तरभावि फलं तत्सिद्ध्यर्थं चापूर्वं कल्प्यत इति। तत्रैतत्स्यात्। कृते कर्मण्यनन्तरं फलमनुपलभ्य कालान्तरफलोत्पादद्वारमपूर्वकल्पनमिति। तदयुक्तम्। कुतः— § 3220

---

१ रेण] साध्यसाधनभावरहिताकारान्तरेण नापूर्वं निरूपयितुं शक्यमित्यर्थः।
१८ च्च] यच्चेति-यच्च-फलं, यत्-विनष्टं. कर्म, प्रतीत्य-अधिगम्य, प्राप्येत्यर्थः।
२१ मे] यल्लोके तृप्त्यादिफलोत्पत्तिनिमित्तस्य भोजनादेः क्रियात्वं धर्मो दृष्टस्तदतिक्रमेत्यर्थः।

पूर्वं निश्चित्य शास्त्रार्थं प्रयोगे हि प्रवर्तते।
प्रयोगोत्तरकालं तु न शास्त्रार्थोऽवधार्यते॥§ 3222

*'नह्यविद्वान्विहितोऽस्ति' इति तावदवश्यं यावच्छास्त्रगम्यं तत्सर्वं प्रागनुष्ठानादवगन्तव्यम्। न च तत्काले कर्मफलकालवियोगज्ञानकारणमस्ति। यच्च शास्त्रप्रवृत्ति वेलायां तदन्तर्गतत्वेन नावधारितं तदुत्तरकालमेवावधार्यत इति कुत एतत्। अपि च— § 3223

सर्वकर्तृष्वशक्तत्वाद्वैगुण्यं संप्रतीयते।
तेन च प्रतिबद्धत्वान्नार्थापत्तिरपूर्वभाक्॥§ 3225

दृश्यत एवानन्तरफलानुत्पत्तिकारणवैगुण्यमिति न कालान्तरफलसिद्ध्यर्थमपूर्वं कल्पनीयम्। अनैकान्तिकी हि तदाऽर्थापत्तिर्वैगुण्यमेव वरमननुभूतमपि कल्पयेत्। न च जन्मान्तरफलोत्पत्त्यर्थमपूर्वकल्पना॥ कुतः— § 3226

सुखदुःखात्मकत्वेन समानेष्वेव जन्मसु।
क्रियानन्तरमेवेह स्तः स्वर्गनरकावपि॥§ 3228

न हि स्वर्गनरकौ नाम निरतिशयसुखदुःखस्वभावौ देशविशेषात्मकौ वा 393
याविहैव जन्मनि नानुभूयेयाताम्। अलौकिकानां जिहासोपादित्सानुपपत्तेः। ये तु लौकिके प्रकृष्टे सुखदुःखे ते कर्मानन्तरमेव संभाव्येते इत्यविशेषः। किं च— § 3229

प्रतिषेधेषु चापूर्वं न शास्त्रार्थेन जन्यते।
तदतिक्रमजन्यं तु न भवेच्छास्त्रपूर्वकम्॥§ 3231

'ब्राह्मणो न हन्तव्यः' इति हि निवृत्तिः शास्त्रार्थः। न च तया कालान्तरे किं चिज्जनयितव्यमिति नापूर्वकल्पनामपेक्षते। हननस्य तु नरकपातः फलं, तद्यदि तेना पूर्वं जन्येत ततो हननस्याचोदितत्वाल्लौकिकक्रियाजन्यं सदपूर्वं न वेदमूलं स्यात्। कल्पितमपि च तन्निष्क्रियत्वान्नैव देशान्तरे शरीरादिप्रापणसमर्थमित्यनर्थकम्। न चास्याऽऽश्रयः संभवति, क्रियाश्रयस्य पुरोडाशादेर्विनष्टत्वात्तद्व्यतिरिक्ते चाऽऽरम्भानुपपत्तेः। एवमङ्गापूर्वाण्यपि निराकर्तव्यानि। किं च— § 3232

अङ्गानि यदि वाऽपूर्वं कुर्वन्त्यारादवस्थितम्।
असंबन्धात्प्रधानानां न स्यात्तेनोपकार्यता॥§ 3234

---

३ *] ( अ॰ ३ पा॰ ८ अ॰ ८ सू॰ १८ )।
७ त्त] सर्वेषु पदार्थेषु बहवः कर्तारस्तेषु मध्ये, क्वचित्पदार्थे कस्यचित्कर्तुरशक्तेरपरिहार्यत्वादित्यर्थः।
१७ विशेषः] स्वर्गनरकयोरप्यैहिकत्वेन पश्चादेरविशेष इत्यर्थः।

न हि कल्पितमप्यङ्गापूर्वं प्रधानैरसंबन्धमानमुपकर्तुं समर्थं, न चामूर्ते प्रधाने तदपूर्वे वा निपतितुं समर्थम्। यदपि न प्रोक्षणादिनिमित्तं द्रव्यसमवायि तदपि तन्मात्रोपक्षीणत्वादन्यत्रासंचरन्नैव फलसाधनस्यापूर्वस्योपकुर्यात्। अथ त्वङ्गापूर्वाण्यपि यजमानात्मन्येवावतिष्ठेरन्, एवं सति पुरुषार्थत्वापत्तेः कर्माङ्गत्वहानिः स्यात्। अपि च युगपत्प्रयोगवचनेन ग्रहणादङ्गापूर्वैर्युगपदेवोपकर्तव्यम्। न च परस्परेणासंबद्धानां यौगपद्यं संभवति। न चैषां कश्चित्संबन्धे हेतुरस्ति। एतेन प्रधानापूर्वाणां फले यौगपद्यं प्रत्युक्तम्। § 3235

तस्मात्कृतत्वमात्रेण प्रधानं पुरुषे फलम्।
अङ्गानि च प्रधानेषु जनयन्तीति गम्यते॥§ 3237

न चापूर्वस्योत्पत्तिरभिव्यक्तिर्वोपपद्यते। कुतः— § 3238

न तावद्युगपज्जन्यं कर्मभिः क्रमवर्तिभिः।
न चानवयवत्वात्तत्क्रमशोऽपि प्रतीयते॥§ 3240

एवं तावन्नोत्पद्यते। न चाभिव्यज्यते। कथम्। § 3241

इन्द्रियार्थोभयेषां नः संस्काराद्व्यक्तिरिष्यते।
न च यागादिभिः किंचित्संस्कृतं संप्रतीयते॥§ 3243

सर्वाभिव्यक्तीनां त्रयान्यतमसंस्कारद्वारत्वात्संस्कारान्तरमवश्यं कल्पनीयं
394 ततः पुनः स एव क्लेश इत्यप्रमाणता। यदि च क्रियानन्तरमपूर्वमुपलभ्येत ततोऽभिव्यज्यत इति ब्रूयाम। यदि चास्य प्रागस्तित्वे प्रमाणं भवेत्। न तु तदुभयमप्यस्तीति। सर्वथा नास्त्यपूर्वं। न चैतत्सूत्रं तत्प्रतिपादने विस्पष्टमित्यव्याख्यानमेतत्। अत्रोच्यते। यदिदं स्वमतिपरिकल्पितं विग्रहवदिवापूर्वं भवद्भिर्निराक्रियते न तेनास्माकं किंचिद्विरुध्यते। यतो नैतत्तादृशं कस्यचिदिष्टं, किं तर्हि— § 3244

कर्मभ्यः प्रागयोग्यस्य कर्मणः पुरुषस्य वा।
योग्यता शास्त्रगम्या या परा साऽपूर्वमिष्यते॥§ 3246

प्रधानकर्मणामङ्गकर्मणां वा प्राक्करणात्स्वर्गादिप्राप्त्ययोग्याः पुरुषाः क्रतवश्च स्वर्गकार्यायोग्याः। तामुभयीमप्ययोग्यतां व्युदस्य प्रधानैरङ्गैश्च योग्यतोपजन्यत इत्यवश्यं सर्वेणाभ्युपगन्तव्यम्। असत्यां तस्यामकृतसमत्वप्रसङ्गात्। सैव च पुरुषगता क्रतुगता वा योग्यता शास्त्रेऽस्मिन्नपूर्वमित्यपदिश्यते। यत्तु प्रत्यक्षादिगम्यत्वमस्य नास्तीति सत्यं, श्रुतार्थापत्तिव्यतिरिक्तैर्न गम्यते स त्वदोषः। किं कारणम्— § 3247

श्रुतार्थापत्तिरेवैका प्रमाणं तस्य वेष्यते।
शब्दैकदेशभावाच्च स्वार्थेष्वागम एव नः॥§ 3249

येन वाक्येन यागात्स्वर्गो भवति प्रयाजादिभिश्च प्रधानोपकारो भवतीत्येतच्चोद्यते तेनावश्यं विनष्टानामविनष्टानामपि चैषां काऽपि स्वकार्योत्पादनशक्तिरस्तीत्यभ्युपगन्तव्यं सर्वभावानामशक्तानां कार्यारम्भाभावात्। नियोगतश्चात्रातीतानामेवं शक्तिरेष्टव्या। कुतः— § 3250

क्षणिकत्वेन सर्वत्र नैकस्यापि हि कर्मणः।
कथं चिद्युगपद्वृत्तिः फले किमुत भूयसाम्॥§ 3252

यदेव हि कर्म गृहीतं तदेव हि क्षणिकसूक्ष्मावयवत्वात्फलं प्रति युगपद्भवितुमसमर्थं किमुत यान्यनेकात्मकानि दर्शपूर्णमासप्रभृतीनि। यदा हि पूर्णमासो भवति न तदा दर्शो यदा दर्शस्तदा पूर्णमासश्चिरविनष्टस्तथैकस्मिन्नेव समुदाये यदाऽऽग्नेयस्तदाऽग्नीषोमीयोपांशुयाजौ न स्तः, यदा तयोरेकस्तदेतरौ न विद्येते इति यौगपद्यासंभवः। तद्यदा दर्शपूर्णमासस्तदवयवो वा कांचित्पुरुषे शक्तिमनाधायैव विनश्येत्ततः प्रागवस्थातुल्यत्वादुत्तरकर्मणां पूर्वैः सह रूपतः शक्तितो वा साहित्याभावान्न केवलकरणोत्कश्चिद्विशेष इति सहितसाध्यत्वेन श्रुतं फलं साहित्यासंपत्त्या नोपपद्येत। न हि केवलो दर्शस्तत्साधनत्वेन श्रूयते तदन्त्यं वा कर्म। नियोगतश्च कर्मानन्तरफलोत्पत्तिवादिनाऽपि सर्वकर्मान्ते साऽभ्युपगन्तव्या। ततश्च यस्यैवाऽऽनन्तर्यं तदेवैकं साधनं प्राप्नोति नेतराणि चिरविनष्टत्वात्। अथ तु सर्वेषामपूर्वाख्याः शक्तयस्तिष्ठन्ति ततः स्वरूपाणामतन्त्रत्वात्तेष्वसत्स्वपि शक्तिगतमेव यौगपद्यं व्यवहाराङ्गत्वादौव्यापरिष्यते। तथा चाऽऽह— § 3253

शक्तिभिः सर्वभावानां व्यवहारानुपातिता। 395
तेनान्यदेशकालेऽपि रूपे ताभिः स सिध्यति॥§ 3255

लौकिकं चापि यत्कर्म फले कालान्तरोद्गतौ।
तत्रापि शक्तिरेवाऽऽस्ते न त्वपूर्वमिहेष्यते॥§ 3257

यान्यपि च लौकिकानि कृषिघृतपानाध्ययनप्रभृतीनि कर्माणि कालान्तरफलत्वेनेष्यन्ते तेषामपि स्वरूपावस्थानासंभवात्संस्कारैरेव तिष्ठद्भिर्व्यवहारसिद्धिः। ते त्ववैदिक त्वात्संस्कारा नापूर्वशब्दाभिधेयत्वेन प्रसिद्धाः। तेन प्रागेवानुष्ठानाच्छास्त्रश्रवणवेलायामेव क्षणिकानेकाङ्गप्रधानप्रयोगसाध्यं फलं विदित्वा शास्त्रप्रत्ययादेषा बुद्धिर्भवति नूनं केनाप्यात्मना समस्तान्यङ्गप्रधानानि फलकालं यावत्तिष्ठन्तीति। प्रत्यक्षं च स्वरूपभङ्गदर्शनान्न शक्तिव्यतिरिक्तात्मावस्थानोपपत्तिः। यत्तु श्रुतहान्यश्रुतकल्पनाप्रसङ्ग इति। तन्न— § 3258

यागादेव फलं तद्धि शक्तिद्वारेण सिध्यति।
सूक्ष्मशक्त्यात्मकं वा तत्फलमेवोपजायते॥§ 3260

यदि ह्यसंबन्धिना केनचित्फलं साध्येत ततो दोषः स्यात्। यागाहितया तु शक्त्या साध्यमानं यागेनैव साधितं भवति। सर्वसाधनानामिष्टफलप्रवृत्तावान्तरालिकव्यापारावश्यंभावित्वात्। अथ वा सर्वमेव कार्यं दध्यादि क्षीरादेरुत्पद्यमानं न सहसैव स्थूलेनैवाऽऽत्मनोत्पद्यते। किं तर्हि, सूक्ष्माणि तावद्रूपान्तराण्यनुभवति। एवं स्वर्गादयोऽप्यङ्कुरादिस्थानीयां तावदपूर्वावस्थां प्रतिपद्यन्ते तया चोत्पद्यमानया त एवोत्पन्ना भवन्तीति। एतावानेव चात्र वर्तमानःकालो यदच्युतिः कर्मसंकल्पात्प्रभृत्यासर्वान्त्यफलावयवोपभोगात्। आह च— § 3261

काष्ठैः पक्तव्यमित्युक्ते निर्दिष्टा ज्वलनक्रिया।
अङ्कुरे जायमाने च वृक्षोऽप्युत्पन्न इष्यते॥ § 3263

यत्तु संभावनापदमपूर्वं नाऽऽरूढमिति। तदयुक्तम्। कुतः § 3264

विनाशित्वेन विज्ञातं साधनं लोकवेदयोः।
*असंभावितसामर्थ्यस्थायित्वं चोद्यते कथम्॥ § 3266

नूनं विनष्टस्याप्येतस्य सामर्थ्यं फलनिर्वृत्तिकालावधिं यावदास्त इति हि यावन्नावधार्यते तावद्विनाशिनी क्रिया चोदयितुमेवाशक्या। तस्मात्संभाव-
396 नाऽवधारणा च प्रथममेव सिद्धेति। § 3267

न वाऽतिक्रान्तयागेभ्यः पुरुषेभ्यः फलोद्गतिः।
अतिक्रान्तानतिक्रान्तविशेषस्तव नास्ति हि॥ § 3269

यदि ह्यनाहितसंस्कारा एव यागा नश्येयुस्ततः प्रागवस्थातुल्यत्वादतिक्रान्तानतिक्रान्तयागयोः को विशेषः स्यात्। आत्मत्वं तावदविशिष्टमुभयोः। यागत्वमपि हि विनष्टाकृतयागयोस्तुल्यम्। न च क्रियारहितस्यावस्थान्तरगतस्य वा कर्तृत्वमवतिष्ठते। कर्तृशक्तिस्तिष्ठतीति चेत्। न। तस्याः प्रागपि यागकरणाद्विद्यमानत्वेनाकरणत्वात्। अपि च यदि पुरुषः फलसाधनं सर्वकर्मणां शुभाशुभानामविशिष्ट इत्येकरूपफलप्रसङ्गः। तथैकेन यागेन बहुभिश्च तदतिक्रमलक्षणलक्षितत्वाविशेषाद्बहुयाजिनः फलविशेषो न स्यात्। एतेनैव बहुप्रयोगानुष्ठायिनः प्रत्युक्ताः। कर्त्रनभिधायिति वाऽऽख्याते कथमयमर्थो विज्ञायते। यस्य त्वपूर्वाणि क्रियन्ते तस्य प्रतिकर्म प्रतिप्रयोगं च तद्भेदादुपपन्ने फलनानात्ववैचित्र्ये। किं च। § 3270

अङ्गमध्येऽपि कर्तैव भवेच्चेदुपकारकः।

६ एतावानेव] यदा च स्थाय्यपूर्वं शक्त्यात्मकत्वात्कर्मफलाभ्यामनत्यन्तभिन्नं तदा फलं भावयेदनेनेत्थमिति त्रयाणामपि भावनांशानां यौगपद्याभिधानमपि कर्मफलकालयोरविच्छेदादुपपन्नं भवतीत्याह एतावानित्यादिना।

१३ *] न संभावितं सामर्थ्यरूपेण स्थायित्वं यस्येति विग्रहः।

प्रसङ्गसिद्धेरङ्गानामप्राप्तिर्विकृतौ भवेत्॥§ 3272

प्रयाजादीनामपि क्षणिकत्वात्स्वरूपसंनिध्यभावे भवत्पक्षे कर्त्रैव प्रधानोपकारः कर्तव्य इति सोऽपि चापूर्वाभावात्कर्त्रात्मन एवोपकारकस्तत्र येन प्रकृतौ प्रयाजादयः कृतास्तस्य विकृतिषु तद्गतोपकारसद्भावाद्विनाऽपि तन्त्रमध्यविधानेन तत्फलावाप्तेः प्रसङ्गलक्षणमस्तीति न पुनरङ्गान्यनुष्ठातव्यानि। तत्र 'प्रयाजे प्रयाजे कृष्णलं जुहोति' इत्यादीनि नोपपद्येरन्। नन्वत्यन्तकालभेदान्नैतत्प्रसज्यते। वक्ष्यत्यस्योत्तरम् 'अर्थस्याविकृतत्वात' इति। यदेव हि प्रत्यासन्नानि प्रति कर्त्रात्मकं तदुपकाररूपमिष्यते तदेव दूरस्थायामपि विकृतावित्यविशेषः। एते कर्मविनाशपक्षेऽपि दोषाः प्रसक्तव्याः। यस्यापि च कर्मविनाशादेव फलं भविष्यतीत्यभिप्रायस्तस्यापि शुभाशुभैकानेककर्मतत्प्रयोगविनाशानां प्रागभावप्रध्वंसाभावानां वाऽवस्तुत्वेनाविशेषात्फलभेदवैचित्र्यानुपपत्तिः। तथा हि— § 3273

एको रोगो हृतो यस्य यस्य वाऽपहृता दश।
अरोगित्वे तयोर्भेदो न कश्चिदपि दृश्यते॥§ 3275

यदि तु प्रतिकर्म विनाशानां वैचित्र्यमिष्यते तथा सति वस्तुत्वापत्तेर्वस्त्वन्तराभावाच्चापूर्ववस्त्वेव विनाशशब्देनाभिधीयेत। § 3276

न च कर्मविनाशेभ्यः स्वर्गादि श्रूयते फलम्।
विपर्ययाच्च नैतेभ्यो जातं यागस्य तद्भवेत्॥§ 3278

'यजेत स्वर्गकाम' इति हि श्रूयते न यागाभावं प्रतिपद्येतेति। तत्र 397 भावांशसाध्यसाधनसंबन्धनिष्ठे वाक्ये यस्तत्राभावांशसाध्यसाधनसंबन्धं कल्पयति तेन वेदस्तविदप्रमाणीकृतः। कुतः। कर्मविनाशप्रभवं हि सदेतन्न कथंचित्कर्मसम्बन्धीति शक्यं वदितुम्। अत्यन्तविपरीतत्वात्। न ह्यग्न्यातपप्रभवो दाहः शैत्यसंबन्धीत्युच्यते। अथ वा यथैव यागाच्छ्रुतं तदभावात्कल्प्यते तथैव स्वर्गे श्रुते तदभावः फलमित्यपि कल्प्येत। अपूर्वपक्षेऽपि तुल्यमिति चेत्। न। तस्य कर्मफलशक्त्यात्मकत्वेनात्यन्ताभेदात्। उक्तं ह्येतत्पुरस्तात्। अपूर्वेण क्रियमाणं यागेनैव क्रियते, अपूर्वे वा कृते फलमेव कृतं भवतीति। न च लोकेऽपि कश्चिदभावः कारणत्वेन दृष्टः। यदि तु क्वचिदुदाह्रियेत, शक्यं तत्र भावान्तरं दर्शयितुं न त्वत्रापूर्वादृते तादृक्किंचिदस्ति। यत्त्वपूर्वस्यापि नैव कारणत्वं दृष्टमिति तदयुक्तम्। सर्वत्र शक्तिसामान्योपलम्भात्तद्विशेषमात्रत्वाच्चापूर्वस्य। यत्तु शास्त्रेण कालान्तरफलं नाऽऽश्रितं प्रयोगोत्तरकालकल्पना च शास्त्रेऽन्तर्भवति। तस्मादानन्तर्यमेव चोदितमिति। तत्र यथाश्रुतक्षणिकानेककर्मानन्तर्यं न संभवतीत्युक्तं प्राक्। स्वर्गनरकौ च निरतिशयसुखदुःखात्मकत्वाद्देशान्तरजन्मान्तरानुभवनीयौ न कर्मानन्तरं संभवत इति षष्ठाद्ये वक्ष्यामः। § 3279

७ म्] ( अ० १२ पा० १ अ० १ सू० ४ )

ऐहिकं चापि पुत्रादि क्रमजन्मस्वभावकम्।
न कर्मानन्तरं कश्चित्फलं लब्धुं व्यवस्यति॥§ 3281

न च ग्रामादिसंप्राप्तिः केवला फलमिष्यते।
उपयोगश्चिरेणैषां न निमित्ताद्विना भवेत्॥§ 3283

चिरकालोपभोगफलात्मकत्वाद्ग्रामादीनां क्रियानन्तरं तादात्म्यासंभवे सति यत्रैवान्तराले निमित्तं क्षीणं तत्रैवापहारः प्रसज्येतेत्यवश्यं समस्तोपभोगं यावदवस्थितेन केन चिद्भवितव्यम्। ततश्च प्रागेव प्रयोगादित्थमवधारणात्कर्तृवैगुण्याशङ्क्याऽर्थापत्तेरनैकान्तिकत्वमित्ययुक्तमेतत्। यत्तु प्रतिषेधेषु न शास्त्रगम्यमपूर्वमित्युच्यते। § 3284

विधेयेभ्यो यथाऽपूर्वं विधिशास्त्रेषु गम्यते।
तथैव प्रतिषेध्येभ्यः प्रतिषेधैस्तदुच्यते॥§ 3286

यथा हि लौकिकानामेव द्रव्यादीनां फलविध्युत्तरकालं वैदिकत्वाद्वेदगम्याऽपूर्वसिद्धिः, एवं ब्रह्महत्यादीनामनवगतनरकफलानां प्रतिषेधोत्तरकालभाविना वैदिकत्वेनैव नरकप्राप्तिसमर्थाऽपूर्वकल्पनोपपत्तिः। सत्यपि चास्य चलनादिक्रियारहितत्वे कर्तृसंबन्धमात्रेण तद्देशान्तरप्रापणादिक्रियासंबन्धाभ्युपगमान्निष्क्रियताऽनुपालम्भः। § 3287

आत्मैव चाऽऽश्रयस्तस्य क्रियाऽप्यत्रैव च स्थिता।
आत्मवादे स्थितं ह्येतत्कर्तृत्वं सर्वकर्मसु॥§ 3289

398 ह्यवदानप्रक्षेपादीनां हि सर्वेषां संकल्पादिद्वारेणाऽऽत्मैव कर्तेत्यवधारितम्। अतश्च ते प्रलीयमानास्तत्र स्वर्गाद्युपभोगशक्तिमाधाय प्रलीयन्त इत्यविरोधः। कथं विनष्टस्य कर्मणः शक्तिस्तिष्ठतीति चेत्। अत्राभिधीयते—
§ 3290

यदि स्वसमवेतैव शक्तिरिष्येत कर्मणाम्।
तद्विनाशे ततो न स्यात्कर्तृस्था तु न नश्यति॥§ 3292

कथमन्यशक्तिरन्यत्र समवेतीति चेत्। न। क्रियात्मनोरत्यन्तभेदाभावात्। अपि च— § 3293

शक्तिः कार्यानुमेयत्वाद्यद्गतैवोपयुज्यते।
तद्गतैवाभ्युपेतव्या स्वाश्रयाऽन्याश्रयाऽपि वा॥§ 3295

---

१८ स्थितं] ( अ॰ १-पा॰ १-सू॰ ५ ) इत्यत्र वृत्तिकारमतानुवादे प्रत्यक्षविसंवादपरिहारग्रन्थे भाष्य इति शेषः।

यदा कर्मविनाशात्तद्गता शक्तिरपि निष्प्रयोजना भवति, अवश्यं चासौ कल्पयितव्या, तदाऽस्याः स्वरूपवदेवाऽऽश्रयविशेषोऽपि कार्यक्षम एव प्रमातव्यः। तथाऽङ्गापूर्वाणा मप्यात्माश्रितानामेवैकार्थसमवायेन प्रधानैः संबद्धानामप्युपकुर्वतामाश्रयशेषत्वाभावादारादुपकारकत्वप्रसिद्धिः। यत्तु पुरुषार्थत्वं प्रसज्यत इति। नैष दोषः— § 3296

तादर्थ्येन हि शेषत्वं नाऽऽश्रयाश्रयिभावतः।
राजर्थौपयिकं नित्यमुष्ट्रो वहति कुङ्कुमम्॥§ 3298

न चामूर्त्तानामाश्रयाश्रयिभावेन न भवितव्यम्। आत्मसुखादिवत्तदुपपत्तेः। यत्तु व्रीह्यादिसमवायिप्रोक्षणादिनिमित्तं तण्डुलादिद्रव्यावस्थासंचरणपरम्परया दौव्यवदानं यावद्गतं तत्रापि प्रधानस्यापि केन चिदंशेन समवायात्तदीयापूर्वनिष्पत्तावेव व्यापृत्य निवर्तते। तेनैव चैषां नाऽऽरादुपकारकवदशेषप्रधानार्थत्वमभ्युपगम्यते। यथैव चैकार्थसमवायादङ्गप्रधानापूर्वाणां संबन्ध एवमङ्गापूर्वाणामन्योन्यं प्रधानापूर्वाणां च वक्तव्यः। ततश्च युगपत्कार्यारम्भसिद्धिः। कथं पुनः क्रमोत्पत्तीनां प्रधानापूर्वाणां क्रमवर्त्तिभिरेवाङ्गापूर्वैः प्रागूर्ध्वं चोत्पद्यमानैर्युगपदुपकर्तुं शक्यम्। केचित्तावदाहुः। अङ्गमध्यवर्तिषु प्रधानेषु पूर्वाङ्गापुर्वैर्निष्पन्नैरागामिभिश्च प्रक्रमवशात्प्रचलितावस्थैरेकैकं प्रधानं स्वापूर्वं साधयति। आतिथ्याबर्हिर्वच्च साधारण्यान्नैकप्रधानापूर्वनिष्पत्तौ तान्यपवृज्यन्ते। कथं पुनरनागतानामुपकारकत्वं भवति। एकान्तावधारणादौभोजनप्रत्यासत्तौ स्थालीपरिमार्जननिष्पत्तिवदिति द्रष्टव्यम्। ननु च यद्यनागतावस्थेष्वेतेषु प्रधानापूर्वाणि निष्पद्यन्ते ततो नैवोत्तराङ्गाणि कर्तव्यानि। कथं न कर्तव्यानि, यदा तत्करिष्यमाणतासंभावनया तानि निष्पन्नान्यपि तदकरणान्नापवृज्यन्ते। अन्ये पुनराहुः। एकैकमङ्गमितरेतरनिरपेक्षमात्मीयमात्मीयं तावदपूर्वं करोति, तथा प्रधानमप्याग्नेयादि यथाश्रुतसमस्ताङ्गापूर्वालाभात्तन्निरपेक्षं तदाऽनुत्पन्नप्रधानान्तरनिरपेक्षं च प्रथमकृतसामवायिकाङ्गापूर्वमात्रानुगृहीतं स्वापूर्वमेव तावत्साधयति। एवं यदा दर्शापूर्वाणि तदङ्गापूर्वाण्यपि समस्तानि निष्पन्नानि तदा तदीयब्राह्मणतर्पणानन्तरमपर्यायविधानाद्युगपत्प्रयोगवचनोपसंहारकल्पितमङ्गानि प्रधानानि च प्रति, तन्त्रभूतं 399 समस्तान्यङ्गापूर्वाण्यपूर्वात्मकमेकं युगपन्निरवयं प्रधानोपकारं कृत्वा निवर्तन्ते। ततश्च तद्वशेन प्रधानापूर्वाण्यप्येकफलोत्पत्तिशक्तिभूतं संहत्य सर्वाण्येकमपूर्वान्तरं जनयित्वाऽपवृज्यन्ते। तत्त्वाफललाभादजरं तिष्ठति। यदि पुनः प्रतिबन्धकरहितं तदानीं फलमेवोत्पद्यते ततोऽपि किं कल्पनीयमेवापूर्वम्। बाढम्। न हि तस्मादृते समस्तफलोपभोगसिद्धिरित्युक्तम्। अथ कस्मात्प्रात्यात्मिकान्येवाङ्गापूर्वाणि प्रधानोपकारकत्वं भिन्नानि च प्रधानापूर्वाणि फलबीजत्वं न प्रतिपद्यन्ते। सत्यं, न हि कश्चिदत्र दोषः। किं तु— § 3299

अर्थापत्तेरिहापूर्वं पूर्वमेकं प्रतीयते।
ततस्तत्सिद्धये भूयः स्यादपूर्वान्तरप्रमा॥§ 3301

प्रधानानां फलं प्रत्यङ्गानां च प्रधानानि प्रति युगपदुपादानादपेक्षावशेनैकापूर्वकल्पनया च तत्संबन्धोपपत्तेर्नेतरकल्पनाप्रमाणमस्तीत्येकमेव तावदवधार्यते। ततः पुनः क्रमवर्तिभिः कर्मभिस्तदशक्यं युगपत्कर्तुमिति तत्सिद्ध्यर्थं प्रात्यात्मिकापूर्वान्तरकल्पना भवति। सर्वत्र च— § 3302

प्रमाणवन्त्यदृष्टानि कल्प्यन्ते सुबहून्यपि।
अदृष्टशतभागोऽपि न कल्प्यो ह्यप्रमाणकः॥§ 3304

केचित्त्वत्र चोदयन्ति। यदि पौर्णमास्यां कृतान्यङ्गापूर्वाण्यमावास्यां यावत्तिष्ठेयुस्ततस्तैरेव कृतार्थत्वान्नैवाङ्गानि पुनः प्रसज्येरन्। एवं च सति 'त्रयोदशामावास्यायाम' इत्याहुतिसंख्या बाध्येत। अन्ये तु परिहरन्ति। साङ्गयोःपौर्णमास्यमावास्ययोः कालान्तरसंबन्धात्सर्वैरङ्गैर्द्विः प्रयुक्तेः समुदायद्वयस्योपकर्तव्यमित्यवधारणात्पुनः प्रयोगः सेत्स्यतीति। अथ वा, एवं वक्तव्यं साङ्गा पौर्णमास्यमावास्याऽसहिता स्वार्थं करोतीति करणविभक्तिश्रुतेरवगमात्पूर्वोक्तेनैव न्यायेन प्रधानापूर्वत्रयं स्वाङगापूर्वानुगृहीतमेकमपूर्वं कृत्वाऽपवृज्यते। तत्पुनरेवं निष्पन्नेनैवामावास्यापूर्वेण सहापरमपूर्वमारभेत। ततश्च निवृत्तेष्वङ्गापूर्वेष्वमावास्यायां क्रियमाणान्यङ्गानि न निराकरिष्यन्त इत्यदोषः। एतयैव च दिशोत्पत्तिविरोधः परिहर्तव्यः। आह च— § 3305

आवृत्तिभिर्यथाऽध्याये संस्कारो भवति क्रमात्।
वाक्यावयवरूपेण तथाऽपूर्वं भविष्यति॥§ 3307

400 न चामूर्तस्यावश्यमवयवैर्न भवितव्यम्। अनयैव ह्यर्थापत्त्या शक्यते वक्तुं सूक्ष्मावयवरूपेण तत्प्रतीयत इति। यदाऽप्यत्यन्तासतामनुत्पत्तेः प्रागवधृतास्तित्वमभिव्यज्यते तदाऽपि प्रतिपुरुषं कर्मभिः स्वीकरणात्फलाभिमुखकरणं शब्दादिविलक्षणाऽस्याभिव्यक्तिर्भविष्यति। तथा हि— § 3308

नैकरूपैव भावानामभिव्यक्तिः प्रतीयते।
आत्मस्थोन्मीलनं तेन व्यक्तिरस्य भविष्यति॥§ 3310

सर्वावाप्तिसमर्थो वा प्रकृत्यात्मा सदेष्यते।
कश्चित्तु प्रतिबन्धोऽस्य कर्मभिः सोऽपनीयते।§ 3312

---

१० ति] पञ्च प्रयाजास्त्रयोऽनूयाजा द्वावाज्यभागौ स्विष्टकृदित्येकादश। सांनाय्यस्य संप्रतिपन्नदेवताकत्वेन सह प्रक्षेपादाग्नेयेन सह प्रधानाहुतिद्वयमिति त्रयोदशत्वं ज्ञेयम्।

तस्मादस्त्यपूर्वम्। सूत्रस्यापि च न प्रकृतोपयिकमन्यमर्थं पश्यामः। तेनाऽऽरम्भचोदनैवापूर्वस्यापि चोदनेत्ययमेवार्थः। **यदि पुनः फलवचनसामर्थ्यात्तदेव** न विनष्टमिति, अपूर्वकल्पनानिष्प्रमाणकत्वं मन्वानो वरमेतदित्याह। न हि कर्मणां रूपमुपलभामह इत्ययुक्तं, *'रूपशब्दाविभागाच्च' इत्यत्र प्रत्यक्षोपलब्ध्यभिधानात्। यागप्रस्तावे च सति तस्याचलनात्मकत्वात्, **यदाश्रयं देशान्तरं प्रापयतीत्यसंबद्धम्**। अत्रोच्यते— § 3313

कालान्तरक्षमं रूपं कर्मणो नोपलभ्यते।
भङिगरूपोपलब्धिस्तु न फलायोपयुज्यते॥§ 3315

यद्यपि कर्मस्वरूपमुपलभ्यते तथाऽपि कालान्तरावस्थानाभावान्न तदुपयुज्यत इति नोपलभामह इत्युच्यते। § 3316

यागेऽपि प्रस्तुते चात्र चलनं यदुदाहृतम्।
तत्प्रक्षेपांशरूपेण यागेऽप्यस्तीति निश्चयात्॥§ 3318

न हि संकल्पमात्रेण फलनिष्पत्तिः। समस्तात्समस्तेतिकर्तव्यताकाच्च कर्मणः फलश्रवणात्तत्र दौव्यवदानप्रक्षेपादीनां ग्रहणासादनादीनां च संयोगविभागफलत्वात्स्थायित्वे तदाश्रयेणावश्यं भवितव्यम्। न चासावस्ति। न चाभिव्यक्तं रूपमुपलभ्यते। संकल्पादीनामपि संकल्पान्तरादितिरोधानान्नात्र स्वरूपावस्थानोपपत्तिः। अवस्थानं चाऽऽत्मसमवेतस्य वा स्यात्प्रदेयद्रव्यसमवेतस्य वा। न तावदात्मनि चलनं समवैति, सर्वव्यापिनः संयुज्यमानवियुज्यमानदेशासंभवे चलितुमसामर्थ्यात्। कथं सर्वव्यापित्वमस्येति चेत्सर्वत्रोपलभ्यमानकार्यत्वात्। अहंप्रत्ययेन हि चैतन्यस्वभावस्याऽऽत्मनोऽस्तित्व- 401
मात्रमवगम्यते न तु देशतः कालतो वा विशेष्यते। ततश्च— § 3319

अनवच्छिन्नसद्भावं वस्तु यद्देशकालतः।
तन्नित्यं विभु चेच्छन्तीत्यात्मनो विभुतेष्यते॥§ 3321

**सर्वत्र कार्योपलम्भ** इतिअहंप्रत्ययमेवाविशेषितं वदति। सुखदुःखाद्युपलब्धिर्वा। न हि क्व चिद्गतैस्ते नोपलभ्यन्ते। न चैते शरीरधर्मा इति स्थितमात्मवादे। तत्र यद्यसर्वगत आत्मा भवेत्ततो यदेव तद्गता देशेन शरीरं युज्यते तदेव सुखाद्युपलब्धिः स्यान्नान्यत्र। शरीरमात्रान्तर्गतात्मवादी त्वाह— **ननु तदेव देशान्तरादागमनस्य** लिङ्गम्। अतश्च विरुद्धहेतुत्वमस्येति। कुतः— § 3322

युगपद्यदि सर्वत्र कार्यमात्मगतं भवेत्।
ततः सर्वगतत्वं स्यात्पर्याये तु शरीरवत्॥§ 3324

४ *] ( अ० ६ पा० ३ अ० ३ सू० १२
)

यदि हि शरीराद्बहिरपि किंचिदात्मकार्यमुपलभेमहि शरीरान्तरे सुखदुःखादीन्वा ततः सर्वगतत्वमध्यवस्येम। यतस्तु स्वशरीरान्तर्वर्त्येव कार्यं यत्र यत्र च तद्गतिस्तत्र तत्र पर्यायेणोपलभ्यते तच्छरीरकार्यवदेव तत्सहितगतस्योपपत्स्यते। अन्यथा हि शरीरमपि सर्वगतं स्यात्। तस्माच्छरीरवदेवास्य तत्र तत्र गमनापत्तेः सुतरां सक्रियत्वप्रसङ्गः। संदेहो वाऽस्तु साधारणानैकान्तिकत्वात्। आह च— § 3325

आत्मा शरीरसंमिश्रस्तेनैव सह संगमात्।
तत्र तत्र सुखादीनि कार्याणि प्रतिपद्यते॥§ 3327

तत्रोत्तरं **न ह्यसत्यागमने किंचिद्विरुद्धमिति**। येषां तु **न तु तदेवेति** पाठः तेषां सिद्धान्तवाद्येव पर्यायेण सर्वत्राऽऽत्मकार्योपलम्भनमागमनलिङ्गत्वेऽप्यविशिष्टमाशङ्क्योत्तरं वदतीति ग्रन्थयोजना। कथं पुनरिदमुत्तरं **न ह्यसत्यागमन इति**। तथा हि— § 3328

नैवाविरोधमात्रेण स्वपक्षः सिध्यति क्वचित्।
परस्याप्यविरोधित्वमविशिष्टं हि दृश्यते॥§ 3330

परेणापि हि शक्यं वदितुं न हि सति गमने किंचिद्विरुद्धमिति। अत्राभिधीयते। § 3331

उभयत्राविरोधित्वं प्राप्तं न ह्यसतीति यत्।
पुनर्ब्रवीति तन्नूनं विरोध्यागमनं मतम्॥§ 3333

परिसंख्यारूपेणासत्येवाऽऽगमने न किंचिद्विरुद्धं सति तु बहु विरुद्धमित्याह। तदुपवर्ण्यते— § 3334

402 स्वतस्तावदमूर्तत्वान्न भूतैर्मिश्रताऽऽत्मनः।
ततश्च तैरसंश्लिष्टो न नेतुं शक्यते क्वचित्॥§ 3336

यदा मूर्तानामपि सूक्ष्माणां चन्द्रादित्यप्रकाशादीनां न मृत्पिण्डादिभिः सह मिश्रत्वमुपपद्यते, तन्नयनेन वा नयनं तदाऽऽत्मनः स्वभावेनात्यन्तामूर्तस्य ज्ञानसंतानस्य वा भूतैर्मिश्रत्वं भवेदिति कुत एतत्। योऽपि स्याद्वादी बद्धात्मनां शरीरादत्यन्तव्यतिरेकालाभादस्त्येव मूर्तत्वं जीवस्येति ब्रूयात्तस्यापीतरेतराश्रयप्रसक्तिर्मिश्रत्वान्मूर्तत्वं मूर्तत्वाच्च मिश्रभाव इति। तस्मान्मुक्तावस्थानिदर्शनेन लक्षणतोऽस्यामूर्तत्वान्न शरीरसंपर्कनिमित्तमूर्तत्वसिद्धिः। ततश्च शरीरादन्यस्तेनासंपृक्तश्च। अस्पर्शत्वाच्चानाकृष्यमाणः शरीरे गच्छति तद्गताकाशप्रदेशवदात्मा पश्चान्निःसृतस्तत्रैव तिष्ठेत्। न हि तस्य वायुना पृथिव्यादिभिर्वा प्रेरणं येन स्वतन्त्रः परप्रेरितो वा गच्छेत्। ज्वालाप्रभृतीनां तु स्पर्शवत्त्वाद्वायुना प्रेर्यमाणानामुल्मुकादिना वा नीयमानानां युक्तं गमनम्। तेन केवलं शरीरं गच्छदचेतनं स्यात्। सर्वगतत्वे तु यत्र यत्र

गम्यते तत्र तत्राऽऽत्मानुस्यूतिरस्तीति युक्ता चैतन्यानुवृत्तिः, यथा पूर्वाकाशप्रदेशत्यागे सर्वगतत्वादेव परेणावकाशदानसिद्धिः। किं च— § 3337

असर्वगतपक्षे स्याज्जीवो देहादनिर्गतः।
अणुः शरीरमात्रो वा सर्वथाऽपि न युज्यते॥§ 3339

ज्ञानसंततिपक्षस्तावन्निराकृतः। तत्र नित्यः सन्नात्मा शरीराभ्यन्तरवर्त्ती। § 3340

यद्यणुः कल्प्यते तत्र देहं न व्याप्नुयादसौ।
ततश्च सर्वगात्रस्थसुखपुष्ट्याद्यसंभवः॥§ 3342

यदा ह्यणुमात्र आत्मा भवति तदा यावानेव प्रदेशविशेषस्तेनाधिष्ठितस्तन्मात्रगतानामेव सुखदुःखादीनामुपलब्धिः प्राप्नोति, ततश्चैकस्मिन्क्षणे शिरःपादवेदनानुभवो न स्यात्। अथ लघुसंचारित्वात्तत्र तत्रोपलभ्यत इत्युच्यते, न तत्र प्रमाणमस्ति। न च कालभेदो लक्ष्यते, अनवस्थितस्योपलब्धिकालासंभवान्नैकत्राप्युपलभ्येत। तस्मादकल्पनेयम्। शरीरावयवानां चापरिशोषणं पुष्ट्यादि चाऽऽत्माधिष्ठितानां भवति मृतावस्थायां विपर्ययदर्शनात्। तत्र य एवावयवस्तेनोत्सृष्टः स एव मृतवच्छुष्येत्। अथ शरीरपरिमित आर्हतपक्षेणाभ्युपगम्यते तत्रापि बह्वदृष्टं कल्पनीयम्॥ § 3343

सद्भावोऽवयवानां च तथा तेषामनन्तता।
संश्लेषश्च विनाऽन्येन तद्भावेऽपि च नित्यता॥§ 3345

अतिसंकोचविस्तारौ पुत्तिकाहस्तिदेहयोः।
अन्तराभवसंचारस्तद्भावाज्ञानकारणे॥§ 3347

सर्वे ह्यवयवसद्भावादयः प्रत्यक्षाद्यविषयाः सन्त उत्प्रेक्षामात्रेण कल्प्य- 403
न्ते। ते शब्दवच्चेहापि प्रत्याख्येयाः। शरीरमात्रावधिकानां चैषामुत्प्रेक्षितुमप्यानन्त्यादशक्यं, न चैषां द्रवत्वादिना विना कश्चित्संश्लेषहेतुर्विद्यते। न चासंश्लिष्टानामेकजीवारम्भसामर्थ्यम्। सर्वसंयोगानां च वियोगाविनाभूतत्वाद्धटादितुल्यः कदाचिज्जीवस्य प्रध्वंसो भवेत्। गात्रच्छेदे च तद्वर्तिनां जीवावयवानां ततो निःसृत्याऽवशिष्टे शरीरभागे पुनः प्रवेश इत्येतदप्रमाणकम्। यत्तु वियोजितमात्राणां हस्तादीनां स्फुरणं दृष्टं, तदभिघातप्रेरितवायुनिमित्तमिति न तावता जीवावयवानुगतिर्विज्ञायते। तथा सति संकोचविकासावेतेषां भवत इत्यत्र न किंचित्प्रमाणं पश्यामः। दीपप्रभाप्रभृतीनां तु कथंचित्प्रत्यक्षत्वादुपपद्येते। न च प्रदीपप्रभायाः संकोचो भवति शरावादिच्छादने शेषप्रभाविनाशादनावृता हि ज्वालाऽऽत्मसमीपे प्रभामण्डलमारब्धुं समर्था नाऽऽच्छादिता। एतेनैव च विकासोऽपि प्रत्युक्तः। अन्य एव ह्यवयवास्तत्र प्रचीयमाना विस्तारं जनयन्ति न तावतामेव विकासः।

स्पर्शवतां च परस्परदेशप्रतिबन्धाद्देशान्तरव्याप्त्या विकासो घटते, जीवावयवानां त्वमूर्तत्वात्सर्वेषां समानदेशत्वाविघातान्नित्यमणुमात्रत्वप्रसङ्गः स्यात्। कथं चैकस्य जीवस्य पुत्तिकाहस्तिशरीरपरिमितौ संकोचविकासौ युज्येते। मरणकाले चान्तराभवशरीरसंचरणं तच्चास्ति, केन चित्प्रतिबन्धेन सदपि न गृह्यते, तेन च शरीरान्तरे जीवनिक्षेप इत्यादि निष्प्रमाणकम्। तस्मात्सर्वगतत्वम्। यत्तु श्यामाकतण्डुलमात्रादिप्रदर्शनमुपनिषत्सु तद्वाक्यान्तरप्रदर्शितविभुत्वस्यैव सतः सूक्ष्मग्रहणगोचरत्वात्। यदपि द्वैपायनेनोक्तम्। अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष बलाद्यम इति। तदपि काव्यशोभार्थं विस्पष्टमृत्युव्यवहारप्रशंसनार्थं च प्रतिव्रताप्रशंसापरे वाक्ये प्रजापतिवपोत्खेदनादिवद्द्रष्टव्यम्। तथा हि तेनैव गीतादिष्वनेकप्रकारं सर्तगतत्वं वर्णितम्। ननु च सर्वगतत्वे व्योमवत्सर्वशरीरेष्वेक एवाऽऽत्मा प्राप्नोति। नैष दोषः। शरीरभूयस्त्वात्प्रतिशरीरं च सुखदुःखोपलब्धिव्यवस्थादर्शनात्। इतरथा ह्येकशरीरेणैव चरितार्थत्वादनेकशरीरवैयर्थ्यं स्यात्। जन्मान्तरशरीरवददोष इति चेत्। न। तत्र कर्मान्तरवशेनोपभोगान्तरार्थं पुनः पुनरारम्भात्सर्वशरीरगतसुखाद्युपलब्धिश्च प्रतिशरीरं स्यात्। अन्यदीयैश्चेन्द्रियैः शरीरान्तरगतस्याऽऽत्मीयत्वादुपलब्धेरन्धबधिरादीनामभावः स्यात्। वर्णविशेषव्यवस्थया च कर्मचोदनाभेदो न स्यात्। एकस्यैवाऽऽत्मनस्तेन तेन शरीरेण संबध्यमानस्य सर्ववर्णोपपत्तेः। आत्मनानात्वे त्वदोषः। सर्वेषामपि च सर्वगतत्वे मूर्तिरहितत्वात्समानदेशवृत्त्य- 404 विरोधः। तदपेक्षयैव च चैतन्यात्मकत्वाद्यविभागाच्चोपनिषत्स्वैकात्म्यव्यवहारः। कथं पुनर्नानात्वेऽपि सर्वेषां सर्वशरीरैः संबन्धादन्यदीयसुखदुःखाद्यनुपलब्धिः। के चित्तावदाहुः— § 3348

यथा शरीरमात्रेऽपि मातृगर्भात्मवर्तिनाम्।
सुखादीनां व्यवस्थैवं सर्वत्रैषा भविष्यति॥ § 3350

शरीरपरिमाणात्मवादिनोऽपि किलायं तुल्यो दोषस्तस्यापि गर्भात्मसमानदेशत्वान्मातृक्षेत्रज्ञस्तद्गतानि सुखादीन्युपलभेत। तत्र यस्तस्य परिहारः स सर्वात्मनां सर्वशरीरेषु भविष्यतीत्यविशेषः। यद्यत्रोपपत्तिरुच्येत न तु परपक्षसाम्यापत्तिरेवोपपत्तिस्तस्य च तव चोभयोरप्यन्येन पर्यनुयोगात्। अपि च तस्य त्वगिन्द्रियपरिमाणत्वादन्तःशरीराकाशे बाह्यवदेवाऽऽत्मनोऽनभ्युपगमान्नैव गर्भशरीरेण मातृक्षेत्रज्ञस्य प्राप्तिरस्ति येन तुल्यदोषता स्यात्। तस्मादेव परिहर्तव्यम्॥ § 3351

देशप्राप्त्या यदीष्येत सुखादेरुपभोग्यता।
ततो दोषः प्रसज्येत योग्यभोगे त्वदुष्टता॥ § 3353

यदि ह्यात्मनः सुखादीनां च समानदेशलक्षण एव संबन्ध उपभोगकारणमिष्येत ततोऽयं दोषः स्यात्। इह तु चक्षुरादीनामिव क्षेत्रज्ञयोग्यतालक्ष-

७ म्] भारते इति शेषः।

णः संबन्धः। तत्र यथैव त्वगिन्द्रियेण स्पर्शसमानदेशानामपि रूपादीनामग्रहणम्, एवमन्येनाऽऽत्मनाऽन्यदीयधर्माधर्मोपात्तसुखदुःखाद्यग्रहणम्। तस्मादात्मवादोक्तस्वस्वामिभावव्यवस्थानाददोषः। एवं सर्वगतत्वात्सिद्धमात्मनो निश्चलत्वम्। अथ ह्यवदानसमवेतमासीत्तत आह—**तद्विनष्टमिति**। न च तस्याविनाशः। तद्विपरीतद्रव्यान्तरोपलम्भात्। न चास्य ग्रहणप्रतिबन्धहेतुः कश्चिदस्ति येन न गृह्येत। अथार्थापत्त्या ग्रहणप्रतिबन्धादि कल्प्येत तथाऽपि सत्यपूर्वाद्बहुतरमदृष्टं दृष्टविपरीतं च कल्पयितव्यं, तावदविनष्टमास्ते, तथा न दृश्यते, तथा प्रतिबन्धहेतुः, तस्याप्यदर्शननिमित्तं चेत्येवं तस्य तस्यान्यदित्यनवस्था, तथा क्षणिकस्य कर्मणः स्थानमनुपलब्धिकारणं च कल्प्यमित्यतिगौरवम्। § 3354

एवमनाश्रितकर्मावस्थानकल्पनायाम्। अथाऽऽत्माश्रितमेव संयोग- 405
विभागावकुर्वदासीत्। तत्रापि दृष्टविपर्ययादृष्टकल्पने स्याताम्। तस्माद्वरमपूर्वकल्पनमेवेति सिद्धं मूलाधिकरणप्रयोजनम्। द्रव्यादीनां फलसंबन्धे तेषामदृष्टार्थत्वात्कर्मणामिव प्रतिनिध्यभावः। कर्मफलसंबन्धे तु द्रव्यादेः कर्मोत्पत्त्या दृष्टार्थत्वात्समानकार्यत्वज्ञानादस्ति प्रतिनिधिः। कथं तर्हि पूर्वपक्षवादिनः प्रक्रान्तापरिसमाप्तिदोषाभावः। समापनीयमेव कर्म येन केनचिद्द्रव्येण। सदृशोपादाने तु न यतितव्यं सदृशादपि फलाप्राप्तेः, कर्मणश्चाविहितसाधनविशेषस्यानपेक्षितसदृशत्वाद्येन केन चित्सिद्धेः। न च तत्पूर्वद्रव्यस्य प्रतिनिधिरित्युच्यते। अन्यार्थत्वादसादृश्याच्च। पूर्वद्रव्यं हि फलाय प्रवृत्तमासीदिदानीमानीयमानं तु प्रत्यवायपरिहाराय नैमित्तिकफलाय वा प्रवृत्तस्य कर्मणः सिद्ध्यर्थमिति। नामधेयसिद्धिरपि प्रयोजनमेव। सा तु पूर्वोक्तत्वान्न प्रदर्शिता॥ ५॥ § 3355

इति अपूर्वाधिकरणम्॥ २॥

## ०.०.३० तानिद्वैधाधिकरणम्

नामाख्यातार्थसंबन्धे यदक्लृप्तप्रयोजनम्। 406
तस्यादृष्टार्थता युक्ता नेतरस्याप्रमाणिका॥ § 3358

सर्वत्रैव द्रव्यकर्मसंबन्धे कर्मणां द्रव्येण विनाऽनुत्पत्तेः प्रथमं तावद्द्रव्यं कर्मोत्पादयत, दृष्टोपकारित्वात्तदर्थमाभासते। तत्र क्वचिद्भूयः कर्म परावृत्त्य द्रव्यस्योपकरोति क्व चिदात्मलाभमात्रमनुभवति। तद्यदाऽऽत्मलाभमात्रं तस्य दृश्यते तदा साकाङ्क्षत्वाददृष्टं कल्पयितुं शक्यते। यदा तु कार्यान्तरौपयिकेन दृष्टेनैव तण्डुलनिर्वृत्त्यादिना द्रव्योपकारेण निराकाङ्क्षी भवति तदानीमदृष्ट-

कल्पनावसराभावादन्यथैव विधानार्थवत्त्वोपपत्तेर्नादृष्टसाधनत्वं प्रतीयते॥ ६॥
§ 3359

यैः कर्मभिर्द्रव्यं स्वरूपतो धर्मतो वा न कर्तुमिष्यते यथा प्रयाजादिभिस्तानि स्वसाधनानि प्रति प्रधानभूतत्वाददृष्टार्थानि भवन्ति॥ ७॥
§ 3360

यैः पुनर्द्रव्यमुत्पाद्यते यथाऽऽधानेनाग्नयोऽवाप्यन्ते क्रियन्ते वा यथा वरणेनर्त्विजः संस्क्रियन्ते, यथाऽवहन्तिना व्रीहयः, पेषणेन तण्डुलास्तानि गुणभूतानि प्रयोजनवद्द्रव्यसंस्कृतेरीप्सितत्वात्। यदा दृष्टार्थमदृष्टार्थं चोभयथाऽपि तुल्यवदनुष्ठीयेत तदा किं प्रयोजनं चिन्तायाः। § 3361

407 तदुच्यते। प्रैयङ्गवेऽपि चरावतिदेशप्राप्तो व्रीहिसाधनक एवावहन्तिः कर्तव्यः पूर्वपक्षे। कुतः— § 3362

प्रधाने हि श्रुतं द्रव्यं नाङ्गद्रव्यस्य बाधकम्।
प्रयाजेज्याज्यवत्तेन हन्तौ स्याद्व्रीह्यबाधनम्॥§ 3364

सिद्धान्ते तु बाध्यन्ते। कुतः— § 3365

प्रधानौपयिकं द्रव्यं संस्कारैरपि युज्यते।
तेन हन्त्यादिभिः सर्वैः संस्कर्तव्याः प्रियङ्गवः॥§ 3367

ननु च पूर्वपक्षेऽपि प्रधानप्रयुक्तव्रीह्याश्रयत्वेन प्रकृतावप्रयोजकत्वात्प्रैयङ्गवे चरौ प्रधानेनागृह्यमाणान्व्रीहीनवघातो न लभते। नैतदेवम्— § 3368

तुल्यो हि व्रीहिसंबन्धः शास्त्राद्यागावघातयोः।
वाजिनेज्यादि तुल्यं च नाप्रयोजकलक्षणम्॥§ 3370

‘व्रीहिभिर्यजेत’ ‘व्रीहीनवहन्ति’ इति तुल्ये चोदने, तत्रेयं प्रयोजिकेयं नेति नास्ति विशेषहेतुः। न च वाजिनादिवदवहन्तेरनुनिष्पादित्वम्। न च पदकर्मवत्परप्रयुक्तप्रकृतैकहायन्यधीननिराकाङ्क्षत्वम्। न चैकदेशद्रव्यत्वमुत्तरार्धादिवत्। नापि ‘पुरोडाशकपालेन’ इतिवदर्थाभिधानकर्मत्वम्। तस्मादवहन्तिरपि प्रयोजकः। न चास्मिन्पक्षे नियोगतो यागार्था एव व्रीहयोऽहवन्तव्याः। लौकिकैरपि कर्मसिध्यविशेषात्। न चात्र प्रकृतग्रहणे प्रमाणं, प्रकरणस्याविशेषकत्वात्। § 3371

न चाधिकाराद्विशेषः ‘तुल्येषु नाधिकारः स्यात्’ इति न्यायात्। संस्कारपक्षे तु लौकिकानामानर्थक्ये नासंस्कार्यत्वादपूर्वसाधनविशेषणत्वेन कथंचित्प्रकृतग्रहणं क्लेशेन भविष्यति। न चाऽऽरादुपकारकत्वेऽवहन्तेर्यागस्येव लौकिकैःसाध्यमानस्य किं चिदानर्थक्यमिति श्रौतत्वाद्व्रीहिमात्रग्रहणमेव

१७ च] ( अ° ४ पा°१ अ° १० सू° २५ ) अत्रत्यन्यायानुसारेणेत्यर्थः ।

२३ चाधिकाराद्विशेषः] ( अ° ९ पा° १ अ° ५ सू° १९ ) ।

युक्तम्। धर्ममात्रं च तदाऽवहन्तिः सर्वौषधावहन्तिवत्सकृदेव च कर्तव्यो नाऽऽतण्डुलनिर्वृत्तेः। प्रधानव्रीहीणां च दलनादिभिरपि तण्डुलीभावः स्यात्। सान्नाय्योपांशुयाजाङ्गत्वमपि चास्य प्रकरणाविशेषात्तथा भवतीति तद्विकारेष्वपि प्रयोक्तव्य इत्यादीनि प्रयोजनानि॥ ८॥ § 3372

इति तानिद्वैधाधिकरणम्॥ ३॥

## ०.०.३१ संमार्गाधिकरणम्

स्रुक्परिध्यग्निपुरोडाशसंमार्गाणामुत्तरोत्तरप्रधानप्रत्यासत्तिभेदेनोदाहरणपृथ- 408
क्त्वम्। एतदुक्तं भवति— § 3374

दूरेणापि प्रधानानां यद्द्रव्यमुपकारकम्।
तेनापि कर्मसंबन्धान्न प्राधान्यं प्रपद्यते॥ § 3376

तत्र पूर्वपक्षवादी पूर्वोक्तेनैव 'यैर्द्रव्यं न चिकीर्ष्यते' इत्यनेन प्रधानकर्मलक्षणेनाऽऽह— द्रव्येण निष्पादितं कर्म न किंचित्तस्य प्रत्युपकुर्वद्दृश्यते। तस्मात्प्रधानकर्म संमार्गप्रोक्षणादीति॥ ९॥ § 3377

नैव ह्येतद्गुणकर्मलक्षणं यद् द्रव्यचिकीर्षा नाम, उपकारलक्षणशेषत्वप्रतिषेधात्। तादर्थ्यलक्षणं हि श्रुत्यादिप्रमाणकं तत्, न प्रत्यक्षाद्युपकारनिमित्तमिति वक्ष्यामः। किमर्थं तर्हि द्रव्यचिकीर्षोपन्यस्ता। तदुच्यते— § 3378

अन्यतः सिद्धशेषाणां येषां दृष्टोपकारिता।
तेषां नापूर्वमस्तीति हन्त्यादीनामुदाहृतिः॥ § 3380

यत्र द्रव्यचिकीर्षया गुणभावस्तत्र नापूर्वभेदः प्रतिपत्तव्य इति यावत्। पूर्वपक्षवादी त्वेतदेव गुणकर्मलक्षणं मत्वा संमार्गादिषु तदपश्यन्प्रत्यवस्थित-
वान्। सिद्धान्ताभिप्रायस्तु सर्वत्र श्रुत्यादिभिरवधृते तादर्थ्ये पश्चादुपकारदर्श- 409
नं तदभावेऽदृष्टकल्पनं वा। तत्रेप्सिततमत्ववाचिन्या द्वितीयया द्रव्यप्राधान्यद्वारेण क्रियाशेषत्वे प्रतिपादिते हन्त्यादीनां दृष्टार्थत्वान्नैराकाङ्क्ष्यं जातं न तु संमार्गादीनामित्यदृष्टार्थता, न च तावता पूर्वावगतशेषत्वहानिः॥ ११॥ § 3381

परस्त्वाह— § 3382

अन्वयव्यतिरेकाभ्यामुपकारानुसारिता।
शेषत्वस्य द्वितीया तु प्राधान्यव्यभिचारिणी॥ § 3384

---

३ क्ष्यामः] ( अ. ३ पा. १ अ. १ सू. २ ) अत्रेति शेषः।

तन्नाम प्रमाणं युक्तं यदैकान्तिकम्। अनैकान्तिकी च प्राधान्ये द्वितीया, गुणभूतद्रव्योपदेशेऽपि दृष्टत्वात् ‘सक्तून् जुहोति’ इति। तथा ‘प्रयाजशेषेण हवींष्यभिधारयति’ इत्यन्तरेणापि द्वितीयामाज्यप्राधान्यं दृष्टम्। अतो ‘व्रीहीनवहन्ति’ इत्यत्रोभयसंभवेऽप्युपकारदर्शनकृतमेव द्रव्यप्राधान्यं न द्वितीयाकृतम्। न च तत्संमार्गप्रोक्षणादिष्वस्तीतीहापि द्वितीयया द्रव्यमेवोपदिश्यतामिति॥ ११॥ § 3385

तिष्ठतु तावत्प्रयोगः। किं कारणम्॥ § 3386

आचारत्वात्प्रयोगो हि स्मृत्या सर्वत्र बाध्यते।
विवक्षानेऽकधा चात्र स्मरणे त्वेकरूपता॥§ 3388

यदि ह्याचारस्यैकरूप्यं भवेन्नैव स्मृतयः प्रयत्नेन धार्येरन्। स एव तु संकीर्णत्वादस्फुटः स्मरणेन प्रतिपाल्यते। स्मर्यते च द्वितीयायाः प्राधान्यमर्थः। ‘कर्मणि द्वितीया’ ‘कर्तुरीप्सिततमं कर्मेति। तथा लोकवेदयोः प्रयुज्यते
410 घटं करोति ‘व्रीहीनवहन्ति’ इति। यानि च लोके व्यभिचाराशङ्कास्थानानि तान्युदाहरति **तण्डुलानोदनं पच बल्वजान शिखण्डकान् कुरु तण्डुलानग्ने जुहुधीति**। तण्डुलैर्बल्वजैरिति च प्रयोक्तव्ये या द्वितीया प्रयुज्यते तन्नूनं तृतीसमानार्था सेति गम्यते। तत्रोच्यते— § 3389

सर्वे पाकादिसंबन्धे ह्याकारास्तण्डुलादयः।
प्राधान्यांशमुपादाय द्वितीया तत्र वर्त्स्यति॥§ 3391

यदा पदार्थान्तरभूतौदनशिखण्डकसाधनत्वेन तण्डुलबल्वजा विवक्ष्यन्ते तदा तृतीयान्तपदभाजो भवन्ति। यदा तु भोजनयोग्यौदनावस्थापरिणतिरूपेण तण्डुला, मार्दवोत्पत्त्यर्थं च शिखण्डकाकारेण बल्वजा दृश्यन्ते। § 3392

तथा वेदवाक्यावगतगुणभावाश्च ते द्रव्यसाधनकेऽग्निहोत्रे सुखण्डितास्तिष्ठन्तो रमणीयत्वात्कस्याश्चिद्ब्राह्मण्याः स्वकर्मशोभादर्शनार्थं तण्डुला होमसंबन्धित्वेनाभिप्रेताः। सैवं प्रेष्यति गुणकामा वा यजमान तण्डुलानग्ने जुहुधीति, तदा द्वितीयार्थभाक्त्वं भवति। **भवति हि लोके बहु प्रकारा विवक्षेति**। गुणभूतेऽप्यर्थे केन चित्कारणेन कश्चित्प्राधान्यांशो विवक्ष्यते तथा प्रधानभूतेषु गुणांशः। कदा चिदुभौ कदा चिन्नोभौ। § 3393

न च यद्विवक्ष्यते तच्छब्देनाभिधातव्यमित्यस्ति प्रमाणं, विवक्षासंपत्त्यर्थं तु लक्षणाद्युपायान्तराश्रयणं न स्वार्थत्यागः। तस्मात्प्राधान्यमेव द्वितीयार्थः। कथं तु सक्त्वादिषु गुणत्वमिति। तदुच्यते— § 3394

प्राधान्यमेव तत्रापि द्वितीया वदति स्वतः।
विरोधात्तेन संबन्धो गुणभावस्तु लक्ष्यते॥§ 3396

द्वितीया तावत्कर्मत्वं प्रधानरूपमात्मशक्त्या वदति, तत्त्विह बलवता कारणान्तरेण विरुध्यमानत्वान्नाऽऽश्रीयते। तेन तु कारकविशेषात्मकत्वाद्यत्कार-

कसामान्यमविनाभूतं लक्ष्यते तदविरुद्धत्वाद्विवक्ष्यते। तत्रैतावानर्थो विज्ञायते होमस्य कारकं सक्तव इति। न च सामान्यं निर्विशेषं व्यवहारक्षममिति विशेषापेक्षायां करणत्वं भविष्यति। ‘द्रव्याणां कर्मसंयोगे’ इति भूतभव्य- 411
समुच्चारणन्यायात्। कथं पुनः सक्तुप्राधान्यविवक्षा विरुध्यते। तत्राऽऽह— § 3397

भूतभाव्युपयोगं हि संस्कार्यं द्रव्यमिष्यते।
सक्तवो नोपयोक्ष्यन्ते नोपयुक्ताश्च ते क्वचित्॥ § 3399

यस्य हि द्रव्यस्य क्व चिदुपयोगो निर्वृत्तो भविष्यतीति वाऽवधार्यते तत्संस्कारार्हत्वात्कर्म प्रति प्रधान्यं प्रतिपद्यते। यत्पुनर्नोपयुक्तं नोपयोक्ष्यते वा तस्य संस्कारो निष्प्रयोजन इति तद्विधानवाक्यानर्थक्यप्रसङ्गः। तेचामी सक्तवो न होमात्प्रागुपयुज्यन्ते नोर्ध्वं, भस्मसाद्भावाद्भस्मविनियोगवचनाभावाच्च। तत्र समस्तं वाक्यमनर्थकं भवतु द्वितीया वा लक्षणावृत्तेति, स्थितत्वाद्वेदप्रामाण्यस्य लक्षणा ग्रहीतव्या। मुख्यार्थप्रयोगो ह्यौत्सर्गिकत्वादपवाददर्शनेन भ्रान्तित्वं प्रतिपद्यते। सर्वत्रैव लक्षणाश्रयणमानर्थक्यप्रसङ्गनिमित्तम्। अन्यथा मुख्यार्थोपपत्तेः। § 3400

तेन विरोधात्सक्तुसाधनकहोमविधानं प्रकरणसंबन्धि गृह्यते। **ननु सक्तूनामपीतिहोम**वन्तः सक्तवोऽपि ज्योतिष्टोमस्योपकृत्याऽर्थवन्तो भविष्यन्तीत्याह। सिद्धान्तवादी तु च्छलेन होमसाधनीभूतानामेवार्थवत्त्वमभ्युपगच्छति **को वा ब्रूते नेति**। सर्वत्रैव च॥ § 3401

द्रव्याणां वाक्यसंयुक्तक्रियानिर्वर्तनाद्विना।
न प्रयोजनमस्त्यन्यत्कथंभावाद्यसंगतेः॥ § 3403

यथा होमः क्रियात्मकत्वात्किमित्यपेक्षमाणः प्रधानकथंभावेनेत्थमनुग्राहकत्वेन गृह्यते नैवं द्रव्यम्। न च तस्माददृष्टकल्पना, क्रियानिर्वर्त्यत्वादपूर्वाणाम्। § 3404

यत्रापि तावद्द्रव्यं साक्षात्फलाय चोद्यते यथा ‘गोदोहनेन पशुकामस्य’ 412
इति तत्राप्यन्यप्रयोजनक्रियाद्वारमन्तरेण नापूर्वं भविष्यति। किमुत यदा न कस्य चिदङ्गत्वेन सक्तवः श्रूयन्ते। न च किं चित्कल्पनाप्रमाणमस्ति। द्वितीयेति चेत्। न हीत्युत्तरम्। द्वितीया हि सक्तूनां प्राधान्यं वदन्ती होमं तदर्थं कुर्यान्न सक्तुभ्योऽपूर्वमिति प्रतिपत्तिम्। तेन द्वितीयाप्रसादाद्भवेद्धोमः सक्त्वर्थः। कथं नाम होमव्याप्ताः सक्तवः स्युरिति। नान्यस्मै प्रयोजनायाश्रवणात्। ते चामी **भवन्ति होमे कृते सक्तवो होमसंबद्धा** इति प्रागेव प्रयोजनलाभात्पर्यवसिता द्वितीया निष्प्रयोजनेष्ववि, होमं प्रचि प्राधान्यमात्रेण कर्मत्वसिद्धेः। तत्र सिद्धे वाक्यार्थे पश्चान्न पुरुषस्य क्रतोर्वोपयुज्यन्त इति ज्ञात्वा तद्वचनाद्वाऽदृष्टं कल्प्येत प्राधान्यज्ञानं वा भ्रान्तिरिति। तत्राऽऽह—**न च तद्वचनाच्छक्यमन्यत्कल्पयितुमिति**। § 3405

प्राधान्याविवक्षैव न्याय्या। ततश्च तृतीयार्थसिद्धिरिति मत्वा महाभाष्यकारेणोक्तं **तृतीयायाः स्थाने द्वितीयेति**। तेन वैषम्यं होमसंमार्गयोः, सक्तूनां निष्प्रयोजनत्वेन तदर्थत्वात्, पुरोडाशादेश्चान्यशेषभावेन पर्यग्निकरणादिसंस्कारार्हत्वात्। दृढे च शास्त्रार्थेऽवस्थिते दृष्टोपकाराभावेऽप्यदृष्टकल्पना भविष्यति। लोकेऽप्यदृष्टार्थाः संस्कारा आचाराद्गम्यन्ते यथा ग्रामान्तरादागतानां शान्त्यर्थमग्निलवणदध्यक्षतप्रभृतेः शिरस उपरि भ्रामणं शुचिदेशप्रतिष्ठापनं च। § 3406

413 न चास्यानुपपत्तिराचारप्रामाण्यात्। तेनादृष्टार्थानामपि तुल्यश्रुतित्वात्सिद्धो गुणभावः। नन्वेवं सति सर्वत्र प्रयोजनवत्ताकृतमेव द्रव्यप्राधान्यमिति न वक्तव्यं ‘तुल्यश्रुतित्वात्’ इति, दर्शयितव्यं वा यत्र प्रयोजनवत्तानिरपेक्षं द्वितीयाकृतमेव प्राधान्यं केवलतृतीयाकृतो वा गुणभाव इति। तदुच्यते। प्राधान्ये तावत् ‘ऐन्द्र्या गार्हपत्यमुपतिष्ठत’ इत्यत्र लिङ्गादिन्द्रार्थत्वावगतेर्गार्हपत्यैकवाक्यत्वाच्च तत्साधनकेन्द्रोपस्थानप्रसङ्गे केवलद्वितीयाकृतमेव गार्हपत्यप्राधान्यम्। § 3407

तथा ‘सूक्तवाकेन प्रस्तरम्’ इत्युभयोः प्रयोजनवत्त्वाविशेषे केवलतृतीयाकृतमेवसूक्तवाकस्य प्रस्तरप्रहरणाङ्गत्वम्। तेन विभाक्तिभिरेवाङ्गाङ्गिभावेऽभिधीयमाने निष्प्रयोजनत्वमपवादो न तु प्रयोजनसदसद्भावेनाङ्गाङ्गित्वामिति विवेकः। प्रयोजनं त्वधिकरणस्य न सम्यगनुमन्यन्ते। तथा हि— § 3408

स्रुङ्मात्राद्यनुवादेन शमीमय्यादिचोदितम्।
ज्ञायतेऽङ्गप्रधानार्थं पूर्वसिद्धान्तपक्षयोः॥§ 3410

प्रियङ्गवो ह्युत्पत्तिवाक्यात्केवलप्रधानार्थत्वेन ज्ञायमान युक्तं यदङ्गेषु न भवन्तीति। शमीमयत्वादि तु स्रुगादिमात्रानुवादेन विधीयमानं ‘सर्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वात्’ इत्यनेन वाक्यसंयोगबलीयस्त्वात्प्रकरणगम्यप्रधानार्थत्वबाधेनाङ्गप्रधानार्थं विज्ञायते। § 3411

न चात्र विशेषणं किं चिदुपात्तं येन प्रधानगतस्रुगादिमात्रप्रतीतिः स्यात्, सदपि वोद्दिश्यमानविशेषणत्वान्न विवक्ष्येत। § 3412

तस्मात्पूर्वपक्षेऽपि यानि च प्रधानसंबन्धीनि स्रुगादीनि यानि चाऽऽरादुपकारकसंमार्गादिसंबन्धीनि तानि सर्वाणि शमीमयीत्वादियुक्तानीत्ययुक्तो नानावृक्षस्रुक्संमार्गः। स्यादेतत्। *‘मुख्यार्थो वाऽङ्गस्याचोदितत्वात्’ इति वैकृतविशेषाणां केवलप्रधानार्थत्वान्नेहाङ्गप्रधानार्थता भविष्यतीति। तदयुक्तम्। § 3413

414 वाक्योपात्तप्रधानार्थसंबन्धो यत्र गम्यते।
तत्रैतद्वक्ष्यते नात्र तादृशश्च प्रतीयते॥§ 3415

२२ मानं] ( अ० ३ पा० ७ अ० सू० २ ३५ )।
)।
२९ *] ( अ० ३ पा० ८ अ० ११ सू०

‘यज्ञाथर्वणं वै काम्या इष्टयस्ता उपांशु कर्तव्या’ इति हि प्रधानैरेव काम्यशब्दोपात्तैरुपांशुत्वं संबध्यमानमङ्गस्याचोदितमिति वक्ष्यते, न चात्र तादृशः प्रधानसंयोग इति वैषम्यम्। ननु चाऽऽतिदेशिकत्वादप्राप्तावस्थेष्वङ्गेषु शमीमयीत्वाद्युपदिश्यमानं प्रधानमात्रार्थं भवेत्। नार्हत्येवं भवितुम्। एवं हि स्थास्यति। § 3416

क्लृप्तोपकारसाकाङ्क्षाः प्रथमं प्राकृतैः सह।
संबध्यन्ते समीपस्थं विकाराः प्रोज्झ्य चोदितम्॥ § 3418

अवश्यं चानेकार्थविध्यनुपपत्तेः स्रुगादीन्यनुवदितव्यानि। तेन प्रत्यक्षोऽपि सन्नुपदेशोऽतिदेशं तावत्प्रतीक्षते। तत्र यावता कालेन प्रधानस्रुगादीनि प्राप्नुवन्ति तावतैवाङ्गस्रुगादीन्यपीत्यविशेषः। किं च॥ § 3419

यदि प्रधानमात्रेण शमीभय्यादिसंगतिः।
प्राकृत्यस्तु प्रसज्यन्ते प्रयाजादिस्रुचस्ततः॥ § 3421

य एव हि संमार्गस्रुचां वर्जनोपायस्तेनैव प्रयाजादिस्रुग्वर्जनमपि प्राप्नोति, न चैतदिष्टं युक्त्यभावात्। यद्यपि च किं चित्प्रधानमात्रसंबन्धकारणं भवेत्तथाऽपि सौमिकवेदिदक्षिणान्यायेन प्रसङ्गसिद्धेर्न प्राकृतजात्युपसंग्रहो युज्यते। किं च— § 3422

परिध्यादेश्च कार्येण स्वरूपमुपलक्षितम्।
अतत्कार्यस्य संमार्गः परिधेर्न कृतो भवेत्॥ § 3424

परिधिरित्यग्निपरिधानार्थं द्रव्यमुच्यते। तथा होमाद्यर्था जुह्वादयस्तत्र संमार्गस्य ‘अर्थाभिधानकर्म च’ इत्यप्रयोजकत्वमपि शक्यं वक्तुम्। ततश्च बाणवत्परिधिश्रवणे यदि तावदपरिहितानेव पलाशादीन्संमार्ष्टि, अपरिधय एव संमृष्टा भवेयुः। अथ तानपि परिदधीत , ततः कृते परिधाने प्राकृतार्थता न स्यात्। न च तुल्यार्थानां समुच्चयो दृष्टः। तस्मान्न परिध्यन्तरमुत्पादनीयम्। अवभृथस्य त्वपूर्वत्वाद्यावदुक्तमात्रपर्यवसायिनः साङ्गस्य चाप्सु चोदितस्य केन संमार्गोऽग्निर्वा प्राप्नोति येनोत्पाद्येत। तस्मादप्रयोजनान्येतानि। § 3425

तस्योदाहरणं त्वेकं सत्यम्। तत्र हि ‘मांसं तु सवनीयानाम्’ इति सिद्धान्तात्पुरोडाशमात्रेणासंबध्यमानं तरसमयत्वमसवनीयत्वान्न पर्यग्निकरणपुरोडाशेन संबध्यते। न हि सवनीयाङ्गे सवनीयशब्दप्रयोगः। सवनसंबन्धिविषयत्वात्। सवनीयाङ्गस्य चासवनार्थत्वार्थत्वात्तत्रापि तु व्रीहिमयत्वं दुर्लभम्। ‘व्रीहिभिर्यजेत’ इति प्रधानपुरोडाशमात्रेण तेषां संबन्धात्। 415

---

२ मिति] ( अ॰ ३ पा॰ ८ अ॰ १९ सू॰ ३४ ) इत्यत्रेति शेषः।
२० स्य] ( अ॰ ४ पा॰ १ अ॰ ११ सू॰ २६ )।
२६ हि] ( अ॰ ३ पा॰ ८ अ॰ २२ सू॰ ४२ )।

एवं तर्ह्यनियतद्रव्यकता पर्यग्निकरणपुरोडाशस्येति प्रयोजनम्। तदप्ययुक्तम्। तथा सति कांस्यभोजिन्यायेन तरसमयपर्यग्निकरणनैव शास्त्रार्थोपपत्तेः सिद्धान्तार्थासदृशकर्मप्रसङ्ग। तस्मात्कथं चित्प्रकृतौ व्रीहिमयपुरोडाशग्रहणात्तत्साधनत्वं शास्त्रकृतत्वात्प्राप्नोतीति वक्तव्यम्। § 3426

तत्रापि त्वेकहायनीन्यायेनाप्रयोजकत्वात् तदभावे लोपप्रसङ्गः। तेनैतदेवं प्रयोजनमित्याश्रयणीयम्। अनियतद्रव्यकत्वं वा। न चात्र कांस्यभोजिन्यायः संभवति। मांसेन पुरोडाशत्वानभिव्यक्तेः। सवनीयपुरोडाशे कथमिति चेत्। नैवं तत्र पुरोडाशत्वमिष्टं, वचनादपुरोडाशात्मकमेव मांसं पुरोडाशस्य स्थाने विधयिते यथा धानादीनाम्। न हि कथं चिदपि मांसेन धानादयो भवन्ति। अतश्च प्रैयङ्गवन्यायेन प्रधानमात्रे मांसेन पुरोडाशो विवर्तितः। पर्यग्निकरणं तु पुरोडाशसाधनकमेव। सत्त्वनियतद्रव्यको वा कथं चिद्वा प्रकृतिदर्शनेन व्रीहियवद्रव्यक इति स्थितम्। एतानि च प्रयोजनानि स्रुक्संमार्गस्य प्रकृतौ बहुसाधनत्वात्कपिञ्जलन्यायेन त्रित्वस्य शास्त्रीयत्वात्पात्राविवृद्धावपि पशुचातुर्मास्येषु तिस्र एव संमार्ष्टव्याः पूर्वपक्षे। सिद्धान्ते तु सर्वाः, संस्कारस्य प्रतिप्रधानावर्तित्वात्। § 3427

तथा पशुन्यायेन विवक्षितैकसंख्यत्वादेक एव संमार्ष्टव्यः परिधिः पूर्वपक्षे। सिद्धान्ते तु सर्वे। यत्र च परिधिविवृद्धिस्तत्र विशेषः। एवमेकपुरोडाशे पर्याग्निकरणं सर्वपुरोडाशे च वक्तव्यम्। तथाऽपि 'विशये लौकिकः स्यात्'*
416 इत्येवम् 'अग्निमुपनिधायस्तुवते' इतिवल्लौकिकाग्निसंमार्गकरणं पूर्वपक्षे। सिद्धान्ते तु तस्याप्रयोजनत्वेनासंस्कार्यत्वात्सर्वेषामाहवनीयादीनामिति विशेषः॥ १२॥ § 3428

इति संमार्गाधिकरणम्॥ ४॥

## ०.०.३२ स्तुतशस्त्राधिकरणम्

'यैस्तु द्रव्यं चिकीर्ष्यते' इत्यस्यापवादत्वेन स्तोत्रशस्त्रोपन्यासः। स्तुतिरेव स्तोत्रं, शस्त्रमपि सैवाप्रगीतमन्त्रसाध्या, गुणगुणिसंबंधकीर्तनं च स्तुतिः शिष्यते। सा च प्रथमं गुणगुणिभ्यां निर्वर्त्यते। तदभावे शब्दोच्चारणमात्रस्य स्तुतित्वाव्यपदेशात्। तत्र गुणानां तावदकर्माङ्गतया निष्प्रयोजनत्वादेकान्तेन

२ कांस्य] अयं चात्र न्यायः। गुरुरनियतपात्रभोजी शिष्यस्तु नियतकांस्यपत्रभोजो गुरुच्छिष्टभोजी च, तयोरेकपात्रभोजने प्रसक्ते गुणभूशिष्यानुरोधेन प्रधानभूतस्यापि गुरोः कांस्यपात्रभोजनमेव न्याय्यमविरोधात् इति।

१६ था] ( अ॰ ४ पा॰ १ अ॰ ५ ) अत्रत्यन्यायेनोत्यर्थः।

१८ *] ( अ॰ ७ पा॰ ३ अ॰ १२ सू॰ ३०)।

स्तुत्यर्थता। तन्निर्वर्तिता तु स्तुतिः किं स्तुत्यस्य स्मारकत्वेन शेषीभवत्युत स्वप्राधान्येनादृष्टार्था भवतीति। किं प्राप्तम्॥ § 3430

दृष्टेन क्रतुसिद्ध्यर्थां साधयन्ति यतः स्मृतिम्।
स्तोत्रशस्त्राणि तेन स्युः संस्कारा देवताः प्रतिऽ॥ १३॥§ 3432

प्रमाणान्तरविरोधेन दूषणं तावदुच्यते। तथा हि— § 3433

यद्यत्राविद्यमानार्थो मन्त्रः स्तोतुं प्रयुज्यते।
तस्यार्थेनापकृष्टत्वात्प्राप्तबाधः प्रसज्यते॥§ 3435

या यद्देवतानामसंयुक्ता स्तुतिचोदना भावनेति यावत्, चोद्यमानत्वात्, सा तदर्थपरत्वात्तस्मिन्नसति न स्वार्थं करोतीति तद्वशेनेन्द्रीस्तुतिर्माहेन्द्रग्रहयजिसंनिधिमुल्लङ्घ्य यत्रेन्द्रस्तत्र गच्छेत्। ततश्च क्रमसंनिधिबाधः। क्रमश्चात्र यथासंख्येनोत्तरासु पाठः। संनिधिस्तु रथंतरचोदनयोपस्थानं प्रकरणपराम- 417
र्शो वा॥ १४॥ § 3436

नायं दोषः। किं कारणम्— § 3437

तत्र मन्त्रोऽपकृष्येत यत्र सोऽर्थान्तरं व्रजेत्।
अभिवत्योऽर्थवत्यस्तु साम्यादिन्द्रमहेन्द्रयोः॥§ 3439

य एव हि अभिवतीभिरिन्द्रः स्तूयते स एव माहेन्द्रग्रहेणेज्यते तत्र सत्येवार्थे किमित्यपकर्षः स्यात्। न च यावत्कर्माङ्गभूतेऽर्थे विद्यते तत्सर्वं मन्त्रेणाभिधातव्यं, न्यूनमधिकं वाऽसौ यदभिधातुं समर्थस्तदभिधत्ते। तेन निर्गुणेन्द्रप्रकाशनं गुणस्यातन्त्रत्वात्प्रकरणलभ्यत्वाद्वा निर्गुणद्रव्यप्रकाशनवदेव। न च शब्दमात्रं देवतेति नवमदशमयोरभिधास्यते। ततश्च य एव महेन्द्रशब्देनार्थश्चोदितः स एवेन्द्रशब्देनोच्यत इत्यर्थान्तरत्वकल्पनाप्रमाणाभावात्। तस्मादुत्कर्षोपलम्भावात्संस्कारकर्मत्वमेव युक्तमिति॥ १५॥ § 3440

नैतदस्ति। निर्गुणेन्द्राभिधानादनुत्कर्ष इति। प्रसज्यत एवोत्कर्षः। कुतः— § 3441

यद्यभेदः प्रमाणेन भवेदिन्द्रमहेन्द्रयोः। 418
ततोऽयं नापनीयेत भेदस्त्वत्र प्रतीयते॥§ 3443

यद्यवयवव्युत्पत्त्या महांश्चासाविन्द्रश्चेत्येवं महेन्द्रशब्दमन्वाचक्षाणैस्तद्वितानुगमः क्रियेत,तत इन्द्र एव गुणमात्रविशिष्टोऽस्य ग्रहस्य देवतेति गम्येत। न त्वेवमस्ति। समुदायप्रसिद्धिबलीयस्त्वेनेन्द्रव्यतिरिक्तरूढिशब्दाभिधेयमहेन्द्रप्रतीतेः। तथा हि— § 3444

व्युत्पाद्यते महेन्द्रश्चेद्वाक्यभेदादि दुष्यति।
अव्युत्पत्तौ महेन्द्रार्थः स्फुटं वस्त्वन्तरं भवेत्॥§ 3446

**न चास्य महत्त्वमपेक्षमाणस्येति** अवयवव्युत्पत्तिं निराकरोति। कथम्—
§ 3447

वृत्तिद्वयेऽपि सामर्थ्यं स्मर्यते हि विशेषणम्।
व्युत्पत्त्याश्रयणे चैतदुभयत्रापि दुर्लभम्॥ § 3449

*‘समर्थः पदविधिः’। *‘समर्थानां प्रथमाद्वा’ इति च समासतद्धितवृत्त्योर्विशेषणम्। अतस्तदभावे नैकयाऽपि भवितव्यम्। यदि युगपत्समासताद्धितावन्वाख्यायेते ततो नैकत्रापि सामर्थ्यं लभ्यते। कुतः— § 3450

तद्धितेन ह्यसंबन्धो महत्त्वेऽपेक्षिते भवेत्।
तस्मिन्नपेक्ष्यमाणे च न महत्त्वेन संगतिः॥ § 3452

एकार्थीभावलक्षणं व्यपेक्षालक्षणं वा सामर्थ्यमुभयथाऽपि सापेक्षस्य नावकल्पते। कथम्— § 3453

अन्यवस्त्वनपेक्षत्वे ह्यन्येनैकार्थतेष्यते।
सापेक्षस्त्वन्यविक्षिप्तो नैकार्थ्यं प्रतिपद्यते॥ § 3455

अविक्षिप्यमाणौ हि द्वावर्थावेकत्र लोलीभावं प्रतिपद्येयाताम्। न च विक्षिप्यमाणौ, नानात्वे बुद्धिकालुष्यात्। यो ह्यवयवाभ्यामेकत्रोपसंहृताभ्यामुभयविशिष्ट एकोऽर्थः प्रतिपाद्यते सोऽपि निरपेक्षाभ्यामेव। सापेक्षत्वे संशयरूपेणैकत्रानुपसंहारात्। एवं तावदैकार्थ्यलक्षणसामर्थ्याभावः। § 3456

व्यपेक्षा पुनराहत्य विगतापेक्षतोच्यते।
सापेक्षत्वे च दूरेऽसावित्येवमसमर्थता॥ § 3458

न हि सापेक्षो विगतापेक्षशब्देन शक्यो वक्तुमित्युभयसामर्थ्याभावादुभयवृत्त्यभावप्रसङ्गः। एवं तावद्युगपदन्वाख्याने दोषः। § 3459

419 क्रमेणाऽऽख्यायमाने तु वाक्यभेदोऽसकृच्छ्रुतेः।
कृत्वा समासमुच्चार्यं पुनः शब्दद्वयं भवेत्॥ § 3461

एतदेवाभिप्रेत्याऽऽह—**न च तद्धितार्थे वृत्तस्येत्यादि**। § 3462

तद्धितार्थे न वृत्तस्य वृद्धिः स्यादुत्तरे पदे।
महत्त्वं द्रव्यसंबन्धि नोपसर्जनसंगति॥ § 3464

महेन्द्र इति हि स्यान्न चेन्द्रविशेषणं महत्त्वम्। न ह्युपसर्जनमभिभूतस्वार्थवृत्ति विशे षणान्तरैः संयुज्यते। **न च समासार्थे वृत्तस्येति** वाक्य-

५ *] पा॰ सू॰ ( २-१-१ )।
५ *] पा॰ सू॰ ( ४-१-८२ )

भेदमात्रेणैवोच्यते। तेन क्रमवृत्तिरपि नास्तीति प्रतिपाद्य पुनर्युगपद्वृत्तिमेव दोषान्तराभिधित्सयोपन्यस्यति। *'**ऐकशब्द्ये परार्थवत्**' इत्यनेन न्यायेनेन्द्रशब्दस्य महत्त्वतद्धितार्थौ प्रति वैरूप्यनिमित्तवाक्यभेदप्रसङ्गः। विध्यनेकव्यापारात्मकश्चापरो वाक्यभेदः। तथा हि— § 3465

महत्त्वस्येन्द्रसंबन्धं तस्य च द्रव्यसंगतिम्।
विदधत्प्रत्ययो वाक्यं भिन्द्यात्पुनरपि श्रुतेः॥§ 3467

**तस्मान्नेन्द्रो** देवता महत्त्वविशिष्टः। किं तर्ह्यवयवसंबन्धानिरपेक्षाद्रूढिशब्दात्ताद्धितोत्पत्तिः। अतश्च सिद्धं देवतान्तरत्वम्। न च वृत्रवधोत्तरकालं महत्त्वाभिधानेनेन्द्रस्यैव महेन्द्रत्वं भवेत्। वेदस्याऽऽदिमत्त्वप्रसङ्गात्। अतो नित्यरूढस्यैव स्तुतिमात्रार्थमेतत्॥ १६॥ § 3468

व्यपदेशभेदाच्च भेदः। एवं च मन्त्रयोर्व्यवस्था भविष्यति। इतरथा विक- 420
ल्पे पक्षे बाधः स्यात्। असति चार्थभेदे मन्त्रभेदस्यादृष्टार्थता प्रसज्येत। § 3469

तस्माद्यथैव सूर्यादेरिन्द्रादत्यन्तभिन्नता।
महेन्द्रस्य तथैवेति प्रगाथापनयो भवेत्॥§ 3471

एवं व्याख्यायमाने तु रूढित्वे तद्धिते सति।
अग्नीषोमादयः सर्वे रूढित्वान्न द्विदेवताः॥§ 3473

यथैव हीन्द्रशब्दस्य महत्त्वतद्धितावपेक्षमाणस्य युगपत्क्रमेण वा वृत्तिर्न संभवत्येवमेव सोमस्याग्निमपेक्षमाणस्य न तद्धितसंबन्धस्तदपेक्षस्य वा नाग्निना सह समासः। तथा क्रमवृत्तौ पुनरुच्चारणे वाक्यभेदान्नान्यतरत्र वृत्तस्यान्यतरेण वृत्तिः, सोमपदस्य वैरूप्यं, प्रत्ययस्यानेकार्थवृत्तिरिति दोषाणां साम्येनरूढित्वप्रसङ्गात्समस्तद्विदेवत्यत्वव्यवहारोच्छेदः स्यात्। § 3474

न चैषां रूढित्वं शक्यं वदितुं, सर्वत्र शास्त्रे द्विदेवत्यत्वाभ्युपगमात्। तद्यथा चतुर्धाकरणेन्द्रपीतपूषप्रपिष्टभागाविचारेषु सापेक्षाग्निदेवत्यादीनामैन्द्राग्नाग्नीषोमीयादीनामाग्नेयादिशब्दैः केवलाग्न्यादिदेवताकैरसामर्थ्यादग्रहणमिति वक्ष्यति। रूढित्वे हि कस्य क्वापेक्षा भवेत्। § 3475

तथा द्विदेवतत्वसामान्येनैन्द्रापौष्णादीनामग्नीषोमीयैन्द्राग्नप्रकृतिकत्वं वक्ष्यते। तथा 'मेधपतिभ्यां मेधम्' इत्यत्र 'देवता तु तदाशीष्ट्वात्' इत्यर्थद्वयमाश्रयिष्यते। तथा मनोताधिकरणे वक्ष्यति **सत्यमग्नीषोमौ देवताप्रकृतौ**

---

२ *] ( अ॰ १ पा॰ ४ अ॰ ५ सू॰ ८ )
१४ था] ( अ॰ ३ पा॰ १ अ॰ १५ )।
१४ णेन्द्र] ( अ॰ ३ पा॰ २ अ॰ १८ )।
१४ पूष] ( अ॰ ३ पा॰ ३ अ॰ १५ ) एष्वधिकरणेष्वित्यर्थः।
१७ त्वं] ( अ॰ ८ पा॰ १ अ॰ ७ ) अत्रेति शेषः।
१८ त्र] ( अ॰ ९ पा॰ ३ अ॰ १२ सू॰ ३५ )।
१९ ति] ( अ॰ १० पा॰ ४ अ॰ २२ सू॰ ४२ ) अत्र भाष्यकार इति शेषः।

**तावग्निश्च सोमश्च तत्राग्निरदेवता न त्वसमवेत** इति। तथा देवताद्वन्द्वाश्रयाणि अग्नेरीत्वषत्वादीनि स्मर्यमाणानि न शक्यानि बाधितुम्। § 3476

यदि च व्याकरणमेवमादावप्रमाणं तर्हि देवतातद्धितस्मरणाप्रामाण्यादग्नीषोमादीनां देवतात्वमपि न स्यात। अथ तत्प्रतीतिरभ्युपगम्येत सा तुल्याऽर्थद्वयप्रतीतावपीति रूढित्वाभावः। एतेनाश्वकर्णादिवदर्थरहित-
421 समासान्वाख्यानेन स्वरसंस्कारप्रसिद्ध्यर्थमग्नीषोमीयादिद्वंद्वस्मरणप्रामाण्यकल्पनं प्रत्युक्तम्। तथा हि— § 3477

यत्रार्थस्य विसंवादः प्रत्यक्षेणोपलभ्यते।
स्वरसंस्कारमात्रार्था तत्र व्याकरणस्मृतिः॥§ 3479

महदिन्द्रशब्दयोस्तावदवश्यं पृथगर्थाभिधानशक्तिः कल्पयितव्या। तयोश्च गुणगुण्य भिधायित्वाद्विशेषणविशेष्यात्मकत्वमवधारितम्। तत्र यावदेव संहतावुच्चारितौ तावदेव पूर्वानुभूतार्थसंबन्धितया विशिष्टार्थप्रत्ययो जायते। न चास्य निवर्तकं किंचिदस्ति। न च समुदायस्यापूर्वशक्त्यन्तरकल्पनाप्रमाणं विद्यते। लब्धात्मिका च समुदायप्रसिद्धिरवयवप्रसिद्धिं बाधते। न चावयवार्थरहितार्थान्तरप्रयोगं विस्पष्टमन्तरेण तदात्मलाभः। किं च— § 3480

एकस्तावदतिक्लेशैरिन्द्रोऽस्तीत्यवगम्यते।
महेन्द्रस्त्वपरः कल्प्यः पुनः क्लेशान्तरैर्भवेत्।§ 3482

प्रत्यक्षेऽपि तावदर्थेऽनेकशब्दशक्तेः कल्पना निष्प्रमाणिका, किमुत यत्रार्थसद्भावोऽपि कल्पनीयः। तदिहेन्द्रशब्दप्रयोगान्यथानुपपत्त्येन्द्रस्तावददृष्टोऽपि कल्प्यते, तत्र यदिपुनर्महेन्द्रशब्दप्रयोगान्यथानुपपत्तिर्भवेत्ततोऽर्थान्तरं महेन्द्रो नाम कल्प्येत। यदा तु पूर्वकल्पिताभ्यामेव महदिन्द्रपदशक्तिभ्यां प्रयोगः सिध्यति, स एव चार्थः किं चिद्विशिष्टः प्रत्यभिज्ञायते, कस्तदाऽर्थान्तरं कल्पयितुं शक्ष्यति। तस्मादिन्द्र एव महत्त्वविशिष्टो महेन्द्रो नान्य इति सिद्धम्। न च समासं कृत्वा तद्धिते क्रियमाणे कस्य चिदसामर्थ्यं समासवेलायां तद्धितवेलायां चापेक्षणीयार्थान्तरानुपादानात्। न च द्विरुच्चारणनिमित्तवाक्यभेदप्रसक्तिः। सकृदुच्चारितैकपदोपात्तानेकार्थकथनात्। वृत्तिद्वयात्मकं हि माहेन्द्रपदम्। एकैका च वृत्तिर्वाक्यार्थे वर्तते। तत्र ययोर्वाक्ययोरर्थौ माहेन्द्रपदेनोपात्तौ तौ ताभ्यां निर्भिद्य कथ्येते। यच्चात्रासकृदुच्चारणं दृश्यते न तद्भेदवचनस्यैव। न हि कदा चिदप्येवंरूपो वेदोऽस्ति महांश्चासाविन्द्रश्च महेन्द्रो देवता अस्येति माहेन्द्रः। न चैतदेव वैदिकं पदमेवं विभज्यते। विभागस्य पौरुषेयत्वेनावैदिकत्वापत्तेः। किं तु— § 3483

वेदे स्वरूपतः शब्दो माहेन्द्रादिरवस्थितः।

२ त्वादीनि ] ईदग्नेः सोमवरुणयोः, अग्नेस्तुत्स्तोमसोभाः इति सूत्राभ्यां इति शेषः।

तस्यार्थः सकलो वाक्यैः पौरुषेयैर्निरुप्यते॥§ 3485

विचित्रशक्तीनि हि पदानि एकानेकपदार्थप्रतीतेः। § 3486

तथैषामर्थकथनं कदाचित्पदेनैवान्येन क्रियते कदाचिद्वाक्येन, तेनाप्येकेनानेकेन वा द्विपदेन बहुपदेन वेति वैचित्र्यम्। तद्यथा कः पिकः कोकिलः, क औपगव उपगोरपत्यम्। उपगुना वा स्वकान्तायामुत्पादितः। तथा पचतीत्युक्ते पाकं परगामिफलमेकः कर्ता पूर्वापरीभूतं वर्तमानकाले निर्वर्तयतीति कथ्यते। न चैवं कथयतां वाक्यभेदः प्रसज्यते। न वाऽशब्दार्थत्वमध्यवसीयते। एवमेव यदि माहेन्द्रपदोपात्तोऽर्थस्तदस्पृशद्भिरेव शब्दशक्तिविद्भिः पुरुषैः स्ववाक्यैनैकेनानेकेन वा कथ्यते कस्तत्र वाक्यभेदः, 422 शतकृत्वोऽपि हि स्ववाक्यमुच्चार्यमाणं न वेदं दूषयति। न च तदीयोऽर्थः कथ्यमानः पौरुषेयत्वं भजते, अवश्यं चानेकोऽर्थः पुरुषैः कथ्यमानः क्रमेण कथयितव्यः, सोऽपि च प्रकृतिप्रत्ययपौर्वापर्येणेत्येवं कथ्यते महांश्चासाविन्द्रश्चेत्यादि। न चैवं सापेक्षत्वम्। *'अथवा भवति च प्रधानस्य सापेक्षस्यापि समास' इति यद्यपीन्द्रशब्दस्तद्धितापेक्षस्तथाऽपि महत्त्वं प्रति पाधान्याल्लभते समासम्। अतश्च युगपदपेक्षायामविरोधस्तथाऽपि तु वृत्तिः क्रमेणैव। कुतः— § 3487

सापेक्षोऽपि महत्त्वेन प्रधानत्वात्समस्यते।
तदपेक्षो गुणत्वात्तु तद्धितेनैव वर्तते॥§ 3489

तेन यत्रैव प्रधानं सापेक्षं तत्रैतयैव तावद्वृत्त्या भवितव्यमिति समास एव प्रथमं भवति। यदि वा कृत्वा समासं तन्त्रेण वृत्तिरिष्येत, ततः शुद्ध इन्द्रस्तद्धितसंबन्धी शुद्धश्च समासभागिति निर्गुणस्यैवेन्द्रस्य देवतात्वापत्तेर्गुणानर्थक्यप्रसङ्गः। § 3490

न चेन्द्रमहत्त्वयोर्युगपत्ताद्धितार्थे निपतितयोररुणैकहायन्यादिवत्परस्परनियमो लभ्यते। न ह्यक्रियायां युगपत्संनिपातो नापि विशेषणवशीकारसामर्थ्यम्। सत्यपि च द्वन्द्वदेवतापत्तिः। अकृतसमासयोश्च महदिन्द्रशब्दयोरनेकत्वाद्विवक्षितैकसंख्यप्रातिपदिकनिमित्ततद्धितसंबन्धाभावप्रसङ्गः। किं च— § 3491

*सुबन्तौ यदि वैतौ ते, न प्रातिपदिकं ततः।
असुबन्तत्वक्लृप्तौ वा समासांशो न लभ्यते॥§ 3493

तस्मान्न युगपद्वृत्तिरिति क्रमवृत्त्या समासार्थस्यैव देवतात्वम्। अतश्चेन्द्र एव गुणसंयुक्तो महेन्द्रो नार्थान्तरमिति पूर्वपक्ष एव शोभन इत्यन्यदुत्तरं वाच्यम्। तदुच्यते— § 3494

---

१३ *] म॰ भा॰ ( २—१—१ )।
२८ *] श्लोकस्यायमर्थः। सुबंतत्वे महदिन्द्रशब्दयोः, 'अप्रत्ययः प्रातिपदिक' इत्यनेनाप्रातिपादिकतया तद्धितवृत्त्ययोगादसुबन्तत्वे च समासायोगाद्वृत्तिद्वययौगपद्यवादिनस्ते युगपत्सुबन्तत्वासुबन्तत्वविरोध इति।

श्रुत्या हि देवता यागे समवैति न रूपतः।
तस्मान्माहेन्द्रशब्दोक्त्या महेन्द्रो देवतेष्यते॥ § 3496

यद्यप्यभिन्नोऽर्थस्तथापि ‘विधिशब्दस्य मन्त्रत्वे भावः स्यात्तेन चोदना’ इति महेन्द्रशब्देनैवोच्यमानस्यास्मिन् ग्रहयागे देवतात्वं नान्यथा। तत्र सकलपर्यायेणापि बृहदिन्द्रादिशब्देनोच्यमानस्य देवतात्वं न भवति किमुत न्यूनेनैवेन्द्रशब्देन। तथा हि— § 3497

अर्थोऽपि यादृशो यत्र देवतात्वेन चोदितः।
मनागपि ततोऽन्यत्वे देवतेति न गम्यते॥ § 3499

423 देवतात्वस्य प्रत्यक्षाद्यनवगम्यत्वाच्चोदनैवैकं प्रमाणं सा च यं यादृशं यत्र यादृशे चार्थे विदधाति, स यदि तथैवानुष्ठानेऽपि संपाद्येत, ततस्तत्प्रमितोऽयमित्यवसीयते। § 3500

किंचिदपि चेदिहान्यथा जातं निवृत्तव्यापारायां चोदनायां प्रमाणान्तरं मृग्यं न च तदस्तीत्यप्रमाणता यथा वक्ष्यति। ‘स एवाग्निरष्टाकपालस्य देवता नाऽऽज्यस्य’ इति। तेन व्यवस्थावशाद्यथैवेन्द्रे चोदितेऽग्नेर्देवतात्वं न भवति, सोमस्य च चोदिते न पुरोडाशस्य, अभिषुतस्य च न लतायाः, शुद्धे च न सगुणस्य, तथैव गुणवति चोदिते न निर्गुणस्य। कुतः— § 3501

देवता हि विधेयत्वाद्विवक्षितगुणेष्यते।
लक्षणत्वे तु तस्याः स्यादविवक्षा गुणादिषु॥ § 3503

यदि हि तद्धितसंबन्धे देवतोद्दिश्यमाना स्यात्ततोऽस्या गुणविवक्षा भवेत्। इयं पुनरविधीयमाना देवतात्वमेव न प्रतिपद्यत इत्यवश्योपादातव्या। ततश्च विवक्षितगुणत्वात्तदपाये न कथं चिद्देवतेति गम्यते। यथा शुक्लवासा भोजयितव्यो ‘लोहितोष्णीषा ऋत्विजः प्रचरन्ति’ ‘दण्डी प्रैषानन्वाह’ इति विशेषणरहितानामकर्माङ्गत्वम्। यदा तेऽप्युद्दिश्यन्ते योऽयं शुक्लवासास्तमानयेत्यादौ तदा विनाऽपि विशेषणेनाऽऽनीयन्ते। तदिह यद्यपि तावद्देवता रूपेणोपकुर्यात्तथाऽपि न गुणरहिताऽऽश्रीयेत, किमुत यदाऽभिधानोपकारिणी विधिगतव्यतिरिक्ताभिधानाभिहिता नैव प्रत्यभिज्ञायते सैवेयं देवतेति। § 3504

समासेन च विधीयमानायां नानेकार्थविधिदोषप्रसक्तिः। तत्र माहेन्द्रग्रहगता न कथं चिदिन्द्रशब्देनोच्यते। § 3505

या तु तेनोच्यते सा तत्र नैव देवतेत्यनर्थकमेवास्याः प्रकाशनम्। अतश्च ‘न श्रुतिसमवायित्वात्’ इत्ययमपि सूत्रार्थो भवति श्रुतिसमवेतं देवतात्वं भविष्यति तदधीनज्ञानमित्यर्थः। तच्च तद्धितसंवादे सति ज्ञायते। तस्मादस्ति देवताभेद इति। कथं त्वस्मिन् पक्षे भाष्यगमनिका। तदभिधीयते। § 3506

---

३ थापि] ( अ° १० पा° ४ अ° १३ सू° २३ )
१३ ति] ( अ° २ पा° २ अ° ३ सू° ६ ) इत्यत्र भाष्यकार इति शेषः।

पूर्वपक्षवादी तावदनुत्कर्षं प्रगाथस्य वदति, यश्च माहेन्द्राद्ग्रहादिन्द्राभिधानसमर्थमन्त्रानुत्कर्षं वदति तेनाकर्माङ्गभूतार्थप्रकाशनवैयर्थ्यादिन्द्र एवात्र शुद्धो देवताभूतः प्रकाश्यत इत्यभ्युपगतं भवति। § 3507

तस्य च देवतात्वं नाभ्युपगममात्रेण सिध्यति, नापि प्रमाणान्तरेणेति य एतद्ग्रहोत्पत्तिवाक्ये देवताभिधानशक्तस्तद्धितः श्रूयते ‘माहेन्द्रं गृह्णाति’ इति तत्संयोगाद्विज्ञायते। स च यदि समासान्निष्कृष्य केवलादिन्द्रशब्दादुत्पाद्यते, ततो मन्त्राभिधेयसदृशं देवतात्वमुक्तं भवति। § 3508

सिद्धवच्चैतमर्थं पूर्वपक्षवादिनोऽभिप्रेतं मन्वानो निष्कृष्य ब्रवीति इन्द्रोऽस्य देवता—इति तद्धितसंयोगेन ज्ञायते, **न चास्य महत्त्वमपेक्षमाण-** 424
**स्या**कृते समासे शुद्धस्योपसर्जनीभूतस्य तद्धितसंयोगः, **तद्धितसंयोगापेक्षस्य वेति**—सत्यमि सापेक्षप्रधानसमासे प्रातिपदिकावस्थायां तद्धितापेक्षा, न च तदानीमसुवन्तत्वात्समासोपपत्तिः। तेन यत्रैव पृथग्भूतं सुबन्तं संबन्धार्हमेव पदान्तरमपेक्षते यथा राजपुरुषः शोभन इति, तद्विषयमेवैत्, ‘भवति वै प्रधानस्य सापेक्षस्यापि समास’ इति द्रष्टव्यम्। § 3509

अकृते च समासे तद्धितापेक्षायां वाक्यात्तद्धितोत्पत्तिरित्यभ्युपेतं स्यात्। शुद्धस्य वा तद्धितसंस्पर्शाद्विशेषणानन्तर्गतिप्रसङ्गः। क्रमवृत्तिः पुनर्भवतो नाभिप्रेतैव, पूर्वं तद्धितसंबन्धे पूर्वोक्तावेव द्रव्यविशेषणोत्तरपदवृद्धिप्रसङ्गदोषौ। § 3510

न च समासार्थे वृत्तस्य शुद्धस्य तद्धितसंबन्धः। तेनैकस्मिन्नेव प्रयोगे तन्त्रसंबन्धोऽभ्युपगन्तव्यः। ततश्च ‘ऐकशब्द्ये परार्थवत्’ इति तथैव वैरूप्यदोषः। § 3511

**विस्पष्टश्चायमन्योऽर्थ** इति प्राक्समासादनेकार्थविधेः समासपदलभ्यत्वाद्वाक्यमेदमाह। कृते तु समासे नैष दोषः। **तस्मान्नेन्द्रो देवताऽमहत्त्वविशिष्टः शुद्धः** किं तर्हि, विशिष्ट एव। § 3512

अथ वा नेन्द्रो देवता केवलपदोपात्तः शुद्ध इत्यभिप्रायः। कथं तर्हि, महत्त्वविशिष्टः, समासप्रातिपदिकात्तद्धितोत्पत्तेः। § 3513

न **त्ववयवसंबन्धेने**ति—नावयप्रसिद्धिनिराकरणपरं, किं तर्हि, नावयवसंबन्धेन तद्धितोत्पत्तिर्निष्क्रष्टुमशक्यत्वादित्यभिप्रायः। § 3514

**तस्माद्देवतान्तर**मिति। सत्यपि द्रव्यैकत्वे सगुणनिर्गुणाश्रयणाद्देवतान्तरत्वम्। आह च— § 3515

आचार्यो मातुलश्चेति द्रव्यैकत्वेऽपि दृश्यते।
अपेक्षाहेतुभेदेन व्यवहारः पृथक्तया॥§ 3517

**यदप्युच्यते इन्द्रस्य वृत्रवधोत्तरकालमिति**। पूर्वं सर्वत्र शुद्धात्मनः प्रतिपन्नदेवतात्वस्य पश्चात्तनोऽयं गुणः स्तुतिमात्रोपयोगी न देवतात्वेऽन्तर्भवतीति मन्यते। अस्य तूत्तरं गतार्थम्। § 3518

२० श्च] ( अ॰ १ पा॰ ४ अ॰ ५ सू॰ ८
)

स्थिते च देवतान्तरत्वे, शुद्धस्य देवतायाः प्रकाशनं, शुद्धेन वा विशिष्टस्य, विशिष्टचोदनायामपि वा शुद्धस्य देवतात्वं, शुद्धशब्दोच्चारणेऽपि वा विशिष्टे देवतात्वं प्रतिपद्यत इत्यादि सर्वमन्धकारनिरीक्षितं साहसमात्रेणाभ्युपगम्येत, न चैतद्युक्तम्। अतो यत्र विधिमन्त्रयोर्देवतासंवादस्तत्र प्रगाथो नीयेत। अस्मत्पक्षे पुनः— § 3519

यां कां चिदप्युपादाय देवतां साधिता स्तुतिः।
अदृष्टं यागमात्रार्थं करोत्यारादवस्थितम्॥ १७॥ § 3521

425 यदि चाऽऽदिमाननादिर्वा गुणः केवलमिन्द्रस्तुत्यर्थमेवोपादीयते न देवतात्वेऽन्तर्भवति, ततोऽस्योपादानमेवानर्थकं स्यात्। सर्वा हि देवतैवमर्थमभिधीयते विधीयते वा, कथं नाम तदुद्देशेन कर्म क्रियेतेति। § 3522

यदि चाविहिते विहिते च गुणे केवलेनेन्द्रेण व्यवहियते ततो नार्थो गुणाभिधानेन। किं च— § 3523

गुणोऽनन्तर्गतश्चात्र पश्चादाभिहितो भवेत्।
लक्षणत्वेन वोक्तः सन्नचाप्राप्तेस्तदस्ति ते॥ § 3525

न हि ग्रहसंबन्ध इन्द्रस्य प्राप्तो येन तद्व्रतेन्द्रानुवादेन महत्त्वं केवलमेव स्तुत्यर्थमुच्येत। न च महानिन्द्रः प्राप्तो यतो गुणेनोपलक्ष्य विधीयेत। तस्मादप्राप्तविधेर्देवतान्तरता॥ १८॥ § 3526

पूर्ववन्मन्त्रव्यपदेशभेदव्यवस्था॥ १९॥ § 3527

वशादिद्रव्याणामर्थरूपोपकारित्वात्प्रत्यक्षलभ्ये विशेषे सामान्येनापि सि-
426 द्धेर्न विधि शब्दादरः॥ २०॥ § 3528

बलवत्प्रमाणविरोधे संस्कारपक्षस्त्यज्येत, न च सोऽस्ति, लिङ्गबलीयस्त्वादुत्कर्षसिद्धेरित्यपर्युदासः संस्कारपक्षस्य। § 3529

अथ वाऽर्थैकदेशोऽयं समासार्थप्रकाशनम्।
करिष्यत्यविरोधाय मनोतास्थाग्निशब्दवत्॥ § 3531

अनुत्कृष्यमाण एव वा प्रगाथः सन्निधिवशादवयवद्वारेण महेन्द्रमविरोधाय दृष्टार्थत्वाय च प्रकाशयिष्यति, यथाऽग्नीषोमीये मनोतायामग्निशब्दः प्रकरणात्समासस्थः प्रतीयमानः साहचर्यात्सोममपि प्रतिपादयन्समुदायार्थो विज्ञायते। अतश्चानुत्कर्षेऽप्यदोष इति॥ २१॥ § 3532

आम्नातेष्वपि मन्त्रेषु नोत्कृष्टेष्वर्थदर्शनम्।
सर्वेषु भवतीत्येवं नोत्कृष्टत्वं न दुष्यति॥ § 3534

न हि यमादीनां ग्रहान्तरेष्वपि देवतात्वं येनेन्द्रवदुत्कृष्टैर्मन्त्रैः प्रकाश्येरन्। अतस्तेषां तावद्विध्यानर्थक्यप्रसङ्गादवश्यमदृष्टार्थत्वेन भवितव्यम्। ततश्च तत्सामान्यादितरेषु तथात्वं, तस्मान्न संस्कारकर्मत्वमिति॥ २२॥ § 3535

यमादयो न विद्यन्ते यद्यपि ग्रहदेवताः।
अन्यकर्मोपयोगित्वात्प्रकाश्याः स्युस्तथाऽपि नः॥ § 3537

मण्डूकसूक्तस्याग्नौ प्रयोगः, तत्र मण्डूकेनाग्निविकर्षणाम्नानात्। अक्षसूक्तस्य राजसूये, तत्र ‘अक्षैर्दीव्यति’ इति विधानात्। § 3538

मूषिकासूक्तस्यैकादशिन्याम्, ‘आखुस्ते पशुः’। इत्युपशयसंबन्धसंकीर्तने सति तद्द्वारेणोपशयस्यैव स्तुतिः। कुषुम्भकसूक्तादीनां तु यदि क्व चिद्विशेषरूपेणार्थो नास्ति ततः सामान्यविधानेनार्थवत्ता भविष्यति। § 3539 427

वाचः स्तोमे सर्वमन्त्रोपदेशात्। तथाऽऽश्विने सूर्योदयावधि समाप्त्यसंभवे सर्वासामृचामुपदेशात्। § 3540

तत्र वचनेनैवाऽऽसमवेतार्थमन्त्रविधानसामर्थ्यादगतेरदृष्टार्थाश्रयणं, न च क्वचिददृष्टार्थत्वेन सर्वत्रैव दृश्यमानमप्यर्थं प्रोझ्झ्याद्दृष्टार्थत्वकल्पना युज्यते। तथा हि— § 3541

न जपादावदृष्टार्थे वैष्णव्यादिनिदर्शनात्।
याज्यादावपि दृष्टार्थे स्याददृष्टार्थकल्पना॥ २३॥ § 3543

यदुक्तं मनोतायामिवाग्निशब्द इन्द्रशब्दः समासार्थं लक्षयिष्यतीति। तदयुक्तम्। कुतः। एतस्मादेव दोषात्। न हीन्द्रशब्दस्य स्वार्थमभिदधतः कश्चिद्विरोधो येन श्रुतिवृत्तिं जह्यात्। § 3544

सर्वादृष्टार्थानां च यथाकथं चिल्लक्षणया दृष्टार्थत्वापादनसंभवादयुक्तमेतत्। यत्तूक्तमुत्कृष्यतामेवेति। तदयुक्तम्। कुतः— § 3545

प्रकृतस्तोत्रशेषत्वं श्रुत्या संनिधिक्लृप्तया।
विना सामान्यसंबन्धाल्लिङ्गं चाविनियोजकम्॥ § 3547

यदि ह्येकान्तेन प्रथमं दृष्टार्थत्वमवधारितं स्यात् ततः क्रमसंनिधिकल्प्या श्रुतिर्बाध्येत, यतस्तु विनियोगोत्तरकाला प्रयोजनकल्पना न तद्वशेनैव विनियोगस्तेन क्रमसंनिधिभ्यां विनियुक्ते दृष्टमदृष्टं वा प्रयोजनं कल्प्यमानं न विरुध्यते। न चोत्कृष्टस्य प्रगाथस्यान्यत्र विनियोगहेतुरस्ति। § 3548

लिङ्गं हि देवतां प्रकाशयितुं सामर्थ्येन तन्मन्त्रं स्वरूपे विनियुञ्जीत, तथा चात्वानर्थक्यप्रसङ्गः। कर्मसंबन्धे तु न कश्चिदस्य व्यापारः। तदेतल्लिङ्गं यदि 428
सामान्यतः केन चित्कर्मसंबन्धः। क्रियते, ततः कथं तस्योपकरिष्यतीत्यपेक्षिते यथा शक्नोतीत्येवमाश्रयणाद्देवताप्रकाशनद्वारेणेति विनियुङ्क्ते। § 3549

न चात्र सामान्यसंबन्धकारणं पश्यामः। तस्मादुत्कृष्टानामानर्थक्यमेव स्यादित्यदृष्टार्थतैव न्याय्या। किंच— § 3550

एवं च सप्तमी षष्ठी द्वितीया स्तौतिशंसती।
श्रुतिवृत्ता भविष्यन्ति त्वत्पक्षेऽन्यार्थवृत्तयः॥ § 3552

गुणगुण्यभिधानक्रियाणामक्षरारूढत्वात्सप्तमीश्रुतिसंयोगो घटते। प्रकाशने हेतुकरणत्वात्तृतीयायुक्ताः कवत्यादयः श्रूयेरन्। ननु स्तुतावपि कवतीनां करणत्वात्तृतीयैव प्राप्नोति। नैष दोषः— § 3553

आधारत्वमपि ह्यासां करणत्वं च विद्यते।
तत्रैतयोर्यथाभीष्टं निर्देश उपपद्यते॥ § 3555

प्रकाशनं पुनः परमार्थतस्तावदात्माधारम्। कर्मत्वप्रतिपत्त्युत्तरकालं च व्याप्यत्वाद्देवताधारम्। तत्र कवतीनामैकान्तिकमेव करणत्वमिति वैषम्यम्। § 3556

अपि च स्तौति शंसतीति स्तुतिभावना पूर्वापरीभूता श्रूयते। तस्यां च धात्वर्थः करणभूतः शेषाणि च कारकाणि नित्यं धात्वर्थं निष्पादयन्ति संबध्यन्ते। तत्र यदि मन्त्राः स्तोत्रनिर्वृत्त्यर्था भवन्ति ततोऽपेक्षितार्थकरणाच्छास्त्रदृष्टमर्थं कुर्वन्तो दृष्टार्था भवन्ति। प्रकाशनं तु कुर्वन्तोऽचोदितकरणाददृष्टार्था भवेयुः। ततश्च वरं स्तुतीनामेवाऽदृष्टार्थत्वम्। किं च।

श्रुत्यैव षष्ठी पारार्थ्यं देवतानां ब्रवीति नः।
न प्रधानं गुणाश्चेष्टाः स्तुतेस्तेन प्रधानता॥ § 3559

देवताप्राधान्ये हि प्रातिपदिकार्थपरत्वादव्यतिरिक्तार्थविषया ‘अग्निर्मूर्धा’ इवत्प्रथमैवश्रूयेत। § 3560

429 यदपि किं चित्प्रथमान्तं तदपि योग्यतापूर्वकैकवाक्यत्ववशेन गुणसंबन्धार्थमेव। यथा, इन्द्रो यातो—जङ्गमस्य, अवसितस्य—स्थावरस्य च राजेति। § 3561

न च गुणानामुपयोगोऽस्तीति तत्प्राधान्यानाश्रयणे स्तुत्यर्थतैव युक्ता। सत्यमिति ग्रन्थच्छेदः। तत्रार्थवादन्यायेन शेषपदानर्थक्यप्रसङ्गात्सत्यपि पूर्वत्र प्राधान्यपर्यवसानसंभवे स्तुत्यर्थेनैवैकवाक्यता युक्ता। § 3562

न चैवं स्तौतिशंसत्योः प्रकाशनलक्षणार्थता भविष्यतीति स्तुतेरेव प्राधान्यम्॥ २४॥ § 3563

पृथक्त्वनिवेशिनी द्विद्वादशसंख्या न प्रकाशनाभेदे सति शब्देनोच्यते। सामान्याविवक्षायां वा प्रत्यृचं प्रतिपदं च तन्निर्वृत्तेर्न द्वादशत्वेऽवतिष्ठते। ननु च स्तुतावपि तुल्यमेतत्। तथा हि— § 3564

सामान्यस्तुतिरेकैव भेदोऽपि प्रत्यृचं स्थितः।
न चान्यथा विवक्षाऽस्ति यतो द्वादशता भवेत्॥ § 3566

अथ स्तोमवशादृक्समुदायसाध्याः स्तुतयो गण्यन्ते तथा प्रकाशनान्यपीत्यविशेषः। उच्यते— § 3567

क्रियाः फलापवर्गिण्यस्तत्संख्यागणनाः सदा।

अपूर्वद्वादशत्वाच्च द्वादशत्वं निरूप्यते॥ § 3569

प्रकाशनार्थत्वे हि प्रत्यृचं प्रतिपदं च तन्निर्वृत्तिदर्शनात्क्रियासमाप्तेर्न किंचित्कारणमस्ति, येन द्वादशत्वं परिच्छिद्येत। अपूर्वार्थत्वे तु तेषां शास्त्रगम्यत्वाद्यथोक्तस्तोमसंपदः प्राङ्निर्वृत्तिप्रमाणाभावादृक्समुदायेनापूर्वनिर्वृत्तेस्तद्द्वारेण क्रियासमाप्त्युपलक्षणादपूर्वाणां द्वादशत्वेन स्तुतिद्वादशत्वसिद्धिः। न हि प्रत्यृचं सर्वस्तोत्रेभ्यो वा तत्कल्पनायाः किं चित्प्रमाणमस्ति यथा प्रकाशनस्य 430
दर्शनम्॥ २५॥ § 3570

ऋचामनूद्यत्वादाग्नेयग्रहचोदनयैवाऽऽग्नेयीनां स्तुतिसाधनत्वसिद्धेः ‘आग्नेयीषु स्तुवते’ इत्यनर्थकं वचनम्॥ २६॥ § 3571

सबन्धस्य भेदनिबन्धनत्वात्संबन्धवचनेन स्तोत्रशस्त्रयोर्भेदः। स च प्रकाशनैकत्वान्न प्राप्नोति। ननु स्तुत्येकत्वादितरत्रापि तुल्यमेतत्। अथ प्रगीताप्रगीतमन्त्रसाधनत्वेन भेदः, तद्व्यक्तिद्वारेण वा, स पूर्वपक्षेऽप्यविशिष्टः। तत्रोत्तरं द्वादशत्ववत्। अत्यन्तभेदाद्धि स्तोत्रशस्त्रापूर्वयोस्तद्द्वारेण क्रिययोर्भेदमुपचर्य संबन्धवचनम्। न तु प्रकाशनं स्वतः फलतो वा भिद्यते॥ २७॥ § 3572

यदिदं द्वितीयाप्रतिपादितकर्मार्हमभिधानमिदं चापरं प्राधान्ये कारणम्। प्रधानक्रिया हि केन चिद्रूपेणेप्सिता ‘अग्निहोत्रं जुहोति’ ‘आधारमाधारयति’ इतिवद्भवति न संस्कारक्रियाऽत्यन्तगुणभूतत्वात्। § 3573

अथ वा स्तोत्रशस्त्रसमाख्ययोरभिधानत्वं तत्प्राधान्यज्ञापनार्थम्। इतरथा हि प्रकाशनमित्येवं समाख्या स्यात्। अवहन्त्यादिवद्वा नैव भवेत्॥ २८॥ § 3574

योऽयं मन्त्रे फलाशीरर्थवादः स स्तुतेः प्रधानत्वे घटते सर्वत्र प्रधानविषयत्वात्प्रार्थनानाम्। त्वत्पक्षे तु— § 3575

देवतैव प्रधानत्वात्फलं याच्येत कर्मवत्। 431
न स्वामिनि स्थिते कश्चिद्दासात्प्रार्थयते फलम्॥ २९॥ § 3577

इति स्तुतशस्त्राधिकरणम्॥ ५॥

## ०.०.३३ मन्त्राविधायकत्वाधिकरणम्

इह मन्त्रा उदाहरणम्। किं तद्गता भावनावचना ब्राह्मणवद्विदधति नेति संदेहे शब्दाभेदाद्विधायका इत्याशङ्क्य मन्त्रत्वात्प्राप्तार्थत्वाच्च विधित्वासंभवेन प्रयोगकालेषु ब्राह्मणविहितानामेवार्थानां स्मारका इत्युत्तरपक्षं उक्तः। तथा हि— § 3579

न कर्मान्तरताऽस्त्यत्र बलवत्प्रत्यभिज्ञया।
न चोपात्तो गुणः कश्चिन्न च वाक्यान्तरे स्तुतिः॥§ 3581

स्मारकत्वप्रतिपक्षौ हि विध्यर्थवादौ स्यातां, तदिह स्वरूपं तावदन्यतः क्रियायाः प्राप्तं गुणफलनिमित्तानि तु नैवोपात्तानि यानि विधीयेरन्। § 3582

न च वाक्यान्तरस्थे पर्यवसितप्रयोजने विधौ स्तुतिरुपपद्यते। तदुक्तं प्रथनमन्त्रे। तस्मात्प्रकाशका मन्त्रा इति यद्व्याख्यायते तत्र वदामः। किं पुनः कारणं मन्त्रत्वेनाऽऽख्यातविशेषाणां विधिशक्तिस्तिरोधीयते कथं च ब्राह्मणत्वेनासावविर्भाव्यते। दृष्टाश्च मन्त्रगता अपि विधायता 'वसन्ताय कपिञ्जलानालभते' इत्यादयः। § 3583

तथा ब्राह्मणगता अप्यविधायका यथा 'यस्योभयं हविरार्तिमार्छेते' इत्यादयः। तस्मान्नायमेकान्तः। किं च— § 3584

432 प्राप्तत्वाद्यदि चेष्येत मन्त्राणामनुवादता।
तैरेव विहितं कस्मान्न स्मारयति चोदना॥§ 3586

न ह्यत्र विशेषहेतुरस्ति किं ब्राह्मणविहितमासाद्योपहतविधिशक्तिर्मन्त्रः स्मारको भवत्यथ वा विपर्यय इति। § 3587

तत्रोभयोरनुवादत्वासंभवादगृह्यमाणविशेषत्वाच्च द्वयोरपि विधायकत्वम्। अभ्यासाच्च कर्मभेदः स्यात्। बलवत्प्रत्यभिज्ञायाश्चाभ्यासाधिकरण एवोत्तरं भविष्यति। तस्मान्नैवमभिधायकत्वसिद्धिः। येऽप्याहुः— § 3588

यस्माद्व्रीह्यादिवन्मन्त्राः करणत्वेन कर्मणाम्।
ब्राह्मणेन नियुज्यन्ते तद्वत्ते न विधायकाः॥§ 3590

तैरपि सामान्यतो दृष्टमात्रं व्यपदिष्टम्। कुतः— § 3591

विधिशक्तिर्नियोगेन न मन्त्रस्यापनीयते।
ततो विधास्यति ह्येष नियोगात्स्मारयिष्यति॥§ 3593

न हि विनियुक्तेन न विधातव्यमिति किं चित्प्रमाणं यदि स्वतो विधिशक्तिरस्त्येव। अथ त्वसौ प्रथममेव नास्ति व्यर्थो विनियोगोपन्यासः। न चोभयकरणे विरोधः। तथा हि— § 3594

विधायकं सदप्यर्थं ब्राह्मणं स्मारयिष्यति।
'मन्त्रतस्तु विरोधे स्यात्'* इत्यत्रैतद्वदिष्यते॥§ 3596

ये च वचनेनानविनियुक्तास्ते च त्वत्पक्षे निराकरणहेत्वभावाद्विधायकाः प्राप्नुवन्तीत्येतदप्यकारणम्। न चात्र मन्त्रोपन्यासस्य कश्चिसंबन्ध इत्यन्यथा वर्ण्यते। विविधमेवाऽऽख्यातं गुणप्रधानकर्मत्वेनोक्तम्। § 3597

१८ ति] (अ॰ २ पा॰ २ अ॰ २) अत्रेति शेषः।

२८ *] (अ॰ ५ पा॰ १ अ॰ ९ सू॰ १६)।

अथेदानीं प्रस्तूयते किं तावेव द्वौ प्रकारावुतान्योऽप्यस्तीति। तत्र न तृतीयः प्रकारोऽस्तीति मत्वा पूर्वपक्षवादी वदत्यैकार्थ्यमिति। तथा प्राप्तेऽभिधीयते॥ ३०॥ § 3598

अस्ति तृतीयः प्रकारो यदभिधायकत्वं नाम। पश्य— § 3599

येषामाख्यातशब्दानां यच्छब्दाद्युपबन्धनात्। 433
विधिशक्तिः प्रणश्येत्तु ते सर्वत्राभिधायकाः॥§ 3601

मन्त्रगतानां ब्राह्मणगतानां चाऽऽख्यातशब्दानां येषां शब्दान्तरेण विधिशक्तिरपगच्छति तेषामभिधायकत्वम्। तत्र 'न ता नशन्ति' इत्यत्र तावद्यच्छब्दोपहितो विधायकोऽनुवादत्वं प्रार्थयते। तथा 'अहे बुध्निय मन्त्रं मे गोपाय' इत्यामन्त्रणविभक्त्या। दामि गृह्णामीत्युत्तमपुरुषेण। 'यदि सोममपहरेयुः' इति यदिशब्देन। ते चैवमादयः प्रायेण मन्त्रेष्विति मन्त्रा उदाहरणम्। अविधायका मन्त्रा इति च प्रसिद्धिः। § 3602

ब्राह्मणे तु भूयांसः प्रत्यया विधायकास्तेन तद्विधायकमिति प्रसिद्धम्। अल्पे त्वविविधायका इति तदहि नोदाहरणम्। विधायकत्वाविधायकत्वे तु तयोर्यथोक्तमेव कारणमिति न मन्त्रत्वब्राह्मणत्वयोर्व्यापारः। § 3603

तत्र त्वेतावान्व्यापारो दृश्यते। रूपादेव ब्राह्मणगतानां विधित्वनिवृत्तौ सत्यां निमित्तादिप्रत्यायनार्थता। न हि तेषां रूपं कर्मसु प्रयोगार्हम्। मन्त्रगतानां तु रूपमेवोपलभ्य दामि गृह्णामि निर्वपामीदामिदं च करोम्यग्नीन्विहर वर्हिः स्तृणीहि इदमिदं च कुर्वित्यादिकं शक्यमेतैः कर्म स्मर्तुमिति विनियोगबुद्धिर्भवति। कुतः— § 3604

अनुष्ठाने पदार्थानामवश्यंभाविनी स्मृतिः।
अनन्यसाधनाऽनन्यकार्यैर्मन्त्रैः प्रसाध्यते॥§ 3606

न तावदनुष्ठानवेलायामस्मृतः कश्चित्पदार्थः शक्यः कर्तुमित्यवश्यंभाविन्या स्मृत्या योग्यसाधनमात्रापेक्षणाद्यत्किंचिद् ब्राह्मणपदार्थानुसंधानं वा पूर्वपदार्थप्रत्यवेक्षणं वा सूत्रग्रन्थो वाऽऽत्मीयग्रहणवाक्यानि वोपद्रष्टादि वा साधनं ग्रहीतुमारभ्यते। § 3607

तत्रानन्यप्रयोजनान्मन्त्रान्प्रकरणे पठ्यमानान्सामान्येन किमप्येभिः कर्तव्यमित्येवं प्रयोगवचनेन गृह्यमाणानुपलभ्य यादृशेन वाक्येन स्मृतिः कर्तुमाकाङ्क्ष्यते तद्रूपा एत इति विदित्वा लिङ्गप्रकरणानुमितया श्रुत्या विनियोगे सत्यभिधानार्थता विज्ञायते। § 3608

ततश्चोपायान्तराण्यप्रमाणकत्वान्निवर्तन्ते। नियमादृष्टसिद्धिश्च मन्त्रैरेव स्मृत्वा कृतं कर्माभ्युदयकारि भवतीत्यवधार्यते। भाष्यमप्यत्रैव योजनीयम्। § 3609

नासकृदप्युच्चारणे तत्प्रत्ययादिति न प्राप्तत्वाभिप्रायेणोच्यते। किं तु यच्छब्दोपबन्धादस्यैव मन्त्राख्यातस्यान्यतः प्राप्तमहं ब्रवीमीत्येवंरूपप्रत्ययात्। 434

शतकृत्वोऽपि ह्येवमादिरुच्चार्यमाणः स्वसामर्थ्येनैव नापूर्वप्रत्ययं करोति तत एव पूर्वप्राप्तबुद्ध्युत्पादात्॥ ३१॥ § 3610

इति मन्त्राविधायकत्वाधिकरणम्॥ ६॥

## ०.०.३४ मन्त्रलक्षणाधिकरणम्

यथोक्तेन न्यायेन मन्त्रोदाहरणस्यातन्त्रत्वात्प्रासङ्गिकामिदं पूर्वसूत्रप्रयुक्तमन्त्रशब्दार्थलक्षणाभिधानमिति नावश्यमिदमर्थतोऽधिकरणं पूर्वम्। शक्यं हि वाक्यमात्रमप्युदाहृत्य विचारयितुम्। § 3612

भाष्यकारस्तु सूत्रकारोच्चारितमन्त्रशब्दादरेण पौर्वापर्यविशेषमाह। तच्चोदकेष्विति। तत्—अभिधानं चोदकं प्रयोजकं येषामिति बहुव्रीहिः। अर्थदर्शनमात्रार्थं तु षष्ठीकथनं भाष्ये। अध्येतृवृद्धव्यवहारासिद्धं चेदं प्रायिकाचिह्नयुक्तं लक्षणं लाघवार्थमुक्तम्। § 3613

धरणिगतानेकद्रव्यप्रत्येकनिरीक्षणे पुनः पुनः पृष्ठं कुटिलीक्रियत इति तत्सामान्येन पृष्ठाकोटाभिधानम्। श्लोकश्चैवं द्रष्टव्यः— § 3614

ऋषयोऽपि हि लक्ष्याणां नान्तं यान्ति पृथक्त्वशः।
लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः।§ 3616

वृत्तौ लक्षणमेतेषामस्यन्तत्वान्तरूपता।
आशिषः स्तुतिसंख्ये च प्रलप्तं परीदेवितम्॥§ 3618

435 प्रैषान्वेषणपृष्टाख्यानानुषङ्गप्रयोगिताः।
सामर्थ्यं चेति मन्त्राणां विस्तरः प्रायिको मतः॥§ 3620

**डुलेरिवेति**। डुलिः—कच्छपः। प्रतिपुनातुशब्दमच्छिद्रेण पवित्रेणेत्यनुष-
436 ङ्गः। सामर्थ्यं—अभिधानशक्तिः। ये मां दुग्धवन्तस्त एव निराकृतवन्त इति धेन्वाः परिदेवितम्। अमुतः सोममाहर इति सौपर्णोपाख्याने विनतया गरुत्मानमृतार्थं प्रेषितः। कर्णवन्तीं सूर्मिम्। सूर्मिः—स्थूणा॥ ३२॥ § 3621

इति मन्त्रलक्षणाधिकरणम्॥ ७॥

## ०.०.३५ ब्राह्मणलक्षणाधिकरणम्

**परिशेषसिद्धत्वाद्ब्राह्मणलक्षणमवचनीयमिति**। सूत्रमिदमनारभ्यमिति प्रतिभाति। तत्र शेषशब्दप्रयोगाल्लक्षणानभिधानाच्च सूत्रव्याख्यानमेवेदमिति द्रष्टव्यम्। § 3623

किमर्थं पुनः सूत्रमारभ्यते। नाऽऽरभ्येत, यदि मन्त्रब्राह्मणात्मक एव वेद इति सर्वेषां प्रसिद्धं भवेत्। येषां त्वप्रसिद्धं तेषां तृतीयादिप्रकारनिराकरणार्थं द्वैराश्यमेव वेदस्येति प्रतिपादयितुमाह—**शेषे ब्राह्मणशब्द** इति। एकपुरुषकर्तृकमुपाख्यानं परकृतिः। बहुकर्तृकं पुराकल्पः। यात्रान्यथाऽर्थः प्रतिभातः पौर्वापर्यालोचनेन व्यवधार्यान्यथा कल्प्यते सा व्यवधारणकल्पना तद्यथा प्रतिगृह्णीयादिति श्रुतं प्रतिग्राहयेदिति कल्पयिष्यते। **विधिलक्षण**मित्यत्र ब्राह्म- 437
णवाची विधिशब्दः॥ ३३॥ § 3624

इति ब्राह्मणलक्षणाधिकरणम्॥ ८॥

## ०.०.३६ ऊहादीनाममन्त्रताधिकरणम्

सूर्याय जुष्टं निर्वपामि, इत्यूहः। तथा यत्र यजमानस्याऽऽर्षेयं व्रियते स प्रवरः। यच्च यजमानतत्पुत्रादीनां नामग्रहणं तन्नामधेयं, यथा सुब्रह्मण्यायां देवदत्तो यजत इत्यादि। तेषामपि ‘तच्चोदकेषु’ इत्यस्माल्लक्षणान्मन्त्रमध्यपाताच्च मन्त्रत्वप्राप्तावुच्यते— § 3626

स्वाध्याये पठ्यमानेषु येषु मन्त्रपदं स्मृतम्।
ते मन्त्रा नाभिधानं हि मन्त्राणां लक्षणं स्थितम्॥ § 3628

किं पुनरेकस्मिन्पद ऊह्यमाने समस्तस्यैवामन्त्रत्वं, ऊहितपदमात्रस्यैव वेति। समस्तस्यैवेति प्राप्तम्। कुतः— § 3629

स्वरवर्णानुपूर्व्यादिविशिष्टे हि प्रयुज्यते।
मन्त्रशब्दस्ततोऽन्यत्वे न तस्यार्थः प्रतीयते॥ § 3631

संप्रदायकालावगतरूपान्यत्वं चेत्केनचिदप्यंशेन जातं न शक्यते मन्त्रत्वं 438
प्रत्यभिज्ञातुम्। § 3632

अथैकदेशेऽपि तत्सद्भावाभ्युपगमः। ततः सर्वत्रैव मन्त्रपदाविशेषान्मन्त्रत्वप्रसङ्गः। तस्मादेकवर्णापायेऽपि मन्त्रत्वाभावात्समस्ततत्कार्यनिवृत्तिः। ततश्च यथैव तद्विनाशे सर्वावयववर्तिनि प्रायश्चित्ताभावं एवं मन्त्रच्छन्दोविषयत्वेन यावन्तः शब्दविशेषाः स्मर्यन्ते तैर्न भवितव्यमित्येकपदतदवयवोहे तन्मन्त्रगतसर्वच्छान्दसोपोद्धारेण लौकिकशब्दप्रयोगः कर्तव्य इति। अत्र ब्रूमः। तावन्मात्रमेवामन्त्र इति। कुतः। § 3633

आकृतीनामभिव्यक्तिर्या कथंचिन्निरूपिता।
नासाववयवाधिक्यविनाशेषु विनश्यति॥ § 3635

न हि गोर्गडुनि जाते विषाणे वा भग्ने गोत्वं तिरोधीयते,तदभिव्यक्तिसमर्थावयवान्तरसद्भावात्। कियत्यपि संस्थाने ध्रियमाणे सर्वा विज्ञायन्ते। सा चेयं मन्त्राकृतिर्विशिष्टस्वरवर्णानुपूर्व्याद्यभिव्यक्ता न किंचिद्विकारदर्शने नश्यतीति प्रत्यक्षमुपलभामहे। तथा हि— § 3636

यत्र वर्णविकारो वा वर्णलोपोऽपि वा स्मृतः।
स्वरान्तरनियोगो वा न मन्त्रस्तत्र नेष्यते॥ § 3638

यत्र वचनाद्वर्णलोपं विकारं वा कृत्वा प्रयोगः, 'ऐरं कृत्वोद्गेयम्' इत्यादौ, यत्र च स्वाध्यायकालदृष्टत्रैस्वर्यादिपरित्यागेनैकश्रुत्यं नियुज्यते न तत्र कस्यचिन्मन्त्रबुद्धिरपैति। स्यादेतत्, वचनसामर्थ्यादिह नापैतीति। § 3639

तदयुक्तम्। वचनेन हि प्रयोक्तव्यमेतदुच्यते न मन्त्रत्वं न नश्यतीति। न हि वचनविनियुक्तानां व्रीह्यादिनां मन्त्रत्वं भवति, अतश्चामन्त्राणामेव सतां वचनाद्विनियोग इत्यापद्यते। § 3640

न चार्हति भवितुममन्त्रत्वं, मन्त्रत्वप्रत्यभिज्ञानात्। अतश्चात्रापि काममिरापदादीनामेवामन्त्रत्वं भवतु न सकलस्य वाक्यस्य। § 3641

न च तेषामपि समस्तवेदालोचनेन मन्त्रत्वनिरूपणादिह गिरापदवान्मन्त्र इहेरापदवानिह त्रैस्वर्यवानिहैकश्रुतिमानिति ह्यादित एवावधार्यते। यद्येवमूहादीनामपि मन्त्र त्वप्रसङ्गः। तत्रापि हि प्रकृतिविकृत्यालोचनेन शक्यमेवं निरूपयितुम्। इहाग्निपदवान्निर्वापमन्त्र इह सूर्यादिपदवानिति। नैतत्समानम्। कुतः— § 3642

यत्र वैदिकमन्यत्वं तत्र मन्त्रत्वमिष्यते।
न्यायेन कल्प्यमाने तु न शक्यं तन्निरूपणम्॥ § 3644

439 वैदिकं ह्यालोच्यैवमवधारणा भवति, इहेदृशो मन्त्र इहेदृश इति। सूर्यादिपदप्रयोगस्तु कार्यवशेन न्यायात्कल्प्यते, न च मन्त्रत्वं न्यायगम्यमिति वैषम्यम्। § 3645

ननु चातिदेशोऽपि वेदप्रकार एवेति सर्वमूहादिकं वैदिकम्, इतरथा ह्यप्रमाणकमेव स्यात्। न ह्यङ्गाङ्गिभावः प्रत्यक्षानुमानादिगम्यः। तस्मात्सूर्येरापदयोरविशेष इति। अत्रोच्यते। § 3646

सत्यमूहस्यापि नावैदिकत्वम्। अत एव 'अनाम्नातेष्वमन्त्रत्वम्' इत्युच्यते। वेदभागो हि कश्चित्प्रत्यक्षः श्रूयते, कश्चिदनुमानादिगम्यः। प्रत्यक्षश्रुतश्चाऽऽम्नात इत्युच्यते। तत्र यथेरापदादीनां विनियोगः श्रूयते नैवं सूर्यपदादीनाम्। § 3647

ननु 'सौर्यं चरुम' इत्येतदेव श्रुतिसमवायित्वाद्देवतायाः सूर्यपदस्य विनियोजकं श्रूयते। नैतन्मन्त्रे सूर्यपदस्य प्रक्षेपं ब्रवीति। हविषस्त्यागद-

कालमात्रे तदुच्चाकणाभिधानात्। यस्तुं मन्त्रेषु तत्प्रक्षेपः सोऽतिदेशकृतो भविष्यति। न चातिदेशवचनं न्यायलभ्यत्वादेवाऽऽम्नायते। तस्मादनाम्नातविनियोजकत्वादमन्त्रत्वं सूर्यपदादीनाम्। § 3648

नन्वेवं सति प्रवरनामधेययोः प्रत्यक्षोपदेशान्मन्त्रत्वप्रसङ्गः। स्यादेव यदि तत्स्वरूपमाम्नायेत, वचनार्थं, तु ज्ञात्वाऽनाम्नातयोरेव प्रवरनाम्नोः प्रयोगान्न मन्त्रत्वनिरूपणायामन्तर्गतिः। एवं तर्हि यत्रापि सर्वनामयुक्तमन्त्राम्नाने सति तस्य स्थानेऽन्यपदप्रक्षेपः क्रियते तत्राप्यमन्त्रता स्यात्। तथा नामेति केचित्। § 3649

अथ वा विशेषाणामानन्त्यादयुगपत्कालत्वाच्चाऽऽम्नातुमशक्तेः स्वरूपस्य सर्वनामप्रकारेणाऽऽम्नानमस्त्येवेत्यशून्यस्थानत्वान्मन्त्रस्य शक्यमेवं निरूपणं कर्तुं यदत्र पदं निवेक्ष्यते तद्वानयं मन्त्र इति। इतरया हि सर्वनाम्नामप्रयोगार्हत्वाद्यदि विशेषाम्नानमेवैतत्तेनोपायेनेति न गृह्यते, ततस्तदंशन्यूनत्वान्मन्त्रस्वरूपस्य व्यर्थमेव सर्वनामाम्नानं स्यात्। प्रवरनामधेयवदेव तु विधानात्तदवकाशस्थपदप्रयोगः कल्प्यते। तस्मादेवमादी न्याम्नातान्येवेति मन्त्रधर्मैः संबध्येरन्। न तु प्रवरादीनां मन्त्रपाठकाले कश्चिदपि संस्पर्शः। § 3650

न च ब्राह्मणेन रूपं दर्शितं येन प्रवचनलक्षणत्वान्मन्त्रत्वाध्यवसानं भवेत्। अतश्च विकृतिष्वभिधानार्षचोदकाभ्यां सकले मन्त्रे प्रापिते यावन्मात्रमर्थाभावाद्व्यावर्त्यान्यत्प्रक्षिप्यते तावन्मात्रमेव लौकिकम्। अवशिष्टं तु तथा प्राप्तमेव ऋत्वाकाङ्क्षितप्रत्यभिज्ञायमानमन्त्रत्वं चेति न प्रायश्चित्तच्छान्दसप्रयोगैर्वर्जनीयमिति सिद्धम्॥ ३४॥ § 3651

इति ऊहादीनाममन्त्रताधिकरणम्॥ ९॥

## ०.०.३७ ऋग्लक्षणाधिकरण्

प्रसक्तानुप्रसक्त्यापतितमृगादिलक्षणाभिधानम्। शब्दार्थस्य वृद्धव्यवहार- 440
गम्यत्वात्कृतेऽपि तल्लक्षणे तन्मूलमभियुक्तोपदेशमेव दर्शयति। क्रियापदानुपादानात् 'अग्निः पूर्वेभिः' इत्यपर्यवसितेऽर्थे वृत्तवशेन पादव्यवस्था। ननु च 'अग्निमीळे' इत्यपि समस्ताया ऋच एवार्थवत्त्वान्नैव प्रतिपादमर्थः पर्यवस्यतीति न वाच्यम् 'अर्थवशेन पादव्यवस्था' इति। § 3653

कथं न वाच्यम् 'अग्निमीळे पुरोहितम्' इति तावत्प्रत्यक्षं समाप्तोऽर्थो दृश्यते। परयोः पादयोरसमाप्त इति चेन्न। आख्यातानुषङ्गेण समाप्तेः सिद्धत्वात्। तस्मात्साधूक्तमिहार्थवशेनेति। एतस्य तु प्रदर्शनार्थत्वान्न वृत्तवशव्यावृत्तिरित्यनिषिद्धमृक्त्कम्॥ ३५॥ § 3654

इति ऋग्लक्षणाधिकरण्॥ १०॥

## ०.०.३८ सामलक्षणाधिकरणम्

तेषामित्यनुवर्तते। अत्रापि स एवाभियुक्तोपदेशोपन्यासः। प्राथम्यात्, **यथाऽम्लं दधीति**। पूर्वत्रैव वाच्यं सदनादरादिहोदाहृतम्। अथ वा यथाऽनेकधर्मसमाहारे सति दधिगुडवो रसविशेषमात्रमम्लमधुरशब्दावुपाददाते। तथा सामशब्दो गीतिमात्रमित्यत्रोदाहरणम्। § 3656

441 ननु च प्रत्यक्षगम्यत्वाद्रसविशेषस्याभियुक्तोपदेशोऽनुवादत्वान्नैव प्रमाणम्। § 3657

नैष दोषः। प्रत्यक्षमेवात्र इतिकरणावच्छिन्नं निदर्शनम्। एतदुक्तं भवति। यथाऽम्लं दधि मधुरो गुड इत्येतद्विज्ञानं प्रमाणमेवमभियुक्तोपदेश इति। गीतेर्विशेषणत्वात्पूर्वतरप्रत्यायने सत्याकृतिवदभिधेयत्वं निर्णेतव्यम्। आह च— § 3658

एकखण्डेन शब्देन विशिष्टो यत्र गम्यते।
विशेषणस्य वाच्यत्वं तत्र सर्वत्र जायते॥ ३६॥ § 3660

इति सामलक्षणाधिकरणम्॥ ११॥

## ०.०.३९ यजुर्लक्षणाधिकरणम्

शेषे ब्राह्मणशब्द इतिवत्समस्तं व्याख्येयम्॥ ३७॥ § 3662

इति यजुर्लक्षणाधिकरणम्॥ १२॥

## ०.०.४० निगदाधिकरणम्

शेषे यजुःशब्द इत्येतद्व्यावर्तनार्थो वाशब्दः। चतुर्थं मन्त्रजातं निगदः स्यात्। धर्मान्यत्वात्। यदि तावत् ‘उच्चैर्निगदेन’ इति विधिस्ततो यजुर्धर्मबाधो मा भूदित्यर्थान्तरत्वम्। अथानुवादः स नैव प्राप्नोति व्यतिरेकेण विनेति भेदः॥ ३८॥ ३९॥ § 3664

442 ‘अहे बुध्निय मन्त्रं मे गोपाय’ इति त्रिष्वेव मन्त्रत्वस्योपसंहारात्। वेदे च मन्त्रसामानाधिकरण्येन निगदशब्दप्रयोगाद्यजुष्ट्वापरित्यागेनैव च धर्मविशेष-

४ भेदः ] व्यपदेशाच इति सूत्रस्य भाष्यं स्पष्टत्वान्न व्याख्यातम्।

व्यपदेशभेदसिद्धेः परिशेषसिद्धयजुर्लक्षणयोगाच्च यजूंष्येव निगदाः॥ ४०॥
§ 3665

न्यायप्राप्तोच्चैर्धर्मानुवादत्वज्ञानान्न विधानादिति व्याख्यातम्। यं त्वेतेऽर्थं वदन्ति तमुपांशुत्वेन शक्नुयुर्वक्तुमिति वचनादित्युच्यते॥ ४१॥ § 3666

अस्ति च 'अग्नीदग्नीन्विहर' इत्यादिवचनेनार्थोऽन्यथाऽनुष्ठानानुपपत्तेरिति धर्मविशेषप्राप्तिः। तथा च निगदशब्दावयवव्युत्पत्तिसिद्धिः। वाचनिकमपि चौपांशुत्वमनुपकारत्वेनानङ्गत्वान्निगदव्यतिरिक्तयजुर्विषयं विज्ञायते॥ ४२॥ § 3667

ब्राह्मणपरिव्राजकवद्गुणेन व्यपदेशभेदः॥ ४३॥ § 3668

अतिप्रसङ्गद्वारेण गुणस्य व्यपदेशनिमित्ततां व्यभिचारयति॥ ४४॥ § 3669 443

न तावदतिप्रसङ्गोऽस्ति निगदं निन्दित्वा ऋचो विधानात्। न हि तमेव निन्दित्वा तस्यैव विधिरवकल्पते। न च व्यभिचारित्वम्। गदतिवशेन यजुष्ट्वे सति धर्मविशेषस्य व्यपदेशभेदनिमित्तत्वात्॥ ४५॥ § 3670

इति निगदाधिकरणम्॥ १३॥

## ०.०.४१ यजुःपरिमाणाधिकरणम्

केचिदेतत्सूत्रं वाक्यलक्षणपरत्वेन व्याचक्षते। तत्रापि किल लौकिकवैदिकवाक्यलक्षणसंभवे हेतुप्रसिद्धिवशेन लौकिकानामेवैतल्लक्षणम्। कुतः—
§ 3672

अन्यतोऽवगतेऽर्थे हि लोके वाक्यं प्रवर्तते।
तत्रैकार्थत्वविज्ञानात्सुखबोधैकवाक्यता॥ § 3674

लौकिकानां हि वाक्यानां प्रमाणान्तरेणार्थस्तदेकत्वं चावधार्यते। तत्र प्रसिद्धेन हेतुना शक्यमेकवाक्यत्वमवगन्तुम्। वैदिकानां पुनरनन्यप्रमाणगम्यत्वात्प्राग्वाक्यात्तदेकत्वाज्ञानादज्ञातेऽर्थे तदेकत्वसिद्धिर्नास्तीत्येतल्लक्षणानुपपत्तेरर्थापत्त्या विपरीतं लक्षणं द्रष्टव्यम्। § 3675

वाक्यैकत्वादर्थैकत्वमिति। यथैव हि धर्मिणा वाक्येन धर्म्यन्तरमर्थः प्रतिपाद्यते तथैकवाक्यधर्मेणैकत्वेनार्थैकत्वम्। आह च— § 3676

नित्यवाक्याधिगम्यत्वाद्यथावाक्यं प्रवर्तते।
वेदार्थस्तदसिद्धेस्तु न वाक्यस्यार्थवश्यता॥ § 3678

अत्राभिधीयते। वेदव्याख्यानप्रवृत्तस्य जैमिनेः कः प्रसङ्गो लौकिकवाक्यलक्षणाभिधाने। वैदिकवाक्यलक्षणस्यापि भेदलक्षणे कः प्रस्तावः। किमर्थं प्र-

---
१५ णे] द्वितीयाध्याय इत्यर्थः।  १५ र्थं] प्रथमाध्याय एवेत्यर्थः।

माणलक्षण एव नोक्तम्। एकशब्दश्च न वक्तव्यः, अर्थैकत्वाद्वाक्यमित्येतावतैव
444 सिद्धत्वात्। कथं च मन्त्राधिकारे तदसंबद्धोऽर्थोऽभिधीयते। भाष्यकृतश्च **प्रश्लिष्टपठितेषु यजुःष्वित्युपन्यासः** प्रमाणवानपि विना कारणेनातिक्रान्तः। किं च— § 3679

यजुर्भेदं च मुक्त्वैतद्वाक्यैकत्वस्य लक्षणम्।
मन्त्रब्राह्मणलोकेषु वक्तव्यं क्वोपयुज्यते॥ § 3681

ऋक्सामयोस्तावत्परिमाणं प्रयोगसमर्थं प्रसिद्धमिति न कश्चिद्वाक्यलक्षणादेकवाक्यतालक्षणाद्वोपकारो भवति। § 3682

तथा ब्राह्मणेऽग्निहोत्रादिवाक्यैः साध्यसाधनेतिकर्तव्यतावत्यां भावनायां नियुक्तेषु पुरुषेष्वेकानेकवाक्यज्ञानं क्वोपयुज्यते। नन्वयमुपयोग एकवाक्यतालक्षणज्ञो वाक्यभेदं परिहरिष्यति। नायमुपयोगः। कुतः— § 3683

वाक्यभेदो ह्यसामर्थ्यं शब्दावृत्त्यादि दोषतः।
एकनानात्वविज्ञाननिरपेक्षोऽवधार्यते॥ § 3685

पदतदेकदेशतत्समूहावृत्तिप्रसङ्गात्मकस्तद्विभागलक्षणो वा वाक्यैकत्वनानात्वज्ञाननिरपेक्षैरेव दोषत्वेनावधार्यते। विभागलक्षणे गम्यमानसंबन्धपरित्यागोऽनेकादृष्टकल्पना च दोषः। इतरत्राऽऽवृत्तेरवेदत्वादप्रामाण्यमिति नैकवाक्यलक्षणेनार्थः। पौरुषेयवाक्ये तु लक्षणनिरपेक्षस्य लोकस्य व्यवहारसिद्धेरत्यन्तानौपयिकत्वम्। § 3686

यदि चार्थैकत्वेन वाक्यैकत्वमवधार्यते वाक्यस्यार्थप्रत्यायनार्थत्वात्तत्स्वरूपैकत्वज्ञानोत्तरकालभाविना किं वाक्यैकत्वज्ञानेन। वक्तॄणां च परप्रत्यायनार्थो वाक्यप्रयोग इति नाऽऽत्मार्थं लक्षणज्ञानापेक्षा। श्रोतॄणां पुनरत्यन्तानवगतेऽर्थे प्रवर्तमानं पुरुषवाक्यमपि न वेदवाक्याद्भिद्यते। अवगतार्थं त्वनुवादत्वादनादृत्यमेवेति नैकानेकज्ञानमपेक्ष्यते। § 3687

किमर्थं न वैदिकानां लक्षणं नोक्तम्। यदि त्वर्थापत्त्योक्तमेवेति। तन्न। श्रुत्या तल्लक्षणमभिधायार्थापत्त्या लौकिकवाक्यसिद्धिराश्रयितव्या। न चार्थापत्तिः संभवति। न ह्येतल्लौकिकवाक्यलक्षणज्ञानमीदृशेन वैदिकवाक्यलक्षणज्ञानेन विना नोपपद्यते। § 3688

न चैतस्यापि वाक्यलक्षणता सिद्धा, वाक्यैकत्ववशेनार्थैकत्वलक्षणार्थापत्त्युपन्यासात्। अपि च कदाचिद्वैदिकवाक्यानामप्येतल्लक्षणम्। अत्यन्तविप्रकृष्टं वा किंचिद्भवेदित्याशङ्कितत्वान्न नियोगतोऽर्थापत्तिः। न च परिसंख्या, सामान्यविशेषभेदानुपादानात्। § 3689

यदि हि सामान्येनेदं लक्षणं क्वचिदभिधाय पुनः केवलपौरुषेयसंबद्धमुच्येत ततः परिसंख्यावशेन वैदिकानामिदं तावन्न भवतीत्येतावन्मात्रं गम्येत। न तु लक्षणविशेषोऽनेकोपप्लवात्। एवमपि हि विपर्ययकल्पनं संभवति, अर्थानेकत्वादेकं वाक्यं निराकाङ्क्षं चेद्विभागे स्यादिति। § 3690

अथ वाऽर्थैकत्वान्नानावाक्यत्वमिति। तस्मादकल्पनेयम्। किं च— § 3691 445

कथं चार्थानपेक्षत्वे वाक्यैकत्वं प्रसिध्यति।
न हि वर्णस्वरूपेण ज्ञातेनैतन्निरूप्यते॥§ 3693

वाक्यैकत्वाद्यार्थैकत्वेऽवधार्यमाणेऽवश्यमर्थनिरपेक्षं वाक्यैकत्वमवगन्तव्यम्। न च तस्यावधित्वेन किंचित्पश्यामो वर्णशतं वर्णसहस्रं वा। तथा हि— § 3694

अज्ञातार्थेषु वर्णेषु बहुवाक्यैकवर्तिषु।
न कदाचिन्मतिर्दृष्टा वाक्येयत्त्वावधारणे॥§ 3696

तस्मात्पदेषु यावत्सु श्रूयमाणेषु दृश्यते।
विस्पष्टमैक्यमर्थस्य तावतामेकवाक्यता॥§ 3698

लोकमन्त्रब्राह्मणेष्वव्यभिचार्येतदेव वाक्यलक्षणमिति स्थितम्। यत्तु न प्राग्वाक्यादर्थतदेकत्वावधारणमस्तीति। अत्र ब्रूमः— § 3699

पदार्थैः पदविज्ञातैर्वाक्यार्थः प्रतिपाद्यते।
लोकसिद्धैर्न तत्रास्ति वाक्यैकत्वनिमित्तता॥§ 3701

यदि हि वाक्यं पदवद्वाचकं भवेत्ततस्तदेकत्वानेकत्वानुवर्तिता वाक्यार्थस्याभ्युपगम्येत कदाचित्। § 3702

यदा तु पृथग्भूतैरेव पदैरितरेतरनिरपेक्षैः स्वेषु पदार्थेषूक्तेषु तत्संसर्गादेव पदव्यापारानपेक्षो वाक्यार्थप्रत्ययो भवति, तद्वशेन च तावन्ति पदान्येकं वाक्यमित्यवधार्यते, न तदा वाक्यतदेकत्वयोर्व्यापारं पश्यामः। तस्मादविरोधः। § 3703

भावनैव च वाक्यार्थः स्वकारकविशेषिता।
तस्याश्च ज्ञायते नित्यं भेदः शब्दान्तरादिभिः॥§ 3705

यस्मिन्पदसमूहे शब्दान्तरादिभिर्न भावनान्तरं प्रतिपाद्यते तस्यैकवाक्यत्वं भावनान्तरापेक्षया तु नानात्वम्। तच्चैतदुभयमप्यन्यत एव ज्ञायत इत्यनिमित्तं वाक्यैकत्वमर्थैकत्वस्य। तस्माद्यथाभाष्यमेव व्याख्यातव्यम्। § 3706

भेदलक्षणे मन्त्रप्रस्तावे च तद्भेदस्तावदृग्यजुःसामात्मकोऽभिहितः। तदवान्तरभेदाकाङ्क्षायामृक्सामानामध्येतृसिद्धे भेदे लक्षणं न क्रियते। यजुषां तु प्रश्लिष्टपठितत्वान्न लक्षणाद्विना भेदज्ञानमित्यारम्यते। § 3707

ननु भिन्नप्रतीकविनियोगात्तद्भेदः सेत्स्यतीति। न तावत्सर्वेषामेव ब्राह्मणे विनियोगोऽस्ति। न च 'उत्तरादिः पूर्वान्तलक्षणम्' इत्येतद्भेदवचनम्। न्यायेन तु सूत्रकारैरेवाऽऽत्मीयब्राह्मणविनियोगेष्वेतदुक्तमिति न्यायस्य लक्षणमुच्यते। § 3708

446 तत्रावयवव्युत्पत्तिबलेनाऽऽह—**यावतेज्यत** इति। सर्वमन्त्राणामनेन यजेतेति हि प्रथमं प्रकरणाम्नानानुमितवाक्यविनियोगो भवति। ततः साक्षाद्यागसंबन्धासंभवात्तदुपकारिप्रकाशनेन तैरिष्टं भवतीति कल्प्यते। तेनोच्यते— § 3709

यावता पदसंघेन स्मार्यते यागसाधनम्।
तावद्यजुश्च वाक्यं च वक्तव्यत्वान्निरूप्यते॥§ 3711

वचनार्हं हि वाक्यं कार्ये समर्थं च तदर्हं भवति न न्यूनमधिकं वा, तावतैव चेज्यते। तत्तु कीदृशमित्येकार्थं साकाङ्क्षावयवं चेति लक्षणम्। ईदृशं चेदेकं यजुर्यत्ततोऽधिकं तद्वाक्यान्तरं यजुरन्तरं चेत्युक्तं भवति। § 3712

एवं सर्वत्र पुरस्तात्परस्ताद्वैकार्थत्वसमर्थपदपरिग्रहणादसमर्थपदविमोकेन च भिन्नानि यजूंषि कल्प्यन्ते। तेनैकवाक्यलक्षणोक्तौ चार्थाद्यजुर्भेदवाक्यभेदलक्षणयोः सिद्धिरिति, **एतस्माच्चेत्कारणादित्याह**। **किमुदाहरणमिति**। अभिधेयवाचिनमर्थशब्दं गृहीत्वा लक्षणद्वयसमावेशासंभावनया पृच्छति। तथा हि— § 3713

एकार्थत्वं पदस्य स्यात्साकाङ्क्षावयवं न तत्।
साकाङ्क्षावयवः संघस्तस्यैकोऽर्थो न विद्यते॥§ 3715

पदस्य ह्याकृतिर्नामैकोऽर्थो भवेन्न तु तदवयवानां वर्णानां प्रकृतिप्रत्यययोर्वा विभागे साकाङ्क्षत्वम्, अर्थप्रत्यायनशक्त्यभावात्, समूहावयवास्तु पदावि विभागे परस्परमाकाङ्क्षन्ति, न त्वेषामेकार्थत्वं, प्रतिपदमर्थभेदात्, समूहस्य च पृथगर्थान्तराप्रसिद्धेः। अतो लक्ष्याभावादलक्षणमेतदिति। § 3716

प्रयोजनवाच्यभिप्रायेण **देवस्य त्वेत्युदाहृतम्**। **नन्विति** परः स्वाभिप्रायं प्रकटयति। यदा पदार्थव्यतिरिक्तः कश्चिदेको निर्भागो वाक्यार्थो नास्ति तदा
447 तत्तत्पदार्थधर्माविव सामीप्यवशात्तेषां गम्यमानौ भेदसंसर्गौ स्याताम्। अत आह—**तथाऽप्येकार्थता न स्यात्**। कथम्— § 3717

भेदो नाम पदार्थानां व्यवच्छेदः परस्परम्।
स च प्रतिपदार्थत्वान्नैकत्वं प्रतिपद्यते॥§ 3719

व्यक्तिपदार्थपक्षे सर्वव्यक्तीनां गवादिपदेनैवोपात्तत्वाद्विषयशब्दैः शुक्लादिभिः कृष्णादिव्यवच्छेदमात्रं वक्तव्यम्। तत्संसर्गः पदार्थान्तर्गतत्वान्न वाक्यार्थो भवतीति तदुपसर्जनस्तेषां भेदो गृह्यते। § 3720

स च यथा शुक्लशब्देन गोशब्दस्य कृष्णादिभ्यो भिद्यमानत्वाद्भवति, एवं शुक्ल शब्दस्यापि गोशब्देनाश्वादिभ्यो निवर्तितस्य भवति, व्यवच्छेद्यनानात्वाच्च नास्त्येकत्वे प्रमाणम्। भेदसामान्यग्रहणे वा सर्ववाक्यार्थैकत्वप्रसङ्गः। यदा तु भेदवन्तः पदार्था एव वाक्यार्थस्तदा सिद्धमेव नानात्वम्। तथा— § 3721

संसर्गोऽपि पदार्थानामन्योन्येनानुरञ्जनम्।
एकैकत्र तदप्यस्तीत्येकत्वं न प्रतीयते॥ § 3723

आकृतिपदार्थपक्षे शुक्लत्वगोत्वयोः स्वरूपेणाभिहितयोः संनिधानादितरेतरानुरञ्जनमर्थसिद्धभेदं वाक्यार्थः। स च गोत्वे शुक्लत्वसंसर्गः शुक्लत्वे वा गोत्वसंसर्गः सामस्त्येनैकैकव्यक्त्युपसंहारादुपलभ्यत इति नाना। § 3724

यद्यपि च कथंचिद्द्विपदे स एवोभयत्रापि संसर्ग इत्येकत्वं गम्येत, तथाऽपि बहुपदे येन येन प्रदेशेन पदद्वयं संसृज्यते तेन तेन संसर्गरूपेणोपलब्धेरनेकत्वम्। किं च— § 3725

स्वप्राधान्यात्पदार्थानां धर्मावेतावुभावपि।
धर्मिभेदेन भिद्येते न ह्येकत्वमुपाश्रितम्॥ § 3727

यावद्धि प्रयोजनैकत्वं नाऽऽश्रीयते तावत्स्वतन्त्राः पदार्था नैकतामापादयितुं शक्यन्त इति पृथगेव भेदसंसर्गावनुभवन्ति। तस्मादपि नाना। यद्यपि चास्माकमाकृतिपदार्थकत्वान्नैव भेदो वाक्यार्थत्वेनाभिप्रेतस्तथाऽपि पूर्वपक्षवादिना विकल्पमात्रेणोपन्यस्तः। सिद्धान्ताभिप्रायविवरणं प्रयोजनवाचित्वादर्थशब्दस्योपपन्नम्। § 3728

एवं सत्येक एव कश्चित्पदार्थः प्रधानभूतस्तद्विशेषणत्वेनेतरोपादानमिति सर्वेषां च तद्भेदात्तत्संसर्गाच्चैको भेदः संसर्गो वेत्यपि शक्यं व- 448 दितुम्। तस्मात्कर्मसमवायित्वेन दृष्टार्थत्वादशेषसवित्रादिपदार्थविशिष्टनिर्वापप्रकाशनं समस्तस्य पदसमूहस्यैकं प्रयोजनमिति सिद्धमुदाहरणम्। परस्तु निर्वापप्राधान्यमज्ञात्वा पृच्छति—**नन्वत्र देवस्येति**। सिद्धान्तवाद्याह—**यदि निर्वपामीत्यनुषङ्ग**स्तत एवं, स चानुषङ्गस्तद्गुणभावेन भवेत्, न चास्य गुणभावः प्रयोजनवत्त्वात्। सवित्रादीनां चाकर्मसमवायादित्येकार्थत्वम्। § 3729

**अथ किमर्थमुभयं सूत्रितामिति**। येषां संहतानामेकप्रयोजनत्वं तेषां तदशक्तेर्व्यस्तानामेकान्तेनैव साकाङ्क्षत्वं भवतीत्यवाच्यं तत्। अथ वा विभज्यमानसाकाङ्क्षत्वं संहतैकप्रयोजनत्वेन विना न भवति प्रत्येककार्येषु निरपेक्षप्रवृत्तिसिद्धेः। अतः साकाङ्क्षविभागेनैवेतराक्षेपात्तन्मात्रमेवाभिधातव्यमिति। § 3730

प्रत्युदाहरणे दर्शयति—उच्यत इति। पुरोडाश विभागप्रकाशनमेकं प्रयोजनं निरपेक्षाणां दृष्टम्। निर्वापे दत्तोत्तराऽपि विभागनानात्वपरिचोदना संहत्य विशेषणानुपादानात्पुनः पुनः प्रयुक्तस्यानुषङ्गदोषाभावादुपन्यस्यते। तत्रोत्तरं न तावन्निरपेक्षसाधनभेदादपि क्रियानानात्वमिति वक्ष्या२मः। साधनप्राधान्यं तु प्रत्युक्तमेव। एतत्कृतो विशेषः कर्मानङ्गत्वादनादरणीय इति 449 सामान्यप्रकाशनादेकार्थत्वम्। 'तस्मिन्सीद' इत्यस्य पूर्वापेक्षित्वे सत्यपि प्रयोजनभेदाद्वाक्यान्तरत्वम्। तस्मात्संहतयोरेव लक्षणत्वम्॥ ४६॥ § 3731

इति यजुःपरिमाणाधिकरणम्॥ १४॥

## ०.०.४२ वाक्यभेदाधिकरणम्

येषामदृश्यमानकर्मसमवेतार्थत्वेन लैङ्गिकविनियोगाभावेन वचनाद्विनियोगस्तेषां प्राग्दृष्टार्थमन्त्रावधेरेकमन्त्रत्वं युक्तम्। तथा हि— § 3733

कल्प्यस्तेषामदृष्टोऽर्थः स चाल्पः स्यात्प्रमाणवान्।
कल्पिते च तदेकत्वे साकाङ्क्षाः स्युर्वियोजिताः॥§ 3735

यदा हि बह्वदृष्टकल्पना निष्प्रमाणिकेत्येकमदृष्टं सर्वेभ्यः कल्पितं भवति तदा प्रत्येकं तत्साधनशक्त्यभावाद्विभज्यमानसाकाङ्क्षत्वमप्यस्तीत्येकवाक्यता। कथं पुनरस्मिन्पक्षे प्रतीकभेदेन विनियोगः "इषे त्वेति शाखां छिनत्ति" "ऊर्जे त्वेत्यनुमार्ष्टि" इत्येवमादिः। कथं च 'क्लृप्तीर्वाचयति' इति बहुत्वनिर्देशः। तदुच्यते— § 3736

एकोऽपि बहुभिर्मन्त्रः प्रतीकैर्विनियुज्यते।
पुनः पुनः प्रयोगाच्च क्लृप्तीरित्यभिधीयते॥§ 3738

आदिमध्यावसानग्रहणेनैकोऽपि मन्त्रस्तत्र तत्र विनियुज्यमानोऽपि न
450 पीड्यते। यावद्विनियोगं हि सकल आवर्तिष्यते खण्डस्याप्रयोजनत्वात्। कल्पतां कल्पतामिति च पुनः पुनः प्रयोगादेकवाक्यत्वेऽपि बहुवचनाविरोधः। उच्यते। नैतदेवम्। § 3739

रूपादुत्तरकाले हि विनियोगप्रयोजने।
तस्मात्प्रागेव तत्क्लृप्तेर्भेदाभेदपरीक्षणम्॥§ 3741

तिष्ठतु तावत्प्रयोजनकल्पनं विनियोगवाक्यं वा। न हि तदुत्तरकालं स्वरूपनिरूपणं युक्तम्। अज्ञातरूपस्य विनियोगाशक्तेरविनियुक्तस्य च प्रयोजनकल्पनानुपपत्तेः। तत्तन्निरपेक्षं तु रूपं पाठादेवावधार्यते। तत्कालावधृतभेदाभेदानुवर्तित्वं तु प्रयोजनविनियोगयोः। प्रमाणवच्चानेकमपि कल्पनीयमित्युक्तम्। रूपोपलब्धिवेलायां चेषेत्वादिना न परस्परसाकाङ्क्षत्वमेकप्रयोजनत्वं चोपलक्ष्यते। ततश्च निष्प्रतिद्वंद्वेऽवधारिते भेदे पश्चान्न किंचिदेकत्वापादने कारणं संभवति। न च प्रागनुपलब्धं साकाङ्क्षत्वं कल्पयितुं शक्यम्। तेन च विना यद्यप्येकप्रयोजनत्वं भवेत्तथाऽप्येकाङ्गवैकल्यादेकवाक्यत्वाभावः, किमुत यदा रूपभेदाद्विनियोगभेदस्तद्भेदाच्चादृष्टार्थत्वेऽपि प्रयोजनभेदः। त्वत्पक्षेऽपि चावश्यं यावद्विनियोगं तेन तेन भवितव्यम्। इयांस्तु विशेषः। तव समस्तान्मन्त्रान्मम व्यस्तेभ्यः। न चैषामदृष्टार्थत्वं, ब्राह्मणोपदिष्टदृष्टार्थसाधनत्वात्। तद्बलेन चैषां यावता विना चोदितकरणसामर्थ्यं नास्ति ताव-

दनाम्नातमपि कल्पनीयं च्छिनद्मीत्यादि। यद्वा यथैव "रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति" इति वचनादवाचकः स्यापि विनियोगमात्रानुसंधानेन स्तोत्राभिमुख्यचिह्नत्वं भवति, एवमिषेत्वादीनां छेदनादिस्मरणहेतुत्वम्। उभयमपि चैतत्प्रमाणवदिति सूत्रकारैः कैश्चित्कथं चिदाश्रितम्। सर्वथाऽत्रैवमध्यवसातव्यम्। विकलवाक्यप्रयोगासंभवादवाचकप्रयोगानुपपत्तेश्चाध्याहारः। अथ वा यथाम्नातविनियोगानुसारात्तादृश्येनैव स्मर्तुं संस्काराधाने यतितव्यम्। तत्रानुष्ठात्रभिप्रायाधीनोऽन्यतरपरिग्रह इति दृष्टप्रयोजनभेदादपि सिद्धो वाक्यभेदः। किं च— § 3742

अन्योन्यनिरपेक्षाणां कार्यान्यत्वे नियोगतः।
प्रत्येकं यागहेतुत्वाद्यजुष्ट्वमवकल्पते॥ § 3744

तथा 'आयुर्यज्ञेन कल्पताम्' इत्येवमादीनां निराकाङ्क्षभिन्नरूपोपलब्धेर्नैकत्वापत्तिः सत्यप्येकार्यत्वे। न च तदस्ति। आयुःकल्पनादीनां भिन्न- 451 त्वात्। निर्वापवदभेद इति चेन्न। क्लृप्तीरिति मन्त्रबहुत्वचोदनायाः प्रत्यक्षत्वात्। इह तावदर्थानामकर्माङ्गापवादविवक्षायां सत्यां मन्त्रोच्चारणमात्रं प्रयोजनम्। तत्र च बव्ह्यः क्लृप्तयः श्रूयन्ते। तद्भेदश्चार्थभेदमन्तरेण न भवतीत्यक्षरोपसर्जनभूतोऽर्थो नानात्वेनाऽऽश्रीयते। क्लृप्तिविशेषवचनं च दृष्टार्थमिति मन्त्रबहुत्वापादनार्थत्वात्। **यथा विभाग** इति। सकृच्छ्रुतनिर्वापवैलक्षण्यात्क्लृप्तीनाम्। पुनः पुनरुच्चारितशब्दोऽपि यथा विभागः साधनभेदे सत्यपि न भिद्यते, तथा क्लृप्तिभेदोऽपि न भविष्यतीति मन्यते। **नैतदेव**मित्युत्तरम्। इह सामान्यविवक्षानुपयोगात्। अथ वा सिद्धान्तवाद्येव **यथा विभागे नैतदेवमिति** स्वयमेवैकवाक्यभूतमुत्तरं ददाति। ननु च विभागवाक्यानामपि भेदोऽस्त्येवेति नोपन्यसनीयम्। एवं तर्हि नैवेदं प्रभेदप्रतिपत्त्यर्थं, किं तर्हि दृष्टान्तेन सहैकत्वापादनपरत्वात्तदीयविकल्पापादनायोपन्यस्यति। यथा विभागे तथाऽत्र विकल्पः कस्मान्न भवतीति। **नैतदेवमिति**। समानविषयत्वे हि विकल्पो भवति, न चेह सामान्यविवक्षा येन विभागवदैकार्थ्यं भवेत्। क्लृप्तिविशिष्टायुराद्याशासनपरत्वात्। विभागे हि साधनानामप्रयोजनत्वात्सामान्यभूतक्रियामात्रप्रकाशनपरत्वम्। इह पुनरायुरादीनामाशास्यत्वेन प्राधान्यात्तद्विशेषणत्वेन क्लृप्त्युपादानं न त्वायुरादिविशिष्टा सा प्रकाश्यते, निष्प्रयोजनत्वात्। अथापि क्रियाप्राधान्यं तथाऽपि तद्भेदपरत्वान्नानार्थत्वम्। भेदपरत्वे च पूर्वोक्तमेव दृष्टार्थत्वमुच्यते। अथ वा 'क्लृप्तीर्वाचयति' इति नैव मन्त्रपरः क्लृप्तिशब्दः, कथं तर्हि, क्रियाबहुत्वाभिधान एव, शब्दानामर्थत- 452 न्त्रत्वात्। अतश्च बहुत्वसंख्यया कर्मभेदाद्विशेषणकृतभेदाश्रयणाच्च मन्त्राणां तत्परत्वे चोदितार्थनिर्वृत्त्या दृष्टार्थत्वात्सिद्धा भिन्नार्थता। कथं पुनरस्मिन्पक्षे

३० अथ] अपि चेत्यादि भाष्यम्, इह क्लृप्तीरिति पूर्वभाष्येण पुनरुक्तमिव भासमानं क्लृप्तिशब्दस्य पूर्वाभिप्रेतमन्त्रपरत्वपक्षापेक्षयाऽर्थपरत्वरूपपक्षान्तराभिधानार्थत्वेन व्याकरोति—अथवेत्यादिना।

वाचयतीत्युच्यते, शब्दपदार्थको ह्ययं प्रयुज्यते। नैष दोषः। उभयत्र प्रयोगात्। यथैव हि शब्दं ब्रुवन्तं प्रयुञ्जानो वाचयतीत्युच्यते तथैव च यः शब्देनार्थं ब्रवीति तस्यापि प्रयोजको वाचयतीति। तस्मात्कॢप्तिक्रियाशब्दैर्यजमानं वक्तुं प्रवृत्तमध्वर्युर्वाचयतीत्ययमर्थो विज्ञायते, तत्प्रकाशनेन च भिन्ना एव सन्तो मन्त्रा दृष्टार्था भवन्तीति वाक्यभेदः॥ ४७॥ § 3745

इति वाक्यभेदाधिकरणम्॥ १५॥

## ०.०.४३ अनुषङ्गाधिकरणम्

ज्योतिष्टोमे तिसृणामप्युपसदामादावाग्नेयी विहिता “अग्निमनीकं” इति। तत्र प्रथमायाः क्रमे “या ते अग्नेऽयाशया” इति निराकाङ्क्षो मन्त्र आम्नायते। उत्तरयोस्तु, साकाङ्क्षौ “या ते अग्ने रजाशया” “या ते अग्ने हराशया” इति। तत्र स्त्रीलिङ्गयच्छब्दनिर्देशस्य स्त्रीपदार्थेन केनचिद्विना परिपूर्णता नास्ति। न चापरिपूर्णेन व्यवहारोऽवकल्पते तत्र तदन्यथानुपपत्त्याऽवश्यं परिपूरणसमर्थो वाक्यशेषः कल्पनीयः। कुतः। § 3747

न्यूनवाक्यप्रयोगो हि वेदे नैव समाश्रितः।
कश्चित्क्वापि स्थितः शेषः सोऽन्वेष्टव्यः प्रयत्नतः॥ § 3749

न हि वैदिकवाक्यानां प्रत्यक्षमेवैकं प्रमाणं, तद्वदेव ह्यनुमानादीन्यपि प्रमाणानि। सर्वप्रमाणप्रत्यस्तमये च षष्ठेनाभावः परिच्छिद्यते। तदिह प्रत्यक्षानुपलब्धे वाक्यशेषे न तावत्येवोपरन्तव्यम्। यद्यनुमानादीन्यपि निवर्तिष्यन्ते तत एतावानेवायं मन्त्र इति कल्पयिष्यामः। अथ तु तैः कश्चिदवगम्यते ततस्तत्तत्सहितोऽयं मन्त्रः सकलः प्राक्तस्मादून इत्यध्यवस्यामः। तदिहार्थापत्त्या तावत्सामान्यतः कश्चिदस्ति शेष इत्यध्यवसेयम्। ततश्चाभाव-
453 स्यानवसरादूनमिदं वाक्यं न प्रयोगार्हम्। तत्र विशेषाकाङ्क्षायां लौकिकः कल्पनीय उत वैदिक एव पूर्वमन्त्रस्थस्तनूर्वर्षिष्ठेत्यादिरनुषक्तव्य इति संशये लौकिक इत्याह। तथा हि— § 3750

नान्यत्रोत्सहते गन्तुं वैदिकं सन्निबन्धनम्।
यथेष्टविनियोगं तु सर्वार्थं वस्तु लौकिकम्॥ § 3752

यथैवाऽऽहवनीयादयो वैदिकास्तन्निर्दिष्टकार्यव्यतिरेकेण न प्रवर्तन्ते तथैव वैदिकः शेषो यत्र वाक्ये समाम्नायेन विनियुक्तः स तन्निबद्धत्वान्नान्यत्र प्रयोगं

१ ज्योतिष्टोमे] तिसृणामिति—पूर्वाह्णापराह्णयोरभ्यस्यमानमाग्नेय सौम्यवैष्णवयागत्रयमेकोपसत्। तथाविधानां द्वितीयतृतीयचतुर्थाहेषु कर्तव्यतया विहितानां तिसृणामुप सदामित्यर्थः।

क्षमते लौकिकः पुनरनिबद्धत्वात्सर्वार्थः सर्वाकाङ्क्षापूरणायापि नियुज्यमानो न विरुध्यते। तस्माल्लौकिकः। तत्र यदि वैदिकमपि रचितत्वाल्लघुतरप्रयोगं रचयितव्यादवैदिकाल्लौकिकात्मना मन्वानः प्रयुङ्क्ते न केन चिद्वार्यते। वैदिकत्वबुद्धिस्तु तत्र न कर्तव्या। तथा हि— § 3753

तानेव वैदिकान्वर्णान् भारतादिनिवेशितान्।
स्वाध्यायनियमं हित्वा लोकबुध्या प्रयुञ्जते॥§ 3755

यदि त्वानन्तर्याविशेषाद्रजाश्रयेत्यनेनापि संबन्धोऽभ्युपगम्येत ततो यथानिवेशं प्रयोगात्पुरस्तादेवास्य प्रयोगः प्राप्नोति। तस्मादपि न वैदिकः शेष इति प्राप्ते। उच्यते— § 3756

विमुक्तव्यापृतौ वेदे लौकिकावसरस्थितिः।
तद्व्यापारविमोकश्च सकलान्वेषणक्षये॥§ 3758

वैदिकस्य वाक्यस्य वैदिक एव शेषः पूरणक्षमो न लौकिकः। चोदनालक्षणधर्मनियमात्। यदा तु वेदः सर्वात्मनाऽन्विष्यमाणोऽपि त्यक्तव्यापारो दृश्यते तदा लौकिकमप्यनुजानाति। सा वाऽन्वेषणा यथासंनिकर्षं प्रवर्तते। तत्र। § 3759

अदृष्टः प्रकृतावर्थः प्रत्ययेऽन्विष्यते पुनः।
पदे स्वस्मिन्नलब्धस्तु प्रार्थनीयः पदान्तरे॥§ 3761

स्वस्मिन्वाक्येऽपि न स्याच्चेन्मृग्यो वाक्यान्तरे ततः।
वाक्यान्तरेऽपि न स्याच्चेन्मृग्यः प्रकरणान्तरे॥§ 3763

एकस्मिन्नर्थे साकाङ्क्षेऽभिहिते प्रकृत्या प्रत्ययेन वा तत्संबन्धसमर्थमर्थान्तरं यदि वा तत्रैव दृश्यते ततो रमणीयम्। अथ न दृश्यते ततः प्रमादालस्ये परित्यज्य प्रकृतौ प्रत्यये चान्वेष्टव्यः। तयोरपि चेन्न दृश्यते ततः पुरस्तात्परस्ताद्वाऽनन्तरोच्चरिते पदान्तरे। न चेदनन्तरे लभ्येतैकान्तरव्यन्तरादिव्यवहिते। यदि तु स्ववाक्ये न लभ्येत ततस्तेनैव क्रमेण प्रकृते वाक्यान्तरे। वाक्यान्तरेऽपि त्वलभ्यमानो यथोपस्थाप्यमानानुसारेण प्रकर- 454
णान्तरे। यदा तु तत्रापि न लभ्यते तदा लोके। लोकेऽपि चेन्नोपलभ्येत ततो नास्तीत्येवमवधार्याऽऽकाङ्क्षाबुद्धिं भ्रान्तित्वेन परिकल्प्य निराकाङ्क्षीकर्तव्यम्। सर्वत्र च। § 3764

संनिकृष्टो न लब्धश्चेद्विप्रकृष्टोऽपि वैदिकः।
स एवावैदिकस्तु स्यात्प्राप्तः संनिहितो यदा॥§ 3766

तदिह रजाश्रयाहराश्रयावाक्ययोः शेषः स्वपदस्ववाक्ययोरलभ्यमानत्वाद्वाक्यान्तरे नूनमित्युपसंह्रियते। स च यादृगाकाङ्क्षितस्तादृगेवैकानन्तरं

पुरस्तादुपलभ्यतेऽन्यस्य व्यवहितः। यद्यपि चासौ प्रथममन्त्रे कृतार्थत्वान्न तावाकाङ्क्षति तौ तु तेन विनाऽनुपपद्यमानावात्मसमीपेऽन्यस्यानाम्नानादेवं पुरुषं प्रयुञ्जाते। सर्वसमीपे सकृत्पठितुमशक्यः प्रमाणान्तरलभ्यत्वाच्च पुनः पुनरश्रावितोऽयमावयोरप्यर्थेनाऽऽम्नातः शेषो नैकस्यैव संनिधिविशेषनिमित्त-भ्रान्त्या कल्पयितव्य इति। यद्यपि च पुरस्तादाम्नायते, तथाऽपि यत्प्रदेश-वर्त्तित्वेन ताभ्यां काङ्क्षितस्तत्रैव विनियुज्यते। कुतः। § 3767

प्रतीतिमात्रलाभार्थं तत्प्रदेशे स पठ्यते।
योग्यत्वात्संनिवेशस्तु पूर्वमन्त्रवदिष्यते॥§ 3769

स हि सकृदाम्नायमानः सर्वेषामीप्सिते प्रदेशे न शक्य आम्नातुमित्येक-स्य यथाक्रममाम्नात इतरयोश्च यावता बुद्धिविषयतामापद्यते, ततश्च गृहीतः सन् स्वयमपि प्रदेशान्तरे स्थातुमसमर्थस्ताभ्यामपि चान्यवृत्तित्वेनानाकाङ्क्षितः पूर्वत्र च परस्ताद्भावितया दृष्टसामर्थ्यः परस्तादेव निवेक्ष्यते। भाष्य-कारेण तु प्रथमद्वितीययोर्मध्ये पाठादगृह्यमाणविशेषः शेष उभयोरप्यानन्त-र्येणैव संबन्धीत्युक्त्वा तृतीयस्य व्यवधानादसंबन्धमाशङ्क्यार्थित्वाविशेषादुभयोः समुदायापादनेनाव्यवधाने साधिते समुदायशेषत्वमेव तर्हि प्राप्नोतीत्याश-ङ्क्य तस्याप्रयोगार्हत्वात्प्रयोगार्हसमुदायिसंबन्धः, तत्रापि तयोः प्राधान्यादन्य-था च नैराकाङ्क्ष्यानुपपत्तेः प्रत्येकं सकलशेषसंबन्धसिद्धिरित्यभिधाय पुन-र्व्याख्यानान्तरमारब्धम्—**अपि च साकाङ्क्षस्य संनिधाविति**। तत्र कै-
455 श्चिद्व्याख्यानविकल्प एवेत्याश्रितम्। अपरे तु वदन्ति पूर्वत्रापरितोषादुत्तरं कृतम्। किं कारणम्। § 3770

न तावत्समुदायत्वं केनचिन्निर्मितं तयोः।
पुनः प्रत्येकनिर्माणे न च हेतुः प्रतीयते॥§ 3772

समुदायत्वं ह्येककार्यत्वेनैकशब्दोपादानेन वा भवेत्, न चात्रैकमप्यस्ति। नन्विदमेककार्यत्वमेकवाक्यशेषग्रहणं नाम। अहो नु खलु मन्त्राणां कार्यं विज्ञातम्। अपेक्षा हि तत्रोभयोः स्यात्। कथं तत्कार्यमित्युच्यते। शेषश्चासौ तयोर्न तद्वशेन समुदायत्वापत्तिर्युक्ता। पश्चादपि वा समुदायिभ्यामेव तस्य संगतिरिष्टेत्यादित एव समुदायत्वं न लभ्यते। यदि च समुदायत्वमापन्नौ ततः पुनः प्रत्येकं संबन्ध इति राजैकपुत्रक्रीडाऽऽपद्यते। पुरस्तादेव च प्रयोगः प्राप्नोति। तथाभूतेन समुदायानन्तर्यात्। न वाऽगृह्यमाणविशेषत्वं, देशभेद-निमित्ततन्त्रभेदात्। प्रथमस्य ह्यसौ यथाकाङ्क्षिते देशे स्थितो नोत्तरयोः। तस्मादिदमेव व्याख्यानम्। § 3773

२४ कार्यं] मन्त्राणां ऋत्वङ्गप्रकाशनमेवकार्यं नत्वेकशेषणग्रहणमित्यर्थः।
२८ क्रीडा] एकपुत्रस्यात्यंतप्रियत्वेन पितृभ्यामनिवारणाद्राजपुत्रत्वेन चान्यैरप्यनिवारणादत्यन्तान्याय्या यथा तथेयमपीति दृष्टान्तभागाशयः।

आकाङ्क्षा संनिधानं च योग्यता चेति च त्रयम्।
संबन्धकारणत्वेन क्लृप्तं नानन्तरश्रुतिः॥§ 3775

योहि बहूनां संबन्धित्वेन सकृदाम्नायते तस्यावश्यंभाव्येकेनाऽऽनन्तर्यमिति न तदेव तदा संबन्धकारणत्वेनाऽऽश्रीयते। तत्राप्यस्मादेव कारणत्रयात्संबन्धसिद्धेः। संनिधिविशेषात्तु तदाश्रयप्रतिपत्त्या भवति भ्रान्तिः। सा तु साकाङ्क्षयोग्यसंनिहितसंबन्ध्यन्तरदर्शनान्निवर्तते। यथा धात्वर्थादिषु विधिबुद्धिर्गुणाद्युपादानसामर्थ्यात्। एवं हि तत्र ज्ञायते। सर्वार्थोऽयमाम्नायमानः सर्वसाधारणानन्तर्यासंभवाद्वाक्यैकत्वाच्च कस्यचिदेकस्य समीपे पठ्यते। तस्मादकारणमानन्तर्यमिति। **संनिधिरिति**—बुद्धौ विपरिवृत्तिः। सा चाऽऽनन्तर्ये संबद्धपदव्यवाये च भवति। संबद्धपदव्यवधिरप्यानन्तर्यप्रकार एव। कथम्। § 3776

अनन्तरेण संबद्धः स्यात्परस्याप्यनन्तरः।
ततः पुनस्तदारूढः परानन्तर्यमश्नुते॥§ 3778

'या ते अग्ने रजाशया' इत्यनेनापेक्षितः शेषः परस्तादलभ्यमानः पुरस्तात्परावृत्त्याऽऽलोच्यमानो लभ्यते तनूर्वर्षिष्ठेति। यदा च तत्राऽऽरूढस्त- 456
दा हराशयेत्यस्यानन्तरीभूतः पुनरेवमेव तृतीयेनापि सह संबध्यते। ततः परं त्वन्यस्यानाम्नानात्तावत्येवोपक्षीयते। सर्वत्रैवमपेक्षा पुरस्तात्परस्ताच्च प्रसृतैकत्राऽऽरुह्येतरेषामनन्तरीभवन्ती तावदपेक्ष्यमाणा निगृह्णाति यावत्किंचिन्न योग्यमस्त्ययोग्यं चोपलब्धम्। ततः सर्वमालोचितमुपसंहृत्य निवर्तते। यद्यपि च क्रमेणोच्चारणात्संनिकर्षविप्रकर्षौ प्रतीयेते तथाऽपि नित्यत्वाद्वेदस्यानन्तरे दूरस्थे च युगपदपेक्षा संबन्धश्चेति पश्चादवगमान्न प्रामाण्ये कश्चिद्विशेषः। एवं वाक्ये पदानां प्रकरणे च वाक्यानां संबन्धो यावत्साकाङ्क्षेण तत्संबन्धार्हेण परस्याप्यनन्तरीकर्तुं समर्थेन व्यवधानम्। **अव्यवधाने विच्छेदेऽपीति**। विरोधिना पदेनाव्यवधाने विप्रकृष्टत्वे भवति संबन्धं इत्यर्थः। तस्मादनुषङ्गः समाप्तिः। अनुषज्यत इत्यनुषङ्गः। स एव समाप्यते तेनेति समाप्तिः। § 3779

यत्र तावच्छेषिणः साकाङ्क्षास्तत्रैवमथ यत्र नैराकाङ्क्ष्यं सर्वेषु शेषिष्वेकः शेषः साकाङ्क्षः पठ्यते। यथा 'चित्पतिस्त्वा पुनातु' इत्येतेषामन्ते "अच्छिद्रेण" 457
इत्यादिस्तत्र कथमिति। किं प्राप्तम्। § 3780

अनन्तरेण संबध्य शेषस्येष्टा कृतार्थता।
शेषिणश्च निराकाङ्क्षाः किंनिमित्ताऽनुषङ्गधीः॥§ 3782

---

२७ शेषः] द्वयोरप्यसंबद्धैरिति भाष्यं पूर्वभाष्येणगतार्थमिव भासमानं, व्यवहितस्याप्यनुषंगाभ्युपगमे सर्वत्र तत्संभवान्नाध्याहारः क्वचित्स्यादित्याशङ्कानिरासार्थत्वेनासंबद्धपदाव्यवाय एवाऽऽकाङ्क्षावत्व एव चानुषङ्गो भवति नान्यथेति परिसंख्यार्थ द्रष्टव्यम्।

उच्यते। § 3783

अनन्तरस्य वाक्यस्य यदि शेषो भवेदयम्।
तत एवं भवेदेष त्वाख्यातार्थेन सर्वभाक्॥ § 3785

आनन्तर्यविशेषेण ह्ययं पुनात्वित्येतेन संबध्यते। स चैक एव त्रिष्वपि वाक्येषु, तदेकत्वाच्चार्थस्याप्येकत्वम्। न च कारकभेदात्तस्य भेदो भवति। येन चित्पत्यादिसंबद्धादस्यानन्यत्वं विज्ञायते। न चाच्छिद्रेणेत्येवमर्था क्रिया, येन सकृत्संबन्धेन संतुष्येत्। § 3786

तस्मादस्य क्रियार्थत्वाद्यावदेषा प्रयुज्यते।
तावदेव प्रयोगित्वं काष्ठानां पचने यथा॥ § 3788

अथोच्यत एकत्वेऽप्यस्या यत्कर्तृविशिष्टाभ्यासाद्यः करणसंबन्धः श्रूय-
ते तद्विशिष्टैव तेन योजयितव्या। यथैकस्यापि ज्योतिष्टोमस्य मैत्रावरुणग्र-
458 हाभ्यासविशिष्टस्य पयसा श्रयणं चोदितं नातिप्रसज्यते, यथा चात्रैव चित्प-
त्यादयो, न सर्वे सर्वत्र भवन्ति। उच्यते। § 3789

श्रयणानां व्यवस्था हि भिन्नाऽपूर्वप्रयुक्तितः।
कर्त्रन्तरावरोधाच्च चित्पत्यादेरसंकरः॥ § 3791

ऐन्द्रवायवादिग्रहाभ्यासानामदृष्टार्थत्वात्तद्भेदेन श्रयणव्यवस्था युक्ता। न हि तथा किंचित्कारणमस्ति। करणस्य क्रियां प्रत्युपयुक्तत्वात्। करणप्रकाशनद्वारेण सैव क्रिया पुनः प्रकाश्यते। सा च सर्वत्राविशिष्टत्वात्प्रकाशनमपेक्षते। यथा च वाक्पत्युपादानात्तत्समानव्यापारश्चित्पतिर्निवर्तते, नैवमच्छिद्रपवित्रप्रतियोगिकरणान्तरश्रवणमस्ति येनैतन्निवर्तेत, न च कर्तृप्रयुक्तं करणम्। यतस्तद्भेदाद्व्यवतिष्ठेत, कारकाणां क्रियाक्षिप्तत्वेन परस्परसंबन्धाभावात्। नन्वेवमपि मन्त्रान्तरमतेनापि पुनातुशब्देनास्य संबन्धः स्यात्। नैष दोषः। दर्शपूर्णमासबर्हिर्धर्मवद्व्यवस्थासिद्धिः। इह प्रक्रम्य पुनातुशब्दस्य यत्कार्यं तत्प्रयुक्तमच्छिद्रादिविशेषणं मन्त्रत्रयेऽपि तदेकमिति प्रत्यक्षमवगच्छामः। न मन्त्रान्तरे, कर्मान्तरगतद्रव्यान्तरसंस्कारार्थत्वात्। नन्वेवं सत्येककार्यत्वान्मन्त्रविकल्पः प्रसज्येत। *कुतो वैवमादीनां संख्यायुक्ताविधानादन्ते समुच्चयः। सर्वेषु विपरिवृत्तिभङ्गासंनिधिः संभाव्येत न मन्त्रान्तरेष्विति विशेषः॥ § 3792

तस्मात्पुनातुशब्दोऽयं सर्वमन्त्रगतोऽपि सन्।
अच्छिद्रापहृतः सर्वैः पुनस्तद्वानपेक्षते॥ § 3794

२६ *] विभागमन्त्रवदिष्टापत्त्याऽऽशङ्कां परिहरति कुतो वेत्यादिना। समुच्चयग्राहकप्रमाणाभावाद्युक्त एव विकल्प इत्याशयः। इदन्तु 'त्रिभिर्यजमानं पावयति' इति वचनेन दृष्टार्थत्वेऽपि मन्त्राणां समुच्चयावगतेर्याज्ञिकाचारसत्वाच्च प्रौढिवादमात्रं विज्ञेयम्।

सर्वाभ्यासान्ताभिहितेनाच्छिद्रेणेत्यादिनाऽनन्यगतिकत्वाद्यदा पुनातुशब्दः स्वीकृतः, तदा पुनात्वच्छिद्रेणेत्येवं कल्पिते संबन्धे य एवानन्तरः पुनातुशब्दः स एव पूर्वयोरपीति करणसंबन्धप्रदर्शनवेलायामन्वेति। क्रियाः पदार्थाः सन्त-स्तामपेक्षमाणाः सकरणिकामेवाऽऽसादयन्तीति सर्वत्रानुषङ्गः। एवं वाऽनुष-ङ्गेण प्रयोक्तव्ये ये तन्त्रेण प्रयुञ्जते तेषां तदालस्यमात्रं पुरस्तात्परस्ताद्वा वाक्यशेषस्यानुषङ्गत्वाविशेषे सति यत्पुरस्तादनुषङ्गेऽन्वीयत इति कैश्चिदुच्यते तद्विशेषप्रसिद्धिमात्रमिति द्रष्टव्यम्॥ ४८॥ § 3795

इत्यनुषङ्गाधिकरणम्॥ १६॥

## ०.०.४४ व्यवेताननुषङ्गाधिकरणम्

प्रत्युदाहरणत्वेन संनिधेरेवमुच्यते। 459
असंबन्धातिरोधाने वैषम्यान्नानुषज्यते॥§ 3798

'सं ते वायुर्वातेन गच्छताम्' इत्यस्य साकाङ्क्षस्यानन्तरत्वादवधारितः शेषो बहुवचनान्तेनायोग्येनासंबद्धस्तुल्ययोगित्वाभावाद्योग्येनापि यज्ञपतिना नानुषज्यते। अतश्च वैदिकशेषासंभवादस्ति लौकिकस्यावकाश इत्युभय-त्राध्याहारः कर्तव्यः। तत्र तु यद्यपि नोच्चार्यते गच्छतामिति तथाऽप्यवश्य-मनुसंधातव्यः, अन्यथाऽर्थापरिसमाप्तेः। तस्मान्नानुषङ्ग इति। प्रयोजनं तु, अनुषङ्गे मन्त्रत्वात्प्रायश्चित्तम्। लौकिकत्वे चामन्त्रत्वमिति। *आह च— § 3799

आम्नायमानं ह्यनुषज्यमानमन्तर्गतं मन्त्रनिरूपणायाम्।
ऊहादिसाम्ये ननु लौकिकानाममन्त्ररूपप्रतिपत्तिसिद्धिः॥
४९॥§ 3801

इति व्यवेताननुषङ्गाधिकरणम्॥ १७॥

इति श्रीभट्टकुमारिलविचरितमीमांसाभाष्यव्याख्याने तन्त्रवार्तिके
द्वितीयस्याध्यायस्य प्रथमः पादः॥

---

८ *] प्रयोजनविषये वृद्धसंमतिं दर्शयति—आह चेत्यादिना।

## ०.०.४५ शब्दान्तराधिकरणम्

461 उपोद्घातप्रसक्तानुप्रसक्तादौ गतेऽधुना।
शब्दान्तरादिभिर्भेदो लक्षणार्थोऽभिधीयते॥§ 3805

तत्र शब्दान्तरं तावत्स्पष्टत्वात्प्रथममुदाह्रियते। एकानेकाख्यातप्रत्ययसंबद्धाः सर्वे धातवो यजति ददाति जुहोति निर्वपति गृह्णाति स्तृणाति शंसति स्तौति इत्येवमादय उदाहरणम्। भाष्यकारेण तु स्वत्वपरित्यागांशेन यजत्यादित्रयं प्रत्यासन्नार्थत्वात्सुतरामभिन्नमाभासत इत्युदाहृतम्। तत्र पूर्वपक्षत्रैविध्यदर्शनात्संशयोपन्यासोऽपि तदनुगुणः प्रतिभाति। तद्यथा तिस्रो भावनाः किमेकमपूर्वं कुर्वन्त्युत त्रीणीति, तथा त्रयो धात्वर्थाः किमेकां भावनां विशिंषन्त्युत तिस्रः, तथा त्रयो धातवः किमेकं धात्वर्थं वदन्त्युत त्रीनिति। कार्यशब्दश्चापूर्वभावनाधात्वर्थेषु उपकार्यत्वविशेषेण प्रयुज्यते। भावनाधात्वर्थधातवो ह्येषामुत्पादनेन विशेषणेन प्रतिपादनेनोपकारकत्वात्साधनत्वेनाभिधीयन्ते। कुतः संशयः॥ § 3806

साधकत्वं द्विधा दृष्टं प्रत्येकसमुदाययोः।
वस्तुलक्षण एवातस्तद्दृष्टेः संशयोद्भवः॥§ 3808

अथवा पारमार्थिकोऽत्रायमेकः संशयः, किं धात्वर्थत्रयानुरक्तैका भावना, अथवा प्रतिधात्वर्थं भावनाभेद इति। भावनैव धात्वर्थानुरक्ता कर्मशब्देनोच्यते। तस्या एव शब्दान्तरादि भेदकं भविष्यति, अपूर्वस्यानभिधेय-
462 त्वात्कर्मभेदानुनिष्पाद्येव तदिति न पृथग्विचारमर्हति। प्रासङ्गिकस्तु धात्वर्थैकत्वोपन्यासः कथमण्यसार्वत्रिकः सन्यज्यादिषु भविष्यतीति नातीव तन्त्रीकर्तव्यः। ततश्चैतदपि संशयकारणं पूर्वपक्षवादिनः प्रतिमाति किं धात्वर्थान्प्रत्युपादीयमाना भावना प्रत्येकं समाप्यते, अथ वा ते तां प्रत्युपादीयमानाः संहत्य विशिंषन्तीति। किं तावत्प्राप्तं संहत्येति। तत्र समुदायश्चिकीर्षितः समुदायादेकमपूर्वं न वाऽशाब्दः समुदाय इत्यादिषु पुनः पुनः समुदायशब्दोच्चारणादपूर्वैकत्वाभिधानाच्च तिसृभ्यो मावनाभ्य एकमपूर्वमिति पूर्वः पक्षः। इयं चोपपत्तिः॥ § 3809

अदृष्टं प्रथमं तावन्नास्तीत्येवं प्रतीयते।
तथैव निश्चयश्चात्र दृष्टं चेन्न विरुध्यते॥§ 3811

---

२२ न्तीति ] विशिषन्तीति—अनेन च सोमेन यजते इत्यादिवाक्येषु धात्वर्थविशिष्टभावनाविधिरुत ज्योतिष्टोमवाक्याविहितानादृतधात्वर्थविशेष-भावनानुवादेन धात्वर्थविधिरिति संदेहो भावनाभेदाभेदसंशयकारणमित्याशयः सूचितः।

दृष्टश्रुतविरोधे तु सत्यदृष्टं प्रकल्प्यते।
एकेन चाविरोधित्वे सिद्धे नानेककल्पना॥§ 3813

तदेवाऽऽह॥ § 3814

विरुध्यमाने कल्प्यः स्याज्ज्ञायते तेन सोऽर्थवान्।§ 3815

दृष्टः श्रुतो वा भवतीति। तत्राप्येकानेकार्थकल्पनयोर्विशेषश्चेद्गुरुलाघवं प्रति न गम्येत ततोऽनेकोपि कल्प्येत, गम्यते चासौ। तस्मात्समुदायादेकमपूर्वम्। तत्रैतत्स्यात्, केन भावनासमुदायश्चोदितो यस्मादेकमपूर्वं स्यादित्यत आह—**न चाशाब्दः समुदायोऽवयवशब्दैरेव चोदितत्वात्। अथ वेति**—धात्वर्थत्रयानुरक्तैकभावनापक्षपरिग्रहः। तस्याप्युपपत्तिः॥ § 3816

प्रत्ययार्थप्रधानत्वात्प्रतिधातु न भिद्यते। 463
तत्रोपादीयमानत्वाद्धात्वर्थाः संहताः पुनः॥§ 3818

यदि हि धात्वर्थानां प्राधान्यं भवेत्ततो भावना तान्प्रत्युपादीयमाना प्रतिप्रधानं भिद्येत। भावप्रधानत्वाच्चाऽऽख्यानस्य प्रकृतिप्रत्ययोश्च प्रत्ययार्थशेषत्वादरुणैकहायन्यादिवद्यागादिभिः संहत्यैका भावना विशेष्यते। यद्यपि प्रधानानां गुणानुरोधेनाऽऽवृत्तिरयुक्ता तथाऽपि केवलप्रकृतिप्रत्ययप्रयोगासंभवादवश्यं तावद्धातुसंवन्धार्थं प्रत्ययः पुनरावर्तयितव्यः। यदि तु केवलः प्रत्ययः क्रीणातिवच्छ्रूयेत, ततः सकृदुच्चरित एवारुणादिभिरिव धातुभिः संबध्येत, अपदत्वान्न स्वतन्त्रः श्रूयत इत्यावर्तते। दृष्टा च विशेषणसंबन्धार्थमावृत्तिः 'आयुर्यज्ञेन कल्पतां' 'दध्ना जुहोति' 'पयसा जुहोति' 'ऐन्द्रवायवं गृह्णाति' 'मैत्रावरुणं गृह्णाति' इत्येवमादिषु। तथाऽनुष्ठानावृत्तिरपि ज्योतिष्टोमस्यानेकद्रव्यदेवतासंयोगसंपादनार्था दृश्यते। तस्मादर्थैकत्ववशेन सर्वमिदं वजतिददातिजुहोतिविधानात्मकमेकं वाक्यमेकं कर्मैकं चापूर्वमिति। अयमेव चात्र पूर्वः पक्षः साधुर्न पूर्वोक्तो भावनासमुदायासंभवात्। कुतः॥ § 3819

प्रसिद्धे भावनाभेदे भाव्यभेदो नियोमतः।
न चाऽऽसां समुदायत्वमेकशब्द्याद्विनेष्यते॥§ 3821

यदि हि भावनाभेदं पूर्ववाद्यभ्युपगच्छत्येव ततः सा भावयितव्यापूर्वभेदादृते नैवभिद्यत इति तद्भेदेऽपि सिद्धे किमनेन कृतं स्यात्। अपि च समुदायत्वापादनमेकशब्दसंयोगात्समुदायानुवादरूपेण वा भवति यथा "य एवं विद्वान्पौर्णमासीं यजते" इति, फलादिसंबन्धेन वा यथा "राजसूयेन स्वाराज्यकाम" इति। न त्विहैकमपि पश्यामो येन समुदायत्वमध्यवस्येम। ननु ज्योतिष्टोमेनेत्येष समुदायवचनो भविष्यति। न। तस्य यजिसामानाधिकरण्येन तन्मात्रवचनत्वात्। तस्मान्नैष पक्षः। एवं नु भाष्यग्रन्थो नेतव्यः। किं तावत्प्राप्तं धातुत्रयानुरक्तमिन्द्रायुधमिवैकं कर्मेति। तत्सिद्ध्यर्था

त्वियमुपपत्तिः। एवमल्पादृष्टकल्पना भविष्यतीति। कर्मभेदे हि बह्वदृष्टकल्पना निष्प्रमाणिकाऽभ्युपगन्तव्या। **तस्मात्समुदायश्चिकीर्षित** इत्याद्येकस्यैव कर्मणोऽवयवाभिप्रायेणोक्तम्। अतो **यजेतेत्यस्य पूर्वो भागो यजत्यर्थं ब्रवीति, उत्तरो** भावयेदित्यादि विगमनस्। अथ वेति प्रमादलिखितमिति मन्यन्ये। शक्यं त्वेतत्समर्थयितुं, द्वे ह्येते पूर्वपक्षोपपत्ती भाष्यकारेणोपन्यस्ते। 464 तत्रानेकादृष्टकल्पनादोषं पूर्वमुपन्यस्य अथ वेत्युपपत्त्यन्तरमाह। एतदुक्तं भवति। किमेकादृष्टकल्पनोपपत्त्याऽथवा शब्देनैवैकां भावनां प्रतिपादयामः। पूर्वार्धभेदेऽपि प्रत्ययैकत्वेनाभिन्नार्थप्रतीतेस्तद्दर्शयति। तथा ददातीति पूर्वो ददात्यर्थमुत्तरस्तमेव भावयेदिति। एवं प्रतिभाति तमेव धात्वर्थं भावयेदिति। तत्त्वयुक्तम्। सर्वत्र धात्वर्थभाव्यत्वप्रतिषेधात्। न चैतत्पूर्वपक्षवादिनोऽपि क्वचिदुपयुज्यते। तथाऽनुवदतीति न शक्यं वदितुम्। तस्मादेवं वाच्यं पूर्वो ददात्यर्थ उत्तरः पुनर्यो यजतेः परेणांशेनोक्तस्तमेव भावयेदित्येवं धात्वर्थान्तरसंबन्धार्थमनुवदतीति। एवं जुहोतीत्यत्रापि। तथा च यजेतेत्यत्रैवं नाभिहितं, न हि तत्र पूर्वतरप्राप्ता भावनाऽस्ति याऽनूद्येत। यदि धात्वर्थभाव्यत्वमभिधीयेत तदविशिष्टं तत्रापीति। न तद्वर्नमुत्तरयोरेव ब्रूयादतो भावनैकत्वप्रतिज्ञानाभिप्रायमेतत्। तस्मादेका भावनाऽपूर्वं च। यद्वा **यजतिशब्देन विहितमिति**—धात्वर्थैकत्वं वदति स्वत्वत्यागांशसमत्वात्। अथापि लक्षणया ददाति जुहोति यजेतेत्यस्यानुवादस्तथाऽपि कर्मान्तरनिमित्तादृष्टकल्पनातः सैव ज्यायसीत्याश्रीयते। न वाऽनुवादे लक्षणा दोषः। गुणविध्यर्थस्त्वनुवादः। एकत्राऽऽत्रेयः संप्रदानं हिरण्यं च प्रदेयं विधीयते। इतरत्र दाक्षिणानि विधीयन्ते। ननु नामधेयत्वान्नैवायं गुणविधिः। कर्मविधानपक्षे ह्येतस्य नामधेयत्वम्। अनुवादे तु वाक्यानर्थक्यप्रसङ्गादेकान्तेन गुणविधिरभ्युपगन्तव्यः। तदा च यजतिददातिजुहोतय इति धात्वभिप्रायकम्। एकं कार्यमेकं धात्वर्थं तदेतरत्तदर्थमिति वा न्यायेनैकमपूर्वं गमयन्तीत्यर्थः। तस्मान्न कर्मभेद इति॥ अत्रोच्यते॥ § 3822

धात्वर्थभेदे सर्वत्र विज्ञेयं भावनान्तरम्।
उत्पत्त्यैकानुरक्ता हि नान्येनाप्यनुरज्यते॥ § 3824

यद्यप्येको भावनावचनस्तदर्थस्य च प्राधान्यं, तथाऽप्यनुरञ्जकधात्वर्थभेदाद्भावनान्तरं प्रत्येतव्यम्। न ह्येकस्यास्त्रयो धात्वर्थाः सन्निपतितुं समर्थाः। न च समुच्चयं प्रतिपद्यन्ते करणांशावरोधित्वेन तुल्यार्थत्वादन्योन्यनिरपेक्षभिन्नशब्दोपादानाच्च। न ह्येको धातुस्त्रीन् धात्वर्थानुपादत्ते। न चैकस्मिन्पदे धातुत्रयं परस्परापेक्षं प्रत्ययं प्रत्युपादीयमानं संभवति "धातोः" इति प्र- 465 त्ययोत्पत्तौ विवक्षितैकत्वसंख्यत्वात्। न चैतत्पदत्रयमेकवाक्यतां गच्छति। विभज्यमानसाकाङ्क्षत्वैकार्थत्वयोरभावात्। न वैकापूर्वकल्पनात एकवाक्यताऽऽपद्यते। 'समेषु वाक्यभेदः स्यात्'* इत्यत्र प्रत्याख्यातत्वात्। न चापूर्व-

३५ *] ( अ० २ पा० १ अ० १५ सू० ४।१२)

भेदाभेदपूर्वकौ कर्मभेदाभेदौ। विपरीताभ्युपगमात्। यदि च केवलैव भावना केन चिदुपादीयेत ततोऽरुणादिभिरिवैकवाक्यगतैर्दध्यादिवद्वा भिन्नवाक्यगतैरेकैवानूद्यानूद्य युगपद्वा विशिष्टविधानन्यायेन यागदानहोमैरनुरज्येत, न त्वस्याः पृथगुत्पत्तिरस्तीत्यवश्यं ददात्यादीनामेकेन समस्तैर्वोत्पादयितव्या। तत्र यदि तावत्समस्तैरुत्पाद्यते, तत उत्पन्नायाः पुनरुत्पत्त्यसंभवात्सिद्धं कर्मान्तरत्वम्। अथैकेन तावदुत्पाद्येत, तत्रापि विनिगमनायां हेतोरभावाद्विशेषो न ज्ञायते। येन केनचिदुत्पत्तिरप्येतस्याः प्रतीयते ततस्तद्व्यतिरिक्तेन धातुना नानुरज्यते। येनैव ह्येकेन धातुना कृतानुबन्धा भावनोत्पन्ना तस्यैव श्रौतत्वेन बलीयस्त्वान्न पदान्तरस्थैर्धात्वर्थैः सह विकल्पः संभवतीति ततः प्रच्युतैस्तैः स्वपदप्रतिपादितमवश्यं भावनान्तरमनुरञ्जनीयम्। एवमेकैकत्र स्वपदोपात्तधात्वर्थानुरञ्जनमौत्पत्तिकं श्रौतं च, धात्वर्थान्तरानुरञ्जनमुत्पन्नभावि वाक्यप्रकरणलभ्यं च। ददातिर्हि यजत्युपनिबद्धां भावनां निषेधन् स्ववाक्यानुच्चरितां पदान्तरानुवर्तिनीं प्रकरणाद्वाक्याच्च प्राप्नुयादेवं यजतिरपि तत्र तत्रेति योज्यम्। ननु च ददातिपदेऽप्यसौ पुनः श्रूयमाणा सैवेति प्रत्यभिज्ञायत इति न वक्तव्यं वाक्यप्रकरणाभ्यां ददातिसंबन्धो भवतीति। सत्यं भावनामात्रसंबन्धः श्रुत्यैव प्रतीयते। यागानुरक्तभावनासंबन्धे तु न श्रुतिव्यापारो युज्यते। ननु चैकत्वादेवास्या एवं भेदव्यवहारो न युक्तः। केन वा कर्मभेदपक्षेऽपि सामान्यैकत्वं नाभ्युपगम्यते। नन्वत्र व्यक्तिनानात्वेऽपि नास्ति प्रमाणम्। कथं नास्ति। यदा भिन्नधात्वर्थसंनिधानादसौ नानात्वेन प्रतिशब्दमुपलभ्यते। ननु च शब्दवदेव परोपाधिको भेदप्रत्ययो न पारमार्थिको भावनाभेदः स्यात्। नैतदेवं, शब्दस्यापि गकारादिभेदः पारमार्थिको नैव कस्यचिदनिष्टस्तद्वदिहापि यागादिभेदे सिद्धे शब्दस्थानीयमनुष्ठानसामान्यं निरूप्यते। न च यथा शब्दस्यार्थान्तरभूता ध्वनयः द्रुतादिबुद्धिमपारमार्थिकीं कुर्वन्त्येवमत्र यागादयोऽदूरव्यतिरिक्ताः। तस्मादस्ति भेद इति। आह च— § 3825

यथा रक्तोपधानेन निरुद्धे स्फटिके सति।
कृष्णादिचोदनायुक्तं गम्यते स्फटिकान्तरम्॥§ 3827

तथैकधातुसंबद्धभावनाचोदने सति।
भावनान्तरगामिन्यः स्युर्धात्वन्तरचोदनाः॥§ 3829

यस्मात्प्रकृतिप्रत्यययोः स्वार्थाभिधाने स्मृतेराचाराच्च नित्यविवक्षितक्रमत्वेन पूर्वप्रयुक्तप्रकृत्यर्थव्याप्तेषु प्रतिपत्तृषु प्रत्ययांशः संनिपतन् कृतानुबन्धमेव स्वार्थं वदति। तस्मान्न कदाचित्प्रत्यथार्थः शुद्धो लभ्यते। यथोक्तं **प्रातिप-** 466
**दिकादुच्चरन्ती द्वितीयादिविभक्तिः प्रातिपदिकार्थो विशेषक इत्याहेति। प्रयोगवाक्यशेषभावेन हि समुदायस्य सत्तासंबन्ध इति।** एकापूर्वकल्पनया

३२ इत्याहेति] ( अ° १ पा° १ अ° ७ )। इत्यत्र भाष्यकार इत्यर्थः।

हि समुदायानुरक्तभावनाकल्पनमाश्रितं फलसंबन्धनिमित्ता वाऽपूर्वकल्पना। प्रयोगवाक्यशेषभावेन वोत्पत्तिवाक्यानां फलसंबन्धो भवति न स्वरूपैः। अवधृतस्वरूपाणि च कर्माणि प्रयोगवाक्येन गृह्यन्त इत्यवगते भेदे न शक्यान्येकीकर्तुम्। न च ददातिजुहोत्योः प्रयोगवाक्यशेषभावं पश्यामः, यजेत स्वर्गकाम इति केवलयागश्रवणात्। न च तेन दानहोमौ लभ्येते। स्वार्थत्यागप्रगङ्गादुभयाश्रयणे वा युगपच्छ्रुतिलक्षणापत्तिर्दोषः। तस्मान्न समुदायकल्पनाऽस्ति। अतश्च धात्वन्यत्वेन पदान्तरत्वात्केवलविशिष्टता गम्यते। न च ज्ञानान्तरेण निवर्तते। न च धात्वर्थैकत्वम्। आसेचनपरस्वत्वापादनाभ्यधिकत्वात्। न च त्यागमात्रलक्षणा, स्वार्थवृत्तित्वेनापि वाक्यसमवायोपपत्तेः। न
467 च दाक्षिणानि नाम गुणः कश्चित्प्रसिद्ध इति सामानाधिकरण्यान्नामधेयत्वमेव युक्तम्। अतश्च वाक्यानर्थक्यं मा भूदिति होमो विधीयते। ददातिना तु यागमनूद्य गुणे विधीयमाने हिरण्यात्रेयसंबन्धे वाक्यभेदप्रसङ्गाद्गुणादपि भेदः संभवतीत्यत्रैकगुणो निर्गुणो वाऽन्यो ददातिरुदाहर्तव्यः॥ १॥ § 3830

इति शब्दान्तराधिकरणम्॥ १॥

## ०.०.४६ अभ्यासाधिकरणम्

शब्दान्तराधिकरणप्रत्युदाहरणरूपेणाभ्यासस्य पूर्वपक्षः सुखमभिधीयत इति तदनन्तरमारम्भः। तत्र समिधो यजति तनूनपातं यजति इत्यादिषु समिदादिशब्दानपोद्धृत्य यजतीत्येतत्पञ्चकृत्वोऽभिहितं किमेकस्य कर्मणो वाचकमथानेकस्येत्युदाहृतं तदाक्षिप्यते। § 3832

गुणो वा नामधेयं वा समिदादिपदं भवेत्।
ताभ्यामेव च भेदोऽत्र किमभ्यासः करिष्यति॥ § 3834

षडपि भेदहेतवः पृथग्भूताः स्वसामर्थ्यमात्रव्यापारफला दर्शयितव्याः। तद्यावदत्र गुणनामधेययोर्भेदकरत्वं नापनीयते न तावदभ्यासस्य परभागलाभोऽस्तीत्यन्यदुदाहर्तव्यम्। न च तत्संभवति। कुतः। § 3835

प्रयुज्यते हि वेदेषु नाऽऽख्यातं केवलं क्वचित्।
नाम किंचित्प्रयुक्तं चेत्तस्य चोक्तं गतिद्वयम्॥ § 3837

'ऐन्द्रवायवं गृह्णाति' इत्येवमादीनि हि सर्वाणि परस्परासंगत्यौत्पत्तिकगुणयोगाद्भिद्यन्ते। 'भिन्ने जुहोति' 'स्कन्ने जुहोति' इत्यादीन्यपि 'फलं चाकर्मसंनिधौ'* इत्यनेन न्यायेन निमित्तं प्रत्युपादीयमानत्वाद्भिद्यन्ते। निमित्त-

१४ *] ( अ० २ पा० ३ अ० १२ सू० २५ )

संबन्धपरत्वाच्च नाभ्यासानर्थक्यमित्यभेदकत्वम्। ये तु पञ्चशारदीयेषु “तान्पर्यग्निकृतांस्तान्पर्यग्निकृतान्” इत्येवमभ्यासमुदाहरन्ति तेषां प्राकृतपर्यग्निकरणानुवादप्रस्मरणसामर्थ्यं तत्। न वाऽत्र यजतिः श्रूयते यस्याभ्यासाद्भेदः स्यादिति न किं चिदुदाहरणम्। यथोदाहृतेष्वेव तु समाधिः। § 3838

प्रायेणाऽऽख्यातसंबन्धि नामेष्टं पारतन्त्र्यभाक्।
तस्यैव प्रथमं तेन भेदाभेदनिमित्तता॥§ 3840

यान्युपादेयार्थानि नामपदानि तानि तावदाख्यातपरतन्त्रत्वात्तदनुसारीणि सन्ति तद्वृत्तिं प्रतीक्षन्ते, तच्चेत्प्रकृते निविष्टं नामपदमपि तस्यैव गुणविधिर्नामधेयं वा। अथ तेनापूर्वं परिकल्पितमतस्तद्गामि नामपदमित्येवं भेदाभेदयोरवगतयोः पश्चादागच्छत्समिदादिपदमकिंचित्करत्वादुदास्ते। तेन 468 तदपोद्धृत्याऽऽख्यातमात्रं विचार्यते। नन्वेवं सति संज्ञागुणयोरभेदकत्वप्रसङ्गः। तत्र तौ भेदकौ यत्राऽऽख्यातपदं न व्याप्रियते तथा चोदाहरिष्यति “अथैष ज्योतिः” “वाजिभ्यो वाजिनम्” इति। वाजिने तावन्नैवाऽऽख्यातपदं श्रूयते, ज्योतिरादावप्याख्यातस्य गुणफलसंबन्धव्यापारेण प्रकृतनिवेशसंभवे सति ततः पूर्वप्रवृत्तया संज्ञयैव भेदो भविष्यति। यत्राप्याख्यातस्य स्वरसेन प्रकृतकर्मनिवेशोपप्लवे सति तत्रासंभवन् गुणो विधीयते तत्राप्यसौ भेदको यथाऽत्रैवाभ्युपेत्यवादे वक्ष्यति स एष देवतायागसंबन्धो विधीयमान इत्यादि। तच्चाऽऽख्यातस्य भेदशक्तौ विहतायां भवतीति तदेव तावत्प्रथमं परीक्ष्यते। **किमेकमपूर्वमिति**—फलतः कर्मभेदाभेदोपन्यासो, यद्वा किमेकं कर्मापूर्वं चोदयत्युत पञ्चापि कर्माण्यपूर्वाणीति। किं प्राप्तम्। एकमपूर्वमिति। कुतः। § 3841

प्रत्ययार्थः समानोऽपि धातुभेदेन भिद्यते।
धातोरपि समानत्वे केन भेदोऽवधार्यते॥§ 3843

अपि च। § 3844

पूर्वं तेनैव शब्देन बुद्धौ कर्म निवेशितम्।
न भेदं प्रत्यभिज्ञानात्पुनः श्रुत्या प्रपद्यते॥§ 3846

यथैव यजतिशब्दः सकृत्प्रत्यक्षेणावगतः पुनरुच्चारणे स एवेति प्रत्यभिज्ञानान्न भिद्यते। तथा तदर्थोऽपि, यथा चात्रैव बुद्धबोधनकृत्प्रत्यक्षमनर्थकमपि भवन्न शक्नोति शब्दान्तरत्वं कर्तुमेवं पुनः श्रुतिरर्थान्तरत्वम्। न ह्यानर्थक्यं नाम क्वचित्प्रमाणवर्गेऽन्तर्भवति। यच्च वेदोऽवबोधयति तन्मात्रमेव तत्प्रमाणवादिभिरभ्युपगन्तव्यम्। तदिहैकशब्देनाभेदे वेदेनावगमिते योऽन्यत्वं कल्पयति तेन वेद एवाप्रमाणीकृतः स्यात्। न च प्रमाणावगतमानर्थक्यं

१ दीयेषु] अहीनात्मकः पञ्चाहः पञ्चशारदीयो नाम।

दोषाय। अस्ति वेयमपि गतिः। प्रयोगवचनसंस्पृष्टः शब्दोऽर्थमवदधत्त्वयं प्रयोगित्वेन गृह्यत इति। अथ वाऽऽभीक्ष्ण्यादिद्योतनार्थोऽभ्यासो भविष्यति।
469 अस्ति हि लोके द्विर्वचनादतिरेकेणापि यावत्कृत्वोऽभ्यस्ते विवक्षितार्थप्रकाशनं भवति तावत्कृत्वोऽभ्यासः। तथा च पञ्चेन्द्रोपाख्याने वृद्धकुमारीवरप्रार्थने पतिं मे देहीति पञ्चकृत्वोऽभ्यासः श्रूयते। न च यथा देवतायाश्छलप्राहित्वमेवमिह कस्यचित्। येन पतिपञ्चकवत्पञ्चयागकल्पना स्यात्। अथ वा सर्वेष्वप्युच्चारणेषु विधावाश्रीयमाणे कर्मैकत्वं विज्ञायते। यथा शाखान्तरीयेषु ज्योतिष्टोमादिवाक्येषु। तेन तुल्यार्थानां वैकल्पिकत्वात्तदेव कर्म कदाचित्समिद्वाक्येनाभिधास्यते कदाचित्तनूनपाद्वाक्येन। न हि समानकार्यत्वेन व्रीहियवयोरेकस्याऽऽनर्थक्यादर्थान्तरसाधकत्वं विज्ञायते। अथ वा तनूनपादादिदेवताविधानार्थत्वान्नाऽऽनर्थक्यम्। कर्मविधाने हि सति नामधेयत्वं भवेदनुवादे तु नामधेयविधिर्न संभवतीति गुणविधित्वम्। तस्मादप्यकर्मान्तरम्। यत्रापि च प्रदेशान्तरे तावेव शब्दार्थौ प्रत्यभिज्ञायेते तत्रापि हि गृहान्निर्गतस्य पुनर्गृहजनप्रत्यभिज्ञायामिवार्थान्तरत्वमशक्यं वक्तुम्। किमुतेहानन्तरविपरिवृत्त्या बलीयस्याऽवरुद्धायां बुद्धौ। यदि च प्रत्युच्चारणमर्थान्यत्वं भवेत्तदाऽनित्यव्यक्तिशब्दार्थत्वप्रसङ्गः। किं च। § 3847

गत्वादिवन्न चैतेषु यागत्वं व्यतिरिच्यते।
व्यक्त्यैकत्वे निरूढे च कथं कर्मान्तरं भवेत्॥§ 3849

यद्यपि च पुनःश्रुत्यर्थवत्त्वाय पञ्चकृत्वो यागोऽभ्यस्येत तथाऽपि ज्योतिष्टोमवदेवाकर्मान्तरत्वं स्यात्। न चात्राभ्यासहेतुरस्ति। वाक्यसंयोगेन देवतानां वैकल्पिकत्वात्। तस्मादेको याग इति। एवं प्राप्ते ब्रूमः। एकस्यापि पुनः श्रुतिरेवं स्याद्यथा शब्दान्तरं भेदकं तथेत्यर्थः। कथम्। § 3850

आख्यातप्रत्ययः पूर्वं विधत्ते कर्मशक्तितः।
अन्येनाऽऽक्षिप्तशक्तिस्तु तदाकाङ्क्षत्यनूदितम्॥§ 3852

470 यदि हि विपरिवृत्तिरनुवादकारणं स्यात्ततो न कर्मान्तरमध्यवसीयेत। न तु विपरिवृत्तिकृतमनुवादकत्वं, किं तर्हि। § 3853

---

२ योगित्वेन] मन्त्रवत्कर्मकालप्रयोज्यत्वमेकं प्रयोजनमभ्यासस्येत्यर्थः।
२ वाऽऽभीक्ष्ण्यादि] प्रतिप्रधानप्रयोगमावृत्तिराभीक्ष्ण्यं नाम।
४ ञ्चेन्द्रो] इन्द्रस्य त्वष्टृपुत्रवधात्तेजो धर्ममाविशद्बलं वायुं रूपमश्विनौ देहार्धमात्मन्यतिष्ठत्ततः पाण्डुपत्न्यां कुन्त्यां धर्मेण निक्षिप्तं तेजो युधिष्ठिरोऽभवद्वायुनिक्षिप्तं बलं भीम इन्द्रनिक्षिप्तं देहार्धमर्जुनोऽश्विभ्यां माद्र्यां निक्षिप्तं रूपं नकुलसहदेवाविति पञ्चापीन्द्रावयवप्रकृतित्वादिन्द्रा एवेति पञ्चेन्द्रोपाख्यानं द्रष्टव्यम्।
५ प्रा] छलमिति—अर्थान्तरविवक्षया प्रयुक्तस्य शब्दस्यार्थान्तरपरिकल्पनया प्रत्यवस्थानमित्यर्थः।

अनुवादविशेषत्वं प्रकृतप्रत्ययाद्भवेत्।
तत्सामान्यप्रसिद्धिस्तु स्ववाक्यादेव लभ्यते॥§ 3855

यदा हि विधायकस्य विधिशक्तिर्धात्वर्थादुत्तार्यते तदाऽनेकविध्यशक्तेर्धात्वर्थानुवादः प्रार्थ्यते। तां च प्रार्थनां विपरिवृत्तिः पूरयति। धात्वर्थोत्तारणं च विधिशक्तेर्विधेयान्तरोपादाननिमित्तं यथा "व्रीहिभिर्यजेत," "दध्ना जुहोति" इति। सर्वत्रैवानेकार्थोपादाने विधिशक्त्यनेकत्वासंभवादेकं किंचिदनूद्यतामित्यपेक्षायां सत्यां यद्विपरिवर्तते तदित्यवधारणं भवति। ततश्च दध्यादेरप्राप्तत्वाद्धात्वर्थोऽनूद्यते। यदा तु खलु नैवानेकं विधेयमुपादीयते तदा नैव तस्मिन्वाक्येऽनूद्यतां किंचिदित्यपेक्ष्यते। ततश्चाप्राप्ते सामान्यानुवादे तत्सिद्ध्यपेक्षिणी विशेषानुवादकारणभूता किं विपरिवृत्तिः करिष्यति। तस्मान्न यत्प्राप्तं तदनूद्यत इति लक्षणम्। किं तर्हि, यदनूद्यतामित्यपोक्षितम्, तत्प्राप्तौ सत्यामनूद्यते। नैकाङ्गविकलमनुवादत्वापेक्षणेन प्राप्तिबुद्धिमात्रेण वा। तत्र यथैवानुवादापेक्षणे सत्यपि प्राप्त्यभावाद्विशिष्टविधानरूपेण विधिर्भवत्येवं प्राप्तिबुद्धौ सत्यामप्यनुवादत्वानपेक्षणाद्विधेः कर्मान्तरत्वं सत्यपि धातुप्रत्ययैकत्वप्रत्यभिज्ञाने। यत्तु बलीयस्या विपरिवृत्त्या शतकृत्वोऽप्युक्ते तद्बुद्धिर्नापैतीति, प्रमाणबलाबलज्ञानात्सर्वं संभाव्यमेव तत्। तथा हि। § 3856

श्रुतेः कर्मान्तरज्ञानं संनिधेरेककर्मधीः।
तत्र श्रुतिबलीयस्त्वं जानतां कथमेकता॥§ 3858

विधायिका हि श्रुतिरन्यानाक्षिप्ता धात्वर्थभावनयोरेव संनिरुद्धा तत्रैवाप्राप्तविषयस्वभावं विधित्वं प्रसुवाना पञ्चमस्थानाख्यप्रमाणकृतां प्राप्तबुद्धिमुपमृद्य विधेयत्वक्षमं कर्मान्तरं कल्पयति। स चेद्विधिः श्रुतिमनुरुध्येत कर्मान्तरमध्यवस्यति, अथ संनिधिं ततो न कर्मान्तरत्वम्। यत्र पुनर्विधिश्रुतिरन्यत्र व्याप्रियते तत्राविरोधात्संनिधिकृतं कर्मैकत्वज्ञानं भवति। तस्मादिह विधेययागव्यक्तिफलत्वोपात्तसामान्यैकत्वनिमित्तैव प्रत्यभिज्ञानभ्रान्तिः। न हि व्यक्तिप्रत्यभिज्ञाने किंचित्कारणमस्ति। यदत्र परमार्थेन प्रत्यभिज्ञायते तदेकत्वे न कश्चिद्विवादः। तथा हि। § 3859

स्थिते यागत्वसामान्ये पशुसोमेष्टिकर्मणाम्।
विशेषव्यक्तिरूपेण भेदः सर्वत्र चिन्त्यते॥§ 3861

ननु चात्र यजिश्रुत्यैवैककर्मविज्ञानान्न वक्तव्यं संनिधिकृतमेवैकत्वमिति। नैतदेवम्। § 3862

यागोऽयमिति विज्ञानं यजिश्रुत्योपजन्यते। 471
स एवेत्यन्य एवेति व्यापारोऽस्या न विद्यते॥§ 3864

न हि यः पूर्वविहितो यागः स एवायमिति यजतिशब्दो वदति। औदासीन्येनैव त्वभिदधाने शब्दे संनिधिकृतामभेदबुद्धिमनभिजानतां श्रुतिनिमित्ता

प्रत्यभिज्ञानभ्रान्तिः। ननु तव व्यक्तेरशब्दार्थत्वादभिन्नं सामान्यं श्रुत्या विज्ञायते। येनैव व्यक्तिरशब्दार्थ स्तेनैवानेककर्मतां श्रुतिर्बोधयतीति। कथम्। § 3865

व्यक्तयो हि विधीयन्ते सामान्येनोपलक्षिताः।
तस्मात्तद्गतमेवात्र भेदाभेदनिरूपणम्॥ § 3867

यत्सामान्यं शब्दार्थभूतं तस्याननुष्ठेयत्वेनाविधेयत्वात्सर्वत्र व्यक्तय एव विधीयन्ते। तत्र समिधो यजतीत्येका व्यक्तिरसाधारणा चोद्यते तनूनपातं यजतीत्यपरा। तस्मात्पञ्च व्यक्तय इति सिद्धम्। यत्त्वत्र गकारादिवद् व्यक्त्याकृतिभेदो नास्तीति। सत्यं नास्ति किं तु। § 3868

यन्मात्रमेकं कर्मेति स्वरूपेणावधार्यते।
ततः परं न भेदोऽस्ति प्राक्तस्माद्भेदनिश्चयः॥ § 3870

यथैव गकारादीनां वर्णत्वशब्दत्वगुणत्वेषु सत्सु द्रुतादिभेदस्य परोपाधित्वाद्गकारादिरूपैकत्वसिद्धेर्गत्वादिमात्रं न कल्पितम्, तथाऽत्र सत्ताकर्मयागत्वेषु समिद्यागादिपर्यन्तेषु सत्सु देशकालयजमानादिभेदाद्द्रुतादिवृत्तिस्थानीयान्न भेदः। तथा हि। § 3871

पौर्णमासीसमिद्यागादामावास्यो न भिद्यते।
यजमानान्तरेष्वेवं देशभेदेष्ववस्थितम्॥ § 3873

न च यत्र प्रत्यक्षेण केवलेन भेदोऽवगम्यते तदेवैकं भिद्यते। शब्दस्यापि प्रामाण्याविशेषात्। अतोऽत्र शब्दान्तरादिषड्भावधिरेव भेदोऽवधारयितव्यः। न हीष्टिपशुसोमैकाहाहीनसत्रेषु परोपाधिर्भेदप्रत्ययो विपर्येति वा कदाचित्। तेन तासु विधेयरूपासु व्यक्तिष्वेव नित्यास्वभिव्यञ्जकानि भिद्यन्ते। तेभ्यश्च फलस्वरूपसिद्धिर्यागत्वमेव वैकमवान्तरसामान्यं नान्यत्किंचित्। नन्वेकाहत्वादीन्यप्यवान्तरसामान्यानीष्यन्ते। न, कालविशेषयोगादेव दण्ड्यादिवदभिन्नशब्दप्रत्ययप्रवृत्तिसिद्धेः। एकेन ह्यह्ना योगादेकाहत्वम्। द्व्यादिभिरहीनत्वं प्राग्द्वादशाहात्, स तु कथमप्युभयात्मा, तदवधिकमेव चाऽऽसहस्रसंवत्सरं सततकालयोगनिमित्तं सत्रत्वं, हविर्विशेषयोगादिष्ट्यादित्वमिति सिद्धम्। अथाप्यवान्तरसामान्यानि पुनः कल्प्यन्ते, तथाऽप्यस्मत्पक्षाविरोधः। एवं यदि ज्योतिष्टोमत्वादीनि देशकालादिभेदाच्च तद्व्यक्तयोऽत्यन्तातिरेकिण्यो भवन्ति तथाऽप्यदोषः। तथा यद्यपि देवतोद्देशद्रव्यत्यागात्मकत्वात्सर्व एवैको यागः
472 कल्प्यते तेष्वपि भेदप्रमाणैस्तदनुष्ठाननानात्वावगमाद्व्यवहारसिद्धिः। नन्वेवं सति ज्योतिष्टोमग्रहाभ्यासवत्समिदादियागाभ्यासेष्वकर्मान्तरत्वप्रसङ्गः। सर्वथा तावदपूर्वभेदाद्धर्मव्यवस्थादीनि सिध्यन्ति, तथाऽपि तु येह कर्मभेदबुद्धिर्ग्रहयागेषु चाभ्यासभेदप्रसिद्धिः, तत्रैतन्निमित्तं, इह सकलयागरूपानुष्ठानभेदचोदनात्तत्र पुनः समस्ताभ्यासात्मकस्य ज्योतिष्टोमसंज्ञत्वाद्यद्यपि प्रत्यभ्यासं यागत्वमस्ति न तु ज्योतिष्टोमत्वमित्यभ्यासेऽवयवबुद्धिर्नेतरत्रावयव्य-

न्तररूपानुपादानादिति विशेषः। एतज्ज्ञानस्य च प्रयोजनं पशुसोमाधिकरणे वक्ष्यामः। **तस्मादभ्यसितव्यो याग** इति च भाष्यमेतत्पक्षाश्रयणेनैव। अथवा भिन्नास्वेव व्यक्तिषु सामान्यापेक्षमभ्यासवचनम्। **ननूक्तं न शक्नोत्यर्थान्तरं विधातुमिति**—विधिशक्तेस्तनूनपादादिदेवताविधानाक्षेपे सति विपरिवृत्तेरविरोध इति मन्यते। तत्र 'तत्प्रख्यं चान्यशास्त्रम्'* इत्येवं समिदादिपदानां क्रमविनियुक्तैवंलिङ्गमन्त्रवर्णकल्पितदेवतासंबन्धद्वारेण नामधेयत्वे सत्यविधेयत्वान्नास्ति विधिशक्त्याक्षेप इति वक्तव्ये देवतायागसंबन्धविधानोपन्यासोऽभ्युपेत्यवादेन। यत्तावद्भवानप्राप्तत्वात्प्रथमस्य यागविधित्वं मन्यते तदयुक्तं तस्यापि प्रधानयागानुवादत्वात्। तत्र समिदादिशब्दैर्द्रव्यं देवता वा विधीयते। उभयमपि चाऽऽग्नेयोऽष्टाकपाल इत्यादिभिरुत्पत्तिवाक्यैर्विहितेन द्रव्यदेवतेन विरुध्यते। अवश्यं चैतद्वाक्यकृतो देवतायागसंबन्धः कर्त्तव्यः, स च यागान्तरादृते न संभवतीति प्रतिपादिते गुणविधित्वे कर्मान्तरत्वमापद्यते। एवं पूर्वत्र कर्मण्युत्तरोत्तरगुणविध्यसंभवात्सर्वेषां कर्मान्तरत्वमिति व्यर्थो गुणविध्युपन्यासश्रमः। गुणविधित्वमपि न तावद् द्रव्यमीदृशेन शब्देन संभवतीति व्याख्यातं सक्त्वधिकरणे। विशेषेण च यजतेः कर्मभूतद्रव्यसंबन्धो न घटते, न वाऽयं देवताविधिरिति नवमे वक्ष्यते। तस्मात्कर्मविधिभिरेव भेदसिद्धिः॥ २॥ § 3874

इति अभ्यासाधिकरणम्॥ २॥

## ०.०.४७ पौर्णमास्यधिकरणम्

समस्तान् दर्शपूर्णमासप्रकरणयागविधीनुदाहृत्य किं सर्वेषां प्रधानत्वमुत 473
केषां चिदेवेति भाष्यकारेण विचारः प्रस्तुतः। तत्राभिधीयते— § 3876

अङ्गप्रधानचिन्तेयं चतुर्थाध्यायगोचरः।
केन नाम प्रसङ्गेन प्रस्तुता भेदलक्षणे॥ § 3878

अभ्यासलक्षणभेदानन्तरमिदानीं संख्यानिमित्तं भेदमविचार्यैव कथमयं लक्षणानौपयिकोऽर्थश्चिन्त्यते। केचिदाहुः। अयमपि लक्षणार्थ एव, **अनन्तरं प्रधानाप्रधानानि परीक्षिष्यन्त** इति वचनात्। तत्त्वयुक्तम्। तत्रैव पर्यनुयुज्य वचनस्यान्यथैव व्याख्यानात्। अपूर्वभेदप्रतीत्यर्थो हि स तृतीयसिद्धोऽर्थोऽत्रोपन्यस्त इत्युक्तम्। अयं तु कर्मणामङ्गाङ्गिभावो न क-

१ णे] (अ° २ पा° २ अ° ६)
५ *] (अ° १ पा° ४ अ° ३ सू° ४ )
१५ णे] ( अ° २ पा° १ अ° ४ सू° १२)
७ त्रैव] (अ° २ पा° १ अ° १) इत्यत्र भावनाभेदानुनिष्पाद्यपूर्वभेदाभेदसिध्यर्थं द्रव्यं प्रति प्रधानान्यप्रधानानीति विचार्यत इत्येवं व्याख्यातत्वादित्यर्थः।

थं चित्संबध्यते। महता प्रयत्नेनायं चतुर्थे साधयिष्यते “दर्शपूर्णमासयोरिज्याः प्रधानानी”त्यत्राधिकरणे, स्फुटत्वाच्च नान्यथा तत्रेतुं शक्यते। तस्मादिहाविचारणीयमेतत्। य एवं विद्वानित्येवं संयुक्तौ प्रकृतानुवादावथ वाऽपूर्वकर्मविधी तत्रेतरे गुणविधय इत्यपि सर्वं यथोपन्यस्तेनाप्यधिकरणार्थेन न संगच्छतेऽथ त्वेतदेव विचार्यते ततः पूर्वं नोपन्यसितव्यम्। अपि च— § 3879

भेदे च दृष्टसामर्थ्यौ समप्राधान्यसिद्धये।
कथं शब्दान्तराभ्यासौ हेतुत्वेनोपवर्णितौ॥ § 3881

शब्दान्तरत्वादभ्यासाच्च भेदस्तावदुच्यते समप्रधानत्वमप्येताभ्यामेव प्रतिपाद्यत इत्यपूर्वा युक्तिः। न वाऽधिकरणद्वयशरीरस्य विविक्ताः पक्षहेतवो
474 दृश्यन्ते येन तन्त्रेण विचारद्वयमिदं प्रस्तुतमित्यध्यवस्येम। तस्मादेवं समर्थयितव्यम्। इहाभ्यासलक्षणभेदातिप्रसङ्गापवादार्थमधिकरणे आरभ्यमाणे यथोदाहृतानां मध्ये द्वे एवोदाहरणे ‘य एवं विद्वान्पौर्णमासीं यजते’ ‘य एवं विद्वानमावास्यां यजत’ इति। तत्र संदेहः। किमेतौ यजतिशब्दावपूर्वयोः कर्मणोर्विधायकावुत पौर्णमास्यमावास्याशब्दाभ्यां स्वाभिधेयकालविशेषयुक्तकर्मप्रतिपादकाभ्यां विशेष्यमाणौ प्रकृतानेव कांश्चिद्यागाननुवदत इति। तत्रेतरेषामाग्नेयादीनां गुणात्प्रयाजादीनामभ्यासादाघारादीनां शब्दान्तरत्वात्सिद्धे भेदेऽधिकरणपक्षद्वयप्रयोजनभूतसमप्रधानभावाङ्गाङ्गिभावविषयत्वेनोपन्यासो नाधिकरणशरीरविषयत्वेन। न हि समप्रधानत्वमङ्गाङ्गिभावश्चाधिकरणपक्षावित्युक्तम्। तदिह पौर्णमास्यमावास्यासंयुक्तयोर्विधातृत्वं तदभिधेयकर्मभेदः समस्ताघारादीनां समप्राधान्यमित्येतत्त्रयमुत्तरोत्तरफलत्वेनाविनाभावसंबन्धादेकः पक्षः, तथा तयोरनुवादत्वं तद्वाच्यकर्माभेद आग्नेयादीन्प्रत्याघारादीनामङ्गत्वमिति तेनैव प्रकारेणापरस्त्रिकः। त्रितयस्य त्रितयस्य च स्वांशाविनाभावादेकसिद्ध्यैवेतरद्वयसिद्धिर्भवतीति पक्षद्वयेऽपि यदेव साधितं तेनैवेष्टसिद्धिं मत्वा फलभूतस्तृतीयस्तृतीयोंऽश उपन्यस्तः। तत्र चार्थगृहीतावपि भेदाभेदौ विस्पष्टीकरणार्थं पुनरन्ते दर्शितौ। किमर्थं पुनरादौ व्यवहितयोः समप्रधानाङ्गाङ्गिभावद्वारेण भेदाभेदयोरुपन्यासः कृतः। एषा ह्याचार्यस्य शैलीति केचित्। तथा हि पूर्वाधिकरणयोरप्यपूर्वभेदमेवोपन्यस्तवान्। अथ वा यल्लिङ्गदर्शनं वक्ष्यति विकृतौ प्रयाजादयो दृश्यन्त इति तत्साक्षाद्भेदनिराकरणायासमर्थं समप्रधानभावं निराकरिष्यति, तन्निराकरणे च सत्यविनाभावाद्विधिभेदावपि निराकृतावेव भवत इति तदुपजीवनायेत्थमुपन्यासः। केवलभेदोपन्यासे तु तदसंबद्धमेव स्यात्। तत्र द्वेधा पूर्वपक्षो भविष्यति। एकः समप्राधान्यद्वारेणाऽऽग्नेयादीनां कर्मविधित्वे सत्येव पौर्णमास्यमावस्यासंयुक्तयोस्तद्व्यतिरिक्तकर्मविधानात्, अपरः पुनस्त-

१ ते] (अ° ४ पा° ४ अ° ११ सू° २९)
५ न] चिन्ताद्वयमेकस्मिन्नधिकरणे न वक्तुमुचितमित्याशयः।

योरेव कर्मविधित्वमितरेषां तु गुणविधानार्थत्वमित्येवं, प्रथमं तावद्व्यतिरेकपक्षं परिगृह्णाति शब्दान्तरत्वादभ्यासाच्च समप्रधानानीति। यद्यपि चैतौ हेतू साक्षात्समप्रधानत्वेन न संगच्छेते तथाऽपि तत्प्रतिज्ञानेन योऽर्थाद्भेदः प्रतिज्ञातस्तेन संबन्धादेकवाक्यत्वम्। एतदुक्तं भवति। अयागेभ्यः शब्दान्तरत्वाद्यागेभ्यश्चाभ्यासाद्भेदस्ततश्च समप्रधानानीति। न च समस्तानुवादस्य किं 475
चित्प्रयोजनमस्ति। न च गुणफलनिमित्तानां किंचिच्छ्रूयते यत्र विधिव्यापारतः कर्मस्वरूपविधानमुपेक्षेत। न चैषा संज्ञा केषु चित्प्रकृतेषु प्रसिद्धा। वर्तमानापदेशेऽपि च सति प्रयोगवचनार्थवादपञ्चमलकारादीनामन्यतमेन 'समिधो यजति' इत्यादिवद्विधिः। सत्यपि च यच्छब्दोपबन्धे "यदाग्नेयोऽष्टाकपाल" इत्यादिवत् विधिशक्त्यनवलोपः। न च शाखान्तरीयवद्विधिविकल्पः। शाखान्तराणां पुरुषान्तरं प्रति प्रतिपादनेनार्थवत्त्वात्। न ह्विह कर्मान्तरकल्पनादन्यत् प्रयोजनमस्ति। न च कस्य चिदन्यस्य विधेः स्तुतिः संभवति एकवाक्यत्वाभावात्। किं पुनरनयोः कर्मणोर्द्रव्यदेवतम्। तदुच्यते— § 3882

ध्रौवं साधारणं द्रव्यं देवता मान्त्रवर्णिकी।
रूपवन्तावतो यागौ विधीयेते पृथक्तया॥ § 3884

"सर्वस्मै वा एतद्यज्ञाय गृह्यत"* इति सर्वार्थत्वाद्यथैवोपांशुयाजस्य ध्रौवाज्यद्रव्यकत्वमेवमनयोरपि यागयोः। तथाऽऽज्यभागयोः क्रमे चतस्रोऽनुवाक्याः पठ्यन्ते। द्वे आग्नेय्यौ द्वे सौम्यौ। ते बलीयसा वाक्येनावच्छिद्यानयोः कर्मणोर्विधीयेते "वार्त्रघ्नी पौर्णमास्यामनूच्येते" "वृधन्वती अमावास्यायाम्"* इति। न हि पौर्णमास्यमावास्याशब्दाभ्यामेतत्कर्मव्यतिरिक्तमन्यदिहोच्यते। ननु कालवचनावेताविह प्रयुज्येते। किं कालस्य मन्त्रसंबन्धेन। दृष्टश्च सप्तमीनिर्दिष्टानां कर्मणां प्रधानभावस्तद्यथा "येन कर्मणेर्त्सेत्तत्र जयां जुहुयात्" इति। तेनानुवाक्याद्वयस्य तुल्यार्थतया विकल्प्यमानस्यानुरूपा याज्याऽपि कल्पयितव्या। अथ वा युगपद्विधानात्समुच्चये सति द्विदेवत्यकर्माध्यवसायाद् द्वे द्वे याज्ये अपि कल्पयितव्ये। यद्वैकैवाग्नीषोमदेवत्या। अथ वा वार्त्रघ्न्योरेवैका याज्या कर्तव्या तथा वृधन्वत्योः। अतश्च श्रुतिविहितमन्त्रकर्मसंबन्धान्यथानुपपत्त्याऽग्नीषोमौ देवतोभयत्राध्यवसीयते। आज्यभागयोस्तु पुराकल्पसरूपेण वाक्येन देवता तावत्प्राप्तैव। 'यस्यै कस्यै चिद्देवतायै हविर्निर्वपन् आज्यस्यैव नौ पुरस्ताद्यजन्' इति। याज्याप्राप्तिश्चाबाधितैवानुवाक्यागमश्च दाशतयीभ्यः कर्तव्य इति न किंचिद्विरुद्धम्। तस्मादस्ति कर्मान्तरत्वेऽपि रूपमिति भेदोऽतश्च समप्रधानानि। भेद इति गृह्णीमः समप्रधानत्वं तु न मृष्यामहे। कुतः। § 3885

निवेशः केषु चित्त्वेव पृथक्त्वेनाभिधानयोः।

---

१६ *] तै. ब्रा. (३-३-५)    २० *] तै. सं. (२-५-२)

फलं च तद्विशिष्टेभ्य इति साम्यं न युज्यते॥§ 3887

476 दर्शपूर्णमासाभिधाने हि विशिष्टयागवाचिनी, तेन तन्मात्रस्यैव फलत्वादितरेषां तत्संनिधानादङ्गत्वेन भवितव्यम्। अत्राभिधीयते— § 3888

प्रसिद्धेनाप्रसिद्धस्य नित्यमिष्टं विशेषणम्।
तस्माद्यज्यनुरोधेन नामार्थोऽत्र निरूप्यते॥§ 3890

सर्वत्र नामयुक्तकर्मविधाने सामानाधिकरण्यात्कदाचिद्यज्यर्थविशेषो नाम्ना निरूप्यते कदा चिन्नामार्थो यजिना। यो यत्र पूर्वतरप्रसिद्धार्थो भवति स इतरं स्वविषये स्थापयति। यथा ज्योतिष्टोमेनेत्यत्र ज्योतिर्भिस्त्रिवृदादिभिः स्तोमैर्योगात्प्रसिद्धार्थेन नाम्ना दक्षिणीयादिभ्यो यजिर्निवर्त्य सोमयागे स्थाप्यते। तथा राजसूयेनेत्यत्र नाप यागायागविषयत्वेनोपप्लवमानं प्रकृतयागप्रसिद्धेन यजिना स्वविषयं नीयते। तदिह प्रातिपदिकद्वयसमासद्विवचनार्थानां दर्शपूर्णमासपदोपात्तानां न क्वचित्प्रसिद्धिरस्ति यया यजेस्तद्विषयत्वं विज्ञायेत। यजिः पुनर्यागमात्रे प्रसक्तः सन्नधिकारेण प्रकृतेषु स्थापितः शक्नोत्यप्रसिद्धं दर्शपूर्णमासशब्दं स्वविषये नियन्तुम्। ततश्च दर्शपूर्णमासाभ्यामित्यविवक्षितावयवसमासार्थद्वित्वं वर्णलोलीभावमात्ररूपेण केवलकरणसंवादिप्रकृताशेषयागनामत्वं राजसूयशब्दवत्प्रतिपद्यते। 'सुपां सुपो भवन्ति' इति बहुवचनस्य स्थाने द्विवचनं समस्तसमुदायगतैकवचनस्य वा। कथं पुनर्दर्शपूर्णमासाभ्यामित्यप्रसिद्धम्। यदा तावत्— § 3891

वाच्यकालयुजो यागाः प्रकृताः सन्ति के चन।
द्विसंख्योत्पत्तियुक्ताश्च प्रसिद्धिर्येषु विद्यते॥§ 3893

तन्नामाशेषस्वार्थपरित्यागेनात्यन्तपरानुरोधिवृत्तिं भजते यत्र कश्चिदप्यंशोऽप्रसिद्धः। इह तु दर्शेन कालेन पौर्णमासेन च संयुक्ता आग्नेयादियागा विद्यन्ते। द्वित्वयुक्ताश्चाऽऽज्यभागादयस्तेषामयुक्तः परित्याग इति। तदुच्यते। § 3894

प्रकृतिप्रत्ययौ पूर्णौ विशेष्टुं यजतिं क्षमौ।
आग्नेयाद्याज्याभागादावेकत्रैकार्थशून्यता॥§ 3896

यद्यप्याग्नेयादिषु स्वाभिधेयकालयोगात्प्रातिपदिकं वर्तेत तथाऽपि तेषां बहुत्वाद् द्वित्वानुपपत्तेरसमर्थं पदं, यत्रापि द्वित्वमस्त्याघारयोराज्यभागयोर्वा तत्रापि प्रातिपदिकस्यात्यन्तमशक्तिः। न चार्थप्रकरणशब्दान्तरैर्विस्पष्टं सामानाधिकरण्यमस्ति, येन केन चिद्वर्णसामान्यादाख्याविकारन्यायेन गौणत्वेन वा तद्विषयत्वमध्यवसीयेत। कस्मात्पुनरिमावेवापूर्वौ पूर्णमास्यमावास्यासंज्ञकौ द्वौ यागौ फलाय न विधीयेते। तथा हि। § 3897

१५ लोलीभा ] समुदायशक्त्या—रूढ्येत्यर्थः।

सिद्धान्तेऽपि तु यादृग्भ्यां शब्दाभ्यामनुकीर्त्तितौ।
तावेव समुदायौ द्वौ विधास्येते फलं प्रति॥§ 3899

यदि कश्चिद्दर्शपूर्णमासशब्दयोः पौर्णमास्यमावास्याशब्दयोश्च वैलक्षण्यान्न 477 पूर्वकर्मप्रत्यभिज्ञानं फलवाक्येऽस्तीति ब्रूयात्स वक्तव्यस्तुल्यस्ते दोषोऽयमिति। तवापि हि पौर्णमास्यमावास्यासंज्ञकावेव समुदायौ फलवन्ताविष्टौ। न च तयोः प्रयोगवाक्येऽस्ति शब्दत्वात्प्रत्यभिज्ञानम्। अथ तत्र विनाऽपि संज्ञानुसारेण कालयोगाद्वृत्तिरिष्यते स ममाप्यस्त्येव कालयोगः "पौर्णमास्यां पौर्णमास्या यजेत" "अमावास्यायाममावास्यया यजेत" इति। नैतदेवम्। एवमपि हि— § 3900

षण्णामग्न्यादियागानामनयोश्च द्वयोरयम्।
समानः कालसंयोगं इति नेष्टावधारणा॥§ 3902

न ह्यष्टानां कालसंयोगे सत्यवधारणे हेतुरस्ति, येनानयोरेव फलसंबन्धः स्यात्। स्यादेतत्। एतेषां मध्ये ययोः कयोश्चित्फलसंबन्ध इति। तदयुक्तम्। § 3903

विशेषहेत्वभावे हि ग्रहणं निष्प्रमाणकम्।
पक्षे वाऽङ्गप्रधानत्वं विरोधान्न विकल्पते॥§ 3905

विना विशेषहेतुना यागत्वकालसंबन्धसाम्ये सति यावेव गृहीतौ तत्रैवेतरेषां प्राधान्यप्रामाण्यभाजां सतामङ्गत्वापादनाद् विरुद्धता स्यात्। अथ विकल्पेन सर्वेषां पाक्षिकोऽनुग्रहः कल्प्येत तत्रापि तस्यैव कदा चित्प्रधानत्वं कदा चिदङ्गत्वमिति विप्रतिषिद्धम्। उभयात्मनां चाङ्गतया प्रवृत्तेः प्रधानत्वेन च निवृत्तेराग्नेयादीनां विकृतिगमने यावज्जीवं संशयप्रसङ्गः। सर्वसंख्याश्च केन चिदवान्तरसामान्यावच्छेदेन संख्येयेषु वर्तन्ते। न वाऽपूर्वयोराग्नेयादीनां वा समस्तानामेकदेशे वा किंचिदवान्तरसामान्यं दृश्यते येन द्वित्वमवधार्येत। य एव हि गृहीतस्तस्यैव यागान्तरापेक्षयोद्भूतेन बहुत्वेन केवलात्मापेक्षेण चैकत्वेन द्वित्वं बाध्यते। ततश्च द्विवचनस्याप्रसिद्धिः। सिद्धान्ते तु शब्दद्वयेन समुदायद्वयापादनादसमुदायीकृतयागवैलक्षण्यादवान्तरधर्मयोगात्संभवति द्वित्वयोगस्तद्वशेन च कालयोगात्कथं चिद्दर्शपूर्णमासप्रातिपदिकयोरपि वृत्तिसिद्धिरित्युपपद्यते यागविशेषणत्वं न तु पूर्वपक्षे समुदायत्वापादनाभावात्संख्यावृत्तिरिति प्रकृतयागमात्र एव फलसंबन्धः। अथ कस्मादष्टावेव यागाः पौर्णमास्यमावास्याकालगतद्वित्वापेक्षया लब्धविशेषणाः सन्तो न विधीयन्ते। यथा सिद्धान्ते समुदायगतद्वित्वापेक्षया षड् विधास्यन्ते। नेदृशेनास्फुटेन प्रकृतयागमात्रावलम्ब्याऽऽख्यातं शक्यं निवर्तयितुम्। न चात्यन्तव्यतिरेकात्कालगता संख्या यागसामानाधिकरण्यनिर्देशार्हा भवति। समुदायसमुदायिनोस्त्वव्यतिरेकादविरुद्धः संख्यासंबन्धः सिद्धान्ते। तस्मात्पूर्वपक्षे यजिवशेनैव नाम-

पदवृत्तेरविशेषेण सर्वे यागाः समप्रधानाः। तथा प्राप्तेऽभिधीयते। प्रकर-
478 णं पौर्णमास्यमावास्यासंयुक्तयोरालम्बनं स्यात्। प्रक्रियत इति प्रकरणम्।
अथ वा प्रकरणं तयोः सहकारि भवेत्ततश्च तन्मात्रप्रतिपाद्योऽर्थो ग्रहीतव्यः।
कुतः— § 3906

विधायको नियुङ्क्ते हि सर्वोऽसाधारणे यजौ।
न च तत्र प्रवृत्तिः स्यादज्ञातद्रव्यदेवते॥ § 3908

न ह्यनेन यजिना पौर्णमास्यमावस्यापदाभ्यां वा यागमात्रे बुद्धिः क्रिय-
ते। न च प्रकृतकर्मग्रहणं त्वत्पक्षेऽस्ति। तत्राज्ञातरूपे सत्यपूर्वे कर्मणि न
कथंचित्प्रवर्तेत। ततश्च वाक्यमेवानर्थकं भवेत्। प्रकृतग्रहणे तु तेषां द्र-
व्यदेवतायोगादेतत्कालवर्तित्वाच्च रूपज्ञानादर्थवत्त्वम्। ननूक्तं मत्पक्षेऽप्यस्ति
द्रव्यदेवतमिति। सत्यम्। § 3909

यथाकथं चिल्लभ्येत द्रव्यं साधारणं स्थितम्।
तथाऽपि देवता नास्तीत्यरूपत्वान्न मुच्यते॥ § 3911

न हि मान्त्रवर्णिकी देवता संभवति। मन्त्राणां क्रमविशेषेणाऽऽज्य-
भागार्थत्वात्। न चास्य वाक्येन बाधः। विरोधभावात्। सर्वत्र ह्यविरोधेन
वाक्ये निविशमाने विरोधपक्षस्त्यक्तव्यः। इह च पौर्णमास्यमावास्याशब्दौ
यदि कर्मवचनावेव स्यातां ततो न विरोधः परिह्रियेत। कालवचनत्वे त्वन-
योरविरोधः। साधारण्याच्चाविरोधपक्ष एव समर्थनीयः। किं च। § 3912

प्रथमं काल एवाऽऽभ्यां शब्दाभ्यां प्रतिपाद्यते।
पश्चात्तत्कर्म तद्योगादतः कालोऽत्र गृह्यते॥ § 3914

यदि हि सर्वलोकप्रसिद्धः कालोऽत्र न समवेयात्ततस्तदतिक्रमेण कर्मणी
गृह्येयाताम्। अपि चोपपन्नतरा कालवचनत्वे सप्तमी, तस्य सर्वत्रैव काल-
स्याधिकरणत्वान्न कर्मणोऽधिकरणत्वानुपपत्तेर्यथा कथं चित्कल्पनीयं स्यात्।
यत्तु किं कालस्य मन्त्रसंबन्धेनेति, यदि तादर्थ्यलक्षण एवैकः संबन्धो भवेत्स
चात्रास्माभिरुच्येत तत एवं युज्यते वक्तुम्। इह त्वाज्यभागौ प्रति ताद-
र्थ्ये व्यवस्थिते संकरे च प्राप्ते कालभेदेन प्रयुज्यमानयोर्मन्त्रयोर्व्यवस्थामात्रं
क्रियते वार्त्रघ्नी पौर्णमासीस्थयोराज्यभागयोर्वृधन्वती अमावास्यास्थयोरिति।
किं च। § 3915

प्रज्ञातदेवतत्वाच्च दृष्टार्थाऽल्पविधानता।
मत्पक्षे भवतस्त्वत्र प्रसक्ता बहुकल्पना॥ § 3917

479 सर्वत्रैवाऽऽकाङ्क्षापूर्वकः संबन्धो भवति। आज्यभागौ च प्रज्ञाताग्नीषोम-
देवत्यौ तदभिधानसमर्थमन्त्राकाङ्क्षित्वादयत्नेन मन्त्रान् गृह्णीतः। त्वत्पक्षे त्व-

१६ इह] वार्त्रघ्नी पौर्णमास्यामनूच्येते, वृधन्वती अमावास्यायामित्यनयोर्वाक्ययोरित्यर्थः।

पूर्वयोः कर्मणोरज्ञातदेवत्वान्न मन्त्रापेक्षा। ततश्च मन्त्रतद्विशेषद्वित्वादिकल्पनादनपेक्षितानेकार्थविधिप्रसङ्गः। पुनश्च मान्त्रवर्णिकानेकदेवताकल्पना। न ह्येकस्य कर्मणोऽनेकया देवतयाऽनेकयाऽनुवाक्यया कार्यमस्ति। पुनश्चाश्रुतयाज्याकल्पनाश्रयणमाज्यभागयोश्चाश्रुतपुरोनुवाक्याकल्पनम्। यच्चैका याज्यैका चाऽनुवाक्या भविष्यतीति। न तत्। अनुवाक्यासमाख्याबाधात्। अपि च त्वत्पक्षे लिङ्गस्याविनियोजकत्वाद्वाक्ये च करणत्वेनाऽऽश्रयणात् “वैष्णवीमनूच्य” इत्यादिवददृष्टार्थप्रसक्तेर्न प्रकाशकता, प्रकाश्येनानपेक्षितत्वात्। मान्त्रवर्णिकदेवताकल्पनातश्च वरमारादुपकारकत्वम्। आज्यभागयोः पुनर्द्वित्वात्प्रज्ञातद्विदेवतत्वाच्च प्रकाश्याकाङ्क्षिताः प्रकाशका मन्त्रा लिङ्गक्रमविनियुक्ताः सन्त एकान्तेन दृष्टार्थतां प्रतिपद्यन्ते। तत्र च मन्त्रतद्विशेषद्वित्वादिषु प्राप्तेषु कालद्वारेण व्यवस्थामात्रविधानाल्लाघवं वाक्यस्य, न वाऽऽनर्थक्यम्। न हि संनिधानाद्व्यवस्था सिद्धा। तस्मान्न देवताविधिरसंबन्धात्। अतश्चारूपत्वादकर्मान्तरता। किं पुनः समस्तानुवादस्य प्रयोजनं, पश्य— § 3918

पदतद्भागवाक्यार्थविधिशून्या हि चोदना।
धर्मं प्रत्युपयोगित्वं न कथं चित्प्रपद्यते॥ § 3920

उच्यते। § 3921

यथैवोत्पत्तिवाक्यानां प्रयोगवचनाङ्गता।
तथैव तदुपादानाद् द्वित्वसिद्ध्याऽनयोरपि॥ § 3923

वाक्यद्वयेन हि समुदायद्वये कल्पिते दर्शपूर्णमासाभ्यामिति द्विवचनं सिध्यतीत्यर्थवत्त्वम्। न हि विधिरेवैकः प्रयोजनवानिति कश्चिन्नियमहेतुरस्ति। अविधेरपि विधिशेषत्वेनार्थवत्त्वात्। न वाऽत्र विप्रकीर्णानामाग्नेयादीनामेतद्वाक्यद्वयमन्तरेण द्वित्वसंख्यायोगित्वं संभवति। एतदेव चाभिप्रेत्यास्य पक्षस्य प्रयोजनमेव गुणप्रधानत्वमादित उपन्यस्तम्। इतरथा हि ‘अविशेषादनर्थकं हि स्यात्’* इत्यस्योत्तरमपरिकल्प्यानुवादपक्षो दुरुपन्यास एव स्यात्। त- 480
स्मादस्ति प्रयोजनं समस्तवाक्यानुवादेऽपीत्यदोषः। कथं पुनरत्यन्तभिन्नानां कर्मणां समुदायीकरणं शक्यं, शक्यमिति ब्रूमः। § 3924

एककालाभिसंयोगाद्भिन्नानामपि कर्मणाम्।
समुदायार्पणं शक्यमेकदेशस्थवृक्षवत्॥ § 3926

यथैव ह्येकदेशावस्थितान्वृक्षानालोच्य वेनमिति समुदायबुद्धिर्भवत्येवमेककालयुक्तकर्मसमुदायनामधेयबुद्धिः। तद्गतैकत्वावधारणाच्च पौर्णमासीमित्येकवचननिर्देशः। समुदायिवचनावेव चैतौ तल्लक्षितसमुदायगतसंख्याद्वारेणैकवचनान्तत्वं बिभ्राते। न समुदाययोरेव नामधेये भवतः। तथा हि। § 3927

२४ *] (अ. २ पा. २ अ. २ सू. २)

सामानाधिकरण्येन यागनामत्वनिश्चयः।
समुदाये च यागत्वं नाऽऽग्नेयादिष्ववस्थितम्।§ 3929

“पौर्णमासीं यजते” इति यजिसामानाधिकरण्याद्यागनामधेयमेतदिति गम्यते। न चाऽऽग्नेयादीनां समुदाये यागत्वं समवेतं, किं तर्हि। प्रत्येकमाग्नेयादिषु। तस्माद्यथैवेतेषु प्रत्येकं यजिरेवं नामधेयमपि। न च समुदायोत्पत्तिरेकेन कालेन युक्ता। आग्नेयादीनामुत्पत्तिकाले परस्परानपेक्षत्वेन समुदायत्वानुपजननात्। ततः कालवशेनापि प्रत्येकं नामधेयमिति शक्यं वक्तुम्। यदि च समुदायिनैरपेक्ष्येण समुदाययोरेते नामनी स्यातां ततः प्रयोगवाक्येनापि समुदायौ फले विधीयेयातां, ततोऽवयवानामसाधनत्वात्समुदायादेकमपूर्वम्। अतश्च प्रत्येकापूर्वाणामभावात्कर्मभेदवैयर्थ्यप्रसङ्गः। सर्वधर्माणां चैकापूर्वनिबन्धनत्वात्संकीर्णवृत्तित्वं स्यात्। न च प्रत्येकमितिकर्तव्यतयाऽऽग्नेयादयः संबध्येरन्। ततश्च तद्गततन्त्रावृत्तिप्रयोगादिविचारासंबद्धत्वं भवेत्। न च प्रत्येकविकारे सौर्यादौ समस्तेतिकर्तव्यतातिदेशः स्यात्सहस्रादिशब्दवद्यावयववृत्त्यभावादेकपुरोडाशा पौर्णमासी, सांनाय्यरहिताऽमावास्येत्येवमादिव्यवहारोच्छेदप्रसङ्गः। संघातस्याचोदितत्वात्संघातस्य गुणत्वादित्येवमादिषु स्पष्टमेवंप्रकाराणां समुदायिवचनत्वमभ्युपगतम्। इतरथा हि स एव शब्दाभिहितत्वाच्चोद्येत फलसंबन्धाच्च प्रधानं भवेत्। तस्मादुपसर्जनीभूतसमुदायाः समुदायिन एवाभिधीयन्ते। तेषां तु बहुत्वाद् बहुवचनप्रसङ्गेन लक्षणयैकवचनयोग इत्यभिप्रेत्य **समुदायशब्दतयाऽवकल्पिष्यत इत्याह। तथा च भवति हि बहूनामेकवचनान्तः समुदायापेक्ष** इति—अपेक्षामात्रमेव समुदायस्य ब्रवीति नाभिधेयत्वम्। यूथवनशब्दावपि यदा समुदायोपसर्जनसमुदायिवचनौ तदा साकल्येन दृष्टान्तौ, यदा तु स-
481 मुदायमेव ब्रूतस्तदा तन्निमित्तैकवचनलाभमात्रेण दृष्टान्तत्वम्। एतेन दर्शपूर्णमासशब्दावेतत्पर्यायौ व्याख्यातौ। तस्मादस्ति समुदायद्वित्वापेक्षानिमित्तैकत्वद्वयप्रत्ययसिद्धिः समुदायानुवादप्रयोजनम्। यथा वक्ष्यति ‘पृथक्त्वेनाभिधानयोर्निवेश’ इत्यत्र। तद्द्वित्वानुसारिणौ हि दर्शपूर्णमासशब्दौ तद्विषयौ भवतः। अस्ति च पौर्णमासीपूर्णमासशब्दयोर्बहु सारूप्यं, तत्साहचर्याच्च दर्शशब्दस्यामावास्याविषयत्वं, विपर्ययहेतुत्वेन वा लघीयस्येव प्रतिपत्तिर्यथा काण इति चक्षुष्मान्। तथा च वक्ष्यति शक्यते च चन्द्रमसोऽदर्शनाद्दर्श इति वक्तुम्। तथाऽन्वारम्भणीयावाक्यशेषेऽमावास्यादर्शशब्दौ समानाधिकरणौ दर्शयिष्यति, तेन समुदायद्वयोपलक्षितानां फलवत्त्वादितरेषामङ्गत्वम्। ननु चैवं सत्यनेनैव गतत्वाच्चतुर्थेऽधिकरणं नाऽऽरब्धव्यम्। नैष दोषः। स्थिते ह्येतस्मिन्प्रकृतयजतिमात्रग्रहणात्तत्र पूर्वः पक्षः, सिद्धान्तस्त्वेतदधिकरणप्रसादाद्भविष्यति’ इतरथा तस्य पूर्वपक्ष एव स्यादिति प्रयोजनत्वेनाभिधानम्। इदमपरं

२५ ति] ( अ० ४ पा० ४ अ० ११ सू० ३४ )

समुदायानुवादप्रयोजनं पौर्णमास्यां 'पौर्णमास्या यजेत' 'अमावास्यायाममावास्यया यजेत' इति कालसंयोगः। तत्रैतत्स्यात्। एतदपि वाक्यमनर्थकमुत्पत्तिवाक्यादेव कालसंयोगसिद्धेरिति। उच्यते। § 3930

अन्यथैव ह्ययं कालः करणांशेन युज्यते।
अन्यथोत्पत्तिवाक्यस्थो निरपेक्षैः परस्परम्॥§ 3932

उत्पत्तिवाक्ये ह्यन्योन्यनिरपेक्षाणामाग्नेयादीनां निरङ्गानां च कालसंयोगस्तद्रूपत्वेनोपादानात्। अयं पुनस्तृतीयासंयोगात्करणभूतानाम्। तेषां च करणत्वं प्रयोगवाक्यादितरेतरयुक्तानामङ्गसहितानां चावगतमिति तादृशानां तदनुपादेयं, कालं प्रत्युपादीयमानत्वात्। समस्तरूपविवक्षावशेन साङ्गस्त्रिकः परस्परसहितश्चैकपौर्णमास्या युक्त एकया चामावास्ययेति। यस्मिन् क्षण एको याग आरभ्य क्रियमाणः समाप्तिमनुभवति तस्मिन्नेवेतरावित्यवधारणात्रिकस्य त्रिकस्य तन्त्रेण प्रयोगः सिद्धो भवति। औत्पत्तिककालानुरोधे तु भेदेनाङ्गवियुक्तानां च प्रयोगः स्यादित्यस्ति विशेषः। ननु चैवं सति समुदायद्वयस्येतरेतरयुक्तस्य करणत्वान्नाङ्गसाहित्यवन्न परस्परतद्विवक्षाऽपीति यथैवाङ्गानां तत्कालविज्ञानमेवं पौर्णमास्याऽमावास्याऽऽक्षिप्ता, अमावास्यया च पौर्णमासीत्युभयोरुभयत्र प्रसङ्गः, न वोत्पत्तिवाक्यशिष्टकालविरोधस्तत्राप्यनुष्ठानात्। न हि यः पौर्णमास्याममावास्यां करोति तेनामावास्यायाममावास्या न कृता भवति, तथा पौर्णमासी। न चोत्पत्तिवाक्येन कालान्तरं निषिद्धं, स्वकालप्रतिपादनमात्रोपक्षयात्। अत्रोच्यते— § 3933

कालो यस्य न विज्ञातः स्वरूपं च न नश्यति। 482
तस्य कालः परोपाधिरुच्यमानो न दुष्यति॥§ 3935

अमावास्य ह्युत्पत्तिकालनिराकाङ्क्षा पौर्णमासीसाहित्यलभ्यं पौर्णमासीकालं न प्रतीच्छत्येवं पौर्णमास्यमावास्याकालमित्येतयोः समुदाययोः कालान्तरकरणे सत्यौत्पत्तिकरूपविसंवादाददर्शत्वमपूर्णमासत्वं च स्यात्। अङ्गानां त्वनिर्ज्ञातकालत्वेन साकाङ्क्षत्वादुत्पत्तिविसंवादाभावाच्चाविरुद्धः साहित्यापेक्षलभ्यः कालः। आह— § 3936

अङ्गानां मुख्यकालत्वाद्वाक्यादस्माद्विनाऽप्ययम्।
कालोऽस्त्येवेति नैतस्य वचसोऽत्र निमित्तता॥§ 3938

उच्यते— § 3939

मुख्यकालत्वमङ्गानां न स्थितं मान्त्रवर्णिकम्।
इदमेव हि तद्वाक्यं यद्बलेनैतदुच्यते॥§ 3941

---

१४ त्वान्ना ] नञ् द्वयं समुदायद्वयसाहित्यविवक्षादार्ढ्यद्योतकं विज्ञेयम्।

ननु दूरस्थान्युपकर्तुं न शक्नुवन्ति। संनिकृष्टस्थैरुपकर्तव्यमित्येतद्वा कुतः। सर्वत्र वचनानुसारेणोपकारानुपकारांशौ विज्ञायेते। तत्र संनिकर्षवचनाभावे विप्रकृष्टं नोपकरोतीति न किंचित्प्रमाणम्। ननु चान्येनैव वाक्येनैष तन्त्रप्रयोगः सिध्यति, 'य इष्ट्वा पशुना सोमेन' इत्यादीनां तत्रापि करणविभक्तिनिर्देशादिष्टेः स्वसमुदायिस्वाङ्गसहितायाः कालं प्रत्युपादानादीदृशी विवक्षा लभ्यते। सत्यं लभ्यते नत्विष्टः प्रयोगः सिध्यति। तथा हि— § 3942

इष्टिशब्दः समस्तं वा प्रत्येकं वाऽवलम्बते।
न तावत्त्रिकमित्येकमन्यादृक् चेष्टितं भवेत्॥§ 3944

न तावत्त्रिकस्येष्टिशब्देन ग्रहणमित्यवधार्यते। तत्र प्रत्येकं यागत्वेनेष्टिशब्दप्रवृत्तेरेकैकस्याममावास्यायां पौर्णमास्यां वा प्रयोग इति न सम्यक्प्रयोगसिद्धिः। अथ समस्तानामाग्नेयादीनां कथंचिद्रूढेः 'प्रवृत्तत्वादिष्टेः सोमे प्रवृत्तिः'* इतिवद् ग्रहणम्। एवमपि प्रयोगवचनैकत्वात्समुदायद्वयस्यापि पौर्णमास्याममावास्यायां वाऽनुष्ठानं स्यात्। तत्र स एवोत्पत्तिशिष्टकालविरोधः। तदनुरोधेन व्यवस्थितविकल्पाश्रयणमिति चेत्। एवमपि यथोत्पत्त्यनुरोधात्प्रत्येकानुष्ठानप्रसङ्गः। तथाऽङ्गानां भेदेन पौर्णमास्यमावास्ये प्रत्युपादानाभावाद्यत्र क्व चनैकत्र प्रदेशेऽनुष्ठानं स्यात्। तस्मान्नैतद्वाक्यं ताभ्यां तुल्यार्थमिति प्रकृतावकिंचित्करत्वाद्विकृतीरेव सद्यस्कालतायै गच्छति। नन्वनेन तन्त्रप्रयोगः सिध्येत् "समे दर्शपूर्णमासाभ्यां यजेत" इति देशस्यानुपादेयत्वात्साहित्यविवक्षोपपत्तेः। तत्रोच्यते। § 3945

483 समस्य केवला चैव तन्त्रता प्रतिपाद्यते।
तेन सर्वैरसावेको ग्राह्यो न बहवः समाः॥§ 3947

भेदेनापि हि प्रयुज्यमानानामनन्यदेशगमनमात्रेण देशतन्त्रत्वसिद्धिः। अथेतरेतरयोगवशाद्यदैवैकः समेन यागो युज्यते तदैवेतरोऽपीति तन्त्रत्वमुच्यते। तथा सति षण्णामपि युगपदुपादानात्तथैव प्रयोगप्रसक्तेः स एव विरोधः। यदि पुनरुत्पत्तिवाक्यानुरोधेन प्रवर्तते ततः प्रत्येकं कालसंयुक्तानां समं प्रति साहित्यं संपादनीयमिति षड्स्वेव पौर्णमास्यमावास्यासु प्रयोगः समाप्येत। अङ्गानि च तावतः कालादनुत्कृष्यमाणानि प्रयोक्तव्यानीति यत्र क्व चनान्तराले क्रियेरन्। अथ वा प्रतिप्रधानावृत्तेर्न्याय्यत्वादेकैकं प्रधानं साङ्गमपवृज्येत। अथ तु यावतोत्पत्तिकालो विरुध्यते तावन्मात्रं परिहाय यौगपद्येन समसंबन्धः कर्तव्य इत्यवधार्येत तत एकस्यामेव पौर्णमास्याममावास्यायां वा त्रिकयोः प्रयुज्यमानयोर्यस्य कस्यचित्समीपेऽङ्गानि प्रयुज्येरन्। अथ वा तदर्धमासान्तराले यत्र क्वचनाहनि। सर्वो ह्यसौ प्रधानकालः, प्रधानकालाबहिर्भावश्च संभावयितव्यो नात्यन्तसामीप्यमशक्यत्वात्त-

१२ *] ( अ॰ ८ पा॰ १ अ॰ २ सू॰ ३
)

स्मान्नैतेनाप्यभिप्रेतप्रयोगसिद्धिः। अनेनैव फलवाक्यमपि प्रत्युक्तं, फलस्यापि देशवदेवानुपादेयत्वात्सर्वानितरेतरयुक्तान्साङ्गान्प्रति तन्त्रत्वे सिद्धे न प्रयोगतन्त्रत्वसिद्धिः। विप्रकृष्टकालैरेव ह्येकं फलं साध्यते। अथोच्येत फलं भवद्भावयेदेतैरित्थमिति साङ्गानि प्रधानानि युगपत्फलभवनकालेऽनुष्ठातव्यानि श्रूयन्ते। ततश्च न विप्रकृष्टानीति। तत्रापि समुदायद्वयस्य युगपत्प्रयोगापत्तिर्दोषः। उत्पत्तिवाक्यानुरोधेन वा पूर्ववदेव प्रत्येकं प्रयोगादियोजना। न च फलभवनकालोऽस्मत्प्रत्यक्षः, सोऽपि हि प्रधानेतिकर्तव्यताकालेनैव परिच्छिद्यते। ततश्चोत्पत्तिकालालोचनेन यावन्तं प्रयोगकालमङ्गप्रधानानि व्याप्नुवन्ति तावानेव फलभवनकालस्तादृगेव तद्विषयं यौगपद्यमिति सर्वथा षट्सु पौर्णमास्यमावास्यासु द्वयोर्वा साङ्गानां चापवर्गः। एकसमुदायसमीपे वाऽङ्गप्रयोगोऽर्धमासान्तराले वा यत्र क्वचिदिति प्रसङ्गान्नैतद्वाक्यलभ्यस्त्रिकस्य त्रिकस्य साङ्गस्य स्वकाले प्रयोगो वाक्यान्तरात्सिध्यतीति। तस्मादर्थवान् “पौर्णमास्यां पौर्णमास्या यजेत” इति कालविधिः। नन्वेवं सत्युत्पत्तौ कालयोगोऽनर्थकः। कथमनर्थकः। पश्य— § 3948

यद्युत्पत्तौ न विद्येत यागानां कालसंगतिः।
समुदायानुवादत्वं निर्निमित्तं न लभ्यते॥ § 3950

पौर्णमास्यमावास्याशब्दौ स्वाभिधेयकालयुक्तयागानुवादाविष्येते। तदभावे
तु नैव ज्ञायेत का पौर्णमासी काऽमावास्येति। तदज्ञानादलब्धार्थद- 484
र्शपूर्णमासपदाविशेषितप्रकृतयागमात्रग्रहणात् सर्वाणि समप्रधानानीत्येतदेव स्यात्। तस्मादवश्यं भवितव्यं प्रथमं कालसंयोगेन। अत एव वोपांशुयाजस्यानुत्पत्तिवाक्यमपि सत्पौर्णमासीसंयुक्तमुदाहृतम्॥ ३॥ § 3951

यदि चैते कर्मान्तरे स्यातां तत आधारादीनि समप्रधानानि स्युः। ततश्च “कर्मणस्त्वप्रवृत्तित्वात्फलनियमकर्तृसमुदायस्यानन्वयस्तद्बन्धनत्वात्” इत्यनेन न्यायेनाऽऽग्नेयादिवत्प्रयाजादीनां करणांशोपनिपाताद्विहितकरणया विकृतिभावनया कथंभावाकाङ्क्षिण्या तत्पूरणासमर्थानामग्रहणात्प्राप्तप्रयाजानुवादेन कृष्णलविधानं नोपपद्येत। तस्मादाग्नेयगुणत्वं प्रयाजादेः कथं स्यादिति समुदायानुवादौ॥ ४॥ § 3952

पौर्णमासीमित्येकत्वं प्रातिपदिकार्थगतमेव भविष्यति न तल्लक्षितसमुदायगतम्। प्रत्यक्षश्रुतश्च यजिर्द्रव्यदेवतासंबन्धात्क्लेशेनानुमातव्यो न भविष्यति। सोऽपि वाऽनेकस्तदपूर्वमप्यनेकं, समुदायानुवादत्वाच्च विधित्वं गुणवत्तरम्। प्रयाजादिदर्शनमपि “यत्र नित्यानुवादवचनानि स्युः” इत्येवं विशिष्टविधानेन वा प्रकृतिस्थप्रयाजगुणविधिना वा सुपरिहरं मन्यमान एतावेव कर्मविधी, शेषा गुणविधय इत्यरूपतापरिहारमाह—अष्टाक-

२ श्च] ( अ॰ ८ पा॰ १ सू॰ २॰ )          )
४ पि] ( अ॰ ७ पा॰ ४ अ॰ १ सू॰ ५

पालादिवाक्येषु पौर्णमास्यमावास्याशब्दयोः कर्मवचनत्वाद्वाक्यसिद्धमेव रूपवत्त्वमिति॥ ५॥ § 3953

485 नैतेऽष्टाकपालादयो गुणविधयः। कुतः। § 3954

प्राप्ते कर्मणि नानेको विधातुं शक्यते गुणः।
अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः॥ § 3956

कर्मोत्पत्तिवाक्ये हि प्रत्ययो भावनामप्राप्तत्वाद्विधातुमुपक्रमते। सा च यावद्धात्वर्थकारकैर्न परिपूर्यते तावदनुष्ठातुमयोग्येति न विधित्वपर्यवसानं, तत्र भावनात्मांशभूतावगतकारकसामान्यान्यथानुपपत्त्याक्षिप्तविशेषोपलिप्सायां स्ववाक्योच्चारितकारकविभक्त्यन्तपदप्रतीतैर्विशेषैर्भावनामात्राकाङ्क्षिभिर्वाक्यादेव विशेष्यते। प्रतिपदं च यावत्किंचिद्द्रव्याश्रितं जातिलिङ्गसंख्यादि तत्सर्वमेकपदोपादानलक्षणश्रुतिप्रतिलब्धविशेषणविशेष्यभावमप्रतिपन्नपरस्परशेषशेषित्वं विभक्तिश्रुत्यैव कारकात्मना भावनार्थत्वं प्रतिपद्यते। एवं यावन्ति पदानि संनिकर्षविप्रकर्षस्थानि तानि सर्वाण्यनुषङ्गाधिकरणोक्तेन मार्गेणानादृत्य संनिकर्षविप्रकर्षौ युगपत्संनिपतन्ति। ततः सर्वविशेषणविशिष्टामनुष्ठानयोग्यां भावनामासाद्य विधिः समाप्यते। स चैकेनैव प्रयत्नेन तां विशिष्टां विदधातीति नानेकशक्तिकल्पनापत्तिदोषः। तथा हि— § 3957

श्रौतव्यापारनानात्वे शब्दानामतिगौरवम्।
एकोक्त्यवसितानां तु नार्थाक्षेपो विरुध्यते॥ § 3959

विशिष्टायां भावनायामाधाय श्रौतं विधित्वं यद्यन्यत्रापि श्रुत्यैव पुनर्व्याप्रियेत ततः पुनरुच्चारणदोषमवैदिकत्वापत्त्या लभेत। अयं पुनः सकृद्विधाय निवृत्तव्यापारः स्वार्थान्यथानुपपत्त्या सर्वविशेषणेषु प्रत्येकनिष्ठानि विध्यन्तराण्याविर्भावयन् समाम्नायावगतैकरूपापरित्यागेनैवासकृदुच्चारणफले वर्तते। § 3960

विशेषणविधिश्चायं पश्चाद्यद्यपि गम्यते।
तथाऽपि त्वाकृतिन्यायात्ततः प्रागेव जायते॥ § 3962

विशिष्टनिमित्तत्वादर्थापत्तिः पश्चाद्भवन्ती यद्यपि विशेषणविधीनुत्तरकालमवगमयति तथाऽपि त्वाकृत्यधिकरणन्यायेन विशेषणान्यनुपादाय विशिष्टव्यापारासंभवान्नूनं पूर्वतरं विशेषणविधयो निष्पन्नाः। यतस्तदधीनसिद्धिर्विशिष्टप्रत्ययो दृश्यत इति। तेन बहव एवैते विधय इति प्रत्यक्षार्थापत्तिलब्धा युगपत्क्रमेण वा व्याप्रियन्त इत्यनेकविध्यन्तरप्रसवसमर्थैकविशिष्टविधिप्रसादेनानेकगुणविधानमपूर्वभावनाविधिपक्षे सुलभं नेतरत्र। कथम्। § 3963

---

११ णोक्तेन] ( अ० २ पा० १ अ० १६ )

२५ न्यायेन] ( अ० १ पा० ३ अ० ९ )

प्रधानं नीयमानं हि तत्राङ्गान्यपकर्षति। 486
अङ्गमाकृष्यमाणं तु नाङ्गान्तरमसंगतेः॥§ 3965

यदा हि भावनाऽन्यतः प्राप्ता भवति तदा तस्याः पिष्टपेषणवत्प्रतिहत-
शक्तिर्विधायकस्तामविदधानो न तत्संगतार्थानेकविधिव्यापारप्रसवहेतुत्वं प्र-
तिपद्यते। विशिष्टविधाने ह्यर्थापत्त्या विध्यन्तराणि कल्प्यन्ते। न चात्र तत्संभ-
वतीत्यनुपयुक्तश्रौतव्यापारावस्थ एव प्रत्ययः “आनर्थक्यात्तदङ्गेषु” इत्यनेन
न्यायेन भावनातोऽवतीर्य तत्संबद्धानि कारकाण्युपसर्पति। तत्र यावन्त्येक-
पदोपात्तैककारकविशेषणानि जातिलिङ्गद्रव्यसंख्यादीनि तानि विशिष्टभाव-
नाविधिन्यायेनैव तत्कारकाक्षेपात्सर्वाणि विधीयन्त इति प्राप्तायामपि भाव-
नायामनेकार्थविध्युपपत्तिः। यदा त्वनेकपदोपात्तानेककारकोपनिपातो भ-
वति तदा कारकाणां परस्परसंबन्धाभावात्तत्तत्पदेष्वप्यसंबध्यमानेषु य-
द्येकत्र विधिर्गच्छति तदा नेतरत्र गतो भवति, एवमितरगमनेऽप्यन्यग-
मनानुपपत्तिरसंबन्धात्। एवं च न भावनावदेकेन विहितेनेतरदर्थादाक्षेप्तुं
शक्यते। तत्रार्थलभ्यविध्यन्तरप्रसूतावसत्यामेकात्मकः श्रौतो विधिरेकत्रोप-
क्षीयमाणो यद्यप्यन्यत्राप्यस्तीति कल्प्यते तन्नासकृदुच्चारणादृते सिध्यतीति
पौरुषेयोऽनेकोच्चारणप्रसङ्गस्तद्दर्शयति—चोदिते हि—प्राप्ते कर्मणि, तदर्थ-
त्वात्गुणार्थत्वात्, तस्य तस्य—गुणस्य, विधेये पुनः पुनरुपदिश्येत—उच्चार्येत,
प्रत्यय इत्यर्थः। **परस्परसंबन्धे चासतीति** भाष्यमर्थापत्तिमूलोच्छेदप्रदर्शनार्थ-
म्। लोकेऽपि च यत्प्रधानं राजप्रभृति क्वचिन्नीयते तदात्मनाऽविनाभूतान्य-
मात्यादीन्यङ्गान्यप्यशेषाण्याक्षिपति। यदा तु कश्चिद्भृत्यानां क्वचिद्गच्छति त-
दा तदसंबन्धीनि भृत्यान्तराणि पदमपि न चलन्ति, तत्रावश्यं प्रयत्नान्तर-
मास्थेयं, न च तदेकव्यापारसाध्यमित्यशक्यं सकृच्छ्रुतावुपादातुमिति। एत-
मेवार्थं प्रपञ्चयति, यदि हि पौर्णमास्युद्देशेनाष्टाकपालो विधीयते तदा त-
त्स्वरूपोत्पत्तिरपि तावदनुक्ता सती क्लेशेन लब्धा किमुत पदार्थान्तरविधानं,
तदाह— **भवतिसंबन्धाभावान्नानेन संबध्यते। अथाऽऽग्नेयः पौर्णमास्यामित्य-**
त्रापि स्वरूपोत्पत्तिक्लेशः पूर्वोक्त एव द्रष्टव्य इति तमप्रदर्श्यैवाष्टाकपालसंब- 487
न्धाभावः प्रदर्शितः। एवं पौर्णमासीविशिष्टान्यतरानुवादेऽप्यनूद्यमानस्योत्प-
त्तिः पौर्णमासीसंबन्धो विधीयमानस्याप्युत्पत्तिरितरेतरसंबन्धश्चेत्यतिगौरवम्।
पौर्णमासीपदतन्त्रत्वेऽप्युभयोरुत्पत्तिः कर्तव्या परस्परं संबन्धश्चेति दोषौ।
न चारुणैकहायनीवत्परस्परनियमसिद्धिर्विशिष्टविधानदोषात्। अतोऽष्टाक-
पालाननुरक्तया पौर्णमास्याऽऽग्नेयः संबन्धते तदननुरक्तया वाऽष्टाकपाल
इत्यसंबन्धः। एतत्परिहारार्थं परस्परसंबन्धं द्रव्यदेवतयोः प्रथममेव कुर्वन्
उभयस्वरूपोत्पत्तिरन्यतरस्य चान्यतरत्र विधानमिति युगपद्विधीयमानपरस्प-
रसंबन्धक्लेशमनुभूय पुनः पौर्णमासीसंबन्धक्लेशः। तत्परिहारार्थमन्यतः सिद्धं

६ यः] ( अ° ३ पा° १ अ. ९ सू° १८
)

देवतासंबन्धमनूद्य केवलकर्मसंबन्धं दर्शयति—अथ **केन चिदग्नये संकल्पित** इति। तत्र संकल्पितशब्दवशेन केचिदाहुः केनचिदनुष्ठात्रा संकल्पित इति। न त्वेतद्युक्तमिव। अन्येनार्धकर्मणि तदीयस्य हविषो हरणमिति। तस्माद्धि णिजन्तः संकल्पितशब्दः केनचिद्वाक्येन रुक्कामादियुक्तेन विहित इत्यर्थः। तत्राऽऽहाष्टकपालसंबन्धसिद्ध्यर्थमाग्नेयशब्देऽनूद्यमाने पौर्णमासीगतस्य का देवतेति न ज्ञायते, युगपदुपलक्षणविधिकल्पने वाक्यभेद इति। अनेनैव मार्गेणाऽऽकृत्यधिकरणमुखप्रदर्शितैर्वचनव्यक्तिप्रकारैर्वाक्यभेदानन्त्यं प्रपञ्चयितव्यम्। तेनावश्यविधातव्योऽत्र द्रव्यदेवतासंबन्धः। न च स पूर्वप्राप्ते कर्मणि संभवतीति ‘गुणश्चापूर्वसंयोग’ इति कर्मान्तरत्वम्। कर्मान्तरत्वे च
488 सति तदवस्थं रूपावचनमित्यनुवादता। अतश्च बलादेकवचनलक्षणाद्याश्रयणीयम्। किं च। § 3966

न वाऽनन्यक्रियायोगे वाक्यमेतत्समाप्यते।
न च स्वार्थासमाप्तत्वाद्वाक्यान्तरमपेक्षते॥§ 3968

अष्टाकपालो भवतीति नायं पुरुषव्यापारः। न च पुरोडाशव्यापारमात्रं विधातुं शक्यम्। अभावनाविशेषात्मकत्वात्। तत्रावश्यकल्पनीये पुरुषव्यापारविशेषे यागकल्पनाऽऽपतति, तत्र यद्यपि प्रत्यक्षे लभ्यमाने न युक्तमानुमानिककल्पनं तथाऽप्यत्रापरिपूर्णे वाक्ये वाक्यान्तरानपेक्षिणि पौर्णमास्यमावास्यावाक्यस्थो यजिरसंनिहित एवेति नानुमानं प्रतिबध्नाति। अनुमिते च सति “य एवं विद्वान्” इत्यनुवादसरूपत्वादनुवाद एव विज्ञायते। क्रियासामानाधिकरण्याच्च यदाग्नेयोऽष्टाकपाल इत्यादेर्यच्छब्दाद्विलक्षणः कर्तृसमानाधिकरणोऽयं ‘य एवं विद्वान्’ इत्युपबध्यमानो विधिसामर्थ्यं निरुन्ध्यात्। तथा चोक्तम्— § 3969

क्रियापदैकयोगित्वे यच्छब्दो न रुजेद्विधिम्।
कर्तृयुक्तः स एवान्यप्रापितार्थानुवादकृत्॥ ६॥§ 3971

एकेष्टिर्यद्यमावास्या सानाय्यौषधयोस्ततः।
विकल्पे सति संभारपौर्वापर्यं कुतो भवेत्॥§ 3973

कर्मभेदे हि भिन्नविषयत्वात्सांनाय्यपुरोडाशसमुच्चये सति संभ्रियन्त इति समस्तसंभरणं प्रथमोत्तराभिधानं चावकल्पते नान्यथा, प्रथमपक्षे च चतुर्थमप्यपरमस्तीत्युत्तराणीति स्यान्नोत्तरे इति॥ ७॥ § 3974

489 कर्मान्तत्पक्षेऽभ्यधिकत्वाद्गुणविधिपक्षे न्यूनत्वात्त्रयोदशचतुर्दशत्वानुवादविरोधः। कुतः। § 3975

४ चिद्वाक्येन] आग्नेयमष्टाकपालं निर्वपेद्रुक्काम इत्यनेन वाक्येनेत्यर्थः। ७ ण] ( अ॰ १ पा॰ ३ अ॰ १ )

१ तीति] ( अ॰ २ पा॰ २ अ॰ १ सू॰ २३ )

पौर्णमास्यां यदा तिस्रो द्वे दर्शविषये यदा।
प्रधानाहुतयः सन्ति तदा संख्योपपद्यते॥§ 3977

तस्मात्समुदायानुवादाविति सिद्धम्। आह च— § 3978

अरूपत्वाद्विधेयस्य प्रकृते शब्दशक्तितः॥
तत्रैव रूपलाभाच्च समुदायानुवादता॥ ८॥§ 3980

इति पौर्णमास्यधिकरणम्॥ ३॥

## ०.०.४८ पांशुयाजाधिकरणम्

इदानीमधिकरणत्रयेण समुदायानुवादापवादः क्रियते। तत्र 'उपांशुयाजमन्तरा यजति' इति तावत्सकलः प्रागुक्तो न्यायोऽस्ति। कुतः। § 3982

यागान्विष्ण्वादिसंयुक्तैर्विहितान्रूपवत्तया।
अरूपमन्तरायुक्तमगत्यैवावलम्बते॥§ 3984

तेषु तावत्तव्यप्रत्ययेनैकान्तिको विधिः। तत्र यदीदं यागान्तरं कल्प्यते ततः प्राप्तं रूपाज्ञानमदृष्टान्तरकल्पनं च। किं च। § 3985

अजामिकरणं चैषु प्रत्येकमवगम्यते। 490
जामिदोषेण चोपांशुयाजोपन्यसनं कृतम्॥§ 3987

यथोपक्रममुपसंहाराज्जाम्युपन्यासस्याणामितायाश्चैकविषयत्वादेत एव विधयो गम्यन्ते। न ह्यन्तरालवाक्ये तादृगर्थवादो विधिर्वा स्पष्टो दृश्यते। समुदायानुवादप्रयोजनं च, कथं नाम "उपांशु पौर्णमास्यां यजन्" इत्यत्रैकीकृतानां कालसंबन्धे सति सर्वेषां प्राधान्यं स्यात्। **ननूपांशुगुणकमिति**—कथं द्रव्यदेवताव्यतिरिक्तं रूपत्वेनोच्यते। नैष दोषः। सर्वथा येन यागान्तराद्व्यवच्छिन्नो यागो निरूप्यते तदेव रूपम्। शक्यते चोपांशुत्वेनायं व्यवच्छिन्नरूपः प्रत्येतुमिति। अत आह—**नैवंजातीयकः शब्दः शक्नोतीति**। यदि ह्यवयवार्थभेदेन गुणविधिरयं कल्प्येत ततो याजशब्दस्य घञन्तत्वादकृतकुत्वस्यासाधुत्वं स्यात्। अव्युत्पन्ननामधेयत्वे तु नैष प्रसङ्गः। **नन्वेवं सतीति**—नामधेयत्वेऽप्यवश्यं 'तत्प्रख्यं चान्यशास्त्रम्' इत्येवं 'विष्णुरुपांशु यष्टव्यः' इत्यादिभिर्विहितं तद्गुणयोगमाश्रित्य प्रसिद्धिरवाप्तव्या ततश्च तुल्यो दोष इति। तत्परिहरति **मा भूदुपांशुयाजशब्दो यजतिशब्दो भविष्यतीति**।

११ नाम] तै॰ सं॰ ( २-५-२ ) ४ )
१८ ष्यं] ( अ॰ १ पा॰ ४ अ॰ ३ सू॰

विधौ ह्यत्यन्तमाञ्जस्येन कार्यं नामधेये तु यजिप्राप्तानुवादरूपेण प्रवर्तमाने किंचित्सारूप्यानुगमेऽप्यविरोधः॥ ९॥ § 3988

कर्मचोदना 'उपांशुयाजं यजति' इति न समुदायानुवादः। कुतः। § 3989

> प्रकृतानामसद्भावाद्गम्यते नानुवादता।
> यागो विष्ण्वादिसंयुक्तैर्मे हि वाक्यैर्विधीयते॥§ 3991

491 यथा वैश्वानरवाक्ये द्वादशकपालेनोपक्रमोपसंहाराभ्यामष्टत्वादय एकवाक्यतामापद्यमानाः पृथग्विधित्वं न प्रतिपन्नास्तथाऽत्रापि 'जामि वा एतदिति' विध्युपक्रमे दोषसंकीर्तनं कस्यचिद्विधीयमानस्याऽऽकाङ्क्षितं तदपनयनद्वारेण स्तुत्यर्थमिति गम्यते। जामिता च पुरोडाशयोरन्तराले कस्मिंश्चिदविधीयमाने भवतीति यदन्तरालकालसंयोगेन विधास्यते तस्याजामिकरत्वं प्रशंसेत्यवधारणादुपांशुयाजमन्तरेत्यस्य स्तुत्यर्हत्वेन ज्ञानाद्विष्ण्वादियुक्तेषु च तदपेक्षिताजामिरूपस्तुतिसंकीर्तनादनपेक्षितं विधित्वमनादृत्य स्तुत्यर्थता गृह्यते। न हि विष्ण्वादिसंयुक्तेष्वन्तरालकालसंयोगोऽस्ति येनोपक्रमोक्तया जामितया तद्विधिस्तद्गतं वा जामित्वं स्तावकतयाऽपेक्षितं संबध्येत। अन्तरालकालसंयुक्तस्य पुनर्विस्पष्टजाम्युपक्रमवाक्यविधानार्हत्वात्तद्वशेन चेतरेषां स्तावकत्वोपयोगे सति नानेकादृष्टकल्पनानुबन्धिविध्यभ्युपगमो युक्तः। किं च। § 3992

> विष्ण्वादियागसंबन्धे कृते यागोऽर्थतो भवेत्।
> उपसर्जनभूतस्तु श्रौते चैतन्न युज्यते॥§ 3994

कर्मोत्पन्नस्तव्यप्रत्ययो यागोपसर्जनविष्ण्वादिप्रधानस्तत्रार्थान्निकृष्य यागकर्तव्यता कल्पनीया, न चासौ युज्यते, "अन्तरा यजति" इत्यनेन प्रत्यक्षप्रधानोपदेशोपपत्तेः। तत्र यद्यपि तावद्विष्ण्वादियुक्तानि पृथग्वाक्यानि भवेयुस्तथाऽपि तस्मिन्नेवान्तरालविहिते यागे देवतां विदध्युर्न कर्मान्तराणि। न च देवताऽप्येवंविधैः सम्यगभिधीयते। न ह्येते संप्रदानं देवतात्वं वा वदन्ति, किं तर्हि, कर्मोपसर्जनद्रव्यवचनास्तत्र कर्मशक्तिं प्रधानीकृत्य द्वितीयातुल्यार्थता तावल्लब्धव्या, न च तावता देवतात्वं सिध्यति। त्यागार्थत्वाद्धि यजतेः परमार्थतस्त्यज्यमानं द्रव्यमेव कर्म भवति। ततस्तेनाऽऽप्यमाना देवता पश्चात्कर्म संपद्यते। तत्र द्विकर्मलक्षणप्रसक्तौ 'समाप्तिः शब्दार्थः' इत्यनेन न्यायेन पूर्वं त्यज्यमानकर्मतिरोधानेन परपूज्यमानकर्माविर्भावादेककर्मत्वाधारणेन संप्रदानत्वशक्तिमभिभूयैव निर्देशो भवति "विष्णुं यजति" "विष्णुर्यष्टव्य" इति, न तु तत्र देवतात्वमभिधीयते। किं तर्हि, कर्मत्वान्यथानुपपत्तिलक्षणयैव गम्यमानं निश्चीयते। ननु च यजतेर्देव-

२६ क्तौ] 'प्रक्रमात्तु नियम्येत' इति षष्ठाध्यायद्वितीयपादाधिकरणस्थभाष्योक्तेनेत्यर्थः।

तापूजात्मकत्वात्तदीयकर्मदेवताशब्दौ पर्यायावेति न वक्तव्यं लक्षणया गम्यत 492 इति। नैष साक्षाद्देवतापूजावचनः। कुतः। § 3995

स्तुतेरपि हि पूजात्वाज्ज्ञायते यजिवाच्यता।
न वाऽतिथिवदेतस्याः पूज्यतेति च वक्ष्यते॥§ 3997

न हि देवताः स्तुवानस्तत्पूजाव्यापृतोऽपि सन्कश्चिद्यजत इत्युच्यते। रूपासमवायित्वाच्च नातिथिवद्देवता पूज्यमानतां प्रतिपद्यते। न च यजिस्तत्पर इति नवमे वक्ष्यते। दानेन वोपाध्यायादिः पूज्यमानोऽपि न कर्म संपद्यमानो दृष्टः। एवं तर्हि तद्वदेव नित्यं देवतायाः संप्रदानत्वेनैव निर्देशः प्रसज्यते। नैतस्यास्तादृशं संप्रदानत्वमप्यस्ति, प्रतिग्रहीतृत्वाभावात्। अपि च दृश्यते हि क्वचित्संप्रदाननिर्देशः, “योऽदाभ्यं गृहीत्वा सोमाय यजत” इति। सर्वथेयं देवता न वाऽन्यैः संप्रदानैस्तुल्या, न च कर्मभिरसाधारणैर्नैव त्वात्मनो केवलं यजिविषयं कर्म संप्रदानं वा भवति। तच्चैतस्याः क्रियासाधनत्वात्सप्तमकारकासंभवाच्चैवं कल्प्यते। न हि देवताशब्दवाच्येनाऽऽत्मना धात्वर्थसंबन्धित्वं प्रतिपद्यते। तेन तदुद्देशत्यागांशेन प्रतिग्रहीतृव्यापाराद्विनाऽपि कथंचित्साकल्पकल्पनया संप्रदानं निर्दिश्यते। यद्वोद्देशगतमाप्यमानत्वं त्यागांशेऽप्यध्यस्य सकलस्य यजेः कर्मत्वेनोच्यते। तेन यत्र संप्रदानत्वनिर्देशस्तत्रैतदुक्तं भवति। परस्वत्वमिवाऽऽपादयितुं तदुद्देशेन द्रव्यं त्यजेदिति। यत्रापि कर्मनिर्देशस्तत्रैषोऽर्थः, त्यक्तुं द्रव्यं देवतामुद्दिशेदिति। तथा च केवलोद्देशव्यापारेषु त्यक्तृत्वरहितेषु यजेति प्रैषो भवति। तदेतदुभयमपि लाक्षणिकम्। तत्रापि संप्रदानत्वं त्यागांशाव्यभिचारित्वादसमस्तात्मकत्वाद्दूषितमपि सत्प्रत्यासन्नतरं देवतात्वस्य। कर्मत्वं तु क्रियान्तरेष्वपि व्याप्यमानत्वसंभवात्सव्यभिचारमिति विप्रकृष्टतरं देवतात्वस्य। न हि तद्देवतात्ववत्सकलं यजि प्रति कर्मेत्यवधार्यते। परमार्थतः पुनर्देवताशब्देन तद्धितशब्देन वा देवतात्वमभिधीयते, न कारकविभक्त्या कयाचित्। तथा च। § 3998

देवतातद्धितोत्पादे न हि पाणिनिना तथा।
इदमग्नय इत्येवं तेन क्रीतमिवोदितम्॥§ 4000

ये हि विभक्तिवाच्या अर्था भवन्ति तद्विभक्तिसमर्थेभ्य एव तेभ्यस्तद्धितविधानं दृश्यते। *तद्वहति, * तेन क्रीतं, *तस्मै हितं, *तत आगतः, *तस्यापत्यं, *तत्र भव इति। न तु देवतायां तस्या इदं तामनेन यजतीति वा निर्देशो दृश्यते। कथं तर्हि, साऽस्य देवता इति। तस्मान्नूनमनन्यवाच्योऽयमर्थ इति 493 गम्यते। ततश्च स्थितमेतन्न ‘विष्णुरुपांशु यष्टव्य’ इत्यनेन देवताऽप्यभिधीयत

२० क] देवतायाः प्रतिग्रहीतृत्वाभावान्न सामस्त्येन संप्रदानत्वं संभवतीत्यर्थः।
२८ *] पा॰ सू॰ ( ४-४-७६ )
२८ *] पा॰ सू॰ ( ५-१-३७ )
२८ *] पा॰ सू॰ ( ५-१-५ )
२८ *] पा॰ सू॰ ( ४-३-७४ )
२८ *] पा॰ सू॰ ( ४-१-९२ )
२९ *] पा॰ सू॰ ( ४-३-५३ )
३० साऽस्य] पा॰ सू॰ ( ४-२२४ )

इति। तत्र क्लेशेन तां कल्पयित्वा यजिभावना कल्पनीया। ततश्च वरमर्थवादत्वमेवाऽऽश्रितम्। अन्तरा यजतीति तु यद्यप्यन्तरालसंबन्धविधिपरत्वान्न स्वरूपविधानार्थमित्याशङ्क्यते तथाऽप्यनन्यगतित्वाद्विशिष्टविधानम्। न हि यथेतरेषामर्थवादत्वेनार्थवत्ता तथेह केन चित्प्रकारेण। ननु च समुदायीकरणेनार्थवत्तेत्युक्तम्। यथा नैतेनार्थवत्ता तथाऽन्यार्थदर्शनं व्याचक्षणा वक्ष्यामः। किं च। § 4001

> अन्तरालेऽनुपादेये कर्म तत्र विधीयते।
> तादृग्विपरिवृत्तिश्च नेत्युत्पत्तिरपीष्यते॥ § 4003

यादृशी ह्याख्यातेन स्वप्रधाना पूर्वापरीभूता भावनाऽन्तरालमनुपादेयं प्रत्युपात्ता न तादृशी विष्णुर्यष्टव्य इत्यादिभिरूपस्थाप्यत इति नोत्पत्तिविधिकल्पनाभङ्गः। तत्र सत्यपीतरेषां कर्मविधित्वे कर्मान्तरं स्यान्न प्रकृतानुवाद इति मत्वाऽऽह—**कर्मान्तरस्य वाचकः स्यादिति**। देवतायाः पुनरुपादेयत्वात्कर्मोद्देशेन विधिः संभवतीति नानुवादबुद्धिरपैति। कर्मविध्यभ्युपगमे तु सत्यपि प्रकृतसद्भावे तद्रूपाणां प्रकृतानामभावादित्यभिप्रायः। अथ वा यदिद-
494 माग्नेयादिभ्यः कर्मान्तरं चोद्यते तस्योपांशुयाजं यजतीत्ययं वाचकः स्यान्नेतरेषाम्। तस्मादन्तरालानुपादेयत्ववशेनास्यैकान्तिके कर्मविधित्वे सतीतरैरर्थवादैरेव भवितव्यम्। धात्वर्थं चान्यत्र विदधत्प्रत्ययः संनिकृष्टवृत्तिर्भविष्यति। **स तु विधीयत उपांशुत्वादिसंबन्ध** इति—उपांशुयाजशब्दं गुणविधिं मन्यते। यत्त्ववाचकत्वमस्मिन्पक्षे कुत्वप्रसङ्गादिति। तत्रोच्यते। तुल्यमेतत्त्वत्पक्षे। कुतः। § 4004

---

६ च] ननु चेति भाष्येण अन्तरालवाक्येऽप्यन्तरालविधिप्रतीतेर्यागविधानाप्रतीतावाशङ्कितायां बाढमित्यादिना उपांशुत्वान्तरालसंबन्धविधेयत्वाभ्युपगममात्रेण शङ्कापरिहारमभिप्रेत्य भाष्यस्थं संबन्धशब्दं च लक्षणया विशिष्टपरमङ्गीकृत्य अन्तरालादिविशिष्टयागाविधाने वाक्यानर्थक्यापत्तेः ‘नत्वन्तरालसंबन्धस्यान्यत्प्रयोजनमस्ति’ इत्युत्तरभाष्यसूचितमनन्यगतिकत्वस्य हेतुत्वमुररीकृत्य परिहारग्रन्थाशयमुपवर्ण्य अस्मिंस्तु व्याख्याने ‘उपांशुत्वादिसंबन्ध’ इत्यस्य ‘न त्वन्तरालसंबधस्य’ इत्यनेनान्वयापत्तेः एकं हीदं वाक्यमित्यारभ्य विष्ण्वादिसंबन्धोऽनूद्यत इत्यन्तस्य ‘यदीमेऽपि विधीयेरन्’ इति पूर्वभाष्येणान्वयापत्तेर्दूरान्वयदोषमालोच्य नन्विति भाष्येण विष्ण्वादिवाक्यविहितयागेष्वन्तरालगुणविधानार्थमन्तरालवाक्यमिति शङ्किते विष्ण्वादिवाक्यानां कर्मान्तरविधायकत्वेऽप्येकस्मिन्नन्तरालवाक्ये उपांशुत्वस्याऽऽदिशब्दोपात्तान्तरालस्य च प्राप्तकर्मानुवोदन विधानाशक्तेः कर्मविध्यवश्यंभावादित्येवं बाढमित्यादि ‘विधातुमर्हतीत्यन्तेन भाष्येण परिहृते पुनर्विष्ण्वादिवाक्यप्राप्तोपांशुत्वानुवादोऽन्तरालवाक्ये भविष्यति, कथं गुणन्याय इति कथमित्यनेन पृष्टे जामि वेत्यारभ्य संबन्धोऽनूद्यत इत्यन्तेन भाष्येण विष्ण्वादिवाक्यानां विधायकत्वस्यैव निराकरणात्कथं तद्वाक्यप्राप्तोपांशुत्वानुवाद इति परिहारेऽभिहिते कर्मान्तरानुपस्थितेरन्तरकालरूपानुपादेयगुणसत्त्वाच्च अनुपादेयगुणसहकृतानुपस्थितिरूपप्रकरणान्तरन्यायेनाप्यन्तरालवाक्ये कर्मविधिरित्येवं, प्रयोजनमस्त्यतो विधानादित्यनेन भाष्येण कथ्यत इत्येवं यथान्यासं भाष्यं व्याख्यातुमाभते किंचेत्यादिना।

वाच्यवाचकसंबन्ध इष्टःशब्दार्थयोः पुरा।
पश्चाद्विध्यनुवादत्वे स्यातां साधारणाश्रये॥§ 4006

वाच्यवाचकत्वेऽवधारिते पश्चाद्विधिविधेयत्वमनूद्यानुवादकत्वं वा कल्प्यते। तत्रोभयोरपि वाच्यवाचकसंबन्धः साधारण इति तद्गतौ गुणदोषावपि साधारणौ। तेन नैको बोधो भवति। स्यादेतत्। अनुवादत्वमवाचकस्यापि कथंचिद्दृष्टं न विधित्वमिति। तदुच्यते। ममापि हि। § 4007

यजिना विहिते यागे याज इत्यनुवादभाक्।
विधिसंबन्ध्युपांशुत्वं न वैतदसमञ्जसम्॥§ 4009

न च तत्प्रख्यरूपेण नामैतदुपपद्यते।
विहितं न ह्युपांशुत्वं शास्त्रेणान्येन केनचित्॥§ 4011

न तावद्विष्ण्वादियुक्तेन विहितम्, अर्थवादत्वात्। न 'उपांशु पौर्णमास्याम्' इत्यनेन। कालविधिव्यापृतेनानेकविध्यशक्तेः। तस्मादुत्पत्तिस्थेनैव विधीयते। तथा च सूत्रकारो वक्ष्यति **गुणोपबन्धात्** इति। जामित्वापनयनं च सर्वप्रकारं द्रव्यतः स्वरतो देवतातश्च। ज्ञायत एव यथा विष्णुर्यष्टव्यः **प्रजापतिरग्नीषोमौ वेति**—यागे चोदितेऽवश्यंभाविन्यां देवतायामनिय- 495
मप्रसक्तौ केचिद्विष्ण्वादयः प्राधान्यप्रसिद्ध्या वैचित्र्यप्रदर्शनार्थं संकीर्त्तिताः। तेन यद्यपि परमार्थेन न यष्टव्यास्तथाऽपि स्तुतिपरत्वादुपादानं गुणवादेन कथंचिदुच्यते। **शाखान्तरे विधानात्प्राप्ता** इति अनुदाहरणादस्फुटमेवमभिधाय न हि किंचिदसाध्यं स्यात्। न च तस्मिन्सति दशमे 'तद्वच्च देवताया स्यात्' इत्यादि विचार्थ 'विष्णुर्वा स्याद्धोत्राम्नानात्' इत्यादिना मान्त्रवर्णिकत्वं जैमिनिराश्रयिष्यति। यद्यप्यप्राप्तिरिति चेहापि स्वयमेवाऽऽशङ्का दर्शिता। यदप्युक्तमुपांशुधर्मत्वात्प्राप्तौ "तस्माद्यत्किंचित्प्राजापत्यम्" इति तदप्ययुक्तम्। वचनव्यक्तिविपर्यासात्। न ह्येवं वचनं यदुपांशु तत्प्राजापत्यमिति। किं तर्हि। यत्प्राजापत्यं तदुपांश्विति। तेन नोपांशुत्वेन प्राजापत्यता लभ्या। **अग्नीषोमयोस्तु विधायकमुदाहियत एवेति**—एतदपि चतुर्थीतद्धितमन्त्रवर्णानात्मकत्वादविधायकम्। यदि हि तावग्नीषोमावब्रूतां ततोऽस्माकं किमिति हि विजानन्तो यजमाना न वयं देवतायां प्रवर्तिता इति कल्पयेयुः। कालविधिपरत्वाच्च न देवताऽप्यनेन शक्या विधातुं, देवतापरत्वे वा कालविधिपरित्यागात्पौर्णमासीशब्देनापि नानूद्येतेति पूर्णमासशब्देनाग्रहणादसति प्रधानत्वेऽङ्गत्वप्रसङ्गः। सूत्रकारेण च दशमेऽमावास्यायामुपांशुयाजमनिच्छतैतदेव पौर्णमासीकालविधिपरत्वेनोपन्य-

५ नैको] अन्यतरावधारणं न भवतीत्यर्थः।
२० विचार्थ] ( अ॰ १० पा॰ ८ अ॰ १६ सू॰ ५३ )।

स्तम्। अत्र समाधिः। मान्त्रवर्णिको देवताविधिरिति स्थितम्। उपांशुयाजक्रमे हि वैष्णवप्राजापत्याग्नीषोमीयानि याज्यापुरोनुवाक्यायुगलान्याम्नायन्ते। तैश्च तुल्यार्थत्वाद्विकल्पमानैः वैकल्पिक्य एव देवताः प्राप्यन्ते। तदेव हौत्रं
496 शाखान्तरमित्याह। आध्वर्यवेऽपि तु क्वचिदस्त्येव याज्यानुवाक्याम्नानं हौत्ररूपेणेति तदभिप्रायं वा शाखान्तरवचनम्। उपांशुधर्मत्वं चास्यैव द्योतनार्थम्। अन्या हि देवताऽत्रानीयमानाऽऽत्मीयं धर्ममुच्चैष्ट्वं जह्यात्परधर्ममुपांशुत्वं प्राप्नुयादिति विरुद्धम्। विष्णुप्रजापत्योस्तु प्रत्यासन्नधर्मकत्वादविरोधः। तथा, **अग्नीषोमयोस्त्विति**—विधायके देवताविध्यसंभवाद्यथा संभवग्रहणेन पौर्णमासीकालस्य विधायकेऽग्नीषोमानुवादः प्राप्तिमुपोद्बलयति॥ १०॥ § 4012

यस्यायं गुण उपबद्धो दृश्यते कालविधिपरे वाक्ये उपांशु पौर्णमास्यां यजन्निति। न त्वेतदेव गुणस्योत्पत्तिवाक्यमयागविधिपरे सत्यनेकार्थविधिप्रसङ्गात्। अत 'उपांशु याजमन्तरा' इत्यनेनैव प्राप्तस्य संकीर्तनमिति॥ ११॥ § 4013

"हृदयमुपांशुयाज"* इति यज्ञपुरुषस्य प्रधानप्रायेणावयवेन संस्तवात्प्रधानमित्यवगम्यते। कथं पुनरप्रधानत्वं पूर्वपक्षे प्रसज्यते। उच्यते। § 4014

त्रयाणां वैष्णवादीनां समुदायेऽवधारिते।
अग्नीषोमीय एवैकः पौर्णमास्यां विधीयते॥ § 4016

तावब्रूतामग्नीषोमाविति योऽग्नीषोमदेवत्यः स एवैकः कालविशेषसंयुक्तः पूर्णमासग्रहणेन फले चोद्यते। तत्र वैष्णवप्राजापत्ययोर्गुणभावात्सकलोपांशुयाजप्राधान्यवचनानुपपत्तिः। ननु तवापि वैकल्पिकदोषत्वाद्देवतासु यदैवाग्नीषोमीयदेवत्यस्ततदैव प्राधान्यमिति नित्यवत्प्रधानत्वसंकीर्तनं नैव घटते। नैष दोषः। § 4017

कालदेवतयोर्नात्र संबन्धोऽयं विधीयते।
यत्तु तल्लक्षितं कर्म तदन्यत्रापि विद्यते॥ § 4019

यदि ह्यग्नीषोमयोरेव पौर्णमासीसंबन्धः क्रियते ततो विष्णुप्रजापतिपक्षे न स्यात्। अयं पुनर्देवतोपलक्षितस्य यागस्य संबन्धः। सर्वत्र चोपलक्षणापायेऽप्युपलक्ष्यं गृह्यते यथा वक्ष्यति, *'अनपायश्च कालस्य लक्षणं हि
497 पुरोडाशौ' इति। न वैकस्यैव कर्मणः कदाचित्प्रधानत्वं कदाचिदङ्गत्वमित्युपपद्यते। नानात्वे त्वविरुद्धं स्यात्। न च संभवति तत्। तस्मादेककर्मत्वाय 'उपांशुयाजमन्तरा यजति' इत्ययमेव विधिः॥ १२॥ § 4020

इति पांशुयाजाधिकरणम्॥ ४॥

१ म्] विष्णुर्वा स्याद्धौत्राम्नानादिति दाशमिकोपान्त्याधिकरणे स्थितमित्यर्थः।
१ *] शिरो वा एतद्यज्ञस्य यदाग्नेयः पादावग्नीषोमीय इति पूर्वोत्तरशेषौ।
१४ *] ( अ॰ १० पा॰ ८ सू॰ ६९ )।

## ०.०.४९ आधाराग्निहोत्राधिकरणम्

ऊर्ध्वमाघारयति तण्डुलैर्जुहोतीत्यादिभिरेवंभूता एवाऽऽवारा होमाश्च विहिता विपरिवर्त्तन्ते। न हि 'विष्णुरुपांशु यष्टव्य' इत्यादिवद्द्रव्यप्राधान्येन यागहोमभावनयोरभिभवः। किं च। § 4022

न चैषामेकवाक्यत्वं न च स्तुतिपरा श्रुतिः।
ऐकान्तिको विधिस्तेन गुणवत्कर्मगोचरः॥§ 4024

नोपांशुयाजवाक्यवदेषामेकवाक्यत्वमिष्टं, न च स्तुत्यर्थता, तेनोभयपक्षे निश्चिते विधित्वे गुणमात्रं विधीयतां तद्युक्तं वा कर्मेति कर्मविधानं युक्तम्। कुतः। § 4025

विधित्वं प्रत्ययोपात्तं न नामपदमृच्छति।
तद्विधिर्भावनातश्चेत्सैव पूर्वं विधीयताम्॥§ 4027

न तावद्दध्यादिशब्दैः स्वयं विधित्वमभिधीयते। न च प्रत्ययोपात्तं सद्भावनाधात्वर्थव्यतिरेकेण स्वतन्त्रैर्दध्यादिभिः संबध्यते। न हि भवति दध्ना यादिति। किं तर्हि दध्ना कुर्यादिति संबध्यते। होमं वाऽनेन कुर्यादिति। सस्माद्यत्प्रसादेन दध्यादेः कर्त्तव्यता तावेव भावनाधात्वर्थौ न विधीयेते इति कुत एतत्। न हि तद्विध्यनपेक्षं कथं चिदपि गुणविधानं शक्यं दर्शयितुं, यदैव हि दर्शयितुमुपक्रम्यते तदैव पूर्वतरं भावनाधात्वर्थविधिर्बलादापद्यते। त- 498
स्माद्धोमदध्यादिविशिष्टभावनैव विधीयते। ततश्च तासां रूपवतीनां प्रचयशिष्टः समुदायोऽस्तीत्यग्निहोत्रं जुहोतीति तदनुवादो विज्ञायते। निमित्तफलचोदनयोश्च एकत्वोपजनः समुदायानुवादे प्रयोजनम्। एवं च सति दध्यादेर्भिन्नकर्मविषयत्वादन्याय्यो विकल्पो न प्रसज्यते। तथोर्ध्वमाघारयतीत्यादिषु यद्यपि द्रव्यदेवतं न श्रूयते तथाऽप्युपांशुत्वन्यायेन व्यवच्छेदकारणत्वादूर्ध्वत्वादिभिरेव रूपवत्तायां कल्पितायामाघारमाघारयतीत्यरूपः सन् स्वार्थे विनियोक्तुमशक्नुवन्ननुवादो भवति। तस्यापि प्रयोजनं 'इन्द्रऊर्ध्वो अध्वर' इति मन्त्रविनियोगे, *'तस्याऽऽघारमाघार्य' इति च द्रव्यविधावेकत्वसिद्धिः॥ १३॥ § 4028

अपि च। § 4029

विशेषप्रतिपत्त्यर्थं संज्ञा सर्वा प्रवर्त्तते।
यदा तदा विशेषोऽसौ कोऽस्येति न निरूप्यते॥§ 4031

१३ यादिति] यादित्येतावन्मात्रस्य प्रयोगानर्हत्वेपि विध्यर्थकस्य लिङो यासुडागमविधानाद्विध्यभिवायित्वमभ्युपेत्योक्तम्।
१७ तीनां] होमाघाररूपैकजातीयानामेकपदेपात्तत्वलक्षणैकधर्मयोगाख्येन प्रचयेन संपादितः समुदाय इत्यर्थः।
२४ *] चतुर्गृहितिं वा एतदभूत् इति पूर्वं शेषः।

सामान्यं स्यादिदं ज्ञेयं ज्ञातत्वान्न क्रियान्तरम्।
तदज्ञेयतया नात्र विधानमवकल्पते॥§ 4033

क्रियाश्चाकारकत्वेन युज्यन्ते त द्वितीयया।
ताभिस्तु साध्यमानत्वात्समुदायस्य कर्मता॥§ 4035

499 आधारमग्निहोत्रमिति द्वितीयानिर्देशः क्रियेप्सितस्य कारकस्य युज्यते। न
च जुहोत्याधारयतिभ्यामात्मैवाप्तुमिष्यते। स्वात्मनि क्रियाविरोधात् समुदायः
पुनर्निष्कृष्य शब्देनार्थान्तरात्मनोच्यमानः शक्यः साध्यत्वेनाभिधातुं यथौदन-
पाकं पचतीति विशेषः सामान्येनेप्सिततमः कर्मत्वेनोच्यते। ननु च समुदाय-
स्य समुदायिभ्योऽव्यतिरेकान्न कथं चित्साध्यत्वमवसीयत इत्ययुक्तमेव कर्म-
त्वम्। न। अवयवक्रियाप्रचयसाध्यत्वात्समुदायस्य। समस्ताभ्यो हि समुदाय-
स्याव्यतिरेकादेवमुपादानं न स्यात्प्रत्येकरूपात्तु समस्तरूपमर्थान्तरमिष्टं, न
च प्रत्येकरूपैर्विना समस्तरूपनिष्पत्तिरित्युपपन्नमीप्सिततमत्वम्। ननु चैव-
मादयः समुदायिवचनत्वेनावधारिता इति समुदायिनां स्वात्मनि क्रियाविरोध-
स्तदवस्थ एव स्यात्। नैष दोषः। समुदायिवचनेनापि प्रातिपदिकेन स-
मुदायोऽपि लक्षणया गम्यते। ततश्चैकत्ववत्कर्मत्वं समुदायस्य प्रत्येष्यते। न
च सामान्यविशेषभेदेनापि भवतः क्रियात्वकर्मत्वे पाकवत्संभवतः। सामान्य-
विशेषशब्दयोर्भेदेनानुपादानात्। एतच्च पौर्णमासीमित्यत्रापि सिद्धान्ते योज्य-
म्। तस्मात्तद्वदेव समुदायानुवादत्वम्॥ १४॥ § 4036

अथोच्येत यथा “गुणस्तु श्रुतिसंयोगात्” इत्यत्र पक्षेऽन्येषां गुण-
विधित्वाद्रूपलाभ आशङ्कितस्तथाऽत्राग्निहोत्रं जुहोतीत्युत्पत्तिवाक्यत्वेन त-
ण्डुलादिसंयुक्ते रूपलाभ इति। न। तत्र स्ववाक्यगतपौर्णमास्यमावस्यापद-
निमित्तत्वादनुवादाशङ्कायाः। न चेह तण्डुलादिवाक्येऽग्निहोत्रशब्दोऽस्ति, य-
स्त्वस्ति जुहोतिशब्दः स सर्वहोमसाधारणत्वान्नाग्निहोत्रविधिपर एव। ननु च
प्रकरणाद्विशेषोऽवगम्यते अत आह—**अप्रकृतत्वाच्चेति**। न ह्युत्पत्तिवाक्ये
अस्ति कर्मणां प्रकरणम्। फलसंबन्धोत्तरकालत्वेन कथंभावात्मकस्य प्र-
करणस्य प्रयोगवाक्याधीनप्रसूतत्वात्। तत्रैतत्स्यात्, तदारूढस्यैव द्रव्यदेव-
तासंबन्धो भविष्यतीति तदुच्यते। अनभिज्ञातरूपस्य फले विधातुमशक्य-
500 त्वात्। अतः प्रसिद्धरूपाण्येव तेन ग्रहीष्यन्ते। ननु च “तस्याघारमाघार्य”
‘इन्द्र ऊर्ध्वो अध्वर इत्याघारम्’ इति च द्रव्यमान्त्रवर्णिकदेवताविधौ नामप्र-
योगाद्रूपं विज्ञास्यते। न। आघारशब्दस्य धात्वर्थाव्यतिरेकेणाविशेषणकत्वात्।

१ अथोच्येत] यदत्र भाष्यकारैरेतत्सूत्रमाघारे प्राकरणिकवाक्यान्तरेणापि रूपालाभेनारूपत्वोपपादनपरतयाव्याख्यातं तच्च तत्प्रख्याधिकरणे वाक्यान्तरेणद्रव्यदेवतालाभस्योक्तत्वेनायुक्तमिव मत्वा स्वायमाघाराग्निहोत्रवाक्ययोररूपत्वेऽपि वाक्यान्तरेण रूपलाभोपपत्तेर्विधेयत्वाशंकानिराकरणायैतत्सूत्रमित्येवं व्याख्यातुं शंकां तावदारचयति—अथेत्यादिना।
१ था] ( अ. २ पा. २ अ. ३ सू. ५ )

तत्र नाम्ना विशेषः प्रतीयते, यत्र कं चिद्विशेषमुपादाय नामानि प्रवर्तन्ते। अत्र पुनः संनिहितावयवार्थत्वात्समुदायप्रसिद्धिमन्तरेणाऽऽघारशब्दः क्षरणमात्रवाचित्वान्न विशेषे वर्तते। ननु च प्रकरणाद्विशेषो लप्स्यते। तत्रापि सूत्रम्। न ह्याघारः प्रकृतः परप्रकरणपातित्वात्; दर्शपूर्णमासप्रकरणमेतत्सकलं नान्यस्य प्रकरणस्यान्यत्रावकाशः। सन्निधेर्विशेषागम इति चेदत्रापि सूत्रम्; न वाक्यबलीयस्त्वेनात्र प्रकृतैरपि संबन्धात्, तदेवं वाक्यप्रकरणयोरविरोधो यदि द्रव्यदेवतासंयुक्तान्येवोत्पत्तिवाक्यान्यभ्युपगम्यन्ते यत्र यः कश्चिद्रूपलेशोऽस्ति तत्र निरूपिते कर्मणि केन चित्प्रकारान्तरेण गुणान्तराणि कल्पन्ते सर्वेषु चोर्ध्वत्वं तण्डुलादि किं चिद्रूपमस्ति न त्वाघारमाघारयति, अग्निहोत्रं जुहोतीत्यनयोः। तस्मात्समुदायानुवादौ॥ १५॥ § 4037

कर्मचोदने स्यातामिति वक्तव्येऽन्तरग्रहणमुपांशुयाजाधिकरणवन्नेयम्। आघारयतिजुहोत्योरनन्याक्षिप्तविधिशक्तित्वात्कर्मप्रयोगविधानमेव शब्दार्थ इत्यवगम्यते। न च प्रकृताघारहोमसद्भावः। प्रकृतवाक्यस्थानां विधीनामप्राप्तदध्याद्याक्षिप्तायां विधिशक्तौ कर्मानुवादबुद्ध्यनपायात्। “न चेदन्येन शिष्टा” इति वाऽपवादान्न विशिष्टविधानन्यायः संभवति। *तद्दर्शयति—**अस्मिन्हि** 501 **सति विधाने** प्रत्यक्षे न संबन्धः शक्नोत्यर्थादाक्षेप्तुमित्यर्थः। अथ वाऽस्मिन्हि सति संबन्धिविधावितरेण गुणविधानेन संबन्ध एव केवल आश्रीयते। तस्मान्नैतद्वाक्यनिरपेक्षैः संबन्धविधिभिरर्थादपरौ कल्पयितुं होमाघारौ शक्येते यद्बलेनानयोरनुवादत्वं स्यात्। भावनाधात्वर्थावुद्भिद्य त्वा न विधिर्दध्यादिभिः संबध्यत इति चेत्सत्यमेतत्। न विधित्वं भावनात उत्तार्यते तद्वचेनैव तु गुणः संस्पृश्यते, गुणस्य कारकविभक्त्या भावनामध्यनिक्षेपात्। तेनैतदुपदिष्टं भवति। सर्वत्रैव विशिष्टविधानोत्तरकालं किं प्राप्तं किं न प्राप्तमित्यन्वेषणायामप्राप्तमात्रविषयोपसंहाराद्विधिर्भावनाधात्वर्थयोरनुवाद इत्यभिधीयते। न त्वादित एव तावनूद्य गूणो द्रव्यं वा विधीयत इति कदाचिदपि शास्त्रार्थाभिव्यक्तिः। तत्र पश्चात्तने व्यापारे मन्दबुद्धिप्रतिपत्त्यर्थं स्थूलेन न्यायेन कथ्यमाने शास्त्रकृता एवैता वचनव्यक्तय इति मन्यमानाः स्वयमिवान्येषामपि भ्रान्तिमुत्पादयितुमष्टौ श्रुतिप्रकारान् परदौर्बल्यवतः केचिद्दर्शयन्ति प्रथमः किल श्रुतिप्रकारो धात्वर्थविधानं, द्वितीयः सगुणं धात्वर्थविधानं, तृतीयः किं चिदुद्दिश्य धात्वर्थविधानं, चतुर्थस्तत्रैव विशिष्टविधानं, पञ्चमस्तु धात्वर्थोद्देशेनान्यस्य

५ *] नन्विति भाष्येण दध्यादिवाक्येषूपपदश्रवणेन केवलहोमाघारकर्तव्यताविधानाशक्तावपि होमाघारसंबन्धितया दध्यादिविध्यभ्युपगमात्संबन्धस्य च संबन्धिद्वयाधारत्वात्प्रतिसंबन्धिभ्यां होमाघाराभ्यां विनाऽनुपपत्तेरर्थापत्या तयोरपि प्राप्तेराघाराग्निहोत्रवाक्ययोरनुवादत्वं दुर्निवारमित्येवमाशंक्य नैतदेवमित्यादिना ब्रूम इत्यन्तेन समाहितं तत्तावद्द्वेधा योजयति—तद्दर्शयतीत्यादिना। भाष्यस्थसंबन्धशब्दस्य विशिष्टवाचित्वं विधानशब्दस्य च सप्तम्यन्तत्वमभिप्रेत्याऽऽद्या योजना। द्वितीया तु संबन्धशब्दस्य यथाश्रुतहोमाघारसंबन्धपरत्वं विधानशब्दस्य च तृतीयान्तत्वमभिप्रेत्येति विज्ञेयम्।

विधानं, षष्ठस्तु धात्वर्थनान्ययोः संबन्धः,सप्तमः पुनर्धात्वर्थविशिष्टेन प्रत्ययेनान्ययोः संबन्धः, अष्टमस्तु मुक्त्वा धात्वर्थमन्ययोरेव संबन्ध इति। तत्र तावद्यदुच्यते “अग्निहोत्रं जुहोति” इत्येतद्धात्वर्थविधानमिति। तदयुक्तम्। न हि विधिर्भावनामुत्सृज्य धात्वर्थे निपतति, न च भावनां मुक्त्वाऽन्यत्र पुरुषः प्रवर्तते। सा हि पुरुषस्य स्वव्यापारो धात्वर्थस्तु कदा चित्कर्माश्रितोऽपि भवति। यथाऽयमेव प्रक्षेपो ह्यवदानाश्रितः, न चान्यदीयं व्यापारमन्यः शक्नोति कर्तुमित्यवश्यं भावनाविशेषणत्वादेव दध्यादिवद्धात्वर्थो विधातव्यः। इदं च 502 भावार्थाधिकरणेऽभिहितं यथा न धात्वर्थः साध्यत्वेन विधीयत इति। न ह्यकरणभूतोऽसौ साध्यापेक्षत्वाद्वाक्यान्तरेणापि फले विधातुं शक्येत। “सोमेन यजेत”। इत्यत्रापि तद्भूताधिकरणोक्तेन मार्गेण धात्वर्थकारकाणामरुणैकहायन्यादिवत्परस्परेणासंबध्य भावनासंबद्धानामुत्तरकालं परस्परोपकारित्वम्। तथा च सप्तमनवमाद्ययोर्वक्ष्यतीति न विशिष्टधात्वर्थविधानम्। भावनां च प्रति यागस्य करणत्वाद् द्रव्यं प्रति कर्मत्वे सति, *“ऐकशब्द्ये परार्थवत्” इत्येतदापद्यत इत्ययुक्तमेतत्। तथा व्रीहीन्प्रोक्षतीत्यत्र न प्रोक्षणेन व्रीहीनिति कश्चित्संबन्धः। तेनोभयोः करोत्यर्थसंबन्धान्न धात्वर्थो व्रीहिषु विधीयते। यदि तु भावनाभिप्रायेणान्यत्र विधानमुच्यते तत्सर्वत्राविशिष्टम्। न चास्य विशिष्टविधानाद्दुर्बलत्वमस्तीति तृतीयस्थाननिवेशोऽप्ययुक्तः। पक्षद्वयोक्तमपि निराकरणं “दशापवित्रेण ग्रहं संमार्ष्टि” इत्यत्राप्यापद्यत इत्ययुक्तमन्यत्र विशिष्टधात्वर्थविधानम्। दध्ना जुहोति इत्यत्रापि न कदा चिद्दधि होमे करोतीत्ययमर्थः शब्देनोच्यते। न हि होमस्याधिकरणत्वं शब्दाद्वस्तुतो वा सिद्धं, न च दध्नः कर्तव्यता, नित्यं करणात्मकत्वात्। इयमपि च श्रुतिर्द्विविधादपि विशिष्टविधेर्बलीयसी, एकविधिसंभवेऽनेकशक्तिकत्वानुपपत्तेरुभयपक्षभाविनश्च विप्रकृष्टार्थविधेरपर्यनुयोज्यत्वात्संनिकृष्टासंभवकृतमेव चास्य विप्रकृष्टस्य ग्रहणं, तत्रोभयाश्रयणे युगपद्विप्रतिषिद्धसंभवासंभवापत्तिरगत्यैव गृह्यतेऽन्यत्र विशिष्टधात्वर्थविधा नान्नातिगुर्व्येवेति न पञ्चमे स्थाने निवेशयितव्या। कामं वा शुद्धधात्वर्थविधानात्तस्य वाऽन्यत्र विधेरनन्तरा कर्तव्या। यत्तु “प्राकाशावध्वर्यवे ददाति” इत्यनेन ददातिधात्वर्थे प्राकाशाध्वर्युसंबन्धो विधीयत इति। तदयुक्तम्। वचनव्यक्त्यविवेकात्। सर्वत्र हि यच्छब्देनानूद्यमानमुपनिबध्य तच्छब्दयुक्तं विधेयमुपनीयते। तदिह यदि तावद्यद्ददातीत्यत्राध्वर्युप्राकाशयोः संबन्ध इति विधीयते ततः सकलदानानुवादात्समस्तदक्षिणाविकारप्रसङ्गः। प्रत्ययस्य चानेकविधिशक्तिकल्पना चोदिते सति कर्मण्यपरिहृतैव। संबन्धो हि विधीयमानः संबन्धिनं तावदाक्षिपेत्, धात्वर्थे तु पुनः स विधातव्य एव संबन्धी। अन्यथा संबन्धस्यैव संबन्धी शेषः स्यात्। न क्रियायाः। तत्रैतत्स्याद्धात्वर्थानुरक्तः प्रत्ययो विदधदवश्यमेव तत्र विधास्यतीति। एवं तर्ह्युक्त-

८ च] ( अ. २ पा. १ अ. १ )
१० णोक्तेन] ( अ. १ पा. १ अ. ७ )
१३ *] ( अ. १ पा. ४ अ. ५ सू॰ ८ )
२६ तु] प्राकाशो नाम सुवर्णदर्पणम्।

रयोरपि श्रुत्योरत्रैवान्तर्भावाद्भेदेनोपादानं व्यर्थं, न हि “वायव्यं श्वेतमालमेत” “दध्नेन्द्रियकामस्य जुहुयात्”। इति धात्वर्थाननुरक्तः प्रत्ययः संबन्धं विदधातीति। प्रकृतिलिङ्गमात्रफलश्चाऽऽलभतिरुच्चार्यमाणो न द्रव्यदेवतासंबन्धिविधावात्मानुरञ्जनेन किं चिदुपकरोति न चाऽसौ संबन्ध आलभतिना संपादयितुं शक्यो यागविषयत्वाद्द्रव्यदेवतयोः। यदि चान्य संबन्धकरणे प्र- 503
त्ययोच्चारणसिद्धिव्यतिरिक्तं किं चिद् धातुः कुर्यात्ततो दधीन्द्रियसंबन्धविधाने किमिति होमः परित्यज्येत, किमिति वा प्रकरणलभ्योऽभ्युपगम्येत। तस्मान्न धात्वर्थेऽन्यसंबन्धविधिः। पूर्ववच्च धात्वर्थाधिकरणता कारककर्त्तव्यता च निराकर्त्तव्या। न च धात्वर्थे संबन्धस्यापि प्राग्भावनासंगतेर्विधिरित्युक्तम्। एवं तावन्न दानमात्रे संबन्धविधिः। अथाध्वर्युविशिष्टं दानमनूद्यतामध्वर्युर्वा तिद्विशिष्टः। एवमपि विशिष्टानुवादाद्वाक्यभेदः। शुद्धाध्वर्य्वनुवादे तु यद्यपि संप्रदानश्रुतेरर्थाद्दानमाक्षिप्यते तथाऽपि संप्रदानसंप्रदेयसंबन्धस्य ददातिमन्तरेणानुपपद्यमानत्वाद् द्रव्यदेवतासंबन्धादिव यजेः कल्पनमिति न धात्वर्थेऽन्यसंबन्ध इति वचनव्यक्तिः संभवति। अवश्यं चात्र दानाध्वर्य्वोश्चोदकेन प्राप्तत्वात्प्राकाशावेव विधातव्यौ। तत्रार्थात्संबन्धविधिरिति न श्रुतित्वोपन्यासो घटते। वक्ष्यति चैतज्ज्ञाघन्यधिकरणे यत्रान्यतरदप्राप्तं तत्रैवेतरोद्देशेनेतरविधिरर्थात्संबन्ध उभयप्राप्तावनुभयप्राप्तौ वा केवलसंबन्धविधानमिति। तिसृणामपि च संबन्धविधिश्रुतीनां प्रत्ययविक्षेपसाम्यान्न बलाबले कश्चिद्विशेषो, नापि समवायविरोधसंभवो यत्र तज्ज्ञानमुपयुज्यत इति मन्दफलं क्रमगणनोपन्यासस्य। तस्मात्प्रस्तुताधिकरणन्यायेन सर्वत्र विशिष्टभावनाविधिरेव तत्त्वम्। इतरत्तु तत्र तत्र स्थूलबुद्धिप्रतिपादनोपायमात्रं भाष्यकारेण कृतमिति द्रष्टव्यम्। यच्च सन्निकर्षविप्रकर्षाभिधानं तद्भावनास्थ एव विधित्वे कारकाणां भवनाविशेषणत्वं प्रतीति मन्तव्यम्। कथं पुनः प्राप्ता सती भावना विधीयते। विशिष्टा न प्राप्तेति तादात्म्येन विधास्यते। फलतश्च तदा विशेषणार्थो विधिरिति व्यपदेक्ष्यते। नन्वेवं सति विशेषणेष्वनवतरन्विधायको भावनाद्वारेणापूर्वविधिवत्प्राप्तकर्मविधानेऽप्यनेकं विधातुं समर्थ इति “चोदिते हि तदर्थत्वात्तस्य तस्योपदिश्येत” इत्यस्याविषयत्वं प्रसज्येत। नैष दोषः। पश्य॥
§ 4038

विधित्वे भावनास्थेऽपि तादर्थ्यं प्रविभज्यते।
विशेष्णफले चास्मिन्वाक्यभेदो भविष्यति॥§ 4040

यदा हि भावनारूढं विधित्वं भावनार्थत्वेनैव गृह्यते तदाऽर्थाद्विशेपणविधौ सति अवाक्यभेदं वक्ष्यामः। यदा तु तद्विशेषणार्थमित्यवधार्यते तदा भावनायाः संनिहितप्रोषितत्वादनेकविशेषणयोगे सति यदर्थं विधित्वमवसीयते

१६ ति] ( अ॰ ३ पा॰ ३ अ॰ १० ) इत्यत्र भाष्यकार इति शेषः।

२६ इति] ( अ॰ २ पा॰ २ अ॰ ३ सू॰ ६ )।

तस्यैवैकस्य विधानं नेतरस्य तद्देशस्यापि चक्षुषेव स्पर्शादेरिति वाक्यभेदो
भविष्यति। सर्वत्र समानदेशमपि विधित्वं फलतः प्रचलितमिवैकत्रोपसंहृतं
दर्शितम् तस्मादविरोधः। यस्त्वभ्युदितेष्टिप्राकाशादिविधिष्वनेकार्थविधिदोषः स
504 सर्वपक्षेषु तुल्यः। यथा चास्मत्पक्षे न भविष्टि तथा तदधिकरणेष्वेव व-
क्ष्यामः। **भवेदेतद्विशिंष्यादिति**। यदि साक्षाद्गुणो न विधीयते ततः पुरुष-
स्य तत्राप्रवर्त्तितत्वात्तत्परित्यागेनाप्यनुतिष्ठतः कृतार्थता स्यादिति मन्यते। **तत्र**
**किं भविष्यतीति** वाक्यलक्षणविध्यभिप्रायेण प्रश्नः। **अव्याप्रियमाणे** इति—
स्वाभिप्रायविवरणम्। स एव वा स्वयं कर्म निरूपयति। तेनैवाभिप्रायेण पुनः
प्रश्नोत्तरे **गुणवचनसन्निधिरिति**। तथा **कथं पुन**रिति। *तुल्यं च सांप्रदायिक-
म्, इत्यभिप्रायेण। *असति त्वर्थे किमिति। त्वयैवं क्रियते येन तदानर्थ-
क्यमापद्यते। मत्पक्षे तु सत्यर्थे नानर्थक्यं भविष्यति। **एवं तर्हीति**। वाक्येन
विशिष्टायां भावनायां प्रवर्तमानः श्रौतोऽपि विधिर्वाक्याद् भविष्यतीत्युच्यते।
परस्तु यत्प्रसादेन स विधीयते सैव तावद्विधीयतामिति **श्रुत्यर्थे सति न**
**वाक्यार्थ** इत्याह— **सत्यमेतदिति**। विधिशक्तिसंक्रान्तिं न चेदन्येन शिष्टा
इति च दर्शयति। **कथ**मिति सानुशयः प्रश्नः स्वोक्तिर्वा। तस्मात्तत्संनिधेर्गुण-
स्य भावनानुप्रवेशाद्विधेयत्वमथवा गुणसन्निधेः शक्तिसंचरणम्, भावनाघात्वर्थ-
505 प्रापिसन्निधेर्वा श्रुत्यविरोधाद् गुणविधानम्। जुहोतेरिति स्पष्टमपि धातूच्चारण-
मनवबुध्य सकलाख्यातानुवादाभिप्रायेणाऽऽह—**यदि जुहोतीत्यनुवाद** इति।
**दधिशब्देनेति मा वोचत** इति। *वाजपेयाधिकरणवद्ग्रन्थच्छाया योजनीया।
प्रत्ययो विधिरेव धात्वर्थोऽनुवाद इति विवेकः। **यदि विधायकाविति**—भाव-
नायां प्राप्तायां कथं विधानमित्यभिप्रायः। **वाक्यार्थो यस्तं विधातु-** मिति।
दध्नः पदार्थत्वान्नैव वाक्यार्थत्वं संभवतीत्येतदपि दधिविशिष्टभावनाभिप्रायमेव।
**तस्मात्कर्मान्तरचोदने** इति—उपांशुयाजवदेव व्याख्येयम्। जुहोत्याघारय-
तिलक्षितासाधारणार्थविषयत्वाच्च संज्ञोपबन्धसिद्धिः। इह विधीयमानत्वेन च
कर्मान्तरेभ्यो व्यवच्छेदः। प्रकरणाच्च द्रव्यदेवतं लप्स्यत इति नारूपत्व-
म्। न चोत्पत्तिवाक्ये कथंभावोनास्ति फलसंबन्धं तु यावत्प्रतीक्षिष्यते। न
चाविहितद्रव्यदेवतस्य फलविध्यनुपपत्तिः। होममात्रतया विहितस्य पश्चाद-
पि तद्ग्रहणाविरोधात्। इष्यते चैवमादौ संनिधिवशेनाप्यनुवादः। प्राप्त्यपेक्षो
ह्यसौ यथा कथंचित्प्रत्यभिज्ञानं प्रार्थयते। न च परप्रकरणे पाठादाघार-
स्यावान्तरप्रकरणलोपः। तस्यापि ह्याख्यातप्रत्ययवशेन किं केन कथमित्य-
स्त्यपेक्षा। तेन शक्यं प्रकरणेन द्रव्यदेवतविधानम्। बहूनि चादृष्टानि त्वया

---

८ र्म] आशंकिता अन्येनापृष्ठ एव स्वयमनुष्ठानं निरूपयतीयर्थः।
९ *] ( अ° १ पा२ अ° १ सू° ८ )।
१० *] असतित्वर्थे किमिति भाष्यं सिद्धान्तेऽपि दध्यदिवाक्ये विधेर्भावनारूढत्वेऽपि भावनायाः स्वरूपेण प्राप्तत्वाद्गुणानुष्ठानार्थत्वावगतेरयुक्तमिवभास-मानं, मध्यव्रतीकेन पूर्वपक्षएवाऽऽनर्थक्यापादनपरतया व्याचष्टे—असतीति। ( अ° २ पा° अ° ३ सू° ६)।
१९ *] ( अ° १ पा° ४ अ° ५ )।

कल्प्यानि। न च तण्डुलादिहोमानामूर्ध्वाद्याघाराणां वा विहिता देवताऽस्ति। न च देवतावद्द्रव्यम्। सर्वे चैतेऽपूर्वकर्मविधित्वान्नान्योन्यं गुणविधयो भवन्ति। ततो यथोक्तमेमेवास्तु। यत्तु क्रियायाः कर्मत्वनिर्देशो न युज्यत इति। अत्रोच्यते। भवति हि क्रियाणामपि संकल्पादिभिराप्यमानत्वात्कर्मत्वम्। तेन जुहोत्याक्षिप्तसंकल्पाद्यपेक्षयाऽग्निहोत्रमिति द्वितीयानिर्देशादविरोधः। ननु च 'यदग्नये च प्रजापतये च सायं जुहोति' 'यत्सूर्याय च प्रजापतये च प्रातः' इत्यनयोरनेकगुणत्वात् 'चोदना वा गुणानां युगपच्छास्त्रात्' इत्येतदापद्यते। तथा नामेति केचित्। एवं च यथापूर्वमाहुती जुहुयात्साय- 506
मग्निहोत्रं प्रातरग्निहोत्रमित्येवमादयो भेदव्यवहाराः सिद्धा भवन्ति। न चात्र ज्योतिष्टोमस्येव ग्रहाभ्यासेष्ववयवबुद्धिः। उभयत्रापि साकल्यप्रतीतेः। एवं च दर्शपूर्णमासवदुभयत्र समस्तेतिकर्तव्यतावृत्तिरुपपद्यते। अन्यथा तु पशुतन्त्रविप्रकर्षन्यायेन सकृत्कृतैवोपकुर्यात्। न चैककर्मत्वे किंचित्प्रयोजनमस्ति। तस्माद्द्वयोराहुत्योः समुदायानुवाद इति। अत्राभिधीयते। § 4041

समुदायानुवादस्य न तावद्दृश्यते फलम्।
प्रयोगवचनैकत्वं लप्स्यते राजसूयवत्॥ § 4043

यथैव हि समुदायानुवादत्वमवयवशिष्टसमुदायैकत्वद्वारेण भवत्येवमेव प्रयोगवाक्यगतम् 'अग्निहोत्रं जुहुयात्स्वर्गकाम' इति भविष्यति। यथा च 'राजसूयेन स्वाराज्यकाम' इति विनाऽप्यन्येन समुदायानुवादेन सिद्धिरेवमिहापीति। § 4044

नन्वेवं सत्यापराग्निकानामपि होमानां प्रधानत्वं स्यात्। समुदायानुवादे वा केन तेषामपकर्षः। न हि यथा पौर्णमास्यमावास्याशब्दयोः प्रयाजादिभ्यः कालसंयोगेनावच्छेदस्तथेह केनचित्क्रियते। नन्वग्नये होत्रमस्मिन्निति विशेषणं भविष्यति। न। तेषामप्यग्निदेवत्यत्वात्। अपि चैवं सत्यनिष्टं तव प्रसज्येत। प्रातराहुतेरग्निसंयोगाभावादनग्निहोत्रत्वेनाङ्गत्वं प्राप्नोति। तस्मात्सत्यसति वा समुदायानुवादे न कश्चिद्विशेषः। तथा यद्यापराग्निकानां होमानां भेदो यदि वा सर्वाग्निष्वेकमेवाभ्यस्तकर्म क्रियते सर्वथाऽग्निहोत्रशब्देन संनिध्यग्निसंयोगहोमत्वाविशेषात्फलसंयोगेन समप्रधानत्वम्। तथा चैकेषां सर्वसामानाधिकरण्येनाग्निहोत्रशब्दप्रयोगो गार्हपत्यान्वाहार्यपचनयोश्चतस्रश्चतस्र आहुतीराहवनीये च द्वे विधायाऽऽह 'य एवं विद्वान्विराड्विपन्नमग्निहोत्रं जुहोति' इति। तस्मादनन्यप्रयोजनत्वादग्निहोत्रं जुहोतीत्ययमेव कर्मविधिः। ततश्च तण्डुलादिवाक्यवदेव गार्हपत्यादिसंयोगस्य गुणार्थत्वान्न कर्मभेदहेतुरस्ति। तदेव हि प्रकृतं कर्म तत्र तत्र प्रत्यभिजानीमः। कस्मात्पुनरेककर्मविषयत्वाद्दध्यादिवदेवाग्नयो न विकल्प्यन्ते। केचिदाहुः। अदृष्टार्थत्वादिति। निराधारस्यापि हि प्रक्षेपस्याप्रतिष्ठेऽपि द्रव्ये संभवाददृष्टार्थोऽग्निसंयोगः। तच्च

२८ योगो] अग्निहोत्रशब्दस्य सर्वविषयत्वमापादयन्नुपपन्नो भवतीति शेषः।

सर्वमदृष्टं संभावनीयमित्यावर्तते होमः। एवं तु सति पदादिभिरप्याहवनीयो न बाध्येत। अथ तत्र सकृद्धोमश्रवणादावृत्तिभयाद्बाधः, इहापि तत्तुल्यमिति विकल्पप्रसंगः। तस्माद्विर द्वंपन्नमित्येतस्मादेव वचनात् 'संख्याविहितेषु तु समुच्चयः' इत्यनेन न्यायेन समुच्चयः। अन्यथा हि। § 4045

507 अग्निभ्योऽपूर्वसिद्धिः स्यादाधारत्वोपलक्षिता।
न चैकेनावरुद्धत्वादाधारान्तरसंभवः॥§ 4047

सत्यप्यग्निसंयोगस्यादृष्टार्थत्वे सप्तमीश्रवणादाधारत्वप्रतिपत्तिद्वारं तदित्यवगमात्तस्य च प्रत्यक्षप्रतीतेरेकेनावरुद्धे कर्मणि नान्यत्संभवतीति विज्ञायते। तेनैकान्तेन विकल्पः प्राप्नोत्येव। कस्मात्पुनः 'तिस्र आहुतीर्जुहोति' इत्यादिवत्संख्यया कर्मभेदो न भवति। 'तिस्र आहुतीरित्यादिषु। इयं पुनरवधारिते कर्मण्युपजायमाना 'एकादश प्रयाजान्' इतिवदभ्यासेनैव पूर्येतेति न स्वरूपभेदाय प्रभवति। तेनैकमेव सर्वाग्निष्वभ्यस्तं कर्मेति निश्चीयते। यत्तु सायंप्रातर्वाक्ययोरनेकार्थत्वात्कर्मविधित्वमिति। तत्र ब्रूमः। 'सायं जुहोति' 'प्रातर्जुहोति' इति वाक्यान्तरप्राप्तः कालो देवताव्यवस्थापरे वाक्ये संकीर्त्यते। नन्वेवमपि कालविशिष्टकर्मानुवादाद्वाक्यभेदः स्यात्। न। प्रकरणलब्धे कर्मणि कालमात्रे देवताविधानात्। स तु कालो न स्वरूपेण देवतया संबध्यत इति प्रकरणलभ्यकर्मानुरक्तः संबध्यते। अथ वा विधीयमानसंप्रदानभूतदेवताकाङ्क्षितप्रकृतहोमपर्युपस्थापनेन कालस्योपयोगः। न च लक्षणया लभ्यमानो होमो वाक्यं भिनत्ति। न च सायंकालेनान्यत्र स्थितो लक्षितः। तेन सायंहोमस्याग्निप्रजापती भविष्यतः। एवं प्रातर्होमस्य सूर्यप्रजापती इति सिद्धम्। नन्वेवमपि भिन्नपदोपात्ते द्वे द्वे देवते विदधती वाक्ये भिद्येयाताम्। न। एककारकत्वादिति केचित्। कारकान्यत्वे हि विधेर्व्यापारभेदो भवति। एककारकनिबन्धनं त्वर्थसहस्रमप्येकप्रयत्नसाध्यमित्युक्तम्। अत्राभिधीयते। § 4048

अनेकपदसंबद्धं यद्येकमपि कारकम्।
तथाऽपि तदनावृत्तेः प्रत्ययैर्न विधीयते॥§ 4050

विभक्त्या हि कारकं प्रत्याय्यते। सा च यत्रैकाऽग्नीषोमादौ तत्र सकृदेव प्रत्ययस्य व्यापारो भवति। यत्र पुनर्भिन्नविभक्तिसंबद्धानेकपदोपात्तमेकमपि कारकं भवति यथाऽत्रैवाग्नये च प्रजापतये चेति, तत्र युगप-

३ नात्] ( अ° १२ पा° ३ सू° ३० )।
२६ ते] अयं चात्र श्लोकार्थः। अग्नये दात्र इतिवद्विशेषणविशेष्यभावाङ्गीकरणेन प्रजापतित्वगुणविशिष्टस्याग्नेर्देवतात्वाद्यद्यप्येकं कारकं तथाप्यनेककारकपदोपात्तयोरग्निप्रजापतिरूपकारकयोर्विभक्तिश्रुत्या क्रियान्वयप्रतीतेस्ततः प्राग्विशेषणविशेष्यभावानवगमात्प्रत्येकं विधिव्यापारावश्यंभावाद्विधायकप्रत्ययावृत्तिः स्यादेवेति वाक्यभेदो दुर्निवारः। वस्तुतस्तु प्रजापतेः स्वातन्त्र्येण देवतात्वप्रसिद्धेर्विशेषणत्वाभावेन कारकैक्यमपि नास्तीति सुदृढो वाक्यभेद इति।

त्प्रत्यवेक्षणाभावादवश्यं भेदेनाग्निप्रजापती प्रत्ययेनाऽऽलोचयितव्यौ। कारकविभक्तिर्हि नामपदार्थालोचनाय प्रत्ययं प्रयुङ्क्ते सा च नानोच्चारितानां 508 नैव प्रयुङ्क्त इत्यावृत्तिप्रसङ्गः। तस्मान्नैष परिहार इत्येवमभिधीयते। वाक्यद्वयेऽप्यस्मिन्प्रजापतिरेवैको विधीयते। अग्निसूर्ययोः पुनर्मन्त्रवर्णादेव प्राप्तिः, *वाक्यान्त रेणैवंदेवत्यौ मन्त्रौ विहितौ। ताभ्यामेव च ते देवते प्राप्ते सत्यौ प्रजापतिविधावौचित्येन स्तुत्यर्थमुपादीयेते। यदपि च ‘तत्प्रख्यं चान्यशास्त्रम्’ इत्यत्रैते वाक्ये निदर्शिते तदपि मन्त्रवर्णप्राप्तिद्योतनार्थत्वेन द्रष्टव्यम्। एवं मन्त्रविध्योर्न पौनरुक्त्यं भविष्यति। अन्यथा तदर्थशास्त्रदोषपरिहारप्रयोजनगुणविधिपरिसंख्यार्थवादादीनामन्यतमेऽतिक्लेशः स्यात्। तस्मात्तत्र वाक्यभेद इति सिद्धम्। यत्तु सायंप्रातर्होमयोरवयवबुद्धिर्नास्तीति। दाक्षायणयज्ञादिवत्सकलकर्मावृत्तिप्रज्ञानात्तदित्यवगन्तव्यम्। नन्वेवं सति सकलकर्मपरिच्छेदात्मकत्वेन सायंप्रातःकालयोस्तुल्यार्थत्वाद्विकल्पे सति सायं प्रातर्वाऽग्निहोत्रं होतव्यं नोभयत्रेति प्राप्नोति। नैतदस्ति। यावज्जीवचोदनया तावज्जीवता सायं हुते पुनर्जीवत एव प्रातःकाले सति समस्तनिमित्तोपजननान्नैमित्तिकहोमकरणं भविष्यति। सत्यमेवमपि सिध्यति। अयं तु विशेषो यदा सायं प्रातरभ्यस्तोऽयमेक एव प्रयोगो भवति। तदा सायं होमे कृते यदा नाम यजमानस्य कदाचिदापद्भवति तदा यथा कथंचित्प्रातर्होमः कर्तव्यः प्रक्रान्तासमाप्तिनिमित्तदोषपरिहारार्थम्। अथ तु वसन्ते ज्योतिष्टोमवत्सायंकाले समाप्तं कर्म ततो नावश्यं प्रातर्होमः कर्तव्यः। किं च। § 4051

काम्यः सर्वाङ्गसंयुक्तः प्रयोगश्च फलार्थिना।
सायंप्रातर्विकल्पेन प्रयोक्तव्यस्तदा भवेत्॥§ 4053

अभ्यस्तैककर्मपक्षे तु कालद्वयेऽपि प्रयत्नेनावैगुण्यं संपादनीयम्। कथं पुनर्न विकल्प इति। वचनकृतात्समुच्चयादिति ब्रूमः। ‘प्रवर्ग्यो वा एष’ इति हि प्रकृत्य ब्रवीति ‘स वै सायं च प्रातश्च जुहोति’ इति। भेदपक्षेऽपि चशब्दात्समुच्चयः। न च समुच्चये सति साहित्यापत्तिर्भवति। अनुपादेयत्वात्कालस्येत्यविरोधः। प्राप्तयोश्च वचनान्तरेण कालयोः समुच्चयार्थमेवेदं वाक्यमिति न वाक्यभेददोषः। तस्मादभ्यस्तमेकं कर्म। यत्त्वङ्गानां भेदेन प्रयोगो न प्राप्नोतीति। नैष दोषः। कालं प्रति हि कर्मोपादीयमानं विवक्षिताङ्गसंयोगं भवति। तेन सायंतनस्य प्रधानस्य तत्कालाङ्गान्येवोपकुर्वन्ति नान्यकालानि। 509 वैगुण्यात्। एवं प्रातस्तनस्यापीत्यावर्तते। यत्तु प्रयोजनं नास्तीति। तत्रोच्यते। कुण्डपायिनामयने ‘मासमग्निहोत्रं जुहोति’ इत्येककर्मविधानादेकेतिकर्तव्य-

५ *] अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति। सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातरिति वाक्यद्वयेनेत्यर्थः।

६ च] ( अ॰ १ पा॰ ४ अ॰ ३ सू॰ ४ )।

८ त] यदग्नये च यत्सूर्याय चेतिवाक्यस्याग्निसूर्यप्रापकत्वे तदर्थशास्त्रत्वाख्यदोषपरिहारकं यत्, मन्त्राधिकरणोक्तगुणविधिपरिसंख्यार्थवादाद्यन्यतमरूपं प्रयोजनं तस्मिन् कल्प्यमानेऽतिक्लेशः स्यादित्यर्थः।

तापेक्षणे सति सायंहोमस्य प्रातर्होमस्य वा धर्मा आगच्छन्तीत्येकधर्मयुक्तं सकृदेव प्रयुज्येत। अभेदे तु यथाप्रकृतीति॥ १६॥ § 4054

इति आधाराग्निहोत्राधिकरणम्॥ ५॥

## ०.०.५० पशुसोमाधिकरणम्

*पशोर्दुष्प्रतिपादनतरत्वात्पूर्वाभिधानम्। द्वौ चात्र शब्दौ समुदायानुवादत्वेनाऽऽशङ्क्येते पशुशब्दस्तदग्नीषोमसंबन्धानुमितश्च यजिः। ईदृशं ह्येतद्वाक्यं श्रुतानुमितैकदेशनिष्पन्नं यदग्नीषोमीयेण पशुना यजेतेति। तत्र किं हृदयादीनां पशुशब्दोऽनुवादोऽवद्यत्यनुमितानां यागानां च यजिः, उतापूर्वः पशुर्यागश्च विधीयते तत्रेतरे गुणविधय इति संदिह्यते। तथैन्द्रवायवादिवाक्यैर्द्रव्यदेवतासंबन्धानुमिता यागास्तद्गतश्च सोमरसः किं यजतिसोमशब्दाभ्यामनूद्यते किं वा द्रव्ययुक्तं कर्म विधीयत इति। § 4056

510 **किमवद्यतिगृह्णातिभ्यां चोदितानामिति**। अनयोर्यागपर्यायत्वाभावात्तत्संबन्धानुमितानां तद्गताख्यातप्रत्ययविहितानां वेत्येतत्प्रदर्शनार्थं तद्भाष्यम्। आलभतिरपि च तदनुमितयज्युपलक्षणार्थः। अथ वाऽवद्यतौ नैव यागानुवाद इत्युपन्यस्यते, कथं तर्हि, तदाक्षिप्तस्य संस्पर्शनस्याऽऽलभतिरनुवादस्तद्द्वारेणैव च प्रत्यवदानं देवतासंयोगात्तावतां च यागानामनुमानमुत पशुसंयुक्त एको यागोऽनुमीयत इति। तथा सोमेऽप्ययमेव यागो यद्देवतोद्देशेन द्रव्यग्रहणमिति। तथा सति यथाश्रुतेनैव भाष्येण संदेहोपन्यासः। तत्र पौर्णमासीवदेव समुदायानुवादत्वम्। तथा हि। § 4057

यथाऽऽग्नेयादिवाक्यानां न प्राग्यागानुमानतः।
स्वार्थपर्यवसायित्वं तथा सोमेऽपि गम्यताम्॥ § 4059

न ह्यैन्द्रवायवमित्यादिद्रव्यदेवतासंयोगोऽननुमिते यागे निराकाङ्क्षो न भवति। न चापरिपूर्णं वाक्यं वाक्यान्तरमाकाङ्क्षति येनानुमानवेलायां 'सोमेन यजेत' इत्ययमनुप्रविशेत्। एतद्विहितस्य वा देवताविरहादरूपस्य सतस्तैर्देवता विधीयते। यदा तु तैः कल्पितो यजिस्तदा नैव यागस्य यागान्तरं रूपं भवतीति बलात्प्रकृतानुवादत्वमापद्यते। यश्चात्र पक्षे विशिष्टविध्याश्रयणदोषः

१ *] 'आधाराग्निहोत्रमरूपत्वात्' इति सूत्रे तयोरङ्गाङ्गिभावाभावेन, अभ्यर्हितं पूर्वं निपततीत्यस्याविषयत्वादल्पाच्तरत्वेनाऽऽघारशब्दस्य पूर्वनिपातो युक्तः। अस्मिंस्तु सूत्रे सोमस्य प्राधान्येनाभ्यर्हितत्वात्पशोः पूर्वाभिधानमयुक्तमाशङ्क्य न्यायप्रधाने चास्मिन् शास्त्रे न्यायव्युत्पादनादरविषयस्यैवाभ्यर्हितत्वात् पशुवाक्ये च पूर्वपक्षस्यातिक्लिष्टत्वेन न्यायव्युत्पादनादरविषयत्वात्पशोः पूर्वनिपातो युक्त इति समादधाति—पशोरित्यादिना।

स भवत्पक्षेऽप्यविशिष्टः सोमद्रव्यकयागविधानात्। अपि च तवेह चैन्द्रवाय-वादिवाक्येषु च। मत्पक्षे तु तेष्वेव केवलेष्विति विशेषः। किं च। § 4060

यादृशं द्रव्यसंबद्धं भवान्कर्म विधित्सति।
तादृशस्याविधेयत्वमनन्तरमुदाहृतम्॥ § 4062

एकत्रैवेदृशे गुणे श्रूयमाणे विधिशक्तिः संक्रामतीत्यग्निहोत्रेऽभिहितम्। अतो न कर्मानुवादबुद्धिरपैतीत्यनुवादत्वं यजेः। तत्र सोमशब्देन द्रव्यमेव गृह्णातिना सामान्याक्षिप्तं नियम्यते। § 4063

अथवा 'सोमं क्रीणाति' 'सोममभिषुणोति' 'सोमं पावयति' इत्यादिभिः प्राकरणिकैर्गुणवाक्यैः सोमरसे कल्पिते गृह्णातिचोदनाः प्रवृत्ता इति। § 4064
सोमो न विधीयते। ततश्च स्वाभाविककरणत्वयुक्तयागसामानाधिकर- 511
ण्यात् 'तत्प्रख्यं चान्यशास्त्रम्' इति नामधेयी भवति। ननु ज्योतिष्टोम इत्यपरं नामधेयमस्त्येव। यदीदमप्यवगम्यते किं नो बाध्यते। तथा च याज्ञिकानां व्यवहारेषु नामद्वयमुपलभामहे। समस्तवाक्यानुवादस्य तु तदेव प्रयोजनं यत्प्रयोगवाक्यगतैकत्वोपजननं नाभ। तस्मादनुवदि इति। भवेदत्र द्रव्यदेवतासंयोगादेवम्। पशौ तु 'वत्समालभेत' इत्येतत्सदृशेन देवतारहितहृदयादिद्रव्यमात्रसंयोगिनाऽवद्यतिना कथं यागविधानं, कथं वा हृदयाद्यनुवादः पशुग्रहणेनेति वक्तव्यम्। उच्यते। § 4065

यथैव पशुसामान्ये मन्त्राच्छागः प्रतीयते।
तथैव हृदयादीनां ममासौ प्रकृतिर्मतः॥ § 4067

हृदयादिभिः प्रकृतिद्रव्येऽपेक्षिते मन्त्रवर्णाच्छागे लब्धे तदन्तर्गतं पशुत्वं तावदनूद्यते तत्र तु देवतायां विहितायां यागो विधीयतां नाम। अथवा 'सांनाय्यं वा तत्प्रभवत्वात्' इत्यनेनैव न्यायेनायमवद्यतिः सारूप्यात्सांनाय्यावद्यतिप्रकृतिः। स च दर्शपूर्णमास यागद्रव्यसंस्कारार्थः प्रसिद्धः। तत्र यदि हृदयादीनि यागद्रव्याणि ततस्तत्संयोगभाञ्जि भवन्ति नान्यथा। तेन यथैव पूतीकानामभिषवसंबन्धे श्रूयमाणे तदर्हत्वान्यथाऽनुपपत्त्या यागसंगतिरश्रूयमाणाऽपि गम्यते, तथाऽत्रेत्युत्प्रेक्ष्यमाणे यागमनुमाय तदनुपपत्तेर्यागोऽप्यस्तीति गम्यते, तथाऽनुमितानां च प्रतिद्रव्यमवस्थितानां समुदायोऽनूद्यते। साधारणश्चायं तवाप्यानुमानिकयागाभ्युपगम इति नैतेनास्मत्पक्षदौर्बल्यम्। सोमयागैकत्वे तुल्यार्थानामिन्द्रवाय्वादीनां विकल्पे सति क्रमसमुच्चयदर्शनं नोपपद्यते। पश्य।

---

११ ण्यात्] ( अ. १ पा॰ ४ अ॰ ३ सू॰ ४ )।
११ धेयी] द्रव्ये रूढत्वात्सोमशब्दो यागनामत्वेनानवभासमानोऽपि यागनामधेयमानर्थक्यपरिहारार्थमङ्गीकार्यमिति च्विप्रत्ययनेन सूच्यते।
१३ याज्ञिकानां] स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपुर्णमासौ चातुर्मास्यानि पशु सोमः। को यज्ञः अग्निष्टोमो ज्योतिष्ठोम इत्यादिव्यवहारोष्वित्यर्थः।
२२ वा] ( अ॰ ८ पा॰ २ अ॰ २ सू॰ १३ )।

512 यथैकबन्धनार्थत्वात्पलाशखदिरादयः।
तत्संबन्धे विकल्पन्ते यागेऽस्मिन्देवतास्तथा॥§ 4070

मम तु भिन्नयागविषयत्वाद्देवतानां यागानां चादृष्टार्थानां युगपदेकशब्देन फले विधानादुपपत्स्यते। पश्चावपि ‘हृदयस्याग्रेऽवद्यत्यथ जिह्वाया’ इति क्रमदर्शनम् ‘एकादश वै पशोरवदानानि’ इति च समुच्चयदर्शनं सदपि नोपात्तम्। एकयागत्वेऽपि समस्तपशु साधनत्वेन तदुपपत्तेः। न हि हृदयादिष्वसमुच्चीयमानेषूत्पत्तिवाक्यश्रुतेन समस्तेन पशुनेष्टं स्यात्। यन्मात्रं तत्र वचनान्तरवशेनापनेष्यते तन्मात्रव्यतिरिक्तेन सर्वेण यष्टव्यमिति न्यायः। सोमे तु नैवं समस्तचोदनोत्पत्तावस्तीत्युदाहियते। तस्मात्समुदायानुवादाविति प्राप्तेऽभिधीयते॥ § 4071

प्रकृतप्रत्यभिज्ञानं वाक्ये यत्रोपलक्ष्यते।
तत्र स्यादनुवादत्वं न चात्रैवं प्रतीयते॥§ 4073

यदि पौर्णमासीवदशेषरूपप्रत्यभिज्ञानं भवेत्ततोऽनुवादः कल्प्येत। यदि वा यजिमात्रस्यानुवादत्वमिष्यते ततः परित्यक्तविशेषणोऽनुवाद इत्यवधार्येत। अत्र पुनः प्रकृता हृदयादिद्रव्यका रसद्रव्यकाश्च यागाः। इमौ च पशुसोमद्रव्यकौ, न चैवं सति प्रत्यभिज्ञानमस्तीत्यनुवादत्वासंभवः। तत्रैतत्स्यात्, विकारेषु प्रकृतिवदुपचारात्, हृदयादिष्वेव रसे च पशुसोमशब्दौ वर्त्स्येते इति तन्न। विना कारणेन लक्षणानाश्रयणात्। विस्पष्टे हि परशब्दसामानाधिकरण्ये सत्यनन्यथासंभवे च जघन्यवृत्तिः शब्दो भवति।
513 न चैतदुभयमप्यस्ति। शक्यं हि मुख्यपशुसोमद्रव्यं यागान्तरं विधातुम्।
न च प्रकृतेष्वनिविशमानावेतौ शब्दौ नोपपद्येते। तेन यद्यपि तावदवद्यतिगृह्णातिभ्यां चोदिता यागास्तथाऽपि कर्मान्तरत्वप्रसङ्गः। कस्मात्तेष्वेव यागेषु स्वद्रव्यप्रकृत्यपेक्षेषु पशुसोमौ न विधीयेते। तत्राऽऽह—**श्रुत्या हि रस ऐन्द्रवायव** इति। § 4074

पशुस्तावद्देवताविधिपरत्वादनुत्पत्तिवाक्ये सति अशक्य एव विधातुमिति नैवोपन्यस्यते। सोमलताऽपि वाक्यविधेया श्रौतरसविरोधे सति न संबध्यते। कथं पुनरनुपात्तद्रव्यविशेषेष्वैन्द्रवायवादिविधिषु रसस्य श्रौतत्वम्। अधिकारलभ्यो ह्यसौ। ततश्च वाक्यप्राप्ता लतैव बलीयसी स्यात्। उच्यते। § 4075

श्रुत्यैव द्रव्यसंबन्धो देवतातद्धितैः कृतः।
अधिकारेण तस्यैव केवलेष्टा विशेष्यता।§ 4077

*गुणश्चापूर्वसंयोगे, इत्यत्राधिकरणे विस्तरेणाभिधास्यते, यथा तद्धितश्रुत्या वाक्यप्रकरणादिलभ्यस्य विशेषस्यैवास्य शब्दवाच्यस्य देवतासंबन्धे कृते

३१ *] ( अ० २ पा. २ अ. ९ सू. २३ )।

कोऽसौ द्रव्यविशेष इत्यपेक्षायां वाक्यप्रकरणादिभिस्तदवाप्तिः केवला न तु तैरेव देवतासंबन्ध इति। किं च। § 4078

उत्पत्तिवाक्यशिष्टश्च रसो वाक्यान्तराल्लता।
प्रकृतापेक्षिणस्तेन दुर्बलैषाऽवगम्यते॥§ 4080

ततश्च गुणादपि ते भेदः प्राप्नोति। *शक्यपरिहारं त्विदम्। कुतः। § 4081

यथैवाष्टाकपालादौ श्रौतेऽपि सति वाक्यतः।
व्रीह्यादयो विधीयन्ते तथा सोमो विधास्यते॥§ 4083

विधीयमानं हि दुर्बलं विरुद्धं बाध्यते नानुगुणम्। अनुगुणश्च सोमो रसस्य प्रकृत्यपेक्षिणस्तादर्थ्येन संबन्धात्। तद्यथाऽऽग्नेयोऽष्टाकपाल इति श्रुतिविहितेऽप्यष्टाकपाले सति व्रीहियवौ विधीयमानौ न विरुध्येते। 514 पुरोडाशापेक्षितप्रकृतिरूपत्वात्। न हि व्रीहीन् गृह्णन्नष्टाकपालं न करोति। तेन चात्र न कर्मान्तरता। तथाऽत्र न सोमे गृह्यमाणे रसः परित्यक्त इत्यविरोधात्पूर्वत्रैव संभवन्न गुणो भेदकः स्यात्। अपि च सिद्धान्तेऽप्येतत्तुल्यमनभिषुतलतादानानभ्युपगमात्। तत्र यथा तव रसप्रकृतिर्लता भवति तथा पूर्वपक्षेऽपि भविष्यति। अपि च विरुद्धतरं तवाऽऽपद्यते। कथम्। § 4084

उत्पत्तिवचनात्सिद्धा लता चेद्यागसाधनम्।
न सा वाक्यान्तरैः पश्चाद्रसीभवितुमर्हति॥§ 4086

रसस्य प्रकृत्या विना निष्पत्त्यभावादाकाङ्क्षितः प्रकृतिसंबन्धो वाक्यान्तरेणापि क्रियमाणो न विरुध्येत। प्रकृतेस्त्वविकृताया एव सामर्थ्यादनपेक्षिता विकारापत्तिरुत्पत्तिवाक्यविरोधिनी न युक्ता वाक्यान्तरैः कर्तुम्। तस्माद्व्रीहियववाक्यमुद्रामुद्रितत्वादनुद्धाट्यैव गुणविधित्वं समुदायानुवादमात्रं निराकार्यं पशौ तन्मात्रेणापि सिद्धेः। सोमे तु व्रीहिवाक्यतुल्यत्वाशङ्कामधिकां निराकर्तुमुत्तरं सूत्रं प्रस्तोतव्यम्। § 4087

अथ वा भक्त्यैव पूर्वोपपत्तिमुत्तरयैव निर्णयः। *पूर्वसूत्रेण वा पूर्वपक्षं परिगृह्योत्तरं तु सूत्रं तुशब्दस्थानचशब्दमुत्तरपक्षे योजयितव्यम्। क-

---

५ *] प्रकृतेषु यागेषु श्रौतरसविरोधाल्लतायाः प्रदेयतया विध्ययोगेऽपि व्रीह्यादिवत्प्रदेयप्रकृतितया विध्युपपत्तेः। श्रुत्या हि रस इत्यादिना भाष्येणोक्तं दूषणं शक्यपरिहारमित्येवं परिहारप्रकारमुपन्यस्यति—शक्यमित्यादिना।

२५ *] द्रव्यसंयोगादित्यस्य पूर्वपक्षपरत्वेऽयमर्थः। हृदयादिवाक्यं—गृहणातिवाक्यं च कर्मचोदना प्रत्येतव्या। अन्यत्रासंभवन्निवेशस्य हृदयरसादिद्रव्यस्य संयोगात्। तथा हि। पशुसोमवाक्ययोरुत्पत्तिचोदनात्वे हि प्रकरणे—प्रकरणसापेक्षावद्यतिगृह्णातिवाक्येषु द्रव्यसंयोगो—हृदयरसादिद्रव्यसंस्कारो विधीयमानो न यागाङ्गत्वं प्रतिपद्यते; उत्पत्तिशिष्टपशुसोमावरोधेन हृदयादीनां साधनत्वानुपपत्तेः। न हि तस्य, उत्पत्तिशिष्टद्रव्यस्यावदानग्रहणादि संस्कारकं भवति नाशकत्वादिति। भाष्यकारमतरीत्या

थं पुनर्द्रव्यसंयोगादित्यनेन पूर्वपक्षोऽभिधीयते। तदुच्यते। ‘हृदयस्याग्रेऽवद्यति’ ‘ऐन्द्रवायवं गृह्णाति’ इत्येताः किं दध्यादिवद्गुणार्थाः श्रुतयः। ततश्चोत्तरयोरुत्पत्तिचोदनार्थत्वम्। उतैता एव कर्मचोदना इति॥ किं प्राप्तं नैताः पूर्ववद्गुणार्थाः पुनः श्रुतयः किं तूत्पत्तिचोदनाः। कथं, द्रव्यसंयोगात्—हृदयादिद्रव्यसंयोगात्तैरेव वाक्यैश्चोदना पशुसोमयोः। किं कारणं, इतरथा हि प्रकरणेन हृदयादिसंयोगो यागाङ्गत्वं प्रतिपद्येत, न चासौ तस्य गुणार्थेन
515 संभवति, उत्पत्तिवाक्यशिष्टपशुलताविरोधात्। अथ वा पूर्वोक्तेन न्यायेनान्यत एव पशुसोमयोः सिद्धत्वादस्मिन्प्रकरणे पुनरनर्थको द्रव्यसंयोगस्त्वत्पक्षे भवेत्। मम तु सोमशब्दो नामधेयमग्नीषोमीयवाक्यं च देवताविधानार्थमिति न किंचिदनर्थकम्। तस्मादवद्यतिगृह्णातिसंयुक्तैव यागोत्पत्तिचोदना स्यात्॥ १७॥ § 4088

नैवैतौ समुदायानुवादौ ‘चोदना वाऽप्रकृतत्वात्’ इत्येतस्मादेव हेतोः। कथं प्रकृता न संभवन्ति। यतोऽवद्यतिगृह्णातयो न यागानां चोदकाः, किं तर्हि, संस्कारमात्रविधयः। § 4089

तन्मात्रपर्यवसानात्। तन्मात्रपर्यवसायिनि वाक्ये निष्प्रमाणकत्वान्नाश्रुतयागकल्पनं शक्यम्। एवं हि स कल्प्यमानः कल्प्येत देवतोद्देशेन गृहीतं द्रव्यं न यावद्यागेन संबध्यते न तावत्तद्देवत्यं कृत्यं कृतं भवतीति। तत्र यदैवान्यथानुपपत्त्या यागं कल्पयितुमारभते तदैव संनिहितः प्रत्यक्षो यजिरविशेषात्सर्वान्द्रव्यदेवतासंयोगानुपपादयितुमुपतिष्ठन्यागान्तरकल्पनाप्रमाणं निरुणद्धि। तस्मिंश्चाप्रमिते कस्य समुदायानुवादो भविष्यति। यदुक्तमाग्नेयादिवन्नापरिकल्पिते यजौ वाक्यान्तरापेक्षेति। तत्र ब्रूमः। § 4090

पुंव्यापारनियोगेन वाक्यं सर्वत्र पूर्यते।
तदलाभे त्वपूर्णत्वं तल्लाभे वाक्यसंगतिः॥ § 4092

आग्नेयोऽष्टाकपालो भवतीति न यागादन्यः पुंव्यापारः प्रतीयत इति प्राक्तदनुमानादपरिपूर्णं वाक्यम्। इह त्वैन्द्रवायवं गृह्णातीति ग्रहणभावनायां
516 पुरुषो नियुज्यते। तत्र प्रागपि यज्यनुमानादस्ति विधेर्विषय इति समाप्यते वाक्यम्। इदं त्वन्यत्, यत्ततः परमपि किंचिदपेक्ष्यते। सर्वमेव हि वाक्यं स्वार्थे पर्यवसिते अर्थान्तरापेक्षां न जहाति, न च तावता तदसमाप्तं भवति। या त्वसावपेक्षा सा वाक्यान्तरेण पूरयिष्यत इत्यवगमान्न वाक्यान्तरसंबन्धं न सहते। तेन यज्यनुमानवेलायां प्रतिवाक्यं ‘सोमेन यजेत’ इत्यस्योप-

---

सिद्धान्तपरत्वे त्वेवं सूत्रयोजना—पशुसोमरूपापूर्वद्रव्यसंयोगात्पशुसोमवाक्ययोरेव कर्मचोदना, यतः, द्रव्यसंयोगः—पशुशब्दः सोमशब्दश्च, प्रकरणे ह्यनर्थकः—प्रकृते हृदयादावनर्थको लक्षणाप्रसङ्गात्। न हि हृदयादिवाक्यविहितयाग एव प्रदेयप्रकृतित्वेन पशुसोमविधिः संभवति। पशुवाक्ये तावत् प्राप्तकर्मानुवादेन देवताविधिः प्रकृतिविधिश्चेति वाक्यभेदात्। सोमवाक्ये तूत्तरसूत्रे वक्ष्यत इति।

१ मुदायानुवादौ] ( अ. २ पा॰ २ अ॰ ४ सू॰ १० )।

१२ तिः] परिसमाप्तिरित्यर्थः।

स्थानं न विरुध्यते। 'आग्नेयोऽष्टाकपालः' इति तु भवतेरपुरुषव्यापारात्मकत्वात्प्राग्यजेर्न किंचिद्विहितं न किंचित्प्रतिषिद्धमित्यसमाप्ते वाक्ये वाक्यान्तरे चानपेक्षिते यजिरनुमीयमानो न वाक्यान्तरगतः संबध्यत इति वैषम्यम्। अथ यदुक्तमुत्पत्तिशिष्टयोः पशुसोमयोर्न वाक्यान्तरगता विकारापत्तिर्युक्तेति। तत्र ब्रूमः। § 4093

द्रव्येणात्यन्तभिन्नेन सह चिन्त्यं बलाबलम्।
हृदयादिरसद्वारमङ्गत्वं पशुसोमयोः॥§ 4095

यद्यत्रौत्पत्तिकौ पशुसोमौ परित्यज्यात्यन्तव्यतिरिक्तं किंचिद् द्रव्यं विधीयते ततो विरोधः स्यादिह तु पशुनैव हृदयादिद्वारेण यागः साध्यते। सोमेन च रसद्वारेण। न चेतिकर्तव्यतासंबन्धे कश्चिद्विरोधः। पशुसोमौ हि यागसाधनत्वेन चोद्यमानावितिकर्तव्यतामाकाङ्क्षतः। तत्र च रसहृदयादिनिष्पत्तिद्वारेणेत्येवं कथंभावः पूर्यते, तेनानुग्राहकत्वान्न तत्कल्पने विरोधापत्तिः। यत्तु प्राकरणिकैः क्रयादिवाक्यैरेव प्राप्तत्वादिह द्रव्यसंयोगोऽनर्थक इति। तत्रापि अचोदकाश्च संस्कारा इत्येवोत्तरम्। न हि ते विधयः सोमस्य पशोर्वा चोदकाः, किं तर्हि तयोरेव संस्कारकाः। § 4096

तेन चोदितस्य द्रव्यस्य यथाकथंचिदुपादानेन यागसाधनत्वे प्रसक्ते क्रयोपात्तेनैवाभिषवादिसंस्कृतेन च साधयितव्यमिति विधीयते। न च मन्त्रवर्णस्यात्यन्ताविहितच्छागप्रापणसामर्थ्यं, पशुचोदनाविहितस्य तु संदेहापनयनमात्रमुपयुज्यते। न चावद्यतिरेकान्तेन यागमनुमापयति। विनाऽपि तेनं खण्डनमात्रतया लोके वेदे चोपपत्तेः। द्रव्यदेवतासंयोगस्तु न कथंचिद्यागाद्विना सिध्यतीत्यनुमानवैषम्यम्। न च सांनाय्यावद्यतिः प्रकृतौ चोदितोऽर्थगृहीतत्वाद्यतस्तद्धर्मप्राप्तिरपि स्यात्। न चास्य यागद्रव्यार्थत्वमितिकर्तव्यता, येन तदतिदिश्येत। न चेदृशेऽर्थे सामान्यतो दृष्टं प्रक्रमते। पूतिकाभिषवफलचमसभक्षयोस्तु वाक्यप्रकरणाभ्यां तादात्म्यविज्ञानमित्यसमानता। सोमवाक्येऽपि विशिष्टविधौ प्रत्यक्षोपात्ते सत्यानुमानिकासंभवादेवातुल्यत्वम्। न चैन्द्रवायवादिवाक्येऽप्यष्टाकपालादिवाक्येष्विव गुणवाक्यत्वेऽपि वाक्यभेदः। कुतः। § 4097

विधेयानेकभावेऽपि देवताग्रहणात्मना। 517
क्रियान्तरप्रसादेन विशिष्टविधिसंभवः॥§ 4099

२२ पि] प्रकृतौ सांनाय्यावदानस्य 'चतुरवत्तं जुहोति' इति विध्याक्षिप्तत्वेनाविधयेत्वादविधयेस्य च प्रकृतित्वाङ्गग्राहकत्वयोरसंभवान्न ततो धर्मातिदेशः संभवतीत्यभिप्रायः।
२८ ना] देवता, ग्रहणं चेत्येवंरूपेण विधेयानेकत्वेऽपि प्रकरणलभ्ययागाख्यक्रियान्तरप्रसादेन ग्रहणकालिकोच्चारणकर्मत्वसंबन्धेन देवताविशिष्ट ग्रहणविधिसंभवान्न वाक्यभेद इति श्लोकार्थः।

शक्यते हीन्द्रवाय्वादिविशिष्टग्रहणभावनाविधिराश्रयितुम्। अर्थप्राप्ते वा ग्रहणे समासोपात्तैकदेवताविधानमात्रमविरुद्धम्। प्रकरणलभ्यश्च प्रधानसंबन्ध इति गुणवाक्यत्वेऽप्यदोषः। तस्मादेषां संस्कारत्वादन्यतो यागमपेक्षमाणानामविरुद्धोऽन्येन यागविधिः। एवं च सति ज्योतिष्टोमेनेत्येकवचनं मुख्यमेव भवति। न च सोमशब्दः क्लेशेनानर्थकं द्वितीयनामत्वं प्रतिपत्स्यते। न चाऽऽघाराग्निहोत्रपूर्वपक्षसदृशः समस्तवाक्यानुवादोऽनर्थक आश्रितो भविष्यति। तेन चोदना पशुसोमयोरिति सिद्धम्॥ १८॥ § 4100

क्रमसमुच्चययोः पश्चावपरिचोदितत्वाद्वृत्ता कथा 'पशोरेकहविष्ट्वम्' इत्यत्रोद्भविष्यति किं समस्तादवदातव्यमुत प्रत्यङ्गमुतैकस्मादथवा हृदयादिभ्यः परिगणितेभ्य इति। सोमे तु परिचोदनापरिहारोऽभिधीयते। § 4101

वाक्येन यदि यागस्य श्रूयेरन् देवताः पृथक्।
व्यकल्पिष्यन्त सर्वास्तु युगपद्यागसंगताः॥ § 4103

यत्र वाक्येन संबन्धो निरपेक्षेण चोद्यते।
तत्र तुल्यार्थवर्तित्वान्नोपपन्नः समुच्चयः॥ § 4105

यद्यैन्द्रवायवेन यजेत, इन्द्रवायुभ्यां वा यागं निर्वर्तयेदिति श्रूयेत ततोऽन्योन्यनिरपेक्षैर्वाक्यैस्तुल्यार्थत्वेन ज्ञायमाना विकल्पभाजो भवेयुः; इमाः
518 पुनर्ग्रहणसंबद्धाः श्रुताः, प्रकरणेन यागसंबन्धं प्रतिपद्यन्ते। न च प्रकरणव्यापारः पर्यायो येनान्योन्यनिरपेक्षाः संबध्येरन्। सर्वग्रहणेषु हि युगपदितिकर्तव्यतात्वेन गृहीतेषु तद्गता देवतास्तन्मात्रेणापर्यवस्यन्त्यः प्रकरणिना यागेनाऽऽकाङ्क्षिता युगपदेव संबध्यन्ते। तत्र नाम विकल्पो युज्यते यत्रेतरेतरनिरपेक्षाः समानार्थे नियुज्यन्ते। किं कारणम्। § 4106

प्रत्येकं हि समर्थत्वं वाक्यादेवावधारितम्।
सापेक्षत्वे विपद्येतेत्येवं सर्वं विकल्पते॥ § 4108

न त्विह प्रत्येकं ज्योतिष्टोमनिर्वर्तनसामर्थ्यमिन्द्रवाय्वादीनामवगम्यते, तादृग्विनियोजकाभावात्। सत्यपि च प्रत्येकं यागनिर्वर्तनसामर्थ्ये तद्विशेषज्योतिष्टोमनिर्वृत्तिर्यथावचनं विज्ञायत इति नैव प्रत्येकं तुल्यार्थत्वम्। प्रत्येकं तुल्यार्थाश्च व्रीहियवादयो विकल्पन्ते। वाक्यसंयोगिनो हि ते परस्परनिरपेक्षाः स्वेन स्वेन वाक्येन विनियुज्यन्ते। ननु 'ऐन्द्रवायवं गृह्णाति' इति वाक्यमेव विनियोजकमुपलभ्यते। अतश्च 'मैत्रावरुणम्' इत्येतस्य पूर्वनिरपेक्षमेव देवताविधिसामर्थ्यं विज्ञायते। सत्यम्। ग्रहणं प्रत्यन्योन्यनिरपेक्षा विधीयन्ते न तु तत्रैकार्थत्वमदृष्टार्थत्वात्। कथमदृष्टार्थत्वमिति चेत्। उच्यते। § 4109

१ था] ( अ० १० पा० ७ अ० १ सू० १ )।

पूर्वं प्रधानसंबद्धं संस्कारे श्रूयते यदि।
तद्दृष्टार्थं विना तेन यदि वाऽसौ न सिध्यति॥§ 4111

यदि हि प्रथमं यागेन संबद्धाः सत्यो देवता निर्वापावाहनादिष्विव ग्रहणेषु पुनः श्रूयेरन् यदि वा ताभिर्विना ग्रहणमेव न निर्वर्तेत ततस्तत्र श्रवणं दृष्टार्थमनागतस्मृतिरूपेण कल्पेत। न त्विन्द्रवाय्वादयः प्रथमं ज्योतिष्टोमे श्रुताः। नापि तदभावेन ग्रहणं सिध्यति। तत्रैवं च सत्यपि यद्देवतायुक्तं ग्रहणं कर्तव्यमिति श्रूयते तत्रादृष्टादृते न किंचित्प्रयोजनमस्ति। ननु च यागस्यैता देवता 519
भविष्यन्तीति ज्ञात्वा विनाऽपि प्रथमविनियोगेन तद्विषयस्मृत्यर्थत्वं विज्ञायते। नैतदस्ति। कुतः। § 4112

सर्वेण विधिवेलायां प्रयोजनमपेक्ष्यते।
तद्वेलायामतः कल्प्यो दृष्टादृष्टार्थनिर्णयः॥§ 4114

'ऐन्द्रवायवं गृह्णाति' इत्येतद्वाक्यप्रवृत्तिकाले किं प्रयोजनमित्यपेक्षा भवति। तत्र यद्यपि प्रकरणवशादितिकर्तव्यतात्मकस्य ग्रहणस्य यागसंबन्धः कथमपि भवतीत्यवधार्यते तथाऽपि देवतानामन्यसंयुक्तत्वादक्रियारूपत्वाच्च न प्रकरणेन यागार्थत्वं विज्ञायत इत्यवश्यं यागसंबन्धनिरपेक्षं तावद्ग्रहणं प्रति प्रयोजनं कल्प्यमित्यदृष्टकल्पनमापद्यते। तस्मिंस्तु शास्त्रवेलायामवधारिते यद्यनुष्ठानकाले दृष्टमप्यनुनिष्पादि भवति केन तन्निवार्यते। न तु तेन शास्त्रप्रवृत्तिः प्रतिबध्यते। तेन प्रतिवाक्यं देवतासंयोगानामदृष्टार्थत्वात्समुच्चयः। तत्र 'न च यत्समित्संबन्धेन क्रियते तत् तनूनपात्संबन्धेन' इत्यनेन न्यायेन भेदेन श्रुता देवता ग्रहणसंबद्धा नोपपद्यते यदि ग्रहणं नाऽऽवर्तते इति प्रतिदेवतं सोमो ग्रहीतव्यः। एष तावत्सूत्रार्थः। तद्भेदात्—देवतासंयोगभेदाद्, ग्रहणकर्मणोऽभ्यासो देवतासंयुक्तग्रहणसंस्कार्यद्रव्यपृथक्त्वादनर्थकं हि—संयोगान्तरश्रवणमननुष्ठीयमानमनर्थकं स्यात्। तेन ग्रहणस्य भेदः संस्कार्यं द्रव्यं प्रति गुणभावात्। एतद्देवतावन्ति ग्रहणानि यागप्रक्रमात्मकत्वान्न यागादृते देवतार्थं द्रव्यं संस्कर्तुं शक्नुवन्तीत्येवमपेक्षिते भविष्यति कश्चिद्यागो य एतानि द्रव्याणि देवतासंबन्धमापादयिष्यतीति। यागोऽपि चाविहितदेवताकः श्रुतिलिङ्गवाक्यैर्देवतामलभमानः प्रकरणस्य चेदृशे वस्तुन्यक्रियात्मके व्यापाराभावाद्ग्रहणेषु तावद्विनियोजकं भवति। तानि चापर्यायविधानाद्भिन्नादृष्टसंबन्धित्वाच्च युगपद्गृह्यन्ते तद्वशेन देवतानामपि समुच्चयसिद्धिः। ननु प्रकरणगृहीतानामप्येकार्थानां पुरोडाशविभागमन्त्रप्रभृतीनामिष्यत एव विकल्पः, सत्यमिष्टो न तु तत्र प्रकरणं केवलं व्याप्रियते। लिङ्गानुमितया श्रुत्या प्रत्येकं विभागाङ्गत्वे विज्ञाते दर्शपूर्णमासविभागार्थत्वमात्रं प्रकरणाद्भवति विभागान्तरेऽप्यानर्थक्यात्। तत्र यद्यपि दर्शपूर्णमासौ समुच्चयेन गृहीतस्तथाऽपि न विभागद्वारनिरपेक्षयोः सामर्थ्यमस्ति। यच्च द्वारं तद्विकल्पेनावरुद्धं न समुच्चयग-

१९ न्यायेन ] अभ्यासाधिकरणे भाष्यकारोक्तन्यायेनेत्यर्थः।

म्यम्, इह पुनर्विपरीतमेतत्। यान्येव हि द्वाराणि ग्रहणानि तेष्वेव देवताः समुचिताः। तत्र प्रत्येकं ग्रहणयोग्योऽपि द्वारसमर्पणवशेन प्रवर्तमानः किमिदानीं करिष्यति। ननु ग्रहणानामपि प्रत्येकं द्रव्यप्रकल्पनरूपेण देवतासमर्पणेन च प्रधानोपकारसामर्थ्यमस्तीति विभागमन्त्रवद्विकल्पेन भवित-
520 व्यम्। भवेदेवं यदि पूर्वं नानादेवतो यागोऽवगतः स्यात्। ततस्तदर्थोऽयं द्रव्यप्रकल्पनभेद इत्यवगम्यते, न त्वसावेवमवगत इति प्रकल्पनभेदाम्नानमदृष्टार्थं विज्ञायते। अवश्यं च गुणात्प्रकल्पनानि भेत्तव्यानि। न ह्येकस्मिन्प्रकल्पने युगपत्पर्यायेण वा देवताः संकल्पयितुं शक्यन्ते। यौगपद्यं तावत्क्रमवर्तिन्या वाचा नैव शक्यम्, अदेवताभूत एव समुदायः संकल्पितः स्यात्। न हीन्द्रवाय्वादिसमुदाये देवतात्वं केन चिदुक्तम्, प्रतिपदोत्पन्नैस्तद्धितैः प्रत्येकं प्रतीयमानत्वात्। न च क्रमेणोद्देशः। कथम्। § 4115

द्रव्यस्य गृह्यमाणस्य देवतोद्देशचोदना।
न चैकां देवतां मुक्त्वा तदुद्देशस्य संभवः॥§ 4117

यदि तु प्रागूर्ध्वं वा ग्रहणादुद्दिशेदचोदितमेव कुर्यात्। किं च। § 4118

एतस्या इति संकल्प उद्देशोऽत्राभिधीयते।
अन्यस्मिन्क्रियमाणे च पूर्वस्तत्र विपद्यते॥§ 4120

यद्द्रव्यमिन्द्रवायुभ्यां दातव्यमिति संकल्पितं तस्य त्यक्तप्रायत्वादनीशो यजमानः कथमिव वक्ष्यति मित्रावरुणाभ्यामेतदेवेति। तत्रैकामुद्दिश्य देवतान्तरसंकल्पे क्रियमाणे पूर्वदेवतातस्तद्द्रव्यमाच्छिन्नं स्यात्। पूर्वसंकल्पालोचनेन वा नैवोत्तरः पारमार्थिकत्वं प्रतिपद्यत इत्यसत्संव्यवहारमात्रमेवानुष्ठीयेत न चोदनार्थः। तेनावश्यं यावद्देवतं ग्रहणभेदः कर्तव्यः। किं च। § 4121

शक्यते चागृहीतेऽपि यत्र क्वचिदवस्थिते।
द्रव्येऽस्मिन्देवतोद्देष्टुमित्यदृष्टार्थता विधेः॥§ 4123

देवतोद्देशस्तत्त्यागात्मको हि यागः। शक्यते च पूयमानावस्थेनापि सोमेन क्रयोत्तरकालं वा सर्वावस्थावियुक्तेनापि निर्वर्तयितुमित्यशेषोत्तरसंस्कारविधानमदृष्टार्थम्। यत्र तु पुरोडाशादि द्रव्यं चोद्यते तत्र यावदवहन्त्यादिविधानं तत्सर्वं तन्निष्पत्त्यर्थत्वाद्दृष्टार्थं भवति। न च ग्रहचमसस्थेन सोमेन यष्टव्यमित्युत्पत्तिचोदना, लतामात्रपर्यवसानात्। तेनाऽत्मीयादृष्टभेदनिर्वृत्त्यर्थमपि ग्रहणानि समुच्चेतव्यानि 'दशमुष्टीर्मिमीते' इति च प्रकरणे परिमाणं श्रुतम्। अतः 'सोमेन यजेत' इत्येतद्वचनमेव विशेष्यते दशमुष्टिना सोमेन यजेतेति। स च नियतपरिमाणेनोदकेनाभिषुतोऽल्पपरिमाणेषु भिन्नेषु ग्रहचमसेषु न ग्रहणभेदमन्तरेण शक्यते ग्रहीतुमिति भेदेन गृह्यते। तथावस्थेन च यागो निर्वर्तयितव्यः। सोऽप्यनभ्यस्तस्तथाऽवस्थितं न शक्नोति सर्वं
521 संभावयितुमिति प्रयोजनवशेनाभ्यस्यते, तेन तत्रापि सूत्रम्। तद्भेदात्—प्र-

कल्पितसोमभेदाद्यागकर्मणोऽभ्यासः, स्वीकृतद्रव्यपृथक्त्वादशेषमत्यज्यमानमनर्थकं स्यात्। अत उत्पत्तौ सकृच्छ्रुतस्यापि वाक्यान्तरप्रकल्पितावस्थौत्पत्तिकद्रव्यगुणत्ववशेनानुष्ठानभेदः। तद्धि द्रव्यमवश्यं यथागृहीतमेव दातव्यम्। पुनरेकीकरणे पूर्वकृतग्रहणभेदवैयर्थ्यप्रसङ्गात्। न च यथासंकल्पिताः स्वैर्भागैर्देवताः संबध्येरन्। न च त्यागकाले मर्वाः संकल्पयितुं शक्यन्ते, येनाभ्यासभीतैः सर्वोद्देशेन सकृदेव सर्वं द्रव्यं मिश्रीकृतं दीयेत। तथा कृतेऽपि च भागसंकरः प्राप्नोत्येव। प्रकल्पिते च भागनानात्वे वचनादृतेऽवश्यं परिहार्या संकरापत्तिः। तस्माद्यथासंकल्पितस्य प्रदानात्सर्वदेवतासमुच्चये सत्युपपन्नमेतत 'दशैतानध्वर्युः प्रातः सवने ग्रहान्गृह्णाति' 'आश्विनो दशमो गृह्यते' 'तं तृतीयं जुहोति' इति। तेन सिद्धमेककर्मत्वम्। प्रयोजनं पूर्वपक्षे 522
सोमविकारेष्वेकस्यैव ग्रहस्य धर्मैः सकृदनुष्ठानेन भवितव्यम्। सिद्धान्ते तु प्रकृतितुल्यमेवानुष्ठानमिति॥ १९॥ २०॥ § 4124

इति पशुसोमाधिकरणम्॥ ६॥

## ०.०.५१ संख्याधिकरणम्

गतोऽभ्यासापवादप्रसङ्गः। संख्यया भेद इदानीमभिधीयते। तत्र 'तिस्र आहुतीर्जुहोति' 'द्वादश द्वादशानि जुहोति' इत्येवमादय उत्पद्यमानकर्मसामानाधिकरण्यचोदिताः स्वसंख्यायुक्ता उदाहर्तव्याः। सकृज्जुहोतिश्रवणात्कर्मैकत्वे सति संख्यानुग्रहोऽभ्यासेन भविष्यतीति प्राप्तेऽभिधातव्यम्। उत्पद्यमानस्यैवात्र होमस्य संख्यासंबन्धः श्रूयते नोत्पन्नस्य पश्चात् 'एकादश प्रयाजान्' इतिवत्। न च पृथक्त्वेन विना संख्याया आत्मलाभः संभवति। न चाभ्यासपूरिता संख्या समञ्जसा भवति। अगत्या हि सा नियतपरिमाणप्रयाजोपसदादिविषयत्वेनाऽऽश्रयिष्यते। संभवति चात्र प्रागनवधारितसंख्यान्तरत्वात्स्वरूपत एव भेदः। तस्मात्कर्मपृथक्त्वनिवेशिन्येवैषा नाभ्यासपृथक्त्वाश्रयाऽऽश्रयितव्या। तथा च वक्ष्यति 'आगमेन वाऽभ्यासस्याश्रुतत्वात्' इति। ननु च जुहोतिशब्दात्प्रथममेको होमोऽवधारित इत्यभ्यासेन पूरणमेव प्राप्नोति। न। जुहोतिशब्दाभिहितस्य कर्मणोऽसत्त्वभूतत्वेनासंख्यत्वात्। या हि तत्र जुहोतिपदे संख्या, कर्तुः खलु सा भविष्यति न भावनाधात्वर्थयोः। तत्र सकृदाम्नानवशादर्थादेकसंख्यं होममुत्प्रेक्षितुमारभमाण एव स्ववाक्यश्रुतया

---

१२ मिति] विकल्पे पूर्वपक्ष्युपन्यस्तखादिरादिदृष्टान्तवैषम्यप्रदर्शनार्थम्( 'संस्कारस्तु न भिद्येत' ) इत्येतत्सूत्रस्थं भाष्यं स्पष्टार्थत्वान्न व्याख्यातम्।

१ त्र] ( तै॰ सं॰ २-३-९ )
५ श्चात्] ( तै॰ सं॰ ६-३-७ )
१० ति] ( अ॰ १० पा॰ ५ अ॰ ६ सू॰ १६ )।

संख्यया वार्यमाणस्तत्परिच्छिन्नमेवाङ्गीकुर्वन्स्वरूपभेदं सर्वत्र प्रतिपद्यते। तस्मात्कर्मभेद इति। यत्तु भाष्यकारेण ‘सप्तदश प्राजापत्यान्’ इत्युदाहृतं तत्र द्रव्यगताऽपि संख्या कर्मभेदं करोतीत्येतद्दुष्प्रतिपादं प्रतिपादयामीत्यनेनैवाभिप्रायेण। कुतः संशयः। उच्यते। § 4126

523 किं न्वयं तद्धितान्तानामेकशेषः कृतो भवेत्।
किं वा कृतैकशेषाणां पश्चात्तद्धितसंगतिः॥§ 4128

यदि प्रजापतिरेतेषां देवतेति कृतैकशेषेण सर्वनाम्ना निर्दिश्य तद्धितः क्रियते तत एक एव संबन्धः सप्तदशानां द्रव्याणामेकस्याश्च देवताया इत्येककर्मत्वम्। अथ तु प्रजापतिर्देवताऽस्येति प्राजापत्यश्च प्राजापत्यश्चेति सप्तदशकृत्व उच्चार्य प्राजापत्या इति सरूपैकशेषः क्रियते ततः सप्तदशैव द्रव्यदेवतासंयोगाः पृथक्प्रदर्शिता इति प्रतिसंयोगं यागानुमानात्कर्मभेदः। किं तावत्प्राप्तम्। एककर्मेति। कुतः। § 4129

प्रत्ययार्थबहुत्वं हि प्रत्यक्षमुपलभ्यते।
तत्कृतं चैकशेषत्वमिति न प्रकृतौ भवेत्॥§ 4131

यो हि प्राजापत्यः प्राजापत्यश्चेत्येवमेकशेषं करोति तेनोभयोः प्रकृतिप्रत्यययोरसावभ्युपगतो भवति। तस्य च निमित्तं बहुवचनान्यथानुपपत्तिः। न च तत्प्रातिपदिके बहुवचनमुपलभ्यते येन तस्याप्येकशेषः क्रियते। न च तदेकशेषमन्तरेण प्रत्ययार्थस्य दर्शयितुं न शक्यते। विगृह्यमाणवेलायां सर्वनाम्ना कथ्यमानत्वात्। तस्मात्सकृच्छ्रुत एव प्रजापतिर्बहुभिर्द्रव्यैः संबध्यते। किं च। § 4132

कर्माण्यश्रूयमाणानि तदपूर्वाणि चात्र मे।
न कल्प्यानि भविष्यन्ति सिद्धेऽर्थे स्तोककल्पनात्॥§ 4134

कृत्वाऽपि हि तद्धितान्तेनैव चैकशेषं न तावन्मात्रेण मुच्यते। पुनरदृष्टाश्रुतानि कर्माण्यपूर्वाणि च कल्पयितव्यानि। न च तानि यथेष्टं कल्पयितुं लभ्यन्त इत्युक्तं शब्दान्तराधिकरणे। यन्मात्रेण विना चोदितद्रव्यदेवतासंबन्धानुपपत्तिस्तन्मात्रमेवादृष्टाश्रुतमर्थापत्त्या कल्पयितुं शक्यते नान्यत्। तेनाभ्यधिकं न लभ्यते। अवश्यं ह्येकादिक्रमेण सप्तदश कर्माण्यपूर्वाणि च कल्पयितव्यानि। तत्र प्रथमकल्पनेनैवानुष्ठानतन्त्रत्ववदगृह्यमाणविशेषत्वात्सर्वद्रव्याणि यागवन्ति जातानीति नोपरिष्टाद्गन्तुं शक्यते। किं च। § 4135

524 न चान्यभेदेनान्यस्य भेदो भवितुमर्हति।
हृदयाद्यवदानानां न भेदात्कर्म भिद्यते॥§ 4137

२५ णे] ( अ॰ २ पा॰ २ अ॰ १ सू॰ १
)।

यदि हि द्रव्यभेदात्क्रियाणां भेदः स्यात्ततो हृदयादिभेदेन द्व्यवदानभेदेनापि वा भेदः स्यात्। न चार्हति भवितुम्। वक्ष्यति हि—*‘अपि वाऽव्यतिरेकाद्रूपशब्दाविभागाच्च’ इति। प्रकृतौ च कृत्स्ने पशौ यागसाधनत्वेन चोदिते तथैवोत्स्रष्टव्ये प्राप्ते हृदयाद्येकादशावदानप्रकृतित्वेन पशुना यागः साधयितव्य इति वाक्यान्तरवशादवगम्यते। तेनासौ पशोर्धर्मो न यागस्य। इहापि सप्तदशानां यागसाधनत्वेऽवगतेऽतिदेशेन प्रत्येकं सर्वधर्माः प्राप्यन्त इत्येकोऽपि यागः सप्तदशावदानगणानतिदेशेन गृह्णन्न विहन्यते। तस्मादेकं कर्मेति प्राप्ते, उच्यते। § 4138

एककर्मत्वपक्षे स्यादेक एवात्र चोदकः।
ततश्चैकगणप्राप्त्या न सर्वपशुसंग्रहः॥ § 4140

न ह्येतदेतावत्येव वाक्यं पर्यवस्यति प्राजापत्यान्पशूनिति, किं तर्हि, प्रकृतिवदित्यपरो वाक्यशेषः। एककर्मत्वे चात्र सवनीयः प्रकृतिर्भवेत्। तत्र चैकोऽवदानगणो यागस्य साधनमासीदित्यत्राप्येक एव प्राप्नोति। सोऽपि विवक्षितैकसंख्यपशुनिष्पन्न आसीदिति तादृगेव कर्तव्यः। ततश्चैकेनैव पशुना सिद्धत्वान्न पश्वन्तराणि प्रजापतिना संबध्यन्त इति स्वपदोपात्तं बहुत्वं वाक्यप्राप्तं च सप्तदशत्वमुभयमपि नानुष्ठीयेत। यदा तु सप्तदश यागा इति बुद्धिः क्रियते तदा प्रतिकर्मावसायिभिश्चोदकैस्तावन्त एवावदानगणाः प्राप्यन्ते। तत्सिद्ध्यर्थं चाश्रुतानामपि सप्तदशानां पशूनामागमः क्रियते, किं पुनः श्रुतानामुपादानम्। ननु च प्रत्यक्षं यागैकत्वमुत्सृज्य न युक्तमानुमानिकचोदकानुरोधेन नानात्वं कल्पयितुम्। पश्य। § 4141

यागोपदेशवेलायामेकानेकत्वकल्पना।
तद्वशेनातिदेशश्च नोपदेशस्तदाश्रयः॥ § 4143

उत्पत्तिवेलायां हि कर्मणामेकानेकत्वनिर्णयो भवति। उत्पत्तिश्च स- 525
र्वत्रोपदेशेन गम्यते नातिदेशेन। न ह्यनुत्पन्ने कर्मणि कथंभावो भवति। न च तस्मिन्नसत्यतिदेशः प्रवर्तते। तस्माच्चिरप्रवृत्तभेदाभेदज्ञानावसरभावित्वान्नातिदेशवशेन भेदज्ञानं युक्तम्। अत्रोच्यते। § 4144

संदिग्धे वाक्यशेषेभ्यो निर्णयः प्राक्समर्थितः।
सामर्थ्याच्च तदत्रास्ति द्वयं निर्णयकारणम्॥ § 4146

नात्रास्माभिरतिदेशेनैव कर्मभेदोऽवधारितः। केन तर्हि। प्राजापत्यानित्युपदेशेनैव। स तु द्रव्यदेवतायजिसद्भावमात्ररूपेण निर्णीतः। परिमाणं प्रत्यनिश्चितसामर्थ्यविशेषः प्रागुपदिष्टसंदिह्यमानैकशेषतद्धितपौर्वापर्यरूपः सन्नतिदेशात्मकेन वाक्यशेषेण तद्ग्रहणानुरूपसामर्थ्येन च निर्णीयते। यद्यपि

२ *] ( अ° ६ पा° ३ अ° ३ सू° १२ इत्यत्र। )।
२७ यः] ( अ° १ पा° ४ अ° १३ )

च पश्चात्तनोऽतिदेशस्तथाऽपि सोऽत्र भविष्यतीत्यादित एव ज्ञात्वा तदविरुद्धार्थवृत्तित्वमुपदेशस्याध्यवसीयते। ततश्च यद्यपि प्रजापतिर्देवतैषामिति विगृह्य वाक्यार्थोन्नयनं प्रक्रम्यते, तथाऽप्यन्ते विसंवाददर्शनाद् भ्रान्त्या मयाऽसौ विग्रहः कृत इति न बुद्धिपूर्वकारी नाध्यवस्यति। न चात्रैष प्रकारोऽस्ति येनातिदेश एव पूर्वज्ञानानुरोधेन प्रवर्तेत। न ह्यसौ प्रकृतावपठ्यमानान्सप्तदशावदानगणानेकस्मिन्कर्मणि ज्ञापयितुं समर्थः। नाप्येकस्यैव गणस्य सप्तदश प्रकृतिद्रव्याणि। न वाऽसौ संदिग्धो येनोपदेशान्निर्णीयेत। न च संदेहावस्थत्वादुपदेशेनैकान्तिकोऽतिदेशस्य विरोधो येनैकगणप्राप्तिर्बाध्येत। न ह्येककर्मत्वमुपदिष्टम्। सर्वत्र चाविरोधसंभवे विरोधो नाऽऽश्रीयते। शक्यते चात्र कर्मबहुत्वाभ्युपगमेनाविरोधः संपादयितुम्। तस्मादेवमुपदेशवचनं व्यज्यते। प्रजापतिर्देवताऽस्येति विगृह्य सप्तदशानां तन्त्रेणोच्चारणम्। ततश्चाऽऽग्नेयाग्नीषोमीयादिवदेव भिन्नैर्देवतासंयोगैर्भिन्ना यागाश्चोद्यन्ते। यदुक्तं, भवति पशोरयं धर्म एकादशावदानं नाम। स चैककर्मत्वेऽपि प्रतिपशु भेत्स्यत इति। तदयुक्तम्। कुतः। § 4147

न हि द्रव्यकथंभावादतिदेशोऽत्र कल्पते।
कर्मोद्भूतः कथंभावः कर्मधर्मान्प्रतीच्छति॥ § 4149

526 प्राजापत्यपशु यागेन भावयेत्कथमिति ह्यपेक्ष्यते, न पशुना कथमिति, त्यज्यमानत्वेन द्रव्यस्य ज्ञातप्रकारत्वात्। प्रकृतावपि चैकपशुनिष्पन्नैकादशावदानगणसाध्यत्वं यागधर्मो न पशोः। निष्फलत्वात्। तद्धर्मत्वपक्षे ह्यवदानैरसौ संस्क्रियेत। न च तेन प्रयोजनम्, विनाशितत्वात्। यागेन तु सिद्धेनार्थस्तत्संबन्धिनाऽपूर्वेण वेति सर्वमिदं तन्निर्वृत्तिप्रकारत्वेनाऽऽश्रीयते। तस्मान्नैको यागोऽनेकगणं समर्थो ग्रहीतुम्। न च तदग्रहेऽनेकपशुग्रहणम्। यद्यपि चावदानप्रकृतेरेकत्वं सप्तदशसंख्यया बाध्यत इति नानापशुनिष्पन्न एक एव गणो गृह्यतामिति बुद्धिर्भवेत्। तथाऽप्येकादश पशव उपयुज्येरन्न सप्तदश। **नन्वेकस्मिन्नपि यागे सप्तदशभिरवदानगणैर्यक्ष्यत इति**— अनेकादृष्टकल्पनाभयात्पशुशब्देनावदानगणं यागप्रत्यासत्तेर्लक्षयित्वा तत्परिच्छेदार्था सप्तदशसंख्या विधास्यत इति मन्यते। नैतदेवम्। लक्षणाकारणाभावात्। न ह्यसति विरोधे लक्षणा युक्ता। तेनैतत्संकटमापद्यते—सप्तदश पशवः कर्तव्या एकेन चावदानगणेनैकपशुनिष्पन्नेनैको यागः साधयितव्य इति। न चैतत्कथं चिदनुष्ठानं शक्यम्। अथान्यत्रापि श्रुता संख्याऽन्यत्रापि नीयते ततोऽपूर्वप्रत्यासन्नतरेषु वरं यागेष्वेव कल्पिता। न चाविरोधसंभवात्किंचिदपि चोदकस्य बाधनीयमित्युक्तम्। प्रमाणवशाच्चानेकादृष्टकल्पनाऽपि निर्दोषा। कृत्स्नवाक्यगमनिकार्थं शृङ्गाभिप्रायाद्युपन्यासः। एतदुक्तं भवति। ये सप्तद-

४ चात्रैष ] यश्चोपदेशस्यातिदेशानुरोधवृत्तित्वे संदिग्धत्वरूपो विरोधरूपश्च प्रकारः सोऽत्र नास्तीत्यर्थः।

७ व्याणि ] प्रापयितुं समर्थ इत्यनुषङ्गः।

शवर्णादिभेदभिन्नाः पशवस्तेषां कश्चित्प्राजापत्यः कर्तव्य इति। तत्राऽऽह— ते हि **श्यामास्तूपरा एकरूपाः श्रूयन्ते तस्मात्सप्तदश यागा इति**। प्रयोजनं यद्यपि पूर्वपक्षवादिनो नाभिप्रेतं तथाऽप्येकस्यैव साक्षाद्यागसाधन- 527
त्वमितरे तत्संख्यासंपादनार्थमुपादीयन्ते, इत्येकस्मादवदातव्यम्। तद्विनाशे चेतरेऽप्यावर्तेरन्। अथवाऽर्धकृतेषु संस्कारेषु य एव नष्टस्तत्रैव समस्तानामावृत्तिः। ननु च यथैव सप्तदशसु यागेषु सह क्रियमाणेषु एकविनाशे सति 'अहर्गणे तु यस्मिन्नपच्छेदः' इत्यनेन न्यायेनेतरेषु प्रतीक्ष्यमाणेषु स एवाऽऽवर्तते तथैव द्रव्यसाहित्येऽपि स्यात्। नैतदेवम्। तथा हि। सप्तदशसंख्यैकार्थसमवायिव्यासङ्गियागसाधनत्वमिति तादृशस्यैवोपाकरणादिभिर्भवितव्यम्। तत्र यदेव द्रव्यं नष्टं तेनैव विना यथाश्रुतसाधनविनाशो जात इति सर्वे संस्कारास्तिष्ठत्स्वपि द्रव्येषु साधनात्प्रच्युता इति पुनरादित एव कर्तव्याः। तथा यस्याप्यभिनवानीतस्य ते क्रियन्ते तस्यापि ते साधनभूतस्य श्रुताः। न च सप्तदशत्वेन विनाऽस्य साधनत्वमस्तीति तत्सिद्धयेऽवश्यमितरेऽप्यपेक्षितव्या इति। सिद्धान्ते त्वन्योन्यनिरपेक्षसाधनत्वशक्तियुक्तानां सहप्रयोगमात्रं क्रियत इत्युपपन्ना तन्मात्रावृत्तिः। नन्वेवं सति पूर्वपक्षन्यायेन स्तोत्रशस्त्रेषु 'तां चतुर्भिरादत्ते' इत्यादिषु चैकमन्त्रविनाशे समस्तावृत्तिः प्राप्नोति। न। तत्र प्रत्येकं साधनत्वे सति वचनेन समुच्चयाश्रयणात्। यत्कुर्वाणा हि ते मन्त्राः स्तोत्रादीनि साधयन्ति तत्रैषां प्रत्येकाकाङ्क्षानिवर्तनसामर्थ्यम्। *अन्यथा ह्येकमन्त्रतैव स्यात्। भिन्नैरेव च प्रात्यात्मिकैर्मन्त्रकार्यैः संहत्य कार्यान्तरमारभ्यते न मन्त्रेषु व्यासङ्गि साधनत्वम्। पशूनां तु व्यासङ्गीत्युक्तम्। मन्त्रकार्याणां तर्हि संहत्यकारित्वादेकविनाशे समस्तावृत्तिः स्यात्। नैत- 528
दस्ति। साधनविनाशव्यतिरेकेण कार्यविनाशाभावात्। साधनेष्वेव पुरुषस्य व्यापार इति तद्विनाशानुरोधेनैवानुष्ठानमिति विशेषः॥ २१॥ § 4150

इति संख्याधिकरणम्॥ ७॥

---

२ रा] शृङ्गरहिता इत्यर्थः।
३ नं] यद्यपि भाष्योक्तं पूर्वपक्षप्रयोजनं 'प्रजापतये सप्तदश पशवः संकल्प्यन्ते' इति पूर्वपक्षोपक्रमात् 'एको यागः सप्तदशभिः पशुभिर्निर्वर्त्स्यते' इत्युपसंहाराच्च यागे सर्वपशुसाध्यत्वस्यैव पूर्वपक्ष्यभिप्रेतत्वावसायादेकपशुसाधनत्वस्य पश्वन्तरादृष्टार्थत्वस्य च पूर्वपक्ष्यनभिमतत्वावसायादयुक्तमिव भाति तथाऽपि सिद्धान्तभाष्येऽभिहितस्याप्येकपशुसाधनत्वस्येतरादृष्टार्थत्वस्य चाऽऽपाद्योक्त्यर्थत्वेनोपपादयति यद्यपीत्यादिना।
५ संस्कारेषु] य एव कश्चिदेकोऽनेको वा पशुर्नष्टस्तदा समस्तपश्वावृत्तिः। न त्वेकस्मिन्नेव नष्टे पशौ, सर्वेषां यागसाधनत्वाविशेषादिति तार्त्पयम्।
७ ति] ( अ॰ ६ पा॰ ५ अ॰ २१ सू॰ ५६ )
१९ *] संख्यायुक्तवचनविनियुक्तानां स्तोत्रादिमन्त्राणां प्रत्येकं यदि वाक्यार्थाभिधाननिष्पादनशक्तिर्वा, भविष्यत्तर्हि विभज्यमानसाकङ्क्षत्वे सत्येकार्थत्वापत्तेरेकस्तोत्रादिसाधनानामैकमन्त्र्यं स्यादित्यभिप्रायः।

## ०.०.५२ संज्ञाधिकरणम्

बहुविचारत्वाद्गुणप्रकरणभेदावुपेक्ष्य संज्ञा तावदुदाह्रियते। तत्र ‘अथैष ज्योतिः’ इत्यादिष्वथशब्देषशब्दयोः पूर्वप्रकृतापेक्षत्वात्प्रकृतहान्यप्रकृतप्रक्रियाकल्पनदौर्बल्यादेकस्यापि च दाक्षायणयज्ञादिवद्वक्ष्यमाणेन गुणयोगेनानेकनामधेयत्वसिद्धेः। न च गुणफलसंबन्धपरे वाक्ये सति कर्मान्तरं कर्मानुसारि चापूर्वं तत्सिद्ध्यर्थानि चात्यन्ताश्रुतेतिकर्तव्यतादीनि कल्पितानि भविष्यन्ति। कथंभावापेक्षया च ज्योतिष्टोमः सहस्रदक्षिणादि गृह्णन्न वारितो भविष्यति। न च कर्मान्तरविधावथशब्देन पूर्वापेक्षेण किंचित्फलमस्ति। न हि क्रतुः क्रत्वन्तरमपेक्षते। न च क्रतूनां क्रमविवक्षेति वक्ष्यामः। तेन क्रमार्थमपि नाथशब्दश्रवणम्। न च संज्ञा भावनां ब्रवीति। नापि धात्वर्थो यजत्यादिवत्तदुपश्लिष्टः, येन तद्भेदबुद्धिः स्यात्। न चेयं विधात्री श्रुतिर्येन विहिते कर्मान्तरे पुरुषं प्रवर्तयेत्। न चाप्रवर्तिते पुरुषे भेदः प्रतीतोऽपि ग्रहैकत्ववद्विवक्ष्यते। यस्त्वत्र विधायकः स गुणाद्याक्षेपान्न कर्मस्वरूपे निपतति। न चेदसावाक्षिप्तस्ततोऽभ्यासादेव भेदः स्यान्न संज्ञातः। ‘फलसंबन्धोऽपि च संनिधौ त्वविभागात्’ इत्यनेन न्यायेन
529 न कर्मान्तरबुद्धिं करोति। यद्वा दधिगोदोहनादिवत्प्रकृतकर्माश्रयात्सहस्रदक्षिणादेर्गुणादेवैतत्फलमित्यध्यवसानादकर्मान्तरत्वम्। ज्योतिरादिषु त्वयमपरो विशेषः। यज्ज्योतिष्टोमनामैकदेशत्वेन तद्बुद्ध्यनपायः। तथा ‘वसन्ते वसन्ते ज्योतिषा’ इति तत्र तत्र प्रयोगो दृश्यते। तस्माच्छब्दान्तराभ्याससंख्यापूर्वकर्मायोग्यगुणप्रकरणान्तराणामभावादभेद इति प्राप्तेऽभिधीयते। § 4152

अनुक्ते कर्मशब्दे या संज्ञा पूर्वं प्रवर्तते।
न वस्त्वन्तरबुद्धेः सा कथं चिदपनीयते॥ § 4154

या ह्युत्पन्ने पूर्वोच्चारित आख्यातशब्दे संज्ञा प्रवर्तते, सा पूर्वमेवाऽऽख्यातेन भेदाभेदयोरन्यतरत्र निश्चये कृते पश्चात्प्रवर्तमाना न भिन्द्यात्। इयं पुनरुत्पत्स्यमानसंयुक्ता संख्यावच्च पृथक्त्वनिवेशिनी। कथम्। सर्वत्रैव तावदनेकार्थानेकशब्दयोरन्याय्यत्वादर्थान्तरदर्शनात्संज्ञान्तरमपेक्षते। संज्ञान्तरदर्शनाच्चार्थान्तरत्वं, तच्चोभयमपि बलीयसस्तद्बाधकप्रत्यभिज्ञानाद्बाध्यते। यावत्तु तादृग्बाधकविज्ञानं नास्ति तावदनपोदितमौत्सर्गिकं

४ सिद्धेः] यथैव तृतीयपादे ‘अयनेषु चोदनान्तरं संज्ञोपबन्धात्’ इत्यधिकरणे एकस्यैव दर्शपूर्णमासाख्यस्य कर्मणः, अयनपदोक्तावृत्त्याख्यगुणयोगेन दाक्षायणयज्ञरूपसंज्ञान्तरमिष्यते तथैव ‘अथ पुनरयम्, इत्यादिवक्ष्यमाणभाष्योक्तद्योतनादिगुणयोगेनैकस्यैव ज्योतिष्टोमस्य बहवः संज्ञा उपपद्यन्ते। अतो न कर्मान्तरत्वमित्यध्याहार्य पञ्चम्यन्तं पूरणीयम्।

९ क्ष्यामः] ( अ. ५ पा. ३ अ. १२ ) इत्यत्रेति शेषः।

१२ कः] एतेन सहस्रदक्षिणेन यजेत, इत्यत्र श्रूयमाण आख्यातप्रत्यय इत्यर्थः।

१४ न्यायेन] ( अ. २ पा. ३ अ. १३ सू. २६ )।

भेदज्ञानमास्ते। तदिह पूर्वप्रस्तुतज्योतिष्टोमविलक्षणमनन्तरम् ‘अथैष गौः’ इति संज्ञान्तरमुच्चार्यमाणमेव पूर्वसंबन्धानुभवादृते तत्र बुद्धिमनादधदात्मानुरञ्जितप्रत्याय्यार्थान्तरबुद्धिं करोति। तत्र प्रागूर्ध्वं वा संज्ञी स्यादित्यन्विष्यमाणे यावन्तः प्रागुच्चारिता यजतयस्ते सर्वे ज्योतिष्टोमबुद्धावविच्छिन्नायां प्रवृत्तत्वात्तद्विषयत्वेनावधारिता नार्थान्तरत्वं संज्ञान्तरभाक्त्वं वा लभन्ते। यस्तु प्रस्तूयमानः स यद्यपि फलगुणोपबन्धादन्यत्र व्यापृते विधायके तद्वशेन न भिद्यते तथाऽप्यसंबद्धपदव्यवायन्यायेन गोशब्दे पूर्वत्रानिविशमाने तद्बुद्धावननुषज्यमानायां प्रकरणविच्छेदे ज्ञातेऽर्वान्तरकलुवितायां च बुद्धौ निपतत्संज्ञान्तसविरुद्धं च ज्योतिष्टोमं गन्तुमशक्नुवन्विच्छिन्नानुसंधानादर्थान्तरे वर्तते। तथा हि— § 4155

संज्ञानदीव्यवच्छिन्नो यजिः पूर्वं न गच्छति।
न च पूर्वस्तमित्येवं बलादर्थान्तरं गतः॥ § 4157

एवं च सति अथशब्दः पूर्वप्रकृतापेक्षणानन्तर्याद्यसंभवात्कर्मान्त- 530
राधिकारार्थ एवावगम्यते। एषशब्दोऽपि संनिहितप्रत्यक्षवचनः सन्यथैव च पूर्वप्रकृते तद्रूपत्वाद्वर्तते तथोत्तरे प्रस्तूयमानेऽपीत्यविशेषः। प्रकृतविच्छेदाप्रकृतप्रक्रिये च संज्ञाश्रुतिवशादाश्रीयमाणे निर्दोषे। **नासाभिमाः पुन श्रुतय** इति। प्रथमोच्चारितत्वान्नैव पुनः श्रुतित्वाशङ्काऽस्तीत्येवं वर्ण्यते। नोत्पन्ने कर्मणि पुनः श्रूयन्त इत्यभिप्रायः। समस्तमेव च वाक्यमनर्थकं भवेत्। अथैष ज्योतिरिति ह्यनुक्त्वाऽपि शक्यन्ते सहस्रदक्षिणादयो गुणा विधातुम्। कर्मैकत्वपक्षे च द्वादशशतप्रभृतीनां सहस्रदक्षिणादीनां च तुल्यार्थत्वाद्विकल्पः स्यात्, स चान्याय्यः। कर्मान्तरत्वे तु नैष दोषः। न च गुणात्फलमवसीयते, संज्ञाविच्छिन्नाश्रयलाभासंभवात्। प्रस्तूयमानकर्मसंबन्धश्च संज्ञागुणफलादीनां वाक्येन, पूर्वकर्मसंबन्धः प्रकरणेन। तस्मादपि कर्मान्तरम्। न च ज्योतिरादीनां ज्योतिष्टोमावयवत्वम्। न हि कण्वरथंतरावयवो रथंतर- 531
मिति निश्चीयते। यत्तु ‘वसन्ते ज्योतिषा यजेत’ इति प्रयोगो दृष्ट इति स प्रमाणान्तरावगमवशाद्गौण इति द्रष्टव्यम्। न चेह तादृक्प्रमाणान्तरमस्ति, येन तद्विषयत्वमवगम्येत। § 4158

योऽपि त्रिवृदादिषु ज्योतिःशब्दप्रयोगः सोऽपि तत्रैव वाक्ये सामानाधिकरण्यादौपचारिक इति न सर्वत्र लभ्यते। तथा हि। § 4159

१७ न्ने] नासामिमाः—इति भाष्यं पुनःश्रुतित्वाशङ्कानिरासार्थत्वेनाऽऽभासमानं ग्रथमोच्चारितत्वेन पुनःश्रुतित्वाशङ्कानुपपत्त्याऽऽक्षिप्य ‘एतेन सहस्रदक्षिणेन यजेत’ इति गुणसंक्रान्तशक्तिनाऽऽख्यातेन अभेदावधारणान्न संज्ञाया भेत्तृत्वं संभवतीत्याशङ्कामाख्यातस्य विशिष्टविधित्वोपपत्तेरभेदावधारणाशक्तत्वान्निराकर्तुमभेदावधारणोत्तरकालत्वं पुनःशब्देनोच्यते नाऽऽवृत्तिरित्याशयेन समादधाति नोत्पन्न इत्यादिना। अयं चात्र भाष्यार्थः। यद्यभिन्नतयाऽवधारिते कर्मणि पश्चाज्ज्योतिरादिसंज्ञानामिमानि श्रवणानि स्युस्ततो न भिद्युर्न त्वाख्यातेनाभेदः शक्योऽवधारयितुमिति।

सिंहशब्दः क्वचिद्गौणो माणवादौ निरूपितः।
नाऽऽलम्भे श्रूयमाणोऽपि तदर्थः परिगृह्यते॥§ 4161
तस्मान्मुख्यार्थपरिग्रहाद्भेदिका संज्ञेति सिद्धम्॥ २२॥ § 4162

इति संज्ञाधिकरणम्॥ ८॥

## ०.०.५३ गुणाधिकरणम्

अतः परं प्राक्प्रकरणभेदाद्गुणनिमित्तो भेदाभेदविचारो वर्तिष्यते। चातुर्मास्येषु वैश्वदेवे पर्वणि ‘वैश्वदेव्यामिक्षा’ इति द्रव्यदेवतासंयोगानुमितं यागं विधायोच्यते ‘वाजिभ्यो वाजिनम्’ इति। तत्र संदेहः किं तस्मिन्नेव कर्मणि गुणविधिरुतानेनापि द्रव्यदेवतासंयोगेन यागान्तरं कल्प्यते। तत्रोभयमपि द्रव्यदेवतं पूर्वत्र विधीयत इति पक्षः संभवन्नपि नोपन्यस्तः। प्रमाणान्तरप्राप्ते कर्मण्यनेकगुणविधानस्य पौर्णमास्यधिकरणे निराकृतत्वात्। तेन वाजिनमेव
532 केवलं किं पूर्वस्मिन्कर्मणि तया च देवतया संबध्यत उत देवतान्तरेण यागान्तरेण चापूर्वेण संबध्यत इति। किं प्राप्तं, पूर्वत्रैव वाजिनगुणविधानमिति। कुतः। § 4164

अनन्तरोपदिष्टेन वाजेनान्नेन वाजिनः।
विश्वे देवाः प्रतीयन्ते तच्च कर्मेह वाजिनम्॥§ 4166

वाजिनो नाम केचन नैव देवताविशेषाः प्रसिद्धाः। न चाप्रसिद्धाः पदार्था वाक्यार्थं निष्पादयन्ति। § 4167

सर्वत्र समुदायप्रसिद्धावलभ्यमानायामवयवप्रसिद्धिर्गृह्यते। तदिह ‘वैश्वदेव्यामिक्षा’ इत्यनेन वाक्येनाऽऽमिक्षावत्तया वाजिनो विश्वेदेवाः कल्पिताः। ते च वाजिनसंयोगेनावगम्यमाना न शक्याः परित्यक्तुम्। ते च तेन पूर्वानुमितेन यागेनानुरक्ताः। तत्र वाजिनसंयोगान्यथानुपपत्त्या यागे कल्प्यमाने वाजिपदोपात्तयागातिक्रमकारणाभावात्तत्सद्भावे चान्यविषयार्थापत्त्यनुत्थानात्स एव यागस्तदेवापूर्वं सैव देवतेति निश्चयान्न व्यतिरिक्तकल्पनं लभ्यते। तम्मात्तत्रैव कर्मण्यामिक्षावाजिनयोर्विकल्पः समुच्चयो वा। सत्यपि चोत्पत्तिवाक्यशिष्टत्वे निष्कृष्य यागं गुणान्तरं विधास्यते। यद्यपि च द्रव्यदेवतासंयोगानुमितत्वादसौ न निष्कृष्टः श्रुतस्तथाऽपि क्रियात्मनाऽस्त्येवाऽऽनुमानिकी व्यतिरेकबुद्धिः। यागपदमेव वाऽत्रानुमीयते। त-

६ णे] ( अ° २ पा° २ अ° ३ सू° ६ ) अस्मिन्निति शेषः।
११ म्] वाजिनद्रव्यविशिष्टमित्यर्थः।
२३ बुद्धिः] द्रव्यदेवतानुरक्तत्वेनाप्यनुमितस्य यागस्य क्रियारूपतया कारकरूपाभ्यां द्रव्यदेवताभ्यां संभवत्येव निष्कर्ष इत्याशयः।

दाऽऽमिक्षापरित्यागेऽपि न विनश्यति। वाजिशब्दोऽपि च तदनुमितयागप्रतिपत्त्यर्थमेवोच्चार्यते। न हि तन्निरपेक्षो वाजिवाजिनसंबन्धोऽवकल्पते। कारकाणां परस्परसंबन्धाभावात्। तस्मान्न कर्मान्तरमिति। अत्राभिधीयते। § 4168

गुणान्तरावरुद्धत्वात्पूर्वकर्मण्यसंभवात्।
क्रियान्तरमतिं कुर्यादात्मसंगतये गुणः॥§ 4170

अपूर्वः कर्मान्तरसंयोगानर्हो वा गुणः कर्मान्तरं कल्पयति। वाक्ययोः समत्वात्—इतरे तरनिरपेक्षत्वात्। उभौ हि द्रव्यदेवतासंयोगावात्म- 533
विरोधेनान्योन्यावकाशमप्रयच्छन्तौ पृथक्कर्मणी विधत्तः। सत्यं, पूर्वत्रासंभवन्गुणोऽन्यत्कल्पयति। कथं नु पूर्वकर्मणा तद्देवतया वा वाजिनं न संबध्यते। तत्कार्यवर्तिगुणावरोधात्। कथं न समुच्चयः। *'एकार्थास्तु विकल्पेरन्' इति हि स्थास्यत्येतत्। विकल्प एवास्त्विति चेत्। न। अतुल्यबलत्वात्। तद्दर्शयति—श्रुत्या विश्वेषां देवानां तदुपात्तस्य च कर्मण आमिक्षासंबन्धः, वाजिनसंबन्धस्तु वाक्येन। सर्वत्रैव तावत्— § 4171

तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन चेष्यते।
देवतासंगतिस्तत्र दुर्बलं च परं परम्॥§ 4173

आह। मन्त्रस्य तावदविधायकत्वाल्लिङ्गवच्छ्रुतितो दौर्बल्यं भवेत्। चतुर्थीतद्धितयोस्तु को विशेष इति वक्तव्यम्। तदुच्यते। § 4174

देवतासंगतिः श्रुत्या तद्धितान्तात्प्रतीयते।
चतुर्थ्यन्तात्तु वाक्येन पदद्वयसमीपतः॥§ 4176

वैश्वदेवीति हि श्रुत्यैव देवतासंबन्धः प्रतीतः। इतरत्र तु 'वाजिभ्यो वाजिनम्' इति पदद्वयसामीप्याद्गम्यते। नन्विहाप्यामिक्षापदसंनिधानवशेनैव द्रव्यदेवतासंबन्धः प्रतीयत इति तुल्यं वाक्यगम्यत्वं भवेत्। अथ वैश्वदेवीति श्रुत्या देवतात्वं वाक्येन द्रव्यसंबन्धः स इहाप्यविशिष्टः। चतुर्थीश्रुत्या देवतात्वेऽभिहिते वाक्येन द्रव्यसंगतिमात्रकरणात्। अथ द्रव्यमात्रसंबन्धे तद्धितान्तेनैव कृते विशेषमात्रमामिक्षापदसंनिधेर्भविष्यतीत्युच्यते। तदप्यविशिष्टमितरत्रापि। वाजिभ्य इत्येकपदेनैव संप्रदानं ब्रुवता संप्रदेयाद्विना तदनुपपत्तेः सामान्यापेक्षे सति वाजिनपदसंनिधानेन विशेषमात्रप्रतीतेः। अपि च भवतु नाम तद्धितश्रुतेर्द्रव्यमात्रसंबन्धः। तत्र द्रव्यमात्रं वाजिनेऽप्यविशिष्टमिति न विरुध्यते। विशेषयोस्त्वामिक्षावाजिनयोर्विरोधः। तयोश्चोभयत्र वाक्यलभ्यसंबन्धत्वादविशेषः। तेन विकल्पः प्राप्नोत्येव। तदुच्यते। § 4177

११ *] ( अ° १२ पा° ३ अ° ४ सू° ९ )।

नैव हि द्रव्यमात्रस्य तद्धितैर्देवतोच्यते।
अस्यशब्दाभिधेयस्य विशेषस्यैव देवता॥§ 4179

534 विश्वे देवा देवताऽस्या इति हि न सर्वनाम्ना द्रव्यसामान्यमभिधीयते। किं तर्हि, संनिहितो विशेषः, स एव व्यवहारक्षमो नानिरूपितं द्रव्यमात्रम्। अतः प्रातिपदिकेन योऽर्थ उपात्तः स प्रमाणान्तरगम्यस्य द्रव्यविशेषस्य देवतेत्येतत्तद्धितेन श्रुत्यैवोच्यते। ततश्चान्तर्णीतसंबन्धदेवतोपसर्जनद्रव्यविशेषप्रत्यये पदान्तरनिरपेक्षेण तद्धितान्तेन पदेन निर्वर्तिते कः पुनरसौ द्रव्यविशेषो यस्य तद्धितेन देवतोक्तेत्यन्वेषणायामयमित्यामिक्षापदेनोपनीयते। तत्र यदा तावत्प्रागेव विशिष्टप्रत्ययात्संबधोऽभिहितस्तदा न लक्ष्यमाणो भवति। अथापि प्रकृतिप्रत्यययोः स्वार्थवृत्तयोरेव नैरन्तर्यादन्तराले संबन्धोऽवगम्यमानो भवति। तथाऽप्यत्रैकपदस्थत्वात्पदद्वयसंनिधिगम्याद्बलीयान्विज्ञायमानः श्रौत इत्युच्यते। तेनैतौ द्वौ संबन्धावेको द्रव्यदेवताबन्धोऽपरो विशेषणविशेष्यभावः। तत्र पूर्वः श्रौत उत्तरो वाक्यलक्षण इति विशेषः। अतश्च नैवात्र नीलोत्पलादिवदर्थद्वारं वैश्वदेव्यामिक्षाशब्दयोर्विशेषणविशेष्यत्वं, किं तर्हि॥ § 4180

आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः।
आमिक्षापदसांनिध्यात्तस्यैव विषयार्पणम्॥§ 4182

नैवात्र तद्धितान्तेनैकोऽर्थोऽभिहित आमिक्षापदेनान्यः पश्चात्तयोर्विशेषणविशेष्यता, तद्धितान्तवाच्यस्य प्रथमप्रतीतेः। किं तर्हि। तद्धितान्तस्यानुपयुक्तानभिधानशक्तेरेव प्रतीक्षमाणस्योपपदेन विषयदानमात्रं क्रियते। § 4183

तेनाऽऽभिक्षापदसंनिधिबलाद्वैश्वदेवीशब्द एव तामभिधत्ते। न चेदानीमामिक्षापदस्यानुवादत्वम्, तेन विना तद्धितान्तस्य तद्विषयत्वाप्रतीतेः। न च वाक्यार्थत्वं तद्धितान्तपदार्थस्य पृथगप्रसिद्धेः। न हि द्वौ स्वतन्त्रौ पदार्थावगृहीत्वा वाक्यार्थः प्रतीयते। तेनाभिधेयोपनयनमात्रकारित्वान्न तद्धितश्रुतेरामिक्षापदेनार्थविप्रकर्षः क्रियते। *तथा चाऽऽह। § 4184

*श्रुत्यैवोपपदस्यार्थः सर्वनाम्नाऽभिधीयते।
तदर्थस्तद्धितेनैवं त्रयाणामेकवाच्यता॥§ 4186

तेन यैवाऽऽमिक्षा सैव देवतासंबन्धं यास्यतीत्येवमुक्ता सती वैश्वदेवीशब्देनोच्यते। तेन शब्दयोरेवात्र सामानाधिकरण्यं नार्थयोः। इतरत्र तु— § 4187

535 न प्रातिपदिकेनोक्तं न विभक्त्या हविः स्वतः।
न वाऽस्य देवतायोग इति वाक्यात्प्रतीयते॥§ 4189

२५ *] उपपदसर्वनामतद्धितानामैकार्थ्ये पूर्वाचार्यसंमतिं दर्शयति—तथा चेत्यादिना।

२६ *] शक्त्यैवेत्यर्थः।

वाजिभ्य इति तु नात्र प्रातिपदिकेन विभक्त्या वोभाभ्यां वा द्रव्यसामान्यविशेषतत्संबन्धानांमन्यतममप्यभिधीयते। किं तर्हि। प्रातिपदिकार्थः संप्रदानमित्येतावन्मात्रमित्युक्तम्। तत्र न कथंचिद्द्रव्यसंबन्धः पदेऽन्तर्गत इत्यवश्यं वाक्येनैव वाजिनपदसामीप्यात्प्रत्याययितव्यः। अपि च। § 4190

यथेहास्यपदार्थोऽपि तद्धितेऽन्तर्गतः स्मृतः।
न संप्रदानमस्येति चतुर्थ्येवं विधीयते॥§ 4192

*‘साऽस्य देवता’ इति अस्यपदार्थे देवतातद्धितो विधीयते; नत्वेवं तत्संप्रदानमस्येति चतुर्थी विधीयते, येनास्य पदार्थोऽप्युपादीयेत। किं तर्हि, संप्रदानमात्रमेव तदभिधेयत्वेनोक्तं तथा च प्रतीयते। तेन त्वन्यथानुपपद्यमानेन संप्रदेयविषयमाकाङ्क्षामात्रं केवलमुत्पाद्यते। न चैतावताऽभिधेयत्वं भवति, सर्ववाक्यर्थानां पदार्थत्वप्रसङ्गात्। आकाङ्क्षया त्वेतावत्क्रियते। येन पदान्तरोच्चारणे सति संबन्धो जायते। निराकाङ्क्षत्वे पुनः सोऽपि न स्यात्। तेन यद्यपि चतुर्थीश्रुत्या देवतात्वमुक्तं तथाऽपि द्रव्यसंबन्धो वाक्येनैव। तत्र चास्माकं विवाद इति दुर्बलो वाजिनसंबन्धः। किं च। § 4193

श्रुत्यर्थः संनिकृष्टत्वं वाक्यार्थो विप्रकृष्टता।
विप्रकृष्टप्रकारोऽतः सर्व एव प्रपञ्च्यते॥§ 4195

सर्वप्रकारमामिक्षासंबन्धस्य संनिकर्षलक्षणं श्रौतत्वम्। § 4196

वाजिनसंबन्धे च विप्रकर्षाद्वाक्यीयत्वं तद्यथा, यद्यपि तावद्द्रव्यविशेषस्य तद्धितो न ब्रूयाद्देवतात्वं, तथाऽपि सामान्यस्य तावद्ब्रवीति, न चतुर्थ्यन्तेन सामान्यमप्युच्यत इति विशेषः। यत्तु सामान्यं वाजिनेऽप्यविरुद्धमिति, तदयुक्तम्। वैश्वदेवीति हि स्त्रीप्रत्ययेन समानपदगतेनैव स्त्रीद्रव्यं किमपि संनिहितमित्यवधार्यते। न च वाजिनस्य स्त्रीत्वं संनिधिर्वाऽस्तात्यनाश्रयणम्। अपि च। § 4197

वाजिभ्यो वाजिनं कुर्यादिति नैवास्ति संगतिः।
तत्र तत्सिद्धयेऽवश्यं दानाध्याहारकल्पना॥§ 4199

कर्तव्यतावचनमामिक्षावाक्येऽप्यध्याहारात्प्रयोगवचनाद्वा लब्धव्यमिति न
पर्यनुयुज्यते। ‘वाजिभ्यो वाजिनम्’ इति तु ददातिमनध्याहृत्य न शक्यः 536
संबन्धः प्रत्येतुं यथा वैश्वदेव्यामिक्षेति। कुतः। § 4200

नाम्नां द्विधेव संबन्धः सर्ववाक्येष्ववस्थितः।
सामानाधिकरण्येन षष्ठ्या वा प्रतिपाद्यते॥§ 4202

७ *] पा. सू. ( ४—२—२४ )
१४ च] भाष्यस्थश्रुतिवाक्यशब्दौ यथाश्रुतार्थपरतया व्याख्यायाधुना संनिकृष्टविप्रकृष्टार्थपरतया व्याकरोति—किंचेत्यादिना।

न चात्र सामानाधिकरण्यं षष्ठीं वा पश्यामः। न च वाजिभ्यं इति कारकविभक्तिः क्रियापदादन्येन संबध्यते। न चेह तदुपात्तम्। तत्राध्याहारकल्पनादेको विप्रकर्षः। त्रिपदसंबन्धगौरवादपरः। इतरत्रापि यजिकल्पनादविशेष इति चेत्। न। तस्य संबन्धोत्तरकालानुमेयत्वात्। वैश्वदेव्यामिक्षेति हि निष्पन्ने संबन्धे यजिरनुमीयते न तदधीना संबन्धप्रतीतिः। तव तु परस्वत्वापादनासंभवात्स च भविष्यत्यर्थसंबन्धार्थम्। आदितश्च द्रव्यदेवतापदैकवाक्यत्वसिद्धये ददातिरिति विशेषः। कल्पिते च ददातौ कारकयोः परस्परसंबन्धाभावात्तेन तावत्सह संबन्धः। तत एकार्थत्वात्परस्परनियम इति विप्रकृष्टता। न त्वामिक्षायां तद्वत्किंचिदिति संनिकर्षः। सत्यपि च वाजिवाजिनयोः साक्षात्संबन्धे वैयधिकरण्याद्विप्रकृष्टत्वम्। वैश्वदेव्यामिक्षेति तु सामानाधिकरण्यात्संनि कृष्टता। तथा च वक्ष्यति 'समर्थतराणि हि समानविभक्तीनि भवन्ति दुर्बलो विविभक्तिरिति'। किं च। § 4203

संप्रदानत्वमात्रं च चतुर्थी वाजिनां वदेत्।
देवता लक्ष्यमाणा तु पुनर्दूरेण वाजिने॥§ 4205

न हि तद्धितवद्देवतायां चतुर्थ्युत्पत्तिः स्मर्यते। क्व तर्हि, *संप्रदाने। न च संप्रदानस्यैव देवतात्वं, मा भूत् 'हिरण्यमात्रेयाय ददाति' इत्यत्राऽऽत्रेयो देवता। यदि च देवता संप्रदानं स्यात्ततो यागदानयोरभेद एव स्यात्। प्रतिग्रहे व्यापृतं च कारकं संप्रदानं भवति। न च देवतायाः प्रतिग्रहीतृत्वं संभवति। तेनावश्यं यः संप्रदानत्वात्प्राग्भावी दतुद्देशः स चतुर्थ्या लक्षयितव्यः। यद्वा परस्वत्वापादनसंबन्धोत्तरकालभाव्यैश्वर्यं, तादात्म्यप्रसिद्धेर्देवतात्वस्य। यद्यप्यनिराकरणात्मकसंप्रदानमेव देवतेत्यभ्युपगमस्तथाऽपि सामान्येन व्यभिचारिविशेषलक्षणाद्विकृष्टत्वम्। अपि च। § 4206

चतुर्थीपञ्चमीरूपसंदेहाद्विमकृष्टता।
तद्धितस्य त्वसंदेहान्न बुद्धिर्विप्रकृष्यते॥§ 4208

वाजिभ्य इति रूपसामान्यात्प्रसक्तं सद्यावत्पञ्चमीत्वमपनीय चतुर्थीत्वं साध्यते तावन्मतिविक्षेपः। ननु तद्धितेऽप्यनेकाषत्याद्यर्थसंदेहात्तुल्यमेतत्।
537 विषम उपन्यासः। शब्दसंदेहो मयोपन्यस्तः, त्वयाऽर्थसंदेहः। सर्वथा तावत्तद्धितत्वमसंदिग्धम्। अर्थः पुनर्योग्यत्वादितरासंभवेन देवतात्मको निर्णेष्यते। भवतस्तु निर्णीतेऽपि शब्दे चतुर्थ्यर्थानेकत्वादुपपदकारकलक्षणसंदेहादस्त्येव

---

११ ति] ( अ° ३ पा° १ अ° ६ सू° १२ ) अत्रत्यभाष्यसंमति दर्शयति वक्ष्यतीत्यादिना।

१५ *] पा° सू° ( २-३-१३ ) चतुर्थ संगदाने इति स्मृत्येति शेषः।

१९ तुद्देशः] तदुद्देश इति—तस्याः देवताया उद्देश इत्यर्थः। तथा च प्रतिग्रहीतत्वे सति त्यज्यनानद्रव्योद्देश्यत्वरूपसंप्रदानत्ववाचिन्या चतुर्थ्या तदेकदेशभूतं, हविस्स्यागकालीनवतुध्यन्तपदोच्चारणकर्मत्वरूपं देवतात्वं लक्षणयैव प्रति, पाद्यत इत्याशयः।

विप्रकर्षः। तेनार्थसंदेह उभयोः समत्वान्नैकश्चोद्यते। शब्दसंदेहस्त्वसाधारणत्वाच्चोदितः। किंच। § 4209

आमिक्षोत्पद्यमानेन कर्मणा सह युज्यते।
ततो वाक्यान्तरोपात्तमुत्पन्नेन तु वाजिनम्॥§ 4211

यथा चोत्पत्तिशिष्टस्य बलीयस्त्वं न च क्रियामात्रं निष्कृष्य गुणान्तरं विधातुं शक्यते तथोक्तं चित्राधिकरणे वैश्वदेवाधिरणे च। वैश्वदेवाधिकरणन्यायेन च प्रकरणमपेक्षितव्यमपरं वाजिनवाक्येन। कुतः। § 4212

द्रव्यदेवतसंबन्धो यागमात्रमपेक्षते।
आमिक्षायाग एवेति तत्र प्रकरणाद्भवेत्॥§ 4214

वाजिनं हि विना यागेन बाजिभिर्न संबध्यत इति कंचिद्यागमपेक्षते। तत्र यदामिक्षायागस्यैव तदप्यङ्गमिति कल्प्यते तत्प्रकरणात्। ततश्च यद्यपि वाक्येनैवाऽऽमिक्षायागे विश्वे देवा विधीयन्ते तथाऽप्यन्यनिरपेक्षविहितत्वादामिक्षायाः प्रकरणसापेक्षवाक्यविहिताद्वाजिनाद्बलीयस्त्वं भवेदिति विशेषः। प्रकरणानपेक्षयागसंबन्धे चान्येषामिहाप्रतीतेरपूर्वयागः संबन्धी भवतीति भेदः। न चैवमादीनामनुपात्तपुरुषव्यापाराणामननुमिते यागे वाक्यान्तरापेक्षाऽस्तीत्युक्तमाग्नेयादिषु। § 4215

विश्वे देवाश्च रूढ्यैव संबध्यन्ते पयस्यया।
वाजिनेन तु संबन्धो भवेदवयवानुगः॥§ 4217

वाजिन इति ह्यवयवप्रसिद्ध्या विश्वे देवाः प्रत्याय्यन्ते। वाक्यार्थवच्चावयवार्थौ समुच्चित्य संबन्धं कल्पयित्वा सा भवन्ती श्रुतिमात्रोपनिपातलभ्यायाः समुदायप्रसिद्धेर्दुर्बला भवतीति दुर्बलतरः संयोगो वाजिनस्य। § 4218

वाजिशब्दोऽपि वाऽश्वादौ सुनिरूढः स्वभावतः।
क्लेशेनैव विना कार्याद्विश्वदेवेषु वर्तते॥§ 4220

देवतात्वं नाम यस्यैव शब्देनोक्तं तस्यैव योग्यस्यायोग्यस्य वा भवतीति न जातिनिमित्तं, येनायं बाजिशब्दो बलादन्यत्र नीयेत। अतश्च वाजिशब्दोऽश्वानां देवतात्वं वदन्विना कार्येण दुर्बलयाऽवयवप्रसिद्ध्या विश्वदेवेषु कल्प्यत इति विप्रकर्षः। § 4221

सत्यप्यवयवार्थे च वाजिन्यन्याऽपि देवता।
पुरोडाशादिनेत्येवं क्लेशात्प्रकृतनिश्चयः॥§ 4223

सर्वे ह्यग्न्यादयः पुरोडाशादिभिरन्नैर्वाजिनो विज्ञायन्ते। तत्राऽऽमिक्षायां 538
तावदन्नशब्दः प्रयुक्तो न पुरोडाशादावित्येकः क्लेशः। पुनरपि चाऽऽमिक्षामात्र-

६ णे] ( अ० १ पा० ४ अ० २ )
६ णे] ( अ० १ पा० ४ अ० १० )

ग्रहणे सति वैश्वदेव्याऽऽमिक्षयैव तद्गतां ग्रहणमित्यपरः। ततश्च स्वरसेन श्रुतिरन्यत्रापि वर्तमाना सती प्रकरणेनैव विशेषे स्थापयितव्या। न च तत्र किंचिन्निमित्तमस्यि। गुणभावेनोपादीयमानत्वाद्देवतायाः। संस्कार्यत्वे च ‘व्रीहीन्प्रोक्षति’ इत्यादिष्विव कथंचिदपूर्वसाधनलक्षणायां प्रकृतग्रहणं भवेत्। न चात्र तदस्ति। विनाऽपि तेन कर्मणः प्रयोजनवत्त्वोपपत्तेः। कामं वाजिनस्यैव प्रतिपत्तिः संस्कारो भवेन्न देवतायाः। प्रकृतग्रहणे चाग्न्यादीनां सद्भावादनवधारणम्। अथ विश्वदेवेषु सर्वे संगृहीता भविष्यन्तीति तेषां ग्रहणम्। तदयुक्तम्। सर्वसंग्रहस्याप्रमाणकत्वात्। बहुवचनश्रुत्या सर्वग्रहणमिति चेत्। न। तस्य त्रिष्वेव चरितार्थत्वात्। न च त्रिष्ववधारणज्ञानमिति चेत्। न। *‘मुख्यं वा पूर्वचोदनाल्लोकवत्’ इत्यवधारणहेतुसद्भावात्। तस्मान्न विश्वेदेवग्रहणे किंचित्प्रमाणम्। साकाङ्क्षा च देवता द्रव्येण संबध्येत। सा चात्र वाजिशब्देन द्रव्यवत्येवोपादीयमाना निराकाङ्क्षेव प्रत्यायितेति न द्रव्यान्तरसंबन्धं क्षमते। तस्मादतुल्यबलत्वम्। किं च §4224

श्रुत्यैव समवायित्वं देवतानां स्वकर्मसु।
विश्वदेवश्रुतिस्तत्र वाजिशब्देन दुर्लभा॥§4226

यदि हि वाजिनयागेऽपि विश्वे देवा एव देवतात्वेनाभ्युपगम्यन्ते ततोऽवश्यं निगमस्थानेषु विश्वेदेवश्रुतिरेवोच्चारणीया। सा चात्र विधिशब्देऽनुच्चारितत्वादशक्या लब्धुम्। तत्रैवं क्लेशेन लभ्येत। वाजिशब्दः किंचिदर्थं वदति। सोऽपि रूपासमवायाद्विश्वदेवशब्दं लक्षयति। ततोऽसौ वाजिनत्यागवेलायामुच्चार्यमाणत्वेन विधीयत इति क्लेशः। तत्रापि चार्येन शब्दलक्षणायामविशेषात्सर्वे देवा निःशेषा देवा इत्यादयः सर्वे पर्यायाः प्राप्नुवन्तीति विश्वेदेवशब्दो दुर्लभः। न चान्यशब्दोच्चारणे तेषां देवतात्वं भवति। *‘विधिशब्दस्य मन्त्रत्वे भावः’ इति वक्ष्यति। वाजिनशब्द एवात्र पुरुषः शास्त्रेण प्रवर्तित इति तदुच्चारणेनैव वाजिनस्य देवता संपादनीया। ततश्च यद्यपि विश्वेदेवार्थ एवेह वाजिशब्देनोच्यमानो देवता भवति, इतरत्र विश्वेदेवशब्देन तथाऽपि महेन्द्रन्यायेन
539 विनियोगभेदाद्विस्पष्टं देवतापृथक्त्वमित्यपरोऽयं द्रव्यदेवतासंबन्धो विज्ञायते। न च प्राप्ते कर्मण्यनेकार्थगुणविधानं संभवतीत्युपपन्नमेतत्, गुणश्चापूर्वसंयोगे भेदक इति॥ २३॥ §4227

इति गुणाधिकरणम्॥ ९॥

१० *] ( अ. १२ पा. २ अ. १० सू. २५ )।
२२ *] ( अ. १० पा. ४ अ. १३ सू. २३ )
२५ न्यायेन] ( अ. २ पा. १ अ. ५ सू. १६ ) अप्रत्यन्यात्रेनेत्यर्थः।

## ०.०.५४ गुणप्रत्युदाहरणाधिकरणम्

अगुणे तु कर्मशब्द इति प्रत्युदाहरणसूत्रम्। § 4229

अन्येनानवरुद्धे हि गुणो यत्र विधीयते।
तस्मिन्गुणविधिः शक्य इति कर्म न भिद्यते॥ २४॥§ 4231

इति गुणप्रत्युदाहरणाधिकरणम्॥ १०॥

## ०.०.५५ इन्द्रियकामाधिकरणम्

'अग्निहोत्रं जुहोति' इति प्रकृत्य 'दध्नेन्द्रियकामस्य' इति श्रूयते। तत्र संदेहः। किं पूर्वस्मादिदं कर्मान्तरमुत तस्यैव गुणात्फलमिति। द्वयमेव पुरस्तादवस्थितम्। अगुणोत्पत्तौ कर्मणि तत्रैव गुणः। सगुणोत्पत्तौ तु प्रकारान्तरेण चाविधीयमानानेकगुणसंगतौ सत्यां कर्मान्तरत्वमिति। तदिहागुणश्च कर्मशब्दोऽनेकार्थोपादानं च वाक्ये श्रूयते। तेन संभवासंभवयोः संदेहः। तत एतत्सिद्ध्यर्थमिदं विचारयितव्यम्। किमिह होमात्फलमुत गुणात्। § 4233

किमर्थं पुनः 'गोदोहनेन पशुकामस्य' इत्येतद् वृत्त्यन्तरोदाहृतमतिक्रम्यते। भेदाभेदयोरनुपयोगात्। क्रत्वर्थपुरुषार्थविचारे हि तस्यैतस्य वोदाहर- 540
णेन कश्चिद्विशेषः स्यात्। इह तु भेदाभेदलक्षणे तदनुगुणमुदाहर्तव्यम्। न च प्रणयनस्य देशान्तरप्राप्तिसंस्कारात्मकत्वाद्भेदाभेदयोर्विशेषः। यदि च गोदोहनात्फलं यदि च तद्वतः प्रणयनादुभयथाऽपि तादृगेवानुष्ठानम्। इह पुनर्यदि गुणात्फलं ततः सायंप्रातराहुत्योरेव दधि प्रयोक्तव्यम्। अथ होमात्ततो नैयमिकहोमव्यतिरिक्तमनियतकालं दधिसाधनकं होमान्तरं सकृदेव दर्विहोमत्वादपूर्वं क्रियत इत्यस्ति भेदज्ञाने विशेषः। ननु च होमादपि फले 'संनिधौ त्वविभागात्' इत्यनेन न्यायेन स्वर्गयावज्जीवयोरिव तदेव कर्म विधीयते। नैतदेवम्। § 4234

यदि नामाविभागः स्यात्कर्मणः प्रत्यभिज्ञया।
ततस्तदेव कर्म स्यादन्यथा भेदनिश्चयः॥§ 4236

७ पुनः ] गोदोहनमिति—पात्रविशेषसंज्ञा।
८ विचारे ] चतुर्थाध्याय इत्यर्थः।
९ श्चिद्विशेषः ] कश्चिद्विशेष इति—कर्मणः फलसंबन्धे दधिगोदोहमादेः—क्रत्वर्थत्वात्फलकामनां विनाऽनुष्ठानम्। विकृतौ चातिदेशः सिध्यति। गुणस्य फलसंबन्धे तु पुरुषार्थत्वान्नोक्तप्रयोजनामित्यनुष्ठाने विशेषः स्यात्। तथाऽपि क्रत्वर्थपुरुषार्थचिन्ता चर्तुथ एव संगता नेहेत्याशयः।
१४ ले ] ( अ॰ २ पा॰ ३ अ॰ १३ सू॰ २६ )।

फलनिमित्तादौ हि विधीयमानं कर्मानुत्पन्नं तैः संबन्धुं न शक्नोतीत्यर्थादुत्पत्तिविधित्वमप्यनुभवितुमुपक्रमते। तत्र यदि बलीयस्या विपरिवृत्त्या ताद्रूप्यादप्रच्युतया पूर्वकर्मोत्पत्तिरूपं स्थाप्यते तत्रोत्पादकशक्तिविरोधात्प्रत्यभिज्ञानबलेन तदेव कर्माध्यवसीयत इति न भिद्यते। यदा तु पूर्वकर्मरूपात्किंचिदप्याधिक्यं विज्ञायते तदा नैवाविभागज्ञानमस्तीत्यर्थादुत्पत्तिविधिर्भवन्नन्येन तद्रूपोत्पत्तिसमर्थेन विध्यन्तरेणानिवारितशक्तिः **सत्यप्यन्यपरत्वेऽनुपादेयं** प्रत्युपादानात्कर्म भिनत्ति। न च 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यत्रेन्द्रियं प्रत्युपादानाद्दधिविशिष्टहोमान्तरबुद्धिर्भवन्ती केनचित्तद्रूपोत्पत्तिमुपस्थापयता वार्यते। कुतः। § 4237

होमो हि प्रकृतः शुद्धः स्ववाक्यादवधारितः।
सोऽस्मिन्दधिविशिष्टत्वाद्विभागेनैव गम्यते॥§ 4239

'अग्निहोत्रं जुहोति' इति होमः शुद्ध उत्पन्नः, इह च दधिविशिष्टः श्रूयते, तेनाविभागादित्यस्याभेदहेतोरसिद्धत्वाद्भिद्यते। ननु 'दध्ना जुहोति' इत्यस्त्येव दधिविशिष्टो होमः। न। तस्यानुत्पत्तिवाक्यत्वात्। येन तावदसावुत्पादितो न तत्र दधिविशिष्टः, यत्र दधिसंबद्धस्तत्र नोत्पादितः। तत्संनिधेर्गुणार्थेन पुनः श्रुतिरिति साधितत्वात्। उत्पत्तिवाक्येनैव च फलवाक्यस्योत्पादकत्वं प्रतिबध्नता कर्मान्तरत्वं निराक्रियते न गुणवाक्येनानुत्पादकत्वात्। उत्पत्तिवाक्येनैव
541 च सर्वाणि प्राकरणिकानि गुणफलनिमित्तवाक्यानि संबध्यन्ते न परस्परेण। कुतः। § 4240

तान्युत्पत्तिमपेक्षन्ते सा चाव्यवहिता यतः।
गुणादीनां त्वसंबन्धाद्व्यवधिः स्यात्परस्परम्॥§ 4242

अनुत्पन्नस्य गुणादिभिरसंबन्धादुत्पत्तिः सर्वैरपेक्ष्यते। न तु परस्परापेक्षायां किंचित्कारणमस्ति। सैव च सर्वत्रानुस्यूतत्वादसंबन्धिनाऽव्यवधीयमाना संबध्यते। गुणानां च परार्थत्वादसंबन्धे सति एकेनापि व्यवहितानामननुषङ्गान्न केनचिदेकवाक्यत्वमस्तीति न 'दध्नेन्द्रियकामस्य' इत्यत्र 'दध्ना जुहोति' इत्येतदुपतिष्ठते। वक्ष्यति चैतत् 'एकस्य तूभयत्वे संयोगपृथक्त्वम्' इत्यत्राधिकरणे। तत्रैतत्स्यात्। सैवोत्पत्तिर्वाक्यान्तरेण दधिमती कल्पिताऽनुषज्यमानाऽत्र भेदबुद्धिं निराकरिष्यति। तदनुपपन्नम्। एवं हि सति— § 4243

वाक्यान्तरेण तत्कर्म यथा दध्ना विशेषितम्।
तण्डुलादिभिरप्येवमिति नैकात्मिकं भवेत्॥§ 4245

---

१६ श्रुतिरिति] ( अ॰ २ पा॰ ३ अ॰ १३ ) इत्यत्रेति शेषः।

२६ त्] ( अ॰ ४ पा॰ ३ अ॰ ३ सू॰ ५ )।

उत्पत्तिवाक्ये तावत्केवले निरीक्ष्यमाणे शुद्धहोमावगमादप्रत्यभिज्ञानम्। अथ प्राकरणिकगुणवाक्यानुरक्तमालोच्यते तथाऽपि तण्डुलादिद्रव्यविशिष्टत्वान्नैव केवलदधियुक्ते वाक्येऽस्ति प्रत्यभिज्ञानम्। अथ दधिसद्भावमात्रापेक्षिणीन्द्रियकामवाक्ये सत्यपि तण्डुलादीन्यनपेक्षितत्वादसत्तुल्यान्यनाश्रित्य केवलं दधि ग्रहीष्यत इति। तथा सति तदेवाऽऽपतितं भवति। 'दध्ना जुहोति' इत्येतदेव वाक्यं केवलं गृह्यत इति। निवारितं चैतत्। अपि च § 4246

दध्यत्र दशमे पक्षे तद्धोमस्य विशेषणम्।
नित्यं चेन्द्रियकामस्य तेनापि न निरूप्यते॥ § 4248

यद्यपि तावद्दध्यादीनि नित्यं होमे समुच्चीयेरन् तथा सति विचित्रमपि कर्मैकदेशग्रहणेन चोदितमिति कथंचित्कल्प्येत। दध्यादीनां तु वैकल्पिकत्वादेकैकस्यैव दशमे पक्षे होमाङ्गत्वम्। अतश्च दधिवाक्येऽप्यालोच्यमामे पाक्षिकं दधि दृश्यते। नित्यवच्च तदिन्द्रियकामहोमे श्रूयते। तस्मादपि न प्रत्यभिज्ञायते। न च यदा दध्ना जुहुयादित्येवमनुवदितुं शक्यते। फलस्याविधेयत्वात्। एषा ह्यत्र वचनव्यक्तिः। यदीन्द्रियकामस्यदा नित्यं केवलदधिविशिष्टं होमं कुर्यादिति। न चासौ तादृगन्यतः प्राप्त इति भिद्यते। 542
ननु होमरूपमात्रं तावत्प्रतिज्ञातं तत्प्रत्यभिज्ञानाच्चाभेदसिद्धिः। यत्तु द्रव्यं न प्रत्यभिज्ञायते न तत्कर्मभेदकारणम्। तस्मात्तदेव कर्म गुणमात्राभ्यधिकं फले विधीयते। नैतदेवम्। कुतः। § 4249

प्राप्ते कर्मण्यनेकार्थविधिः पूर्वं निराकृतः।
त्वत्पक्षेऽनेकसंबन्धविधिश्चात्र प्रसज्यते॥ § 4251

दधिहोमसंबन्धं होमफलसंबन्धं च विदधद्वाक्यं भिद्यते। तेनावश्यं विशिष्टविधिरभ्युपगन्तव्यः। ततश्च सिद्धं कर्मान्तरत्वम्। यथैव चार्थादनियतानेकद्रव्यकत्वे प्राप्ते केवलदधिनियमादेकार्थविधानं, तथैव परस्परानपेक्षैस्तण्डुलादिविधिवाक्यैर्वैकल्पिकदशद्रव्यकत्वे कल्पिते तण्डुलादिव्युदासेन केवलदधिनियमकरणात्। न ह्यसावेतस्माद्वाक्यादृते कथंचिदपि प्राप्तः, तेन होमात्फले भवति कर्मान्तरत्वम्। अतः पूर्वपक्षः परिगृह्यते। § 4252

कर्मशब्देऽगुणेऽप्यत्र कर्म भूयो विधीयते।
फलं हि श्रुतमेतस्मिन्कर्मतस्तच्च युज्यते॥ § 4254

---

२ थाऽपि] आदिशब्देन—पयो दधि यवागूश्च सर्पिरोदनतण्डुलाः। सोमो मांसं तथा तैलमापस्तानि दशैव तु॥ इत्यादिना निर्दिष्टानि ग्राह्याणि।

२६ पि] एवं चवाक्यान्तरतोऽप्राप्तदधिनियमस्येव फलान्वयस्यापि विधेयत्वावश्यंभावादपरिहार्यो वाक्यभेदोऽकर्मान्तरत्व इति शेषपूरणम्।

समस्तमेव भावार्थाधिकरणं पूर्वपक्षः। तत्र ह्येतदवस्थितम्—आख्यातशब्दाः फलपदेन संबध्यन्ते न द्रव्यगुणशब्दा इति। तस्मात्फलस्य कर्मयोगित्वात्फलश्रुतौ सत्यां कर्म विधीयते न कर्मणि गुणः। कथम्। § 4255

प्राप्तस्तावद्गुणो नैव विधानं पुनरर्हति।
अप्राप्तविधिपक्षेऽपि भवेद्व्यर्था फलश्रुतिः॥§ 4257

तत्र नामागुणे कर्मशब्दे सति गुणो विधीयते। यत्र स गुणो न भवति। यत्र चार्थान्तरं न श्रूयते। न चेह द्वयमपि तदस्ति। दध्नो वाक्यान्तरेणैव प्राप्तत्वात्, फलस्य चाभ्यधिकस्योपादानात्। अत आह—**फलमिह श्रूयते तच्च कर्मणो न्याय्यमिति**। तत्र **किं दृष्टं हि कर्मणः फलमिति** प्रश्नस्य द्विधा प्रतिभासः। एकस्तावन्नेति ब्रूमः। **न ह्येतद् दृष्टेनानेन सिध्यती**त्यादेर्निराकरणपरत्वेन सिद्धान्तच्छायानुसारात्किमित्येतावानेव प्रश्नः। किमित्येतन्न्याय्यमित्यर्थः। इतर आह—**दृष्टं हि कर्मणः फल**मिति। तस्योत्तरं **नेति ब्रूम इति**। य-
543 दीत्यादि तावत्स्वयमेवाऽऽशङ्क्य निराकरोति-यावत्तस्मा**न्नैवंजातीयकेष्वेतद्भवतीति**। **तत्र तु कथं तर्हि होमान्न्याय्यं फलमि**त्ययमैकान्तिकः सिद्धान्तवादिनः प्रश्नः। स चाऽऽत्मीयवचनोपसंहारादनन्तरं दुःश्लिष्टः प्रतिभातीत्येषैव ग्रन्थयोजना युक्ततरा। **तच्च कर्मणो न्याय्यमिति** पूर्वपक्षवादिनाऽभिहिते सिद्धान्तवादी दधिपदानर्थक्यभयेन भावार्थाधिकरणन्यायासंभवाच्छब्दस्यासामर्थ्यं मन्यमानः पृच्छति—**किं दृष्टं हि कर्मणः फलं कृष्यादित** इत्यनेन न्यायेन सामान्यतो दृष्टेन होमात्फलं मन्यस इति। यद्यपि च चोदनालक्षणधर्माभ्युपगमादनुमानादीनामीदृशेष्वर्थेष्वसामर्थ्यं स्थापितं तथाऽपि वेदार्थनिर्णये तेषां कारणत्वानिषेधात्तदर्थनिर्णयार्थमनुमानोपन्यासः। परः पुनर्भावार्थाधिकरणवासितान्तःकरण आक्षिपन्नाह—मा मे अध्यारोपमेवं दाः। शब्दे सति न ह्यनुमानं ब्रवीमि। न चैतेन सामान्यतो दृष्टेनास्मदभिमतं सिध्यति। असिद्धानैकान्तिकविरुद्धादिदोषदुष्टत्वादनुमानस्य। कथम्। यदि तावद्धोमः फलवान्फलवत्तया दृश्यमानत्वादित्युच्यते ततः प्रतिज्ञातार्थैकदेशत्वादसिद्धत्वम्। अथ कृष्यादीनां फलवत्तया दृश्यमानत्वादिति ततोऽप्यपक्षधर्मत्वम्। अथ विनैव पक्षधर्मत्वाद्यदृच्छामात्रेण कल्प्येत ततस्तद्द्रव्येष्वविशिष्टम्। अथ सादृश्यद्वारेणोपमया कल्प्येत तच्च सादृश्यं फलवद्भिः कृष्यादिभिः सह होमस्य क्रियात्मना विद्यते न द्रव्यस्याक्रियात्मकत्वात्, इति। तत्र द्रव्यस्याप्यस्त्येव किंचित्सादृश्यमिति मनसि कृत्वा यदि प्रत्यासन्नावान्तरसादृश्यापेक्षया तन्निराक्रियते ततः शक्यं प्रत्यासन्नतरापेक्षया होमस्यापि निराकर्तुमिति मन्यमान आह—**होमोऽप्यसदृशः**। साधनस्वरूपफलभेदात्कृषेः। § 4258

**अथ किंचित्सादृश्यं गृह्यते**—तद्द्रव्यस्यापि सदनित्यं द्रव्यवत्कार्यमित्यादिधर्मभेदादस्तीति पूर्वाभिप्रायविवरणम्। **अथ द्रव्यादन्यत्सदृशतरमस्तीति**—आपेक्षिकत्वात्सादृश्यस्य सुसदृशेऽपेक्षिते विप्रकृष्टं विसदृशमेव भ-

१ मेव] ( अ° २ पा° १ अ° १ )।

वति। तेन क्रियात्वे कृषिहोमवर्तिन्यपेक्षिते विप्रकृष्टत्वात्सदनित्यादियुक्तं द्र-
व्यं सदृशमेवेत्युच्यते। तथा सति क्रियान्तरमपि दृष्टार्थभोजनगमनाद्यवान्त- 544
रसादृश्यापेक्षया कृषिहोमयोर्विप्रकृष्टत्वादसादृश्यमेवेत्यकारणं स्यात्। आह
च— § 4259

नास्मिन्परमसादृश्यं दृश्यते कृषिहोमयोः।
किंचित्सादृश्यदृष्टिस्तु द्रव्येऽप्यस्तीत्यनिश्चयः॥ § 4261

**न चैतत्सिद्धमिति**-उपमानेन साधर्म्यमात्रानुमानेन वा सर्वधर्म-
प्राप्तिरनुमानोक्तव्याप्यव्यापकभावनिरपेक्षाऽयुक्ता। सर्वपदार्थानामेकत्वप्रस-
ङ्गात्। तथा चोक्तं—न हि देवदत्तस्य श्यामत्वे यज्ञदत्तस्य श्यामत्वं भ-
वितुमर्हति। तथा हि। § 4262

न सास्नानुगतिर्दृष्टा गवये सदृशे गवा।
प्रकृतेश्च फलादीनि यान्ति विकृतिं क्वचित्॥ § 4264

**यद्धि यस्य कारणभूतं दृष्टं सिद्धे**—दृष्टान्तधर्मिणि, **तच्चेत्साध्येऽपि**—पक्षे,
**कारणभूतमिति** गम्यते **भवति तत्तस्य साधकमिति**। अतो वचनात्कार्यकार-
णयोरेव गम्यगमकभावो भाष्यकाराभिप्रेत इति केचिन्मन्यन्ते। तत्त्वयुक्तम्।
अकार्यकारणभूतानामप्यनित्यत्वकृतत्वादीनां गम्यगमकभावप्रसिद्धेः। कार्य-
कारणयोरपि च न तथा कारणं गमकं व्यभिचारबहुत्वाद्यथा कार्यम्।
तस्माल्लिङ्गमेव व्याप्यत्वेन दृष्टं सपक्षे व्यापकस्यान्यत्र साध्यभूतस्य गमक-
त्वसंभावनया गृह्यमाणं कारणमित्युक्तमिति द्रष्टव्यम्। एवं च हेत्वधिकरणे
व्याख्यातम्। तथा च विवृणोति **तस्मात्सदृशमपि साधकमसाधकं वेति
परीक्षितव्यमिति**। § 4265

यदि तर्हि परीक्षितेन च कारणेनाभिहितेन कार्यमिदमभिधीयते। 'द-
ध्नेन्द्रियकामस्य' इत्यत्र वाक्ये यत्कर्म तत्फलवत्कर्मत्वात् कृष्यादिवत्। क-
र्मसाध्यं वेदं फलं फलत्वाद्व्रीह्यादिवत् इत्येतदनुमानायाथ **यत्कर्म तत्फलव-
दिति**, प्रतिसाधनाभिधानेनानैकान्तिकी करोति, **उपरते कर्मणि द्रव्याणां**— 545
तन्त्वादीनां, **तत्संयोगादीनां च द्रव्यान्तरं**—पटादि, **फलं दृष्टमिति**। उप-
रतग्रहणं च कर्मव्यतिरेकप्रदर्शनार्थम्। एवं हि शङ्क्यते कदाचिदिहापि
कर्मनिमित्तमेव फलं वदेत्। तेन ब्रवीति, इन्द्रियकामवाक्ये दधि फ-
लवद्द्रव्यत्वात्तन्तुवत्। इन्द्रियं वा द्रव्यजन्यं फलत्वात्पटादिवत्। **अपि च
कृषेर्नादृष्टमिति** हेतोर्विरुद्धत्वं वदति। यथैव ह्ययं हेतुः कर्मणः फलवत्त्वं
फलस्य वा कर्मजन्यत्वं साधयति एवं दृष्टार्थफलत्वम्। अशब्दगम्यफलत्वं

---

९ चोक्तं] ( अ. १ पा. १ अ. १ सू. २ ) इत्यत्र भाष्यकारेणेत्यर्थः।
११ च] ( अ° १ पा° २ अ° ३ )
२५ नैकान्तिकी] सप्रतिसाधनस्यापि संदेहहेतुत्वेन अनैकान्तिकीकरोतीत्युक्तम्।
३० त्वं] साध्यधर्मविशेषविपरीतसाधनत्वं विरुद्धत्वम्।
३१ म्] दृष्टोऽर्थः फलं यस्येति विग्रहः।

वा साधयति। तस्मान्नैवंजातीयके कार्यकारणभावे समस्तहेतुदोषसङ्गादेतद्भवति क्वचिद्दृष्टादन्यत्रादृष्टस्यापि सिद्धिरिति। यद्येतदनुमानं त्वयैव निराकृतं **कथं तर्हि होमान्न्याय्यं फलमित्युच्यते**। यद्वा, इतिकरणान्त एव प्रश्नः। **उच्यते। शब्देनावगम्यते तत्फलमिति** भावार्थाधिकरणोपन्यासेनोत्तरम्। **तस्माद्धोमात्फलमिति न्याय्यम्**। **दध्नः फलमिति चान्याय्यमि**त्यर्थसिद्धं सद्यदुच्यते तत्तुल्यबलवत्त्वनिराकरणार्थम्। कदाचिद्धि द्वयमपि न्याय्यं भवेत्। **अपि च दध्युभयमसमर्थं कर्तुमिति**। न तावत्कर्मानपेक्षस्य दध्नः करणत्वमस्ति। येन केवलं फलसंबन्ध्येव स्यात्। अत उभयत्र विधातव्यं, न च तच्छक्यमिति। **ननु कम्बलनिर्णेजनव**दिति प्रासङ्गिककर्मसंबन्धाभिप्रायेण वस्त्वसामर्थ्यनिराकरणार्थं वा। तथा **हि दध्युभयमसमर्थमिति**—यथाश्रुतगृहीतेन परवचनेन वस्त्वसामर्थ्यमेवोक्तमिति दृश्यते। § 4266

**न ब्रूम एकस्योभयं प्रयोजनं** न युक्तमिति। न वयं वस्तुसाम-
546 र्थ्यमपह्नुमहे, किं तर्हि। समर्थेऽपि वस्तुन्यविहितादनुष्ठानादवश्यं दध्युभयार्थत्वेन विधातव्यम्। न चैतदस्ति, अनेकसंबन्धकरणे वाक्यभेदप्रसङ्गात्। संनिकृष्टासंभवेन विप्रकृष्टोऽर्थो विधीयते। तदिह दधिहोमसंबन्धे संनिकृष्टे दधिफलसंबन्धे च विप्रकृष्टे युगपद्विधीयमाने युगपदेव संभवासंभवावभ्युपेतव्यौ स्याताम्। तस्मादन्यतरपरित्यागे सति त्वत्पक्षसिद्धिर्भवतीति संनिकृष्टवशेन दध्यपि होमेन संबध्यते सोऽपि फलेनेति कर्मयुक्ते सति फले सिद्धं कर्मान्तरत्वमिति॥ २५॥ § 4267

यादृशेषु वाक्येषु धात्वर्थात्फलमिति भावार्थाधिकरणे साधितं तैरननुगम्यमेतत्। कथम्। § 4268

यावद्धि विधिसामर्थ्यं धात्वर्थादनपोद्धृतम्।
तावद्यः फलसंबन्धः स धात्वर्थस्य गम्यते॥ § 4270

भवेत्फलश्रुतिर्या तु गुणसंवरिते विधौ।
सा तद्गतविधिस्पृष्टा तेन यात्येकवाक्यताम्॥ § 4272

भावनास्थमेव विधित्वं तादर्थ्यभेदेन तत्र तत्र संक्रामति। तद्यदा धात्वर्थसंक्रान्त्यवस्थां फलवतीं भावनामासादयति तदा धात्वर्थमेव करणी करोति। अन्यच्च तदर्थं भवति। तच्च 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इत्यादिषु नाम्नो विधिशक्त्यपहारासमर्थत्वादविहतम्। इह तु दधिपदमशेषनामधेय-
547 लक्षणासंस्पर्शादवश्यं विधातव्यं सदुत्तारयति धात्वर्थोपनिपतितं विधित्वम्। अतश्चाऽऽकाङ्क्षितधात्वर्थानुवादायां दध्यनुरक्तायां भावनायां फलमुपलभ्यमानं दधिसाधनकमेवावधार्यते न होमसाधनकम्। नह्यविधीयमानानाम-

१ के] एवंजातीयके—शब्दैकसमधिगम्ये।
१८ शेन] दधिविशिष्टहोमस्य फलोद्देशेन विधौ स्वपदार्थस्येव संनिकृष्टस्यापि विध्युपपत्तेः सिद्धान्त्यभिमतो विप्रकृष्टार्थविधिर्न सिध्यतीत्यभिप्रायः।

र्थानां साधनत्वं संभवति। न च विधेयान्तरोपादाने सति अतिक्रान्तार्थविधानमवकल्पत इत्युक्तम्। यथा च दध्ना विध्याक्षेपान्न होमविधानं तथा फलपदप्रत्यवेक्षणान्न होमे दधिविधानम्। किं तर्हि। फलभावनायाम्। तस्माद्दध्नः फलमिति। **कतमोऽत्र शब्दः पुरुषप्रयत्नस्य वक्तेति**। दधिफलपदयोर्भावनानभिधायकत्वेन साक्षाद्विधिविषयत्वानुपपत्तेराख्यातप्रत्ययापेक्षणे च 'आश्रितत्वात्प्रयोगस्य' इत्येवं धात्वर्थत्यागाशक्तेस्तत एव फलेन भवितव्यमिति मन्वानस्य प्रश्नः। सिद्धान्तवादी तु प्रत्ययार्थविधित्वं धात्वर्थानुवादत्वं च विभक्तं पश्यन्नाह—**जुहुयादिति**। **ननु श्रुत्या होमसंबद्धमेष** इतिपरस्य स्वाभिप्रायविवरणम्। पुरुषप्रयत्नश्च विध्युपेता भावनोच्यते। सत्यं भावार्थाधिकरणन्यायेन श्रुतिबलीयस्त्वादेवमन्यत्राऽऽश्रितम्। इह च ये भवदीयं पक्षमाश्रयेरंस्ते श्रुतिमपबाधेरंस्तराम्। कथम्। § 4273

स्याद्बह्वर्थविधानं ते स्तोकार्थविधिसंभवे।
मत्वर्थश्चोपलक्ष्येत पदत्यागोऽन्यथा भवेत्॥§ 4275

स्तोकार्थविधिसंभवे तावद्विधायको बहुतरार्थविधानमुपेक्षते। होमस्य च 548
फलभावनाकरणत्वाद्भावयेदिन्द्रियं होमेनेत्येवमवस्थितस्य करणभूतेनैव दध्ना समत्वात्संबन्धेऽनुप्रपद्यमानेऽवश्यं मत्वर्थलक्षणा परिग्रहीतव्या दधिमता होमेनेति। न च तस्यां किंचित्प्रमाणमस्ति। न च दधिशब्दस्यासति प्रवृत्तिनिमित्ते कर्मनामधेयत्वं घटते। सोऽयमुभयस्माद्भ्रष्टो दधिशब्दोऽनर्थक एव प्राप्नोति। ततश्च शब्दधर्मसंनिकर्षानुग्रहेण धर्म्येव शब्दः परित्यागाद्बाधित इति बाध्येततरां श्रुतिः। गुणसमभिव्याहारपक्षे तु न कस्यचिद्बाधः। तत्रैतदुच्यते। जुहोतीति शब्दो बाधित इति तत्परिहारार्थमाह—**अवश्यं जुहुयादिति** वक्तव्यम्। कथम्। § 4276

न दधीन्द्रियसंबन्धो भावनाप्रत्ययाद्विना।
न चास्योच्चारणं शक्यं केनचिद्धातुना विना॥§ 4278

प्रत्ययस्तावदवश्यमेव दधीन्द्रियविशिष्टां भावनां विधातुमुच्चारयितव्यः। स च केवलप्रयोगासंभवाद्धातुव्यतिरिक्तप्रकृत्यनुपपत्तेश्च यतः कुतश्चिद्धातोः पर उच्चारयितव्यः। ततश्च यत्र क्वचन धातावुपादातव्ये प्राप्ते प्रकरणप्राप्तहोमोपादानमङ्गीकृतम्। दधिसंबन्धोऽपि चास्य प्रकरणादेवाऽऽश्रयाश्रयिरूपः प्राप्तोऽनुवदिष्यते। यथा च न विभक्तेर्वचनमेवैकं प्रयोजनमिति ग्र-

२ म्] ( अ॰ २, पा॰ २, अ॰ ५, सू॰ १६ ) इत्यत्रेति शेषः।
६ च] ( अ॰ २, पा॰ १, अ॰ १ सू॰ ४. )।
७ विधित्वं] विधित्वम्—विधिसंबन्धः, विधेयतेत्यर्थः।

१० न्यायेन] भावार्थाधिकरणन्यायेन धात्वर्थविधिपक्षे दधिपदानर्थक्यापत्तेस्तत्परिहारार्थमेकपदोपादानलक्षणप्रत्यासत्तिरूपायाः श्रुतेः शब्दधर्मत्वेन धर्मिरूपाक्षरश्रवणलक्षणश्रुतितो दुर्बलाया बाधो नायुक्त इत्याशयः।

हादिषु कारकमात्रप्रतिपत्त्यर्थमुच्चार्यमाणनान्तरीयकत्वादविवक्षितामपि संख्यां
प्रत्याययतीति वक्ष्यते तथाऽत्र प्रत्ययानुग्रहार्थमपि धातुरुच्चार्यमाणः संबन्ध-
बलादविवक्षितमपि स्वार्थं प्रत्याययति। न हि तस्यार्थप्रत्यायनमात्रमेवैकं प्र-
योजनमिति वक्तव्यम्। **ननूच्यमानेऽपीति**—प्रत्ययानुग्रहार्थं धातुरुच्चार्यमाणः
स्वार्थं प्रत्याययतीति। न चास्य ग्रहैकत्ववदविवक्षाकारणं किंचिदस्ति। त-
स्माद्यथाभिलषितकेवलकरोत्यर्थासंभवादसमर्थमेतदिति। नैष दोषः। सत्यपि
549 होमसंबन्धे करोत्यर्थानपायात्तावन्मात्रेण प्रयोजनसिद्धिः। यस्तु होमसंबन्ध-
कृतो विशेषो नासौ किंचिद्विरुणद्धि। प्रकारान्तरेण वा भावनां विशेक्ष्यति।
**नन्वेवं सति स एव दोष** इति। अपरित्यज्यमानोऽपि होमो बलात्करणी
भवतीति मन्यते। सिद्धान्तवादी त्वाह— वाक्यान्तराभ्यस्तस्य **जुहुयादिति श-**
**ब्दस्यैतत्सामर्थ्यं** येन तवेयं भ्रान्तिर्भवति होम एव करणमिति। निपुणतस्तु प-
श्यतां यथैव प्रत्यासत्तेः साध्यांशमुपधावन्नयोग्यत्वात्प्रच्याव्यते तथाऽत्र दधिप-
दानुरोधेन साधनांशात्। यथा च तत्र प्रतीयमानं भावनाविशेषणत्वमंशान्त-
रेऽवस्थितमेवमिहापि गुणाश्रयत्वेनावस्थास्यते। यथोक्तं वृत्तिकारेण**होमाश्रितो**
**गुणः फलं साधयिष्यतीति**। कः पुनराश्रयाश्रयिसंबन्धो नाम। किं केन क-
थंभावव्यतिरिक्त उताव्यतिरिक्त इति। केचित्तावदाहुर्व्यतिरिक्त एवायमिति।
कथम्। § 4279

यथैवांशत्रयापेक्षा भावनाऽन्यत्र गम्यते।
तथा गुणविशिष्टायां चतुर्थोऽंशोऽप्यपेक्ष्यते॥ § 4281

यत्र धात्वर्थकरणिका भावना चोद्यते तत्रांशत्रयेणैव समाप्यते। यत्र गुणः
करणत्वेन चोद्यते। तेन च करणभूतेन फलमुत्पादयितव्यं नोदासीनेन। त-
त्रास्य कंचिद्धात्वर्थमकुर्वतः करणत्वानुपपत्तेः कं धात्वर्थं साधयता तेन फलं
भावयितव्यमिति चतुर्थमपेक्षान्तरं जायते। यश्च धात्वर्थः साध्यः स एव गुण-
स्य करणत्वोपजननादाश्रय इत्युच्यते। तत्र वाक्येऽन्यसंबन्धपरे वाक्यभेद-
प्रसङ्गात्स्वयमाश्रयं दर्शयितुमशक्नुवन्ति। प्रकरणादग्निहोत्रहोम आश्रयो ल-
भ्यते। तथालब्धश्च प्रत्ययानुग्रहार्थप्रवृत्तेनाऽऽलम्भादिवच्च चोदनालिङ्गभूतेन
धातुनाऽनूद्यते। § 4282

'यदेकस्मादपूर्वं तदेतरत्तदर्थमिति' च न्यायेन धात्वर्थो नामपदार्थानुग्र-
हार्थोऽध्यवसीयते। शक्यते त्वत्र न चतुर्थ्यपेक्षाऽस्तीति वक्तुम्। करणापेक्षैव
ह्येषा प्रवितततरा जाता। धात्वर्थेन हि सा शीघ्रं निवर्त्यते। गुणस्य तु
क्रियासंबन्धोत्तरकालं करणत्वं निष्पद्यत इति चिरतरेण। तस्मात्तिस्र एवा-
550 पेक्षाः। तेन होमोपजनितकरणत्वे फलवति गुणेऽवधारिते कथंभावापेक्षायां
सत्यामग्निहोत्रेतिकर्तव्यतैव पूरणी भवतीत्यादिसंस्थाधिकरणविषयः पर्यव-
सितेऽधिकरणार्थे प्रसङ्गादभिधीयते। तत्र—**अनयाऽग्निहोत्रेतिकर्तव्यतयेति**।

---

२ ते] ( अ० ३ पा० १ अ० ६ सू० १४ ) इत्यत्रेति शेषः।

केचित्तावदाहुः—अग्निहोत्रमेवेतिकर्तव्यतेति। तत्त्वयुक्तम्। करणव्यतिरिक्तत्वादितिकर्तव्यतायाः। **होमस्य** च प्रागुक्तेन न्यायेन करणांशाव्यतिरेकात्। अतोऽग्निप्रणयनादिकैवाग्निहोत्रेतिकर्तव्यतेत्युच्यते। **कुत एतदिति**। कथमधात्वर्थस्येतिकर्तव्यतासंबन्ध इत्यभिमानात्। **फलसाधनस्य दध्न** इति। यथैव होमस्य करणत्वादितिकर्तव्यतानुग्राह्यत्वं भवति, एवं तत एव कारणाद्दध्नोऽपीति। **अस्याश्चेतिकर्तव्यतायाः संनिधाना**दिति। *संस्थाधिकरणविप्रतिषिद्धसमानविधानत्वाभ्युपगमापत्ते**श्चोदनालिङ्गस्य** चेति पुनरतिदेशन्यायोपन्यासादसंबद्धत्वम्। यदि तावत्संनिधानात्संबध्यते किं चोदनालिङ्गसद्भावेन। अथ चोदनालिङ्गसद्भावः प्रमाणं स दूरस्थस्याप्यविशिष्ट इति व्यर्था संनिधानवाचोयुक्तिः। अत एवं वक्तव्यम्। आश्रयतयोपस्थितेन होमेनोपकारप्रदानक्रमेणेतिकर्तव्यतायाः संनिधानादतिदेशनिमित्तस्य च **चोदनालिङ्गस्य जुहोत्यर्थस्य दर्शनात्**। यस्मादेव चायं चोदनालिङ्गत्वेन जुहोत्यर्थः प्रकरणात्प्राप्तोऽनुवदिष्यते तस्मादस्योत्पत्तेः फलं वा प्रति प्रत्ययो न विधायकः। केन प्राप्तस्यानुवाद इति चेदत आह—**न चान्यद्धोमस्योत्पत्तिवाक्यं विधायकं नास्तीति**। केचित्त्वन्यथाऽस्य वचनस्यार्थं वर्णयन्ति। न चान्यद्दधिफलादिन्द्रियादग्निहोत्रहोमस्य स्वर्गादिफलं नास्ति। स्ववाक्येन प्राप्तत्वादिति। तत्त्वनाशङ्किताप्रस्तु तोपन्यासादसंबद्धमिति पूर्वोक्तमेव ज्यायः। तस्मान्न कर्मान्तरम्। किं तर्हि। तस्मिन्नेव कर्मणि दध्नः फलं होमश्चानुग्राहकः। अथवा तेनैव कारणेन, दधिशब्दस्याप्रमादपाठात्केवलाच्च दध्नः फलसिद्ध्यसंभवादुभयतिरस्कारेण संबन्धादेव फलमुभयोश्च दधिहोमयोस्तादर्थ्यम्। अत्र तु पूर्वोक्तेन न्यायेन दधिहोमसंबन्धकृतो वाक्यस्यास्य चैकवाक्यत्वाभावाद्दधिफलसंबन्धे 551 चानिर्वृत्ते होमसंबन्धः प्राकरणिको नास्तीत्यनेनैव वाक्ये होमसंबन्धं कृत्वा फलं प्रति विधावाश्रीयमाणेऽनेकार्थविधानाद्वाक्यभेदः स्यात्। अतो दध्न एव फलमित्येषैव व्याख्या युज्यते। तथा च समाप्तावुपसंहृतं **तेन दध्नो होमेन संबध्यमानात्फलमिति**। तेन अथवेति विकल्पमात्रप्रदर्शनार्थं द्रष्टव्यम्। अन्ये तु वदन्ति। एक एवायं पक्षः सोपपत्तिक आदित आरभ्योपसंह्रियते। **तस्माद्दध्नः फलम्। अतो दधिशब्दस्य विवक्षितत्वादिति च** पाठः। अथवेति तु प्रमादलिखितमिति। शक्यपरिहारं त्विदम्। कथम्। यदेव दध्नेन्द्रियकामस्य भावयेदिति संबध्यते तदेव करणभूताद्दध्नः फलमित्यवगमात्करणत्वान्यथानुपपत्तिकारितः क्रियामात्रसंबन्धोऽवगम्यते। शक्तिरूप एव च क्रियाकारकयोः संबन्ध इति करणविभक्त्यन्तर्गतत्वात्प्रत्ययार्थस्य च प्राधान्यात्प्रातिपदिकार्थोपसर्जनः संबन्ध एव फलाय विधीयते। तस्मिंस्तु विहिते पूर्ववदेव प्रकरणात्क्रियाविशेषो होमो लक्ष्यते। तत्र तु द्रव्यदेव-

६ *] ( अ० ३ पा० ६ अ० १६ )।
१७ स्तु] होमस्याविधेयत्वेऽभिहिते फलविध्याशङ्कानुत्थानादप्रस्तुतोपन्यासापत्तिरित्याशयः।
१८ वा] तेनैवेति—येनैव कारणेन दध्नः फलमित्युक्तं तेनैव कारणेन दधिशब्दस्याप्रमादपाठरूपेण दधिहोमोभयसंबन्धादेव फलमित्यन्वयः।

तासंबन्धन्यायेन क्रियाकारकसंबन्धस्य फलसंबन्धे वृत्ते कोऽसौ क्रियाविशेष इत्यपेक्षायां विशेषणविशेष्यसंबन्धं कर्तुं प्रकरणेन होम उपनीयते। तेनोच्यते दधिहोमसंबन्धः फलाय विधीयत इति। ततश्चाथवेति सम्यक्पाठ एव। समास्त्युपसंहारस्त्वाद्यपक्षस्य द्रष्टव्यः। अथवाऽस्यैव संबध्यमानग्रहणेन दध्युपसर्जनसंबन्धनिर्देश इत्यदोषः। ननु दध्नेति चेन्द्रियकामस्येति च पदद्वयव्यापाराद्वाक्यं भिद्येत। नैष दोषः। कुतः। § 4283

नैव ह्यनेकसंबन्धाद्वाक्यभेदः प्रसज्यते।
अनेकविधिशक्त्या हि भेदो नास्ति च सोऽत्र नः॥§ 4285

बहवोऽपि ह्यर्था युगपदेकेन संबध्यन्ते। न च तावता वाक्यं भिद्यते। अनेकविधितो हि वाक्यभेद उक्तः। स चात्र नास्त्येव। फलस्याविधेयत्वात्। एषा ह्यत्र वचनव्यक्तिः। यदिन्द्रियं भावयेदित्यनूद्य तद्दध्नेति विधीयते। यो हि यदिच्छति स तत्करोतीति हीन्द्रियं भावयितुं स्वरसत एव पुरुषः प्रवर्तते। ततश्च तदंशयुक्तां भावनां प्रत्ययोऽनूद्य करणांशमात्रयुक्तां विधत्त इत्येकार्थविधानान्न वाक्यभेदः। तस्माद्दधिपदस्यार्थवत्त्वाय गुणात्फलमकर्मान्तरत्वं चेति सिद्धम्॥ २६॥ § 4286

इति इन्द्रियकामाधिकरणम्॥ ११॥

## ०.०.५६ रेवत्यधिकरणम्

552 इदानीमस्यापवादार्थमुत्तरमधिकरणमारभ्यते। तत्र विषयं तावद्दर्शयति—‘त्रिवृदग्निष्टुदग्निष्टोमः’। ‘तस्य वायव्यास्वेकविंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो यजेत’ इत्येतमग्निष्टुतं प्रकृत्य ‘वारवन्तीयमग्निष्टोमसाम कार्यम्’ इति च गुणं ‘विधाय पुनर्ब्रवीति ‘एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत’ इति। तत्रापि पूर्ववदेव संदेहः। किं गुणविशिष्टो यागः पूर्वस्माद्व्यतिरिक्तश्चोद्यते किं वा पूर्वस्यैव गुणादिन्द्रियवत्पशवः फलमिति। किं तावत्प्राप्तं, समस्तेनैव पूर्वाधिकरणेन गुणात्फलमिति। तथा हि— § 4288

रेवतीवारवन्तीयसंबन्धव्यापृते विधौ।
श्रूयते फलमत्रापि यागोऽतो न विधीयते॥§ 4290

रेवतीवारवन्तीयसंबन्धं च करिष्यति।
विनैव प्रत्ययावृत्त्या कृत्वाशब्दः पृथक् श्रुतिः॥§ 4292

यस्तु रेवतीवारवन्तीयसंबन्धोत्पत्तिविधानात्तस्य च फलं प्रति विधानात्प्रत्ययावृत्तिलक्षणो वाक्यभेद आशङ्क्यते सोऽपि नाऽऽशङ्कितव्यः। स्वयमेव वेदेन तत्फलस्योपात्तत्वात्। रेवतीषु वारवन्तीयं कृत्वेति निष्पादिते हि संबन्धे यजेः परेण लिङा फलसंबन्धः केवलः कर्तव्यः। तेन नाऽऽवृत्तिदोषो भविष्यति। तत्राप्याधारनिर्देशाद्रेवतीनां परार्थता प्राधान्याद्वारवन्तीयं फलं प्रति विधीयते। गुणोपादानवशेन धात्वर्थादुत्तारितो विधायकः फलाय गुणं विदधद्यदन्यत्राज्ञातशेषत्वं विधत्ते। रेवत्यश्च सप्तमीनिर्देशाद्वारवन्तीयशेषभूतत्वात्प्रयोजनान्तरमनपेक्षमाणा न फलेन संबध्यन्ते। तद्गुणकं तु वारवन्तीयं द्वितीयानिर्देशादवगतप्राधान्यं करोत्यभिहितां भावनां प्रति धात्वर्थस्थानीयं प्रतीयमानं प्रयोजनापेक्षत्वात्फलवत्तां प्रतिपद्यते। अथवोभयतिरस्कारेणात्रापि 553
संबन्धादेव फलमिति वक्तव्यम्। एवं च सति विपरिवृत्तिप्राप्तो यजिः प्रकृतार्थाबलम्बी वैतच्छब्दः, तस्माच्च यजिसमानाधिकरणात्परा षष्ठी फलवता गुणेन सह प्रकरणात्प्राप्तमाश्रयाश्रयिसंबन्धं वदन्ती, प्रमाणाभावाच्चाऽऽश्रयान्तरासंबन्धात्तन्निवृतिरूपप्रवृत्त एवकारः, पूर्वोच्चरितेन वचनान्तरेण च प्राप्तमग्निष्टोमसामसंबन्धविशिष्टं वारवन्तीयमित्यादि सर्वमकर्मान्तरत्वान्नित्यप्राप्तमनूद्यमानं न प्रत्ययमायासयिष्यति। कर्मान्तरपक्षे तु सर्वमप्राप्तत्वाद्विधातव्यम्। न च तल्लभ्यते। कुतः। § 4293

एकशक्तिः स्वभावेन सर्वदैव विधायकः।
अल्पार्थविधिसंतुष्टो नानेकार्थविधिक्षमः॥§ 4295

तेन कृत्वाशब्देन रेवतीनां वारवन्तीयसंबन्धमात्रं लिङा च फलसंबन्धमात्रं विधीयत इति ज्यायान्गुणविधिपक्षः। सर्वे चैतेऽनुवादा यज्यनुवादेनैव तन्मूलत्वात्प्रदर्शिता भवन्तीति न भाष्यकारेण प्रत्येकमुपवर्णिताः। तस्मान्न कर्मान्तरमिति प्राप्तेऽभिवीयते। § 4296

आश्रयत्वेन गृह्णाति यो गुणः प्रकृतां क्रियाम्।
तत्संबन्धानुवादत्वात्तत्र भेदो न गम्यते॥§ 4298

इदं तावद्वाक्यमेतस्यैव रेवतीष्वित्यादि यजिमच्छ्रूयते। स च यजिर्यादृगत्र श्रूयते तादृग्यदि कुतश्चित्प्राप्तस्ततः शक्यमकर्मान्तरत्वमध्यवसातुम्। तद्यथा—दधिहोमसंबन्धलाभादिन्द्रियकामवाक्ये। श्रुतफलसंबन्धमात्रे वाक्येन विधीयमाने प्रकरणादेवाऽऽश्रयापेक्षायां लब्धो होमसंबन्ध इत्यनूद्यते। शक्नोति हि दधि साक्षादेव होमं निर्वर्तयितुं न तु रेवतीगुणकं वारवन्तीयं यागनिर्वृत्तिसमर्थमद्रव्यदेवतात्मकत्वात्। तथा हि। § 4299

देवताद्रव्यकर्तृभ्यो नातिरिक्तमपेक्षते।

२८ वाक्ये ] शक्यमकर्मान्तरत्वमध्यवसातुमित्यस्यानुषङ्गः।

यागः साधनमित्येवं साम्ना नैवैष साध्यते॥§ 4301

तस्मात्प्रकरणवशेन बुद्धावुपप्लवमानोऽपि यागः सामाश्रयत्वमयोग्यत्वादप्रतिपद्यमानो न रेवतीवारवन्तीयवाक्ये शक्योऽनुवदितुम्। प्राप्तिप्रमाणाभावात्। यत्तु वारवन्तीयस्य साध्यत्वेनाऽऽश्रयत्वप्रतिपत्तिक्षमं स्तोत्रं न तस्य प्रकरणम्। आतिदेशिकत्वादग्निष्टुति स्तोत्राणाम्। आह च। § 4302

554 स्तोत्रसाधनभूतत्वं साम्नो योग्यतया स्थितम्।
स्तोत्रं च प्रकृतं नास्तीत्याश्रयो न प्रतीयते॥§ 4304

अथोच्येत यथाऽनेन शक्यते यागः कर्तुं तथा कुर्वदाश्रयिष्यति। यथा च शक्नेति याग आश्रयत्वं प्रतिपत्तुं तथा प्रतिपत्स्यते। सर्वाख्यातसहकारिशक्त्यनुसारेणावगमात्। *‘आनर्थक्यात्तदङ्गेषु’ इत्यनेन न्यायेनाङ्गभूतस्तोत्रद्वारेणाऽऽश्रयाश्रयिसंबन्धः सेत्स्यतीति। तदनुपपन्नम्। उक्तं ह्येतत्। § 4305

तन्नामाङ्गेषु कल्प्येत यदङ्गत्वेन चोदितम्।
प्राधान्यावस्थितं यत्तु तदङ्गं नोपसर्पति॥§ 4307

‘सप्तदशारत्निर्वाजपेयस्य यूपः’ इति सप्तदशारत्नित्वं गुणत्वेन चोद्यमानं साक्षाद्वाजपेयस्यासंभवाद्यथा शक्नोति तथोपकरिष्यतीत्यध्यवसानात्तदङ्गपशुयूपाङ्गत्वेनावधार्यते। यदि तथैव वारवन्तीयमपि यागाङ्गत्वेन चोद्येत ततस्तत्रासंभवात्तदङ्गानि स्तोत्राण्युपसर्पेत्। इदं पुनः फले विहितं गुणभूतां क्रियामाश्रयत्वेनापेक्षमाणं यदि योग्यां लभते ततो गृह्णाति। अथ न लभते ततो वाक्यादर्थान्तरत्वं प्रतिपद्यते। न चैतदन्यथाऽनर्थकं भवति। कर्मान्तरविधाने सुतरामर्थवत्त्वात्। अत्यन्तभेदाच्च यागस्तोत्रयोर्न स्तोत्रे साधिते यागः साधित इति शक्यं वक्तुम्। तत्र यथैव क्रत्वन्तरे श्रुतं क्रत्वन्तरे क्रियेत तादृगेवैतत्स्यात्। वाजपेयस्येति तु सामान्यसंबन्धमात्रवाचिनी षष्ठी पारम्पर्याद्यागेऽप्यविरुद्धेति वैषम्यम्। यद्यपि स्तोत्रद्वारेण क्रतोराश्रयत्वं स्यात्तथाऽपि सर्वस्तोत्रेषु प्रसज्यमानेष्वग्निष्टोमसामेत्यनर्थकं भवेत्। तत्राग्निष्टोमसाम्नि वाक्येनैवाऽऽश्रये कल्प्यमाने वाक्यभेदः, पुनरपि च वाक्येनाग्निष्टोमसाममात्रसंबन्धेऽवगम्यमाने यद्येतस्यैवेति विशेष्यते ततोऽपि वाक्यभेदः। एतस्यैवेति च पूर्वं संबन्धे तथैव सर्वतदीयस्तोत्रसंबन्धापत्तेरग्निष्टोमसामेति विशेषणात्स एव वाक्यभेदः। ऋक्सामसंबन्धकरणकृतं चातिगौरवं स्थित-

---

१० *] ( अ॰ ३ पा॰ १ अ॰ ९ सू॰ १८ )।
११ त्] औदुम्बराधिकरणवार्तिक इति शेषः।
२३ ष्ठी] यागेऽपीति—पशुयागेऽपीत्यर्थः।
२५ स्तोत्रेषु]
प्रसज्यमानेष्विति—आश्रयतयेति शेषः।
२६ साम्नि]
अग्निष्टोमसाम्नि—अग्निष्टोमस्तोत्र इत्यर्थः।

मेव। ननु चास्मिन्नग्निष्टुत्याश्रयत्वेन लब्धे पूर्वविधिनैव शेषमवाप्स्यते। वारवन्तीयं हि क्रतुमाश्रयद्यत्र स्थाने स्थितं साधयद्दृष्टं न ततोऽन्यत्र भविष्यति। क्रतुरपि च तन्नान्यस्तोत्रगामित्वेनापोक्षिष्यते। प्रकृतक्रत्वग्निष्टोमसामसंबन्धि वारवन्तीयातिक्रमकारणाभावाच्च न क्रत्वन्तरस्तोत्रान्तरसंबन्धाशङ्का। नैतदेव- 555 म्। यदि हि वारवन्तीयाग्निष्टोमसामविधिवाक्यं रेवतीवाक्येनापेक्ष्येत तत एवं विज्ञायेत। न तु तदपेक्षाऽस्ति। गुणादिवाक्यानां परस्परसंबन्धाभावादित्युक्तं प्राक्। पूर्वसंबन्धविलक्षणश्चायं क्रतोर्वारवन्तीयेन संबन्धो न तत्कल्पितस्थानविषयत्वं प्रतिपत्स्यते। कर्माङ्गभूतस्य हि तस्यैतत्क्रत्वग्निष्टोमसामत्वं विज्ञातम्। इदानीं पुरुषार्थभूतत्वाद्वेदस्तावन्न तदेव स्थानं कल्पयति। सामान्यतो दृष्टकल्पनायाश्चैवं जातीयकेष्वप्रमाणत्वमुक्तम्। आह च। § 4308

फलाय विहितं साम स्वतन्त्रं रूपमात्रतः।
वेदस्वाध्यायमेवैकमुत्पत्त्यर्थमपेक्षते॥ § 4310

यदि वारवन्तीयमग्निष्टुत्येव प्रथममुत्पाद्येत ततो गत्यन्तराभावादनुक्तमपि तद्विषयं विज्ञायेत। इदं पुनः समाम्नायमात्राधीनोत्पत्ति तत एव गृहीत्वा फलाय चोद्यते। तत्र क्रत्वन्तरस्तोत्रान्तरैरेतत्क्रत्वग्निष्टोमसाम्नो न कश्चिद्विशेषः। यदि च वारवन्तीयसंस्कारः कश्चिद्विधीयेत ततः कथंचिद्व्रीहिप्रोक्षणादिष्विव प्रकृतप्रत्ययो भवेत्। न चैवमस्ति। तस्मान्नाग्निष्टोमसामसंबन्धसिद्धिः। ननु च पुरुषार्थमपि सदेतत्क्रतुमसाधयन्न शक्नोति पुरुषार्थं भवितुमिति प्रासङ्गिक्यां क्रतुसिद्धौ पूर्वक्लृप्तं स्थानं लभ्यते। यथेज्यार्थे दधिप यसी प्रणीताधर्मानुपलभेते। तत्रैवैतद्भवति यत्र गुणभूता धर्मा भवन्ति। न चेहाग्निष्टोमसामत्वं नाम वारवन्तीयस्य गुणः। प्रकरणग्रहणे हि सति गुणत्वमपि स्यात्। तदेव त्वद्याप्यसिद्धावस्थम्। यदि तु केनचित्प्रकारेणाग्निष्टोमसामसंबन्धोऽवगम्यते ततस्तद्धर्मास्तस्य प्रणीताधर्मवन्नैव कश्चिद्वारयिष्यति। तस्मान्नैषोऽपि परिहारो भवतीत्यपूर्वकर्मविधिनैवैकवाक्यत्वमुपपादनीयम्। तथा सति हि यद्यपि सर्वमप्राप्तं तथाऽपि विशिष्टविधिना शक्यं विधातुम्। किं पुनर्यदा निकायित्वात्पूर्वाग्निष्टुद्धर्मेष्वत्रादिश्यमानेषु बह्वेव प्राप्तम्। एतच्छब्दस्तावद्धर्मलक्षणयाऽनुवादो भविष्यति। न चानुवादे लक्षणादोषः। प्रस्तूयमानकर्मवचनत्वेन वा 'अथैष ज्योतिः' इत्यादिवन्मुख्यरूपेणैव वर्तिष्यते। तदा वारवन्तीयं क्रत्वर्थभूतमतिदेशेनैव प्राप्नोतीति तदप्यनुवदिष्यते। कृत्वाशब्दकल्पितरेवतीवारवन्तीयसंबन्धविशिष्टयागमात्रविधानात्तु लाघवं विधेः। नन्वग्निष्टोम-

१ ब्धे] पूर्वविधिनैव शेषमिति—प्राकरणिकेन 'वारवन्तीयमग्निष्टोमसाम कार्यम्' इत्यनेनैव विधिना वारवन्तीयस्याग्निष्टुत्संबन्ध्यग्निष्टोमस्तोत्रसंबन्धप्राप्तेर्न वाक्यभेद इत्यर्थः।

१९ थेज्यार्थे] यथेज्यार्थे, इति—अभ्युदितेष्टौ यागार्थयोरपि दधिपयसोः 'सह श्रपयति' इति प्राकरणिकेन वाक्येन तण्डुलैः सह श्रपणविधानेन प्रसङ्गात्प्रणीताकार्यापन्नत्वेन यथा तद्धर्माः प्राप्नुवन्ति तथेति दृष्टान्तभागाशयः।

साम्नो रेवतीवारवन्तीयसंबन्धो यागश्चात्र विधीयत इत्यन्यैर्विशिष्टविधिभिर्वैषम्यं विधायकस्य स्यात्। तथा हि। § 4311

556 नैकप्रयत्नसाध्यत्वं क्रियान्तरविशेषणे।
तेन क्रियां विधायान्यस्तत्र कार्यः पुनर्विधिः॥ § 4313

यान्येकक्रियाविशेषणानि भवन्ति तानि तया विधीयमानयाऽर्थादाक्षिप्यमाणानि न विधायकव्यापारं भिन्दन्ति। क्रियान्तरविशेषणे पुनर्विधीयमाने तया क्रियया संबन्धरहितयाऽनाक्षिप्यमाणेऽवश्यं विधायकस्याऽऽवृत्तिरेष्टव्येति वाक्यभेदः प्राप्नोत्येव। नैष दोषः। § 4314

कृत्वाशब्दार्थमेवैकं गृह्णीते भावनोत्तरा।
सोऽपि स्वगोचरप्राप्तं ग्रहीष्यति विशेषणम्॥ § 4316

नवेन क्रतुना पश्चादृक्सामग्रहणे कृते।
क्लृप्तस्थानेन साम्नैव रेवतीस्थानकल्पना॥ § 4318

रेवतीवारवन्तीयसंबन्धं निष्पाद्योत्तरभावनापेक्षोऽवस्थितः स्वविशेषणविशिष्टः कृत्वाशब्दार्थः क्रतुना गृह्यते। अतश्च स्वविशेषणाक्षेप एव क्रतोः। स तु तत्संबन्धं साक्षादनुपजीवन्गुणभूतत्वादङ्गेषु निक्षिपन्नतिदेशविज्ञातस्थानवारवन्तीयवशेन रेवतीरपि तद्विषयाः कल्पयति। तेन यद्यप्यत्र वाक्येऽग्निष्टोमसाम न विधीयते तथाऽपि क्रतुविशेषणमपि तत्र संक्रामतीत्यदोषः। अतश्च प्रकृतयागसंबन्धस्त्वत्पक्षे वारवन्तीयस्य नास्ति। पश्य। § 4319

आत्मना ह्यक्रियारूपैर्गुणैराश्रीयते क्रिया।
वारवन्तीयगीतेस्तु क्रियया किं प्रयोजनम्॥ § 4321

दधिगोदोहनादीनि क्रियया विना करणत्वमलभमानानि तामपेक्षन्ते। वारवन्तीयं पुनर्गायतिधातुवाच्यक्रियात्मकत्वाद्विनैव क्रियान्तरेण यागवत्फलभवनसमर्थमित्यनपेक्षत्वाद्यागेनासंबध्यमानं स्वतन्त्रमेव रेवतीषु गीयमानमग्निष्टुत्प्रयोगाद्बहिरेव फलं साधयेत्। ततश्चैतस्यैवेति चाग्निष्टोमसामेति च कृत्वाशब्दश्च यजेतेति च सर्वमसंबद्धं स्यात्। तस्माद्यागात्फलम्। स च पूर्वविलक्षणविशेषणविशिष्टत्वात्कर्मान्तरम्। **समेष्विति**—अयोग्यत्वाद्यागगुणयोराश्रयाश्रयिसंबन्धानपेक्षत्वाभिप्रायम्। क्रियात्मकत्वाद्वा क्रियान्तरानपेक्षत्वमुच्यते। **भिन्नवाक्येष्विति**। पक्षद्वयेऽपि गुणफलसंबन्धस्य यागान्तरविधानस्य वाऽर्थान्तरत्वात्सेत्स्यत्येव लक्षणतो वाक्यभेदे पूर्वक्रतुसंबन्धे भवत्येव किंचिदेव वाक्यरूपम्। क्रत्वन्तरसंबन्धे त्वत्यन्तभेद इत्यभिप्रायः। § 4322

557 **न ह्येतस्य रेवत्यः सन्ति**—आनन्तर्यात्तावदेषा वचनव्यक्तिः प्रतिभाति, एतस्य या रेवत्यस्तासु वारवन्तीयं कृत्वेति। तत्र यद्यपि प्रकरणलभ्यत्वादेतस्येति विशिष्टानुवादो न वाक्यं भिनत्ति तथाऽपि रेवतीस्वरूपकर्त-

व्यतैव तावदप्राप्तेति नानूद्यते। तत्र रेवत्यः प्रयोक्तव्याः, तासु च वारवन्तीयमित्येको वाक्यभेदः, एतच्छब्दवैयर्थ्यं च। अथ त्वेतच्छब्दानुग्रहार्थमेतस्य रेवत्यः कर्तव्याः, तासु च वारवन्तीयं, तच्च फलायेति विधीयते यजिश्चानूद्यत इति तथाऽप्यर्थत्रयनिमित्तवाक्यभेदाभ्युपगमेनाग्निष्टोमसामसंबन्धो विधातुमनुवदितुं वाऽशक्यत्वादुभयथाऽपि नावकल्पते। अथ सोऽपि विधीयेत तथा सति पूर्वस्माद्विध्यपगमादग्निष्टोमसाममात्रप्रसङ्गादेतस्यैवेत्यनर्थकं, विधीयमाने वाक्यभेद इत्येका ग्रन्थयोजना। अथवा—यथाक्रमावस्थित एवैतच्छब्दो रेवतीविशेषणं स तथाभूत एवाभ्युपगम्यते। ततश्चैवं वचनं व्यज्यते—एतस्य या रेवत्यस्तासु वारवन्तीयमग्निष्टोमसाम कृत्वेति। तत्तु कस्य क्रतोरित्यविशेषणादेतच्छब्दस्य च रेवतीविशेषणत्वेनोपक्षीणत्वादेतस्याग्निष्टोमसामेति न लभ्यते। तद्विवक्षायां वा पुनरपि वाक्यभेदः। इहैव सर्वाः पूर्वपक्षवचनव्यक्तीर्निराकृत्य सिद्धान्ते कथमवाक्यभेद इति प्रष्टव्ये पूर्वपक्षवादी विस्मितः पृच्छति। तथा नाम संप्रति विहिते सति अनेनाऽऽकाश एवेयन्तो वाक्यभेदा इन्द्रजालवदेव दर्शिताः। ततः पृच्छामि तावदेतस्य कथमवाक्यभेद इति। सिद्धान्तवादी त्वप्राप्तकर्म विधीयते। विशिष्टविधानोपपत्तौ सत्यामेकार्थत्वादित्याह। नन्वर्थभेद इति—क्तान्ताख्यातोपात्तभावनाद्वयैकवाक्यत्वासंभवाभिप्रायेण। **नेति ब्रूम** इति—गुणभूतैकभावनाविशिष्टप्रधानभूत- 558 भावनान्तरविधानाभिप्रायम्। **रेवतीनां वारवन्तीयस्य च संबन्धो न विहितः स्यादिति**—विशेषणविशेषणानामविधेयत्वाल्लिङ्ग तावन्न विधीयते। कृत्वाशब्दश्च नैव विधौ स्मर्यते। तेन यद्यपि संबद्धा भावनाऽभिधीयते तथाऽपि विध्यधीनप्रवृत्तित्वात्पुरुषः सतीमपि तामसतीमिव प्रतिपद्यते। तेन यागभावनामात्रविशेषणत्वाद्रेवतीवारवन्तीययोस्तदबहिर्भावमात्रेण प्रयोक्तव्ययोरन्योन्यनियमप्रमाणाभावादेकस्तोत्रविषयत्वे तदेकदेशनियमे चासति रेवतीषु ऋक्षवन्यान्यपि गायत्रामहीयवादीनि सामानि प्राप्नुवन्ति। सामापि वारवन्तीयमन्यास्वावापभूतासु गायत्रीबृहत्यनुष्टुप्सु प्राप्नोति। तत्र रेवतीषु वारवन्तीयमिति संबन्धप्रतीतिर्व्यर्था स्यात्। अतो वारवन्तीयमेव यथावधृतस्थानमुद्दिश्य रेवत्यो विहिता इति। **नैष दोषः**। § 4323

विधित्वं यद्यपि श्रुत्या न कृत्वेति ब्रवीत्ययम्।
तथाऽप्येवंविधे तस्य विधित्वं फलमिष्यते॥ § 4325

सर्वत्रैव यत्रेदं कृत्वेदं कुर्यादिति श्रूयते तत्र यदि तावत्त्वान्तधातुवाच्या क्रियाऽन्यत एव प्राप्ता ततो निमित्तार्थं श्रवणं भवति। अथ तु न प्राप्ता तत उत्तरस्याः करणं पूर्वनिर्वृत्त्युत्तरकालत्वेन विहितं तामननुष्ठाय यथा कर्तुं न शक्यत इत्यर्थादवश्यं कर्तव्या सती विहितवद्विज्ञास्यते। न चेह

२५ भूतासु] 'त्रीणि ह वा यज्ञस्योदराणि। गायत्री बहत्यनुष्टप् च। अत्र ह्येवावपन्ति' इति वचनानुराधेनेति शेषः।

३२ नुष्ठाय] यथेति—यथा विहितं तथेत्यर्थः।

रेवतीवारवन्तीयसंबन्धः प्राग्विधेः कुतश्चित्प्राप्तो येन निमित्ततयाऽऽश्रीयेत। तस्मादनुष्ठेय एव विज्ञायते। यदि तर्ह्यनुष्ठेयत्वेन संबन्ध उपपन्नः कथमुत्तरयाऽनुष्ठेयत्वोपात्तयैव सह संबध्यते। तदर्थमाह—**द्वावप्येतावर्थौ कृत्वेत्येष शब्दः शक्नोति वदितुमिति**। कथमेकेनानेकार्थावगतिरिति चेदत आह—दृष्टा हि क्वचिदियमपि गतिः। **यथा शोणमानयेति**। प्रमाणान्तरप्राप्तेऽप्यानयतौ रक्तोऽश्वश्चोद्यमानो न रक्ताश्वशब्दाभ्यामिवाभिहितो वाक्यभेदं जनयति। तथाऽत्र त्वाशब्दोपात्ता निर्वृत्तिः पूर्वकालत्वं चेति। अथवा। § 4326

559 तत्रैव न विधीयेत विशेषणविशेषणम्।
यत्र द्रव्याङ्गभूतं तन्न कर्माङ्गं प्रतीयते॥§ 4328

*"तत्रैकत्वमयज्ञाङ्गभूतमर्थस्य गुणभूतत्वात्" इति द्रव्यविशेषणानां विध्यसंस्पर्शो वक्ष्यते । रेवतीवारवन्तीयसंबन्धस्तु करोतेर्विशेषणम्। सामान्यभूतत्वाच्च करोत्यर्थस्तद्रहितो नानुष्ठेयत्वं प्रतिपद्यते। तेन मृष्यामहे हविषा विशेषणमितिवद्यजिभावनाविशेषणस्य करोत्यर्थस्यावश्यं रेवतीवारवन्तीयसंबन्धविशिष्टताऽभ्युपगन्तव्या। तथा च क्रियाविशेषणानामपि प्रयाजादीनां विशेषणानि द्रव्यदेवतादीनि दर्शपूर्णमासादिषूपयोक्ष्यन्ते। तस्मान्निष्पन्नसंबन्धविशेषितायां भावनायामृक्सामयोर्नियमः सेत्स्यति। कृत्वाशब्दश्चात्र प्रतिपत्तिक्रमनियमनिर्वृत्त्यर्थ एव द्रष्टव्यो नानुष्ठाननिर्वृत्त्यर्थः। अग्निष्टोमसाम्नः प्राग्यागादप्रयोगात्। अतो नैवं विज्ञायते रेवतीषु वारवन्तीयं प्रयुज्य यष्टव्यमिति। किं तर्हि, एवं करिष्यामीति परिकल्प्य यागः प्रक्रमितव्य इति। **नन्वेवमपीति**। यावदभिधेयं विधिकल्पनादनेकार्थत्वान्नैकवाक्यत्वमिति मन्यते। **नैष दोष इति**। न तावदभिधेयनानात्वेनानेकार्थत्वं भवतीत्युक्तम्। अथ प्रयोजनभूतविधेयनानात्वमेव मन्येथाः। तत्रोच्यते। § 4329

श्रूयन्ते बहवोऽत्रार्था एक एव विधीयते।
विशिष्टा भावना सा च याग इत्युपलक्षिता॥§ 4331

**ननु रेवत्योऽपि विधीयन्त** इति। यदि श्रुतमात्रानुपात्येवानेकार्थत्वं भवेत्तत एष परिहारः स्यात्। एते तु सर्वे विधीयमानत्वात्प्रयोजनभूतास्तस्मादनेकार्थत्वमस्त्येवेति। उच्यते। § 4332

560 विधेयमात्रमप्यत्र नार्थ इत्यमिधीयते।
प्रधानविधियुक्तोऽर्थः स चैकोऽत्र विधीयते॥§ 4334

---

१० *] ( अ° ४ पा° १ अ° ५ सू° ११ )।
११ ते] ( अ° ४ पा° १ अ° ५ ) इत्यत्रेति शेषः।
१२ विषा] 'यस्योभयं हविरार्तिमार्छेत्' इत्यत्र नित्यस्याऽऽर्तिमात्रस्य कादाचित्कत्वव्याप्यनिमित्तत्वायोगेन यथाऽऽर्तेर्हवीरूपविशेषणमावश्यकं तद्वदिति दृष्टान्तभागाशयः।

तदाह—न ह्यत्रानेकस्य प्रयोजनत्वेनाभिप्रेतस्यानेकं पदं विधायकमिति। तथा ह्यवान्तरकर्मत्वात्तत्क्रियाणां न प्राग्यजिभावनातः पर्यवसानम्। विशिष्टविध्युत्तरकालं तु न किंचिदपेक्ष्यते। तस्मात्सिद्धमेकार्थत्वादेकवाक्यत्वम्। गुणविधित्वे चोक्ता वाक्यभेदाः। **अथोच्येत** इति। एतच्छब्दसमर्थनार्थम्। सिद्धेऽपि कर्मान्तरत्वे कर्मयुक्तफलपक्षात्पक्षान्तरमिति निराक्रियते। तत्रैषा वचनव्यक्तिः—रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा, एतस्याङ्गत्वेन यजेतेति। किमेवं भविष्यति। प्रकरणं तावन्न बाधिष्यते। एतस्यैवेति च प्रकृतग्राहि समीपस्थितसंबन्धिपदमनुग्रहीष्यते। तत्रोच्यते। न। पशुकामपदानर्थक्यप्रसङ्गात्। तदुपरित्यागे वाक्यभेदप्रसङ्गः। न ह्येकस्य क्रतुं फलं च प्रति युगपद्विधानमवकल्पते। *[**अथैवमुच्येत रेवतीषु कृतेनेति**]। प्रथमोपन्यस्तमेव पक्षं दोषान्तराभिधित्सया पुनरुपन्यस्यतीति केचित्। *[अथवा नैवम्]। § 4335

कथं तर्हि, गुणकामेषु याज्ञिकानां द्वयी प्रतिपत्तिः, केषांचिन्मीमांसक- 561
वदेव गुणात्फलम्। अपरेषां तु गुणः क्रत्वर्थ एव तद्वतस्तु क्रतोः फलान्तरसंबन्धः। अत्रैषा वचनव्यक्तिः। नित्यं तावदनेन ब्रह्मवर्चसकामो यजेत। यदि तु पशुकामः स्यात्ततोऽनेनैव रेवत्यादिविशिष्टेनेति। तथा सति च—
§ 4336

प्रत्ययः संनिकृष्टार्थविधिं तावत्करिष्यति।
न चान्यपर उत्पत्तिं विधानाच्च विशिष्टता॥ § 4338

यागं हि फले विदधत्प्रत्ययो न विप्रकृष्यते। न चानुत्पत्तिपरः सन्नुत्पत्तिमपि कल्पयिष्यति। अनेकार्थविधानं च यथैवोत्पत्तिविधौ कर्मविधाननिमित्तं लभ्यते, तथा फलविधावपि फलोद्देशेन कर्मविधानादित्येवं मन्यमानो वदति—**अथ रेवतीषु कृतेन वारवन्तीयेन पशुकामो यजेतेति**। स्तोत्रद्वारेण यागसाधनत्वोपपत्तेः करणतृतीयैवैषा। अथवेत्थंभूतलक्षणा। अनेनैवेत्थंभूतेन पशुकामो यजेतेति। तत्रोत्तरम्। **नैवं शक्यम्। ऋगन्तरप्रगाणाद्विशेषहानाद्वैगुण्यमिति**। यदि तदेवेदं कर्म ततस्तस्य वायव्यास्वग्निष्टोमसाम विहितं तदृगन्तरे रेवत्याख्ये गीयमानं पूर्वविहितवायव्याख्यविशेषहानाद्विगुणं भवेत्। नन्विदानीमेवाऽऽत्मीये पक्षे भवतैव तत्र रेवतीषु ऋक्ष्वन्यान्यपि सामानि प्राप्नुवन्त्येवं पर्यनुयुक्तेनाभिहितम्। नैष दोषः। कृत्वेति निर्वृत्तः संबन्धो यागायोच्यते। द्वावेतावर्थौ कृत्वेत्येष शब्दः शक्नोति वदितुमिति। सिद्धान्तवादी त्वपूर्वकर्मविधावनेकार्थविधानं शक्यं नान्यत्रेति मन्यमान आह—**सति वचने** मत्पक्षे **शक्यं** भवत्पक्षे त्वसति वारवन्तीय-

१० *] अथैवमित्यादि शङ्काभाष्यं गुणफलान्वयस्यैवाभिधानात्पुनरुक्तमिव भासमानं परमते वारवन्तीयस्य रेवतीषु प्रगाणेन वायव्यर्गाधारत्वहानादाश्रयवैलक्षण्यरूपदोषान्तरोक्त्यर्थत्वेन व्याकरोति—अथेत्यादिना।

११ *] अग्निष्टुद्यागस्यैव गुणान्तरविशिष्टस्य फलान्वयाभिधानार्थमेतद्भाष्यमिति स्वमतेन गुणकामत्वापरित्यागेनैवार्थान्तरं प्रदर्शयितुमाह—अथवेत्यादिना।

ग्रहणमात्रेण लभ्यमानासु रेवतीष्वशक्यमिति। परः पुनराह—**वचनं तर्हि भविष्यतीति**। तेनैवाभिप्रायेण। फले विशिष्टकर्मविधानात्कृत्वाशब्दस्य चाविधायकत्वात्। यजिरनुवाद—इति च सत्यपि फलं प्रति विधान उत्पत्त्यविधानाभिप्रायेण। सिद्धान्तवादी स्वाभिप्रेतानेकार्थविध्यन्यथानुपपत्तिफलं कथयति—**यदि वचनं** सिद्धं तर्हि कर्मान्तरं न पूर्वस्थैवाग्निष्टुतो गुणविधानमिति। **ननु ततो यजेतेति यागानुवादादिति** वचनेनानिराकृतत्वादद्यापि स्वपक्षमेव बलीयांसं मन्यते। नैवं शक्यमिति सिद्धान्तविवरणम्। यदि हि रेव-
562 तीगुणकं वारवन्तीयं यागं प्रति गुणत्वेन विधीयते ततोऽवश्यं स उद्देष्टव्यः। ततश्चोद्दिश्यमानत्वादेव फलपदं न तेन गुणेन वा संबध्यत इत्यनर्थकमेव स्यात्संबध्यमानं वा वाक्यं भिन्द्यात्। गुणविशिष्टकर्मविधाने वाऽप्रत्यभिज्ञायमानत्वादेकान्तेन कर्मान्तरत्वम्। *न च यत्पशुकामो यजेतेत्यप्राप्तत्वादनुवादः संभवति। एतेन रेवतीवारवन्तीयविधिं प्रत्यस्य निमित्तत्वं प्रयुक्तम्। अतश्च न वारवन्तीयं केनचिद्बलवत्तरेण प्रमाणेन रेवतीभिः संबद्धमिति विशेषहानाद्विगुणं भवेत्। अथ **यागसंबन्धोऽनुवाद इति**। गुणादेव फले सति प्रकरणादवगतं यागाङ्गत्वमस्मिन्वाक्येऽनुवदिष्यत इति। कः पुनराश्रयाश्रयिसंबन्धात्पूर्वनिराकृतादस्य विशेषो येनोपन्यस्यते। स उच्यते। तत्र हि ‘आनर्थक्यात्तदङ्गेषु’ इत्येतन्निराकृतम्। अङ्गत्वज्ञाने तु तत्संभवादग्निष्टोमसामसंबन्धः सुलभ इत्यभिप्रायः। तन्निराकरोति—**प्रकरणाद्धि वाक्यं बलवत्तरमिति**। आश्रयाश्रयिसंबन्धो हि फलसंबन्धानुगुणत्वात्संभवन्गृह्यते। स तु न संभवतीत्युक्तम्। अङ्गाङ्गिसंबन्धस्तु क्रतुकथंभावग्रहणात्स्यात्। तच्च नास्ति। *“असंयुक्तं प्रकरणात्” इति वक्ष्यति। संयुक्तं चैतत्फलेन। तस्मादविरोधाद्गुणफलविशिष्टकर्मान्तरविधानम्। तत्रैतत्स्यात्। सत्यपि कर्मान्तरत्वे तदनुगृहीताद्गुणादेव फलमिति। तद्विकल्प्य भावार्थाधिकरणन्यायेन प्रत्ययसंनिकर्षेण यागफलसंबन्धावगमान्निराकरोति। तस्मात्कर्मविधिः। **अथ
563 पुनर्विशिष्टे यागे विधीयमाने** क्रियान्तरस्याग्निष्टोमसाम्नो विशेषणेन कथं संबन्ध इति। तत्रोत्तरं **वचनादिति**। प्रागुक्तन्यायेनाऽऽतिदेशिकं वचनं द्रष्टव्यम्। **अग्निष्टोमसाम्नः कार्य** इति। न किंचिदग्निष्टोमाख्यं सामावस्थितं विद्यते

---

१० मानं] संबध्यमानमिति-फलपदं गुणविशिष्टेन यागेन संबध्यमानं यागस्य गुणफलोभयसंबन्धापादकत्वाद्वाक्यं भिन्द्यादित्यर्थः।

११ *] याऽपि च पूर्वं ‘यदि तु पशुकामः स्यात्ततोऽनेनैव रेवत्यादिविशिष्टेन यजेत इति’ वचनव्यक्तिरभिहिता साऽपि प्रमाणान्तराप्राप्तफलान्वयानुवादायोगादयुक्तेत्याशयेनाऽऽह—न चेत्यादिना।

१७ हि] ( अ° ३ पा° १ अ° ९ सू° ११ )।

२१ *] ( अ° ३ पा° ३, अ° ४ सू° ११ )।

२५ क्रिया] क्रियान्तरस्येति—क्रियान्तरस्य यागाख्यस्य विशेषणेन रेवत्याधारेण वारवन्ती. येन सह, अग्निष्टोमसाम्ना—अग्निष्टोमस्तोत्रस्य कथं संबन्ध इत्यन्वयार्थः।

२६ न्यायेना] आतिदेशिकमिति—अग्निष्टुत्प्रकरणे श्रूयमाणं ‘वारवन्तीयमग्निष्टोमसाम कार्यम्’ इति वचनं कर्मान्तरेऽतिदिष्टमित्यर्थः।

यस्य वारन्तीयं कार्यापन्नमिति कल्पते। तेन प्राकृतयज्ञायज्ञीयकार्यापत्त्यभिप्रायेणोक्तम्। अथवाऽग्निष्टोमसाम्न इति स्तोत्रस्यैव कार्ये तादर्थ्येन वर्तिष्यत इत्यर्थः। तस्मात्समेषु कर्मयुक्तं फलं स्यादिति सिद्धम्॥ २७॥
§ 4339

इति रेवत्यधिकरणम्॥ १२॥

## ०.०.५७ सौभराधिकरणम्

ज्योतिष्टोमे सौभरमुक्थ्यानां ब्रह्मसाम विहितम्। पुनश्च तदेव 'यदि रथंतरसामा' 'यदि बृहत्सामा' इति च निमित्तयोर्विहितम्। ततः पुनः 'यो वृष्टिकामो योऽन्नाद्यकामो यः स्वर्गकामः स सौभरेण स्तुवीत' इति नित्यस्यैव सतः फलत्रयसंबन्धः कृतः। तथा च वक्ष्यति एवंजातीयकेषु कामेषु 'नित्यस्य समत्वात्' इति। क्रत्वर्थपुरुषार्थं चैवंजातीयकं भवतीति वक्ष्यति 'एकस्य तूभयत्वे संयोगपृथक्त्वम्' इति। एतदपि वक्ष्यति यथा विकल्पेनैतान्यस्य फलानि भवन्ति 'योगासिद्धिर्वाऽर्थस्योत्पत्त्ययोगित्वात्' इति। तदेवं रूपं सौभरं प्रकृत्य पुनः श्रूयते 'हीषिति वृष्टिकामाय निधनं कुर्यात्' 'ऊर्गित्यन्नाद्यकामाय' 'ऊ इति स्वर्गकामाय' इति। निधनमिति चान्त्या सामभक्तिरभिधीयते। तत्रैतद्विचार्यते। किं सौभरं निरपेक्षं फलानि साधयति, इमानि वृष्ट्यादीनि हीषादिनिधनफलानि पृथगेव भवन्ति, उत सौभरस्यैव तत्तत्फलं साधयतस्तत्तन्निधनं नियम्यत इति। यद्यपि चात्र कर्मभेदाभेदौ न 564
स्तस्तथाऽपि प्रसङ्गादुपन्यस्येते। अथवा कर्मभेदाभेदवत्फलापूर्वभेदाभेदावपि लक्षणार्थाविति संबन्धः। एवं चानुष्ठानेऽपि विशेषो भवति। यदा वृष्टिकामेन सौभरं प्रक्रान्तं तदेतरयोरपि निधनयोः स्वफलप्रार्थनावशेन प्रयोगः। अपि च वृष्टिप्रार्थनयोरपि भेदः कर्तव्यो यदि निधनादपरं फलम्। अथ तु निधननियमस्ततो हीषेव प्रयोक्तव्यमेकैव वृष्टिः प्रार्थयितव्या। एवमन्नाद्यकामस्वर्गकामयोरपि दर्शयितव्यम्। कुतः संशयः। केचित्तावद्भाष्यकारकृतेन वचनव्यक्तिद्वयप्रतिभानेन वर्णयन्ति किं हीषादिशब्दानां वृष्टिकामादिपदैः संबन्धोऽथ निधनपदेनेति। यद्यपि चोत्तरयोर्निधनमिति न श्रूयते तथाऽप्याकाङ्क्षावशेनानुषज्यमानं सर्वसंबन्धित्वेन कथ्यते। किं तावत्प्राप्तम्— § 4341

पुनर्विधानसामर्थ्यात्स्वार्थत्वाच्च फलश्रुतेः।
फलभूयस्त्वलाभाच्च हीषादेरपरं फलम्॥§ 4343

५ कामेषु] ( अ° ३ पा° ६ अ° १६ सू° ४३ )।
६ स्य] ( अ° ४ पा° ३ अ° ३ सू° ५ )।
७ न्ति] ( अ° ४ पा° ३ अ° ११ सू° २८ )।

यदि हि सौभरफलान्येवैतान्यभविष्यंस्ततः पुनर्वचनमनर्थकमापत्स्यत। न हि विधेयं तस्य तदा किंचिदपि लभ्यते। हीषादीनां शाखान्तरेषु सौभरनिधनत्वेन पाठादेव प्राप्तत्वात्। नियमार्था श्रुतिरिति चेन्न। श्रुतिप्राप्तानां नियमेन निवर्तयितुमशक्यत्वात्। सर्व एव तावन्नियमोऽन्यव्यावृत्तिफलत्वादन्याय्यः। तथाऽपि तु यत्रार्थाक्षिप्तावस्थानि वस्त्वन्तराणि भवन्ति तत्रैकश्रवणव-
565 शेनेतरन्निवर्तते। न त्विह हीषादीनामर्थात्प्रयोगः, येनैकविधानादितरनिवृत्तिर्गम्येत। सौभरश्रुत्या हि तानि प्राप्यन्ते। तत्र न शक्यं विधिमात्रप्रवृत्तया पुनःश्रुत्या गत्यन्तरे संभवति बाधनं कर्तुम्। अस्मत्पक्षे तु काम्यत्वादन्यतरद्वचनं क्रत्वर्थप्राप्तेतरबाधेनैव भविष्यति। वाक्यान्तराविहितं च वृष्टिहीषादिसंबन्धं विदधद्वाक्यमर्थवद्भवति। वृष्टिकामशब्दश्च स्वार्थत्वेन संभवन्न निधनव्यवस्थापरे वाक्ये सौभरविशेषणार्थः कल्पितो भविष्यति। पुरुषार्थभूयस्त्वं च विध्यात्मके वेदे पुरुषप्रवर्तनसौकर्यादिष्यते। तस्मान्निधनादपरं फलमिति॥ २८॥ § 4344

उच्यते— § 4345

निधनश्रुतिवैयर्थ्यान्न हीषः फलसंगतिः।
निधनेन तु संबन्धे फलशिष्टं विशेषणम्॥§ 4347

हीषा वृष्टिं कुर्यात्तां च निधनभूतेनेति वाक्यभेदः। तदसंबन्धे चाऽऽनर्थक्यम्। अस्मत्पक्षे न किंचिदनर्थकम्। सर्वस्य सौभरस्य वचनान्तरैरुक्त-
566 वृष्ट्यादिकामत्वेन तत्पदानां च प्राप्तत्वाद्धीषादिसंबन्धमात्रे विधीयमाने वाक्यभेदाभावः। न च वचनमनर्थकं, निधनविशेषनियमार्थत्वात्। विनाऽपि च गुणकामत्वेनास्त्येवात्र सामान्यविशेषलक्षणो बाधः, सौभरशब्दस्य सर्वभक्तिसामान्यवचनत्वात्सौभरश्रुत्या हि परोक्षवृत्त्या निधनान्तरं प्राप्नोति। इदं पुनः प्रत्यक्षं, तस्माद्बलीयः। यथा चार्थादाक्षिप्यमाणं श्रौतेन निवर्त्यते तथा परोक्षवृत्त्याऽपीति। अथवा सौभरशब्दवाच्याया गीतेर्नैव किंचिद्बाध्यते। अक्षरविधानेनाक्षरान्तरमात्रबाधनात्। यदि हि गीत्यन्तरावयवो विधीयेत ततः सौभरावयवोऽपि बाध्येत। स्तोभाक्षरबाधस्त्वयं निधनविषय इत्यदोषः। तस्मान्निधननियमार्था पुनःश्रुतिरिति। एवं तु व्याख्यायमानेऽस्ति किंचिद्वाच्यम्। तदुच्यते § 4348

न तावत्संशयो युक्तो वचनव्यक्तिभेदतः।
हीषो निधनसंबन्धो नेष्टो हि व्यवधानतः॥§ 4350

हीषिति निधनमिति व्यवहितकल्पनादोषादनिष्टः संबन्धः। तथोत्तरपक्षेऽपि— § 4351

---

८ र्व ] सर्वभक्तीतिसर्वासां प्रस्तावोद्गीथप्रतिहारोपद्रवनिधानाख्यानां भक्तीनां यत्सामान्यं तद्वचनत्वादित्यर्थः ।

निधने हीष्विधानं चेद्वृष्टिकामविशेषिते।
विशिष्टार्थानुवादत्वाद्वाक्यभेदः स्फुटो भवेत्॥§ 4353

निधनानुवादेन हीषादिविधाने फलपदमनर्थकं पुनःश्रुतिवैयर्थ्यं च स्यात्। सौभरग्रहणेनैव हि निधनमात्रसंबन्धः प्राप्त इति न तन्मात्रवचनेनार्थः। तत्र यदि वृष्टिकामाय यद्यत्सौभरं तस्य यन्निधनमिति विशिष्टमनूद्य तत्र हीष्पदं प्रयुञ्जीतेति विधीयते ततोऽनेकसंबन्धकरणाद्वाक्यं भिद्येत। यद्यपि वृष्टिकामसौभरतन्निधनानि प्राप्तानि तथाऽप्यनेकेषामपि संनिधिरस्तीति व्य- 567
वच्छेदार्थमवश्यं यत्नः कर्तव्यः। ततश्चानेकार्थत्वमिति दुर्बलः सिद्धान्तः। पूर्वपक्षनिराकरणमपि न सम्यक्कृतं, समाम्नायादेव हीषादीनां निधनत्वसिद्धेः। *तस्मादेवं वर्णनीयम्। § 4354

वृष्टिकामपदेनैव संबन्धे सति संशयः।
फलेन साधनेनेति वाक्यसामर्थ्यवीक्षणात्॥§ 4356

अत्र हीषिति वृष्टिकामायेत्येवमेवावस्थिते संदेहः किं साक्षात्फलेन हीषः संबन्धोऽथ फललक्षितेन साधनविशेषेणेति। तदा च **हीषिति निधन**मिति, एतत्फलं भवतीति वचनव्यक्तिरिव भाष्यकारेण दर्शिता। **वृष्टिकामायेति सौभरविशेषणमिति** सौभरस्य निधनवाक्ये स्वपदेनानुपादानाल्लक्षणारूपेणैव विशेषणत्वम्। **न हीषा संबन्ध** इति फलस्वरूपासंबन्धाभिप्रायेण। तत्र तथैव विधिपुनःश्रुत्यपेक्षं व्याख्यानं, प्रयोगवचनसामर्थ्यादेव सिद्धं स्यादिति, अपरा व्याख्या। यदि हि स्वार्थप्रवृत्तस्यैव सौभरस्य निधनमात्रं नियम्येत ततस्तत्प्रयोगवचनेनैवोपनीतमात्रहीषादिविधिसिद्धेर्विध्यानर्थक्यं भवेत्। फलसंबन्धपक्षे तु न प्रयोगवचनः समर्थ इत्यर्थवत्ता। किं च § 4357

वृष्टिकामपदेनात्र श्रुत्यैवाभिहितः पुमान्।
साधनापेक्षिणस्तस्य हीषादिपदसंगतिः॥§ 4359

अन्यथाऽनेन सौभरं प्रकरणावगतमपि वृष्टिसाधनशक्तियुक्तं लक्ष्येत। न च तदाश्रयणे किंचित्प्रयोजनमस्ति। तथा **श्रुतिलक्षणाविशये चेति** ब्रुवतो भाष्यकारस्याप्येतदेव व्याख्यानमभिप्रेतमिति गम्यते। सिद्धान्तस्तु— § 4360

सौभरस्य समस्तस्य यः कामोऽभिहितः पुरा।
नियन्तुं निधनं तस्य स एवायमनूद्यते॥§ 4362

सर्वस्यैव सौभरस्यायं कामसंयोगः पूर्वोक्त एव प्रत्यभिज्ञायमानः कीर्त्यत इति नापूर्वफलप्रतिपत्तिः। किमर्था तु प्राप्तस्य पुनः श्रुतिरित्यत आह—

१० *] 'यद्येवमभिसंबन्धः' इत्यादि—अधिकरणसमाप्तिपर्यन्तस्य भाष्यस्य परेषां व्याख्यानं 'केचित्तावदित्यारभ्य पुनः श्रुतिरिति' इत्यन्तेनोपन्यस्य, तत्र च 'एवं तु व्याख्यायमाने' इत्यादिना दूषणमभिधाय स्वमतेन भाष्यं व्याख्यातुमुपक्रमते—तस्मादेवमित्यादिना।

निधनार्था पुनः श्रुतिरिति। कस्मात्पुनःश्रुत्युपात्तेन फलेनैव हीषादयो न संबध्यन्ते। तत्रोच्यते। § 4363

यथैव वारवन्तीयं नेष्टमाश्रयमाप्नुयात्।
फले तथैव हीषादि नाऽऽप्नोत्याश्रयमीप्सितम्॥§ 4365

हीषा वृष्टिं साधयेदिति हि गृह्यमाणेऽवश्यं किमाश्रितेनेत्यपेक्ष्यते। तत्र यत्सौभरं प्रकृतं तत्तावन्न शक्तमाश्रयत्वं प्रतिपत्तुम्। समस्तं हि साम
568 सौभरशब्देनोच्यते। न च तद्धीषा साधयितुं शक्यं, यथा दध्ना होमः। तद्धि सकलं होमं व्याप्तुं शक्नोति। न तु हीषा सौभरं व्याप्यते। बह्वक्षरसाध्यत्वात्। न च तदसाधयत आश्रयाश्रयिसंबन्धोऽवकल्पते। यत्तु तेन व्याप्त्या साधयितुं शक्यते निधनं, न तस्य प्रकरणमस्तीति न वाक्याद्विनाऽऽश्रयत्वं प्रतिपद्यते। तत्र यदि वाक्येनैव फलसंबन्धस्तेनैव चाऽऽश्रयलाभस्ततो वाक्यं भिद्यते। तथा निधनमात्रानुवादेन हीषादिसंबन्धे प्रकरणं बाधित्वा सर्वसामसंबन्धप्रसङ्गे पुनः सौभरस्य यदिति कथमपि विशेषणीयं, तत्रापि पुनर्मतिः क्लेशनीया। किं च। § 4366

यद्यप्यवयवद्वारं भवेत्सौभरसाधनम्।
तथाऽपि भक्त्यनेकत्वात्क्व हीषिति न गम्यते॥§ 4368

न तावत्सौभरावयवेन निधनेन साधितेन प्रकरणलभ्यसौभरं साधितं भवति। अवयवस्य सौभरत्वेनाप्रतीतेः। न च यथा शक्नुयात्तथाऽऽश्रयेदित्येषा कल्पनाऽस्तीत्युक्तम्। उपेत्यापि त्वाश्रयत्वमनेकप्रस्तावादिभक्तिनि सौभरे कतमस्यां भक्तौ हीषादयः प्रयुज्यन्तामिति नैव ज्ञायते। *'मुख्यं वा पूर्वचोदनाल्लोकवत्' इति प्रस्तावे वा प्राप्नुवन्ति। तत्र निधनमित्यनुवादो नावकल्प्यते। अथोच्येत यथोक्थ्यादीनां फलाय चोदितानां प्रकरणाज्ज्योतिष्टोममाश्रयतामसमस्तव्यापित्वेनानेकावयवत्वेऽपि सति वाक्यान्तरवशेनान्ते निवेशो भवति। एवमत्रापि फले विहितानां हीषादीनामाश्रयत्वेन सौभरमुपसर्पतां समाम्नायवशेन लब्धस्थानानां निधनत्वमनुवदिष्यत इति। तदयुक्तम्। कुतः—
§ 4369

अनन्यविषयत्वेन स्थानमुक्थ्यादिषु स्थितम्।
हीषादिस्तु बहुस्थानः क्व स्यादिति न गम्यते॥§ 4371

युक्तमुक्थ्यादीनां प्रदेशान्तरेष्वदृष्टेरलौकिकत्वाच्च क्रत्वन्तरनिवेशित्वम्। न हि तेषां स्थानान्तरं दृष्टपूर्वम्। न चाविज्ञातस्थानविशेषाणां रूपावधारणं फलसंबन्धो वा। न चान्यत्र वर्तमानानां स्वरूपप्रयुक्त उक्थ्यादिव्यपदेशसंभवः। योऽपि वचनान्तरेण स्थानविशेषलाभः सोऽपि पृथक्त्वर्थत्वाविज्ञानादनयैव फलचोदनया गृह्यत इति तदर्थ एव विज्ञायते। हीषादीनां यः पुनः स-

२० *] ( अ॰ १२ पा॰ २ अ॰ १० सू॰ २५ )।

माम्नायप्राप्तः स्थानविशेषसंबन्धः स तावत्सौभरविधानेन क्रत्वर्थत्वेन सौभरफलार्थत्वेन चोपयोजितः। इदानीं तु फलं प्रति स्वतन्त्रस्य हीषो विधानाल्लोकवेदसामान्तरभक्त्यन्तरप्रकृतभक्तिवर्तित्वादिविशेषो न ज्ञायते क्वावतिष्ठताम्। यदि हि प्रकृत एव विहित इति विज्ञायेत ततस्तस्य ज्ञातस्थानत्वात्संदेहो न स्यात्। ननु चैकत्वाच्छब्दस्य य एवायं प्रकृतः स्यात्स एव लोकादिष्वपीति तद्गतग्रहणेऽपि तदेव विशेषस्थानं भविष्यतीति। नैतदेवम्। कुतः— § 4372

एकत्वेऽपि हि शब्दस्य शक्तिभेदः प्रयोजने। 569
तत्र कार्यान्तरस्थानं न स्यात्कार्यान्तरेष्वपि॥§ 4374

न शब्दैकत्वेन यत्किंचित्कार्ये स्थानं दृष्टसामर्थ्यं तदेवान्यत्रापीति शक्यते वक्तुम्। न हि यत्, देवदत्तस्य युध्यमानस्य स्थानमवगतं तदेव भुञ्जानस्यापि भवतीति गम्यते। कार्यप्रयुक्ता हि स्थानविशेषादयो न स्वरूपप्रयुक्ताः। स्वरूपस्य स्थानान्तरेऽप्यविभागात्। अतः कार्यान्तत्वादेकस्यापि स्थानभेदप्राप्तिः। न च यत्सौभराङ्गभूतस्य हीषः स्थानं तदेव पुरुषार्थस्यापीत्यवधारणं शक्यम्। प्रासङ्गिकसौभरसाधनत्वादिति चेत्। न, तस्यैव स्थानविशेषलाभात्प्रागसिद्धत्वात्। इतरेतराश्रयं हि स्यात्सौभरसाधनत्वेन स्थानविशेषस्तस्माच्च साधनत्वमिति। ननु यथाऽभ्युदितेष्टयां मध्यमादितण्डुला उपादीयमानत्वेऽपि प्रकृता गृह्यन्ते तथाऽत्र हीषादयो ग्रहीष्यन्ते। युक्तं तत्र प्रकृतगामिविभजतिवाक्यापेक्षितानां देवतासंयोगवाक्यानां तद्विषयत्वाद्यच्छब्दोपबद्धमध्यमादिविभागस्य च प्रकृतप्रत्ययानतिरेकादन्येषामग्रहणम्। इह तु न हीषादीनां तादृक्कारणमस्तीति न लौकिकप्रत्ययो निवर्तते। तस्मान्नैवं वाक्यार्थः संभवतीत्ययमपरः परिगृह्यते। यदा सर्वप्रकारमन्विष्यमाणोऽपि श्रौतः फलसंबन्धो न लब्धः, तदा मा बाधितरां श्रुतिरिति प्रकृतसाधनलक्षणा विज्ञायते। तत्रैषोऽर्थो भवति। प्रकृताय वृष्टिसाधनाय हीष्शब्दोऽङ्गमिति। प्रकृतगामी च वृष्टिशब्दस्तत्साधनभूतं सौभरमेव लक्षयति नान्यत्। न चान्यसाधनभूतमप्रतीतेः। सत्यामपि च हीषादीनां प्राप्तौ नियमार्थत्वादर्थवद्वाक्यमित्युक्तम्। ते च हीषादयो यथाभूताः सौभरेणाऽऽक्षिप्तास्तथाभूता एव नियम्यन्त इति विनाऽपि निधनशब्दसंयोगेन सिद्धं निधनत्वमनूद्यते। तद्दर्शयति—**वृष्टिकामाय सौभरमस्त्येवेत्यादि**। तदेतदधिकरणं गुणक्रियाफलप्रतिपादनपरयोरनन्तराधिकरणयोरुभयोरप्यपवादभूतम्। वृष्ट्यादिशब्देनैवेदं फलं साधनलक्षणयेति प्रतिपादनात्। यस्तु वाक्यभेदश्चोदित आसीत्स निधनसंबन्धे सति श्रुत्या वा सौभरे विशेषणत्वेनोपादीयमाने भवेत्। न त्विह तदुभयमप्यस्ति। वृष्टिकामपदेनैव संबन्धात्, प्रकरणलभ्यत्वाच्च सौभरविशेषणत्वस्य। न च प्रकरणलभ्या विशेषा वाक्यं भिन्दन्ति। तस्माददोषः। इदं त्विह विचारयितव्यं भवति। किं यत्र क्वचन शाखायामधीतस्य सौभरस्य वृष्ट्यादिसाधनभूतस्य हीषादयो नियम्यन्त उत यत्र हीष्निधनकं पठ्यते तच्छाखागतं वृष्टिकामस्य प्रयोक्तव्यम्। एवमूर्ङ्निधनकम्, ऊनिधनकं चेति

सदृशो विचारः। तत्रानियमेन सहस्रशाखागतसौभरप्रयोगविकल्पे सति वृष्टिकामादिनिमित्ते हीषादिमात्रनियम इति प्राप्तेऽभिधीयते। यत्र तन्निधनकं पठ्यते तच्छाखागतैव वृष्टिकामादेः समस्ता गीतिरुपादातव्येति। कुतः।
§ 4375

570 प्रपद्यते रूपविनाशभीतेर्गीतिर्न गीत्यन्तरभक्तियोगम्।
अतः समस्तैव विकल्प्यमाना यथासमाम्नायमसौ
नियम्या॥§ 4377

सामरूपं हि समाम्नायादवगम्यते तच्चाल्पेनान्यत्वेनाप्रत्यभिज्ञानादन्यदेव भवति। तत्र यदि शाखान्तरीयायां गीतौ शाखान्तरीयनिधनं प्रयुज्येत ततो रूपान्यत्वं स्यात्। न च वचनादृते ऐरवद्विकारः। तच्छाखागतगीतिग्रहणेनाविरोधोपपत्तेः सर्वत्रासंभवाद्विकाराश्रयणम्। अस्ति चात्र गतिः। विकल्पप्राप्तौ चायं नियमः। समस्तस्य च साम्नः पदार्थत्वाद्विकल्पप्राप्तिर्नावयवानाम्। अतो नान्यदीयनिधनविधानम्। अत एकदेशनियमे सति कांस्यभोजिन्यायेन समस्तनियमः। एषोऽपि चात्र वाक्यार्थः संभवति। उभयोः प्राप्तयोः संबन्धमात्रं विधीयते। यद्वृष्टिकामाय सौभरं यच्च हीषित्येवं निधनं तदेकत्र संपादनीयमिति। तस्मात्समस्तगीतिनियम इति सिद्धम्॥ २९॥ § 4378

इति सौभराधिकरणम्॥ १३॥

इति श्रीभट्टकुमारिलविरचिते मीमांसाभाष्यव्याख्याने तन्त्रवार्तिके
द्वितीयाध्यायस्य द्वितीयः पादः॥

## ०.०.५८ रथंतराधिकरणम्

ज्योतिष्टोमे प्रथमं बृहद्रथंतरे वैकल्पिके पृष्ठसाधनत्वेन चोदिते ततः पुनः श्रूयते ‘यदि रथंतरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहान्गृह्णीयात्’ ‘यदि बृहत्सामा शुक्राग्रान्’ इति। तत्र सगुणं कर्म श्रूयमाणं संदिह्यते किं कर्मान्तरं ज्योतिष्टोमादुत तस्यैव ग्रहाग्रताविशेषविधानं प्रति रथंतराव-
571 च्छिन्नस्य निमित्तार्थं श्रवणमिति। तत एतत्सिद्ध्यर्थमिदं विचारयितव्यं किमयं कृत्स्नक्रतुसंयोगो रथंतरस्य अथ सत्तामात्रसंयोग इति। तत्सिद्ध्यर्थमप्येत-

९ ऐर] ऐरवदिति—'न गिरागिरेति ब्रूयात्' ‘ऐरं कृत्वोद्गेयम्’ इति वचनबलाद्यज्ञायज्ञीयसाम्नो गिरापदत्यागेन इरापदे गानेऽपि न प्रकृते, इति व्यतिरेकदृष्टान्तार्थः।
१२ कांस्य] कांस्यभोजिन्यायेनेति शिष्याचार्ययोः सहभोजनप्राप्तौ शिष्यस्य कांस्यभोजित्वनियममनियतपात्रभोज्याचार्योऽनुरुन्धानो लोके दृश्यत इत्ययं न्यायो द्वादशाध्याये साधयिष्यमाणोऽत्रानुसंधेयः।

चिन्तनीयम्, किं क्रतुविशिष्टं रथंतरमुत रथंतरविशिष्टः क्रतुरिहाऽऽश्रीयते। ननु च यदिशब्दोपबन्धादिह निमित्तं प्रतीयते तस्य चोद्दिश्यमानत्वाद्विशेषणविशेष्यभावो नावकल्पेत। भवेन्निमित्तार्थत्वमेतस्य यदि यादृगयं प्रत्येष्यते तादृशस्य कुतश्चित्प्राप्तिर्विज्ञायेत। अप्राप्तिपक्षे तु बलाद्विधानमापद्यते। निमित्तत्वमपि च यादृशस्येह श्रूयते यदि तादृशो ज्योतिष्टोमस्ततस्तस्यैव गुणार्थत्वेन श्रवणमिति संगंस्यते। यदि तु तादृङ् न भवति ततस्तादृशत्वमापाद्य निमित्तीकर्तव्यः। यत्संबन्धाच्च प्राङ्निमित्तत्वमेव नोपजायते भवति तन्निमितस्यापि विशेषणं यथाऽऽर्त्यधिकरणे वक्ष्यते 'मृष्यामहे हविषा विशेषणमिति'। तस्मान्न विशिष्टानुवाददोष इति। किं तावत्प्राप्तं प्रकरणाद्रथंतरसामत्वस्य बृहत्सामत्वस्य च वचनान्तरेण प्राप्तेर्यदिशब्देन च प्राप्त्यपेक्षत्वनिमित्तत्वप्रतीतेर्ग्रहाग्रताविशेषस्य च प्रयोगवचनेन ग्रहणाद्बलीयसा च विरोधिना गुणान्तरेणानवरोधात्, 'तत्संनिधेर्गुणार्थेन पुनः श्रुतिः'* इत्यकर्मान्तरत्वम्। एवं सिद्धान्तं प्राप्तं तुशब्देन व्यावर्त्य सौत्रः पूर्वपक्षः परिगृह्यते कर्मान्तरमिति। कुतः। § 4381

समासः सति सामर्थ्ये तच्चापीष्टं विशेषणे।
विशेषणं व्यवच्छेत्तृ ज्योतिष्टोमे च नास्ति तत्॥§ 4383

*'गुणश्चापूर्वसंयोगे' इति पूर्वकर्मासंबद्धो गुणो भेदक इत्युक्तम्। इह च बहुव्रीह्यर्थसद्भावस्य यदिशब्दोपबन्धेन निमित्तत्वं गम्यते न रथंतरसत्ताया 572 उपसर्जनत्वात्। न च क्रतुविशिष्टं रथंतरमिह प्रतीयते। § 4384

येन तदेव निमित्तं कल्प्येत। न च तत् क्रतुनाऽवच्छेत्तुं शक्यते, अन्यत्रापि विद्यमानत्वात्। एवं हि तदवच्छिद्यते यदि रथंतरमस्यैव सामेति, न त्वेवं संभवति। तस्मादवश्यमेवं कर्तव्यं यदि रथंतरमेवास्य सामेति। न चैवमात्मकत्वं ज्योतिष्टोमस्यान्यस्य बाऽवगतं, यन्निमित्तं भवेत्। अतो निमित्तप्रतीतिं परित्यज्य तदन्यथानुपपत्त्यैव केवलरथंतरसामककर्मान्तरविधिरध्यवसीयते। शक्यं हि तदपूर्वं कर्तुम्। न च रथंतरसत्तामात्रं विशेषणमव्यापकत्वात्। न विशेषणादृते सामर्थ्यम्। न च सामर्थ्येन विना समासोऽवकल्पते। दृश्यते वाऽसावत्रेति पूर्वस्यात्राप्रत्यभिज्ञानम्। अथ कस्मात्स एव केवलरथंतरसामकः पक्षे न क्रियते, न शक्यमेवं कर्तुम्। साक्षाद्विहितस्तोत्रसंबन्धिसामान्तरविरोधात्। इदं हि क्रतुसंबन्धेन श्रुतम् 'आनर्थक्यात्तदङ्गेषु' इत्यनेन न्यायेन स्तोत्रेष्ववतरति, गायत्र्यादीनि तु स्तोत्रेषु साक्षाद्विधीयन्ते तस्माद्बलवन्ति। क्रत्वन्तरे तु प्रत्यक्षशिष्टं रथंतरं तेभ्यश्चोदकप्राप्तेभ्यो बलवत्तरं भवतीत्यदोषः। एवं चान्यपदार्थविधानात्तत्प्रधानो बहुव्रीहिरनुग्रहीष्यते।

---

८ णे] ( अ० ६ पा० ४ अ० ६ ) इत्यत्र भाष्यकारेणेति शेषः।
१२ *] ( अ० २ पा० २ अ० ५ सू० १५ )।
१७ *] ( अ० २ पा० २ अ० ९ सू० २३ )।
२७ ते] असाविति - समास इत्यर्थः।
२९ म्] ( अ० ३ पा० १ अ० ९ सू० १८ )।

अन्यथा ह्युपसर्जनपरत्वं लोहितोष्णीषादिवाक्यवदगत्या परिगृह्येत। यदि च ग्रहाग्रताविधानेन सहैतदेकं वाक्यं ततस्तच्चापि रथंतरविधानं चानेकत्वाद-पूर्वभावनाविधिनैव निस्तीर्यते। सोमः स्यादिति चाऽऽनन्तर्यात्तत्कर्तव्यतैव विज्ञायते, रथंतरसामत्वकर्तव्यता तु व्यवहितकल्पनयैव स्यात्। सोमश-ब्देन च प्रकृतिलिङ्गेन ज्योतिष्टोमप्रकृतिरेवायं भविष्यति। तस्मात्कर्मविधिः। इदमेव भाष्यकारो दर्शयति—**यदि रथंतरसामेत्यस्य कोऽर्थ** इत्यादिना। ग्रहाग्रताविशेषश्चास्यैव क्रतोर्वाक्येनावान्तरप्रकरणेन वा भविष्यति। § 4385

573 यद्यपि महावाक्येष्ववान्तरवाक्यान्यप्रमाणं तथाऽप्यर्थासंभवादविवक्षिते महावाक्येऽवान्तरवाक्याश्रयणाद्विधिशक्तेरबाधः। *परित्यागाद्वरमध्याहृत्य पूर-णमिति मत्वा, **अथ वा यदि रोचेतेति** दर्शयति। तत्कर्तव्यताक्षिप्तायाश्च **रुचेः प्रमाणवानेवाध्याहार** इति न स्वमनीषिकामात्रमभिहितम्। अध्याहारादपि स्वपदवृत्तिरेव व्यवहितकल्पनया लघीयसी धर्ममात्रबाधादिति मत्वा **यदि शालिं भुञ्जीतेत्युदाहृत्य** पक्षान्तरं कल्पयति। परस्तु दृष्टान्तस्यैवासिद्धेः **क-**
574 **थं पुनरिति** पृच्छति। व्यत्ययेन संबन्धः, **कामप्रवेदने** हि लिङ् इच्छां प्रत्यायतीति सिद्धान्तविवरणम्। तत्रैष वाक्यार्थो भवति। यद्यैन्द्रवायवान् ग्रहान् ग्रहीतुमिच्छेद्रथंतरसामानं क्रतुं कुर्यादिति। ततश्च यदिशब्दरहितं सोमः स्यादिति पदद्वयं विधायकं, ग्रहान् गृह्णीयादित्येतत्तु यद्यप्यविधायकं तथाऽपीच्छार्थत्वाद्यो हि यदिच्छति स तत्करोतीत्येवं विधिफलं लप्स्यते। अथ वा इच्छामात्रयुक्तमुपात्तं ग्रहाग्रत्वं स्यादित्येषैव लिङ् विधास्यति। § 4386

विनैव व्यवहितकल्पनयाऽप्ययं पक्षो भवन् बलवत्तर इति मन्वानोऽथ-वा **हेतुहेतुमतोर्लिङित्युपन्यस्यति**। तत्र सोमः स्यादिति हेतौ लिङ्गृह्णीयादिति विधावेव। तेनैतदुक्तं भवति रथंतरसामसोमहेतुकानैन्द्रवायवाग्रान् ग्रहान् गृह्णीयादिति। न चाक्रियमाणेऽसौ हेतुत्वं प्रतिपद्यत इत्यर्थाद्विहितो भविष्य-तीति। अथ वा हेतुमति गृह्णीयादिति लिङ्, सोमः स्यादिति विधावनुक्तमपि च सोमस्य हेतुत्वं हेतुमदाक्षेपात्संनिधेश्च भविष्यति। तत्राप्येषोऽर्थो ग्रहाग्र-ताविशेषकारणभूतः सोमयागः कर्तव्य इति। § 4387

यदिशब्दपरित्यागो रूढ्यध्याहारकल्पना।
व्यवधानेन संबन्धो हेतुहेतुमतोश्च लिङ्॥ § 4389

इति पक्षविकल्पसंग्रहश्लोकः। सर्वं चैतदवेष्ट्यधिकरणसिद्धान्त एवोप-
575 योक्ष्यत इत्यत्र प्रपञ्चितम्। *किं च। § 4390

९ *] परित्यागादिति यदिशब्देति पूर्वं शेषः।
२५ वा] 'हेतुहेतुमतोर्लिङ्' ( ३-३-१५६ ) इति पाणिनीयसूत्रानुरोधादित्यर्थः।
३१ *] बृहद्रथंतरसामसंयोगस्य ग्रहाग्रत्वलक्षणाङ्गरूपशेषानुष्ठानवेलायामभूत-त्वात्—अनिष्पन्नत्वात् इत्येवम् 'संयोगस्याशेषभूतत्वात्' इति सूत्रावयवव्याख्यानार्थम् 'अपि च' इति भाष्यं व्याख्यास्यति—किंचेत्यादिना।

निष्पन्नेन निमित्तेन निष्पाद्यं प्रतिभूयते।
न रथंतरसत्ता च निष्पन्ना क्रतुसत्त्ववत्।§ 4392

प्रातः सवने हि ग्रहग्रता भवति माध्यंदिने रथंतरम्, न चानिष्पन्नस्य निमित्तता युक्ता। कारणपर्यायत्वान्निमित्तशब्दस्य, मम तु नैव किंचिन्निमित्तम्। अथ वा क्रतुः। स चाऽऽदित एव विद्यते। *जगत्सामा च न ज्योतिष्टोम इति 'जगत्साम्नि सामाभावात्', इति वक्ष्यते। अतश्च 'तत्सामान्यादितरेषु तथात्वम्' इति कर्मान्तरत्वमिति॥ १॥ § 4393

पूर्वोक्तैरेव हेतुभिर्ज्योतिष्टोमस्य गुणविधिरयं न कर्मान्तरम्। एकस्यैव हि तेन लिङ्गेन रथंतरसामत्वेन बृहत्सामत्वेन च ग्रहाग्रताविधिप्रयोजनार्थमुच्चारणं क्रियते। गुणवाक्यत्वाच्चाकर्मान्तरप्रत्यये सत्येकत्वं विज्ञायते। अथ वा रथंत- 576
रादिविधानाज्ज्योतिष्टोमस्य गुणवाक्यैरेवमात्मकत्वं चोदितमिति नार्थान्तरत्वं प्रतीयते। ततश्च कर्मैकत्वम्। यत्तु विशेषणाभावात्सामान्तरसापेक्षविशेषणत्वाद्वा रथंतरसामेति समासो नावकल्पत इति। तत्र ब्रूमः। § 4394

इष्यते पाक्षिकं वस्तु सत्तयैव विशेषणम्।
विग्रहे यद्विशेष्यत्वं तस्य चेह निमित्तता॥§ 4396

यदि हि रथंतरं नित्यं ज्योतिष्टोमेऽन्यसहितं वा स्यात्ततो न व्यवच्छिन्द्यादपि, यतस्त्वरथंतरोऽपि ज्योतिष्टोमप्रयोगोऽस्त्येव ततस्तद्व्यवच्छेदमुखेनास्ति विशेषणफलम्। यदि चैवकारं विना विशेषणबुद्धिर्न भवति तत एवमसौ दर्शयितव्यो यदि रथंतरं सामास्यास्त्येवेति। बहुव्रीहेश्च मत्वर्थवर्तित्वान्मतुपश्चास्तित्वयोगविषयत्वान्नैवकारस्याश्रुतसत्तासंबन्धकल्पना। यद्वा यदि रथंतरं सामैवास्य भवतीति। तत्र कोऽर्थ एवशब्दस्य। तद्धि रथंतरं यद्यपि सर्वदा साम तथाऽपि यदा क्रतौ न भवति तदा तं प्रति सामकार्यासत्त्वादसामैवेति। सत्तापक्षे रथंतरं सामेति वक्ष्यते। अवश्यं च क्रत्वपेक्षमेवैतत्सामत्वं वक्तव्यम्। रथंतरस्वरूपे सामत्वस्य नित्यं पौनरुक्त्यात्। न च रथंतरस्य सापेक्षत्वं ज्योतिष्टोमे, येन समासो न स्यात्। द्वंद्वनिर्दिष्टेषु ह्येकस्तोत्रविषयेषु चैतद्भवति। केवलेषु तु भिन्नस्तोत्रविषयसाधनेषु प्रत्येकनिरपेक्षमेव साधनत्वमिति सामर्थ्यं न विहन्यते। यद्वा पौनरुक्त्यादेव सामशब्दस्तत्साध्यस्तोत्रलक्षणार्थः सन् रथंतरपर्युपस्थापितं पृष्ठं लक्षयति। अथवा बृहद्रथंतरयोरवान्तरप्रकरणादवान्तरकार्ययोगाच्च विरोधिनोः स्पर्धमानयोर्यथाऽवस्थितानुवादसारूप्यात्सामान्तराण्यनपेक्ष्य परस्प-

५ *] अथ वा जगत्सामसंयोगस्य ज्योतिष्टोमं प्रत्यनङ्गभूतत्वात्तत्साहचर्येण बृहद्रथंतरसंयोगयोरप्यनङ्गत्वात्कर्मान्तरप्रयोजकतेत्येवमर्थान्तरपरतया सूत्रव्याख्यानार्थम् 'अपि च निःसंदिग्धम्' इति भाष्यं व्याचष्टे—जगत्सामा चेत्यादिना।

६ इति] ( अ॰ १० पा॰ ५ अ॰ १५ सू॰ ५८ )।

६ श्च] ( अ॰ १ पा॰ २ अ॰ २ सू॰ २३ इत्येतत्सूत्रावयवः )।

रावच्छेदेनैव विशेषणत्वसिद्धिः। तेनोपपन्नं रथंतरविशिष्टस्य क्रतोर्निमित्तत्वम्। अथवाऽस्तु रथंतरं क्रतुविशिष्टं निमित्तमिति। ननु च तदेव न प्रतीयते। उच्यते। सत्यं न प्रतीयते किं तु यदा समस्तक्रतुसंयोगाभावाद्रथंतरविशिष्टः क्रतुर्न गृहीतस्तदा विगृह्यमाणे समासे यो विपरीतो विशेषणविशेष्यभावः प्रतीयते रथंतरमस्य सामेति स ग्रहीष्यते। § 4397

577 षष्ठ्यन्तत्वाच्च क्रतुर्विशेषणमेव समासाभिव्यङ्ग्यविशेष्यत्वभावात्तथा विवक्षिष्यते। यद्यपि च क्रत्वन्तरेष्वपि वस्तुस्वरूपेण रथंतरमस्ति तथाऽप्यत्र तावद्विद्यते तावन्मात्रेण च विशेषणत्वोपपत्तिः। स्ववाक्ये चासाधारणत्वं विशेषणकारणं न वस्तुलक्षणं मा भून्नीलमुत्पलं देवदत्तस्य गौरित्येवमादीनां विशेषणत्वोच्छेदः। तथा हि। § 4398

न लोके देवदत्तस्य गोसंबन्धोऽस्ति केवलम्।
उत्पलस्य च नीलत्वं तस्यैवोच्येत येन तत्। § 4400

यदि च वस्तुत एवासाधारणत्वं भवेन्नैव शब्देन विशेषणमुपादीयेत। न ह्यत्र विशेषणफलमस्ति अग्निरुष्ण इति। तस्मादवश्यं वाक्यगतमेवासाधारणत्वमाश्रयितव्यम्। अस्ति चात्रापि तत्, ज्योतिष्टोमगतस्यैव रथंतरस्य निमित्तत्वेनेष्टत्वात्। प्रथमतरप्रतीतं च रथंतरं निमित्तत्वेनोत्सृज्य न निमित्तान्तरकल्पनायां प्रमाणं विद्यते। तस्मादुभयथाप्यदोषान्निमित्तमिति न यदिशब्दपरित्यागादीनामाश्रयणं युक्तम्। न च कामप्रवेदनहेतुमत्प्रतीतिस्तावद्भवति यावन्निमित्तत्वमेव न प्रतीतम्। तत्संभवे च नाप्रतीतग्रहणं युक्तमू। भूतभविष्यद्वर्तमानानां चानियमेन लोके वेदे च निमित्तत्वं दृष्टमिति रथंतरभविष्यत्वमचोद्यम्। *अपि च यदेकान्तेनावधारितं तन्निष्पन्नमेव। ज्योतिष्टोमप्रक्रमे चावधारितमेकान्तेन रथंतरं प्रयोज्येत इति सर्ववैकल्पिकानां क्रतुप्रक्रमएवावधारणादवश्यमृत्विग्यजमानैरेवमिदं कर्तव्यमित्यवधार्य प्रवर्तितव्यम्। तद्वशेन प्रयोगकौशलाभ्यासादिसिद्धेः। न च निमित्तं नैमित्तिकस्य रूपसंनिधानेनोपकरोति। कथं तर्हि। ज्ञायमानत्वेन। तस्मादप्रयुक्तमपि संकल्पितत्वाद्रथंतरं निमित्तम्। यदा त्वेकदेशस्थेनापि तेन विशेषितः क्रतुर्निमित्तं तदाऽसौ वर्तत एवेत्यविरोधः। न च लिङः कालविशेषसंबन्धेनोत्पत्तिर्येनान्य-
578 तरविषयमेव निमित्तं ब्रूयात्। सर्वथा हि शक्यं दर्शयितुं यदि रथंतरसामा सोमो भूतो भवति भविष्यति चेति। तत्रेहार्थवशेनैवं विज्ञायते यदि रथंतरं भविष्यतीति। § 4401

यत्तु जगत्साम सामान्यतो दृष्टमुक्तं, तदयुक्तम्। तस्यैवंजातीयकेष्वप्रमाणत्वात्। अथ वा प्रकरणे द्वित्वबहुत्वयुक्तप्रतिपद्विधानादिव जगत्साम-

---

२१ *] यदि तु निष्पन्नेन्नैव मिमित्तेन भाव्यमित्याग्रहस्ततः संकल्पितत्वेन, अननुष्ठितस्यापि भोजनस्य संमार्जनादाविव निमित्तत्वोपपत्तोरित्युपपादयति—अपि चेत्यादिना।

३२ द्विधानादिव] प्रतिपद्विधानादिवेति—'युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यात्' 'एते

त्वासंभवात्तदिति वैषम्यम्, अपि च तत्रापि नैवापूर्वकर्मोत्पत्तिः, किं तर्हि,
अप्रकृतस्य विषुवतो निमित्तत्वेन ग्रहणम्। तस्मान्निमित्तार्थानि सर्वाणि श्रव-
णानीति॥ २॥ § 4402

इति रथंतराधिकरणम्॥ १॥

## ०.०.५९ अवेष्ट्यधिकरणम्

'राजा राजसूयेन स्वाराज्यकामो यजेत' इत्यस्य प्रकरणे
'आग्नेयोऽष्टाकपालो हिरण्यं दक्षिणा' इत्यादिभिर्द्रव्यदेवतासंयोगैरवेष्टिसंज्ञ-
कामिष्टिं विधाय श्रूयते 'यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाऽऽहु-
तिमाहुतिं हुत्वाऽभिघारयेत्' 'यदि राजन्य ऐन्द्रं' 'यदि वैश्यो वैश्वदेव-
म्' इति। तत्र पूर्ववदेव संदेहः। किं राजसूयमध्यस्थाया एवावेष्टेर्वर्ण-
विशेषसंबन्धं प्राप्तमेव निमित्तत्वेनोद्दिश्य तत्र नैमित्तिकं विधीयते उताप्राप्त- 579
मेव ब्राह्मणादिसंबद्धं प्रयोगान्तरमुद्दिश्यत इति। तत्सिद्ध्यर्थं चैतद्विचारयितव्यं
किं राजसूयेऽधिकारस्त्रयाणामपि वर्णानामुत क्षत्रियस्यैवेति। तत्सिद्ध्यर्थ-
मधिकारिविशेषणभूतो राजशब्दस्तथैव विचारणीयः। ततोऽप्येतद्विचारयित-
व्यं किं क्षत्रियत्वनिमित्तो राजशब्द उत राज्यकरणनिमित्त इति। ननु च
'एतयाऽन्नाद्यकामं याजयेत्' इति वर्णविशेषेणासंबद्धं पृथग्राजसूयप्रयोगव-
चनादेवावेष्टेर्वचनमस्तीति वर्णत्रयस्यापि प्राप्तस्य निमितार्थमेव श्रवणं भवेत्।
नैतदेवम्। तदा हि निर्ज्ञातक्षत्रियकर्तृकायाः कर्त्रन्तरे वचनान्तरेणाविधीय-
मानायाः पृथक् प्रयोगकारणाभावाच्च राजसूयमध्यस्थाया एव 'एकस्य
तूभयत्वे संयोगपृथक्त्वम्' इत्यनेन न्यायेन साधारणं च स्वाराज्यं फलं
प्रात्यात्मिकं चान्नाद्यं विज्ञायते। § 4404

पृथग्वा राजन्यैनैव फलार्थिना प्रयुज्यते न वर्णान्तरसंबन्धः। त-
द्यथाऽध्ययाधानयोर्निर्ज्ञातत्रैवर्णिककर्तृकत्वात्तदधीनसिद्धीनां कर्मणामर्थिमात्र-
संबन्धावगमेऽपि सति अपशूद्रविषयत्वमेवावतिष्ठते। यथा चात्रैव स्वाराज्य-
कामाविशेषेऽपि राजकर्तृकत्ववशेन भोक्तृविशेषो भविष्यति। तस्माद्राज-

असृग्रमिन्दव इति बहुभ्यो यजमानेभ्यः' इति वाक्याभ्यां द्विबहुयजमानकत्वे निमित्ते स्तोत्रीयाद्यर्ग्रूपप्रतिपत्कार्योद्देशेन विहितयोर्मन्त्रयोर्नियतैकयजमानके ज्योतिष्टोमे निवेशासंभवाद्यथा कुलायाहीनादावुत्कर्षस्तद्वदिहेति दृष्टान्तार्थः।

२ तो] विषुवत इति।
एकषष्ट्यधिकशतत्रयसुत्यात्मके गवाभयने, अशीतिशतं पूर्वं पक्षः अशीतिशतमुत्तरं पक्षः, मध्यतनं विषुवत्संज्ञकमहः। तस्मिंश्च विषुवति पृष्ठस्तोत्रे, 'विभ्राट् बृहत्पिबतु', इति जगतीच्छन्दस्कायांमृचि महादिवाकीर्त्यं सामोत्पन्नम्। अतस्तस्यैव जगत्सामत्वेन शुक्राग्रत्वमिति।

९ थेव] तथैवेति—त्रयाणां वर्णानां वाचक उत क्षत्रियस्यैवेत्यर्थः।

१४ एव] ( अ° ४ पा° ३ अ° ३ सू° ५ )।

सूयाधिकारेणैवैभिर्वा वचनैः प्राप्तिरिति द्वावेव पक्षौ। किं तावत्प्राप्तम्। पूर्वाधिकरणेनैव निमित्तार्थानि श्रवणानीति। राजसूयाधिकारश्च सह राजशब्देन त्रयाणामपि वर्णानाम्, राज्यकरणं च शब्दप्रवृत्तिनिमित्तमिति। तथा हि। § 4405

कर्ता राज्यस्य राजेति सर्वलोकेषु गीयते।
महाविषयतैवं च शास्त्रस्यापि भविष्यति॥§ 4407

उभयसंभवे तावत्त्रैवर्णिकविषयता युक्ता कल्पयितुम्। एवं हि निमित्तप्रतीतिस्तत्प्रकरणादीनि च न बाध्यन्ते। राजसूयाधिकारश्रुतिश्चानल्पविषयत्वेन स्वरसात्प्रवर्तमाना न निवर्तिता भविष्यति। तस्माद्राज्यं कुर्वन्तः सर्वत्रैवर्णिका राजानः। तच्च राज्यं जनपदपरिपालनं नाम सर्वलोकप्रसिद्धम्। ततश्चोद्धरणं
580 राज्येऽपि कण्टकोद्धारणमभिप्रेतम्। **आर्यावर्तनिवासिन** इति—*‘शास्त्रस्था वा तन्निमित्तत्वात्’ इत्यस्य प्रदर्शनार्थम्। राज्ञः **कर्म राज्यमित्येतदभियुक्ता उपदिशन्ती**त्येतद्भुवता ननु राजशब्दस्यैव प्रकृतिभूतस्य स्वातन्त्र्यमभ्युपगतं भवति। तथा हि। § 4408

नैवोदमेघिसंबन्धादुदमेघः प्रसिध्यति।
स्वतन्त्रेणोदमेघेन स एव त्वनुगम्यते॥ उच्यते॥§ 4410

राजा निर्ज्ञात एवेह स्वातन्त्र्येण चिरंतनैः।
तद्योगात्कल्पितं राज्यमस्माकं तु विपर्ययः॥§ 4412

यथैव गामानयेत्यभिहिते यद्यपि व्यवहर्तृभिः यो गौः स आनेतव्य इति वचनं कल्पितं तथाऽपि पार्श्वावस्थितस्य यस्य गोत्वमप्रसिद्धमानयनं च प्रसिद्धं स छेदनादिभ्य इव यूपमेवं प्रतिपद्यते य आनेष्यते स नूनं गौरिति। तथैवात्र यद्यपि मन्वादिभिः पाणिनिप्रभृतिभिश्चैवं स्मृतं यो राजा तेन जनपदादिरक्षणं कर्तव्यम्, यश्च राजा तस्य कर्म राज्यमिति। § 4413

तथाऽपि वयं संदिग्धराजकाः प्रसिद्धराज्याश्च सन्त एवं प्रतिपद्यामहे येनैवं स्मर्तृभिरुक्तं तेन नूनं बन्धनसमर्थे द्रव्ये यूपवत्, राज्यकरणसमर्थद्रव्यालम्बन एव राजा तैर्निरूपित इति। तच्च राज्यमविशेषेण चत्वारोऽपि वर्णाः कुर्वाणा दृश्यन्ते। तस्मात्सर्वे राजानः। तत्र तु न्यायान्तरेण ब्राह्मणादिषु चरितार्थायां राजश्रुतावध्ययनादीनामभावे सति कामं शूद्रः पर्युदस्येत न त्वितरपर्युदासे हेतुरस्तीति त्रयाणामप्यधिकारः। ननु च क्षत्रियसंबन्धेन राज्यं विहितमन्यायेनेतरौ कुर्वाणौ न राजानौ स्याताम्। नैष दोषः। सर्वथा तावद्राज्यकरणात्ताभ्यामपि राजत्वं लब्धं तावता च राजसूयचोदनायाः प्रयोजनम्। यौ तु न्यायान्यायौ तयोः पुरुषधर्म-

११ *] ( अ॰ १ पा॰ ३ अ॰ ४ सू॰ ९ )

त्वान्नैकोऽपि क्रतुना गृह्यत इत्यविशेषः। **ननु जनपदपुरपरिरक्षणवृत्तिमनुपजीवत्यपीति**—सिद्धान्तबीजोपन्यासः। *उक्तं ह्येतद्बर्हिराज्यादिशब्देषु यथैकदेशेऽपि जातिनिमित्तत्वे लभ्यमाने निमित्तान्तरं न कल्पनीयमिति। परः पुनर्यौगिकग्रहणमत्रोपकारकमिति प्रदर्शयति—**प्रकरणवशाद्यदिशब्दसमभिव्याहाराच्चेति। न कर्मान्तरं विधायिष्यते** इति-प्रयोगान्तराभिप्रायेण। अथ वा यदा यदि शालिं भुञ्जीतेत्यादयो वचनप्रकारा गृह्यन्ते तदैकेनैव वाक्येन ब्राह्मणसंबन्धो बार्हस्पत्याभिधारणं च न शक्यते कर्तुमिति मुख्यमेव कर्मान्तरत्वम्। एवं तावदुभयप्रसिद्धिं प्रमाणीकृत्योक्तम्। इदानीं तु राज्यरहिते प्रयोगः प्रमाणमेव न भवतीति प्रस्तूयते सार्वलौकिकेन प्रयोगेणासार्वलौकिकस्य बाधात्। **अपि च विप्रगीता** इति तदेव प्रत्ययिताप्रत्ययितत्वेन पुनरुपन्यस्तम्। न हि सर्वलोकासर्वलोकविदितत्वव्यतिरेकेण विप्रगीताविप्रगीतत्वे विद्येते। यद्वा पूर्वेण प्रसिद्धेः सदसद्भावमत्रमुत्तरेण तु विप्रतिपत्त्यविप्रतिपत्ती। भवति चाज्ञानविपर्ययज्ञानयोर्भेद इत्यपौनरुक्त्यम्। **तथाऽऽर्यावर्तनिवासिनामिति**-शास्त्रस्थबलीयस्त्वं पूर्वोपक्षिप्तं दर्शयति। § 4414 581

**समीचीनतर आचार** इति-शब्दप्रयोगोऽभिधीयते। तस्मात्प्राप्तानामेव ब्राह्मणादीनां निमित्तार्थं श्रवणम्। अपि च 'यदि राजन्य ऐन्द्रम्' इत्यसंदिग्धं निमित्तार्थमतश्च तत्सामान्यादितरयोरपि तथात्वमित्येवं प्राप्ते ब्रूमः। § 4415

क्रतुसंबन्ध एवायं ब्राह्मणादेर्विधीयते। 582
अप्राप्तत्वान्न राजा हि राज्ययोगात्प्रतीयते॥§ 4417

क्षत्रियवचन एवायं राजशब्दो न यौगिकः। स हि राज्ययोगाद्वा भवेद्धात्वर्थानुसारेण दीप्तियोगाद्वा। उभयथाऽपि चानुपपन्नः। तद्रहितरूढिशब्ददर्शनात्। एकदेशस्थाऽपि रूढिरवयवप्रसिद्धिं बाधते। न चावयवप्रसिद्धिरप्यत्रैकान्तिकी विद्यते, न हि दीप्यमानेष्वग्न्यादिषु राजशब्दो विद्यते। न चानभिषिक्ते जनपदपरिपालनव्यापृतेप्यायुक्तके। ननु चाऽऽयुक्तकस्य परप्रयुक्तकारित्वादृत्विज इव जयमानत्वं न राजत्वं भविष्यति। नैवं शक्यम्। पराधीनेष्वपि केषु चित् पृथिवीश्वराभिषिक्तेषु माण्डलिकेष्वपि प्रयोगदर्शनात्। तेन तर्ह्यव्यभिचारात्स एवाभिषेको निमित्तं प्राप्नोति। नैवं भविष्यति। कुतः। § 4418

अभिषेकोऽपि धर्मज्ञे क्षत्रियस्यैव पठ्यते।
सहासौ राजशब्देन तेन नाक्षत्रिये मतः॥§ 4420

ततोऽभिषेकस्य निमित्तत्वं ज्ञायते। यद्यस्य स्वातन्त्र्यं भवेत्। अयं तु क्षत्रियजातावेव स्मर्तृभिर्नियतो विधानवेलायामेव लवनादिवद्बर्हिःशब्देन, राज-

२ *] ( अ° १ पा° ४ अ° ७ सू° १० ) इत्यत्रेति शेषः।
१० देव] तदेवेति—यौगिकप्रयोगस्य सार्वलौकिकत्वाभिधानेन सिद्धमविप्रगीतत्वमेवेत्यर्थः।

शब्देन संयुज्यते। तेनैव चोभयनिमित्तत्वं समुदायशब्दन्यायेनैतस्यानिष्टम्। यदि हि जात्यभिषेकयोरत्यन्तसमुदितयोरेव प्रयुज्यते न तु केवलायां जातौ जात्यन्तरेवाऽभिषेको विधीयते तत उभयं निमित्तमिति कल्प्येत। स त्वभिषेकात्प्रागेव तत्संस्कार्ये प्रयुक्तः 'राजानमभिषेचयेत्' इति। तस्माद्राजजातावेव प्रज्ञायते। न च भाविसंज्ञाविज्ञानं भूतत्वेनैवोपपद्यमानत्वात्। अगत्या हि साऽन्यत्राऽऽश्रीयते। न चैकस्मिन्निमित्ते सिद्धे निमित्तान्तरं कल्पयितुं शक्यम्। विनाऽपि तत्कल्पनेन प्रयोगोपपत्तेः। अभिषेकनिमित्तत्वेऽपि च न्यायानुसारिणां नैवाक्षत्रियविषयत्वं सिध्यति। यस्तु धर्मशास्त्रातिक्रमेण क्रियते न तस्य निमित्तत्वं स्यात्। यथा शूद्रकृतस्याऽऽधानस्य नाऽऽहवनीयादिप्रयोगनिमित्तत्वम्। अपि च। § 4421

नित्याः शब्दार्थसंबन्धा यथावस्थितगामिनः।
नाऽऽश्रयन्त्यध्रुवं हेतुं स्वच्छन्दपरिकल्पितम्।§ 4423

583 नित्यस्य हि राजशब्दस्य नित्येनैव निमित्तेन भवितव्यं नित्यानित्ययोः संयोगाभावात्। सा च नित्यता वस्त्वपेक्षया वा विध्यपेक्षया वा निरूप्यते। तत्र न तावदभिषेको वस्तुरूपेणैव जातिवत्केषुचित्समवेतो दृश्यते। तेनावश्यं विधानापेक्षमेव निरूपणमाश्रयणीयम्। न च विधानमक्षत्रिये राजशब्दस्यास्तीति जात्यव्यभिचार एवाऽऽपद्यते। ततश्च सैव निमित्तम्। एतेन राज्यनिमित्तत्वं प्रत्युक्तम्। *तदपि हि विधानात्प्रभृति, अभिषेकवदेव क्षत्रियत्वसंबद्धम्। दृष्टश्चानभिषिक्तेऽपि, अपालयति च जनपदं, क्षत्रिये राजशब्दप्रयोगः। तद्वत्यपि वाऽन्यजातीयेऽनभिधानं द्रविडानाम्। तस्मादपि न त्रैवर्णिको राजा। तथा च राज्ञोऽपत्यं राजन्य इत्यैकान्तिकक्षत्रियजातिवचनस्य राजन्यशब्दस्य राजशब्दप्रकृतित्वमेवान्वाचक्षते। अन्यथा त्रैवर्णिकानां राजत्वात्सर्वेषां त्रैवर्णिकानामपत्येषु राजन्यशब्दप्रयोगः स्यात्। कुतः। § 4424

राजन्यः क्षत्रिये रूढो राजानः सर्व एव चेत्।
अपत्यापत्यवद्योगे वैषम्यं वद कीदृशम्॥§ 4426

नन्वेवमप्यनुपपन्न एवायमपत्यप्रत्ययः। तथा हि। § 4427

प्रकृतौ तदपत्ये च जातिशब्दस्य तुल्यता।
तेन राजैव सर्वत्र राजन्योऽप्यभिधीयताम्॥§ 4429

यथैव काकस्यापत्यं काक एवं राज्ञोऽपत्यं राजेत्येव स्यात्। नैष दोषः। पर्याय एव हि राजशब्दस्य राजन्यशब्दोऽनेन प्रकारेणान्वाख्यायते स

१८ *] ऐश्वर्यात्मके राज्ये लिप्सयैव प्रवृत्तेर्विधिविषयत्वाभावान्नित्यत्वानुपपत्तेरनित्यस्यैवागत्या, चोरशब्दप्रवृत्तौ स्तेयस्येव, राजशब्दप्रवृत्तौ राज्यस्य निमित्तत्वं भविष्यतीत्याशाङ्कायांम्। चाटतस्कर दुर्वृत्तमहासाहसिकादिभिः। पीड्यमानाः ग्रजा रक्षेत् कायस्थैश्च विशेषतः। इत्यादिविधिदर्शनाद्राज्यस्यापि विधिविषयताऽस्त्येवेति समाधानमाह—तदपि हीत्यादिना। विधानात्प्रभृति—विधानत इत्यर्थः।

त्वेकजातिविषयत्वे सति तथाऽन्वाख्यातुं युज्यते नान्यथा। ननु ‘राज्ञोऽपत्ये जातिग्रहणम्’ इति वचनात्क्षत्रियजातिवचनो भविष्यति। नैतदेवम्। इहान्यतमजात्यनुपादानाद्राजवन्मनुष्यनातिमात्राधिकारात्तद्वचनत्वं स्यात्। ननु च राजराजन्यशब्दयोस्तत्र तत्र कर्मभेदोपदेशेन स्मृतिविदां याज्ञिकानां च भेदेन प्रसिद्धिर्दृष्टा। सत्यं दृष्टा सा तु ब्राह्मणपरिव्राजकन्यायेन राजन्यशब्दस्याभिषिक्तविशेषगामित्वेन सामर्थ्यलभ्यत्वात्। यत्तु प्रसिद्धिद्वयसंभवे राज्यनिमित्तत्वं प्रकरणादिभ्यो विज्ञास्यत इति तन्निराक्रियते। तथा हि। § 4430 584

नैव तावदुभौ शब्दौ स्वातन्त्र्येण प्रसिध्यतः।
क्लृप्तायामेकशक्तौ हि द्वितीयो यौगिको वरम्॥§ 4432

तदेतद्दर्शयति—यदि तावज्जातिशब्दो राजेति ततस्तस्य कर्म राज्यमित्यवयवप्रसिद्धिसंभवान्न तन्निरपेक्षं शक्त्यन्तरकल्पनमुपपद्यते। विनैव तेनाऽऽर्यावर्तनिवासिनां प्रयोगो न विरोत्स्यते। अथ तु प्रथममेव राज्यमिति प्रतिपालनं रूढिरूपेणाभिधीयते। ततस्तच्छक्त्यनुसारेणैव तत्कर्तरि राजशब्दप्रयोगसिद्धेः शक्त्यन्तरकल्पनमन्तरेणैव द्रविडानां राज्याधिकारयोग्येषु क्षत्रियेषु प्रयोगो न विरोत्स्यते। दाक्षिणात्यत्वसामान्येनाऽऽन्ध्राणामिति भाष्यकारेणोक्तम्। तस्मान्न तावदुभावपि रूढिशब्दौ नापि यौगिकौ। अन्यतररूढित्वे तु राजशब्दस्य तत्कल्पना युक्ता। कुतः। § 4433

आचारयोरसंबन्धे संदेहे सति निर्णयः।
सन्निबन्धनया स्मृत्या बलीयस्त्वादवाप्यते॥§ 4435

राज्यशब्दाभिधेयं परिपालनादि कर्म क्षत्रियस्येति मन्वादयः स्मरन्ति। पाणिनिप्रभृतयोऽपि राज्ञः कर्मेदं राज्यमित्येवं व्युत्पादयन्ति। *‘गुणवचनब्राह्मणादिभ्यः कर्माणि च’ इत्याधिकृत्य स्वतन्त्ररूढाद्राजप्रातिपदिकात्प्रत्ययविधिः। तत्र ष्यञ्प्रत्ययं विदधतीत्यत्र वदन्ति। पत्यन्तपुरोहितादिपाठाद्राजशब्दस्य विशेषविहितेन यका भवितव्यम्। तथा च यक्प्रत्ययस्वर इहोपलभ्यते नाऽऽद्युदात्तत्वम्। तस्माद्राजशब्दाद्राज्यशब्दव्युत्पत्तिर्न तु विपरीतेत्येतावन्मात्रपरमेव भाष्यं द्रष्टव्यम्। राज्यशब्दाद्धि राजनि व्युत्पाद्यमाने यलोपाम्नानं 585 वा राजशब्दादेशात्मकं वा स्मरणं स्यात्। तस्मादियमेव वचनव्यक्ती राज्ञः कर्म राज्यमिति न त्वर्थापत्त्या राज्यस्य कर्ता राजेति कल्पनीयं, देशान्तरे विज्ञातत्वाद्राज्ञः। कल्पितायामपि चार्थापत्तौ मन्वादिस्मृतिवशेन क्षत्रियस्यैतत्कर्मेत्यवधारणात्स एव राजा विज्ञायते। सकलश्च राजेतिशब्दो राज्येऽनुप्रविष्ट इति स यौगिको युक्तो न तु राज्यशब्दो राजन्यनुस्यूतः सकल इत्ययौगिकत्वम्। सत्यमेवं राज्यशब्दस्य यौगिकत्वमुपपद्यते। यस्तु तत्कारिणि जात्यन्तरे राजशब्दप्रयोगः स क्षत्रियत्वाभावान्न प्राप्नोति।

१८ न्धे] असंबन्धे—विरोधनिमित्तक इत्यर्थः।

२१ *] ( पा॰ सू॰ ५-१०-१२४ )

तेन नाऽऽर्यावर्तनिवासिनां प्रयोगः सकलो न विरुध्यते। यथा, न शूद्रराज्ये निवसेदित्यादीनामाप्तप्रयोगाणां बाधः स्यादित्यत आह—**योगाल्लोकः प्रयुङ्क्त इति**। प्रथमं तावद्राजयोगाद्राज्यं पुनस्तद्योगाद्ब्राह्मणादिषु राजशब्दोपचार इति। नन्वेवं सति राज्ययोगादपि राजेत्येतदभ्युपगतमेव। नैष दोषः। गौणत्वाभ्युपगमात्, मुख्यत्वाभ्युपगमे ह्यधिकरणं परावर्तेत। गौणत्वं तु मुख्येन बाधितत्वादभ्युपगतमपि सिद्धान्तं न विरुणद्धि। तेन तत्कार्यापन्ने प्रतिनिधिन्यायेन ब्राह्मणादौ राजशब्द इति द्रष्टव्यम्। तथा च दर्शयति—**न त्वेवं स्मरन्ति राज्ययोगाद्राजेति**। तच्चैतदाचारस्य दौर्बल्याद्गौणकल्पनाश्रयणमित्येवमेव भाष्यं नेयम्। यत्त्वौदमेघिशब्दादिवत्प्रकृत्यर्थानुमानं तद्द्रविडप्रयोगेण प्रत्यक्षेण बाध्यते। अथ राज्यस्य कर्तैवमभिधीयत इति। निमित्तभूतोऽपि कर्मकर्तृसंबन्धस्तस्य च स्मरणमनुमातव्यम्। राज्ञः कर्म राज्य-
586 मिति प्रत्यक्षं स्मरणं तस्माद्बलवत्तरम्। पर **आह—यो यो राज्यं करोतीति**। सर्वथाऽन्वयव्यतिरेकाभ्यां वाच्यवाचकसंबन्धो विज्ञायते। स च राजशब्दस्याव्यभिचारेण राज्यनिमित्ततया च गम्यते न तु राजकर्मनिमित्तत्वेन, स्मृतेः पुनः शब्दापशब्दविभागमात्रविषयत्वादविषय एवायम्। उभौ हि राजराज्यशब्दौ साधू तस्मादयुक्तः स्मरणोपन्यास इति। तत्रोच्यते। सत्यं प्रयोग एव, न च स्मृतेः कस्य किंयोगनिमित्तत्वमित्येष व्यापारस्तथाऽपि तु साध्वसाधुत्वपरतयैवान्वाख्यानान्निमित्तत्वमवगम्यते। राज्ञः कर्म राज्यमिति हि व्युत्पादने तद्योगनिमित्ते राज्यमित्यर्थादुक्तं भवति। तेन स्मृतिबलीयस्त्वाद्राजशब्द एव स्वतन्त्र इति। प्रयोगोऽपि च द्रविडेषु व्यभिचारीत्युक्तमेव। मत्पक्षे तु प्रयोगस्यातन्त्रत्वाद्व्यभिचारित्वमदूषणम्। यत्र तावत् प्रयोगस्तत्रास्ति राजकर्मत्वम्। तेन प्रयुक्तस्यान्वाख्यानकरणादप्रयुक्तनिमित्तान्वाख्यानाभावाच्चादोषः। किं च। § 4436

असाधारणभावेन सर्वत्रेष्टं विशेषणम्।
तेन तस्यैव कर्मेति चिन्तितादि न गृह्यते॥ § 4438

जनपदरक्षणं ह्यसाधारणं राजकर्म तेन राज्यमित्युच्यते। चिन्तितनिमिषितादि तु राज्ञश्चान्येषां चेत्यव्यवच्छेदान्न राज्यशब्दाभिधेयं भवतीति। तेन सार्वलौकिकादपि प्रगोगात् ‘शास्त्रस्था वा तन्निमित्तत्वात्’ इत्यनेनैव राजशब्दस्य क्षत्रियवचनत्वम्। तुल्यश्चान्त्यजनपदवासिनामपि दृष्टार्थत्वाच्छाब्दव्यवहारे प्रमाणभाव इत्युक्तं ‘चोदितं तु प्रतीयेत’ इति। तस्मात्क्षत्रियस्यैव राजसूयोऽस्तीति ब्राह्मणादीनां प्रापकाणि श्रवणानि। ततश्च ‘एतयाऽन्नाद्यकामम्’ इत्येतदपि फलं बहिरेव प्रयोगाद्भविष्यतीति। § 4439

587 क्रतुमध्यप्रयोगो हि स्वाराज्येनैव पूरितः।

२८ गोगात्] ( अ. १ पा. ३ अ. ५ सू. ९ )।
३० इत्युक्तं] ( अ॰ १ पा॰ ३ अ॰ ५ सू॰ १० )।

साकाङ्क्षस्त्वितरस्तस्मात्तस्यैव फलसंगतिः।§ 4441

ननु चैतयेति प्रत्यक्षविशेषवचनात्परोक्षसामान्यप्रवृत्तां राजसूयचोदनां बाधित्वाऽन्नाद्यफलतयैव भवितव्यम्। नैतदेवम्। विरोधाभावात्। तथा हि। § 4442

विरोधित्वात्प्रसज्येते विकल्पावृत्तिकल्पने।
बाधस्तेनाभ्युपेतव्यो व्यवस्थायां तु नैव ते॥§ 4444

न ह्यनेकफलमेकस्य विरुद्धं प्रयोगान्तरस्य वचनान्तरेणैव कल्पितत्वात्। समुच्चयेन ह्यावृत्तिदोषोऽन्यत्राभिधीयते। सा त्वत्राऽऽवृत्तिर्ब्राह्मणादिसंबन्धाद्राजसूयग्रहणाच्चावश्यंभाविनी। यदि च 'एतयाऽन्नाद्यकामम्' इत्युत्पत्तिवाक्यं भवेत्ततः पश्चात्प्रवर्तमाना राजसूयचोदना बाध्येत। न। द्वयोरपि ह्याग्नेयादिचोदनोत्पादितेषु कर्मसु प्रवृत्तेषु युगपत्कालत्वेनागृह्यमाणविशेषत्वात्तुल्यबलत्वम्। यथैव हि राजसूयचोदना संनिहितानालोच्य प्रवर्तते तथैवान्नाद्यकामचोदनाऽपि, न हि तत्रावेष्टिः केनचिदपि शब्देनोपात्ता। न च राजसूयेनेति सामान्यशब्दः पौर्णमासीशब्दवत्। प्रकृतसमुदायविशिष्टसमुदायिवचनत्वात्। अत एव तत्कृतमपि न दौर्बल्यं लभते। इयांस्तु विशेषः। एकेन बहवो गृह्यन्ते, अन्येनाल्पे। न च तावता कश्चिदतिशयोऽस्ति। ननु चैतयेति श्रुत्यैव प्रत्यक्षवचनादस्ति विशेषः। स्याद्विशेषो यद्येतच्छब्दः फलेन संबध्यते। यदि वा 'अथैष ज्योतिः' इत्यादिवत्प्रस्तूयमानं ब्रूयात्। प्रत्यसंनिकर्षात्तत्रापि यजिशब्दगृहीतैवावेष्टिरन्नाद्येन संबध्येत। एतावच्च राजसूययजावप्यस्तीत्यविशेषः प्रकृतमपि च ब्रुवन्नेतच्छब्द आग्नेयादिवाक्यालोचनादृते नैव ब्रवीतीति। ततश्च राजसूययजिरपि तावता यत्नेन शक्नोति ग्रहीतुमिति तुल्यबलत्वम्। नन्ववान्तराधिकारस्यास्ति विशेषः। उच्यते। अयमेव विशेषो यदेकत्र बहूनां ग्रहणमपरत्र चाल्पानाम्। ग्रहणवेला तु तुल्यैव। यदि चैकान्तिकमत्राकर्मान्तरत्वं स्यात्तत एवमुच्येत। कर्मान्तरमपि चैतदिति दर्शितम्। ततश्च विषयान्तरत्वादेव स्वाराज्यान्नाद्ययोरविरोधः। कर्मान्तरत्वेऽपि च बार्हस्पत्यादिलिङ्गदर्शनात्प्रकृतावेष्टिप्रकृतित्वमेव प्रतिपत्तव्यम्। राजन्यस्यापि तुल्यप्रवृत्तेः फलपदानुषङ्गाच्च ब्राह्मणवैश्यवदेव कर्मान्तरेण प्रयोगान्तरेण वा संबन्धः। एवं च तस्यापि मध्येनिधानवाक्यं तन्त्रप्रयोगे 588
सत्युपपत्स्यते॥ राजसूयमध्यस्थायां तु दक्षिणाभेदात्प्रतीष्टि प्रयोगान्यत्वे मध्येनिधानविधिरवरुध्येत। तस्मात्प्रापकाण्येतानि श्रवणानीति सिद्धम्॥ ३॥
§ 4445

इति अवेष्ट्यधिकरणम्॥ २॥

## ०.०.६० विशिष्टाधानविधेयत्वाधिकरणम्

‘वसन्ते ब्राह्मणोऽग्नीनादधीत’ इत्यादिषु प्राप्त्यप्राप्त्याशङ्कायां पूर्ववदेव संदेहः। तत्र यदि कथंचिदपि प्राप्तिरस्ति ततो विनाऽपि यदिशब्दान्निमित्तार्थत्वं, तदा च ब्राह्मणवसन्तादिसंबन्धः परस्परनियमात्मकं फलं भविष्यति। अथ त्वप्राप्तिस्ततः प्रापकाणि ब्राह्मणवसन्तादिविशिष्टस्याऽऽधानस्य, तदा च पूर्वत्र पूर्वत्रोत्पत्तिवाक्यशिष्टगुणावरोधादुत्तर उत्तरो गुणः कर्मान्तरं कल्पयतीति त्रीण्याधानानि भविष्यन्ति। स्वार्था एव वाऽग्नय आत्मनेपदनिर्देशाद्विज्ञास्यन्ते। शूद्रस्य चाप्राप्तिः। निमित्तार्थपक्षे तु सर्वं विपरीतमेव। एतेन ‘वसन्ते ब्राह्मणमुपनयेत्’ इत्येवमादीन्यपि तुल्यहेतुत्वाद्विचारितानि द्रष्टव्यानि। तत्रैतावान्संक्षेपार्थः। § 4447

सामर्थ्याक्षिप्तमाधानं सामान्यवचनेन वा।
तस्माद्वर्णविशेषाणां निमित्तार्था पुनः श्रुतिः॥§ 4449

एकस्तावत्पूर्वपक्षहेतुरग्निहोत्रादिचोदनाभिरेवाऽऽधाननिष्पाद्याहवनीयादिसाधनत्वाद्विनाऽनुपपद्यमानाभिः प्रापितत्वाद्ब्राह्मणादीनांमाधानं निमित्तार्थं श्रूयत
589 इति। यदि तु प्रत्यक्षवचने सति सामर्थ्यमप्रापकमिति कल्प्यते ततोऽस्माद्गुणापहृतशक्तिकाद्विधेरनपहृतशक्तिरपरो निर्गुणो विधिरस्ति ‘य एवं विद्वानग्निमाधत्ते’ इति। तेन प्राप्तेरप्रापकत्वमिति। सिद्धान्तहेतुस्तु। § 4450

प्रत्यक्षविधिसद्भावाल्लभ्यते नाऽऽनुमानिकः।
प्रापकत्वमतो नार्थवर्तमानापदेशयोः॥§ 4452

न तावन्नित्यमर्थस्य प्रापकमस्ति। उपायान्तरेणापि प्रतिग्रहादिना पुरुषान्तराहितानामात्मनेपदेनानियतानां सुलभत्वात्। प्रत्यक्षवचने सति अन्यथानुपपत्तिपक्षे सति, अर्थापत्तिलभ्यश्रुत्यपरिग्रहाच्च। ‘य एवं विद्वान्’ इत्यपि वर्तमानापदेशः प्रत्यक्षायां लिङि ब्राह्मणादिवाक्येषूपलभ्यमानायां न विधिशक्तिं लभते। अस्ति चैतदुपन्यासस्य प्रत्यक्षविधियुक्तोदकोपसर्जनादिसंभारविधानार्थत्वमित्यप्राप्तमेव ब्राह्मणादिविशिष्टमाधानं विधीयत इति। **किं निमित्तसारूप्यमिति**—यदिशब्दाद्यनुपब-

---

९ त्रैतावान्संक्षेपार्थः] संक्षेपेणाधिकरणार्थ इत्यर्थः।

११ स्य] अर्थस्येति—अर्थापत्तेरित्यर्थः।

२४ नादिसंभा] संभारविधानार्थत्वमिति—संभारविधिशेषतया तत्स्तावकत्वेनार्थवत्त्वान्नाऽऽनर्थक्यभिया विद्वद्वाक्यस्याऽऽधानप्रापकत्वं वक्तव्यमित्याशयः। कथं स्तुतिरिति चेत्। ‘एवं संपन्नं भ्रातृव्यमवर्ति सह कुरुते’ इत्यर्थवादसहितं ‘य एवं विद्वानग्निमाधत्ते’ इति वाक्यं ‘अप उपसृजति’ इत्यादिविशेषविहितानामुदकादिसंभाराणां ‘अथ संभारान्संभरति’ इति यत्सामान्यतः स्थापनविधिस्तस्य शेषः। यो विद्वानेवमुदकादिस्थापनपूर्वमग्निमाधत्ते स स्थापनरूपाङ्गसामर्थ्यात्सहायसंपन्नमपि वैरिणं वर्तनरहितं कुरुत इत्येवं स्थापनप्रशंसा ज्ञेया।

न्धाभिप्रायम्। **ब्राह्मणादीनां वसन्तादिविधिभिः समुच्चारणमिति**—परपद-
संबन्धसंचारितायां विधिशक्तौ निमित्तफलत्वात्। **ननु ब्राह्मणादीनामाद-
धातिनाऽपीति**—अप्राप्तौ विशिष्टविधानोपपत्त्यभिप्रायम्। इतरस्तु प्राप्तत्वेन
विधेयत्वं निवर्तयति—**न त्वमीषामाधानसंबन्धो न विदित** इति। **केन प्राप्तो
विदित** इति—प्रापकाक्षेपः। इतरस्तु निराकरणमपश्यन्बलीयांसं च प्रत्य-
क्षविधिं किमर्थं प्रथममेवोपन्यस्यामीति मत्वा **कामश्रुतिभिरि**त्याह। **काः
कामश्रुतय** इति—सक्रोधं प्रापणशक्तावाक्षिप्तायां स्वरूपमेवैष न जाना-
तीति मन्यमानो दर्शयति—अग्निहोत्रादिफलविधय इति। कथमन्यपराभिः 590
सतीभिस्तत्प्रापितमित्याशङ्क्यार्थापत्तिं दर्शयति। तेन 'कर्मजे कर्म यूपवत्'
इति आहवनीयादिग्राहिभिः कर्मभिरनन्योपायत्वाद्गृहीतमाधानमिति। *सर्व-
प्रकारसंभवे च विशिष्टविधिर्भवतीति संभवापेक्षया वाक्यभेदमाह। एवं प्राप्ते
ब्रूमः। आधानेऽपि पूर्ववदेव प्रापकाणि श्रवणानि। कथम्। असर्वशेषत्वात्।
यदि हि सर्वकर्मणां शेषभूतमाधानं भवेत्ततस्तैराक्षिप्येत वा न वा। तेषां
तु 'रूपं वाऽशेषभूतत्वात्' इत्यनेनैव न्यायेनाऽऽहवनीयादिग्रहणमात्रपर्यव-
सानान्न कश्चिदप्याधानाङ्गत्वप्रतिपादने हेतुरस्ति। यत्तु 'सेर्वार्थं वा' इति वक्ष्य-
ति तत्सर्वकर्मार्थाग्न्यर्थत्वादिति व्याख्यास्यते। **किमतो यद्येवमिति**—अङ्गाङ्ग-
मप्यन्यथानुपपत्त्या शक्यमाक्षेप्तुमिति मन्यते। सिद्धान्तवादी त्वन्यथानुपप-
द्यमानत्वादग्नयः कामश्रुतिभिः प्राप्नुवन्ति नाऽऽधानमित्याह। **नन्वाधानम- 591
ग्नीनामभ्युपाय** इति। तत्र नाम रूपमात्रं गृह्यते यल्लौकिकोपायसाध्यं भ-
वति वस्त्रशकटादि। न चाऽऽहवनीयादयो लौकिकोपायास्तस्मादवश्यमेषां
वेदेनैवोपायोऽप्याक्षेप्तव्यः। स तु नाऽऽधानव्यतिरिक्तोऽस्तीति तदप्याक्षिप्त-
मिति। उच्यते। न। अनैकान्तिकत्वात्। अग्नीनां हि याच्ञाक्रयापहाराद-
योऽभ्युपायाः सन्ति। सर्वैश्च तैराहवनीयादिमात्रप्रार्थिन्यः कामश्रुतयो निरा-
काङ्क्षाः क्रियन्ते। तस्मान्नैकान्तेनाऽऽधानं प्राप्तमित्यस्ति नियमविधेरवकाशः।
तत्रैतत्स्यात्। नैवोपायान्तरोपात्तानामाहवनीयादित्वं संभवति संस्कारनिमित्त-
त्वादिति। तत्रोच्यते। § 4453

सत्यं प्रथममाधानादुत्पद्यन्तेऽग्नयस्त्वयः।
पश्चात्तु व्रीहिवत्तेषां नोपायान्तरवारणम्॥§ 4455

यथैव हि व्रीह्यादीनां न तावत्कृषिमन्तरेणोत्पत्तिः। अथ च न सर्वपुरुषैस्तथैवाऽऽप्यन्ते। क्रयादिभिरपि लभ्यमानत्वात्। एवं तावत्प्रथममेक आधानेनोत्पादयिष्यन्ति। अपरे तु तस्मादुपायान्तरेण प्राप्स्यन्ति। ततश्च यथा

---

९ तेन] ( अ° ७ पा° ३अ° ९ सू° २८ )।

१० *] अपिचेति भाष्यं वसन्तादिवाक्ये विशिष्टविधाने वाक्यभेदाप्रसक्तेरयुक्तमाशङ्क्य विशिष्टविधानप्रयुक्तगौरवाभिप्रायेण वाक्यभेदोक्तिरित्येवं व्याचष्टे सर्वप्रकारेत्यादिना।

१४ तु] ( अ° ७ पा° ३ सू° २९ )।

१५ त्तु] ( अ° ३ पा° ६ अ° ५ सू° १५ )।

घटादीन् कुम्भकार उत्पाद्योत्पाद्य विक्रीणाति ददाति च तथैवैकः क-
श्चित्पुनः पुनरग्नीनाधायापरेभ्यो दद्यात्। अतः प्रतिपुरुषमाधानं पक्षे प्रा-
प्तं पक्षे नेत्यस्ति विधानस्य विषयः। पक्षेऽपि वा नैव प्राप्तिरस्तीति व-
क्ष्यामः। प्रत्यक्षविधिपक्षे पुनरुपायान्तराणि निवर्तन्ते। तदा ह्यादधीतेत्यात्म-
नेपदेनाऽऽधातृगाम्येवाऽऽधानफलमिति गम्यते। तस्य च फलमाहवनीयादि
तदकर्तुर्न भवतीति तं प्रत्यनाहवनीयत्वमेव स्यात्। अर्थाक्षेपपक्षे त्वानुमा-
निक्याः श्रुतेरात्मनेपदपरस्मैपदविवेकाभावादकर्तृविषयेऽप्यविरोधादुपायान्त-
592 राणि न निवर्तेरन्। अतोऽवश्यमेव विधेयमेतदिति। **अपि च स-
तीष्वेवाऽऽधानश्रुतिष्विति** पाक्षिकीमपि प्राप्तिं निराकरोति। पूर्वमेव हि व्या-
ख्यातं नियमादीनामप्राप्तविधित्वं श्रुतसंभावनायामश्रुतकल्पनानवसरात्। स-
न्ति चाऽऽधानस्य प्रत्यक्षा श्रुतय इति नान्याः कल्पयितुं लभ्यन्ते। य-
दि ह्येता न स्युस्तत्राऽऽधानादृतेऽग्निहोत्रादीनामशक्यानुष्ठानत्वाद्विधयोऽनर्थ-
का भवन्तीति स्वसिद्ध्यर्थमाधानश्रुतिं परिगृह्णीयुः। सतीषु त्वश्रुतकल्पनाभ-
यादेषामेताभिः प्रापितं तेषामेव कामश्रुतयः प्रयोजिका इति न कल्पयन्ति।
सर्वपूर्वोक्तदोषपरिहारेणेदानीं प्रत्यवतिष्ठते। प्रत्यक्षमन्यद्विधायकमस्त्याधान-
स्य वचनम्। यस्मिन्सति निमित्तार्थानीतराणीति 'य एवं विद्वानग्निमाधत्ते'
इति। तत्र प्रतिविधत्ते **संभारविधानार्था पुनः श्रुतिरेषेति**। परः पुनः प्रकरणेन
संभारसंबन्धं मन्वानः पृथग्वाक्यत्वमापाद्यैतदेवोत्पत्तिवाक्यमित्याह। न ह्युद-
कोपसर्जनादीनामाधानेनैकवाक्यता संभवति। भवेदत्रार्थभेदे नानावाक्यत्वं
593 यद्याधानं विधीयेत। तद्ब्राह्मणादिसंयुक्तैर्विहितमिति गुणार्थमेवेह पुनः श्रूयते।
कुतो नु खलु निर्णयः कतरदनयोरुत्पत्तिवाक्यमिति। तदुच्यते। § 4456

ब्राह्मणत्वादिसंयुक्ते प्रत्यक्षः श्रूयते विधिः।
इतरत्रार्थवादेन कल्पनीयो बलादसौ॥ § 4458

यदि ह्येते द्वे अपि वाक्ये विधातृणी स्यातां ततः समानविषये सती
स्पर्धेयातां कतरद्विधत्तामिति। अत्र पुनरेकं विधायकमेकं स्तावकम्। न च
स्तावकेन ब्राह्मणादिसंयुक्तस्य विधायकत्वं निवार्यते तदानुगुण्यात्। यदि तु
'य एवं विद्वान्' इत्यपि विधिसरूपं स्यात्ततो विहितस्य पुनर्विधानानुपप-
त्तेरस्मत्पक्षं निरुन्ध्यात्। लिङा तु विहितस्य संबन्धिसंभारविधिप्ररोचनार्थं तु
स्तुतिसहितस्य पुनः श्रवणमित्यविधायकम्। लिङा च तावद्धात्वर्थविधानं स्व-
पदेनोपात्तत्वाच्छ्रौतम्। प्राशस्त्यं पुनर्वाक्येन, ततश्चाऽऽनुमानिको विधिरिति
विप्रकृष्यते। **नन्विदमपि वाक्यमिति**—ब्राह्मणादिपदार्थापरित्यागाभिप्रायम्।
594 सिद्धान्तवादी वदति, आधानं तावच्छ्रुत्या, शेषं वाक्येन नाम भवतु, स्व-
पदोपात्तायाः स्तुतेरभावात्। 'एवं द्विषन्तं भ्रातृव्यमवर्ति सहते' इत्यादिपद-

---

२० मेवेह] गुणार्थमेवेति—स्तुतिवाचिना गुणशब्देन 'अपामुपसर्जनं तु विधीयते' इति भाष्यस्थो विदधातिः स्तुतिपरो व्याख्यातः।

संबन्धेनैव स्तुतिरिति वाक्यम्। *कर्तृकालविशिष्टप्रधानाधानविधानाच्च वाक्यभेदपरिहारात्सिद्धं प्रापकत्वम्॥ ४॥ § 4459

इति विशिष्टाधानविधेयत्वाधिकरणम्॥ ३॥

## ०.०.६१ दाक्षायणयज्ञाधिकरणम्

युक्तं दध्नेन्द्रियकामस्येति गुणात्फलम्। न हि तत्र दध्यादीनां होमसामानाधिकरण्यं येन संज्ञालक्षणो भेदः स्यात्। दाक्षायणयज्ञादीनां तु यागसामानाधिकरण्यात्पूर्वयागे चाप्रयुक्तत्वादात्मरूपावच्छिन्नयागान्तरप्रतिपादनमविरुद्धम्। न च कश्चिद्दध्यादिभिस्तुल्य एवंसंज्ञो गुणः प्रसिद्धः। त- 595
स्माद्भावार्थाधिकरणन्यायेन फले यागविधानाद्यागान्तरम्॥ ५॥ § 4461

विधिशक्तिः क्रियातो नोत्तारितेत्यभिप्रायः॥ ६॥ § 4462

फलस्यानुपादेयत्वान्न 'व्रीहिभिर्यजते' इत्यादिवत्कर्मोद्देशेन विधिः संभवतीत्यवश्यं कर्म तत्र विधातव्यम्। ततश्च सिद्धो भेदः॥ ७॥ § 4463

सत्यपि फलं प्रति विधाने 'संनिधौ त्वविभागात्' इत्यनेनाकर्मान्तरता। दध्यादिवच्च गुणफलसंबन्धप्रत्ययात्प्रकृतयागबुद्धेः। यत्तु गुणो न प्रसिद्ध इति। नैष दोषः। उक्थ्यादिवत्प्रकरणलभ्यत्वात्। एवंविधा च वाक्यान्तरेण गुणरूपविधानादस्ति प्रसिद्धिः। दध्यादिवदेवात्रापि वैयधिकरण्येनैव संबन्धः। किं च। § 4464

अवस्थान्तररूपत्वाद्दध्यादेरविलक्षणाः।
प्रत्यासत्तेः प्रतीयन्ते सामानाधिकरण्यवत्॥ § 4466

---

१ *] अपि चोभाभ्यामिति पूर्वपक्षभाष्यं नन्वित्यादिना विशिष्टविधिगौरवाभिप्रायेणानूद्य नैष दोष इत्यादिना विशिष्टविध्यन्यथानुपपत्तिप्रसूतैर्विशेषणविधिभिरेव तेषां विधिसिद्धेः श्रौतविधिव्यापारनानात्वाभावात्परिहृतमपि पुनर्ब्राह्मणादिजातेः कालवदनुपादेयतया निमित्तत्वेनेष्टत्वात्कालनिमित्तयोर्द्वयोरुद्देश्यत्वापत्तेः प्रत्युद्देश्यं वाक्यपरिसमाप्तिलक्षणवाक्यभेदाशयेन यदुक्तमित्यादिना अनुभाष्य यदीमावित्यनेन जातेर्नित्यतया निमित्तत्वायोगात्कर्तृतयैवान्वयावगतेः कर्तुश्चानुद्देश्यत्वान्नोक्तरीत्या वाक्यभेद इत्येवं परिहृतम्। तदेतत्सर्वं संक्षिप्य व्याचष्टे कर्तृकालेत्यादिना। भाष्ये गुणत्वोक्तिस्तु निमित्ताभावेऽनुष्ठितस्यापि कर्मणो नैष्फल्यापत्तेस्तस्यापि क्रियोपकारित्वादङ्गत्वोपपत्तिरिति न विरुध्यत इति ज्ञेयम्।

१ क्रियातो] नोत्तारितेति-दाक्षायणयज्ञपदे लोकप्रसिद्ध्यभावेऽपि वैदिकप्रसिद्ध्याऽऽवृत्त्यादिगुणोपादानेऽपि भावार्थाधिकरणन्यायेन धात्वर्थस्यैव फलसाधनत्वमिति न गुणफलोपबन्ध इत्यर्थः।

१ विधाने] ( अ° २ पा° ३ अ° १३ सू° २६ )।

३ च] वाक्यान्तरेणेति-द्वे पौर्णमास्यौ यजेत द्वे अमावास्ये, सह कुम्भीभिरभिक्रामेत्, इत्यादिप्राकरणिकवाक्यान्तरेणेत्यर्थः।

तस्माद्दर्शपूर्णमासयोरेवावस्थान्तररूपाद्धिकारात्फलं न कर्मान्तरात्। एवं
च प्रकरणविच्छेदो नात्यन्तं कृतो भविष्यति। यद्यपि फलवतः कथंभावेनाग्र-
596 हणादेतद्विषयेऽस्त्येव प्रककरणबाधस्तथाऽप्याश्रयत्वेन संबन्धादुत्तराणि च वा-
क्यानि प्रत्यनुषङ्गसिद्धेरनुग्रह इत्युच्यते॥ ८॥ § 4467

त्रिंशत्संपत्पूरणं पौर्णमास्यमावास्यासंकीर्तनं वा भेदं बोधयति। न हि
दार्शपूर्णमासिकस्त्रिंशद्वर्षपक्षः कर्मान्तरेण पूरयितुं शक्यते। न च नियम-
स्यातिदेशः। येन कर्मान्तरस्यैवैतत्पञ्चदशवर्षपक्षविधानं स्यात्। न च दाक्षाय-
णयाजित्वेन निमित्तेन दर्शपूर्णमासयोरेव पञ्चदशवर्षपक्ष उपजायते। संब-
न्धाभावात्। द्वे हि पौर्णमास्यौ द्वे अमावास्ये इति चास्यानुपपत्तिः॥ ९॥
§ 4468

उत्पत्तिसंयोगे पूर्वासंबन्धे च संज्ञा भेत्त्री भवति। न चेयमुत्पत्तिसंयुक्ता
‘अथैव ज्योतिः’ इत्यादेरिव प्रक्रमाभावात्। संभवति च पूर्वकर्माश्रितगुण-
वाचित्वेनैवेति न भिनत्ति। दाक्षायणयज्ञे हि वाक्यान्तरवशादवयवप्रसिद्धेश्चाभ्य-
स्तत्वमभिधीयते। तेन च प्रकरणाद्दर्शपूर्णमासाश्रितेनैव फलं साध्यते। दक्ष
इति चोत्साही शीघ्रकारी यजमानः, तदीया ऋत्विजो दाक्षाः। स्तेषामय-
तं—प्रयोगो यज्ञाश्रितत्वाद्दाक्षायण इत्युच्यते। साकंप्रस्थायीयेऽपि सांनाय्य-
मनवदाय कुम्भीभ्यामेव साकं प्रस्थीयत इत्येवमभिधीयते। तस्मान्न प्रकृत-
प्रत्यभिज्ञानबाधः॥ १०॥ § 4469

597 यद्यपि कर्मोद्देशेन न फलं विधीयते तथाऽपि कर्मफलसंबन्धाभावाद-
कर्मान्तरता। यथैव हि कर्मणः फलमिति भावार्थाधिकरणे साधितं तथैव
‘अतुल्यत्वात्तु वाक्ययोः’ इत्यत्र गुणफलसंबन्धपर्यवसायित्वमप्युक्तमिति संदेहे
सति पदान्तरानुग्रहार्थं गुणादेव फलं न कर्मण इति सिद्धम्॥ ११॥ § 4470

इति दाक्षायणयज्ञाधिकरणम्॥ ४॥

## ०.०.६२ द्रव्यदेवतासंयोगे यागविधायकत्वाधिकरणम्

न कस्यचिदपि कर्मणः प्रकरणे श्रूयते ‘श्वेतमालभेत’ ‘चरुं निर्वपेत्’
इति। तत्र संदेहः। किमनारभ्यवादानां प्रकृत्यर्थत्वात्प्राकृतयोरेवाऽऽलम्भ-
निर्वापयोः श्वेतचरू गुणौ विधीयेते, किं वा कर्मान्तरे यावच्छ्रुते, उत
यजिमती वेति। तत्रानारभ्याधीतत्वोपन्यासः संशयबीजापौनरुक्त्यप्रथमपक्ष-
परिग्रहतन्निराकरणार्थः। कथम्। यदि तावदालम्भनिर्वापौ प्रकृत्य श्रूयेयातां
598 ततः प्रकृतप्रत्ययानुवृत्तिरेव प्रसज्येतेति कर्मान्तराशङ्का न स्यात्। अनार-

२ च] नियमस्येति—निमित्तस्येत्यर्थः।
२ णे] ( अ॰ २ पा॰ १ अ १ )।
३ थेव] ( अ॰ २ पा॰ २ अ॰ ११ सू॰ २६ )।

भ्यवादे तु सति श्वेतादिगुणस्योपादेयत्वात्कदाचिद्दूरस्थानुवादेन गुणो विधीयते कदाचिद्वा विपरिवृत्त्यभावात्कर्मान्तरमिति जायते संदेहः। तथा 'द्रव्यसंयोगाच्चोदना पशुसोमयोः' इत्यनेन गतप्रायमिवात्र यजिमत्कर्मविधानं लक्ष्यते। तत्तु प्रकृतयागाभावादनुवादशङ्कायामसत्यां श्वेतादेश्च गुणस्यौत्पत्तिकद्रव्यसंयुक्तेऽपि कर्मणि विधानोपपत्तेः कथं स्यादिति पुनरुपन्यस्यते। पूर्वपक्षश्चान्ययोरालम्भनिर्वापयोरप्रकरणादवश्यं प्रकृतावेव ग्रहीतव्यावित्येवं प्रवर्तते। तन्निराकरणमपि च प्रकरणाभावादसाधारणोपलक्षणाभावाच्च न प्राकृतयोर्लौकिकव्यावृत्तरूपयोः प्रतीतिरस्तीत्येवं भविष्यति। गुणविधिविषयत्वाच्चाऽऽलम्भनिर्वापौ गुणविधिशब्देनोक्तौ। किं तावत्प्राप्तम्। यथैवायनेषु गुणसंबन्धपरे वाक्ये कर्मविधिशब्दाभावादकर्मान्तरत्वं तथेहापि भविष्यतीति चशब्देनान्वादिश्यते। क्व चासौ गुणविधिरिति विषयावधारणार्थमप्रकरणग्रहणम्। अथ वा यद्यप्येतावता पूर्ववैलक्षण्येनाप्रकरणे श्रूयते तथाऽपि कर्मणो विधिशब्दानवरोधाद्गुणार्थैव पुनः श्रुतिरिति। दर्शपूर्णमासयोः शकटेषा सा श्वेतीकृत्याऽऽलब्धव्या, निर्वापश्च चरौ कर्तव्यश्चरुपरिमितो वा। भूतिब्रह्मवर्चसकामयोश्च सर्वेभ्यो दर्शपूर्णमासावित्येवं प्राप्तयोरनुवादः। तथा वायव्यमिति सर्ववनस्पतीनां वायुदेवतात्वात्कथंचिदीषाया एवानुवादः। सौर्यमिति चाऽऽग्नेयस्यैव तेजोदेवत्यसामान्यादनुवादः। तस्माद्गुणो विधीयत इति॥ १२॥ § 4472

यदि ह्यालम्भनिर्वापौ विधेयत्वं न मृष्यतः। 599
ततो गुणविधित्वं स्याद्विधेयौ त्वत्र तौ मतौ॥ § 4474

वायव्यपदं पूर्ववदेवोपेक्ष्य फलपदपरिग्रहेण तावत्प्रत्यवस्थीयते। यदि ह्यालम्भनिर्वापावनूद्य श्वेतचरू विधीयेते ततः फलपदमनर्थकमेव स्यात्। सर्वकामप्राप्तानुवादेऽपि पाक्षिकत्वान्नित्यवद्ग्रहणं विरुध्येत। विशेषणत्वे वाक्यभेदः स्यात्। अथ गुणफलसंबन्धो विधीयते तथाऽप्यालम्भादेः प्रकृतस्याऽऽश्रयस्याभावाद्वाक्येनैव तत्संबन्धकरणे वाक्यं भिद्येत। गुणविशिष्टालम्भविधाने तु न कश्चिद्दोषः। तेनोच्यते कर्मणः श्रुतिमूलत्वादिति। कर्मात्र विधेयत्वेन श्रुतिमूलं न गुणः। स ह्यचोदनालक्षण एव स्यात्। अथ वा यावदुक्तमेव स्यान्न यजिमत्। कुतः। कर्मणः श्रुतिमूलत्वात्। न ह्यचोदितो यज्यर्थोऽध्यवसातुं शक्यते। न च तेन विनेह किंचिन्न सिध्यति। आलम्भनिर्वापयोरेव फलवत्त्वेन प्राधान्योपपत्तेः। न हि यदेकत्र गुणभूतं दृष्टं तेनान्यत्र प्राधान्यं वाचनिकमपि न प्रतिपत्तव्यमिति किंचित्प्रमाणम्। यथावचनं हि गुणप्रधानभावौ न स्वाभाविकौ। वायव्यादिशब्दश्चात्र सर्वत्र द्रव्याणां

२ था] ( अ० २ पा. २ अ. ६ सू. १७ )।

९ ब्देनोक्तौ] उक्ताविति। अनेन चैवं भाष्यं व्याख्यातं भवति। आलम्भविषयो निर्वापविषयश्च यो गुणविधिः स दार्शपूर्णमासिकालम्भनिर्वापविषय इति।

यथाकथंचिद्देवतासंबन्धोपपत्तेरनुवादः। अथवा यत्केनचिद्वाय्वादिभ्यः संक-
ल्पितं तदालम्भादिभिर्योज्यमानमभ्युदयकारि भवति। विशिष्टविधानाच्च न
तत्परिग्रहेऽप्यतिभारः। अथवा वायुसूर्याविवोद्दिश्य स्पृष्टं निरुप्तं वेत्येताव-
तैवेप्सितावाप्तिर्भविष्यति। न चावश्यं याग एव देवतोद्देष्टव्या। यत्र यत्र हि
चोद्यते तत्र तत्रोद्दिश्यमाना न विरुध्यते। तस्माद्यत्किंचिच्छ्वेतं वायूद्देशेन स्प्र-
ष्टव्यमिति यावदुक्तचोदनानुमारात्। गुणविधिपक्षे फलपदसंबन्धे वाक्यभेदम-
भिधायेदानीं तत्परित्यागमभ्युपेत्यापि ब्रवीतीति। **अथवा योऽसौ विधायकः**
600 **शब्द** इत्यादि। तस्याभिप्रायो यदिदमनारभ्यवादानां प्रकृत्यर्थत्वमभिधास्य-
ते नैतद्वाचनिकं, कथं तर्हि, द्वारान्यथानुपपत्तिकारितम्। न चाऽऽलम्भ-
निर्वापावन्यत्रानुपपन्नौ। लोकेऽपि विद्यमानत्वादिति। तत्र यदि तावल्लौकिक-
व्यावृत्त्यर्थं विहितत्वेन विशेष्यते ततोऽन्यविशेषणाभावाल्लिङ्गेव विशेष्टव्यौ य
आलम्भः कर्तव्यतया चोदित इति। तावता चोपक्षीणशक्तौ विधायके गुण-
विधानं नोपपद्यते। न ह्यसौ विधातुं लक्षयितुं च सकृदुच्चरितः समर्थः।
केवलधात्वर्थानुवादे च लोकेऽपि गुणविधित्वप्रसङ्गः। तत्र च निष्फलत्वादान-
र्थक्यं, न चैतावन्मात्रेणैव विनैव प्रकरणादिभिर्वैदिकालम्भनिर्वापग्रहणमुपप-
द्यते। तस्मात्प्राकृतप्रमाणाभावादपूर्वयोर्विधानमिति॥ १३॥ § 4475

यथा फलपदं प्रेक्ष्य गुणपक्षो निराकृतः।
देवतापदमालोक्य तथैवाऽऽलम्भमात्रता॥§ 4477

विधिस्तावदुत्तरोत्तरपदानुरोधेन द्रव्यदेवतापदसंबन्धसंक्रान्तः। स चान्य-
थानुपपत्तेराक्षिप्तयजिक्रियः सन्विधीयते। न ह्येनमन्या क्रिया संपादयितुं स-
601 मर्था। यदि देवतोद्देशेनापरित्यजन्नेव द्रव्यमालभेत न तद्वायव्यं कृतं स्यात्।
न च प्रसिद्धवायुदेवत्यमेवं स्प्रष्टव्यमित्यवगम्येत। अनुष्ठानसंपाद्यत्वाद्देवतात्व-
स्य। तेनावश्यं वायुमुद्दिश्य श्वेतगुणकं द्रव्यं दातव्यमतश्च यजिविधानमेतदिति
निश्चीयते। तथा च लक्षणं करिष्यति 'यजतिचोदना द्रव्यदेवताक्रियं समुदाये
कृतार्थत्वात्' इति। ततश्चाऽऽलम्भनिर्वापौ चोदकप्राप्तावेवानुवदिष्येते। त-
त्राऽऽलम्भविशिष्टत्वादिति गौरवोपन्यासः फल्गुरेव कथं चिदभ्युपेत्यवादेनोप-
न्यस्त इति नातीवाऽऽदर्तव्यः॥ १४॥ § 4478

सोमारौद्रमित्युक्ते विनाऽपि यजतिशब्देन परिश्रयणविधिपरे वाक्ये य-
602 जतिनाऽनूद्यमाने यजतिमत्कर्मविधायित्वमेवमादीनामित्यवगम्यते। अग्नीषो-
मीयेऽपि चानेनैव यजिमत्त्वसिद्धिः। पूर्वं चैतावदेव विचारितं किं प्र-
कृतानुवादित्वमुत विधायकत्वमिति। सिद्धे तु विधायकत्वे किमात्मकं त-
त्कर्मेत्येतदधिकरणाधीनमेवैतदित्यपौनरुक्त्यम्॥ १५॥ § 4479

६ मिति] इतीति-इति वाक्यार्थो यावदुक्तचोदनानुसारादवसीयत इति शेषपूरणम्।

८ ति] ( अ° ४ पा° २ अ. १२ सू° २७ )।

इति द्रव्यदेवतासंयोगे यागविधायकत्वाधिकरणम्॥ ५॥

## ०.०.६३ देवतासंयोगाभावे यागाविधायकत्वाधिकरणम्

सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ यच्च वार्तिके।
सूत्रं योनिरिहार्थानां सर्वं सूत्रे प्रतिष्ठितम्॥§ 4482

इति ये वदन्ति तान्प्रत्युच्यते। न किंचित्साधनमप्रदर्शितविषयं स्वार्थं साधयति। सूत्रकारेण चेह हेतुमात्रमुपात्तम्। न चार्थप्रकरणादिभिरप्युदाहरणप्रतिज्ञासंशयहेतूनामन्यतममुपलभ्यते। तस्मादगमके सूत्रे सति अवश्यं दोषप्रतिसमाधानार्थं वृत्तिकारादिभिर्यतितव्यम्। सत्येव संभवेऽध्याहारादिवर्जनमुक्तम्। सर्वथा शिष्यप्रज्ञासंस्कारे सूत्रकारादीनां प्रवर्तमानानां येनैव तदनुगुणं यत्कृतं तदेव ग्रहीतव्यं नासद्ग्रहः कर्तव्यः। इदं सूत्रकारेण नोपात्तमिदं वृत्तिकारेणैतत्प्रदर्शनार्थमेतद्वर्णयन्ति। तदिह भगवानुपवर्षः किलाग्निहोत्रे 603 धेनुदोहाधिकारे श्रुतमिदं वाक्यमुदाहृतवान् 'वत्समालभेत' इति। तत्र च पूर्ववदेव त्रेधा संशयमुपन्यस्तवान्। किं प्राकृत एवाऽऽलम्भे वत्सो विधीयते तथाऽऽलम्भमात्रमथवा यजतिमदेतत्कर्मेति। तत्र विशेषणाभावात्प्राकृतप्रत्ययो नास्तीति पूर्वाधिकरणसिद्धमेवेति नोपन्यस्तम्। तेनैवानुक्रमेण यजिमदभिधानबुद्धौ प्रसक्तायामपवादोऽयं क्रियते। तत्र भोक्तृसंयोगप्रत्युदाहरणत्वाद्गतप्रायोऽपि पूर्वपक्षः श्रोतृबुद्धिवैचित्र्यात्क्रियते। यो नाम तार्किकवासनया सामान्यतो दृष्टेन वेदार्थमुन्निनीषेत्तस्य तन्निवृत्तिरप्रदर्शिताशङ्का न शक्या कर्तुमिति प्रदर्श्यते। तत्र केषांचित्पूर्वाधिकरण एवाऽऽलभतिर्यजतिपर्यायत्वेन प्रसिद्धोऽन्येषां यज्यनुमापकत्वेन, तदुभयमत्रापि तथैव मन्यन्ते। तत्रापूर्वयागविधानं प्राप्ते वा वत्सविधानमिति पूर्वपक्षे द्वैतम्। सिद्धान्तस्तु द्रव्यदेवतासंबन्धान्यथानुपपत्त्या पूर्वमस्माभिर्यजिः कल्पितो नादृष्टपूर्वशक्त्यालभत्यभिधानेन, व्यभिचार्यनुमानाभासेन वा। न चेहासावस्तीति यावदुक्तता। तथा 604 च दोहनादिसंस्कारकर्मप्रायदर्शनमुपपद्यते। दृष्टार्थत्वं च गोप्रस्नवनहेतुत्वात्॥ १६॥ § 4483

'वत्सनिकान्ता हि' इति प्रस्नावनार्थं च वत्सोपचारस्पर्शनविधौ हेतुवन्निगदोऽर्थवाद उपपद्यते। मारणार्थत्वे त्वालभ्यमाने वत्सप्रियत्वं पशूनामुच्य-

---

७ म्] शास्त्रादौ भाष्यकारेणेति शेषः।
८ व्यः] कर्तव्य इति—युक्तिगम्येऽर्थे पुरुषविशेषस्यानादरणीयत्वाद्युक्तियुक्तं, यद्वृत्तिकारादिभिरुक्तं तत्सूत्रकारानुपात्तत्वान्न ग्राह्यमित्यसदाग्रहो न कर्तव्यइत्याशयः।
९ न्ति] वर्णयन्तीति—सूत्रकारानुक्तस्याप्यर्थस्य वृत्तिकाराद्युक्तस्य ग्राह्यत्वप्रदर्शनार्थमेतद्भाष्यमिति यदुक्तं तेदतत्पूर्वेऽपि व्याख्यातारो वर्णयन्तीत्यर्थः।
१२ त्र] लिङः प्राकृताग्नीषोमीयपश्वालम्भविशेषणत्वाभ्युपगमे विधायकाभावापत्तेरिति शेषः।

मानमसंबद्धमेव स्यात्। यस्मादसौ मातुः प्रियो वत्सस्तस्मात्संज्ञापनार्थमालब्धव्य इत्यसंबद्धमेव स्यात्। इतरत्र पुनर्वत्सप्रिया माता पुत्रे चाटुकरणात्तेन वा कृतचाटुना संयुज्यमाना स्नेहात्प्रस्नविष्यतीत्युपपद्यते। तस्मादपि प्रयोजनवत्संस्कारभूतालम्भमात्रविधानमेतदिति सिद्धम्॥ १७॥ § 4484

इति देवतासंयोगाभावे यागाविधायकत्वाधिकरणम्॥ ६॥

## ०.०.६४ चरोरुपधानार्थताधिकरणम्

पूर्वमालम्भस्य प्रत्युदाहरणमिदं तु चरुद्वारेण निर्वापस्य। देवताशङ्का चात्राभ्यन्तरेऽधिकेत्यारम्भः। तत्रौत्पत्तिकमेव चरुपुरोडाशादीनां यागाङ्गत्वम्। सर्वथा चैतस्याऽऽत्मीयत्वपरित्यागः कर्तव्यः। 'चरुमुपदधाति' इति च द्वितीयानिर्देशादुपधानं प्रतिपत्तिः। न चान्यत्रानुपयुक्तस्य प्रतिप-
605 त्तिर्युक्तेत्याकाङ्क्षिते योग्यत्वाद्यागोपयोगित्वमेव विज्ञायते। वाक्यशेषे च बृहस्पतिः श्रूयमाणो यदि विध्युद्देशेन न संबध्यते, आनर्थक्यमेव स्यात्। तस्मादाग्नेयप्रकृतिकं बार्हस्पत्यचरुयागं निर्वर्त्य शेषकार्यान्तराण्यकृत्वोपधातव्यश्चरुरित्येवं प्राप्तम्। एवं प्राप्ते ब्रूमः। § 4486

चर्वादीनां स्वभावेन नैदमर्थ्यमवस्थितम्।
यथाप्रमाणमेवैषां विनियोगोऽवगम्यते॥ § 4488

'नैवारश्चरुर्भवति' इति ह्युत्पन्नमात्रस्यैव प्रयोजनापेक्षायां सत्यां यागाङ्गभूताग्निधारणार्थस्थलनिर्वृत्तिशेषत्वेन प्रत्यक्षविधानं दृश्यते ' यदेनं चरुमुपदधाति ' इति। तथा निराकाङ्क्षस्य च चरोः श्रुतेनापि कार्यान्तरेण संबन्धो न स्यात्किमुताश्रुतेनैव यागेन। न चेयं प्रतिपत्तिरिति प्रथमं प्रयोजनवत्त्वानवगमात्। *अर्थकर्मण्यपि चोपधानं प्रति प्राधान्यमस्ति, तेनासंस्कृतस्थलं न निर्वर्तयतीति द्वितीयानिर्देशाविरोधः। § 4489

त्रेधा च देवतायोगश्चरोरस्याऽऽनुमानिकः।
नीवारस्थार्थवादस्थतद्धितादिविवर्जनात्॥ § 4491

---

३ रित्यागः] परित्याग इति-उत्पन्नस्य चरोर्विध्यानर्थक्यपरिहाराय स्वत्वत्यागः कर्तव्य इत्यर्थः।

१५ *] स्थण्डिलनिष्पत्यर्थस्योपधानकर्मणोऽर्थकर्मत्वेऽपि स्थण्डिलनिर्वर्तकत्वादुपधानं प्रति चरोः प्राधान्याद्द्वितीयोपपत्तिरित्याह—अर्थकर्मण्यपीति। वस्तुतस्तु-चरुसंस्कारकमेवोपधानम्। न चेयं प्रतिपत्तिः। प्रायणीयनिष्कासे उपयुक्तसंस्कारापेक्षयोपयोक्ष्यमाणसंस्कारबलीयस्त्वस्य स्थापितत्वात्। अतः संस्कारविध्यन्यथानुपपत्त्या 'अध्वर्युं वृणीते इतिवच्चरोः सामर्थ्याद्यागाङ्गभूताग्निधारणार्थस्थण्डिलनिष्पत्त्यर्थतया विनियोगकल्पनाद्द्वितीया सूपपन्नैवेति।

नीवारसंबद्धः सन् बृहस्पतिश्चरावनुमातव्यः। तथा वाक्यशेषस्थो
विध्युद्देशमनाकाङ्क्षितदेवतासंबन्धं नेतव्यः। तद्धितचतुर्थीमन्त्रवर्णादिभिश्च विना
कथमपि देवतात्वं कल्पनीयम्। यागाद्यनुमानक्लेशश्च स्थित एव। त-
स्मादुपधानार्थत्वमेव युक्तमिति। येषां च ‘बार्हस्पत्यो भवति’ इति चरुस- 606
मानाधिकरणेन तद्धितेन वाक्यशेषे देवताश्रयणं तेषामपि प्रथममुपधानार्थत्वे
विध्युद्देशात्सिद्धेऽनाकाङ्क्षितत्वाद्देवता विधातुमशक्येति वर्तमानापदेशानुरोधेन
यादृशं वयमस्य बार्हस्पत्यत्वं वर्तमानं पश्यामस्तादृशमेवैतत्प्रशंसार्थं कीर्तित-
मित्यवगमाद्य एव शाखान्तरीयस्य वचनस्य ‘बृहस्पतेर्वा एतदन्नम्’ इत्येत-
स्यार्थः स एव ‘बार्हस्पत्यो भवति’ इत्यस्यापि तैत्तिरीयवचनस्य निश्चीयते,
तस्मादेषोऽपि न यजिमद्वचन इति यावदुक्तत्वसिद्धिः॥ १८॥ § 4492

इति चरोरुपधानार्थताधिकरणम्॥ ७॥

## ०.०.६५ पात्नीवताधिकरणम्

एतेनैवाधिकारेणोत्सृजतिरपि यजिमदभिधानो न वेति विचार्यते। ‘त्वाष्ट्रं पात्नीवतमालभते’ इत्येवं यागं विधाय पुनराम्नायते ‘पर्यग्निकृतं पात्नीवतमुत्सृजन्ति’ इति। तत्र गुणविधिरुत कर्मान्तरमिति वचनव्यक्तिद्वयप्रतिभानेन संदेहे सति वायव्यश्वेतालम्भवदेव विधिशक्तेर्द्रव्यदेवतासंबन्धविषयत्वेन कर्मान्तरत्वम्। किं च। § 4494

न च त्वष्टुरभावेन प्रत्यभिज्ञायतेऽत्र सः।
पर्यग्निकृतयोगाच्च वाक्यभेदः प्रसज्यते॥ § 4496

यदि ह्यत्रापि पूर्ववदेवोभे विशेषणे श्रूयेयातां ततस्तदेव कर्मेति विज्ञायेत।
न त्वत्र महेन्द्रस्येवेन्द्रप्रगाथे कश्चिदपि प्रत्यभिज्ञानलेशोऽस्तीति देवतान्तर- 607
संयोगादपि वाजिनयागवद्भिद्यते। पात्नीवतोद्देशेन चोत्सृज्यमानार्थे विधीयमाने पर्यग्निकरणावस्थाविशेषणाद्वाक्यं भिद्येत। व्यवहितकल्पनया चोत्सृजतिः संबध्येत। प्राप्त एव च तस्योत्पत्तिवाक्येनोत्सर्ग इति व्यर्था पुनःश्रुतिर्भवेत्। न च पर्यग्निकरणविधानेनात्रार्थः। तस्याति देशेनैव प्राप्तत्वात्। न च केवलपात्नीवतताविधिर्वैकल्पिकः शक्य आश्रयितुम्। उत्पत्तिवाक्यशिष्टत्वविरोधात्। न च प्राकृतक्लृप्तोपकारकेवलपर्यग्निकरणपुनःश्रुत्या गृहमेधीयवदपूर्वता शक्या दर्शयितुम्। सिद्धवदुपसर्जनीभूतपर्यग्निकरणनिर्देशात्। न च

४ येषां] येषां चेति—अनेन च भाष्ये बार्हस्पत्या नीवारा इत्येवंविधवाक्यशेषग्रहणं, बार्हस्पत्यो भवतीति तैत्तिरीयवाक्यस्यापि शाखान्तरीयवाक्यसमानार्थकतया प्रशंसार्थत्वमेवे त्येवंविधतात्पर्येणेत्युक्तं भवति।

९ एव] तै॰ स॰ ( ५-६-२ )।

पर्यग्निकरणशब्दस्तदन्ताया अङ्गरीतेर्वाचकः। येन तन्मात्रग्रहणाश्रयणादुत्तर-कर्मावच्छेदो विज्ञायते। न चासौ कालस्य वक्ता, येन पर्यग्निकरणकाल एवोत्सृजतीति कल्प्येत। न च लक्षणाश्रयणहेतुरस्ति। श्रुत्याऽपि वाक्यसमवायोपपत्तेः। सर्वाङ्गेषु चोदकप्राप्तेषु वचनान्तरेणानिषिद्धेषु पर्यग्निकरणवेलायां समस्तेष्वनुष्ठीयमानेषु सत्सु नैव ज्ञायते किं क्रियतामिति। सर्वकरणे काललोपात्तत्कालकरणे चाङ्गान्तरलोपात्। एतेनावस्थाविधिः प्रत्युक्तः। चोदकेनैव तावत्, पर्यग्निकरणावस्थ उत्सृज्यत इति प्रापितम्। अथोत्तरावस्थापरिसंख्योच्यते। तत्र त्रिदोषत्वमुक्तमेव। तस्मान्न पूर्वकर्मणि किंचिद्विधेयमस्य वाक्यस्येति कर्मान्तरमेव द्रव्यदेवतासंयुक्तं, देवतागुणसामान्येन च पूर्वप्रकृतिकमग्नीषोमीयप्रकृतिकमेव वा विधीयत इति प्राप्तेऽभिधीयते। § 4497

प्रकृतप्रत्यभिज्ञानान्न यागोऽन्योऽवगम्यते।
पर्यग्निकरणात्तस्मिन्नङ्गरीतिर्विधीयते॥§ 4499

पात्नीवतशब्दस्तावन्मनोतायामिवाग्निशब्दः सत्यप्युभयविशिष्टत्वे शक्नोति प्रकृतं यागं वक्तुं ‘पर्यग्निकृतमुत्सृजति’ इति प्रकरणात्तस्यैव गुणविधिर्विज्ञायते। ननु च सर्वे गुणविधिप्रकारा निराकृताः। सत्यं शेषा
608 निराकृताः। पर्यग्निकरणान्ताङ्गरीतिपक्षस्तु न निराक्रियते। यद्यप्येष शब्द इडान्तादिवत्तदन्तत्वं न ब्रवीति तथाऽपि गमयितुं शक्नोति। न हि निर्वृत्तपर्यग्निकरणता पूर्वाङ्गेष्वकृतेषु संभवति। तस्मात्तदुपादानादेवानुक्ताऽपि तदन्तताऽवगम्यते। कथंभावापेक्षी च त्वाष्ट्रप्रयोगवचनः प्रकृतौ दृष्टसामर्थ्यपर्यग्निकरणान्ताङ्गकलापस्यातिक्रमकारणाभावान्न प्रकृतिस्थानि सर्वाण्यङ्गान्यपेक्षते। ततश्चैतावन्त्येवास्याङ्गानीत्यवधारणात्स्वरूपप्राप्तिमात्रस्य च चोदकेनापि सिद्धेरुत्तराङ्गावच्छेदार्थमेवेदं वाक्यमिति फलेन व्यपदिश्यते। तेनोच्यते पूर्वत्वादवच्छेद इति। एवं च सति यागान्तरापूर्वान्तरानुमानादिक्लेशो न भवतीति। न च परपदसंबन्धविधानविप्रकर्षः। पर्यग्निकरणान्तविशिष्टे तूत्सर्गे विधीयमाने यद्यप्युत्सर्गस्वरूपं प्राप्तमेव तथाऽपि तदुद्देशेनाङ्गकलापविधानादनत्यन्तविप्रकर्षात्स एव विधेयत्वेनोक्तः। त्वत्पक्षे तु ‘दध्नेन्द्रियकामस्य’ इत्यादिष्विव धातोरत्यन्तपारार्थ्यं स्यात्। तस्मादप्यकर्मान्तरत्वम्। प्रकरणादेव च पर्यग्निकरणान्ताङ्गग्रहणसिद्धेः पात्नीवतग्रहणं नित्यानुवादत्वादतन्त्रमिति विशिष्टानुवादैकदेशव्यपदेशोपालम्भपरिहारः। तस्माद्गुणविधिरिति सिद्धम्॥ १९॥ § 4500

१३ ब्दः] अग्निशब्द इति—द्विदेवत्याग्नीषोमीय पशुयागप्रकरणे श्रूयमाणायां ‘त्वं ह्यग्ने प्रथमो मनोता’ इत्यस्यामृचि यथाऽग्निशब्देनाग्नीषोमावुच्येते तद्वदित्यर्थः।
१७ ब्द] इडान्तादिवदिति—‘इडान्ताऽऽतिथ्या संतिष्ठते’ इत्यत्र श्रूयमाण इति शेषः।
२९ मिति] विशिष्टानुवादेति—पर्यग्निकरणावस्थाविशिष्टपात्नीवतानुवादलक्षणस्य पात्नीवतत्वरूपेण चैकदेशेन, त्वाष्ट्रपात्नीवतव्यपदेशोपालम्भस्य परिहार इति समासार्थः।

इति पात्नीवताधिकरणम्॥ ८॥

## ०.०.६६ अंश्वदाभ्यग्रहयोर्ज्योतिष्टोमाङ्गताधिकरणम्

अनारभ्याधीतयोरंश्वदाभ्यग्रहयोरालम्भादिवत् त्रेधा संदेहः। तद्वदेव च 609
पक्षद्वयं निराकृत्य यजिमती चोदनेति प्रतिज्ञायते। किं च। § 4502

प्रकृतादपि भेत्तृत्वं नामधेये व्यवस्थितम्।
किमुताप्रकृतेभ्योऽत्र यत्र नैवास्त्यभेदधीः।§ 4504

न ह्येतन्नामधेयं प्रकृतौ कस्यचित्प्रसिद्धं यस्य पुनःश्रुतिसामर्थ्याद्विरभ्यासः क्रियते। तस्माद्गृह्णातिचोदनासामान्येन ज्योतिष्टोमप्रकृतिरेकाहोऽयं चोद्यत इति मन्यामहे। न च वत्सालम्भतुल्यत्वम्। एकत्र यजतेः प्रत्यक्षत्वादन्यत्र चाव्यभिचारिण्या संज्ञयाऽन्यत्वे कल्पिते गृह्णातिना समस्तज्योतिष्टोमधर्मप्राप्तेर्द्रव्यदेवतासंबन्धसिद्धिः। अतो यागान्तरत्वमिति प्राप्तेऽभिधीयते। § 4505

ग्रहणं नामधेयं च केवलं यत्र गम्यते।
वत्सालम्भादपि न्यूनं तदद्रव्यतयेष्यते॥§ 4507

देवता तावद्दूरभ्रष्टैव। यद् गृह्यमाणं द्रव्यं तदपि न केनचिदुपात्तम्।
न हि जात्या गुणेन च विना द्रव्यमुपलक्षयितुं शक्यम्। न च यागेऽन-
वधारिते ज्योतिष्टोमवद्भावोऽस्ति। येन सोमग्रहणमेतदिति विज्ञायते। न च
गृह्णातिर्ज्योतिष्टोमं न व्यभिचरति। उपादानमात्रवचनत्वात्। न चैते याग-
नामनी, येन तं भिन्द्यातां, ग्रहणसामानाधिकरण्याद्धि तन्नामत्वमनयोः।
इष्यत एवास्माभिरत्रग्रहणभेदः। न च तावता यागान्तरत्वं भवति। द्र-
व्यदेवतासंयोगेऽपि चैवंजातीयकानां यजिमत्त्वं निराकृतम्, *'अचोदकाश्च 610
संस्काराः' इति। अत्र पुनस्तदपि न विद्यते। योऽप्यदाभ्यवाक्ये यज-
तिः सोऽपि रेवतीवारवन्तीयपूर्वपक्षन्यायेन संक्रान्तविधिशक्तिना प्रत्ययेन
विधीयते। तस्माद्यागमनूद्य ग्रहणविधानमेवैतत्। अंशोः कथं यागसंबन्ध
इति चेत्। गृह्णातिसामान्योपस्थितेन ज्योतिष्टोमेनेति केचित्। अस्त्येव त्व-
नयोस्तैत्तिरीयाणां ज्योतिष्टोमप्रकरणे पुनः श्रवणं तदन्यत्र प्रयोजनत्वात्क-
र्मविनियोगं करिष्यति। यथा साप्तदश्यस्यानारभ्यवादेन सामिधेनीसंबन्धित-
योत्पत्तेः। प्राकरणिकैश्च वचनैर्विनियोगादर्थवत्त्वमेवमिहापि द्रष्टव्यम्। तेन
'संस्कारश्चाप्रकरणेऽकर्मशब्दत्वात्' इत्ययमेव पक्षः॥ २०॥ § 4508

१८ *] ( अ. २ पा. ३ अ. ६ सू. १८ )।
२० न्यायेन] गृहीत्वाशब्दार्थे संक्राता विधिशक्तिर्यस्य प्रत्ययस्येति समासार्थः।
२६ तेन] ( अ. २ पा. ३ अ. ५ सू. १२ )।

इति अंश्वदाभ्यग्रहयोर्ज्योतिष्टोमाङ्गताधिकरणम्॥ ९॥

## ०.०.६७ चयनस्याग्निसंस्कारत्वाधिकरणम्

‘अग्निं चिनुते’ इत्यत्रापि त्रेधैव संदेहः। किमपूर्वयागविधिरुत चयनमात्रविधानमुत प्रकृतिविकृतिषु गुणविधानमिति। तत्रांश्वदाभ्यवत्प्रकरणे पुनरसंकीर्तनात्संस्कारमात्रस्य च केवलस्य प्रयोजनासंभवात्संज्ञयैव क्रत्वन्तरं कल्प्यते। तथा च फलश्रवणम् ‘ऋध्नोत्येव’ इति। न च गुणात्फलमिति शक्यं वक्तुं, प्रकृताश्रयानुपपत्तेः। तथा चैकान्तिकसोमयागचिह्नान्युपसदादीन्युभयत्र संबद्धानि श्रूयन्ते। तथेमानि वचनानि ‘अथातोऽग्निम-
611 ग्निष्टोमेनैवानुयजति’ इति। तत्र ‘अग्निं यजति’ इति ‘समिधो यजति’ इतिवत् ‘तत्प्रख्यं चान्यशास्त्रम्’ इत्येवं सिद्धनामधेयविशिष्टयागविधानं विज्ञायते। तस्यैव चाग्निष्टोमादिसंस्थत्वं विशेषणम्। द्विरात्रादयश्च कालविशेषा विकल्प्यन्ते। अथवा संस्थाविधिपरे वाक्ये यजत्यनुवाद एवमवकल्पते यद्युत्पत्तिवाक्ये चिनोतिर्यजतिमद्ववचनस्तस्मादुत्तरकालदृष्टेन यजतिसामानाधिकरण्येनाऽऽदावेवाग्निशब्दः क्रतुनामधेयमिति निश्चीयते। अनुशब्दश्च य एतेनानिष्ट्वेत्यनेन प्राप्तं ज्योतिष्टोमात्पश्चाद्भावमनुवदति। यद्वाऽग्निमग्निष्टोमादिसंस्थैर्यागैरनुयजतीत्युक्ते यद्यग्निर्याग एवमसावनुयष्टुं शक्यते। सर्वत्र हि तुल्यरूपाणां तुल्यधर्मणां विभागे पौर्वापर्यं भवति। तद्यथा देवदत्तमनुगच्छतीति। यदि देवदत्तोऽपि गच्छत्येवमनुगमनमवकल्पते। तथाऽनुयजनमपि। तस्माच्छ्रुतानुमितेतिकर्तव्यतावत्क्रतुविधानमेतदिति। पश्चिमे तु व्याख्यानेऽग्निष्टोमादिभ्यः पश्चात्क्रियमाणोऽयं तदङ्गमेव भवतीति फलश्रुतिरर्थवादः स्यात्। पूर्वत्र तु स्वतन्त्रत्वात् ‘फलमात्रेयो निर्देशात्’ इति फलविधित्वात्पुरुषार्थमिति विशेषः॥ २१॥ § 4510

अत्यन्तरूढिशब्दत्वाद्वाक्यभेदादिभिर्विना।
ज्वलनं न परित्यज्य क्रतुरग्निः प्रतीयते॥ § 4512

न ह्यग्निशब्द उद्भिदादिवद्यौगिकः। नापि वाक्यभेदतत्प्रख्यतद्व्यपदेशैर्युक्तो, येन कर्मनामधेयत्वं विज्ञायते। यत्तु तत्प्रख्यमस्तीत्युक्तं, भवेत्तद्यदि, क्रत्वङ्गत्वेनाग्निर्विधीयते, स तु प्राप्तक्रत्वङ्गभाव एव चयनसंस्कारतया श्रूयते। न च तादृप्येण कुतश्चित्प्राप्त इति तत्प्रख्यान्यशास्त्रान्तराभावः। तस्माद्द्रव्यमेवाग्निरिति। **कतमद्द्रव्यमिति**—चयनसानाधिकरण्यविरोधाभिप्रायेण

८ त्] ( अ. १ पा. ४ अ. ३ सू. ४ )।
११ त्वात्] ( अ. ४ पा. ३ अ. ६ सू. १८ )।

प्रश्नः। सिद्धान्तवादी तु ‘व्रीहीनवहन्ति’ इतिवद्वैयधिकरण्येनैव संस्कार्य-संस्कारसंबन्धोपपत्तेरविरोधं मत्वाऽऽह—**यदेतज्ज्वलन** इति। तस्मादग्निशब्द- 612
स्य प्रसिद्धार्थग्राहित्वाच्चिनोतेश्च यागाभिधानाशक्तेर्द्रव्यदेवताभावाच्चाग्निं चयनेन संस्करोतीत्येतावानेव चोदनार्थोऽवधार्यते। तथा च द्वितीया समर्थिता भवति। कर्म नामधेयत्वे त्वग्निहोत्रवत्क्लेशः स्यात्। अनुयजतीति शब्दः कथमिति चेत्। उच्यते। § 4513

एकाहाहीनसत्राणि यजिस्तावद्ग्रहीष्यति।
अनुशब्दश्चिते तेषामनुष्ठानं वदिष्यति॥ § 4515

यदि ह्ययमग्निशब्दः समानाधिकरणः स्यात्ततो दुःखं नीयेत। यदि वैषा कर्मणि द्वितीया स्यात्। अयं तु व्यधिकरणः, कर्मप्रवचनीययुक्ते द्वितीया। अत्रायमर्थोऽग्निचयनमन्वग्निष्टोमादिभिर्यष्टव्यमिति। अग्निशब्दश्च सामान्यवचनोऽपि सन्नत्र प्रकरणवशाच्चयनसंकृते वह्नौ प्रवर्तते। चयनसंस्कारोत्तरकालं यष्टव्यमित्यर्थः। तेन क्रत्वङ्गभावोपनयनार्थत्वेनैवैतानि वचनानि। चोदकेनैव प्राप्तानां विकृतिषु पुनःश्रुतिः किमर्थेति चेत्। दशमे वक्ष्यते ‘ग्रहणं समानविधानं स्यात्’ इति। न चावश्यं तुल्यजातीययोरेव पौर्वापर्यं भवति। अतुल्यजातीययोरपि पौर्वापर्यं भवति। तथा पाकमनुभुङ्क्ते इत्यविरोधोपपत्तेः। यत्तु देवदत्तो यज्ञदत्तमनुगच्छतीत्येतत्तुल्यकर्मत्वं गम्यत इति। युक्तं तत्र कर्तृमात्रोपादाने सति क्रियान्तरानुपादानात्। इह पुनरग्निसंस्कारोपात्तं चयनकर्मैव विद्यत इत्यसमानम्॥ २२॥ § 4516

‘अग्नेः स्तोत्रम्’ इत्यादिष्वगत्याऽऽश्रयणं ज्वलनेन संबद्धं स्थलं लक्ष्यते नापि तद्वान्क्रतुः। न चैकत्र लक्षणाश्रयणमिति सर्वत्रैव साऽऽश्रयितव्येति। तस्मात्सत्यां गतौ द्रव्यवचनत्वमेव युक्तम्। यस्त्वत्रैवाधिकरणे भाष्यकारान्तरेणाग्नेः फलवदफलत्वप्राकृतवैकृतत्वनित्यानित्यत्वोत्तरवेदिविकाराविकारत्वविचारः कृतः स उदाहरणान्तरेष्वधिकरणान्तरसिद्ध 613
इहासंबद्धोऽपि स्मरणमात्रदर्पणोपन्यस्त इत्युपेक्षितव्यः। तस्मान्नैवंजातीयको गुणो भेदक इति सिद्धम्॥ २३॥ § 4517

इति चयनस्याग्निसंस्कारत्वाधिकरणम्॥ १०॥

## ०.०.६८ प्रकरणान्तराधिकरणम्

गतं गुणलक्षणभेदप्रसक्तानुप्रसक्तं कीदृशो गुणः पूर्वत्रासंभवन् भिनत्ति कीदृशो वा तत्रैव संभवतीति। इदानीं पर्यवसितेषु पञ्चसु भेदकारणेषु प्रकरणान्तरलक्षणो भेदः प्रस्तूयते। तत्र तावत्। § 4519

---
१४ ते] ( अ. १० पा. ८ अ. ११ सू. २७ )।

अग्निहोत्रादिशब्देन पूर्वं कर्मावबोधितम्।
न विप्रकर्षमात्रेण भेदरूपं प्रपद्यते॥§ 4521

यथैव वलभ्यां पाटलिपुत्रे वाऽग्निहोत्रादिशब्द उच्चार्यमाणो नार्थान्तरं प्रतिपादयति, एवं प्रकरणान्तरेऽपि। न हि प्रकरणान्तरं तस्यार्थाभिधानशक्तिमभिव्यनक्ति। तद्विशेषिताश्च यजतिजुहोत्यादयोऽपि नार्थान्तरे वर्तन्ते। नार्थान्तरेण विना किंचिदनर्थकं भवति। न च प्राप्तविधानं तेषु न संभवति। यावज्जीवादिविधिभिः सह तुल्यबलत्वेन विकल्पोपपत्तेः। यो वै तेषां काम्यप्रयोगस्तस्यानवगतकालविशेषत्वान्मासपरिमाणविधानमित्यदोषः। प्रकरणस्य च वाक्यं बाधकमिष्टमेव। अथ वा दीक्षितत्वानिमित्तेन प्रतिषिद्धानामपि मासपरिमितः प्रतिप्रसवः। स तु प्रयोगमध्य एव क्रियते। अथ वा तान्येवाग्निहोत्रादीनि अत्र पर्युपस्थाप्य सोमयागसहितानि सत्रप्रयोगवचनेन फले विधीयन्ते। न हि केवलभोजी देवदत्तोऽन्यैः सह पङ्क्त्यां भुञ्जानोऽन्यत्वं प्रतिपद्यते। न च फलान्तरसंबन्धः कर्मान्तरत्वेन विना न घटत इत्युक्तमवेष्ट्य-
614 धिकरणे। न चावश्यमङ्गैरेव क्रत्वन्तरं गन्तव्यम्। प्रधानमपि हि अपरिपूर्णे करणांशे स्वशब्देन विधीयमानं न विरुध्यते। तस्मादेवमपि तान्येवाग्निहोत्रादीनीति प्राप्त उच्यते। § 4522

उपसद्भ्यः परं ह्येतदग्निहोत्रं विधीयते।
न च नैयमिकस्यैताः सन्तीत्येतेन भिन्नता॥§ 4524

यदि हि मासः शुद्धो विधीयेत ततः पूर्वकर्मानुवादे बुद्धिर्भवेदपि न त्वेतदस्ति। उपसदुत्तरकालत्वेन श्रवणाद्विद्यमानाभिरुपसद्भिः शक्यः कालो लक्षयितुम्। न च नैयमिके ताः स्वार्थाः परार्था वा विद्यन्ते। यदि तु तास्तदुत्तरकालत्वं मासश्च विधीयेरन्, एवं सति अनेकार्थविधानाद्वाक्यभेदः स्यात्। एतस्मादेव हेतोर्दीक्षितदानहोमपाकप्रतिषेधेन प्रतिषिद्धस्य प्रतिप्रसवरूपेण वा सत्रैकदेशत्वेन वाऽयं विधिः प्रत्युक्तः। तत्रापि ह्युपसदुत्तरकालत्वं मासश्चेत्यनेकार्थत्वमेव। कर्मान्तरविधाने त्वेनकार्थत्वमदोषः। तस्मात्कर्मान्तरमिति भाष्यकारः। इदं त्विह वक्तव्यम्। यदि वाक्यभेदप्रसङ्गात्कर्मान्तरत्वमेवं तर्हि स एव भेदहेतुः प्राप्नोति न प्रकरणान्तरम्। अथवा गुणादेवानेकात्मकत्वेन पूर्वत्रासंभवाद्भेद इति प्रकरणान्तरानवकाशः। तथा हि। § 4525

यद्यपि प्रकृते तस्मिन्नग्निहोत्रे भवेदिदम्।
तथाऽप्यसंभवात्तस्मिन् ब्रूयात्कर्मान्तरे गुणः॥§ 4527

किं च। § 4528

---

१४ णे] ( अ.२ पा. ३ अ.२ )।
१५ त्वेन] स्वशब्देनेति—उपदेशेनेत्यर्थः। एवं च 'कर्मणस्त्वप्रवृत्तित्वात्' इत्याष्टमिकन्यायेन करणांशस्यानतिदेशेऽपि उपदेशतः प्राप्तिर्न विरुद्धेत्याशयः सूचितः।

अग्निहोत्रस्य चैतेन भेदः क्लेशेन संभवेत्।
उत्तरेषां तु नैव स्यादुपसत्संगतेर्विना॥§ 4530

'मासं दर्शपूर्णमासाभ्यां यजते' इत्यादिषु हि केवलमाससंबन्धविधानान्न वाक्यभेदः प्राप्नोतीति अकर्मान्तरत्वप्रसङ्गः। तत्रैतत्स्यात्। इहाप्युपसद्भिश्चरित्वेत्यनुषङ्गादग्निहोत्रतुल्यत्वमिति। तदयुक्तम्। कुतः। § 4531

विना यत्रानुषङ्गेण भवेच्छ्रुतिरनर्थिका।
तत्रैव ह्यकृतार्थानामनुषङ्गो न चेह सः।§ 4533

तत्रानुषङ्गो युक्तो यत्र तेन विना न किंचिदुक्तं भवति। यथाऽत्रैव 'मासं 615 वैश्वदेवेन' इत्यादिषु यावद्यजत इति नानुषज्यते तावन्न किंचिदुक्तमित्यवश्यमनुषक्तव्यम्। इह पुनर्दर्शपूर्णमासादिवाक्यानि तावत्स्वपदैरेव निराकाङ्क्षीभूतानि। 'उपसद्भिश्चरित्वा' इत्ययमपि पूर्वत्रैव चरितार्थत्वान्न किंचिदपेक्षते। तत्र न कश्चिदपि हेतुरस्ति येनानुषज्येत। यस्तु वाक्यभेदप्रसक्त्यर्थमेवानुषङ्गमिच्छेत्कुर्यादपि सः। तत्र तु पुनः पुनश्चरित्वेत्यस्य विधानाद्यावदनुषङ्गमुपसदामनुष्ठानं प्राप्नोति। अनिष्टं चैतत्, वेदाभ्यनुज्ञानाभावात्। अथाग्निहोत्रस्यैव पुरस्तात्कृताभिः सर्वानुषङ्गार्थसंपादनमित्युच्येत। तथा सति शब्दोच्चारणमप्येवमेवावस्थितमग्निहोत्रादीनां पाठक्रमानुरोधेनोपकरिष्यतीति नार्थोऽनुषङ्गेण। तस्मान्नैतद्व्याख्यानमुपपद्यत इति एवं वर्णनीयम्। § 4534

उपादेयो गुणो यत्र भवेत्प्रकरणान्तरे।
तत्राकर्मान्तरं युक्तमुद्देश्ये त्वन्यकर्मता॥§ 4536

इह तावन्नैव प्रकरणान्तरसद्भावाद्भेदोऽवगम्यते। किं तर्हि। पूर्वप्रकरणविच्छेदात्। अविपरिवर्तमाने हि पूर्वकर्मणि केनापि प्रकारेणोत्तरस्य भेदः प्रतीयते। न तु प्रकरणान्तरं सदपि किंचिदुपकरोति। तथा च 'फलं चाकर्मसंनिधौ' इत्यत्र वक्ष्यामः। सर्वत्र च विच्छिन्नप्रकरणस्य कर्मणः संबन्धि द्विप्रकारं श्रूयते। उपादेयमनुपादेयं च। तत्र यदुपादेयं यथाऽऽहवनीयप्रतिपदादि तत्प्रदेशान्तरस्थोद्देशेनापि शक्यं विधातुम्। यत्त्वनुपादेयं देशकालनिमित्तफलसंस्कार्यात्मकं तस्य प्रदेशान्तरावस्थितस्य कर्म प्रति विध्यशक्तेरेषा वचनव्यक्तिर्भवति तत्रैव कर्म कर्तव्यमिति। परोद्देशेन च कर्म विधीयमानं यद्यन्येन तद्रूपमेव वाक्येनोपस्थाप्यते ततस्तदेवेत्यकर्मान्तरबुद्धिर्भवति। अथ त्वीषदपि तिरोधानान्नोपतिष्ठेत ततः परं विधीयमानत्वेनैव विहितादन्यत्वबुद्धिः स्थिता न शक्याऽपनेतुमिति कर्मान्तरत्वं भवति। एवं

२३ च] ( अ॰ २ पा॰ ३ सू॰ २५ )। इत्यर्थः।
२६ दादि] प्रतिपदिति—स्तोत्रीयाद्या ऋग्

हि स विधायकस्तत्रोपदिशति अविधेयं पदार्थं प्रति मयैतत्कर्म विधीयते। तच्च स्वरूपेणानुत्पन्नं न शक्यं तत्र विधातुमिति बलादुत्पाद्यते। तद्यदि कश्चिदेवंविधं शक्नोत्युत्पादयितुं तत उत्पादयतु, यावदहमप्यत्र विधिं करोमि। अथ नोत्पादयति ततो मयैवोत्पादिते मा कश्चित्पश्चादागत्य ममापराधं मंस्तेति। तेनैवमाच्छोषिते यदि कश्चित्तथाविधमुपनयति ततोऽसावपि तदेव देशादौ विधत्ते। अथ नोपनयति ततः स एवोत्पादयत्यपीति निरूप्यते। तदिह मासस्तावद्दूरस्थहोमानुवादेन न शक्यते विधातुम्। न हि कश्चिद्धोमाद्यनुरोधेनाद्यैव मासं संपादयितुं समर्थस्तेनात्यन्तं स्वतन्त्रमनुपादेयं मासमेव प्रति होमादिषु विधीयमानेषु दूरस्थैरुत्पत्तिविधिभिरुत्पादनशक्तावलुप्य-
616 मानायामिदानीमेवोत्पत्तिः क्रियते। न चोत्पन्नस्य पुनरुक्तिः संभवतीत्यपूर्वविधानं विज्ञायते। ननु चाग्निहोत्रादिपदेनोत्पत्तिसहचारिणा तत्कर्मोत्पत्तावपनीयमानायां माससंबन्धमात्रव्यापृतोऽयं विधिरुत्पादकत्वाद्विहन्येत। § 4537

संनिधानोपनीतं चेत्कर्म नोत्पद्यते पुनः।
नामधेयोपनीतं तत्तत्र नोत्पद्यतेतराम्॥ § 4539

यत्र वाक्यान्तरगतमपि संनिधानमात्रादेव प्रत्यभिज्ञायमानं न भिद्यते तत्र स्ववाक्यगतेन नाम्नोपनीयमानं न प्रत्यभिज्ञास्यत इति कुत एतत्। उच्यते। § 4540

यथाभिलषितं यत्र दुर्बलेनापि हेतुना।
कर्मोपस्थाप्यते तत्र तदेवेत्यवसीयते॥ § 4542

संनिधानेन हि यादृगेव देशादिवाक्येषु कर्मावगम्यते तादृगेवोपतिष्ठत इति न भिद्यते। *नामधेयं पुनरादितस्तावदाख्यातपरतन्त्रत्वान्नैव भेदाभेदयोर्व्याप्रियते। तस्मिंश्चाऽऽख्यातप्रवृत्तिप्रतीक्षिणि अवस्थिते 'मासं जुहोति' 'मासं यजते' इति जुहोतियजतिपदमात्रसंगतावालोच्यमानायामन्यस्य जुहोत्यादेः स्ववाक्यस्वप्रकरणेषु अविपरिवर्तमानत्वादप्रत्यभिज्ञानम्। किं च। § 4543

नाम्ना धात्वर्थमात्रं च संनिधाप्येत शक्तितः।
भावना त्वनुपस्थानाद्भिद्यमानाऽवधार्यते॥ § 4545

सामानाधिकरण्येन हि सर्वनामधेयानि धात्वर्थानां नामधेयत्वेनावस्थितानि न भावनायाः। तेन भावनान्यत्वानन्यत्वपरीक्षावेलायां सत्यपि धात्वर्थैकत्वे भावना तावदनन्यप्रमाणत्वादाख्यातप्रत्ययान्तरेणानुपनीयमाना न कथंचित्प्रत्यभिज्ञायत इत्युपपन्नं प्रयोजनान्यत्वम्। अथवा। § 4546

---

२१ *] नामधेयं पुनरिति—अयमाशयः। नाम्नः पूर्वकर्मोपस्थापकत्वस्य पूर्वकर्मवाचित्वनिमित्तकत्वादाख्यातस्य च पूर्वकर्मविषयत्वं विना तत्परतन्त्रस्य नाम्नः पूर्वकर्मवाचित्वानवधारणात्पूर्वकर्मोपस्थापकत्वानुपपत्तेर्नोत्पत्तिप्रतिबन्धकत्वमिति।

धात्वर्थोऽपि यथाऽऽख्यातेऽसत्त्वभूतः प्रतीयते।
सत्त्वाभिधायिना नाम्ना तादृङ्नैवोपनीयते॥§ 4548

असत्त्वभूतो हि धात्वर्थोऽत्र जुहोतिना विधेरुपनीयते। न च तादृशस्यैव द्रव्यभूतलिङ्गसंख्यायोग्यार्थाभिधायिभिरग्निहोत्रादिपदैरभिधीयमानत्वमित्यप्रत्यभिज्ञानात्सोऽपि भिद्यते। यत्र तु प्रकरणान्तरेऽपि तथाभूतो नोपादास्यते भावना वा तावदनुरक्तात्मना न विवक्ष्यते तत्र तदेव कर्मैकेन 617 वचनेन पर्युपस्थाप्यापरेण फले विधीयत इत्यवगमात्काममकर्मान्तरं भवतु। तद्यथा 'अतिरात्रश्चतुर्विंशः' 'प्रायणीयमहः' 'चत्वारोऽभिप्लवाः षडहाः' 'पृष्ठ्यः षडहः' इत्यादिषु। यथा च वरुणप्रघासेषु 'अवभृथं यन्ति' इति। यदा तु प्रकरणान्तरगतफलादिसंबद्धं विधित्वमुत्पत्तिमपि संस्पृश्य यावद्बलीयस्योत्पत्तिविधिविपरिवृत्त्या विप्रकर्षादनिवार्यमाणं भिनत्तीति निश्चीयते तदैवमादिष्वपि भेद एवेत्यवगम्यते। परमार्थेन तु— § 4549

भिद्यते भावनामात्रं धात्वर्थो नायजिश्रुतेः।
नाम्ना हि तदुपादानमासनोपायिचोदिते॥§ 4551

नामविलक्षणधातुश्रवणे हि तदर्थभेदो भवति। सत्रे तु यज्यश्रवणान्नाममात्रोपनीतप्रकृतयागप्रत्यभिज्ञानात्तद्भावनामात्रभेदः। तस्मात्साधूक्तं प्रकरणान्तरे प्रयोजनान्यत्वमिति। भाष्यकार **उपसद्भिश्चरित्वेति** तल्लक्षितकालमेवानुपादेयरूपं भेदहेतुत्वेन दर्शयतीति द्रष्टव्यम्। **अथोच्येत—उपसदोऽपि विधीयन्त** इत्यादि चाभ्यासाधिकरणवदभ्युपेत्यवादेन समर्थयितव्यम्॥ २४॥
§ 4552

इति प्रकरणान्तराधिकरणम्॥ ११॥

## ०.०.६९ फलसंस्कार्ययोः कर्मभेदकत्वाधिकरणम्

एवं षडपि भेदहेतवः पर्यवसिताः। संप्रति प्रकरणान्तरस्यैव प्रकारान्तरप्रदर्शनं क्रियते। यो नाम प्रकरणान्तरकृतमेव कालसंबन्धकृतं वा भेदं मन्यते नासंनिधानानुपादेयवस्तुसंबन्धमात्रकृतं तं प्रति विस्पष्टीकरणार्थं 'फलं चाकर्मसंनिधौ' इत्यारभ्यते। तत्त्वमेतत्सप्तमं भेदाधिकरणम्। त-

---

१ भूतः] असत्त्वभूत इति—सुबुपात्तलिङ्गसंख्यान्वयायोग्यभूत इत्यर्थः।
५ थाभूतो] तथाभूत इति—असत्त्वभूत इत्यर्थः।
६ ना] अनुरक्तात्मनेति—असत्त्वभूतधात्वर्थानुरक्तात्मनेत्यर्थः।
१४ मास] आसनोपायिचोदित इति—आसीरन्, उपेयुरित्यादिचोदनाचोदिते सत्रादिकर्मणीत्यर्थः।

त्र देशनिमित्तयोरनुपादेयत्वं सुज्ञानमिति पूर्वाधिकरणे सिद्धत्वादिहानुदाहरणम्। पूर्वत्रैव त्वेवमादि दर्शयितव्यम् तद्यथा—'सत्रायाऽऽगूर्य विश्वजिता
618 यजेत' 'साम्युत्थाने विश्वजित्' इत्यादिनि निमित्ते। देशेऽपि 'दक्षिणेन तीरेण सरस्वत्या आग्नेयेनाष्टाकपालेन' 'शम्यापरासमीयात्' इत्यादीनि। यद्यप्यत्रातिरात्रादिवदेव यज्यश्रवणं तथाऽपि प्राग्यज्यनुमानात्तद्धितान्तपदयुक्तवाक्यापरिसमाप्तेर्वाक्यान्तरस्यानपेक्षणात्कर्मान्तरत्वम्। फलसंस्कार्ययोस्तु तुल्यहेतुत्वादिह विचारः। तत्र फलमुदाहृतमेव। संस्कार्यमप्युदाहर्तव्यं 'त्रैधातवीया दीक्षणीया' इति। यजमानसंस्कारार्थत्वेनोपादानात्। **अनारभ्य किंचिदिति**—प्रकरणान्तरावरोधाभावज्ञापनार्थम्। तत्र यागोद्देशेनाऽऽहवनीयादिवत्फलं विधेयम्। शक्यं हि तत्पुरुषेण दर्शपूर्णमासस्थेनापि कामयितुमिति मत्वाऽऽह—**प्राकृतेषु फलविधिरिति**। सिद्धान्तवादी तु स्वर्गकामाधिकरणासिद्धं 'प्रत्यर्थं ताभिसंयोगात्' इति फलोद्देश्यत्वं मत्वा वदति **न शक्यते फलं विधातुमिति**। विधीयमानं क्रियाङ्गत्वादफलमेव प्राप्नोति। क्रियाऽपि वा विधीयमाना तादर्थ्यं प्रतिपद्यमाना निष्फलैव स्यात्। न चोभयोरुद्दिश्यमानयोरुपादीयमानयोर्वा संबन्धोऽस्तीत्येकान्तेन फलमुद्दिश्य कर्म विधातव्यम्। ततश्च पूर्ववदेव सिद्धो भेदः। एतेन संस्कार्यमपि व्याचक्षीत। किं च। § 4554

न चानित्यस्य कामस्य नित्यैरग्न्यादिकर्मभिः।
कथंचिदपि संबन्धः साध्यसाधनरूपतः॥§ 4556
तस्मात्कर्मान्तराणीति सिद्धम्॥ २५॥ § 4557

इति फलसंस्कार्ययोः कर्मभेदकत्वाधिकरणम्॥ १२॥

## ०.०.७० संनिधौ फलादेः कर्मभेदकत्वाभावाधिकरणम्

619 सर्वेषामेवासंनिध्यंशप्रत्युदाहरणार्थमिदमारभ्यते। फलग्रहणं प्रदर्शनमात्रम्। सर्वाणि तु देशादीन्यप्युहर्तव्यानीति। 'समे दर्शपूर्णमासाभ्यां यजेत' 'पौर्णमास्यां पौर्णमास्या यजेत' 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत' 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' 'शेषात्स्विष्टकृतं यजति' इति। सर्वत्र पूर्वाधिकरणेन देशादीनि प्रति विधीयमानत्वात्कर्मान्तरत्वं प्राप्तम्। आह च। § 4559

---

१० लं] आहवनीयादिवदिति—'यदाहवनीये जुहोति' इत्यत्रेति शेषः।

१२ णासिद्धं] ( अ० ६ पा० १ अ० १ सू० ३ )।

विहितस्य विधिर्नास्तीत्यनुवादः प्रसज्यते।
अनूद्यमानमुद्देश्यं न चात्रोद्देशसंभवः॥§ 4561

अनूद्यमानानि ह्येकान्तेनोद्देष्टव्यानि कर्माणि। न चोद्देश्यानामुद्देश्यैः संबन्धोऽवकल्पते। देशाद्युद्देशेन तु विधीयमानानां कर्मणां स्वरूपानुवादकल्पनं युगपद्विध्यनुवाददोषादयुक्तम्। तस्मात्कर्मान्तराणीति प्राप्तेऽभिधीयते—
§ 4562

भिन्ने हि विधिसामर्थ्ये उत्पत्तिविनियोगयोः।
तत्र सत्यां गतावेकमसत्यां तद्द्वयं भवेत्॥§ 4564

अगत्या हि तेनैवोत्पत्तिस्तेनैव च विनियोगः क्रियते। सत्यां तु गतौ विनियोजकस्योत्पत्तिविध्यर्थापत्त्यनुत्पादादन्येनैवोत्पादितानां च विपरिवर्तमानानां विनियोगसामर्थ्यमात्रमेव ज्ञायते। § 4565

न चाप्युद्दिश्यमानत्वमनुवादत्वकारणम्।
नोपादानं विधेयत्वे प्राप्त्यप्राप्तिवशे हि ते॥§ 4567

यद्यपि देशादीन्यनुपादेयस्वभावत्वादुद्दिश्यन्ते तथाऽप्यप्राप्तत्वात्तेषामवे ज्ञायते विधेयत्वम्। उपादीयमानस्य च कर्मणस्तादृशस्यैवान्येन पर्युपस्थापनादनुवादत्वम्। असंनिधाने त्वपर्युपस्थापनाद्विधिर्नोपादानमात्रादित्यविरोधः। तस्मादभेदः। विपरिवृत्तिरेव चेहाविभागशब्देनोक्ता। विशेषेण त्वेष्टावेतच्छब्दप्रत्ययादिति। प्रयोजने तु चोदयन्ति। कर्मान्तरेऽपि किलैतच्छब्दकृतात्सादृश्यप्रत्ययादाग्नेयादीन्येव हवींषीति कथमन्यहविष्को याग 620 इति। तत्त्वचोद्यम्। ज्योतिरादिवदेतच्छब्दस्य प्रस्तूयमानमुख्यार्थोपपत्तौ सत्यां सादृश्यलक्षणानुपपत्तेः। तस्मात्सुष्ठूक्तं कर्मान्तरेऽन्यहविष्को याग इति। एवमुक्तानि सापवादानि षट् भेदकारणानि। वृत्त्यन्तरे तु चत्वार्येव भेदकारणानि शब्दान्तरसंज्ञागुणफलान्युदाहृतानि। पुनःश्रुतिसंख्ययोः शब्दान्तर एवान्तर्भावात्प्रकरणान्तरस्य च फलाद्यनुग्रहमात्रार्थत्वात्। तत्त्वयुक्तमिव दृश्यते। न हि पञ्चकृत्वोऽभ्यस्तो यजतिः शब्दान्तरत्वं प्रतिपद्यते। नाप्येकशेषेण तन्त्रोच्चारिताः सप्तदश प्राजापत्यशब्दाः संभवन्ति। शब्दैकत्वप्रत्यभिज्ञानात्। तथा चोक्तम् ‘आदित्यवद्यौगपद्यम्’ इति। *‘संख्याभावात्’ इति च। वक्ष्यति चैवंजातीयकानामेकत्वम् ‘अपि वाऽव्यतिरेकाद्रूपशब्दाविभागाद्वा’ इति। तस्मादेकशब्द्ये सत्येव कारणान्तराद्भेदमपश्यतः शब्दान्तरकल्पनं तत्रभवतो भाष्यान्तरकृतः। प्रकरणान्तरत्वाच्च विना फलादीनां भेदकत्वमुक्तमपि न दृष्टं ‘संनिधौ त्वविभागात्’ *‘तत्संनिधेर्गुणार्थेन पुनःश्रुतिः’ इत्यादौ। तेन प्रत्यभिज्ञाननिमित्तत्वात्फलाद्यनुगृहीतं प्रकरणान्तरमेव भेदकारणं भवेदप्युपेक्षित-

२७ म्] ( अ॰ १ पा॰ १ सू॰ १५ )।
२७ *] ( अ॰ १ पा॰ १ सू॰ २० )।
२८ म्] ( अ॰ ६ पा॰ ३ अ॰ ३ सू॰ १२ )।
३१ *] ( अ॰ २ पा॰ अ॰ ५ सू॰ १६ )।

म्। फलं च प्रकरणान्तरान्तर्भूतत्वेन न निरीक्षितम्। यदपि 'एकं वा संयोगरूपचोदनाख्याविशेषात्' इत्येकत्वे हेतुविपर्ययचतुष्टयमस्य ज्ञापकमित्युक्तम्। तदपि प्रस्तुतेऽधिकरणेऽन्येषामसंभवादिति नाऽऽलोचितम्। तस्माद्यथोक्ताः षडेव भेदहेतवः। तत्रापि तु सिद्धान्ते संज्ञाशब्दान्तरयोर्गुणसंख्ययोश्च भेदो वक्तव्यः सन्नोक्त इत्यभिधियते। § 4568

स्वरूपनभिधानत्वात्संज्ञा शब्दान्तरात्पृथक्।
व्यासङ्ग्यसमवायाच्च संख्या भिन्ना गुणान्तरात्॥§ 4570

संज्ञा हि द्रव्यरूपापन्नामपि क्रियामभिदधाना विच्छेदमात्राद्भिनत्ति। संख्याऽपि युगपदनेकोत्पद्यमानसमवेता पूर्वासंभवद्गुणान्तराद्भिद्यत इति॥ २६॥ § 4571

इति संनिधौ फलादेः कर्मभेदकत्वाभावाधिकरणम्॥ १३॥

## ०.०.७१ आग्नेयपुनःश्रुतेः स्तुत्यर्थताधिकरणम्

621 'आग्नेयोऽष्टाकपालोऽमावास्यायां भवति' इति श्रूयते। किं य एवासावुभयत्राप्यच्युतस्तस्यैवैषा पुनःश्रुतिः केनापि प्रयोजनेनाथ कर्मान्तरमिति संदेहः। तत्र 'संनिधौ त्वविभागात्' इति सत्यप्यनुपादेयाममावास्यां प्रत्युपादाने तदेव कर्मेति सिद्धान्ते प्राप्तेऽभिधीयते। § 4573

पुनः श्रुतिरनन्यार्था मेदिकेत्यवधारिता।
तादृशी चेयमित्येव द्विराग्नेयः प्रयुज्यताम्॥§ 4575

प्रयोगद्वित्वद्वारेण च कर्मद्वित्वप्रतिज्ञानमेवैतद्द्रष्टव्यमिति॥ २७॥ § 4576

तत्र पक्षान्तरमाह—**अविभागात्तु कर्मणो द्विरुक्तेन विधीयत** इति। युक्तं समिदादिषु प्रत्यक्षयागपुनःश्रुतेर्भेदकत्वमिह तु द्रव्यदेवतासंबन्धादसावनुमातव्यः। तच्च द्रव्यदेवतमभिन्नमुपलभ्यमानं पूर्वसंबन्धानुभववशादेकान्तेन तमेव यागं बोधयति। द्रव्यदेवतमप्यन्यदिति चेन्न। अविभागप्रत्ययोपलम्भात्। यदि तु व्यक्तिकृतो भेद आश्रीयते स प्रयोगान्तरे तस्याप्याग्नेयस्याविशिष्टः। तस्माद्वैकल्पिकेन वचनद्वयेनामावास्यायामाग्नेयविधानम्। अथवा युगपत्प्रवृत्तेः 'यथा स्यात्सत्त्वदर्शनम्' इत्यनेन न्यायेन तदेव कर्म, एकेनेतरेण च प्रतिपाद्यते। न च गम्यते विशेषः कतरेण प्रतिपाद्यते कतरत्पौनरुक्त्याद-नर्थकमिति। कामं भवत्वानर्थक्यं, तदेव हि युक्त्याऽन्विष्यमाणमिहोपपन्नतरं
622 भवेन्नार्थान्तरवचनत्वं, शब्दार्थानित्यत्वप्रसङ्गात्। तस्मात्सकृदेव प्रयोग इति।

१ पि] ( अ॰ २ पा॰४ अ॰२ सू॰ ९ )। २ )।
७ वृत्तेः] ( अ॰ ६ पा॰ २ अ॰ १ सू॰

सर्वं त्विदमभ्यासाधिकरणे निराकृतमपि सदुत्तरसूत्रदर्पेण विश्रब्धमभिधीयते न तु परमार्थेनाऽऽनर्थक्याभ्युपगमं वेदः क्षमते॥ २८॥ § 4577

सर्वथा पुनःश्रुतिप्रयोजनेष्वत्रान्विष्यमाणेषु गुणस्याश्रवणात्परिसंख्यायाश्च त्रिदोषत्वादर्थवादार्थत्वेऽभ्युपगते कस्यार्थवाद इति विविच्यासंकीर्तनान्नूनमाग्नेयस्यैवेति मत्वा वदति—**सार्थवादकेन** विहिते किं प्रदेशान्तरस्थेनैकवाक्यतामनागच्छताऽर्थवादेनेति। विधिशेषत्वं ह्यर्थवादानामवस्थितम्। परिचोदना तु पूर्वपक्षाभिप्रायेण कृता। तत्र **यथा स्तुता वाऽस्तुता वा सैव देवते**त्यविवरणान्न विज्ञायते किंविषयमिति। तत्त्वेतदतिक्रान्तालोचनेन महेन्द्राधिकरणे 'गुणश्चानर्थकः स्यात्' इत्यत्र सूत्रेऽभिहितं परामृष्टमिति दृश्यते। यथैव हि महत्त्वं देवतानन्तर्गतमिति पक्षे केवलस्यैवेन्द्रस्य साधनत्वाद्विध्युद्देशेऽर्थवादेऽवस्थितमनर्थकं प्राप्नोति। तथैवेदं स्वतन्त्रस्तुतिमात्रमिति मन्यते। तत्रोच्यते। § 4578

प्रशस्तशब्दैरवधारितेन वाक्यान्तरात्केवलदेवतेन। 623
कर्तुं सहेन्द्रेण पुनः प्रशंसां पुनःश्रुतिः सम्यगिहाऽऽश्रितेयम्॥ २९॥§ 4580

इति आग्नेयपुनःश्रुतेः स्तुत्यर्थताधिकरणम्॥ १४॥

इति श्रीभट्टकुमारिलविरचिते मीमांसाभाष्यव्याख्याने तन्त्रवार्तिके
द्वितीयाध्यायस्य तृतीयः पादः॥

## ०.०.७२ यावज्जीवाधिकरणम्

बह्वृचब्राह्मणेऽध्वर्युब्राह्मणे वा श्रूयत इति नातीवाभिनिवेष्टव्यम्। ननु कर्तृधर्मः कर्मधर्म इति शेषलक्षणविषयत्वादिह न संबध्यते। केचिदाहुः। पर्यवसिते लक्षणार्थे तदीयोऽपि विचारः प्रत्यासत्तेः क्रियमाणो न विरुध्यत इति। तत्त्वयुक्तम्। शाखान्तरे कर्मभेदविचारस्याद्याप्यपर्यवसानात्। अत एवं संबन्धनीयम्। यथैव भेदकारणानि कर्मस्वरूपभेदे व्याप्रियन्ते तथैव प्रयोगभेदेऽपि। तदिह यावज्जीवगुणसंयुक्तानामग्निहोत्रादीनां किं प्रयोगा भिद्यन्त उतैक एवायं प्रयोगः काम्यः स एव यावज्जीवकालपरिमित इति। तत्र यदि यावज्जीवकालः कर्मधर्मत्वेन विधीयते ततः सायंप्रातर्वाक्यवशेन तत्काल-

७ णे] ( अ० २ पा० १ अ० ५ सू० १८ )।
९ त्वाद्विध्यु] विध्युद्देशेऽर्थवाद इति—समाप्ते हि विधिवाक्येऽर्थवादान्वयोपपत्तेर्विधिवाक्यमध्येऽर्थवादोऽनर्थक इत्याशयः।
१ इति] भाष्यकारोक्ताविति शेषः।

मापनमग्निहोत्रं न शक्नोति तावन्तं कालं पूरयितुमित्यर्थाज्ज्योतिष्टोमवदभ्यस्तरूपमेव प्रयोगं प्रतिपत्स्यते। यदि पुनर्जीवनं निमित्तत्वेनोद्दिश्य कर्म विधीयते ततो यावत्कर्तृभाविनि नियते निमित्ते विना कामसंबन्धेन चोद्यमानमकरणे दोषप्रसक्तेरवश्यं पुरुषेण जीवता स्वार्थसिद्ध्यर्थमनर्थपरिहाराय वा कर्तव्यमिति कर्तृधर्मो नियमोऽनेन चोदितो भवतीति। तदा च सायंप्रातःकालयोर्जीवनस्य च संहतानां निमित्तत्वात्प्रतिदिवसं निमित्ते तत्पर्यवसितं कर्म पुनः पुनः क्रियत इति प्रयोगान्यत्वम्। तेन प्रयोगभेदाभेदावेवैतत्फलत्वाद्भाष्य-
624 कारेणोपन्यस्ताविति मन्तव्यम्। किं प्राप्तम्। एकः प्रयोगोऽभ्यस्तरूपः कर्मधर्मो यावज्जीवकता कालोपदेशश्चायमिति। कुतः। § 4583

कर्मस्थो हि कथंभावस्तदङ्गमभिकाङ्क्षति।
कालोपदेशपक्षे च तत्तथैवोपपद्यते॥ § 4585

कालो ह्युद्दिश्यमानस्तन्निमित्तश्चाभ्यासः कर्माङ्गं भवति। ततश्च प्रकरणमनुगृह्यते। ननु च पुरुषधर्मत्वेऽपि तस्यैव कर्मणो जीवने विधानान्नैव प्रकरणं बाध्येत। सत्यमधिकारो न बाध्यते कथंभावात्मकं पुनः प्रकरणं क्रतुधर्ममपेक्षमाणं पुरुषधर्मे विधीयमानेऽन्यन्तं बाधितं भवति। यद्यपि कालस्यापि निमित्तवदेवानुपादेयत्वात्तुल्या वचनव्यक्तिस्तथाऽपि फलतः कालविधानं यागानुवादश्चेति विपरीतं कथ्यते। अथवा जीवनपरिमितकालद्वारेणाभ्यासश्चोदयिष्यते। स च कर्मोद्देशेन शक्यत एव विधातुमित्येवमुपदिश्यते। कर्तृधर्मपक्षे पुनर्न कथंचित्कर्मोद्देशः। एवं चैकप्रयोगत्वे सति दीर्घसत्रप्रयोगसंस्तव उपपन्नो भविष्यति। इतरथा पुनः प्रतिदिनं पर्यवसानान्न कथंचित्सत्रसारूप्यं भवेत्। तस्मात्कर्मधर्मोऽभ्यास इति॥ १॥ § 4586

धर्म इत्यनुवर्तते। तेनैषा प्रतिज्ञा कर्तृधर्मोऽयं चोद्यत इति। सोऽपि च नियमो न याथाकाम्यम्। कुतः। § 4587

यावज्जीवपदाख्यातश्रुतिवृत्तित्वसंभवः।
मत्पक्षे भवतस्तत्र लक्षणावृत्तता भवेत्॥ § 4589

इह हि यावज्जीवमिति यावत्कर्तृभविजीवनं निमित्तभूतं श्रुत्यैव प्रतिपादितम्। जुहोतियजतीत्यपि धात्वर्थानुरक्तभावनामात्रवाची प्रत्ययांशः श्रौत एव। तदुभयमपि मत्पक्षेऽनुगृह्यते। भवत्पक्षे तु जीवनेन कालो ल-
625 क्ष्येत । जुहोतियजतिभ्यामप्यभ्यासः। यत्र हि विधिः समाप्यते स चोदनार्थो भवति। भवतश्च जीवनधात्वर्थपरित्यागेन कालाभ्यासौ विधीयेते। तेन लक्षणापर्यवसायी विधिः प्राप्नोति। तत्रैतत्स्यात्। यावज्जीवमिति यावच्छब्दः श्रुत्यैव कालं ब्रवीति। तद्यथा—यावद्दोहं स्वपिति। युक्तमत्र कालग्रहणम्। वर्तमानापदेशो ह्ययं नात्र काचिन्निमित्तापेक्षा। तेन श्रुतिवृत्तं दोहनमतिक्रम्य

७ ल] प्रयोगभेदाभेदफलत्वादिति
पाठान्तरम्।

कालो गृह्यते। यदि त्विहापि यावद्दोहं स्वप्यादासीत वेति विधीयेत ततः केन वा दोहस्य निमित्तत्वं वार्येत। यावज्जीवचोदनायां तु न किंचिदतिक्रमकारणमस्ति। प्राणधारणक्रियाया एव निमित्तत्वोपपत्तेः। न च यावच्छब्दः कालवचनः क्वचित्प्रसिद्धः। क्रियामेव तु समाप्तिपर्यन्तत्वेन विशिनष्टि। क्रियाकालयोरभेदान्न लक्षणेति चेत्। अत्र वैशेषिकानपराजित्य परिहारायोपस्थातव्यम्। अपि च सत्यपि क्रियाणां कालत्वे काचिद्व्यवस्था विद्यते यतो न सर्वासु कालप्रतिपत्तिर्लोकस्य। तत्र शेषाः क्रिया उपलक्षणीकृत्य चन्द्रादित्यपरिवर्तनक्रियासु कालव्यहारो व्यवस्थितः। ता एवावान्तरक्रियापरिमाणेन प्रत्यासत्तेरन्यक्रियापरिच्छेदार्थमुपादीयमानेनोपलक्ष्यन्ते। तथा हि। § 4590

अनवस्थितमानत्वाद्गोदोहादिषु रूपतः।
चिह्नं व्यवस्थयेच्छन्ति नित्यं सूर्यादिचेष्टितम्॥§ 4592

कियता कालेन गौर्दुह्यत इत्युक्ते नियतान्येव मुहूर्तादीनि परिच्छेदकत्वेनोपादीयन्ते। तत्परिच्छेदश्च नाडिकालक्षणलवत्रुटिनिमेषादिभिर्व्यावहारिकक्रियाव्यतिरिक्तैरेव क्रियते। तदभ्यासवशेन तु व्यावहारिकाणामपि प्रायिकपरिमाणज्ञानात्परिच्छेदकत्वं भवति। न च जीवनं नाम निमेषादिवन्नियतपरिमाणं, येन परिच्छेदकत्वसामर्थ्यात्कालत्वेनाऽऽश्रीयते। तस्माद्व्यतिरिक्तकाललक्षणा दुष्परिहरा। पुनश्चाभ्यासलक्षणा। कथम्। § 4593

न ह्येकेन प्रयोगेण जीवकालोऽवरुध्यते।
विततेनापरिज्ञानादन्यथा वा वृथाश्रुतिः॥§ 4595

अनभ्यस्तं प्रयुञ्जानो यदि तावद्वितत्य प्रयुङ्क्ते जीवनपरिमितस्य कालस्यान्तरा किंचित्कर्मावयवं यदाकदाचित्कुर्वाणस्ततो मरणस्यानिरूपितकालत्वाद्यदि कथंचिदन्त्यायामवस्थायां समापयेन्न च म्रियेत तदूने काले समापनादयथाचोदितापत्तिः। अथासमाप्य म्रियेत तथाऽपि प्रक्रान्तासमापनं दोषः 626
स्यात्। न च सर्वस्वारवद्वचनमस्ति। येन मृतेऽपि समाप्येत। सायंप्रातश्चोदनं च यावज्जीवकाम्यचोदनासमीपाम्नाते सत्यौ विना प्रमाणेन केवलकाम्यविषये कल्पनीये स्यातामस्मिन्पक्षे। यदि तु तदनुरोधेन सकृदेव प्रयुज्योभयं संभावितमिति मन्येत। यथा 'पौर्णमास्यां पौर्णमास्या यजेत' इति चोदिते तदेकदेशकरणेनापि शास्त्रार्थः संभाव्यत इति न व्याप्यते तथा जीवितपरिच्छिन्नकालैकदेशवर्तिनोः सायंप्रातःकालयोरनुष्ठानाच्चोदनाद्वयमप्यनुष्ठितार्थं भविष्यतीति। तत्रोच्यते। § 4596

२४ च] सर्वस्वारवदिति—'मरणकामो ह्येतेन यजेत यः कामयेतानामयः स्वर्गं लोकमियाम्' इति वाक्येन विहिते सर्वस्वाराख्ये कर्मणि 'आर्भवे प्रस्तूयमान औदुम्बरीं सदृशेन वाससा परिवेष्ट्य ब्राह्मणाः परिसमापयत मे यज्ञमिति संप्रेष्याग्निं प्रविशति' इति प्रैषविधानाद्युक्तं यजमानमरणानन्तरमपि क्रतुसमापनमित्यर्थः।

पौर्णमास्यतिरिक्ताहर्व्यवच्छेदफला श्रुतिः।
अव्याप्तावपि तत्र स्यान्न त्विहैवं प्रतीयते॥§ 4598

यद्यपि तत्राल्पत्वात्कर्मणः पूर्वाह्णचोदनावशेन वा पौर्णमासी न व्याप्यते न किंचिद्दुष्यति। सर्वथा दिवसान्तराण्यतिक्रम्य पौर्णमास्यां तावत्कृतं कर्म तावन्मात्रं च शास्त्रेणोक्तं न व्याप्तिः। इतरत्र पुनर्जीवितव्यतिरिक्तकालासंभवाद्व्यवच्छेद्यं न किंचिदस्तीति व्याप्तावसत्यां समस्तमेव वाक्यमनर्थकं स्यात्। सायंप्रातश्चोदनयोरपि जीवनकालान्तर्गतेः सिद्धत्वाद्यावच्छब्दश्च समस्तजीवितावधिपरिग्रहार्थ एकदेशानुष्ठाने बाधितः स्यात्। अतः सायंप्रातश्चोदनामिश्रेयमभ्यासमनाक्षिपन्ती न शक्नोति पुरुषं नियोक्तुमित्यपरिहार्या लक्षणा। ननु चार्थादभ्यासो जायमानस्त्वत्पक्षवदेव न दोषं जनयेत्। तथा हि। § 4599

सकृदेव श्रुतो होमः क्रियमाणः पुनः पुनः।
न शब्दे भारमाधत्ते सामर्थ्यारोपितश्रमः॥§ 4601

अथ योऽयं मम दोषः स तवापि दोष एव, वक्तव्यो वा विशेषः। उच्यते। § 4602

627 मम प्रतिदिनं सर्वश्चोदनार्थः समाप्यते।
काम्यवच्च पृथक्त्वेष्टा तव त्वन्ते समाप्यते॥§ 4604

मम जीवनसहितसायंप्रातःकालोपजने हि सकलं कर्म कृत्वा निराकाङ्क्षे पुरुषे सति पुनरपि तादृङ्निमित्तसंभवाद्द्वितीयादिष्वहःस्वनुष्ठानम्। तत्र च प्रतिदिनं कर्मसमाप्तेर्नाभ्यास इति शक्यं वदितुम्। तद्यथा काम्ये यः फलभूमार्थी पुनः पुनः प्रयुङ्क्ते न तस्याभ्यस्तरूपमेतत्कर्मेत्येवं बुद्धिर्जायते तथाऽत्रेति। तव पुनर्जीवितपरिमितकालविधानात्कर्मणोऽपरिसमाप्तस्यैवैन्द्रवायवादिग्रहाभ्यासतुल्यमनुष्ठानम्। तच्चैतद्यावज्जीवचोदनाकृतमित्यापन्नमभ्यासविधानम्। नन्वर्थादभ्यास इति। *सत्यमेतत्तेनैव तु लक्षणाऽन्यथा श्रुतिरेव स्यात्। *तदुभयतः श्रुत्यनुरोधेन प्रकरणं बाधित्वा जीवनमुद्दिश्य होमयागविधानात्कर्तृकर्मविधिरित्युपपन्नम्॥ २॥ § 4605

अतिपत्तिरिति स्वधर्मातिक्रमोऽभिधीयते। जीवनपरिमितश्च दर्शपूर्णमासयोः कालः। न च तदतिक्रमः कथंचिदपि संभवति। प्रक्रमेण हि कर्मकालं संस्पृशदनतिक्रान्तमित्यभिधीयते। न च कश्चिदपि पूर्णमासयाजी सन्नप्रक्रममाण एव जीवनमतिलङ्घयति। न ह्यसौ दर्शपूर्णमासयाजी स्यात्।

---

२४ *] ननु विधेयत्वेऽप्यभ्यासस्य जीवनपरिमितकालान्वयान्यथानुपपत्तित एव प्रतीतेर्धातोरभ्यासलक्षणायां प्रमाणाभाव इति नन्वित्यादिनाऽऽशङ्क्य शाब्दत्वं विनाऽभ्यासस्य शाब्दविध्यन्वयायोगेनार्थात्प्रतीतिसंभवेऽपि धातुव्यापारावश्यंभावेनापरिहार्या लक्षणेत्येवं समादधाति—सत्यमित्यादिना।

२५ *] तदिति—तस्मादित्यर्थः।

अथ स्वकालापरिसमापनमतिपातनमुच्येत तथा मृतस्य तद्भवतीत्यनर्थकमेव प्रायश्चित्तविधानम्। मत्पक्षे हि प्रतिमासं दर्शपूर्णमासप्रक्रमसमाप्त्योर्जीवने निमित्ते विधानात्संभवत्यतिक्रमस्तदुत्तरकालश्च प्रायश्चित्तविषयत्वेन। ननु पूर्वपक्षेऽपि प्रतिमासमभ्यासाभ्युपगमात्तदतिक्रमनिमित्तप्रायश्चित्तविधानं भविष्यति। न शक्यमेवं वदितुम्। यत्र हि निमित्ते यच्चोदितं तेन तत्र भवितव्यं न यथेष्टम्। इह च पौर्णमास्यमावास्यातिपत्तिर्निमित्तत्वेन श्रुता, 628 न चाभ्यासस्तच्छब्दवाच्यः। यथा न ग्रहाभ्यासः कश्चिज्ज्योतिष्टोमशब्दवाच्यः। तेन जीवितपरिमिताभ्याससंयुक्तयोरेव पौर्णमास्यमावास्याशब्दवाच्यत्वमिष्टमिति नावयवानामतिपातनं निमित्तं स्यात्। ननु च पौर्णमास्यमावास्याशब्देनात्र कालोऽभिधीयते, स चावयवविषय एवेत्यवयवातिक्रमो निमित्तं स्यात्। नैतदेवम्। अतिपातनं नामातिपद्यमानस्य भवति। न च कालस्यातिपन्नत्वं धर्मोऽनतिपत्तेरविधानात्। यस्य हि यावान्विषयोऽनतिक्रमणीयत्वेन चोदितस्तस्य तदतिलङ्घनमतिपत्तिरित्युच्यते। न च कालस्य कर्मानतिक्रमणीयत्वेन चोदितं, किं तर्हि, कर्मणः कालः। तस्य हि सोऽङ्गं न तस्य कर्म। तदेव च तत्सद्भावासद्भावयोः सगुणं निर्गुणं च भवति न कालः। तदेव चानुष्ठानात्मकत्वादतिक्रमानतिक्रमौ प्रतिपद्यते न कालः। तस्य स्वभावसिद्धत्वात्। तस्माद्यः पौर्णमासीं स्वं कालमभिपद्यमानामतिपातयेदित्यवधारणात्कर्मण एव निमित्तत्वम्। न चावयवस्तच्छब्दवाच्य इत्युक्तम्॥ ३॥

§ 4606

दर्शपूर्णमासाविष्ट्वेति पूर्वेणैव न्यायेनाशेषाभ्यासनिर्वृत्त्युत्तरकालं सोमयागः स्यात्। न च मृतेनासौ कर्तुं शक्यः। अथ त्वस्ति सोमानुष्ठानकालस्तत एकान्तेनैव दर्शपूर्णमासाभ्यां जीवितकालो नावरोद्धव्यः। स च कर्तृधर्मपक्षे कर्मप्रयोगभेदान्नावरुध्यते नान्यथा। सूत्रमप्येवमस्ति चेद्दर्शपूर्णमासविनिर्मुक्तः सोमकालस्ततो यथोक्त एव कर्मप्रयोगभेदः स्यात्। कालश्चेत्कर्मभेदः स्यादित्यस्यापरा व्याख्या। यदि यावज्जीविकः कर्मधर्मकालश्चोद्येत ततो दर्शपूर्णमासमध्य एव सोमोन्यानि च कर्माणि कर्तव्यानि स्युः। ततश्च विततस्य कर्मणः कर्मान्तरेणाविच्छेदे सति दर्शपूर्णमासाविष्ट्वेति बाध्येत। अथवा 'एष स्वर्गाल्लोकाच्छिद्यते एतद्यज्ञश्छिद्यते' इत्येवमादिभिश्च 629 निन्दितमनुष्ठीयेत। तस्मादपि न कालविधानमिति। मुक्तकान्यार्थदर्शनद्वयं पूर्वसूत्रगोचरभूतं दर्शयति। तद्यथा। आहिताग्निर्वा एष सन्निति दीक्षितस्य दानादौ निषिद्धे विध्यन्तरशेषभूतः परिवेदनसरूपार्थवादो भवति। एतावन्तं हि कालमसावग्नि होत्रादिदेवताभ्यो भागमदत्त्वा ता अनुध्यायिनीः करोति नायमस्मभ्यं ददातीत्येवं चिन्तायुक्ताः करोतीत्येतन्नियमपक्षे युज्यते। कालविधिपक्षे तु काम्यत्वादग्निहोत्रस्य यथे ष्टप्रयोगे सति नियोगतो दातव्याभावादनुध्यायिनीवचनं नोपपद्यते। तस्मादपि नियमवचनम्। एतेन

---

११ यं] सूत्रगोचरनित्यर्थः।

पूर्वसूत्रगोचरभूतमिति—लिङ्गदहर्शन्नाद्येति

जरामर्यवचनविधानं व्याख्यातम्। काम्यत्वकल्पनायामप्रयोगादपि निर्मोके सति जरामरणनिर्मोकवचनवैयर्थ्यप्रसङ्गः॥ ४॥ § 4607

यदेतन्मुक्तकमभिहितमेतदेव सूत्रारूढं करोति। नियमपक्षे ह्येतदेवं स्यात्। अनित्यत्वात्तु भवत्पक्षे नैवं स्यात्। अथवा यावज्जीवशब्देन काले गृह्यमाणे लक्षणादोष उक्तस्तमभ्युपेत्याभिधीयते सत्यामपि लक्षणायामनित्यत्वान्नैवं स्यात्। तन्नाम कालोपलक्षणं युक्तं यन्नित्यं कियताऽपि कालेनाविनाभूतं, यदहश्चन्द्रमा न दृश्यतेताममावास्यां विद्यादित्यादिवत्। न च सर्वप्राण-
630 भृतामेव जीवनपरिसमाप्तिर्यतः कुतश्चिद्व्यस्थितस्वरूपा, यया कालो लक्ष्येत। तदेतदेवमापद्यते यदैवेदं भवति ततश्चानित्यत्वान्निमित्तमेवैतदिति सिद्धम्। कथं तर्हि नियतनिमित्तत्वान्नित्यमित्युच्यते, यावच्छरीरभावित्वाभिप्रायमेतदित्यदोषः॥ ५॥ § 4608

नियमः सत्पुरुषधर्मत्वान्नातिदिश्यत इति च वक्ष्यते। कालः सन्नतिदिश्येत। ननु कालोऽपि द्वैयहकाल्यवत्सद्यःकालतया बाध्येत। नैतदेवम्। यावज्जीवं पौर्णमास्यमावास्ययोः सद्यः कुर्यादित्यवधारणप्रसङ्गात्॥ ६॥ § 4609

कर्तृधर्मपक्षे यदिदं त्वभिमतं यावज्जीवमिति कालशास्त्रमिदं निमित्तं भविष्यतीत्येतावत्सूत्रम्। यत्तु भाष्यकारेण व्यपवर्गदर्शनमुक्तं तद्यदि दर्शपूर्णमासाविष्ट्वेत्येतदेवाभिप्रेतं ततः पुनरुक्तम्। अथान्यत्तदप्यनुदाहृतत्वान्न ज्ञायते। तेनानन्तरालोचनयैवं योजयितव्यम्। त्वत्पक्षे विकृतीनामपवर्गः स्यात्। मत्पक्षे तु तासां व्यपवर्गदर्शनं सिद्धान्त उपपत्स्यते। अथवा निगमनसूत्रमेतदिति व्याख्येयम्। अथवा सूत्रकारेण कर्तृधर्मो नियमोऽयमित्युक्तम्। यावज्जीवशब्दस्य तु का गतिरिति नाभिहितमत आह। एवं सति कालशास्त्रमेव निमित्तं स्यात्। अथवाऽग्निहोत्रे दर्शपूर्णमासयोस्तावद्यावज्जीवग्रहणात्कर्तृधर्मनियमत्वं भवेत्पशुसोमचातुर्मास्येषु तु कथम्। तदुच्यते। तत्रापि वीप्सायुक्तं कालशास्त्रमेव निमित्तं स्यात् ‘वसन्ते वसन्ते ज्योतिषा’ इत्यादि। न तावदेतत्काम्यस्योपदिश्यते। स हि यावदिच्छमङ्गत्वेनैव स्थितत्वान्नैवं वक्तुं शक्यते। अथापि नैयमिकस्य सकृत्प्रयोगः स्यात्तत्रापि वीप्साऽनर्थिका भवेत्। न च वसन्तेयत्तावधारणाप्रमाणमस्ति। तस्माद्यावज्जीवं ये वसन्तास्तेष्विति विज्ञायते। सप्तम्यपि च ‘भिन्ने जुहोति’ इत्यादिवन्निमित्तार्था भविष्यति। तेनोच्यते
631 सर्वत्रैवंजातीयके कर्तृधर्मनियमावधारणात्कालशास्त्रं निमित्तशास्त्रं प्रत्येतव्यम्। एतेनैव पशुचातुर्मास्यादिष्वपि नैयमिकत्वसिद्धिः॥ ७॥ § 4610

इति यावज्जीवाधिकरणम्॥ १॥

१ ते] ( अ॰ ८ पा॰ १ अ॰ ४ )    इत्यत्रेति शेषः।

## ०.०.७३ शाखान्तराधिकरणम्

उक्तभेदकारणषट्कव्यतिरिक्तकारणनिराकरणार्थमिदमारभ्यते। तत्रैव कानिचित्केन-चित्प्रकारान्तरेणाऽऽशङ्क्य प्रतिषिध्यन्ते। तत्तु प्रत्युदाहरणं प्रविविश्चन्तो योजयिष्यामः। कथं पुनरत्र वेदान्तराणि नोदाह्रियन्ते। केचिदाहुः। शाखान्तरशब्देन तान्यप्युदाहृतानीति। न त्वेतद्युक्तम्। कुतः। § 4612

शाखान्तरे यथा कर्म कृत्स्नरूपं प्रतीयते।
किंचिद्गुणसमाम्नानान्नैवं वेदान्तरेषु तत्॥§ 4614

यत्र हि कर्म निराकाङ्क्षमाम्नायते तत्र तद्भेदप्रतिपत्तिक्षमं भवति। यथा सर्वास्वध्वर्युशाखासु दर्शपूर्णमासज्योतिष्टोमादीनि समस्तद्रव्यदेवतादियुक्तत्वादन्योन्यानिरपेक्षाणि विधीयन्त इति भेदाशङ्कां सहन्ते न त्वेवं वेदान्तरेऽपि। तत्र हि द्रव्यदेवतारहितं कर्ममात्रं प्रस्तुत्य स्तोत्रशस्त्रयाज्यानुवाक्यादिमात्रं विधीयते। न च तावताऽस्य नैराकाङ्क्ष्यं भवति। दृष्टार्थानामेव द्रव्यदेवतातत्संस्काराणामभावात्। यत्तु तत्र द्रव्यदेवतायुक्तमाम्नायते तस्याऽऽध्वर्यवे गुणमात्रविधानात्साङ्गत्वम्। तथा च वक्ष्यति'भूयस्त्वेनोभयश्रुति' इति। तस्माच्छाखान्तराण्येवोदाहरणम्। तत्र च नामभेदस्ताव- त्कारणं दृश्यते। तद्यथा—काठकेऽग्निहोत्रे तैत्तिरीयेऽग्निहोत्र इदं पठ्यत इत्यादि। तथा रूपभेद 632 एकादशकपालत्वादि। वैश्वानरद्वादशाष्टत्वादिवदामिक्षावाजिनवच्च न द्वादशत्वैकादशत्वयोरितरेतरसंक्रान्तिरुपपद्यत इति गुण एव भेत्ता। कारीर्यग्न्यश्वमेधेष्वपि भूमिभोजनोदकुम्भाश्वघासा गुणा एव सन्त इतिकर्तव्यतास्थानीयत्वेन बाह्यतरत्वात्पूर्वस्माद्भेदेनोपात्ताः। **परेऽन्यं धर्ममाचरन्तीति** विरोधिगुणान्तरप्रदर्शनार्थम्। **अश्वघासादेरिति**—पञ्चम्यन्तं मध्ये पठितमुभाभ्यां सह संबध्यते। पूर्वेण तावदश्वघासादेरन्यमुत्तरेणाप्यश्वघासादेर्निष्पन्नमुपकारमाकाङ्क्षत्यश्वमेधादिरिति। पुनरुक्तत्वेन पुनःश्रुतिर्भेदिकोक्ता। निन्दायामप्युदितानुदितकालसंयोगभेदाद्गुण एव भेदकः। उदितहोमवादिनो ह्यनुदितहोमं निन्दन्त्यनृतवादित्वेन। 'सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा' इति ह्यनुदिते सूर्येऽभिधीयमानमनृतं जायते। तस्मादुदितहोमः कर्तव्य इति। इतरे पुनराहुः, यः पूजां पूज्याय प्रथममेव गृहीत्वोत्तिष्ठते स साधुः। यस्त्वतिक्रान्तं व्याहृत्य पूजयति नासौ सम्यक्पूजकः। तस्मादनुदितहोम एव कर्तव्य इति। तत्रैकत्वे विप्रतिषिद्धधर्मसमवायप्रसङ्गः। नानात्वे तु न कश्चिद्विरोधः। अशक्तिद्वारेणापि गुण 633 एवोपन्यस्तः शाखान्तरीयाणां गुणानामेककर्मण्युपसंहाराशक्तेरपूर्वसंयोगः। समाप्तिभेदोऽपि गुण एव। निन्दया गतार्थोऽपि सम्प्रायश्चित्तभेदः पुनरुपन्यस्यते। कदाचिदत्र वैकल्पिकत्वपरिहारं ब्रूयात्तत्त्वभ्युपेत्योच्यते। वैकल्पिकेषु

१ तिरि] व्यतिरिक्तकारणेति—शाखान्तराख्येत्यर्थः।
१ त्रैव] स्वाभिप्रायमाह—तत्रैवेत्यादिना।
१३ ति] ( अ॰ ३ पा॰ २ अ॰ ३ सू॰ १० )

ह्युभयथाऽप्यवैगुण्यं भवति। अत्र च प्रायश्चित्तविधानादुभयत्रापि वैगुण्यं दृश्यते। न च तत्कर्मैकत्वे घटते। तस्मादपि भेदः। परिहारसूत्रवशेन पश्चान्यार्थदर्शनान्युच्यन्ते। यदि पुरा दीक्षितवन्तस्ततो बृहत्सामानमतिरात्रमुपेयुः। पूर्वदीक्षायां रथंतरस्य प्रयुक्तत्वात्। अथ न दीक्षितवन्तस्ततो रथंतरसामानमेवोपेयुरिति। द्वादशाहेऽनिष्टप्रथमयज्ञत्वं कर्मभेदे भवति। ताण्डकवचनेन ज्योतिष्टोमान्तरस्य प्राथम्यनियमे सति एतच्छाखागतस्यानियमात्। एकत्वे तु सर्वशाखास्थज्योतिष्टोमप्राथम्यनियमाददीक्षितानां दर्शनं न स्यात्। तथा
634 यूपैकादशिन्यां पक्षवेदिसंमानयोरर्थप्राप्तयोरेकं निन्दित्वेतरपरिग्रहो वचनान्तरप्राप्त्यसत्त्वं द्योतयति। वचनान्तरे हि किमेकस्य निन्दया, किं वेतरस्य स्फुटविधाने सति स्तुत्या। तस्मान्नूनं शाखान्तरीयो रथाक्षमात्रान्तरालविधिरेषां नास्ति। ततश्च कर्मभेद इति। द्वे स्तोत्रीये विराजं दशकमतिरिच्येते इति तिस्रोऽतिरिच्यन्त इति च ज्योतिष्टोमातिरात्रैकत्वे सति उपपन्नम्। भेदे तु यथाविधि भवतीत्यविरोधः। पुरोडाशिसांनाय्यिदर्शनं दीक्षितादीक्षितसंदर्शनेनैव गतं परिहारप्रकारान्तरत्वादुदाहृतम्। किं च। § 4615

पृष्ठद्वयविकल्पः स्याच्छाखान्तरविधानतः।
स च प्रकृतितः प्राप्तः कर्मैकत्वे वृथा भवेत्॥ § 4617

635 उपहव्यभेदे तु नियमार्थायां पुनः श्रुतावर्थवत्ता। तस्मादपि कर्मभेदः॥ ८॥ § 4618

सर्वत्र प्रत्यभिज्ञानात्संज्ञारूपगुणादिभिः।
एककर्मत्वविज्ञानं न शाखास्वपगच्छति॥ § 4620

**सर्वब्राह्मणव्रत्ययमिति**—एकस्यामपि शाखायां ब्राह्मणानेकत्वेऽपि तदेकं कर्मेत्यभिप्रायः। तद्यथोद्गातॄणां पञ्चविंशषड्विंशब्राह्मणयोर्ज्योतिष्टोमद्वादशाहौ। संयोग इति—प्राधान्यात्फलसंयोगग्रहणम्। रूपमिति—प्रत्यासत्तेर्द्रव्यदेवतम्। चोदनेति—सर्वधात्वर्थभावनाविषयो विधिः। ज्योतिष्टोमादि नामधेयं च सर्वशाखास्वविशिष्टं दृश्यते। तस्मादियतः प्रत्यभिज्ञानकारणकलापादभेदसिद्धिः। न चान्यः कश्चिद्भेदहेतुरस्ति। प्रकरणान्तरवच्छाखान्तरेषु परस्परासंनिधानमिति चेन्न। तेनैवेतराग्रहणात्। येन हि प्रदेशान्तरे किंचित्कर्म गृहीतं भवति स एव तत्सदृशमन्यत्रोपलभमानः शक्नोति ततोऽन्यदेतदित्यध्यवसातुम्। एकशाखाविषये च सर्वशाखाध्ययनादेवं भवति। शाखान्तरे पुनरन्यशाखागतज्योतिष्टोमाद्यनवबोधादपूर्ववदुच्यमानेषु न भेदबुद्धिर्जायते। यस्तर्हि द्वे शाखे पठति तस्य प्रकरणान्तरन्यायेन भवितव्यमेकशाखागतेषु

---

८ योरेकं] अर्थप्राप्तयोरिति—‘अर्धमन्तर्वेदि मिनोति’ ‘अर्धं बहिर्वेदि’ इतिवचनेन वेद्यग्रे विहितस्य यूपमानस्य दैक्षातिदेशपरम्परया यूपैकादशिनीं प्राप्तस्य वेदिदेशातिक्रमायोगेन वेदिसंमानस्य। एवं वेद्याधारस्य श्येनादिपक्ष्याकारस्थलावयवभूतपक्षद्वयसंमानस्य चार्थप्राप्तयोरित्यर्थः।

च ब्राह्मणान्तरेषु। नैष दोषः। शाखान्तराध्ययनं तावदेकस्य पुंसो नैवेष्यते। किं कारणम्। § 4621

स्वाध्यायग्रहणेनैका शाखा हि परिगृह्यते।
एकार्थानां विकल्पश्च कर्मैकत्वे भविष्यति॥§ 4623

यथैवाऽऽकृतिः प्रतिव्यक्ति समवैति तथैव स्वाध्यायत्वमेकैकस्यां शाखायाम्। अतश्च 'स्वाध्यायोऽध्येतव्य' इति कर्मावबोधनं प्रत्युपादीयमानत्वाद्विवक्षितैकसंख्यैका शाखाऽध्येतव्या। नन्वेवं वेदान्तरस्याप्यध्ययनं न प्रसज्यते। न। वचनान्तरेण प्रतिप्रसवात् 'अनया त्रय्या विद्यया' इति। तथा 'वेदानधीत्य वेदौ वा' इति मानवम्। साकाङ्क्षत्वाच्च वेदान्तराणामतुल्यकार्यत्वकारितः समुच्चयोऽवगम्यते। शाखान्तरेषु त्वन्योन्यनिरपेक्षस्वतंत्रज्योतिष्टोमादिरूपप्रतीतेस्तुल्यार्थत्वनिमित्तो विकल्पः। साकाङ्क्षत्वादेव चैक- 636
शाखागतब्राह्मणान्तरसमुच्चयाश्रयणम्। नन्वेककर्मत्वाद्विकल्पो विकल्पाच्चैककर्मत्वमितीतरेतराश्रयत्वं भवेत्। न। प्रत्यभिज्ञानमात्रेणैकत्वे विज्ञाते संख्यावशेन विकल्पसिद्धेः। अतश्च यो नामातिमेधावित्वादेकवेदगतानि शाखान्तराण्यप्यधीते स समृद्धः सन् व्रीहियवैरपि मिश्रैर्यजेत। तस्मादेकं कर्मेति॥ ९॥ § 4624

यद्यपि तावत्काठकादिकं नामधेयं स्यात्तथाऽप्युत्पत्तिसंयोगाभावान्नैव भिन्द्यात्। इदं तु नैव कर्मनामधेयम्। अन्यायो ह्यनेकार्थत्वमित्यनेन न्यायेन ग्रन्थनामत्वे सति कर्माणि लक्षणयैव प्रयोगोपपत्तेः। कथं पुनरवगम्यते ग्रन्थनामैतत्कर्मण्युपचर्यते न पुनर्विपर्यय इति। तदुच्यते। § 4625

शाखया ह्येकया योगाद्बहुकर्मावबोधनम्।
युज्यते कर्मनानात्वान्नैकशाखोपलक्षणम्॥§ 4627

काठकादिशब्दो हि परस्परासंबद्धेषु बहुषु कर्मसु प्रयुज्यते। स यदि कर्मनाम स्यात्कर्मान्तरे न प्रयुज्येत। न हि तत्र लक्षणोपपद्यते। संबन्धाभावात्। सर्वाभिधानं तु व्यक्तिवद्दुरुपादम्। तस्माच्छाखयैव कर्माणि लक्ष्यन्ते न कर्मभिः शाखाः। ततश्च संज्ञया कामं शाखा एव भिद्यन्तां न कर्माणि। संबन्धाभावात्। तस्मात्तान्येवाग्निहोत्रादीनि संबन्धिभेदादन्यथाऽन्यथा च व्यपदिश्यन्ते॥ १०॥ § 4628

प्रायेण हेतुविपर्यये कार्यविपर्ययो दृश्यत इति काठकादिसंज्ञैकत्वादेकशाखाधीताग्निहोत्रादेरेकत्वप्रसङ्गः। साध्यव्यभिचारित्वादियमर्थापत्तिसमा नाम जातिः पूर्वपक्षहेतोरसिद्धत्वोपालम्भप्रदर्शनार्थमेवाभिहिता। सर्वत्र च दुष्टे पूर्व- 637
पक्षे जातीनामुत्तरत्वं केषांचिदिष्टम्॥ ११॥ § 4629

कृत्रिमं काठकाद्युक्तमाख्याप्रवचनादिति।

४ क्षे] असदुत्तरत्वं जातिरित्यभिधीयते।

न वाऽनादीनि भिद्यन्ते कर्माण्यादिमता सता॥ § 4631

यद्यपि काठकादेर्जातेर्नित्यत्वान्नित्यैवाऽऽख्या तथाऽपि प्रवचननिमित्तेयं स्मर्यते न च कर्माणि प्रोच्यन्ते। शब्दविषयत्वात्प्रवचनस्य। तस्मादपि न संज्ञया कर्मभेद इति॥ १२॥ § 4632

न च कपालसंख्याभेदाद्भेदः। तत्संबन्धिद्वारभेदानभ्युपगमात्। तस्मादेकस्मिन्नेव कर्मणि साधनविकल्पो भविष्यति। ननु चोत्पत्तिवाक्यशिष्टत्वाद्विकल्पो नास्तीत्युक्तम्। नैष दोषः। उभयोरुत्पत्तिवाक्यशिष्टत्वाविशेषेण तुल्यबलत्वात्। कथं पुनरनेकवाक्योत्पादितस्यैकत्वं विज्ञायत इति। तस्योत्तरसूत्रे परिहारं वक्ष्यामः॥ १३॥॥ १४॥* § 4633

638 अनुभाषणसूत्रमेतत्। अथवा पुनरुक्तत्वपरिहारार्थमेवैतत्। पुनःश्रुतेरर्थवादगुणार्थत्वेनान्यार्थत्वात्॥ १५॥ § 4634

द्वितीयव्याख्याने परिहारान्तरनिवृत्त्यर्थो वाशब्दः। तत्रान्यार्था पुनःश्रुतिर्भवति यत्र तावन्मात्रमेव श्रूयते। यत्र चैकवाक्यगतं विधेयान्तरं विद्यते। न त्विह तदेकमपि। समस्तेतिकर्तव्यतोपेतप्रधानपुनःश्रुतिश्रवणात्। एतमेव श्रुतिसंयोगाविशेषं मन्यते। न चैषा पुनःश्रुतिः। कुतः। § 4635

एकशाखानिबद्धानां ज्ञायते हि पुनः श्रुतिः।
कठादिचरणानां तु प्रतिशाखं सकृच्छ्रुतिः॥ § 4637

पूर्वोक्तेन शाखाध्ययनविकल्पेन येन काठकमग्निहोत्रं श्रुतं नासौ कदाचित्तैत्तिरीयकं शृणोति। शृण्वन्नपि वा स्वशाखयैव प्रतिपन्नत्वात्तैत्तिरीयकप्रतिपत्त्यर्थमेवैतदिति कल्पयित्वा न पुनःश्रुतिं मन्यते। एवमितरोऽपीतरदिति सर्व एवैकश्रुतिसंयोगाविशेषादग्निहोत्रादि प्रतिपद्यन्ते। न च तत्र पौर्वापर्यमस्ति येन ज्ञायेतानया शाखया प्रथमं विहिते शाखान्तरीये पुनःश्रुतिर्भूत्वा भेत्स्यतीति। आह च। § 4638

शाखानां युगपद्वृत्तेर्न पुनः श्रुतिकल्पना।
न हि तत्रैकशाखावत्क्रमेणाध्ययनं स्थितम्॥ § 4640

तस्माद्यथैकशाखाकर्म देशान्तरपुरुषान्तरादिषु पुनः श्रूयमाणमपि प्रतिपाद्यभेदान्न पुनरुक्तं भवत्येवं शाखान्तरेष्विति। § 4641

ननु चैकयाऽपि शाखया समस्तपुरुषप्रतिपादने सति, अनर्थकमेव शाखान्तरम्। नानर्थकम्। न हि कश्चिद्द्वे शाखे अधीते। न च पुरुषान्तरगतं तत्प्रतिपादनेनार्थवदन्यान्प्रत्यनर्थकं भवति। यस्तु तेऽपि किल शाखिनस्तामेवाधीत्य प्रतिपत्स्यन्त इत्यभिप्रायः स नित्यत्वाद्वेदस्य तदध्ययनाध्यापनसंबन्धानादित्वादनुपपन्नः। किं च। § 4642

५ *] असदुत्तरत्वं जातिरित्यभिधीयते।

१५ मं] एकशाखायां कर्मेति पाठान्तरम्।

संप्रदायागतां मुक्त्वा स्वां समाख्यानिबन्धिनीम्।
शाखां शाखान्तरं युक्तं नाध्येतुं सदृशे श्रमे॥§ 4644

तस्मात्परकीयशाखाध्ययनेऽप्यस्त्येव पुरुषाणां श्रम इति यथावस्थित- 639
शाखाध्ययनमेव। न च वेदः पुनरुक्तादिदोषद्वारं पर्यनुयोगमर्हति। अत्रान्तरे
भाष्यकारस्य सूत्रं भ्रष्टम् 'वाक्यासमवायात्' इति। तदेवं व्याख्येयम्।
नैकस्मिन्पुरुषे शाखान्तरवाक्यं समवैति॥ १६॥ १७॥ § 4645

एकस्य वेदवृक्षस्य किंचित्कर्मफलाश्रयात्।
एवं शाखाः प्रसिध्यन्ति बहुशाखैकवृक्षवत्॥§ 4647

यदि प्रतिशाखं कर्मभेदः स्यात्तत एकमूलाभावादादित एवाऽऽरभ्य
भिद्यमानत्वात्समस्तकर्माख्यपुष्पफलान्तरत्वाद्वृक्षान्तरवद्वेदान्तराण्येवोच्येरन्। न
शाखान्तराणि। एककर्ममूलविधिस्कन्धरूपत्वे सतीतिकर्तव्यतायाः क्व-
चित्किंचिदधिकमित्यालोच्य सारूप्यादुपपन्नः शाखान्तरभेदव्यपदेशः। अथवा
पौनरुक्त्यपरिहारार्थमेव सूत्रम्। तत्र नाम पुनरुक्तता भवति यत्र पूर्वोक्तोऽर्थ-
स्तस्यैव पुंसः संनिहितो भवति। न त्विह शाखान्तरगतस्य संनिधानमित्य-
पुनरुक्तता॥ १८॥ § 4648

अभ्युपेत्यवादोऽयम्। सत्यपि कर्मभेदे ये तावद्वाक्यसंयुक्ताः शेषा-
स्तेऽग्निहोत्रादिमात्रोद्देशेन विधीयमानाः सर्वार्थत्वेन ज्ञायन्त इत्यवश्योपादात-
व्या इति नैव शाखामात्रपरितोषव्यवस्था लभ्यते। न च सूत्रकाराणामपि
कश्चित्स्वशाखोपसंहारमात्रेणावस्थितो येन प्रतिशाखं कर्मव्यवस्था समर्थ्येत। 640
*प्रधानान्यपि प्राधान्येन यजमाननियमं प्रति, अप्रभवन्तीभिः समाख्याभिर-
र्थिमात्रमुद्दिश्य विधीयमानानि सर्वशाखागतान्येकैकं पुरुषमुपतिष्ठन्ते। तत्रैक-
फलत्वादसमुच्चये येन केनचित्साध्यमाने फलेऽन्येषां वैयर्थ्यप्रसङ्गः। अथ
तेषां विकल्पेनार्थवत्त्वं, तद्वरं शाखान्तराणामेव व्यवस्थितप्रतिपद्यमानानाम-
नाकुलतरं परिकल्पितमित्यपुनरुक्तता॥ १९॥ § 4649

असमाप्तिवदिति वा छेदः। कर्मभेदपक्षे हि यावदेव येषां समाम्नानं
तावदेव तेषां समाप्यत इति न ब्रूयुरत्रास्माकं न समाप्यत इति। अन्वा-
रोहो नाम स्थलारोहणमन्त्राः। तेषु मैत्रायणीयानां समाप्यते नास्माकमित्य-
भिधानादध्येतॄणामपि कर्मैकत्वं प्रसिद्धमित्यवसीयते॥ २०॥ § 4650

अन्योन्यनिन्दयेतरेतरविधाने तुल्यार्थयोरुदितानुदितत्वयोः कर्मणि विक-
ल्पो भविष्यति। त्वत्पक्षेऽपि चासौ कर्मणोः फलं प्रत्यविशिष्टः। तथा श-
क्त्यशक्ती सर्वपुरुषाणामव्यवस्थिते। सर्वशाखास्वधिकविधावेकशाखायां च 641

४ स्था] समर्थ्येत इति—एतावता ग्रन्थेन चैकमग्निहोत्रादिकर्म प्रत्यङ्गं न शिष्यत इत्येवं सूत्रव्याख्यानार्थं यच्चाग्निहोत्रस्य किंचिदिति भाष्यं व्याख्यातं ज्ञेयम्।
५ *] प्रधानान्यपीत्यादिवार्तिकं तु न चैकं कठादिपुरुषं प्रत्येवाग्निहोत्रादिकर्म शिष्यत इत्येवं सूत्रव्याख्यानार्थं न च यत्काठक इत्याद्यभाष्यव्याख्यानार्थं ज्ञेयम्।
८ राणामेव] व्यवस्थितेति—व्यवस्थितैः कठादिचरणैरित्यर्थः।

स्तोकान्तरत्वादविशिष्टे। केचिच्चात्र लाघवार्थिन एवं वर्णयन्ति। य एव किल वाक्यसंयुक्ताः शाखान्तरविधयस्त एव संकीर्यन्ते। ये तु प्राकरणिकास्तेषां व्यवस्थैवेति। कुतः। § 4651

एककर्मगताः पुंसां विकल्पन्ते विधायकाः।
तत्समीपसमाम्नातं ग्राह्यं प्रकरणस्य च॥§ 4653

शाखान्तरेषु विकल्पमानेषु यथैव प्रधानं विधीयतेऽर्थिनस्तदीयः कथंभावस्तामेव व्याप्नोति न शाखान्तराणि। अतश्चान्यगता गुणाः कथंभावेन नापेक्षिताः प्रयोगवचनेनामुपसंहृता नाङ्गं भवन्तीति नानुष्ठेयाः। ततश्च वाक्यसंयुक्तानामल्पत्वाद्विधीयमानानामस्त्युपसंहरणशक्तिरिति। न त्वेतद्युक्तमिव। तथा हि। § 4654

शाखान्तरगतस्यापि यदङ्गं कर्मणः स्थितम्।
तस्यान्यत्रापि तादर्थ्यं प्राप्तं केन निवार्यते॥§ 4656

प्रतिवेदमपि च प्रकरणं पुरुषस्य धर्मानुपदिशति। न च तद्वेदान्तरस्थं प्रत्यप्रमाणम्, तथा शाखान्तरेऽपि द्रष्टव्यम्। कर्मधर्माश्चैते विज्ञायन्ते। तच्च कर्म शाखान्तरेष्वपि तदेवेत्यङ्गत्वाविशेषः। यद्यपि प्रकरणरूपमन्यत्तथाऽपि शाखान्तरस्थेनानेनैतेऽपि धर्मा गृहीता इत्यवधारणान्न स्वप्रकरणगृहीतेभ्यो विशिष्यन्ते सर्वास्वपि च शाखास्वधिकविधयो न कथंचिच्छाखया परिमिता भवन्तीत्यल्प एवाऽऽयास इति नाशक्तिः। समाप्तिश्चाधीतापेक्षयोपपन्नत्वान्न भेदं कल्पयति॥ २१॥ § 4657

अनुभाषणसूत्रं सामान्यपरिहारसूत्रं वा॥ २२॥ § 4658

642 वैकल्पिकानामादित एवाङ्गीकरणादाश्रितक्रमातिक्रमे प्रायश्चित्तविधिरुपपत्स्यते॥ २३॥ § 4659

एकत्वेऽपि समाप्तिर्लिङ्गत्वेनोक्ता। ‘समाप्तिवच्च संप्रेक्षा’ इति समाप्तिवचनं नानात्वेऽपि। तत्र न्यायानुसारित्वादेकत्वस्यैव साधिका। तद्वचनस्येयमुपपत्तिः पूर्ववत्त्वादिति, आरम्भापेत्क्षत्वात्। अथवा शब्दप्रयोगस्य प्रसिद्धिपूर्वकत्वाद्यादृशी वयं समाप्तिं पश्यामस्तादृश्यामयं प्रयुक्त इति निश्चिनुमः। स च वस्तुन्यसमाप्तेऽपि तच्छाखाविज्ञेयपदार्थसमाप्तौ प्रयुक्त इति दृश्यते। तस्मादविरोधः॥ २४॥ § 4660

अदीक्षितदर्शनं द्वादशाहे तवाप्यनुपपन्नम्। ताण्डके सर्वशाखागतज्योतिष्टोमानुवादेन प्राथम्यविधानात्। न हि तत्रापरस्यापि ज्योतिष्टोमस्योत्पत्तिरस्ति यस्य नियमः स्यात्। अत आध्वर्यवाणामेव नियमे, उभयपक्षे समे च दोषे सति उभाभ्यामेषोऽर्थो वर्णनीयः, यदि द्वादशाहेन पुरा दिदीक्षाणा आदिदीक्षाणा वेति। तस्मादविशिष्टमेतत्॥ २५॥ § 4661

643 अथ यदुक्तमेकादशिन्यां पक्षवेदिसंमानदर्शनं न स्यादिति। तत्र ब्रूमः। § 4662

अन्यथाऽपि तु नैवास्ति पक्षवेद्यादिमानता।
एकादशिन्यभावेन स्तूयते ह्येकयूपता॥ § 4664

एकयूप एकादश पशव इत्यस्य विधेः शेषोऽयं यत्पक्षसंमितामित्यादि। एकादशिन्यां हि सत्यामन्यतरसंमानाश्रयणात्क्लेशो भवेत्। तस्मादेकयूप एव वरमिति। पक्षसंमानं तावदत्यन्ताप्राप्तमेवेति नित्यानुवादः। वेदिसंमानोपदेशोऽपि प्रशंसारूपेणैकयूपप्रशस्ततरत्वज्ञापनार्थः। रथाक्षमात्रान्तरालता च यत्रैकादशिनी विहिता तत्र भविष्यतीत्यविरोधः। इह तु वेदिसंमानस्य प्रशंसया विधेयत्वप्रतीतेरशक्यमन्यस्तुत्यर्थत्वं कल्पयितुम्। अतः पक्षसंमानस्याप्राप्तस्यैव वेदिसंमानस्तुत्यर्थो नित्यानुवाद इति समर्थयितव्यम्। प्राकरणिकत्वाद्यास्यैवाग्नौ बलीयस्त्वमित्यनारभ्याधीतो रथाक्षमात्रान्तरालविधिस्तद्विनिर्मुक्ता विकृतीर्गमिष्यति। सूत्रमप्येवं नेयम्। यदि हि द्रव्ये वेदिसंमानं न चोद्येत ततोऽर्थानां—पक्षसंमानादिविधीनामव्यवस्था स्यात्। सा च रथान्तरालत्वेन बाध्येत, न त्वेवमस्तीत्यविरोधः॥ २६॥ § 4665

वैकल्पिके षोडशिन्यगृह्यमाणे द्वयोरतिरेकः। क्रियमाणे त्वेकविंशतिप्रच- 644
याद्‌दृग्द्वयादेकातिरेकेण तिस्रो भवन्ति। तस्मादविरोधः॥ २७॥ § 4666

सारस्वते हि द्वादशाहन्यायेनैवोभयोः पक्षयोर्ज्योतिष्टोमपूर्वकत्वादवश्यमेवं वक्तव्यम्। यदा पुरोडाशिनः पौर्णमासीपक्षे तदोपवसन्ति, यदा सांनाय्यिनोऽमावास्यापक्षे तदा वत्सानपाकुर्वन्तीति। भवति हि कालभेदादपि कर्तृभेदोपचारस्तस्मादप्यदोषः॥ २८॥ § 4667

अनुभाषणं सामान्यपरिहारो वा॥ २९॥ § 4668

संस्थाव्यवस्थार्था वा बृहद्रथंतरयोः पुनःश्रुतिर्भविष्यति॥ ३०॥ § 4669

शाखान्तरविहितप्रयाजानुवादेन सह होमं वदन्नन्यशाखाधीतं च ‘कुटरुरसि’ इति मन्त्रमश्मादाने विदधत्सर्वशाखाप्रत्ययत्वं दर्शयति॥ ३१॥ § 4670

प्रतिशाखं वा विधिपृथक्त्वं व्यवतिष्ठेत। तथा सति हि क्रमभेदं न यास्यन्ति स्वशाखाविहिताः क्रियाः। परिमाणं च तद्वर्ति नान्यत्वं प्रतिपत्स्यते॥ ३२॥ § 4671

यत्र स्मार्ताः पदार्था न क्रमकालपरिमाणानुरोधेन बाधितास्तत्र श्रौता 646
बाधिष्यन्त इति कुत एतत्। तेनैव गतत्वादवाच्यमिति चेन्न। सूत्रकारस्यात्रैव प्रथमाभिधानात्। तत्र हि कारणाग्रहणमात्रमुपपत्तिरुक्ता। शेषं त्विह सिद्धमसूत्रितमित्यपुनरुक्तत्वम्। § 4672

---

११ हि] चयन इत्यर्थः।
१२ संमानादिवि] विधेयानामित्यर्थः।
१ रिहारो] परिहार इति।
अत्रेदमाकूतम्—उपहव्ये बृहद्रथंतरपुनःश्रुतेर्नास्माकं प्रतिप्रसवः प्रयोजनत्वेनाभीप्सितः। येनोपालभ्येमहि। किं तु, अन्यत्किंचिदित्येवं सामान्यतः परिहार इति।
१ स्थार्था] संस्थाव्यवस्थार्था वेति—वाकारश्चार्थे। एवं च भाष्योक्तं प्रयोजनमुपलक्षणं विज्ञेयम्। अन्यथा दक्षिणाव्यवस्थामात्रार्थत्वे संस्थापुनःश्रुत्यानर्थक्यापरिहारात्। न च वाक्यभेदः शङ्कनीयः। अतिदेशतः पूर्वप्रवृत्त्या विशिष्टविध्यङ्गीकारेण तदयोगादिति।
२ तेनैव] तेनैवेति—शिष्टाकोपाधिकरणेनैवेत्यर्थः।

तस्मात्तदेवेति मते न कर्म भिन्नं कथंचित्प्रतिशाखमिष्टम्।
न कारणं सप्तममस्ति चान्यदतो यथोक्तैव तु भेदसिद्धिः॥
३३॥§ 4674

इति शाखान्तराधिकरणम्॥ २॥

इति श्रीभट्टकुमारिलविरचिते मीमांसाभाष्यव्याख्याने तन्त्रवार्तिके
द्वितीयाध्यायस्य चतुर्थश्चरणः समाप्तः॥

समाप्तश्च द्वितीयोऽध्यायः॥

## ०.०.७४ शेषप्रतिज्ञाधिकरणम्

647 द्विलक्षण्याः परं शिष्टं यावत्किंचन लक्षणम्।
तत्सर्वं वक्तुमारब्धमथातः शेषलक्षणम्॥§ 4679

तथा च प्रथमसूत्रोपात्तप्रतिज्ञापिण्डव्याख्याप्रदेशप्रदर्शने धर्मप्रमाणस्वरूपविषयलक्षणद्वयार्थं चोदनालक्षणसूत्रेणैकेनैव सूत्रितं वर्णयित्वा कानि अस्य साधनानि—अङ्गानिकानि च साधनाभासानि—अनङ्गानीति फलार्थत्वातदर्थत्वाभ्यां क्व पुरुषः प्रधानं धर्मस्य क्व वा पुरुषो गुणभूत इत्यादि यावत्किंचन मीमांसितव्यं तत्सर्वं शेषलक्षणेनैव व्याख्यातम्। शेषैः समस्तैरेव लक्षणैरित्यर्थः। इह लक्षणानां बहुत्वेऽपि यदेकवचनं कृतं तल्लक्षणत्वसामान्यसंख्यामात्रविवक्षया। § 4680

यत्तु शेषः परार्थत्वादित्यनन्तरलक्षणम्।
तदङ्गत्वस्य वाच्यत्वादादौ तन्मात्रगोचरम्॥§ 4682

बहुष्वपि हि लक्षणार्थेषु विवक्षितेषु क्रमवशादेकस्तावदङ्गत्वरूपः शेष एतल्लक्षणगोचरः परार्थत्वहेतुकः प्रतिपाद्यते। समासश्च द्वेधा विगृह्य द्वयोर्वाक्यार्थयोः प्रदर्शनीयः। शेषं च तल्लक्षणं च, शेषस्य वाऽर्थस्य लक्षणमिति। षष्ठीसमाससमात्राश्रयणेन वा यथाव्याख्यायमानार्थम्। § 4683

अङ्गलक्षणमेवेदमिहोक्तं शेषलक्षणम्।

२ तो] एवमिति न्यायसुधागृहीतः पाठः। उक्तेन प्रकारेण शब्दान्तरादिषड्प्रमाणिकैव भावनाभेदसिद्धर्न शाखान्तरप्रमाणिकेत्यवेमध्ययार्थोपसंहारार्थश्चतुर्थश्चरण इति ज्ञेयम्।
३ द] प्रदृर्शनावसर इत्यर्थः।

तद्विशेषप्रपञ्चत्वात्तत्रान्यान्तर्गतिस्थितेः॥§ 4685

सर्वेषां हि लक्षणान्तरार्थानां प्रयोज्याप्रयोज्यप्रयोजकाप्रयोजकषड्विधक्रमनियमफलवत्कर्मविषयकर्त्रधिकाररूपाणां तावदङ्गात्मकशेषविशेषप्रकारत्वाल्लक्षणान्तरगोचराणामपि शेषलक्षणान्तर्गतत्वावधारणस्थितिः। तथा हि— § 4686

प्रयोजकाः प्रयोक्तारः शेषाणामेव शेषिणः।
क्रमोऽपि शेष एवकैप्रयोगवचनाश्रयः॥§ 4688

एकफलसाधनानामर्थानां ह्येकफलवदुपकारोपनिबद्धानां वैकप्रयोगवचनचोदितानां यौगपद्यानुष्ठानाशक्तेः सामर्थ्येनाङ्गभूतः क्रम आपद्यमानः श्रुत्यर्थपठनस्थानमुख्यप्रावृत्तिकक्रमाख्यप्रमाणषट्कवशेन व्यवस्थाप्यते। § 4689

अधिकारोऽपि यज्ञेषु कर्तुः शेषस्य चिन्त्यते। 648
भाव्यानां भावकः कर्ता द्रव्यं को नाम कर्मणाम्॥§ 4691

तथा चास्य विशेषेण सूत्रबद्धैव शेषता।
पुरुषश्च पुनः शेषः कर्मार्थत्वेन चोदनात्॥§ 4693

वक्ष्यति हि ‘पुरुषश्च कर्मार्थत्वात्’ इति जैमिनिः। § 4694

तथाऽनाम्नातशेषाणां शेषिणां सप्तमादिभिः।
शेषसद्भावतद्रूपपरिमाणादिनिर्णयः॥§ 4696

तत्र तु— § 4697

सप्तमेनातिदेशेन शेषाः सन्तीति साधिते।
ततोऽष्टमे नये यस्य यतश्चेति निरूपणा॥§ 4699

नवमेऽर्थप्रधानत्वात्तदधीनाऽन्यरूपता।
इयत्ता दशमे शेषबाधाभ्युच्चयचिन्तया॥§ 4701

प्रयोगपरिमाणं च तत्तन्त्रावापलक्षणम्।
एतदेव प्रसङ्गेन परार्थाङ्गोपजीवनात्॥§ 4703

अन्यार्थानुष्ठितैः शेषैरुपकारेऽल्पकल्पना।
प्रसङ्गे तदभावे च स्याद्भूयिष्ठप्रकल्पना॥§ 4705

१६ पुरु] ( अ॰ ३ पा॰ १ अ॰ ३ सू॰ ५ )

२२ रू] ऊह इत्यर्थः।

अथवाऽस्त्विदमेवैकं तृतीयं शेषलक्षणम्।
तदेव सूचितं वक्तुमथातः शेषलक्षणम्॥§ 4707

अन्यानि पृथगारम्भैर्लक्षणानि करिष्यति।
इदं सपरिवाराणां शेषाणामेव लक्षणम्॥§ 4709

तत्राथशब्द आनन्तर्यपूर्वप्रकृतापेक्षाधिकाराणामेकं सर्वान्वा विवक्षित्वा प्रयुज्यते। प्रागुक्तभेदलक्षणानन्तरोक्तत्वात्पूर्वप्रकृतमपेक्ष्य शेषलक्षणमारभ्यते। कुत इति हेत्वपेक्षायामत इति हेतुव्यपदेशः। § 4710

यस्माद्भेदमविज्ञाय न शक्यं शेषलक्षणम्।
विज्ञातुमत एतस्य तदनन्तरमुच्यते॥§ 4712

भिन्नानां हि पदार्थानां शेषशेषित्वसंभवः।
एकत्वे नापदिश्येत कः शेषः कस्य शेषिणः॥§ 4714

भेदानन्तरवक्तव्यं शेषलक्षणमेव च।
649 प्रयोजकक्रमादीनां शेषत्वाधीनचिन्तनात्॥§ 4716

अयमेव च संबन्धः संमतोऽध्याययोर्द्वयोः।
अस्मिन् हि सति सूत्रोक्ते नान्यो भाष्यकृतोदितः॥§ 4718

पूर्वयोर्नास्ति संबन्धः सूत्रोक्तोऽध्याययोर्द्वयोः।
प्रथमेऽध्याय इत्यादिभाष्येणातोऽभ्यधायि सः॥§ 4720

अर्थद्वारो ह्यध्यायादिसंबन्धो न ग्रन्थस्वरूपाश्रय इति संक्षेपोक्तिपिण्डीकृतवृत्तवर्तिष्यमाणाध्यायार्थप्रदर्शनपूर्वं भाष्यकारेणैव संबन्धः पूर्वाध्याययोरभिहितः। इह तु सूत्रकारेणैवाथातःशब्दाभ्यामुपनिबद्ध इति स एव व्याख्यातः—**नानाकर्मलक्षणं वृत्तमिति** च। § 4721

प्रधानमात्रमेवोक्तं नोपोद्धातादिविस्तरः।
नानाकर्मत्वमात्रं हि शेषलक्षणसिद्धिकृत्॥§ 4723

प्रथमाध्यायप्रतिपादितो हि प्रमाणविवेकविध्यर्थवादमन्त्रस्मृतिगुणविधिनामधेयवाक्यशेषार्थकृतसंदिग्धविधिनिर्णयप्रविभागः प्रत्येकं भेदादिलक्षणेषु भेदेनोपयोक्ष्यत इति प्रपञ्चेनानुभाषितः। तथा चाभ्यासाधिकरणे स्थितवेदप्रमाणलक्षणबलेनोक्तम् 'अविशेषादनर्थकं हि स्यात्' इति। विधेयान्तर-

९ त] तदानन्तर्यमुच्यत इति पाठान्तरम्। सूत्रारम्भो ज्ञेयः।
२६ णे] ( अ॰ २ पा॰ २ अ॰ २ )
२७ अविशेषा] एकस्यैवं पुनःश्रुतिरिति

रहितश्चानन्यपरो विधिः कर्मस्वरूपमेव विदधत्पूर्वविहितादवश्यमेव कर्मान्तरं करोतीति विधित्वनिर्णयफलोपजीवनम्। § 4724

तथाऽर्थवादविज्ञानाद्विष्ण्वादिगुणकास्त्रयः।
यागा न कल्पितास्तेषां विधिशक्तेरसंभवात्॥ § 4726

जामित्वाजामित्वोपक्रमोपसंहारमध्यपातिनो हि 'विष्णुरुपांशु यष्टव्योऽजामित्वाय' इत्येवमादयोऽन्तरालसंबन्धविध्येकवाक्यत्वेनार्थवादत्वात्पृथग्विधित्वमलभमाना न देवताविशिष्टकर्मत्रयविधानार्था विज्ञायन्ते। § 4727

मन्त्राणामपि यत्कार्यं विहितार्थप्रकाशनम्।
तेन गोदानगोयागौ नाभ्यासाद्भेदमागतौ॥ § 4729

यच्छब्दामन्त्रणोत्तमपुरुषाद्युपहतविधिशक्तयो हि मन्त्रा धर्मसाधनत्वेनोच्यमाना 'देवांश्च याभिर्यजते ददाति च' इत्येवमादिभिराख्यातपदैः पुनः पुनः श्रुतैरपि न कर्मान्तरं कल्पयन्ति। § 4730

तथा शब्दार्थसंबन्धस्मृतितत्त्वावधारणात्।
प्रक्षेपाधिकतामात्राद्यागाद्धोमस्य भिन्नता। § 4732

तथा न भिद्यते कर्म काठकादिसमाख्यया। 650
ग्रन्थनामस्मृतेर्लोके निमित्तस्मरणादपि॥ § 4734

कृतकं चाभिधानं यदन्यैरादिमदुच्यते।
निमित्तप्रभवत्वेन सूत्रकारस्य तन्मतम्॥ § 4736

कठेन प्रोक्तमित्येवं तेन प्रोक्तमिति स्मृतेः।
ग्रन्थश्च प्रोच्यते नार्थः स ह्यनुष्ठीयते नरैः॥ § 4738

तेनानुष्ठितमित्येवं यदि नाम स्मृतिर्भवेत्।
कर्म काठकमुच्येत कठेनानुष्ठितं हि यत्। § 4740

कठेनाध्यापितं प्रोक्तमित्यर्थे तद्धितो यतः।
स्मर्यते ग्रन्थनामातस्तस्याध्यापनसंभवात्॥ § 4742

गुणश्चापूर्वसंयोगे नामधेयं च भेदकम्।
भेदोपयोगिना तेन गुणनामत्वबोधयोः॥ § 4744

---

११ मा] आलोक्यमाना इति पाठान्तरम्।
१९ तेन] ( पा॰ सू॰ ४—३—१०१ )

प्राजापत्येषु यागानामेकानेकत्वसंशये।
कृतः प्रकृतिवच्छब्दवाक्यशेषेण निर्णयः॥§ 4746

पशुसप्तदशत्वस्य न यागेयत्तया विना।
सिद्धिरस्तीति चार्थेन सिद्धः संदिग्धनिर्णयः॥§ 4748

एवमत्र प्रपञ्चेन पूर्वाध्यायार्थवर्णनम्।
उत्तराध्यायसिद्ध्यर्थमनुक्रान्तमशेषतः॥§ 4750

शेषत्वे कर्मभेदात्तु नाधिकार्थोपयोगिता।
तस्मात्स एव वृत्तोऽत्र संक्षेपेणोपसंहृतः॥§ 4752

ग्राह्यं न त्वेतदेकान्तात्संक्षेपोक्तिप्रयोजनम्।
यतः पूर्ववदेवेह प्रपञ्चोऽप्युपयोक्ष्यते॥§ 4754

उपोद्घातोदितेनैव शेषत्वमभिधास्यति।
भावार्थफलवत्त्वेन कर्मणामपि जैमिनिः॥§ 4756

तथा चापूर्वभेदेन कर्मभेदानुसारिणा।
आज्यौषधादिधर्माणां व्यवस्थां साधयिष्यति॥§ 4758

तथा च। § 4759

प्रसक्तानुप्रसक्तोक्तमृग्यजुःसामलक्षणम्।
651 श्रुतेर्जाताधिकारः स्यादित्यस्मिन्नुपयोक्ष्यते॥§ 4761

तस्माद्विस्तरसंक्षेपावर्थमार्गावुभावपि।
व्याख्यायामुपयुज्येते इति कश्चित्क्वचित्कृतः॥§ 4763

एवमर्थद्वये तावदथशब्दस्य वर्णितम्।
संबन्धोऽध्याययोरुक्तो यद्वाऽर्थात्सिद्ध एव सः॥§ 4765

ततश्चापुनरुक्तत्वाद्वक्ष्यमाणार्थगोचरा।
अधिकारार्थता वक्तुमथशब्दस्य शक्यते॥§ 4767

प्रथमाध्यायप्रथमसूत्रे हि धर्मज्ञानेच्छाया वक्ष्यमाणव्याख्येयत्वेनानुपन्यासादन्तरानुष्ठेयत्वमात्रमेवोपदेष्टव्यमित्यधिकारार्थत्वं नोक्तम्। यदपि तदुप-

१४ सा] तेषामर्थाधिकरण इति शेषः।
१७ श्रुतेर्जा] ( अ० ३ पा० ३ अ० १ सू० १। )

सर्जनत्वेन धर्मज्ञानमुपात्तं तदप्यर्थव्याख्यानकरणात्स्वयमेव शिष्याणां भवतीति न सूत्रकारभाष्यकारव्याख्यातृवचनोपात्ताधिकारकर्मत्वेनावधारितम्। § 4768

वक्तृवाक्यगतं यत्तु स्यात्किंचिदधिकारभाक्।
न जिज्ञासापदं तस्य श्रोतुः स्वार्थनिरूपकम्॥§ 4770

इह त्वध्यायरूपं वा तदर्थात्मकमेव वा।
व्याख्यायामधिकर्तुं हि शक्यते शेषलक्षणम्॥§ 4772

अतः परं शेषलक्षणमधिकृतं तदादरेण श्रोतव्यम्। यतोऽध्यायान्तरावकाशोऽद्यापि नास्तीति। अतः शेषलक्षणमधिकृतं वेदितव्यमिति शक्यं वक्तुम्। § 4773

शेषस्यैवाधिकारोऽत्र युक्तो नान्यस्य कस्यचित्।
शेषधीसिद्ध्यपेक्षत्वादन्यलक्षणवाग्धियाम्॥§ 4775

सप्तमादिषट्कस्तावदुपदेशपूर्वकातिदेशविषयत्वादुपदेशविचारार्थप्रथमषट्कसमाप्तिं प्रतीक्षते। तथाऽधिकारोऽपि यथोपदिष्टकर्मानुष्ठानसामर्थ्येन कर्तुरवधार्यत इति क्रमनियमपर्यन्तोपदेशज्ञानोत्तरकालमारप्स्यते। तथा हि। § 4776

भारो यो येन वोढव्यः स प्रागातोलितो यदा।
तदा कस्तस्य वोढेति शक्यं कर्तृनिरूपणम्॥§ 4778

प्रयोजकवशौ चेष्टौ मुख्यप्रावृत्तिकक्रमौ।
चतुर्थलक्षणादूर्ध्वं क्रमतश्चिन्तयिष्यते॥§ 4780

प्रयोजकोऽपि शेषाणां शेष्यन्यस्त्वप्रयोजकः।
करिष्यते परा तस्मात्तच्चिन्ता शेषलक्षणात्॥§ 4782 652

तेनात्रैवेदमारभ्यमिति सिद्धेऽभिधीयते।
प्रकारैर्बहुभिश्चेदं कर्तव्यं शेषलक्षणम्॥§ 4784

स्वरूपहेतुसंबन्धतत्प्रमाणबलाबलैः॥§ 4785

ननु ज्ञेया यथा शेषाः शेषिणोऽपि तथैव नः।
नैकस्मिन्नप्यविज्ञाते व्यवहारो हि सिध्यति॥§ 4787

उच्यते— § 4788

ज्ञातव्या उभये सत्यं सूत्रणीया न तूभये।
अर्थापत्त्या हि सिध्यन्ति द्वितीया एकलक्षणात्॥§ 4790

तत्र सूत्राणि शेषाणां किं कार्याण्युत शेषिणाम्।
फलप्रयासतुल्यत्वात्प्रसज्येत यथारुचि॥§ 4792

प्राधान्याच्छेषिणां साक्षाद्युक्तं वा शेषिलक्षणम्।
न तु तत्क्रियते तत्र कर्तव्यं हि द्वयं भवेत्॥§ 4794

शेषोऽस्यास्तीति मत्वर्थादेवं शेषी निरूप्यते।
न स शेषमविज्ञाय ज्ञातुं शक्येत केनचित्॥§ 4796

तेनोपसर्जनस्यापि शेषस्यैवेह लक्षणम्।
क्रियते शेषिणस्त्वर्थात्तज्ज्ञानेनैव सेत्स्यति॥§ 4798

श्रुत्यादिभिः प्रमाणैश्च शेषत्वस्यैव निर्णयः।
शेषी तद्विषयत्वेन लक्ष्यते नान्तरीयकः॥§ 4800

श्रुत्यादिसमवाये च वक्ष्यते यद्बलाबलम्।
तच्छेषिण्यविरुद्धत्वाच्छेषगोचरमेव नः॥§ 4802

तस्माच्छेषलक्षणमेव समस्ततद्गतप्रकारविशिष्टं वक्तुमिदं प्रतिज्ञातम् 'अथातः शेषलक्षणम्' इति। तत्र **कः शेष** इति—स्वरूपाभिधानप्रतिज्ञा। **केन हेतुनेति**—येनासौ शेष इत्युच्यते। तस्य च कारकहेतोस्तद्धर्मस्यैव लक्षणं वक्ष्यत इति प्रतिज्ञायते। तथा विनियोगप्रकारज्ञानं क्व शेषिणि कः शेषः
653 कतमेन प्रमाणेन कतमत्प्रमाणान्तरं बाधित्वा विना बाधेन वा विनियुज्यते। तथा विनियोजकश्रुत्यादिषट्कस्वरूपज्ञानं तेषां बलाबलज्ञानं च। तत्र प्रथमे पादे तावच्छ्रुतिविनियोगः किंचिच्च प्रासङ्गिकम्। द्वितीयपादादौ लिङ्गविनियोगः। तृतीयपादादौ तदेव प्रमाणद्वयमुपन्यस्योपक्रमोपसंहारद्वारेणैकवाक्यत्वेन सिद्धान्तस्थापनाद्विनाऽपि वाक्यग्रहणेन 'प्रायदर्शनात्' इति वाक्यविनियोगमुक्त्वा प्रकरणक्रमसमाख्याभिर्विनियोगः सूत्रोपनिबद्ध एव वक्ष्यते। ततो बलाबलाधिकरणम्। ततः परं च श्रुतिलिङ्गवाक्यानां प्रकरणेन सह विरोधाविरोधचिन्ता तावद्यावत् 'तुल्यः सर्वेषां पशुविधिः' इति। त-

१२ रीय] यद्विना यदनुपपन्नं तत्तस्य नान्तरीयकमित्युच्यते।
१३ क्ष्य] ( अ॰ ३ पा॰ ३ अ॰ ७ ) इत्यत्रेति शेषः
२३ प्रा] ( अ॰ ३ पा॰ ३ अ॰ १ सू॰ २ ) एतत्सूत्रावयवः
२६ त्] ( अ॰ ३ पा॰ ६ अ॰ ७ सू॰ १८ )।

तश्चतुर्णां क्रमेण सह पुनः सैव चिन्ता यावत् 'शास्त्रफलं प्रयोक्तरि' इति। तत उपोद्घातपूर्वकं पञ्चभिः सह समाख्याया विरोधाविरोधविषय-विचारेणाध्यायपरिसमाप्तिः। **एतत्तात्पर्येणान्यदुपोद्घातप्रसक्तानुप्रसक्तेरिति** वक्ष्यमाणमनुसंकीर्त्यते। प्रदर्शितमुच्यमानं सुखं ग्राहयिष्यते। सर्वं चैतच्छेष-लक्षणप्रतिज्ञयैव पिण्डीकृतं प्रतिज्ञातमिति न भेदेन सूत्रितम्॥ १॥ § 4803

इति शेषप्रतिज्ञाधिकरणम्॥ १॥

## ०.०.७५ शेषत्वनिर्वचनाधिकरणम्

किं च। § 4805

शेषलक्षणमात्रोक्तावर्थात्स्याच्छेषिलक्षणम्।
अतः शेषः परार्थत्वादित्युक्तं शेषलक्षणम्॥§ 4807

शेषशब्दस्यानेकाधिकाद्यर्थवचनत्वादिहाङ्गगुणधर्मादिपर्यायवाचित्वपरिग्रहार्थं हेतुविशेषाभिधानं परार्थत्वादिति। § 4808

यच्चान्यदविनाभावप्रयोज्यत्वादिकारणम्।
तच्च सर्वं निराकर्तुं पारार्थ्यमिह गृह्यते॥§ 4810

द्वावपि चार्थौ श्रुत्यर्थापत्तिभ्यामुपात्ताविति चोदनालक्षणसूत्रवद्वाक्यभेद-दोषं परिहृत्य व्याख्येयम्। तथाहि। § 4811

न शेषोऽन्यः परार्थत्वान्न च हेत्वन्तरेण सः।
अन्योन्यनियमेनैवं पक्षहेत्वोः परिग्रहः॥§ 4813 654

इह च। § 4814

---

१ श्च] ( चतुर्णामिति—श्रुतिलिङ्गवाक्यप्रक-रणानामित्यर्थः
१ त्] ( अ° ३ पा° ७ अ° ८ सू° १८ )
११ प] पक्षहेत्वोः परिग्रह इति-अत्रायमनुमानप्रयोगः। प्रयाजादिः शेषपदवाच्यः। परार्थत्वात्। यन्नैवं तन्नैवं यथा घटादिः। यद्यप्यत्र शेषपदवाच्यतावच्छेदकं परार्थत्वमेव पक्षतावच्छेदकमिति हेतुव्यापकसाध्यसमानाधिकरणो हेतुरिति व्याप्तिग्रहकाल एव हेतौ साध्याधिकरणवृत्तित्वे भासमाने समानसंवित्संवेद्यतया हेत्वधिकरणवृत्तित्वस्यापि साध्ये भानात्साध्यसिद्धिरनुमितिप्रतिबन्धिका संभाव्यते तथाऽपि साध्याभाववदवृत्तित्वरूपसाध्यसामानाधिकर-ण्याघटितव्याप्तिज्ञानस्यैव हेतुत्वाङ्गीकारात्। अथवा व्यतिरेक्यनुमानत्वादस्य साध्याभाव-व्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेक-व्याप्तिज्ञानस्यैवानुमितिहेतुत्वाङ्गीकारात्पक्ष-तावच्छेदकहेत्वोरैक्येऽपि न काचित्क्षतिरिति दिक्।

शेषत्वं केचिदिच्छन्ति ह्यविनाभावलक्षणम्।
प्रयोज्यलक्षणं त्वन्ये तदाधिक्येन चापरे॥ § 4816

अन्ये त्वन्ततया तस्य विध्यन्तत्वपरिग्रहात्।
उपकारेण शेषत्वं बहुभिश्चैव लक्षितम्॥ § 4818

तद्भावभावित्वेन तावद्यो येन विना न भवति स तस्य शेषः। तद्यथाऽङ्कुरस्तोयादिभिर्विना न भवति। घटश्च मृत्पिण्डदण्डचक्रादिभिरिति तयोस्तानि शेषत्वेन ज्ञायन्ते। तत्रोच्यते। § 4819

अयुक्तमेवं शेषत्वमविनाभावलक्षणम्।
व्यभिचारात्तथाहीदमशेषेष्वपि दृश्यते॥ § 4821

सर्वदा ह्यविनाभूता रूपस्पर्शादयः क्षितौ।
न चैषां तुल्यकल्पत्वाद्भवत्यन्योन्यशेषता॥ § 4823

स्वामिना च विना दासा न भवन्ति कदाचन।
तथा गृहादयस्तेषां शेषः स्वामी च नेष्यते॥ § 4825

प्रधानानां प्रधानैश्च विनाभावो न दृश्यते।
तत्र स्याच्छेषशेषित्वं तेषामपि परस्परम्॥ § 4827

एवमङ्गप्रधानानामङ्गानां च परस्परम्।
प्रसज्येतैव शेषत्वमविनाभावलक्षणम्॥ § 4829

एतेनाध्ययनाधानकृषिद्रव्यार्जनादिषु॥ § 4830

वाच्यं प्रसङ्गिशेषित्वं तैर्विना क्रत्वसंभवात्।
तस्मात्सत्यविनाभावे विनाभावेऽपि वा क्वचित्॥ § 4832

655 प्रयोज्यो यस्य यस्तस्य स शेष इति निश्चयः। § 4833

न च स्वामी दासेन रूपस्पर्शादिभिर्वा यथोदाहृतैरन्योन्यं प्रयुज्यते। येनातिप्रसङ्गः स्यात्। न त्वेतदपि शेषत्वलक्षणं घटते। कुतः। § 4834

लक्ष्यलक्षणयोर्दृष्टो व्यभिचारो द्वयोरपि।
पुरोडाशकपालं हि न च तावत्प्रयुज्यते॥ § 4836

सिद्धेस्तुषोपवापेन शेषस्तत्तस्य चेष्यते।
तथा होमाः प्रयुज्यन्ते भेदनस्कन्दनादिभिः॥§ 4838

निमित्तैर्न च तेष्वेषां होमानां शेषता मता।
तस्माद्यो विहिते यस्मिन्नधिकोऽन्यो विधीयते॥§ 4840

तस्य तं प्रति शेषत्वमतिरेकेण लक्ष्यते।§ 4841

सर्वत्रैव फलवत्प्रधानविधेरङ्गविधयोऽङ्गानि प्रधानेभ्योऽतिरिच्यन्त इत्येतदेवातिरेकलक्षणं शेषत्वं युक्तमित्युक्तेऽभिधीयते। § 4842

व्यभिचार्यतिरेकोऽपि प्रधानेष्वपि दर्शनात्।§ 4843

तान्यपि ह्यतिरिच्यन्ते शेषेभ्योऽधिकशेषवत्।§ 4844

अन्ये विध्यादिनिर्दिष्टप्रधानेभ्यः परान्विधीन्।
दृष्ट्वाऽङ्गान्यध्यवस्यन्ति विध्यन्तत्वपरिग्रहात्॥§ 4846

विध्यन्तो वा प्रवर्तेत विकृतौ प्रकृताविव।
विध्यन्तविहितांस्तत्र शेषान्वक्ष्यति जैमिनिः॥§ 4848

तस्माद्विध्यादिविहितप्रधानकथंभावाकाङ्क्षापूरणसमर्थविध्यन्तविहितत्वलक्षणमेव शेषत्वं सूत्रकाराभिप्रेतमित्युक्तेऽभिधीयते। § 4849

उपक्रमोपसंहारमध्याम्नातेषु शेषताम्।
विचित्रामुपलभ्यैतन्नेष्यते शेषलक्षणम्॥§ 4851

यदि हि नियोगतो वाक्यप्रकरणान्तेष्वेव व्यवस्थिताः शेषविधयः समाम्नायेरंस्तत एतदव्यभिचाराल्लक्षणमाश्रीयेत। न त्वेवमाम्नायन्ते। त्रिष्वप्यादिमध्यावसानेषु समाम्नानात्। § 4852

प्रधानादौ विधीयन्ते ये शाखाच्छेदनादयः।
विध्यादिविहितत्वात्ते नाऽऽप्नुयुर्दर्शशेषताम्॥§ 4854

कर्मणा सह चोद्यन्ते ये हविर्देवतादयः।
शेषास्तेऽपि न युज्येरंस्तदन्ताम्नानवर्जनात्॥§ 4856

अङ्गविध्युपक्रमेषु तावद्वाक्यप्रकरणेषु तद्गतकिंभावाकाङ्क्षितप्रयोजनक- 656
ल्पनावेलायां कथंभावाकाङ्क्षायुक्तप्रधानविधिदर्शनात्तदपेक्षितोपकारसिद्ध्यर्थ-

१ सि] सिद्धेरिति—पुरोडाशप्रयोज्यत्वादित्यर्थः।

त्वेन तेषामवधार्यमाणानां विध्यादिगतानामपि शेषत्वमस्तीति न विध्यन्तविधानमेवैकं शेषलक्षणत्वेनावकल्पते। § 4857

शेषं तस्यैव तं विद्यादुपकारेण लक्षितम्।
भवत्येवं च होमादेर्भिन्नादि प्रत्यशेषता॥§ 4859

न हि भिन्नोपकारार्थः स तद्ध्येवोपकारकम्।
वेदे च नान्यदङ्गत्वकारणं दृश्यते क्वचित्॥§ 4861

न ह्यनुपकुर्वात्किंचिदप्यङ्गं कस्यचिद्भवेत्। तस्मादुपपन्नमिदं लक्षणमिति। तथा चोपरिष्टादपि तत्र तत्र प्रदेशे भाष्यकारो वक्ष्यति—'यो यस्योपकरोति स तस्य शेषः। उपकारलक्षणं हि शेषत्वम्' इत्येवमादि। § 4862

तादर्थ्यमपि नैवान्यदुपकारात्प्रतीयते।
तेनोपकार एवैको विज्ञेयं शेषलक्षणम्॥§ 4864

न त्वेतदपि घटते। कुतः। § 4865

एवं सति प्रधानानामङ्गानां च परस्परम्।
अङ्गाङ्गानां च सर्वेषां संकीर्येतैव शेषता॥§ 4867

यथैव ह्यङ्गानि प्रधानानामुपकुर्वन्ति तथैवानुष्ठापनेनोपकारप्रतिग्रहणाच्च प्रधानान्यप्यङ्गानामुपकुर्वन्त्येव। कुतः। § 4868

प्रधानैरप्रयुक्तानि कुर्यान्नाङ्गानि कश्चन।
उपकार्यैर्विना तानि नोपकर्तुं च शक्नुयुः॥§ 4870

प्रधानान्यप्यतोऽङ्गानामङ्गानि स्युरनुग्रहात्।
स्यादन्योन्योपकाराच्च तेषामन्योन्यशेषता॥§ 4872

नैकेनापि प्रधानेन विनाऽन्यैः साध्यते फलम्।
तेनैतान्युपकुर्वन्ति फलसिद्धौ परस्परम्॥§ 4874

तस्मात्परस्पराङ्गत्वमुपकारात्प्रसज्यते।
नायमङ्गकृतादेषामुपकाराद्विलक्षणः॥§ 4876

एवमङ्गानामप्यन्योन्यापादानं दर्शयितव्यम्। ततश्चैकप्रधानविकारेष्वेकाङ्गमनेऽपि समस्तसाङ्गप्रधानगमनादनियमः प्राप्नोति। § 4877

तथा द्रव्यार्जनाधानस्वाध्यायाध्ययनादिषु।
सर्वकर्माङ्गताप्राप्तिः कार्यैः सर्वोपकारिषु॥§ 4879

न हि तदनुग्रहरहितं किंचित्सिध्यति। ततश्चार्थिमात्रविषयकामश्रुतिप- 657
रिग्रहात् 'वसन्ते ब्राह्मणम्' इत्यादीनां निमित्तार्थत्वाच्छूद्राधिकारादिदोषप्रसङ्गः। § 4880

ज्ञातं च लक्षणं सर्वं लक्ष्यं लक्षयितुं क्षमम्।§ 4881

तत्र दृष्टोपकाराणां तत्कृता शेषता भवेत्।§ 4882

अदृष्टार्थे तु संस्कारे पर्यग्निकरणादिके॥
प्रयाजादिष्वपूर्वांशैस्तथाऽऽरादुपकारिषु॥§ 4884

अनवगतशेषत्वावस्थेषूपकारादर्शनात्तदधीनावधारणं शेषत्वं न स्यात्। कल्पित उपकारे भविष्यतीति चेत्। न। प्रागङ्गत्वादुपकारकल्पनाप्रमाणाभावात्। यो हि यस्य फलस्य फलवतो वा शेषत्वेनावधारितो भवति स कथं तस्योपकरिष्यतीत्यपेक्षिते सति दृष्टमुपकारमपश्यद्भिस्तस्माददृष्टः परिकल्प्यते। यावत्तु शेषत्वमेव नावगम्यते तावत्केन प्रमाणेनादृष्टकल्पना स्यात्। ततश्चेतरेतराश्रयः प्रसज्यते। तथाहि। § 4885

उपकारेण शेषत्वं शेषत्वाच्चोपकारिता।
स्वातन्त्र्येण प्रसिद्धं हि न ह्यन्यतरदेतयोः॥§ 4887

दृष्टार्थानामपि चावहन्त्यादीनां नियमान्न कश्चिदुपकारो दृश्यत इति न नियोगतोऽङ्गत्वं स्यात्। न च प्रासङ्गिकत्वाच्छास्त्रेणोपकारः प्रतिपाद्यत इति। प्रत्यक्षादिभिरेवोपकारं गृहीत्वा शेषत्वं गम्येत। ततश्च श्रुत्यादिप्रमाणकं शेषलक्षणं नैवानेनाऽऽश्रीयेत। तथा प्रासङ्गिकान्यन्यप्रयोजनान्यङ्गान्यन्यार्थान्यप्यन्यस्योपकारीणीति तन्निप्रयोजकवदितरस्यापि शेषत्वं गच्छेयुः। तत्र 'प्रासङ्गिकं च नोत्कर्षेत्' *'प्रासङ्गिकेप्रायश्चित्तं न विद्यते' *'न वाऽपात्रत्वादपात्रत्वं त्वेकदेशत्वात्' *'अपि वा शेषभाजां स्यात्' इत्यादिन्यायविरोधः। एवमेतस्मिन्नपि पक्षे सर्वं तन्त्रं विघटते। तस्मादुच्यते 'शेषः परार्थत्वात्' इति। § 4888

उपकारमलब्ध्वैव यो यदर्थोऽवगम्यते।
तादर्थ्यलभ्यशेषत्वः स तस्योपकरिष्यति॥§ 4890

आह—किं तादर्थ्योपकारयोर्भेदोऽप्यस्ति। बाढमस्ति। कुतः। § 4891

अपकुर्वन्नपीष्टो हि तदर्थव्यपदेशभाक्।

२० त्र] ( अ॰ ५ पा॰ १ अ॰ १५ सू २८ )
२१ *] ( अ॰ ९ पा॰ ४ अ॰ ७ सू॰ २८ )
२१ *] ( अ॰ ४ पा॰ १ अ॰ १४ सू॰ ३४ )
२२ *] ( अ॰ ६ पा॰ ४ अ॰ २ सू॰ ३ )

उपकुर्वन्नपि त्वन्यस्तदर्थ इति नोच्यते॥§ 4893

उद्देशमात्रेण तावत्तादर्थ्यप्रसिद्धिः। सा चोपकारापकारयोस्तुल्या। तद्य-
658 था—मशकार्थो धूम इत्यपकारिण्यपि प्रयुज्यते। तथोपकुर्वन्नपि प्रसङ्ग्यप्र-
योजकयोर्न तादर्थ्येन व्यपदिश्यते। न हि कश्चिदपि शालिकुल्यास्थमुदकं
पिबन्मदर्थमेताः प्रणीता इत्यध्यवस्यति। तस्मादन्यत्तादर्थ्यमन्यश्चोपकार इति
विज्ञायते। नन्वेवं सत्यपकारकोऽपि शेषः प्राप्नोति। लोके तावत्प्राप्नोतु नाम।
वेदे पुनरनपेक्षितत्वान्न भविष्यतीति। यो हि तादर्थ्येनावधारितः स किमुप-
करिष्यति, अथापकरिष्यतीति संदिग्धे शेषिभिरपकारो नापेक्षित इति तं
परित्यज्यापेक्षासामर्थ्यादुपकारः कल्प्यते। ननु चोपकारनिरपेक्षं नैव तादर्थ्यं
शक्यं कल्पयितुम्। कुतः। § 4894

आकाङ्क्षति प्रधानं हि न यावदुपकारकम्।
तावत्सामीप्ययुक्तोऽपि नाङ्गमित्यवधार्यते॥§ 4896

न हि प्रयाजादयः सामीप्यमात्रेणैवोपकारनिरपेक्षास्तादर्थ्यं प्रतिपद्यन्ते। तस्मादुपकारपूर्वकमेव तादर्थ्यमिति स एव शेषत्वकारणं प्राप्नोति। नैष दोषः। § 4897

श्रुत्या तावत्तदर्थत्वं क्वचित्पूर्वं प्रतीयते।
अन्यत्राप्युपकारित्वादपेक्षामात्रपूर्वकम्॥§ 4899

‘दशापवित्रेण ग्रहं संमार्ष्टि’ ‘व्रीहीन्प्रोक्षति’ इत्यादिषु तावच्छ्रुत्यैव
तादर्थ्येऽभिहितेऽङ्गत्वमवधार्योपकारः कल्प्यते। यत्रापि तु प्रयाजादौ ताद-
र्थ्याभिधानाभावादुपकारपूर्वकत्वं लक्ष्यते तत्राप्यपेक्षामात्रमेव तस्य, प्रथमं न
निष्पत्तिः। न ह्यनवगताङ्गत्वेषु प्रयाजादिषूपकारदर्शनं कल्पनं चास्तीत्युक्त-
म्। अतो दर्शपूर्णमासयोरुपकारमपेक्षमाणयोः प्रयाजादिषु चोपकार्यमपेक्ष-
माणेष्वनिष्पन्नावस्थ एवोपकारे प्रकरणात्तादर्थ्यं तावत्प्रतीयते। तदन्यथानुप-
पत्तिमात्रेणोपकारकल्पना। तेनोपकारापेक्षामात्रमिह तादर्थ्यप्रमाणानुमाने
व्याप्रियते। नोपकारादेव शेषत्वं तादर्थ्यं वेत्यनवद्यम्। एवं च सति श्रु-
त्यादीन्येव तादर्थ्यप्रतिपादनरूपेण शेषस्य विनियोजकानीति तद्विवेकार्थं
लक्षणमारब्धव्यम्। सत्यपि चाङ्गप्रधानादीनामुपकारसंकरेऽतादर्थ्यादसंक-
रस्थितिसिद्धिः। तस्मात्परार्थत्वलक्षणमेव शेषत्वं निर्दोषम्। **यः परस्योपकारे**
**वर्तत इति**—पारार्थ्यमेवोपकारेण फलेनाभिधीयत इत्यवगन्तव्यं न त्वत्रैव
लक्षणोक्तिभ्रान्तिः कर्तव्या। तथा च स्फुटी करोति **ये परार्थास्ते वक्तारो**
659 **भवन्तीति**। परः पुनरुपकारलक्षणभ्रान्त्या वदति—**यथोपाध्यायः शिष्याणा-**
**मिति**। **सत्यं वर्तत** इति—तादर्थ्योपकारव्यतिकरदर्शनादिहालक्षितं शेषत्व-

१८ शा ]
दशापबित्रेणेति—वस्त्रखण्डेनेत्यर्थः।

३२ कार ] व्यतिरेकेति पाठान्तरम्।

मित्युपेक्ष्यैतदुदाहरणमैकान्तिकपारार्थ्ययुक्तमुदाहरति**तद्यथा गर्भदास** इति। स ह्युत्पत्त्यैव स्वाम्यर्थेन प्रसिद्धः। अनड्वांश्च वहनार्थतया। न तु स्वामी तादर्थ्येनावगम्यत इति विवेकः। परस्तु तत्राप्युपकारकत्वादस्त्येव कश्चित्तादर्थ्यलेश इति प्रत्यवतिष्ठते—**ननु गर्भदासस्यापीति**। सिद्धान्तवादी त्वाह**आत्मन एवासौ संविदधान** इति। उद्देशेन हि तादर्थ्यं विविच्यते। न च स्वामिनो गर्भदासाद्युद्देशेन तदुपकाराय प्रवृत्तिः। किं तर्हि, स्वार्थसिद्धिप्रयुक्ता, नान्तरीयकतत्संविधानादशेषत्वम्। **येस्तु द्रव्यं चिकीर्ष्यत इति**—पुनरुक्तशङ्कयोपन्यासः। ननु च तदध्यायोक्तेनैव लक्षणेन गतार्थत्वान्नात्र वक्तव्यमत आह—तत्रापूर्वार्थता व्यावर्तितेति। तत्र केचिदेवं व्याचक्षते। तत्र दृष्टार्थानामवहन्त्यादीनां शेषत्वमुक्तम्। इह तु सर्वेषामेव दृष्टार्थानामदृष्टार्थानां च द्रव्यविषयाणां कर्मविषयाणां च शेषाणां लक्षणमुच्यत इति। एवं तु सति एतस्यापुनरुक्तता स्यात्। तत्पुनरेतेन गतार्थमित्यपह्नुतमेव। तस्मादेवं वर्णयितव्यम्—**अथ तत्र किं वृत्तं येस्तु द्रव्यं चिकीर्ष्यत इति**। तदभिधीयते।
§ 4900

हन्त्यादावपि शेषत्वमेतस्मादेव लक्षणात्। 660
दृष्टार्थत्वादपूर्वं तु ततो नेति पुरोदितम्॥ § 4902

सर्वविषयव्यापि शेषत्वमिह लभ्यमेव तत्र नीतमपूर्वभेदनिराकरणार्थम्। अथवा पूर्वोक्तं गुणप्रधानभावलक्षणमनमेक्ष्यापूर्ववत्संप्रति कारणान्तरनिरासेन परार्थत्वलक्षणे शेषत्वेऽभिहिते 'येस्तु द्रव्यं चिकिर्ष्यते' इत्यनेनोपकारलक्षणाभ्युपगमाद्विरोधमाशङ्क्य परिहरति। तत्रापूर्वभेदकल्पनानिवृत्त्यर्थमुपकारदर्शनमुक्तं न शेषलक्षणत्वेन। अत्र पुनः सर्वशेषाणां पारमार्थिकं लक्षणमेवोच्यत इति भिन्नविषयत्वादविरोध इति॥ २॥ § 4903

इति शेषत्वनिर्वचनाधिकरणम्॥ २॥

## ०.०.७६ शेषत्वस्य लक्ष्यनिर्देशाधिकरणम्

---

५ उ] उद्देशेन हीतिइदमत्राऽऽकूतम्। निरूपकतासंबन्धे यन्निष्ठोद्देश्यताविशिष्टकृतिकारकत्वेन विहितं यत्, तत्त्वं तदङ्गत्वमिति। 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यनेन दर्शपूर्णमासयोः स्वर्गनिष्ठोद्देश्यताविशिष्टकृतिकारकत्वेन विहितत्वाल्लक्षणसंगतिः। अत्र च लक्षणे कृतिकारकत्वं कृत्यन्वितकर्तृत्वाद्यन्यतमान्वितत्वम्। विहितत्वं च स्वनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकतावच्छेदकत्वसंबन्धेन विधिविशिष्टत्वम्। अतः करणत्वादीनामेव कृत्यन्वितत्वाद् भावनाया एव च विधिविषयत्वान्नाव्याप्त्यादिशङ्कावकाश इति दिक्।

१७ मिह] इहत्यमेवेति पाठान्तरम्।

इदानीं शेषत्वस्य विषयं कथयति। तत्र बादरिमतेन तावत्त्रय एव शेषाः। द्रव्यं हि ‘द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसंबन्धः’ इति स्वभावत एव शेषभूतं नियमान्निष्प्रयोजनत्वेन केवलं व्यावर्त्यते। गुणोऽप्यरुणादिः क्रियायाः स्वसाधनभूतद्रव्यपरिच्छेदसामर्थ्यादुत्पत्त्यैव शेषः। तथा संस्कारोऽप्यवहन्त्यादिर्यागसाधनपुरोडाशादिनिर्वृत्तये चोदितानां व्रीह्यादीनां स्वरूपेणायोग्यत्वादवहतानां योग्यत्वादवहतानां योग्यत्वमापादन्नुत्पत्त्यैवाङ्गं भवतीति। न तु यागादावौत्पत्तिकं शेषत्वं दृश्यते। न च शब्देन चोद्यते। यागस्तावत्सर्वकारकैरनुष्ठीयते। न चान्यत्र व्याप्रियमाणो दृश्यते। फल इति चेत्।
661 न। चिरनिर्वृत्ते यागे फलोत्पत्तिप्रतीतेः। ननु च भावार्थाधिकरणे करणत्वं यागस्योक्तम्। सत्यमुक्तं न तु साधितम्। स्वर्गकामाधिकरणाधीनसिद्धिना तेन नामपदकरणत्वमात्रनिराकरणात्। अत इदानीमसिद्धावस्थेनैव करणत्वेन व्यवहरति। फलमपि यागं प्रति साध्यमानत्वात्प्रधानं, पुरुषं प्रति त्वस्य शेषभावो नैवोपात्तः। काम्यमानत्वेन सुतरां प्रधानत्वात्। पुरुष एव तु कामं द्रव्यत्वाद्यागे गुणत्वेन स्यात्। तस्माद्द्रव्यगुणसंस्कारेष्वेव शेषभाव इति॥ ३॥
§ 4905

गतार्थमेतत्॥ ४॥ § 4906

662 कामपदोपादानादेव फलस्य पुरुषार्थत्वं गम्यते। न हि कश्चिद्बुद्धिपूर्वकार्येवं कामयते स्वर्ग आत्मानं लभतामिति। किं तर्हि, ममोपभोग्यः स्यादिति। पुनश्चाऽऽत्मनेपदनिर्देशात्कर्तुरेवोपभोग्यो नान्यस्येति गम्यते। तेनोपभोक्तारं प्रति फलमपि शेषभूतम्॥ ५॥ § 4907

पुरुषोऽपि यजेतेत्याख्यातेन गुणभूत आक्षिप्तः। औदुम्बरीसंमानादौ विहित इति शेषः। एवं चतुःसूत्रेणाधिकरणेन समस्तः शेषत्वविषयः प्रतिपादितः। अत्र चोद्यते। यत्तावद् ‘द्रव्यगुणसंस्कारेषु’ इत्यत्र न तु यागफलपुरुषेषु शेषत्वमित्यभिधायान्ते पुरु षस्य शेषित्वनिराकरणं तदसंबद्धम्। यत्तु ‘प्रत्यक्षश्चास्य द्रव्यत्वात्कर्म प्रति गुणभावः, इति। तदपि व्याहतं पुनरुक्तं च। पूर्वमेवाभिहितत्वात्। न च यागफलाभ्यां शेषत्वनिराकरणवद्भ्यां सहास्यातुल्यप्रवृत्तित्वादुच्चारणं युक्तम्। तस्मादसदेतत्। यदप्य धिकरणसमाप्तावुक्तम्— **अथेदानीमत्र भगवान्वृत्तिकारः परिनिश्चिकायेति**। तदपि प्रथममेव द्रव्यगुणसंस्काराणां निरपेक्षशेषत्वाभिधानात्कर्मफलपुरुषाणां च द्रव्यादीनि प्रति प्राधान्येऽवस्थिते सूत्रैरेव परस्परापेक्षशेषत्वप्रतिपादनादुक्तार्थमिति मन्दफलं दृश्यते। तेनैवं परिहर्तव्यम्। अस्याधिकरणस्य व्याख्यानद्वयं कृतम्। तत्र

१ विष] लक्ष्यमित्यर्थः।
२ हि] ( अ॰ ६ पा॰ १ अ॰ १ सू॰ १ )
७ यागादावौत्प]
औत्पत्तिकमिति—स्वाभाविकमित्यर्थः।
१० का] षष्ठाध्यायाद्याधिकरणमित्यर्थः।
११ तेन] तेन—भावार्थाधिकरणेनेत्यर्थः।
४ भिधा] अभिधायेति—न तु
यागफलपुरुषा इत्यनेन भाष्येणेत्यर्थः।
४ यान्ते] अन्त इति—कस्य पुरुषः
प्रधानभूत इत्यादिनेति शेषः।
६ हास्या] अस्य—पुरुषपदस्येत्यर्थः।

प्रथमं तावत्स्वमतेन ‘शेषः परार्थत्वात्’ इत्यभिहिते बादरिमतमुपकारलक्षण-
शेषत्वाभिप्रायेण द्रव्यगुणसंस्कारेष्वेव शेषत्वमित्येवं पूर्वपक्षीकृत्य जैमिनिम-
तमेव सिद्धान्तत्वेन वर्णितम्। तथा च पूर्वत्र दृष्टोपकारानुक्रमणमेव भाष्ये
दृश्यते। तत्र च पुरुषस्य द्रव्यत्वात्प्रत्यक्षमेव क्रियानिर्वृत्तिहेतुत्वादिष्टमेव शेष- 663
त्वम्। यागफलयोस्तु न किंचित्प्रति प्रत्यक्षं साधनत्वमुपलभ्यत इत्यशेषत्वम्।
यत्तु न यागफलपुरुषेष्विति त्रयाणामपि भाष्ये संकीर्तनं न तत्प्रकृतशेषप-
दानुषङ्गादेवं कल्पयितव्यं तेषां शेषत्वमिति। किं तर्हि, यत्सिद्धान्तवादिसंमतं
तन्न भवतीत्येवं संबन्धः। सर्वत्र हि पूर्वपक्षवादिना सिद्धान्तवादिमतं प्र-
तिषेद्धव्यं न यत्किंचित्। शेषत्वमेव हि असौ तदभिप्रेतमेवेति प्रतिषेधति
न स्वरूपमात्रेण। सिद्धान्तवादिनश्चैतन्मतं यदुत यागफलपुरुषाणां द्व्याकारत्वं
किंचिदपेक्ष्य शेषत्वं किंचिदपेक्ष्य शेषित्वमिति तद्बादरिमतानुसारी भाष्यकारः
प्रतिषेधति। न तु यागफलपुरुषेषु सिद्धान्तवादिसंमतं द्व्याकारत्वम्। यागफ-
लयोरेकान्तेनैव शेषित्वात्पुरुषस्य चात्यन्तशेषत्वात्। सर्वथा य एवैक आकारः
प्रतिषिद्धस्तेनैवै तद्व्याकारत्वनिराकरणं शक्यमिति त्रयाणामप्येतावता तुल्य-
धर्मत्वात्सह निर्देशः। ‘कर्माण्यपि जैमिनिः, इत्यादिभिरन्तर्णीतद्व्याकारमेव
शेषत्वं प्रतिपादितम्। पारार्थ्यलक्षणशेषत्वाङ्गीकरणात्। नन्वेवं सति पुरुषस्य
द्रव्यत्वात्पूर्वपक्षवादिनैवाभ्युपगम्य शेषत्वं, शेषित्वे निराकृते सिद्धान्तवादिना
तदेव प्रतिपादनीयमिति न वक्तव्यं ‘पुरुषश्च कर्मार्थत्वात्’ इति। नैष दोषः।
तेन हि यागफलयोरशेषत्वात्तस्य शेषित्वं निराकृतम्। ततश्च यावदेव सू-
त्रद्वयेन यागफलयो शेषत्वं प्रतिपादितं तावदेव यागोपसर्जनं फलं प्रति
प्रधानत्वादुभौ प्रति केवलं शेषित्वमेव प्रसक्तमिति प्रलीने द्व्याकारत्वे पुनः
शेषत्वप्रतिप्रसवार्थमुच्यते ‘पुरुषश्च कर्मार्थत्वात्’ इति। अथवा परेणोपकार-
द्वारेण शेषत्वमभ्युपगतं तदयुक्तं मन्यमानः फलयागयोरिवास्यापि पारार्थ्य-
कृतमेवेति प्रतिपादयिष्यन्नाह—‘पुरुषश्च कर्मार्थत्वात्’ न तदुपकरित्वादिति।
वृत्तिकारमतेन सूत्रचतुष्टयमन्यथा व्याख्यास्यन्नाह—‘अथात्र भगवान्’ इति।
नैवेदानीं बादरिमतं पूर्वपक्षः। किं तर्हि, ‘शेषः परार्थत्वात्’ इति सा-
मान्येन लक्षणमुक्त्वा तस्यैव विषयप्रदर्शनद्वारेणोत्तरः प्रपञ्चः क्रियते। तत्र
पूर्वव्याख्यायां द्रव्यगुणसंस्कारष्वेव शेषत्वामित्येवमवधारणं पूर्वपक्षे कृतम्।
इदानीं तु सिद्धान्तरूपेणैव बादरिमतमप्रतिषेधेनानुमतं कृत्वा लक्षणप्रप-
ञ्चाभ्यां शेषत्वं वर्णयिष्यते। द्रव्यगुणसंस्कारेषु शेषत्वमेवेत्यवधारयति। अतश्च
द्रव्यगुणसंस्काराः शेषत्वेन नियताः शेषित्वं न प्रतिपद्यन्ते शेषत्वं पुनरनिय-
तत्वाद्यागफलपुरुषेष्वप्यस्त्वेवेति तत्प्रतिपादनार्थान्युत्तरसूत्राण्यवकल्पन्ते। त- 664

१२ तु] न तु यागफलपुरुषा इति भाष्यार्थं प्रदर्शयति—न तु यागफलेत्यादिना।
२० सूत्र] सूत्रद्वयेनेति— ‘कर्माण्यपि जैमिनिः फलार्थत्वात्’ ‘फलं च पुरुषार्थत्वात्’ इति सूत्रद्वयेनेत्यर्थः।
२० यागोप] ‘यागोपसर्जन’ मिति—याग उपसर्जनं यस्येति विग्रहः।

स्मादापेक्षिकशेषशेषित्वमात्रमेवैभिः सूत्रैः प्रतिपाद्यते। तथा च भाष्ये दर्शितम्। ततश्च द्विप्रकार एष शेषविषयो नैयमिक आपेक्षिकश्चेत्युक्तं भवति। ननु च द्रव्यगुणसंस्काराणामपि स्वाङ्गानि प्रति प्रधानत्वाद्यागं च प्रति गुणभावादापेक्षिकमेव शेषशेषित्वम्। तथा हि। § 4908

व्रीह्यादीनां प्रधानत्वमवघातादिषु स्थितम्।
मुसलादीन्यपेक्ष्यैवमवघातप्रधानता॥ § 4910

व्रीह्यादयो ह्यवघातादीन्प्रति प्रधानभूताः पुरोडाशनिर्वृत्तिं प्रति गुणभूताः। तथा गुणः संख्यादिः संख्येयं प्रति परिच्छेदाच्छेषः। येषां तु गुणानां निष्पाद्या स तान्प्रति शेषिणी। तथा संस्कारः संमार्गावघातादिरग्निव्रीह्यादेः शेषः स्वसाधनानामिध्मसंनहनोलूखलमुसलादीनां शेषी। तस्मान्नावधारणं सिध्यतीति। तदुच्यते— § 4911

द्रव्यादेर्यत्र शेषत्वं तत्र नैवास्ति शेषिता।
फलयागनराणां तु द्व्याकारत्वं परस्परम्॥ § 4913

द्रव्यगुणसंस्कारा हि फलवन्तं यागं प्रति नियोगतः शेषभूताः। सत्यपि स्वाङ्गानि प्रति शेषित्वे तं प्रति नास्तीत्यभिधीयते। अत एव भाष्यकारोऽपि 'नियोगतो यजिं प्रति शेषभावः' इत्याह। न ब्रवीति नियतः शेषभाव इति। 'आपेक्षिक इतरेषाम्' इत्यत्रापि यजिं प्रतीत्यनुवर्तते। तथा ह्येकैकस्य द्वौ द्वौ प्रति गुणत्वं प्राधान्यं च दृश्यते। यागस्य तावद्द्रव्यात्मकं निर्वर्तकं पुरुषं प्रति प्राधान्यं फलं प्रति गुणता। यश्च फलं प्रति गुणः स शक्यते फलस्य स्वामिनं पुरुषमपि प्रति सुतरां गुण इति वक्तुम्। तथा यस्य पुरुषं प्रति प्राधान्यं तस्य तदुपसर्जनं फलं प्रति सुतरां तदित्यपि शक्यनिरूपणम्। एवं फलस्य यागं प्रति प्राधान्यात्तत्साधनं पुरुषमपि प्रति प्राधान्यं, पुरुषं प्रति गुणत्वात्तदनुष्ठेये यागेऽपि गुणत्वम्। तथा पुरुषस्य फलं प्रति प्राधान्यात्तत्साधनं यागमपि प्रति प्रधानत्वम्। यागं च प्रति गुणभावात्तत्साध्ये फलेऽपि गुणत्वम्। नत्वेवं द्रव्यगुणसंस्कारेष्विति विशेषः। यत्त्विदं पारम्पर्येणापि शेषत्वं प्राधान्यं चोक्तम्, इदमर्थलक्षणं वस्तुमात्ररूपेणेत्यवगन्तव्यम्। न व्यवहारार्थम्। मा भूदङ्गत्वांशेन विकृतौ फलपुरुषयोरपि अतिदेशात्सिद्धान्तविरोधः। तस्मादेतावत्प्रकार एव वक्ष्यमाणप्रपञ्चशेषत्वविषयसंक्षेप इति सिद्धम्॥ ६॥
§ 4914

इति शेषत्वस्य लक्ष्यनिर्देशाधिकरणम्॥ ३॥

१६ ब्र] न ब्रवीतीति—अन्यथेति शेषः।

## ०.०.७७ तेषामर्थाधिकरणम्

उक्तः सहेतुः सविषयश्च शेषः। इदानीं 'कथं च विनियुज्यन्ते' इत्यय- 665
मंशो विचार्यते। तत्र त्रिष्वधिकरणेषु क्रमेण संस्कारद्रव्यगुणानां विनियोगः कथ्यते। तत्रापि किल प्रथमे लिङ्गेन द्वितीये वाक्येन तृतीये श्रुत्या विनियोग इति केचित्। तत्त्वाचार्या नेच्छन्ति। यद्यप्यत्र विचित्रप्रमाणव्यापारपरामर्शस्तथाऽपि श्रुतिविनियोग एवात्र पादे, लिङ्गादिविनियोगस्तु द्वितीयपादात्प्रभृति भविष्यतीत्युक्तम्। **औषध धर्मा** इत्याद्यप्येतदधिकरणसाध्यमपि सिद्धान्ताभिप्रायेणोक्तम्। **ननु संयुक्ता एवैत** इति सिद्धान्तवादी श्रुतिबलेन संशयमाक्षिपति। परः पुनः पदान्तरसंबन्धकृतं व्रीह्यादिसंबन्धं शुद्धावघातविधिना बाध्यमानं मन्यमान आह—**अवघातादयस्तु पदार्था विधीयन्ते श्रुत्येति**। तच्चैतदयुक्तमिव। कुतः। § 4916

प्रयुज्यते पदं किंचिद्विना न हि पदान्तरात्।
*वाक्योधिकरणे चोक्ता श्रुतिबाधप्रतिक्रिया॥ § 4918

न हि व्रीह्यादिभिः संबध्यमाना अवघातादयो नावघातादयो भवन्ति। यदि ह्येवं भवेयुस्ततः श्रुतिविरुद्धत्वाद्वाक्यं बाध्येत। अत्र पुनः केवलानामेवावघातादीनामनुष्ठातुमशक्यत्वादवश्यमेव संबन्ध्यन्तरे कार्याः। न हि भवत्पक्षेऽपि अवघातादयः केवलाः क्रियन्ते। तत्र प्रकरणलभ्यद्रव्यमात्रसंबन्धः क्लेशान्तरेण कल्प्येत। अथापि किंचिदध्याहृत्य संबन्धः क्रियते तथाऽपि क्लेशः। अथाऽऽरादुपकारकत्वेन प्रधानसंबन्ध इष्यते तत्रापि विप्रकर्षः। अथ तु नैव केनचित्संबध्यते। ततो विध्यानर्थक्यप्रसङ्गः। तस्मादसदेतत्। तेनैवं व्याख्येयम्। § 4919

वाक्यभेदतदेकत्वसंदेहान्नात्र संशयः। 666
परमावान्तरापूर्वप्रयुक्तत्वकृतो ह्यसौ॥ § 4921

नैवात्रायं पूर्वपक्षहेतुरवघातादयः पदार्थाः स्वतन्त्राः श्रुत्या विधीयन्ते, वाक्येन व्रीह्यादिभिः संबध्यन्ते। तच्च श्रुत्या बाध्यते। तस्मात्केवलविधानात्किं सर्वार्थाः किं वा दृष्टोपकारसामर्थ्येन यथासंयोगमेव मवन्तीति। किं तर्हि— § 4922

विधीयतेऽवघातादिः श्रुत्या व्रीह्यादिसंगतः।
व्रीहित्वाद्यर्थता चास्य निष्फलत्वेन नेष्यते॥ § 4924

---

१२ *] ( अ॰ ३ पा॰ ३ अ॰ १ ) पाठान्तरम्।
१५ संब] संबन्ध्यन्तरेण कार्यमिति

यदि ह्येषां यथाश्रुतव्रीह्याद्यर्थत्वमध्यवसीयते। ततः संयुक्तात्वात्सर्वे सर्वत्र न प्राप्नुयुः। एते पुनर्नवमाद्याधिकरणन्यायेन श्रौतं व्रीहित्वमुल्लङ्घ्यापूर्वसाधनत्वेन संबध्यन्ते। तच्च प्रकरणापेक्षापूर्वसाधनांशलक्षणागम्यत्वाद्वाक्यगम्यमिति मन्यमान आह— **वाक्येनैषां व्रीह्यादि**संबन्धो न श्रुत्या। यच्च तदपूर्वसाधनांशलक्षणात्मकं वाक्यं तत्प्रकरणाविशेषाद्यथौषधे तथाऽऽज्यसांनाय्ययोरप्यविशिष्टम्। एवमुत्पवनविलापनशाखाहरणादीनां लक्षणयैवाश्रुतहविरन्तरसंबन्धो दर्शयितव्यः। तत्र किमेकं दर्शपूर्णमासापूर्वं धर्माणां प्रयोजकमुतानेकम्। यदाऽप्यनेकं तदाऽपि किमपूर्वमात्रमुत किंचिदेवेति। यद्येकमपूर्वं सर्वाणि वा सर्वेषां प्रयोजकानि ततः संकरो धर्माणाम्। अथ त्वनेकमपूर्वं किंचिदेव प्रयोजकं ततः प्रत्येकं व्यवस्थेति। तत्र सिद्धान्तेनैव तावदुपक्रमते 'तेषामर्थेन संबन्धः'। यद्यपि तावत्केवलपदवाच्याः श्रूयेरंस्तथाऽपि क्व क्रियेरन्नित्यपेक्षिते यत्र क्रियमाणाः प्रयोजनवन्तो भवन्ति तत्र कर्तव्याः। न चैते संकीर्यमाणाः सर्वत्र प्रयोजनवन्तो दृश्यन्ते। सत्यपि चापूर्वप्रयुक्तत्वे दृष्टप्रयोजनद्वार एव संबन्धोऽवकल्पते। अथवा शास्त्रेणैव यत्र क्रियमाणाः 667 प्रयोजनवन्तो विज्ञायन्ते यदपूर्वसाधनं व्रीह्यादिशब्दैः स्वाभिधेयजात्येकार्थसमवायि लक्षितं तदर्थत्वेनावघातादयो विज्ञायमानाः संबन्धाभावादपूर्वान्तरसाधनेऽलक्षिते न भविष्यन्ति। **ननु श्रूयन्ते सर्वे सर्वत्रेति**— अपूर्वैकत्वाद्भेदे चासति लक्षणानियमापरिज्ञानात्प्रयोजनस्य च विध्युत्तरकाललभ्यत्वान्न तद्दर्शनद्वारेण व्यवस्थेति मत्वा परिचोदना। **एतदेव न जानीम इति**। नावश्यमेकमेवापूर्वं प्रयोजकमपूर्वमात्रं वेत्यभिप्रायः। सत्यपि ह्यविशेषश्रवणे 'अर्थाद्वा कल्पनैकदेशत्वात्' इत्यविरुद्धैव व्यवस्था। अथवैकापूर्वापूर्वमात्रप्रयुक्तत्वपक्षयोः संकरो नानपूर्वप्रयुक्तव्रीह्यादिजातिलक्षितसाधनसंबन्धे तु व्यवस्था। न चैतयोरन्यतरस्यावधारणम्। अतो न जानीमः सर्वे सर्वत्र श्रूयन्ते नेति॥ ७॥ § 4925

परः स्वाभिप्रायं विवृणोति। फलस्य हि सूक्ष्मसामर्थ्यरूपावस्थाऽङ्कुरस्थानीया पूर्वानुत्पन्नोत्पेतरपूर्वमित्युक्तं प्राक्। तच्च फलैकत्वादेकमेवाध्यवसीयते। तत्साधनत्वं चाऽऽज्यौषधसांनाय्यानां सर्वेषामविशिष्टम्। अतस्तदुद्देशेन विहितानां सर्वधर्मत्वं विज्ञायते। यद्यपि चाऽऽग्नेयादीनामवान्तरापूर्वाणि प्रात्यात्मिकानि भवेयुः। तथाऽपि तेषां निष्फलत्वाद्यागादिस्वरूप-

२ व] नवमाद्येति—यत्तत्र प्रोक्षणावघातादिधर्माः किं श्रुतर्वीहित्वाद्यवच्छिन्नोद्देशेन विधीयन्त उतापूर्वसाधनत्वावच्छिनोद्देशेनेति संशय्य व्रीह्यादिस्वरूपस्यावघातादिव्यतिरेकेणापि सिद्धत्वात्तदर्थत्वे विध्यानर्थक्यापत्तेर्लक्षणयाऽपूर्वसाधनत्वावच्छिन्नोद्देशेन विधीयन्त इति साधितं तत्परामृश्यते।

११ त्के] केवलेति—व्रीह्याद्युद्देश्यवाचकपदव्यतिरेकेण, प्रोक्षति, अवहन्ति, इत्यादिरूपेणेत्यर्थः।

१५ द] यदपूर्वसाधनत्वमिति पाठान्तरम्।

२१ अर्थाद्वा] ( अ॰ १ पा॰ ४ अ॰ १४ सू॰ २५ )

२ प्राक्] सूक्ष्मशक्त्यात्मकं वा तत्फलमेवोपजायत इत्यादिनाऽपूर्वाधिकरण इति शेषः।

वदेव प्रयोजकशक्तिर्नास्तीति परमापूर्वमेव प्रयोजकमव धार्यते। भिन्नापूर्वप्रयुक्तत्वेऽपि प्रकरणगतापूर्वसाधनमात्रोद्देशेन विधीयमानानां शेषाणां विशेषेणानुपादानादुपादाने च वाक्यभेदप्रसङ्गात्सार्वत्रिकविधानमस्तीति सर्वधर्मत्वे हेतुः। तत्सिद्ध्यर्थं च ‘संयोगतोऽविशेषात्प्रकरणाविशेषाच्च’ इत्युक्तम्। यदेकस्यापूर्वसाधनत्वं धर्मसंबन्धकारणं तदितरत्राप्यविशिष्टम्। यत्तु विशिष्टं व्रीहित्वादि तल्लक्षणामात्रौपयिकत्वादनियामकम्। यदपि कारकत्वं लक्ष्यते त- 668
दपि सर्वेषां प्रदेयत्वाद विशिष्टम्। तस्मादपूर्वासंबद्धमप्रदेयमप्रकृतापूर्वसाधनं च वर्जयित्वा सर्वे सर्वत्र कर्तव्याः। यो ह्यर्थात्प्राप्नोतीति—अचोदितः सन्सामर्थ्येन लौकिप्रयोजनेन वा यः प्राप्नोति स तद्वशेन व्यवतिष्ठते। अथवा यत्र पूर्वतरप्राप्तप्रयोजनद्वारेण धर्माः प्राप्नुवन्ति न च धर्मेभ्य एव प्रयोजनकल्पना यथा विकृतिषु, तत्र यावदर्थत्वं भवेत्। अत्र पुनः प्रकृतावुपदेशेन, प्राक्प्रयोजनेभ्यः स्वरूपमात्रेण कल्पयिष्यमाणप्रयोजनाः सन्तो विधीयन्ते। तेन नैषा वचनव्यक्तिः, यत्र प्रयोजनं तत्रैते। किं तर्हि। यत्रैते तत्र दृष्टमदृष्टं वा प्रयोजनमिति। तस्मात्सर्वधर्माः॥ ८॥ § 4926

दृष्टार्थलोपाच्छास्त्रगम्यार्थलोपाद्वेति निगदव्याख्यातं भाष्यम्॥ ९॥ § 4927

यदुक्तमदृष्टकल्पनान्नैवेतरत्राप्यर्थलोप इति। तत्राभिधीयते। § 4928

यद्याहत्य विधीयेरन्नाज्येऽपि प्रथनादयः।
अदृष्टार्था अगत्या स्युर्दृष्टं वा न भवेद्यदि॥ § 4930

आम्नानान्यथानुपपत्त्या ह्यदृष्टं कल्प्यते। तच्चाऽऽम्नानमन्यथैव दृष्टार्थतयोपपन्नमित्यर्थापत्तेरसंभवः। तद्दर्शयति। अवघातादीनामनुष्ठानसहितं फलं व्रीहिषु दृश्यते। अन्यत्र तु चेष्टामात्रम्। न च सफलचेष्टानुष्ठानसंभवे विफलानुष्ठाने विधिः पुरुषं नियोक्तुं शक्नोति। न च तेनानियुज्यमानः फलक- 669
ल्पनानिमित्तं लभते। तदितरेतराश्रयं भवति॥ फलाद्विधिर्विधेश्च फलमित्यभ्युपगमात्। § 4931

न ह्यत्रैकमपि स्पष्टं प्रसिद्धं व्रीहिषु द्वयम्।
अन्योन्यनिरपेक्षं च प्रत्यक्षमुपलभ्यते॥ § 4933

तथोत्पवनादीनामाज्यसांनाय्ययोरिति योजनीयम्। तथा हि। § 4934

योऽर्थः प्रत्यक्षदृष्टोऽपि क्रतुना पुरुषेण वा।
नापेक्ष्येतोपकाराय सोऽग्राह्यो न त्वयं तथा॥ § 4936

अवघातादिनिर्वर्त्यो हि तुषकणविप्रमोचनादिरर्थः पुरोडाशसिद्धिं प्रति षड्भिरपि व्रीहिपुरोडाशक्रत्वपूर्वाध्वर्युयजमानैरपेक्षितः। न हि तस्मादृते

५ नुष्ठा] अनेन च सौत्रं सह चेष्टयेति पदं विवृतं ज्ञेयम्।

व्रीहिभिर्यष्टुं पुरोडाशो वा निर्वर्तयितुं शक्येतेति। तद्दर्शयति—**प्रयोजनं च तेनेति।** § 4937

विप्रयोगे तु दृष्टस्य फलस्य तदभावजा।
तेषां शब्दार्थमात्रत्वात्स्याददृष्टार्थकल्पना॥§ 4939

ततश्चावघात आज्यसांनाय्ययोरपि स्यात्। सति तु दृष्टे काल्पनिकासंभवाद्यथार्थमेव व्यवस्थासिद्धिः। तथा हि। § 4940

क्वचिद्दृष्टनिराकाङ्क्षः क्षीणार्थापत्तिशक्तिकः।
नादृष्टार्थोऽपि सोऽन्यत्र शक्यः कल्पयितुं विधिः॥§ 4942

अथवा तत एते सर्वत्र विहिता भवेयुः, यदि परमापूर्वप्रयुक्ताः सर्वापूर्वप्रयुक्ता वा स्युः। तदा चैवं ते भवेयुः। यदि भिन्नानि व्रीह्यादिकर्मापूर्वाणि न स्युः। यदि चैषां प्रयोजकशक्तिर्न स्यात्। तानि तु प्रयोजकशक्तिमन्ति प्रतिकर्म भिन्नानि विद्यन्ते। तत्र भेदस्तावदपूर्वाधिकरणे साधितः। यद्यपि चैषां साक्षादफलत्वं तथाऽपि स्वरूपसिद्ध्यन्यथानुपपत्त्यैव प्रयोजकत्वं भविष्यति। न च निष्फलानि। तन्नाम निष्फलत्वादप्रयोजकं भवति यदत्यन्तनिष्फलम्। तन्निरपेक्ष वा द्रव्ययागादि स्वरूपवल्लब्धात्मकम्। आग्नेयाद्यवान्तरापूर्वाणि तु परमापूर्वसिद्ध्यङ्गत्वात्पारम्पर्येण
670 फलवन्ति। न च धर्मेभ्यः प्राक् सिद्धानि निर्ज्ञातोपायपरिमाणानि वा। तस्मादात्मलाभार्थमेव प्रयुज्येन्ते यच्च येषु धर्मेषु विधीयमानेष्वपूर्वमुपतिष्ठते तत्तेषां प्रयोजकं भवति न यावत्किंचित्। व्रीह्यादिशब्दैश्च स्वकर्मसाध्यमेव केवलमपूर्वमुपस्थाप्यते नान्यत्। असंबन्धात्। ततश्चावघातादयस्तदेवैकमपूर्वं प्राप्यार्थवन्तो जाता न परमापूर्वं कर्मान्तरापूर्वं वाऽपेक्षन्ते। तद्दर्शयति। यस्मादवहननादि चेष्टया सह श्रुतेषु व्रीह्यादिष्वेव स्वापूर्वसाधनद्वारेण विधेः फलं दृश्यते तस्मान्नान्यत्र संक्रान्तिः। यदि तु तत्रापूर्वं न स्यात्ततोऽर्थाददृष्टं कल्प्येत। व्रीह्यादिशब्दैरनुपस्थापितोऽप्युपकारः प्रयोजकः कल्प्येत। अस्ति तु तत्। सूत्रमप्येवम्। विप्रयोगे—तण्डुलादिनिष्पाद्यस्यापूर्वस्य। प्रयोजनाभावात्सांनाय्यादिसंबन्धोऽपि व्यवहितपरमापूर्वद्वारेण कर्मान्तरापूर्वद्वारेण वा शब्दार्थः स्यात्। प्रत्यासन्नापूर्वसद्भावे तु न शब्दस्तावन्तं खेदं सहते। तस्मादप्रमाणकः सांनाय्यादिसंबन्धः। एवं तर्ह्याग्नेयाद्यपूर्वसंबन्धाविशेषात्स्रुगादीनामवघातादयः प्राप्नुवन्ति। नैष दोषः। कारकान्तरत्वेन तेषामलक्षितत्वात्। यथैव हि प्रदेयत्वाविशेषेऽपि सांनाय्यादेरपूर्वान्तर-

---

११ र्मापू]
आग्नेयादिजन्योत्पत्त्यपूर्वाणीत्यर्थः।
११ चैषां] एषां—उत्पत्त्यपूर्वाणां,
प्रयोजकशक्तिः—अङ्गग्राहकत्वशक्तिरित्यर्थः।

१२ पू] ( अ॰ २ पा॰ १ अ॰ २ )
१७ निर्ज्ञातो] न च—निर्ज्ञातेति—
आग्नेयादिजन्यावान्तरापूर्वाणामप्यदृष्टरूपत्वेन
तदुत्पत्तेरनिर्ज्ञातप्रकारत्वादित्यर्थः।

साधनत्वादप्रतीतिरेवमेकापूर्वसंबन्धेऽपि व्रीहित्वैकार्थसमवेतप्रदेयरूपकारकत्वाभावात्स्रुगादीनामग्रहणम्। यत्तु तस्मिन्नेवापूर्वे समानकारकत्वेनोपकरिष्यति तस्य भविष्यन्त्येव धर्माः। यथा यवानाम्। सर्वं चैतन्नवमे विस्तरेण वक्ष्यामः॥ १०॥ § 4943

इति तेषामर्थाधिकरणम्॥ ४॥

## ०.०.७८ द्रव्यविषय उद्देश्यतावच्छेदकनिरूपणाधिकरणम्

अवघातादिवदेव द्रव्याणामपि यथासंयोगं विनियोगे सिद्धे किमर्थः पुन- 671
रारम्भः। उच्यते। एवं तावत्तत्र दृष्टप्रयोजनवशेन यथासंयोगं विनियोगं पूर्वपक्षवादी मन्यते। स चात्रापि विना दृष्टेन प्रयोजनेन नैवाऽऽश्रयितव्यः। सति हि दृष्टार्थत्वेनान्यत्राप्रसङ्गे न कश्चिदपि यथासंयोगं व्यवस्थाहेतुरस्ति। यथा च तस्य व्रीह्यादिसंबन्धाद्भिन्नापूर्वप्रयुक्तत्वं नैवं वेद्युद्धननादिष्वेकं किंचिदपूर्वं प्रयोजकम्। एक एव च तत्र संयोगः। इह तु द्वौ संयोगौ 'एतानि वै दश यज्ञायुधानि' इत्येकः 'स्फ्येनोद्धन्ति' इत्येवमादिरपरः। तयोश्चैको विधिरपरोऽनुवादः। तद्यदि पूर्वो विधिस्ततः साक्षाद्यागसंबन्धे चतुर्थाधिकरणेन व्यावर्तिते सप्तदशारत्नित्ववदानर्थक्यात्तदङ्गेष्वेवावतरन्त्यङ्गत्वाविशेषाद्यथासामर्थ्यं सर्वार्थानीति विज्ञायन्ते। ततश्चोद्धननादिसंयोगानामवयुत्यानुवादत्वम्। अथ पुनरुद्धननादिसंयुक्ता एव विधय इतरोऽनुवादस्ततः पूर्वाधिकरणन्यायेनैव यथासंयोगं व्यवस्थेति। किं प्राप्तम्। अपूर्वभेदसंबन्धाभावाद्दृष्टार्थत्वाविशेषाच्च यथासामर्थ्यं विनियोगः। एवं यज्ञायुधसंयुक्ता विधयो भूत्वाऽर्थवन्तो भविष्यन्ति। बहुवचनं च विधेयार्थशब्दबहुत्वाभिप्रायम्।

३ य] यथा यवानामिति— 'व्रीहीन्प्रोक्षति, अवहन्ति' इत्यादौ व्रीह्यादिपदेनाऽऽग्नेयाद्युत्पत्त्यपूर्वनिष्ठकार्यतानिरूपितकारणतासमानाधिकरणकार्यतानिरूपितप्रदेयप्रकृतितण्डुलव्यापारककारणतासामान्याश्रयत्वं लक्षयित्वा तदवच्छिन्नोद्देशेनैव प्रोक्षणादयो विधीयन्ते। निरुक्तोद्देश्यतावच्छेदककोटौ प्रयोजनाभावादिना व्रीहित्वादेरप्रवेशात्कारणतासामान्यप्रवेशाच्च धर्माणां यवसाधारण्यसिद्धिः। स्रुगादिव्यावृत्तिसिद्धिश्च, विवक्षितव्यापारेण निरुक्तसाधनतायास्तत्राभावात्। व्रीहियवयोस्तु, आग्नेयाद्युत्पत्त्यपूर्वनिष्ठकार्यतानिरूपिता कारणता—आग्नेयादियागनिष्ठा, तदधिकरणवर्तिनी या कार्यता—व्रीह्यादिनिष्ठकारणतानिरूपिता, आग्नेयादिनिष्ठा कार्यता, तन्निरूपिता या निरुक्तव्यापारककारणता— व्रीहियवनिष्ठा कारणता, तत्सामान्याश्रयत्वस्य सत्त्वादवघातादिधर्मप्राप्त्यविघात इति दिक।

५ न्धाद्भि] भिन्नापूर्वमिति—विशेषापूर्वमित्यर्थः।

६ संयोगः] संयोग इति—संयुज्यते विनियुज्यतेऽनेनेति संयोगः। विनियोजकवाक्यमित्यर्थः।

९ च] ( अ॰ ३ पा॰ १ अ॰ ४ )

१४ ब] बहुवचनं चेति—भाष्यस्थमिति शेषः।

१४ विधेया] विधेयार्थशब्देति—विधेयार्थसमर्पकाणां स्फ्यश्च कपालानि चेत्यादिशब्दानामित्यर्थः।

इतरथा ह्येकवाक्यत्वादेक एव विधिः। तस्माद्यथासामर्थ्यं विनियोग इति प्राप्तेऽभिधीयते। § 4945

स्फ्यादेरुत्पत्तिसंबन्धः कार्यैरुद्धननादिभिः। § 4946
672 तत्र यज्ञायुधानीति प्राप्तमेवानुकीर्त्यते॥ § 4947

'एतानि वै दश यज्ञायुधानि' इति वैशब्दसंयोगादस्यानुवादसारूप्यम्। न चात्र भावनावचनो विधायकोऽस्ति यो विनियुञ्जीत विदध्याद्वेति। बहुतराणि च वाक्यानि त्वत्पक्षेऽनर्थकानि भवेयुः। न ह्येषामनुवादत्वे किंचित्प्रयोजनमस्ति। साक्षाच्चैतानि स्वाभिधानैरुद्धननादिष्वेव विनियुज्यन्ते। परोक्षवृत्त्या यज्ञायुधवाक्ये। यज्ञशब्दस्याङ्गलक्षणार्थत्वादायुधशब्दस्य च युद्धसाधनवचनस्य क्रियान्तरसाधनेष्वौपचारिकत्वात्। न चात्र सप्तदशारत्निन्यायोऽवकल्पते। न ह्यत्र वाजपेयस्येतिवत्संबन्धमात्राभिधायिनी यज्ञशब्दात्परा षष्ठी दृश्यते। सत्यपि चाऽऽनर्थक्यात्तदङ्गावतरणे सामान्यशास्त्राणि विशेषशास्त्रैरुद्धननादिसंयुक्तैरुपसंह्रियमाणानि न कर्मान्तरैः संबध्येरन्। तस्मादुद्धननादिवाक्यप्रापितानां सतां यादृशं वयं यज्ञायुधत्वं पश्यामस्तादृशम् 'एतानि वै दश' इत्यनेनानूद्यते। यत्त्वपूर्वभेदः प्रयोजको नास्तीति। तत्र ब्रूमः। कपालादीनां तावदस्त्येव पुरोडाशाद्यपूर्वभेदः। इतरेषामप्युद्धननादिद्वारत्वादन्यत्र तत्कृतोपकाराभावादसंकरः। तद्यथाऽवघातादयः समानापूर्वनिबन्धनेष्वपि स्रुगादिषु कारकान्तरत्वान्न क्रियन्ते। तस्मादेतेषामपि यथासंयोगमेव विनियोग इति सिद्धम् ॥ ११॥ § 4948

इति द्रव्यविषय उद्देश्यतावच्छेदकनिरूपणाधिकरणम्॥ ५॥

## ०.०.७९ अरुणाधिकरणम्

673 अरुणाशब्दो गुणवचनः, पिङ्गाक्ष्येकहायनीशब्दौ द्वावपि सामानाधिकरण्यादेकद्रव्यवचनौ। तत्र गुणे संदेहः। किमेकवाक्यगतेनैव द्रव्येण सह संबध्यत उत प्रकृतेन द्रव्यमात्रेणेति। ननु च पिङ्गाक्ष्येकहायनीशब्दयोरपि गुणवचनत्वान्नैवात्र वाक्ये द्रव्यमस्ति। कथं गुणवचनत्वमिति चेत्। उच्यते। § 4950

बहुव्रीहिसमासोऽयं मतुबर्थे विधीयते।
सोऽस्यास्तीति च संबन्धे मत्वर्थीयः प्रवर्तते॥ § 4952

गोमानित्येवमादिषु हि गोषु प्रातिपदिकेनाभिहितासु तद्वत्यर्थे मतुपाऽभिधातव्येऽवश्यं तावत्संबन्धः पूर्वतरमभिधातव्यः। कुतः। § 4953

न हि गोभिरसंबद्धो गोमानित्यभिधीयते।

तस्माद्विशेषणं तत्र संबन्धः पूर्वमिष्यते॥ § 4955

विशेषणं तावत्सर्वत्र पूर्वतरमभिधीयत इति स्थितम्। इह च संबन्धो विशेषणमिष्यते न गोमात्रम्। असंबद्धेषु प्रत्ययानुत्पादात्। यदि गोमात्रं विशेषणं भवेत्ततस्तासु प्रातिपदिकेनाभिहितासु विशेष्यं प्रत्ययोऽभिदध्यात्। संबन्धे पुनर्विशेषणे नियोगतः सोऽभिधातव्यः केनचित्। न चास्य प्रातिपदिकमभिधायकम्। आकृतिमात्राभिधायित्वात्। न च प्रातिपदिकार्थो गमकः। विनाऽपि संबन्धेनोपपद्यमानत्वात्। केवलगोशब्दोच्चारणेऽपि चाप्रतीतेः। गोमत्पदोच्चारणेऽपि प्रत्ययवेलायामेव संबन्धबुद्धिः। अतश्च ‘तदागमे हि तद्दृश्यते’ इत्यपि प्रत्ययार्थत्वम्। यच्च विशेष्ये वर्तते तेन तत्प्रत्यासन्नं विशेषणमुपादातव्यम्। न च प्रातिपदिकं विशेष्ये वर्तते ततस्तद्विशेषणभूतं संबन्धमुपाददीत। प्रत्ययस्तु तत्र वर्तत इत्युपादत्ते। स चेदुपात्तस्तेनैव संबन्धिप्रत्ययसिद्धेरभिधानशक्तिप्रतिबन्धाद्विशेष्यानभिधानम्। न च विशेष्यप्रत्ययात्संबन्धप्रत्ययो भवति। प्राक्संबन्धाद्विशेष्यत्वाभावात्सिद्धे च विशेष्यत्वेन संबन्धे न पश्चात्किंचित्प्रयोजनमस्तीत्यप्रतीतिरेवास्य प्राप्नोति। तस्मात्प्रथमतरप्रत्याय्यत्वात्प्रत्ययार्थः संबन्धः। इतश्च प्रत्ययार्थः संबन्धः। § 4956

शब्दवृत्तिनिमित्ते हि भावप्रत्यय इष्यते।
देवदत्तस्य गोमत्त्वं संबन्धश्च प्रतीयते॥ § 4958

यथैव शाबलेयस्य गोत्वं विशेषणं यथा च विशेषणभूता जातिर्भावप्रत्य- 674
येन निष्कृष्टाऽभिधीयत इति गोपदस्य सैव वाच्यत्वेनेष्टा। तथा देवदत्तस्य गोमत्त्वमित्युक्ते गवि प्रतिपत्त्यभावात्संबन्धनिष्कर्षप्रतीतेश्च स एव भावप्रत्ययार्थोऽध्यवसीयते। यश्च भावप्रत्ययार्थः स प्रातिपदिकस्य विशेष्ये वर्तमानस्य निमित्तम्। यच्च निमित्तं तद्विशेषणत्वान्मुख्यमभिधेयं, लाक्षणिकं विशेष्यम्। यदि च मतुपा संबन्धोऽभिहितस्ततः प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इति गोमत्प्रातिपदिकादुत्पन्नो भावप्रत्ययः संबन्धमभिधातुमर्हति नान्यथा। तस्मादपि संबन्धोऽर्थः। एतेन सर्वे यौगिकाः कृत्तद्धितसमासेषु व्याख्याताः। सर्वत्र हि भावप्रत्ययः संबन्धमभिधत्ते। राजपुरुषत्वमौपगवत्वं पाचकत्वमिति। अत एवैते यौगिकाः, यतस्तेन निमित्तेन वर्तन्ते।तस्मान्मत्वर्थविषयत्वाद्बहुव्रीहेरेकहायन्यादिशब्दैः संबन्धोऽभिधीयते। किं च। § 4959

यस्मिन्नन्यपदार्थे च बहुव्रीहिर्विधीयते।
तत्रापि प्रत्ययार्थत्वात्संबन्धस्य प्रधानता॥ § 4961

एकं हायनमस्या इति षष्ठ्यन्तेनान्यपदार्थः प्रदर्श्यते। षष्ठ्यर्थस्य च प्रत्ययार्थत्वादिह प्राधान्यम्। तद्रूपदर्शनार्थमेव सर्वनामप्रयोगः। केवलाया

२ स्थि] आकृत्यधिकरण इति शेषः।
५ नियोग] नियोगतः—नियमेनेत्यर्थः।
६ ग] गमकः—लक्षक इत्यर्थः।
२४ ह] सह—प्रकृत्यर्थेन सहेत्यर्थः।
३२ ना] तदुपदर्शनार्थमेवेति पठान्तरम्।

विभक्तेरप्रयोगात्सर्वनामार्थप्रतीत्यभावाच्च। षष्ठ्याश्च स्वस्वामिसंबन्धविकाराव-यवादिसंबन्धो वाच्य इत्येतत्प्रसिद्धम्। अतोऽपि संबन्धाभिधानं बहुव्रीहिणा। § 4962

न चाप्यन्यपदार्थत्वं जातेरध्यवसीयते।
न हि पिङ्गाक्षिसंबन्धस्तस्या नाप्येकवर्षता॥§ 4964

व्यक्तिधर्मा ह्येते, पिङ्गे अक्षिणी अस्याः, एकं हायनमस्याः, चित्रा गावोऽस्येत्येवमादयः। तासां च व्यक्तीनामनन्तत्वेन संबन्धानुपलब्धेर्व्यभिचाराच्चावाचकः शब्द इत्युक्तम्। न ह्यद्य जातायां पिङ्गाक्ष्यां प्रथमः प्रयोगो भवेत्। अतोऽवश्यं सामान्यं किंचिद्वाच्यमाश्रयितव्यम्। न च तदिह संबन्धादन्यदुपपद्यते। किं च। § 4965

वयोवस्थाऽभिधीयेत यद्यपि त्वेकहायिनी।
तथाऽपि गुण एवासौ न द्रव्यमिति गम्यते॥§ 4967

तस्मान्न द्रव्यशब्दः कश्चिदत्र विद्यत इत्यनुदाहरणत्वम्। न चान्यदुदाहरणं संभवति। साक्षाद्द्रव्यवचनशब्दाभावात्। सर्वत्र हि रूढिशब्दानां जातिवचनत्वं यौगिकानां च संबन्धाभिधायित्वम्। यस्त्वेकान्तेन द्रव्यवचनः स्याड्डित्थड-
675 वित्थादिशब्दः स नैव वेदे प्रयुज्यते। तस्माज्जातिगुणयोर्गुणयोरेव बा नियमः स्यादिति सिद्धान्तोक्तावपि योजयितव्यम्। अथवाऽधिकरणमेव निर्विषयत्वान्नाऽऽरब्धव्यमिति। उच्यते। § 4968

सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयते।
न हि संबन्धवाच्यत्वं संभवत्यतिगौरवात्॥§ 4970

यद्येकहायन्यादिभिः शब्दैः संबन्धोऽभिधीयेत ततो नोदाह्रियेरन्। न त्वेतैः संबन्धोऽ भिधीयते। कथम्। अतिगौरवात्। इह हि संबन्धमात्रं वाऽभिधेयं कल्प्येत तद्विशेषो वा। यदि तावत्संबन्धमात्रं ततः सर्वयौगिकानामेकविषयोपनिपातात्पर्यायत्वप्रसङ्गः। अथ संबन्धविशेषस्ततस्तस्य स्वतो विशेषाभावादवश्यं संबन्धिकृत एव भेदोऽभ्युपगन्तव्यः। संबन्ध्यपि चानभिधीयमानो न शक्नोत्यभिधीयमानं संबन्धं व्यवच्छेत्तुमित्यवश्यं सोऽप्यभिधातव्यः। न चैकस्मिन्संबन्धिनि संबन्धोऽवस्थितः। न च तन्मात्रेणान्यस्माद्व्यवच्छिन्नः प्रतीयत इत्युभावप्यभिधातव्यौ। तत्र गोमानित्येकः संबन्धी गोशब्देनाभिधीयते। द्वितीयस्य न कश्चिदभिधाता दृश्यते। तेन मतुपा विशिष्टं संबन्धमभिदधता तद्वन्तं सन्तं संबन्धिनमेकमनुक्त्वाऽभिधातुमशक्नुवता

१६ प्र] अनेन वैदिकशब्दानामेव विचारविषयतया लौकिकानां डित्थादिशब्दानां विचाराविषयत्वमुक्तं भवति। २५ स्व] स्वत इति—प्रतियोग्यनुयोगिभ्यां निरूपणीयस्येति पूर्वं शेषः। ३० नुक्त्वाऽभि] संबन्धिद्वयविशिष्टं सबन्धमिति पूर्वं शेषः।

नियोगतः सोऽप्यभिधातव्यः। ततश्च तमभिधाय संबन्धाभिधायामतिगौरवं स्यात्। अपि च। § 4971

संबन्धिनैव संबन्धः प्रत्येतुं यदि शक्यते।
पुनस्तस्याभिधाशक्तिं कः श्रुतेः परिकल्पयेत्॥§ 4973

यदा च पूर्वतराभिहितसंबन्धिप्रतीत्यैव संबन्धोऽप्याक्षिप्तस्तदा नैव प्रत्ययेनापि सोऽभिधीयत इति शक्यं वक्तुम्। तस्मादर्थाक्षिप्तेनैव संबन्धेन भवितव्यम्। यत्त्वप्रतीते संबन्धे विशेष्यं न प्रतीयत इति। तत्र ब्रूमः। § 4974

विशेषणाद्विना नेष्टो विशेष्यप्रत्ययोद्भवः।
विशेषणं च गावोऽत्र न संबन्धः कथंचन॥§ 4976

देवदत्तो हि गोभिरवच्छिन्नो विवक्षितः। ताश्च प्रातिपदिकेनोपात्ताः सन्त्येव। यत्तु नासंबद्धाभिरवच्छिद्यत इति। सत्यं नावच्छिद्यते। तेनैव ताभिः संबन्धाक्षेपोऽर्थाल्लभ्यते सर्वथा तावद्गोमच्छब्देन गोविशिष्टोऽयमित्येतदभिहिते 676
कथमनवस्थितास्ता गावस्तं विशिंषन्तीति तासामेवैष व्यापारो न शब्दस्य। तथा हि। § 4977

न विशिंषन्ति गावोऽर्थं पृथिव्यामनवस्थिताः।
तत्र किं शक्यते वक्तुं पृथिव्यप्यभिधीयते॥§ 4979

न हि येन विनाऽर्थात्मलाभो नास्ति तत्तदभिधातव्यम्। किं तर्हि। यावता विना विशिष्टबुद्धिर्नोत्पद्यते—गोभिश्चाप्रतीताभिस्तद्वति बुद्धिर्नोत्पद्यते न संबन्धेनापि। किं च। § 4980

वक्तृव्यापारमात्रं च संबन्धप्रत्यवेक्षणम्।
स हि गोभिरसंबद्धं न गोमन्तं विवक्षति॥§ 4982

सर्वत्र हि वक्तृक्रमविपर्ययेण श्रोतुः क्रमो भवति। स हि प्रथमं तावत्किंचिद्विशेष्यं विवक्षति ततस्तस्य केनचिद्विशेषणेन विनाऽभिधातुमशक्तेर्विशेषणविवक्षां करोति ततः शब्दोच्चारणम्। श्रोता पुनः प्रथमं तावच्छब्दं शृणोति ततो विशेषणं ततो विशेष्यं ततस्तदुपपत्त्यर्थानि वस्त्वन्तराणि प्रपद्यते। तेन यद्यपि वक्त्रा पूर्वं संबन्ध आलोचितस्तथाऽपि श्रोता पश्चादेवैनं ग्रहीष्यति। न त्वत्र वक्त्राऽप्यसौ पूर्वतरमवधारितः। संबन्धिनोरगृहीतयोर्ग्रहीतुमशक्यत्वादतस्तदीयेनापि क्रमेणोत्तरकालमेव प्रतीयमानः संबन्धो नार्थाक्षिप्तत्वं परित्यजति। वस्तुधर्मश्चैष यदसंबद्धा गावो न विशिंषन्ति स तासां व्यापारो

११ तेनै ] तेनैव—असंबद्धस्य विशेष्यव्यवच्छेदकत्वानुपपत्त्याख्यहेतुनैवेत्यर्थः।
१२ संब ] संबन्धाक्षेपः—संबन्धप्रतीतिः।
१२ ॰धाक्षेपोऽर्था ] अर्थात्—अर्थापत्तिप्रमाणादिति।

न शब्दस्य। तेन यं यथावस्थितं शक्नुवन्ति विशेष्टुं स तथाऽवस्थास्यते। संबन्धश्चासौ विशेष्यत्वं प्रतिपद्यत इत्यर्थात्संबध्यते। § 4983

विशेष्यत्वेन संपन्नं तद्विशेषणसंगतम्।
गोविशिष्टोऽयमित्येवं गोमच्छब्दोऽभिधास्यति॥§ 4985

तस्मादप्यनभिधेयः संबन्धः। किं च। § 4986

विभक्तिवाच्यरूपेण संबन्धो नावगम्यते।
रूपान्तरेण वक्तव्य इति नास्ति च लक्षणम्॥§ 4988

षष्ठीसप्तमीभ्यां हि यादृक् संबन्धः स्वप्रधानोऽसत्त्वभूतश्च प्रत्याय्यते न तादृक् मत्वर्थीयेन। न च कृदभिहितो भावो द्रव्यवद्भवतीत्येवमिव रूपान्तरोपादानं केचिदमिदधति। तत्र किमसत्त्वभूतसंबन्धाभिधानमाश्रीयतामुत संबन्ध्येवार्थलभ्यतद्विशिष्टोऽभिधीयतामिति। तदुच्यते। § 4989

प्राक्प्रतीतैकसंबन्धिविशिष्टेऽभिहिते परे।
संबन्धिन्येव संबन्धः प्रतीत इति नोच्यते॥§ 4991

677 यत्तु सिद्धे विशेष्ये न पश्चात्संबन्धप्रत्ययेन कार्यमिति। सत्यं नास्ति। विनाऽपि तु तेन नान्तरीयकत्वात्प्रतीयत इति किं क्रियताम्। यच्च भावप्रत्ययेनाभिधानादस्य मत्वर्थत्वमिति। अत्रापि ब्रूमः। § 4992

यदा स्वसमवेतोऽत्र वाच्यो नास्ति गुणोऽपरः।
तदा गत्यन्तराभावात्संबन्धो वाच्य आश्रितः॥§ 4994

गोमतो भावो गोमत्त्वमिति हि— § 4995

यन्निमित्तमपेक्ष्यायं गोमच्छब्दः प्रवर्तते।
स एव गोमतो भाव उच्यते त्वतलादिभिः॥§ 4997

तत्र यास्तावत्प्रातिपदिकार्थे विशेषणं गावस्तासां तद्वतः पुरुषादत्यन्तभेदाद्भावप्रत्ययेनाग्रहणम्। समवेतगुणग्राही हि भावप्रत्ययः। न चाऽन्योऽभिधीयमानस्तत्र गुणः संभवति, यो निमित्तभावाद्भाव इत्युच्येत। न च पुरुष एव तस्य भाव इत्येवं व्यपदेशभेदं लभते। तेन भावप्रत्ययः ‘आनर्थक्यात्तदङ्गेषु’ इत्यर्थप्राप्तं संबन्धमवलम्बते। निमित्तत्वमपि च तस्य वस्तुलक्षणमस्तीत्यभिधेयनिमित्तासंभवे तदपि तावद्गृह्यतामित्येवमाश्रीयते। तस्मादकारणमेतद्यौगिकानां संबन्धाभिधानशक्तिकल्पनायाम्। § 4998

अतश्च दण्डिशब्देन संबन्ध्येवोच्यते यथा।§ 4999

२ न्ध] संबन्धी चासाविति पाठो युक्तः। १८ )
२६ यः] ( अ० ३ पा० १ अ० ९ सू०

तथैव योगिकैः शब्दैः पिङ्गाक्ष्यादिपदैरपि।§ 5000

संबन्धस्य च भावत्वं व्याख्येयं तेषु पूर्ववत्।
बहुव्रीहेरतो द्रव्यमभिधेयं न तद्गुणः॥§ 5002

यदप्येकं हायनमस्य इत्यन्यपदार्थे षष्ठ्यर्थप्राधान्यात्संबन्धे बहुव्रीहिरिति। तत्राभिधीयते॥ § 5003

अभिधेयो बहुव्रीहेर्यद्यप्यस्येति कथ्यते।
तथाऽपि प्रथमान्तेन तुल्योऽसौ संप्रतीयते॥§ 5005

यदि त्वन्यपदार्थः षठ्यन्त एव संबन्धी स्यात्ततो यथैव राज्ञः पुरुष इत्यत्र षष्ठ्यन्तत्वाद्राजा पुरुषविशेषणं भवति, प्रथमान्तत्वाच्च पुरुषः प्रधानरूपेण समासार्थो भवति। एवमेव चित्रग्वादिशब्दैर्देवदत्तादिविशिष्टा गाव एव प्रतीयेरन्। न चित्रगोविशिष्टो देवदत्तादिः। तस्माच्चित्राणां गवामयमितीदृशेऽर्थे बहुव्रीहिर्वर्तते। यद्यप्यन्यथा विग्रहस्तथाऽप्युत्तरकालमीदृगर्थदर्शनादेवमेव विग्रहोऽपि कर्तव्यः। ततश्च संबन्धविशिष्टाभिर्गोभिर्देवदत्तादिर्विशिष्ट इति समासार्थो विज्ञायते। यथैव च राज्ञः पुरुष इत्यत्र षष्ठ्यां प्रयुज्यमानायां संबन्धः प्रधानभूतोऽभिधीयते, कृते च समासे निवृ- 678
त्तायां विभक्तौ पूर्वोत्तरपदयोः प्रत्येकप्रयोगदृष्टार्थापरित्यागात्संबन्धाधिक्यस्य च सामीप्यावगतविशिष्टार्थप्रत्ययादेव सिद्धेर्न संबन्धपरः समासो भवति, एवमेव षष्ठ्यप्रयोगादेव बहुव्रीहावपि न संबन्धप्राधान्यम्। तच्च न पूर्वोत्तरपदार्थयोर्नाप्यन्यतरस्येत्यन्यपदार्थभूतद्रव्यप्राधान्याध्यवसानम्। स चान्यपदार्थः संबन्धी योग्यतावशेन जातिद्रव्यगुणक्रियाणामन्यतमः परिगृह्यते। तद्यथा। § 5006

चित्रव्यक्तिरियं जातिर्द्रव्यं नानागुणं त्विदम्।
गुणोऽनेकाश्रयः कश्चिदियं त्वेकाश्रया क्रिया॥§ 5008

सर्वत्र च योग्यत्वात्समानाधिकरणपदान्तरोपनीतोऽन्यपदार्थविशेषो गम्यते। तदिहैकं हायनमस्या इति जातेरनादित्वान्न विशेषणं संभवतीति व्यक्तिराश्रीयते। ननु व्यक्तीनामानन्त्यव्यभिचाराभ्यामनभिधानमुक्तम्। नैष दोषः॥ § 5009

आनन्त्येऽपि हि भावानामेकं कृत्वोपलक्षणम्।
शब्दः सुकरसंबन्धो न च व्यभिचरिष्यति॥§ 5011

यत्र तावज्जात्यैवान्यपदार्थ उपलक्ष्यते तत्र तयैवैकया सकृद्गृहीतयोपलक्षिता व्यक्तयो देशादिभिन्ना अप्यभिधास्यन्त इति सुज्ञानः संबन्धः। न

१८ च] तच्च नेत्यत्र न चेति पाठान्तरं।

च तदुपलक्षिताभ्योऽन्यत्र प्रयोग इत्यव्यभिचारः। यत्र तु व्यक्तिभिरेव व्यक्त्यन्तराणि विशेष्यन्ते तत्रापि मूलोपलक्षणं जातिरेवाभ्युपगम्यते। सर्वथा दूरमपि विशेषणमालायामनुवर्तमानायां प्रथमोपलक्षणस्याभेदात्संबन्धदर्शनमुपपत्स्यते। सर्वप्रथमसर्वान्त्ययोश्च शब्दार्थत्वम्। आन्तरालिकानां तु लक्षणासिद्धज्ञानत्वादनभिधेयत्वम्। अतश्च पिङ्गत्वाक्षित्वाभ्यां स्वव्यक्तयो गुणावयवात्मिका लक्ष्यन्ते। ताभिरवयवि द्रव्यमुपलक्ष्यते। तच्च समासार्थो भवति। स पुनः किमभिधेयो लाक्षणिक इति। प्राधान्येन प्रतीतेः सामानाधिकरण्यात् 'अनेकमन्यपदार्थे' इति च स्मरणाद्देवतातद्धितमत्वर्थीयादिभिरिवाभिधीयत इति केचित्। अपरे त्वाहुः। युक्तं देवतातद्धितादावनन्यप्रयोजनत्वाच्छब्दाधिक्याच्चान्यपदार्थाभिधानम्। न च तत्र प्रातिपदिकार्थेन सोऽर्थः शक्यो लक्षयितुम्। व्यभिचारात्। केवलाच्च प्रातिपदिकादप्रतीतेः। बहुव्रीहौ तु पूर्वोक्तयोः पदयोर्विद्यमानस्वार्थत्वादन्यस्य चाभ्यधिकस्य शब्दावयवस्याभावात्पिङ्गत्वाक्षित्वाभ्यामेव च द्रव्यप्रत्ययसिद्धेर्न शक्यमभिधेयत्वं कल्पयितुमिति। न त्वेतद्व्यापित्वेन शक्यमाश्रयितुम्। कर्मधारये ह्येतद्व्यापित्वेन स्यात्सर्वथा ल-
679 क्षणानिमित्तोपपत्तेः। इह तु चित्रगुरित्येवमादिषु चित्रगोशब्दयोरत्यन्तव्यतिरिक्तार्थाभिधायित्वाद्देवदत्तादिशब्दैश्च न श्रुत्या लक्षणया वा सामानाधिकरण्यमवकल्पते। प्रागपि च देवदत्तादिशब्दादन्यपदार्थप्रतीतेर्न वाक्यार्थत्वकल्पना। न च केवलं समासवेलायां यौ पदार्थाववधारितौ तौ देवताद्यर्थसंबन्धिनौ, यतो वाक्यार्थो देवदत्तः स्यात्। तस्मादवश्यं प्रतीतेः स्मरणाच्चान्यपदार्थोऽस्य वाच्य इत्यभ्युपगन्तव्यम्। एवं च प्राधान्यमविरुद्धं भविष्यति। अतश्चैवमादिषु बहुव्रीहेरन्यपदार्थाभिधानशक्तिर्दृष्टेति यत्रापि कथंचिल्लक्षणा संभवति तत्रापि पूर्वक्लृप्तशक्त्यनपायादभिधेयत्वमेवाध्यवसीयते। तस्मादुपपन्नं पिङ्गाक्ष्यादीनां द्रव्यवचनत्वम्। यत्त्वेकहायनीति वयोवचन इति। तदनुपपन्नम्। वयसो लक्षणयाऽवगतेः। उक्षादिशब्दानां हि वयोवचनत्वम्। एकहायन्यादिशब्दाः पुनः कालविशेषयुक्तद्रव्यवचनाः सन्तो वयो लक्षयन्तः प्रवर्तन्ते। न ह्येकं हायनमस्या इत्येवं वयो निर्दिश्यते। किं तर्हि। द्रव्यम्। तस्य ह्येकं हायनं जातस्य न वयसः। तस्मादुभाभ्यामप्येताभ्यामात्मैकदेशोपात्तगुणविशिष्टद्रव्यप्रत्यायनादुपपन्नोऽयं संशयः किमरुणिमा कृत्स्नप्रकरणगतक्रयाङ्गद्रव्यशेषत्वेन निविशते। अथवा समानवाक्यस्थाख्यातपदप्रत्यायितक्रय एवैकहायन्यामिति। अत्राप्युद्धननादिवदाक्षेपः। संयुक्तश्रवणादसार्वत्रिकत्वे प्राप्ते तं परिहरति। एष गुणः क्रयेणैकहायन्या वा समानवाक्योपादानात्संबध्येत। तत्र तावत्कारकविभक्तिनिर्देशादनाशङ्कनीयतरे सति द्रव्यसंबन्धे, क्रयसंबन्धः श्रुतिबलीयस्त्वाद्भवेत्। न चासावमूर्तत्वान्निष्क्रियस्य गुणस्योपपद्यते। यदि त्वगत्या पुनर्द्रव्ये संबन्ध आश्रीयते तत्राप्येकहायन्याम् 'ऐकशब्द्ये परार्थवत्' इत्येवं क्रयारुणिमानौ प्रति वैरूप्यं स्यात्। भिन्नविभक्त्यर्थयोग-

८ ण्यात्] ( पा० सू० २—२—२४ ) )
३४ श] ( अ० १ पा० ४ अ० ५ सू० ८

श्चासन्नभ्युपगन्तव्यः। क्रियासंबन्धस्य कारकविभक्तिसाध्यत्वात्, गुणसंबधस्य च षष्ठ्यधीनत्वात्। अतश्च वाक्यगतेन संबन्धिना योग्यत्वाभावादसंबध्यमानः प्रकरणिना गृहीतः सर्वार्थं स्यादित्याशङ्क्यते। तेन तर्ह्ययमेवार्थो निश्चीयत इति क्रयसंबन्धो नाऽऽशङ्कितव्यस्तदर्थमाह—**न चाशकनीयमर्थं प्रमाणभूतः शब्दोऽभिधास्यतीति**। यदेतत्समानवाक्योपादानं करणविभक्तिनिर्देशश्चैतेनापि क्रयैकहायनीविशेषणत्वबुद्धिर्दृढा जायते। तेन शब्दप्रामाण्याद्वस्तुविसंवादाच्च 680 किं समञ्जसं किमसमञ्जसमिति जायते संदेहः। तन्न प्राथम्याच्छब्दानुरोधेन तावत्क्रियासंबन्धमुपन्यस्यति। वैदिकशब्दस्यातिमाराभावात्। तत्र विनियोगबलेनास्य वस्तुसामर्थ्यसद्भावान्वेषणे यतिष्यामहे। तद्यदि केनचित्प्रकारेणोपपत्स्यते ततः क्रय एव निवेशमङ्गीकरिष्यामः। **अथ तु न कथंचनोपपत्स्यते ततो वाक्यभेदमभ्युपगम्य प्रकरणधर्ममेनमध्यवस्यामः**। न चात्र वाक्यभेदः प्रत्ययाद्यन्यतमावृत्तिलक्षणः। कस्तर्हि, विभागरूपः। क्रयवाक्यस्य भेदं विभागलक्षणमभ्युपगम्येत्यर्थः। § 5012

यद्वा भिद्यत इत्येवं घञयं कर्मकर्तरि।
अरुणाशब्द एवं च भेदो वाक्यस्य गम्यते।§ 5014

पृथक्भवद्वाक्यं भेदयतीति वाक्यभेदः। तादृशं चाभ्युपगम्य प्रकरणधर्माध्यवसानम्। एतदुक्तं भवति यावच्छ्रुतिवाक्ये व्याप्रियेते तावत्प्रकरणधर्मत्वं नास्ति। यदा तु वस्तुविसंवादाद्विहतशक्तिनी ते निर्व्यापारे भविष्यतस्तदा प्रकरणविनियोग इति। किं तावत्प्राप्तमतआह— § 5015

**विहितस्तु सर्वधर्मः स्यात्संयोगतोऽविशेषात्प्रकरणाविशेषाच्चेति**। श्रुतिवाक्योश्च तावदसामर्थ्येनौदासीन्यात्। कथं पुनर्गुणस्याक्रियात्मकस्य सतः प्रकरणेन ग्रहणम्। उच्यते नैवात्र प्रकरणं ग्राहकत्वेनेष्टम्। कथं तर्हि। अरुणयेत्यत्र पदे या तृतीया तया करणानि प्रकरणलभ्यज्योतिष्टोमापूर्वसाधनानि सोमप्रभृतीन्यनूद्यारुणप्रातिपदिकार्थो विधीयते। § 5016

अतश्च पदमेवैतद्वाक्येनैवं विभज्यते।
या व्यक्तिः करणत्वेन चोदितापूर्वसाधनम्॥§ 5018

तया तत्साधयेन्नित्यमरुणत्वविशिष्टया। 681
एवं चेदरुणं कार्यं करणं यद्गृहाद्यपि॥§ 5020

तस्मात्सर्वकरणान्यरुणीकर्तव्यानि। § 5021

२० स्तु] ( अ॰ ३ पा॰ १ अ॰ ४ सू॰ ८ )
२१ पुन] कथं पुनरिति—इतिकर्तव्यताकाङ्क्षात्मकेन प्रकरणेन गृह्यमाणमितिकर्तव्यतारूपमेव स्यात्। क्रियाया एव च करणानुग्राहकत्वरूपेतिकर्तव्यतात्वात्कथमक्रियारूपस्यारुणिम्नः प्रकरणेन विनियोग इति शङ्काशयः।
२२ ग्राह] ग्राहकत्वेन—विनियोजकत्वेन।

यत्पुनर्यजमानादि विहितं कारकान्तरम्।
न तस्यायं गुणः शेषः सर्वार्थोऽप्यवधारितः॥ § 5023

यदुच्यते गुणवचनत्वादरुणाशब्दः क्रीणातिना न संबध्यत इति तदाक्षिपन्नाह— **ननु नैवायं गुणवचन** इति। रूपरसादिशब्दाः केवलगुणवचनाः। तथा हि। यदा तेषां द्रव्येषु प्रयोगस्तदा न मत्वर्थीयेन विना प्रवर्तन्ते। ये पुनः शुक्लारुणादिशब्दास्ते कदाचिदेव षष्ठ्यन्तद्रव्यपदसंनिधानाद्भावप्रत्ययरहिता गुणेषु वर्तन्ते। पटस्य शुक्ल इति। नित्यं गुणोपसर्जनद्रव्यवचनाः। तथा चान्तरेणापि मत्वर्थीयं द्रव्यसामानाधिकरण्यं प्रतिपद्यन्ते। यथा शुक्लः पटोऽरुणो घट इति। ननु च मतुब्लोपाम्नानादेषामेवं वृत्तिर्भविष्यति। नैतदेवम्। § 5024

शब्दानां न हि लोपेन वाच्योऽर्थः प्रतिपाद्यते।
तस्मादुभयसामर्थ्यमेवं तत्रावगम्यते॥ § 5026

यथैव क्विबन्ताधुनादिषु प्रकृतिप्रत्यययोः प्रत्येकमुभयार्थाभिधानसामर्थ्यं सदेव लोपद्वारेणान्वाख्यायते तथैवात्र प्रातिपदिकमेव मत्वर्थमप्युपादातुं समर्थमिति मतुब्लोपाम्नानम्। लक्षणयेति चेत्। न। क्विबन्तादिवदेव मुख्यरूपप्रतीतेः। न च लक्षणासु शास्त्रेणान्वाख्यानं क्रियते। रूपादीनामपि च लक्षणोपपत्तेर्मतुपा विना वृत्तिः स्यात्। चन्दनस्य गन्ध इतिवद्यान्तरेण भावप्रत्ययं गोररुण इत्यपि प्रयोगः स्यात्। यथा च गन्धत्वमित्युक्ते चन्दनादिसंबन्धमपास्य तद्विशेषाणां गन्धत्वसंबन्धो भवति। एवमरुणत्वमित्यपि द्रव्यसंबन्धो
682 न स्यात्। रूपादिशब्दवदेव चारुणादेरपि द्रव्यसामानाधिकरण्यं न स्यात्। यो हि मन्यते लक्षणयाऽरुणादिषु सामानाधिकरण्यमिति तस्य रूपादिष्वपि तथैव स्यादरुणत्वादिषु वा। न हि ते किंचिदप्यधिकं वदन्ति। एतेनारुणत्वादिभ्यो मतुब्लोपप्रसक्तिर्व्याख्याता। किं च। § 5027

लिङ्गसंख्यादिसंबन्धो गुणानां न च विद्यते।
तद्योगादपि शुक्लादेर्द्रव्यवाचित्वमिष्यते॥ § 5029

ननु 'गुणवचनानामाश्रयतो लिङ्गवचनानि भवन्ति' इत्येवं सेत्स्यति। न। रूपादिशुक्लत्वादिष्वपि प्रसङ्गात्। अपि च। गुणवचन इति न गुणाभिधानमात्रेणोच्यते। किं तर्हि। गुणमुक्त्वा यो द्रव्ये वर्तते। न ह्यन्यथा वचनशब्दः प्रयुज्यते। वचनमेव स्वरूपं शब्दस्येत्येवं गुणशब्देनैव व्यवहारसिद्धेः। अत एव रूपादीनामग्रहणम्। एतेन मतुब्लोपवाक्यं व्याख्यातम्। तस्माद्द्रव्यवचनोऽरुणाशब्दः, तस्य च कारकत्वाभिधानोपपत्तेरेकवाक्यत्वसिद्धिः। अतो न सर्वधर्मत्वमिति। **तदेतदपेशलमिति**। आकृत्यधिकरणोक्तन्यायविसंवादादशोभनमित्यभिप्रायम्। तथा हि। § 5030

---

९ तुब्लो] 'गुणवचनेभ्यो मतुपो लुगिष्टः' इति वार्तिकादिति शेषः।

२९ च] वचनमेव—अभिधानमेव।
३२ आकृ] ( अ० १ पा० ३ अ० ९ )

अन्वयव्यतिरेकाभ्यां यं कदाचिन्न मुञ्चति।
स एव तस्य वाच्योऽर्थो गुणं चैष न मुञ्चति॥§ 5032

एकान्तद्रव्यसंबन्धिनि तावद्गुणे विशेषणत्वात्पूर्वतरमभिहिते तत्संबन्धादेव प्रतीयमानस्य द्रव्यस्य न शक्यं वाच्यत्वं कल्पयितुमित्युक्तम्। § 5033

व्यभिचाराच्च न द्रव्यस्वरूपं वाच्यमिष्यते।
तद्गुणेऽन्यत्र वृत्तेश्च निवृत्तेश्चागुणात्ततः॥§ 5035

ननु गुणान्तरोत्पत्तिकालेऽन्यदेव द्रव्यमिति न व्यभिचरेत्। § 5036

न तावदयमेकान्तः कार्यद्रव्यान्तरोद्भवः।
स्थितेऽपि हि भवत्येव द्रव्ये किंचिद्गुणान्तरम्॥§ 5038

येषां तावत्कार्यद्रव्याण्येव घटादीनि पच्यन्ते यथा पैठराणां तन्मतेनाभेद एव। पैलूकानामपि तु परमाणुषु व्यभिचारः। यादृशं त्वस्माभिर्द्रव्यमभिहितं 683 तादृशस्य सर्वत्र गुणमात्रमेव भिद्यते न स्वरूपम्। यानि च घटादीनि द्रव्यान्तरेण गैरिकादिना रक्तानि संयुक्तसमवेतगुणद्वारेणारुणादिशब्दैरभिधीयन्ते, तत्रैकस्यैव द्रव्यस्यानेकनीलपीतादिशब्दविषयत्वापत्तेः स्पष्टं व्यभिचारित्वम्। अतश्चाऽऽकृतिव्यवहाराद्दूरेण स्थूलतरोऽयमित्यपेशलता। मतुब्लोपश्चात्यन्तनिरूढलक्षणावशादन्वाख्यायते। यत्तु मुख्यप्रत्ययान्नैवमिति। तत्रोच्यते। § 5039

गौणत्वं यो वदेदत्र स एवमनुयुज्यते।
संनिकृष्टाभिधेयार्थलक्षणायां न दुष्टता॥§ 5041

अग्निर्माणवक इत्यत्राग्निमाणवकयोरत्यन्तभेदात्सादृश्येन शब्दः प्रवर्तमानः प्रत्ययवैलक्षण्यान्नाभिधातेति सर्वेण ज्ञायते। ये तु जातिगुणवचना भूत्वा द्रव्यं प्रत्याययन्ति तेषामभिधेयलक्ष्यमाणवस्तुनोर्विवेकाभावात्प्रतीतावप्यविवेकः स्थित एव। स कथंचिदन्वयव्यतिरेकाभ्यां निपुणैः परीक्षकैरपनीयत इति। लोकस्य तु मुख्यबुद्धिरेव। न च परीक्षकाणामनभिधेयत्वं वदतां लोकविरोधः। प्रतीतमात्रव्यवहारी हि लोकोऽभिधानलक्षणाविवेकमकुर्वन्नुदासीनावस्थः सामान्यविशेषबाधादिसिद्ध्यर्थं परीक्षकैर्विवेकं क्रियमाणं न नानुमन्यते। तस्मादविरोधः। कथं न रूपादिशब्देष्वपि तल्लक्षणया मतुब्लोपः कथं वा लक्षणावृत्तिः शास्त्रेणान्वाख्यायत इति। अत्राभिधीयते। § 5042

---

१० येषां ] येषां—नैयायिकानामित्यर्थः।
१० रा ] पैठराणां-पिठरपाकवादिनाम्।
११ पैलू ] पैलूकानां-पीलुशब्दवाच्यपरमाणुषु पाकवादिनो वैशेषिकास्तेषामित्यर्थः।

निरूढा लक्षणाः काश्चित्सामर्थ्यादभिधानवत्।
क्रियन्ते सांप्रतं काश्चित्काश्चिन्नैव त्वशक्तितः॥ § 5044

इह केषुचिदर्थेष्वभिधानवदेव लक्षणाशक्तिरप्यनादिकालप्रवृत्तत्वेन निरूढाः, यथा शुक्लादिषु। केषुचित्तु क्रियते यथा रथाङ्गनामा चक्रवाक इति। केषुचित्पुनः कर्तुमपि न शक्यते, यथा शब्दस्पर्शरूपरसगन्धेषु। कथं पुनरिहाविशिष्टे संबन्धे सति न लक्षणेति। तत्रोत्तरमभिधानवदिति। यथा भवतः समाने गुणशब्दत्वे शुक्लादीनां गुणोपसर्जनद्रव्यवचनत्वं न रूपादीनामेवं मम लक्षणेति। तत्रैतत्स्यात्। अभिधानशक्तिः स्वाभाविकी। लक्षणा तु न संबन्धादधिकं निमित्तमपेक्षत इति। उच्यते। यदृच्छाशब्दत्व एतदेवं स्यात्। 684 तव तु शुक्लादीनां समवेतगुणद्वारेण द्रव्ये वृत्तिः। तत्त्वविशिष्टं रूपादिष्वपीति द्रव्ये वृत्तिप्रसङ्गः। तत्रावश्यं गुणगतः कश्चित्सामर्थ्यभेदोऽङ्गीकर्तव्यः। येन ते शब्दाः केचिदेव गुणिपरा भवन्ति, अन्ये गुणप्रधानाः। एवं लक्षणायामपि भविष्यति॥ § 5045

तस्माद्यथैव शब्दानां शक्तिभेदोऽभिधां प्रति।
प्रत्येतव्यस्तथाऽर्थानां लक्ष्यार्थान्तरगोचरः॥ § 5047

सत्यपि च फलानुमेये दृश्यमानार्थप्रत्यायनसामर्थ्ये, सत्यपि चास्माकमप्यदृष्टशक्तिगौरवतुल्यत्वे, अभिधेयमात्रप्रत्ययेन निवृत्तव्यापारे शब्देऽर्थप्रत्यये चाकृतार्थे सति कल्प्यमानत्वादर्थशक्तिः प्रमाणवती न शब्दशक्तिः। तेनादृष्टकल्पनातुल्यत्वेन पक्षयोस्तुल्यबलत्वम्। अतश्च रूपादीनां लक्षणाशक्त्यभावान्मतुपा विना न द्रव्ये वृत्तिः। तथा च ‘रसादिभ्यश्च’ इति प्रत्ययान्तरनिवृत्त्यर्थं मतुम्नियमपुनः श्रुतिरमुमेवार्थं द्योतयति। न च रूपादिप्रत्ययेन न द्रव्यं प्रत्याय्यते गम्यते हि धूमादिनेवाग्निरविनाभावाद्द्रव्यम्। शब्दस्य त्वतत्परत्वाल्लक्षणानध्यवसानम्। प्रधानत्वाप्रधानत्वप्रतीतिस्तु द्रव्यगुणयोः स्वाभाविकी। नित्यं हि रूपादिषु स्वप्राधान्येनाभिधीयमानेषु द्रव्यं विशेषणत्वेनोच्यते शुक्लादिषु विशेष्यत्वेन। अत एव चानादिकालप्रसिद्धार्थत्वादस्या लक्षणाया मतुब्लोपाम्नानेनानुगमः। या त्वादिमती नात्यन्तप्रसिद्धा नासौ शास्त्रेणानुगम्यते। विनाऽपि चानुगमात्संबन्ध्यन्तरवशेन सा कदाचिदुपलभ्यते। तद्यथा मधुरो रसः स्निग्धः शीतो गुरुरिति स्निग्धशीतत्वादीनां गुणान्तरविशेषत्वान्न रसेन संबन्धोऽस्तीति रसलक्षितेन द्रव्येण संबध्यते। तस्माच्छक्तिपर्यनुयोगाभावान्मतुब्लोपभावाभावौ। एतेन भावप्रत्ययसदसद्भावसामानाधिकरण्यवैयधिकरण्यव्यवस्था व्याख्याता। शुक्लत्वादिशब्दाश्च भावप्रत्ययनिष्कृष्टविशेष्यभूतगुणवचनत्वाद्गन्धवदेव नित्यं वैयधिकरण्येन संबध्यन्ते। § 5048

एतावांस्तु विशेषोऽत्र यदत्रापि विशेषणम्।

१७ श] शक्तिकल्पनेति पाठान्तरम्। शेषः।
२० सा] पा॰ सू॰ ( ५-२-९५ )
३० भावा] शुक्लादिरूपादिशब्दयोरिति

विशेष्य एव शुक्लत्वे शुक्लो द्रव्यविशेषणम्॥§ 5050

द्रव्योपसर्जनीभूतः स्वप्रातिपदिके स्थितः।
तादृग्निष्कृष्यते द्रव्यात्पश्चात्तु त्वतलादिभिः॥§ 5052

तेनैतस्य द्विरूपत्वं गन्धादेरेकरूपता।
तथा च शुक्ल इत्यस्य पुनरन्या द्विरूपता॥§ 5054

कदाचिद्गुणमेवाऽऽह गुणिनं लक्षयेत्क्वचित्।
षष्ठ्यन्ततद्विभक्त्यन्तवाच्यद्रव्योपसर्जनः॥§ 5056

पटस्य शुक्ल इत्यत्र निष्कृष्टो गुण आश्रितः। 685
पटः शुक्ल इति त्वत्र द्रव्यलीनोऽभिधीयते॥§ 5058

लिङ्गसंख्यादिसंबन्धः स्वाश्रयद्वारेण पूर्ववदेवोपपत्स्यते। तथा गुणवचनशब्दश्च द्रव्यप्राधान्ये वर्तते वैयाकरणानां गुणमुक्त्वा गुणिनि वर्तमानत्वात्। न हि वैयाकरणानां वैशेषिकवद्गुणाः परिसंख्यायन्ते। किं तर्हि, अङ्गाङ्गिभावापेक्षया गुणगुणिव्यवहारः। शुक्लादिशब्दाश्चोपसर्जनीभूतमर्थं वदन्ति न रूपादिशब्दा इति लिङ्गसंख्यासंबन्धासंकरः। भाष्यकारेण त्वेतमेव परिहारं मनसि कृत्वोक्तं, **भवति हि गुणवचनस्यापि स्त्रीलिङ्गता यथा** करूणाबुद्धिशब्दयोः। गन्धादिशब्दतुल्यावपि चैतौ प्रदर्शनमात्रविशेषादुदाहृतौ। एतदुक्तं भवति। येऽपि तावत्स्वप्रधानगुणवचनास्तेऽपि कथंचिल्लिङ्गसंख्याभ्यां युज्यन्ते किं पुनर्येषु द्रव्यप्राधान्यम्। एवमनया युक्त्याऽरुणेति गुणवचनः। **गुणवचनश्चेत्क्रीणातिना न संबध्यत** इत्युपसंहृते परः पुनराह—**अथ यदि क्रीणातिना न संबध्यते** तत एकहायन्या संबध्यतामिति। शक्यते हि गुणवचनस्य द्रव्यसंबन्धः कर्तुम्। सिद्धान्तवादी तु श्रुत्या क्रियासंबन्धावगमाद्द्रव्यसंबन्धो वाक्यलक्षणो दुर्बलत्वाद्बाध्यत इत्येतत्प्रतिपादयितुमाह—**तन्न**। **केवलं हि गुण**मिति। द्विप्रकारो हि नामशब्दानां संबन्धः सामानाधिकरण्येन वैयधिकरण्येन वा। तत्र यदोभाभ्यामुभयार्थोपादानं तदा सामानाधिकरण्यं भवति। षष्ठ्यन्तद्रव्यपदोच्चारणे तु वैयधिकरण्येन संबन्धः। तदिह केवलगुणगुणिवचनत्वादरुणैकहायनीशब्दयोः श्रुतिसामानाधिकरण्यं तावन्न विद्यते। नापि षष्ठीश्रुतिरस्ति। तस्मात्तृतीयाश्रुतिबलीयस्त्वान्न द्रव्यगुणयोः संबन्ध इति। बलाबलकृतं संबन्धनिराकरणमवगम्याप्रमाणकृतत्वाभिप्रायेणायं ब्रवीतीति **मत्वैकविभक्तियोगा**दित्याह। **तदनुपपन्न**मिति-बलाबलप्रदर्शनम्। प्र- 686
थमं तावत्स्वसामर्थ्येनारुणप्रातिपदिकस्य गुणवचनत्वं गम्यते। पदान्तरसंनिधानाच्च सामानाधिकरण्यमिति बलाबलम्। तत्राऽऽह। § 5059

२७ ष्ठीश्रुतिर ] तेन वैयधिकरण्येनाप्यन्वयो नोपपद्यत इति पूरणम्।

केवलारुणवाचित्वं लिङ्गाद्यद्यपि गम्यते।
तथाऽप्यगतितो वाक्याल्लक्षणावृत्तिराश्रिता॥ § 5061

इदानीं तृतीयाश्रुतिबलीयस्त्वात्क्रियासंबन्धावबोधाद्द्रव्यसंबन्धबाधं दर्शय-
ति। तत्राप्यगत्यैव प्रत्यवस्थानम्। **ननु गुणस्य क्रियासंबन्धाभावादिति।**
687 तस्योत्तरं तृतीयानर्थक्यप्रसङ्गादिति। न ह्यगत्याऽनभिधेयोऽर्थः शक्यः प्र-
त्येतुम्। न चात्र लक्षणयाऽपि सक्तुद्वितीयावत्तृतीयाऽर्थवती। कारक-
सामान्यस्याप्यनिष्टत्वात्। परस्त्वाह—लिङ्गसंख्यावदाश्रयद्वारप्राप्तं कारकम-
नूद्य प्रातिपदिकार्थो विधास्यत इति। अस्ति ह्येतदपि दर्शनं यद्गुण-
शब्देभ्यो विनाऽपि कारकत्वेन कारकविशेषणत्वाद्द्वितीयादयो भवन्तीति।
**नैतत्सारमिति।** यद्यपि कथंचिदरुणयेत्यस्यैकहायनीसंबन्धयोग्यत्वं तथाऽपि
क्रियाक्षिप्तायामेकहायन्याम् 'ऐकशब्द्ये परार्थवत्' इत्येवमुभयसंबन्धाभावे
बलीयसा क्रयसंबन्धेन गुणसंबन्धनिराकरणम्। नह्यत्र क्रियासंबन्धविभ-
688 क्तिवद्गुणसंबन्धविभक्तिः षष्ठी दृश्यते। नीलोत्पले तु श्रुतिविरोधाभावाद्वाक्य-
लक्षणोऽपि संबन्धोऽवगम्यत इति वैषम्यम्। ये तु सामानाधिकरण्यविक-
ल्पास्तान् 'नियमो वैकार्थ्ये हि' इत्यत्र षष्ठान्त्याधिकरणसूत्रे सर्वानेव व-
क्ष्यामः। सर्वथा लाक्षणिकं सामानाधिकरण्यमिति दुर्बलम्। न च कार-
कविशेषणत्वाद्गुणानां कारकविभक्तिः। किं तर्हि, कारकत्वादेवेति। एत-
दपि पश्वेकत्वविवक्षाधिकरणे वक्ष्यते। **आह। सत्यमेवमेतदिति।** पुनरपि
श्रुतिविरोधपरिहारार्थमेव यतते। कथम्। § 5062

तन्त्रेणोभयसंबन्धे विरोधित्वं प्रसज्यते।
प्रासङ्गिके त्विहैकस्मिन्नविरोधो भविष्यति॥ § 5064

689 **सर्वत्र तु बोधिते पदार्थ** इति कोऽयमुपन्यासः। उच्यते। § 5065

सर्वथा बाधिता तावत्पदार्थानां स्वतन्त्रता।
तेनानेकोऽपि संबन्धः कल्प्यमानो न दुष्यति॥ § 5067

अरुणाशब्दस्तावदवश्यमेव केनचिद्गुणिना संबन्धनीयः। एकहायनीशब्द-स्यापि क्रियासंबन्धात्स्वातन्त्र्यमपनीतम्। तत्र पदान्तरसंबन्धेऽपि सकृत्प्र-वृत्तायाः किमवगुण्ठनेनेतिवत्तस्य तावत्यैव श्रुतिपीडेति। अतो गुणप-देनापि संबध्यतामिति। **नैतदस्तीति**— अभ्युपेत्य द्रव्यगुणसंबन्धम्। याग-गतद्रव्यसंबन्धनिराकरणात्क्रीणातेर्विध्यनुवादयौगपद्याश्रयणविरोधः। यत्र तु

६ त्तुं] 'सक्तून् जुहोति' इत्यत्रेति शेषः
११ ऐक] ( अ० १ पा० ४ अ० ५ सू० ८ )
१२ क्रिया] क्रियासम्बन्धविभक्तिः—कारकविभक्तिरित्यर्थः।
१५ ल्पास्तान्] ( अ० ६ पा० ८ अ० १० सू० ३५। )
१८ णे] ( अ० ४ पा० १ अ० ५। )
२२ बो] बाधित इति पा०।
२८ या] याग इत्यत्र क्रय इति पाठ उचितः।
२९ णात्क्रीणा] क्रीणातेः प्राक्, नवर्णस्य, अन्यथेति पदस्य वा पूर्वं शेषोऽपेक्षितः।

क्रियाविशेषणानि सर्वाणि भवन्ति तत्र विशिष्टविधानादक्लेशो भवति। यत्र
तु क्रिया विधीयते द्रव्यस्य च किंचित्तत्र प्रत्यययावृत्तिलक्षणं वाक्यभेदम-
भ्युपेत्य नियमाभावो भवतीत्युच्यते। विशेषणं हि प्रसिद्धं भवति। न च
विधीयमानावस्थः क्रयः प्रसिद्ध इति प्रकरणगतैकहायनीमात्रसंबन्धप्रसङ्गः।
कतमा पुनरन्याज्योतिष्टोमप्रकरण एकहायनी। सर्वथा तावद्वाक्येन तस्याम- 690
पि गुणः प्राप्यते। यदि तु सा न विद्यते किं क्रियतां दक्षिणा तु वा काचिद्भ-
विष्यति। अनूबन्ध्यायां वा। अथवोद्दिश्यमानत्वादविवक्षितलिङ्गसंख्यैकहायन-
मात्रग्रहणात्सवनीयाग्नीषोमीययोरप्येकहायनयोर्ग्रहणादनियमः। सदृशन्यायेषु
वोदाहरणान्तरेष्वेव तद्भविष्यति। तद्यथा ‘दशमुष्टीर्मिमीते’ इत्यत्र सोम-
मानादन्येषामप्यङ्गेष्टिनिर्वापमुष्टीनां दशसंख्यत्वप्रसङ्गः। परः पुनरेकहाय-
नीवैरूप्याभ्युपगमवादलब्धप्रसरः शङ्कते—**नन्वपूर्वोऽपि विधीयमानो** मनसि
विपरिवर्तमानः प्रसङ्गादेव विशेष्यत इति। **नैतदेवमित्युत्तरम्**। यावद्यावद्धि
पदार्थो विशेष्यते तावत्तावच्छ्रुतेः स्वरसभङ्गः। तेन सकृत्प्रवृत्तायाः किम-
वगुण्ठनेनेत्येवमेकेन केनचिद्विशेषितः परेणापि विशेष्यतामित्यभ्युपगन्तव्य-
म्। न चाऽऽनर्थक्यम्। प्रकरणेऽर्थवत्त्वात्। तत्राप्येवमेव संबन्ध इति चेत्।
न। वाक्यान्तरप्राप्तद्रव्यानुवादेन गुणाविधौ वैरूप्यप्रसङ्गाभावात्। भवत्पक्षेऽपि
स्वरूपतः सोमं च प्रति क्रये विधीयमाने द्रव्यं च प्रति विशेषणत्वेनानूद्य-
माने वैरूप्यं भवति। एवमेकहायन्यपि क्रयं गुणं च प्रति वैरूप्यान्नैव
संबध्यते। पूर्वं त्वभ्युपेत्यवादमात्रेणाङ्गीकृतम्। तदिदानीं तत्रैव परस्य दु- 691
ष्टाशा मा भूदिति निराक्रियते। तेनायमेव परमार्थः। कारकं विभक्त्याऽनूद्य
प्रातिपदिकार्थो विधीयत इति। परे त्वविवक्षितकारकं गुणमात्रं प्रकरणयुक्तं
प्रयोगवचनेनागृहीतम् ‘आनर्थक्यात्तदङ्गेषु’ इत्येवं द्रव्येष्ववतीर्णं सर्वार्थं म-
न्यन्ते। तत्तु प्रकरणेनानितिकर्तव्यतात्मकगुणग्रहणाभावादानर्थक्यतदङ्गन्याय-
स्य च क्रयाङ्गैकहायन्यामुपपन्नतरत्वेन पूर्वपक्षमूलाभावप्रसङ्गादुपेक्षणीयम्।
तस्मात्पूर्वेणैव न्यायेन कृत्स्ने प्रकरणे निवेश इति। एवं प्राप्तेऽभिधीयते।
§ 5068

यत्र द्रव्यगुणैकार्थ्यं श्रवणादेव गम्यते।
अन्योन्यनियमस्तत्र तयोः स्थाल्यादिवद्भवेत्॥ § 5070

**अर्थैकत्वेति**—वाक्यविशेषोपलक्षणम्। **ऐककर्म्यादिति**—पुनस्तदेव हेतुत्वेनोपदिष्टम्। अथवा वाक्यार्थैकत्वे यत्रैकवाक्यता संभवतीत्यर्थः। तत्र सर्वविशेषणविशिष्टैकभावनाविधिः। तादृशीं कृत्वा कृतार्थो भवतीति परिग्रहात्सर्वनियमो भवति। यथा देवदत्तः काष्ठैः स्थाल्यामोदनं पचतीत्युक्ते सर्वेषामेकपाकविषयत्वम्। एवमिहापि केवलयोस्तावद्द्रव्यगुणयोरनुष्ठानमेव नास्तीति न विधीय-

२२ म्] ( अ° ३ पा° १ अ° ९ सू° १८ )
२३ क] प्रकरणेन—इतिकर्तव्यताकाङ्क्षात्मकेनेत्यर्थः।

ते। क्रियान्तरसंबन्धमपि क्रीणातेः परः प्रत्ययो न शक्नोति कर्तुम्। द्रव्यसंबन्धे तु सर्वत्र विधीनामेव शक्त्यभावः। सर्वत्र हि भावनातद्विशेषणार्थातिरिक्तेऽर्थे विधिव्यापारो नास्तीत्युत्तराधिकरणे वक्ष्यामः। तृतीयानिर्देशाच्च द्वयोरप्यरुणैकहायन्योः परस्परमनपेक्ष्य स्वसाध्यक्रियामात्रापेक्षिणोर्वाक्येन तद्विशेषक्रयसंबन्धो विज्ञायते। कुतः। § 5071

692 कारकं ह्युच्यते कुर्वन्नाक्रियां तत्करोति च।
तस्मान्न द्रव्यसंबन्धः कारकस्यास्ति कस्यचित्॥§ 5073

निष्पन्नत्वाविशेषाच्च नापेक्षैषां परस्परम्।
गुणानां च परार्थत्वादसंबन्धः समत्वतः॥§ 5075

न चाप्यन्योन्यसंबन्धे विधिरेषां प्रवर्तते।
तदधीना वयं चेति क्रियासंबन्धकल्पना॥§ 5077

क्रियाऽपि न विना कैश्चित्साध्यते कारकैः क्वचित्।
भूतभव्यवशत्वेन क्रियाकारकसंगतिः॥§ 5079

यथा च द्रव्यमिच्छन्ति साधकत्वेन कर्मणाम्।
तथा गुणमपीत्येवं नाऽऽरुण्यस्यान्यसंगतिः॥§ 5081

यथैव द्रव्येण विना क्रियानुपपत्तेरेकहायनीं क्रयो गृह्णाति— § 5082

तथा गुणविशेषेण द्रव्यं यावदलक्षितम्।
तावत्तेन क्रियासिद्धिर्नास्त्यतोऽपेक्ष्यते गुणः॥§ 5084

तस्मात्सोऽपि क्रियाङ्गमिति। तथा च 'द्रव्यगुणसंस्कारेषु' इति गुणग्रहणं कृतम्। ननु नान्तरीयकत्वाद्द्रव्यग्रहणे गुणानुष्ठानात्पृथक्प्रयत्नाभावान्न द्रव्यवद्गुणापेक्षा युक्ता। तथा हि। § 5085

न द्रव्यमनुपादाय प्रवृत्तिः कर्मणीष्यते।
पूर्वं द्रव्ये गृहीते तु तद्गुणोऽप्यनुवर्तते॥§ 5087

उच्यते। § 5088

कर्मण्यपि कृते पूर्वं न द्रव्येण प्रयोजनम्।
द्रव्याकाङ्क्षाऽथ पूर्वं स्यात्सा गुणेऽपि प्रतीयताम्॥§ 5090

९ गुणा] गुणानां—कारकाणामित्यर्थः।
११ गु] ( अ° ३ पा° १ अ° ३ सू° ३ )
२० नान्त] यद्विना यन्नोपपद्यते तत्तस्य नान्तरीयकमित्युच्यते।

यथैव हि त्वयोक्तं द्रव्यग्रहणेनैव गुणोऽपि कश्चिद्गृहीत एवेति न पृथगुपादानं प्रयोजयति तथा क्रियोपादानेऽपि यत्किंचिद्द्रव्यमुपात्तमिति नापेक्षितव्यम्। अथ तु प्रागुपादानाद्द्रव्यविशेषापेक्षा भवति तदितरत्रापि प्राग्द्रव्योपादानाद्भवत्येवापेक्षा किंगुणकं द्रव्यं गृह्णामीति। सर्वथा त्वेतावानत्र विशेषः। प्रज्ञानोत्तरकालमपि क्रियायां द्रव्यं व्यापार्यते। गुणस्तु प्रज्ञानान्न पृथग् द्रव्यव्यतिरेकेण व्याप्रियते। तावतैव चरितार्थत्वात्। न च तथा व्यापृतस्याव्यापृतत्वम्। अनेकप्रकारत्वाद्व्यापाराणाम्। परिच्छेदकाले त्वस्याधिकव्यापारत्वं विविच्यते। तथा हि। § 5091

द्रव्येण साधनीयेयमिति ज्ञाता यदा क्रिया। 693
कीदृशेनेत्यपेक्षाऽस्या गुणेऽप्युत्पद्यते तदा॥§ 5093

तेनात्र यदि तावद्वेद एव कंचिद्विशेषं दास्यति ततस्तेनेत्यवधारयिष्यते। यदि तु न दास्यति ततोऽर्थाक्षिप्त एव यः कश्चित्प्रमाणवान्भविष्यतीत्यवगमे सति विधीयमानस्यारुणादेरङ्गत्वं भवति। सर्वत्र च शब्दादचोदितेऽर्थे'अर्थाद्वा कल्पनैकदेशत्वात्' इत्येवमज्ञानसंशयव्युदास इष्टः। तदिहारुणत्वेन क्रियां साधयेदिति विस्पष्टे चोदिते शब्दान्तराणामध्याहारादीनामभावाद्यथा शक्नुयादित्युपबन्धे सति तत्साधनभूतं द्रव्यं परिच्छि न्दतेत्येतावदवधार्यते। कुतः। § 5094

गुणानामेवमात्मत्वं सर्वत्र ह्यवधारितम्।
नान्यथा निष्क्रियत्वाच्च विधेश्चैवमनुग्रहात्॥§ 5096

क्रयगतस्तावद्विधिस्तृतीयोपनीतं कथंचिदरुणिमानं न मुञ्चति। स च नान्येन प्रकारेण तदङ्गतां भजते। न चैकस्वरूपेव सर्वेषां साधनता। न च स्वसमवायिन्येव केवला चलनात्मिका वा क्रिया सर्वत्रेष्यते। न च प्रधानाक्रियायाः सर्वाण्येव साक्षात्साधनानि भवन्ति। अवान्तरव्यापाराधीनत्वात्संबन्धस्य। अरुणादीनां च योग्यत्वाद्द्रव्यपरिच्छेद एव स्वव्यापारो विज्ञायते। तत्रैषां कर्तृत्वादितरत्र करणत्वं भविष्यति। तेनारुणपदादेतावदवगतं किंचिद्द्रव्यं परिच्छिन्दताऽरुणगुणेन क्रयः साधयितव्य इति। तथैकहायन्याऽप्यन्यथा साधनत्वासंभवात्केनचिद्गुणेन मे परिच्छेदः कर्तव्य इत्येतावदपेक्ष्यते। तत्र गुणो यत्किंचिद्द्रव्यपरिच्छेद्यमाश्रयत्वेनापेक्षितुमारभते। द्रव्यमपि यं कंचिद्गुणम्। उभयापेक्षालक्षणश्च संबन्धः शीघ्रं निर्वर्त्यते। न च द्रव्यान्तरगुणान्तराणामत्र वाक्ये सापेक्षत्वं प्रतीयते। तेन नष्टाश्वदग्धरथवद्विनाऽपि षष्ठ्याऽनयोरेव संबन्धः। संनिहितातिक्रमकारणाभावादप्येवमेव विज्ञायते। किं च। § 5097

---

१३ अर्थाद्वा] ( अ० १ पा० ४ अ० १४ सू० २५ )

क्रयश्चावगतद्रव्यगुणः प्राधान्यसंमतः।
अनिच्छन्नश्रुतं कंचिद् गुणं द्रव्ये नियच्छति॥ § 5099

यन्नाम गुणोऽन्यथानुपपत्तेरश्रुतं द्रव्यमानयति तत्क्रयः श्रुतैकहायनीद्र-
व्यकत्वान्न प्रतीच्छति। तथैकहायनी यं गुणमश्रुतमानयति तमपि क्रय एव
श्रुतारुणिमगुणत्वान्नेच्छति। यदि ह्यसावनियतद्रव्यगुणः स्यात्ततो यत्किंचिद-
प्यानीयमानं सहेत। निरपेक्षद्रव्यगुणविशेषसंबन्धे नैव यथाचोदितः क्रय
694 उभयविशिष्टः क्रियते। अश्रुता च प्रधानस्य सत आवृत्तिरापद्येत। विकल्पे
वा पुनर्विशिष्टविधिर्बाध्येत। प्रधानत्वादेव च गुणद्रव्याभ्यां द्रव्यान्तरगुणान्त-
राक्षेपं क्रयणं निरुणद्धि। कांस्यभोजिन्यायेन वाऽमुख्योऽप्यनियमं वारयेत्।
किमुत मुख्य एव सन्। न वाऽश्रुतकल्पनया विनाऽनुपपत्तिः। श्रुतयोरेव
परस्परसंबन्धेन परिपूर्णत्वात्। एवं च स्ववाक्यगतमपि सामानाधिकरण्यं
समर्थितं भविष्यति। न चात्र श्रुतिविरोधः। यथा वक्ष्यति। 'न श्रुतिर्ब्रूते
वाक्यार्थो न' इति। तथा हि। § 5100

क्रयापेक्षित एवायं संबन्धः क्रियते पुनः।
न चात्रानुगुणा वृत्तिर्दुर्बलाऽपि विरुध्यते॥ § 5102

क्रय एव हि द्रव्यं गृह्णन्नेवमपेक्षते को गुण एतत्परिच्छेत्स्यतीति। गुण-
मपि गृह्णन्नपेक्षते किं द्रव्यमेतस्याऽऽश्रयो भविष्यतीति। तेनैव तयोः क्रयव-
शेनान्योन्यानुगुण्यं प्रतिपद्यमानयोरपि न परस्पराङ्गाङ्गित्वं भवति। यस्तु मन्यते
परिच्छेदकत्वाद्गुणस्य द्रव्याङ्गत्वं प्रतीयत इति। स वक्तव्यो गुणस्यापि क्रय-
मन्यथा साधयितुमशक्नुवतो द्रव्यमाश्रयत्वं प्रतिपद्यमानमङ्गमिति। तस्मात्क्र-
याङ्गभूतयोरेव नान्तरीयकः परस्परोपकारो भवन्नङ्गत्वमापादयतीति द्रष्टव्यम्।
यस्तु प्रकरणे निवेशं मन्यते तस्य केन गुणो विधीयत इति वक्तव्यम्। क्र-
यविधिना तावत्सह नैव संबन्ध इष्टः। प्रयोगवचनस्त्वक्रियात्मकं दूरादूपेक्षते।
न चारुणपदस्यैवं विधिशक्तिरस्ति। यद्यपि कारकत्वेन द्रव्याणि प्रतीयन्ते त-
थाऽपि तत्पदान्यविधायकान्येव। येऽपि तत्संबन्धिक्रियाविषया विधयस्तेऽपि
पर्यवसिताः संप्रति प्रतीयमाना अपि न विधातुं समर्थाः। न चैषां द्रव्यविशेष-
णेषु व्यापारः। तस्मान्न कथंचित्प्रकरणे निविशते। एकार्थास्तु विकल्पेर-
न्नित्यविशेषप्रतीतेः। अवान्तरव्यापारानेकार्थत्वमगृहीत्वा वदति—**यद्येककार्य-
ता किमिति विकल्पो न भवतीति**। सिद्धान्तवादी त्वाह—नैतेनास्मत्प्रतिपक्षः
कृत्स्नप्रकरणनिवेशः सिध्यति। क्रयसंबन्धो वा बाध्यते। तस्मात्सिद्धान्तान्त-
695 रदूषणत्वान्निग्रहस्थानमिति। **न च विकल्पः, नानाकार्यत्वादिति**—अवान्त-
रव्यापारभिप्रायेण। परस्तु प्रधानकार्यनानात्वमेवोक्तमिति मत्वाऽऽह—**न-
न्विदानीमेवोक्तमिति। तद्यापि विरुद्धं** यत्पूर्वमुक्तममूर्तत्वान्निष्क्रियो गुण इति।

१ त] अवगतद्रव्यगुण—इति। अवगतौ द्रव्यगुणौ यस्येति विग्रहः।
३३ द्या] तद्यापीति—विरुद्धोक्तिप्रसङ्गादन्यदपि विरुद्धमिति प्रदर्शयति।

ननु पूर्वपक्षवादिना तदुक्तमिदानीं सिद्धान्तवादी न सक्रियत्वं ब्रवीतीति युक्तो विरोधोपन्यासः। उच्यते। § 5103

संदेहः क्रियते सर्वः साधारणपदे स्थितः।
तत्र चामूर्ततोक्तेति सिद्धान्तेऽपि विरुध्यते॥§ 5105

अथवा पूर्वपक्षवादिना तद्धेतुत्वेनोक्तम्। हेतुश्चोभयसिद्धो भवति। य-
दि चायमसिद्धो भवेत्ततस्तदानीमेवोद्भाव्येत, यतस्तु नोद्भावितस्ततोऽभ्युप-
गतः। तथा सति चेदानीं सिद्धवदर्थैकत्वाभिधानात्सक्रियत्वमभिदधतो विप्र-
तिषिद्धमापद्यते। **नैतद्विरुद्धम्। न च विकल्प** इति। शक्तिभेदनिमित्तावान्तर-
व्यापारान्यत्वात्। तद्दर्शयति—द्रव्यं साक्षात्साधनं, गुणस्तत्परिच्छेदार्थ इति।
परस्त्वेतावतैव तदेतरत्तदर्थमितिवद्गुणस्य द्रव्यार्थत्वं मन्यमान आह—**यद्येवं
न तर्हि गुणः क्रियामभिनिर्वर्तयतीति। नैतदेवमिति**—द्वारमात्रत्वं तावद्द्र-
व्यस्य दर्शयति। परिहृते दोषद्वये वस्तुकृतमेकहायनीद्वारत्वमपश्यन्वाक्येनैव 696
द्वारद्वारिसंबन्धकरणाद्वैरूप्यापत्तिं चोदयति—**एवं तर्हीति। न ब्रूमोऽरुणाशब्द**
इति—सामर्थ्यकारितमेकहायनीसंबन्धं दर्शयति। **नन्वेवमपि वाक्यं भिद्ये-
तेति**—नियमनिराकरणार्थमाह। सत्यपि क्रयसंबन्धे प्रतिकारकं क्रियान्य-
त्वादर्थभेदनिमित्तो वाक्यभेदोऽस्त्येवेति। तथा च लोकवेदयोर्दृष्टमित्युदाह-
रणद्वयम्। प्रत्येकं देवदत्तादिषु भोजनं, पितुः पितामहस्य वाऽसोमपत्वं
व्रात्यपशोर्निमित्तत्वेनोच्यमानं साहित्याविवक्षया सिद्धम्। तत्र न पिबेदिति
संबन्धः पशुयागसबन्धश्चोभयमप्युदाहरणम्। **नैतदस्मत्पक्षस्य बाधकमिति**—
विकल्पपक्षवदेवासंबन्धोपन्यासः। परः पुनराह—**सत्यमेष न दोष** इति।
क्रियाप्राधान्ये तु तद्वशीकृतविशेषणसमुदाये वाक्यपरिसमाप्तिः। गर्गशतद- 697
ण्डनहोमाभिषवभक्षवदिति परिहारः। ननु दण्डस्य दण्ड्यसंस्कारत्वाद्भोज-
नादिवत्प्रतिगर्गमावृत्तिः प्राप्नोति। नैष दोषः। § 5106

शारीरो निग्रहो यत्र तत्र प्रत्येकभिन्नता।
हिरण्यादानदण्डस्तु समुदाये समाप्यते॥§ 5108

अपराधे निमित्ते हि शतसंख्याविशेषिता।
तदनुष्ठात्रपादाना राज्ञां वृत्तिर्विधीयते॥§ 5110

यथैवाध्वर्य्वादीनां दक्षिणा परिक्रयार्था कर्मसंयोगात्। एवं राज्ञामप्यर्थ-दण्डो नैमित्तिकी परिपालनवृत्तिः। तां तां च प्रति तत्र तत्रापराधे निमित्ते शतादीन्युपादीयमानत्वाद्विवक्षितैकसंख्यानि भवन्ति। यश्चासावपराधो गर्गकृतः

१ दु] तदुक्तं—निष्क्रियत्वं गुणस्योक्तमित्यर्थः।
३ स्थि] स्थितैरिति पा०।
५ द्धेतु] तद्धेतुत्वेनोक्तमिति—गुणस्य निष्क्रियत्वेऽमूर्तत्वं हेतुत्वेनोक्तमित्यर्थः।
९ स्त] तत्परिच्छेदार्थ इति—क्रियासाधनद्रव्यपरिच्छेदार्थ इत्यर्थः।

स एककर्तृकोऽनेककर्तृको वा राज्ञः शतादाननिमित्तं भवति। तत्काले
चापराधिनामपादानत्वेनावस्थानात्समस्तगर्गापादानकं राज्ञा शतं ग्रहीतव्य-
मित्यगवते सति प्रत्येकं ग्रहणे सत्येकेन शतेनापराधनिष्क्रिये कृते शेषमश्रुतं
698 ब्रह्मस्वहरणं स्यात्संख्यान्तरं च वृद्धावापद्येत। तस्मात्समुदाये वाक्यपरिस-
माप्तिः। परः **पुनरभिहितेऽपि हेतुविशेषे** दृष्टान्तद्वयात्संदेहमुपन्यस्यति। क्रय-
स्य यागसाधनसोमप्राप्त्यर्थत्वेन भूतभव्यसमुच्चारणन्यायेन विधायकलाघवेन
च प्राधान्याद् द्रव्यगुणयोश्च पूर्वहेतुविपर्ययेण विपरीतत्वादितर एकवाक्यत्वप्र-
तियोरपि नियमः सिध्यतीति नार्थ एकवाक्यत्वेनेति। सिद्धान्तवादी वदति।
वाक्यभेदे सति उभयविशेषणविशिष्टक्रयप्रतीत्यभावाद्यथाश्रुतप्रत्येकसंबद्धक्र-
यानुष्ठाने सति गुणेनापि यत्किंचिद्द्रव्यं गृह्येत द्रव्येणापि यः कश्चिद्गुणः। न हि
तदानीमन्योन्यासंनिधेरर्थाक्षेपप्रतिबन्धशक्तिरस्ति। न चैका क्रिया गुणद्रव्य-
वशीकारसमर्था स्यात्। अरुणगुणक्रयो ह्यनियतद्रव्यकत्वात्किमिति गुणोप-
स्थापितं यत्किंचिद्द्रव्यं न गृह्णीयात्। एकहायनीक्रयो वा यं कंचिद्गुणम्।
अथापि वाक्यान्तरशिष्टानि क्रयद्रव्याण्येव गुण आस्कन्दति तथाऽपि तेषु
वासःप्रभृतिषु दशस्वपि प्राप्नोति। तस्माद्विशिष्टैकक्रयसिद्ध्यर्थं वक्तव्यमेक-
वाक्यत्वम्। अतश्च नियम इति सिद्धम्॥ १२॥ § 5111

इति अरुणाधिकरणम्॥ ६॥

## ०.०.८० ग्रहैकत्वाधिकरणम्

699 एवं यथासंयोगं शेषविनियोगः स्थितः। इदानीं तद्विशेषचिन्ता। किमेकस्य ग्रहस्य संमार्ग उत प्राकरणिकग्रहमात्रस्येति। यथा चैकत्वयुक्तं तथा द्वित्वबहुत्वयुक्तमप्युदाहर्तव्यम्। 'यस्य पुरोडाशौ क्षायतः' 'यस्य सर्वाणि हवींषि नश्येयुर्दुष्येयुः' 'प्रयाजशेषेण हवींष्यभिधारयति' इत्यादि। सर्वत्र च किंचिदुद्दिश्य क्रिया विधीयते। तत्रोद्दिश्यमानस्य किं संख्या विवक्ष्यत उत नेति संशयः। ननु च वेदवाक्येष्वयुक्तोऽयं विचारः। कुतः। § 5113

प्रतीतिव्यतिरेकेण विवक्षाऽन्या न विद्यते।
नित्यत्वाद्वेदवाक्यानां श्रुतोऽतो नाविवक्षितः॥ § 5115

यानि पुरुषप्रणीतानि तानि पुरुषविवक्षाधीनवचनत्वात्संभवत्प्रमादाभिप्रायान्तरप्रमाणान्तरगम्यार्थानि भवन्ति। तत्र प्रतीतोऽप्यर्थो वक्तुर-

४ वृ] वृद्धाविति—अनेकशतग्रहणे शतं दण्ड्यन्तामित्यत्रैकवचनार्थान-नुष्ठानाच्छ्रुतिविरोधापत्तेरिति यावत्।

११ दा] तदानीं—वाक्यभेदपक्षे।

९ त्वात्संभ] संभवति प्रमादोऽभिप्रायान्तरं च येषु तानि। प्रमाणान्तरगम्योऽर्थो येषां तानि। संभवत्प्रमा दाभिप्रायान्तराणि च तानि प्रमाणान्तरगम्यार्थानि च संभवत्प्र-मादाभिप्रायान्तरप्रमाणान्तरगम्यार्थानीति विग्रहः।

नभिप्रेतत्वादविवक्षां लभेत। सा च द्वेधा विज्ञायते। यद्वा वक्तैव कथयत्यन्यपरं ममेदमभिप्रेतं प्रमादेन वा। तस्मादेतावन्मात्रमिह न ग्रहीतव्यमिति। यद्वा प्रमाणान्तरवशेनान्यथार्थेऽवधारिते वक्तनपेक्षाः श्रोतार एवाभिप्रायान्तरं प्रमादं वाऽध्यवस्यन्ति। न तु वेदवाक्येष्वभिप्रायान्तरं प्रमादो वा कस्यचिदस्ति। न च वक्ता, योऽन्यथात्वं कथयेत्सर्वपुरुषाणाम्। 'उक्तं तु शब्दपूर्वत्वम्' इति केवलश्रोतृत्वाश्रयणात्। न च प्रमाणान्तरगम्योऽर्थः। यतस्तद्वशेन स्वयमेव श्रोतारोऽन्यथात्वं प्रतिपद्येरन्। विवक्षाविवक्षे च वक्तृणां प्रत्ययविशेषाविच्छानिच्छाविशेषौ वा। तेन विवक्षितमविवक्षितमिति द्वयमप्येतद्वक्तभावादनुपपन्नम्। अतः श्रुताश्रुतयोरेव केवलयोरत्र ग्रहणाग्रहणे। नातः परं किंचित्कारणमस्ति। § 5116

पुंवाक्येऽप्यन्यथोक्तत्वं यावन्नान्येन गम्यते।
तावद्यथाश्रुतं मुक्त्वा नान्यथात्वपरिग्रहः॥ § 5118

उच्यते। § 5119 700

प्रतीतिं प्रति नैवात्र विसंवादोऽस्ति कस्यचित्।
प्रतीतेऽपि तु सत्येषा विध्यविध्योर्विचारणा॥ § 5121

एकत्वं तावदत्रासंशयमुक्तम्। तच्च ग्रहसंबन्धीत्येतदप्यसंदिग्धम्। इह तु सर्वार्थानाम्— § 5122

अभिधात्री श्रुतिः काचिद्विनियोक्त्र्यपरा तथा।
विधात्री च तृतीयोक्ता प्रयोगो यन्निबन्धनः॥ § 5124

प्रकृतिप्रत्ययश्रुत्योः स्वस्वार्थाभिधातृत्वम्। पदस्य कारकविभक्तीनां च विनियोजकत्वम्। लिङ्लोट्तव्यपञ्चमलकाराणां तु विधिसामर्थ्यम्। तत्रानुष्ठानकाले विधिश्रुत्यधीनः पुरुषः। स हि यत्र तया प्रवर्त्यते तत्राभिहितेऽनभिहिते वा विनियुक्तेऽविनियुक्ते वा तुल्यवत्प्रवर्तते। यत्र तु विधिना न नियुज्यते तत्राभिहिते विनियुक्तेऽपि न प्रवर्तते। न ह्यसावनुष्ठानं प्रति तयोरेकयाऽपि प्रेर्यते। इदमिहास्ति, अस्येदमिति चैतन्मात्रपरिच्छेदाद्विषयकर्तव्यताबुद्ध्यनुत्पत्तेः। तेनाभिहितविनियुक्तस्यापि विधिमनुष्ठानं च प्रतीत्य विवक्षाविवक्षे विधित्सिताविधित्सितचिकीर्षिताचिकीर्षितात्मिके भवतः। § 5125

नन्विदमपीच्छया विना नैवोपपद्यते। उच्यते। नैवात्र पारमार्थिकीमिच्छां वदामः। किं तर्हि। § 5126

---

६ तु] ( अ॰ १ पा॰ १ अ॰ ८ सू॰ २९ )
२५ ति] तयोः—अभिधातृविनियोक्तृश्रुत्योर्मध्य इत्यर्थः
२५ रि] परिच्छेदात्-निर्णयात्।
२६ प्र] प्रतीत्यलक्षणीकृत्येत्यर्थः। विधिज्ञापनप्रयोजनकं, अनुष्ठानज्ञापनप्रयोजनकं च वचनमङ्गीकृत्य विवक्षाविवक्षे भवत इति तात्पर्यार्थः।

परिग्रहपरित्यागाविच्छानिच्छाफले स्थिते।
तल्लक्षणार्थता त्वत्र स्याद्विवक्षाविवक्षयोः॥§ 5128

यथैव कूलं पिपतिषतीत्येवमादौ पातकालप्रत्यासत्तेरिच्छामुपचर्यैवं व्यपदेशो भवति तथा पौरुषेयेषु वाक्येषु परिग्रहापरिग्रहौ विवक्षाविवक्षयोः फलत्वेन प्रज्ञाताविति तावभिप्रेत्यायं विवक्षाविवक्षोपन्यासः। कथं श्रुतस्यापरिग्रहः स्यादिति चेत्। नैष दोषः। विध्यधीनः परिग्रह इति प्रागेवोक्तत्वात्। § 5129

यथैव पौरुषेयेषु पुरुषो हि प्रवर्तकः।
उक्तेऽप्यर्थे तथैवेह लिङादिर्विधिशक्तितः॥§ 5131

पुरुषस्थानीयो हि वेदे विधायकः। पुरुषेच्छास्थानीयं विधित्वम्। अतो
701 यद्विधित्वेन संस्पृष्टं तत्कर्तव्यं नेतरदित्यवधारणाद्विधिव्यापारसंस्पर्शपरिमाणमन्वेष्टव्यम्। कथं पुनस्तुल्यायां समानवाक्यगतोक्तिप्रतीतौ किंचिद्विधिः संस्पृशति किंचिन्नेति। तदुच्यते। § 5132

विधानाय प्रवर्तन्ते स्वशक्त्यैव विधायकाः।
योग्यशब्दोपनीतेऽर्थे सर्वस्मिन्नास्मदिच्छया॥§ 5134

यद्यस्मदभिप्रायानुरोधेनाभिधानविनियोगश्रुतिवशेन वा लिङादयो विदध्युस्ततः सर्वं विधीयेत। ते तु स्वशक्तिमनुरुध्यमानाः किंचिदेव विदधति न सर्वम्। तथा हि। § 5135

विधित्वं श्रौतमार्थं च भावनाकारकाश्रयम्।
ताभ्यां तु व्यतिरिक्तेऽर्थे नैकमप्येतदिष्यते॥§ 5137

श्रुत्या तावत्प्रयोजनभावना विधीयते। तदन्यथानुपपत्तेस्त्वर्थात्कारकान्तराणि। यस्तु श्रुतोऽप्यर्थो भावनाकारकतदाश्रयत्वेन नावधार्यते तत्रैकमपि विधित्वं नास्तीत्यनुष्ठानं प्रत्यनङ्गत्वम्। तेन संमार्गाद्यनुष्ठाने किं ग्रहैकत्वाद्यपि कर्तव्यमुत नेति जायते संदेहः। तत्र यद्येकत्वादि कारकत्वेन भावनाविशेषणं ततो विधिसंस्पर्शाद्विवक्षितं भविष्यति। अथ द्रव्यविशेषणं ततो न विवक्षितमिति। तदेतदप्रसिद्धालौकिकवेदवाक्यार्थव्याख्यानप्रकारकरणाशक्तेः पौरुषेयवाक्यव्याख्यासादृश्यापादनार्थमन्तर्णीतोपमानगौणवृत्त्याश्रयणेन फलसामान्यदर्शनाद्विधिशक्त्यशक्त्यधीनपरिग्रहापरिग्रहयोरेव विवक्षिताविवक्षितवाचोयुक्त्युच्चार-

१० पुरुषेच्छास्थानीयं] विधित्वं—अयमत्र प्रवर्ततामित्याकारकः प्रेरणाख्यो लिङ्निष्ठो व्यापारविशेषः।
१७ मा] अनुवर्तमाना इति पा°।
२० ता]
ताभ्यां—भावनाकारकाभ्यामित्यर्थः।
२१ श्रु] श्रुत्या—समानाभिधानश्रुत्येत्यर्थः।
२१ त्तेस्त्व] अर्थात्—विशिष्टविध्यन्यथानुपपत्तिरूपादर्थापत्तिप्रमाणादित्यर्थः।
२१ र्थात्का]
कारकान्तराणीति—धात्वर्थरूपकारकं तु पदश्रुत्यैव विधीयते न त्वर्थादित्येवं तात्पर्येण कारकान्तरेत्युक्तम्।

णं मन्दबुद्धिशिष्यप्रतिपादनार्थं ग्रन्थकाराणां व्याख्यातॄणां चान्यत्रापि वेदविषयमेवमेव गमयितव्यम्। अथवा। § 5138

न्यायेन संप्रदायाद्वा ये मीमांसकयाज्ञिकाः।
वेदं व्याचक्षते तेषामभिप्रायोऽयमुच्यते॥§ 5140

शब्दशक्त्यनुसारेण वाक्यार्थं गमयन्ति ते।
तत्र यः शक्त्युपारूढः स तैर्व्याख्यातुमिष्यते॥§ 5142

यस्तु शक्त्या परित्यक्तो न व्याचिख्यास्यते स तैः।
तेन व्याख्यातुमिष्टोऽर्थो यस्तेषां स विवक्षितः॥§ 5144

अनिष्टो यस्त्वशक्तित्वादविवक्षित एव सः॥§ 5145

अतः पूर्वसमावृत्तव्याख्यात्रिष्टं विवक्षितम्॥ 702
तेनोच्येत तथा तेषां त्वनिष्टं त्वविवक्षितम्।§ 5147

तस्माद्व्याख्यातृगतमेव विवक्षिताविवक्षितत्वमुपन्यस्य विचारकरणाद्वेदेऽप्यविरोधः। § 5148

ऋग्वेदादिसमूहेषु क्षेत्रज्ञा ये प्रतिष्ठिताः।
तेषां वाऽयमभिप्रायः स्याद्विवक्षाविवक्षयोः॥§ 5150

महाभौतिकदेहस्था यथाऽऽत्मानः सचेतनाः।
कंचिदर्थं विवक्षन्ति न विवक्षन्ति चापरम्॥§ 5152

तेषामन्तर्गताऽपीच्छा तद्वाक्यार्थविचारिभिः।
ज्ञायते शब्दशक्त्यैव स्फुरन्तीव बहिः स्थिता॥§ 5154

देहभेदप्रकाराश्च कर्मशक्तिवशानुगाः।
प्रकृत्यारम्भवैचित्र्याद्दृश्यन्ते परमात्मनाम्॥§ 5156

पार्थिवावयवप्रायाः शेषतोयाद्यनुग्रहात्।
जरायुजादयो देहा दृष्टा भुवि चतुर्विधाः॥§ 5158

---

१० स] पूर्वसमावृत्तेति—संवत्सरवाचिसमाशब्देन काललक्षणात्पूर्वकाले वृत्ताः—संजाता ये व्याख्यातारस्तेषां यदिष्टं तदर्वाचीनेन व्याख्यात्रा विवक्षितमित्युच्यत इति कारिकार्थः।

भूतान्तरानुबद्धेन तोयेनैव विनिर्मिताः।
श्रूयन्ते वारुणे लोके देहाः स्वच्छाङ्गलक्षणाः॥ § 5160

अन्तरिक्षे च बहवः प्राणिनो वातनिर्मितैः।
भ्रमन्ति लघुभिः सूक्ष्मैर्देहैर्भूम्याद्यनुग्रहात्॥ § 5162

स्वर्लोके तैजसप्राया देहाः शुद्धप्रभान्विताः।
आप्यायन्ते विकीर्णेन भानवीयेन तेजसा॥ § 5164

तथा च नक्षत्रेष्टिवाक्यशेषेऽभिहितं 'ये हि जनाः पुण्यकृतः स्वर्गं लोकं यन्ति तेषामेतानि ज्योतींषि यन्नक्षत्राणि'। तथा च मनुनाऽपि स्वर्गं लोकं गच्छन्नभिहितः, तेजोमूर्तिः पथर्जुनेति। § 5165

तथा व्योमशरीरोऽपि परमात्मा श्रुतौ श्रुतः।
इज्यते वारिणा नित्यं यः खं ब्रह्मेति चोदितः॥ § 5167

रूपस्पर्शादयो येऽपि महाभूतगुणाः स्थिताः।
703 प्रत्येकमात्मनां तेऽपि देहाः संभोगहेतवः। § 5169

शब्दब्रह्मेति यच्चेदं शास्त्रं वेदाख्यमुच्यते।
तदप्यधिष्ठितं सर्वमेकेन परमात्मना। § 5171

तथर्ग्वेदादयो देहाः प्रोक्ता येऽपि पृथक् पृथक्।
भोग्यत्वेनाऽऽत्मनां तेऽपि चैतन्यानुगताः सदा॥ § 5173

तेषां चान्तर्गतेच्छानां वाक्यार्थप्रतिपादने।
विवक्षा वाऽविवक्षा वा ज्ञायते शब्दशक्तितः॥ § 5175

विधिशक्त्या गृहीतं यत्तत्सर्वं हि विवक्षितम्।
तयैव तु परित्यक्तं व्याख्येयमविवक्षितम्॥ § 5177

शब्दब्रह्मात्मनोऽप्येवं सर्ववेदानुसारिणः।
विवक्षा वाऽविवक्षा वा वक्तव्या विधिशक्तितः॥ § 5179

अनादिनिधनेऽप्येवं वेदे वेदार्थगोचरे।
व्याख्यानं मुख्यवृत्त्याऽपि स्याद्विवक्षाविवक्षयोः॥ § 5181

९ तेजोमू] एवं यः सर्वभूतानि ब्राह्मणो नित्यमर्चति। स तच्छति परं स्थानं तेजोमूर्तिः पथर्जुना। इति पूरणम्।
९ थ] पद्यर्जुनेति—ऋजुमार्गेणेत्यर्थः।

ततश्चैतद्ग्रहैकत्वं किं वेदेन विवक्षितम्।
किं नेति न्यायमार्गेण विचार्य स्थापयिष्यति॥§ 5183

किं तावत्प्राप्तम्— § 5184

स्यात्कर्मैकत्वयुक्तं यद्विधानं वाऽपि वैदिकम्।
द्रव्यस्यैकस्य तज्ज्ञेयमनुष्ठेयं च कर्तृभिः॥§ 5186

सर्वत्र विधिप्रतिषेधात्मकत्वाद्वेदस्य यावत्किंचिच्छ्रूयते तत्सर्वं तत्संबन्धित्वेन गम्यते। तत्र येन प्रकारेण विधिप्रतिषेधविषयं भवति तथा सर्वात्मना योजनीयम्। तत्रैकस्तावत्पक्षः। सत्यपि द्रव्यविशेषणत्वे यथैव द्रव्यादिविशिष्टभावनाविधावर्थाद्विशेषणेषु विधिर्भवति। न त्वन्यथा विशिष्टा विहिता स्यादित्येवमेकत्वविशिष्टग्रहविशिष्टसंमार्गविध्यन्यथानुपपत्तेरर्थापत्त्यन्तरेणैकत्वविधानम्। एवं विशेषणमालायामपि सत्यां संयुक्तसंयोगपारम्पर्येण सर्वविधिप्रत्ययः। परस्परसंबन्धिषु गुणेष्वेकस्मिन्विहितेऽन्यो विधीयत इत्युक्तम्। अथवा यदि नाम द्रव्यविशेषणं यावद्विधिप्रत्ययो न गच्छेत्तत एकयैवार्थापत्त्या सर्वं विधातुमिष्यते। ततो यथा दशापवित्रतदेकत्वग्रहसं मार्गाणां भावनाविशेषणत्वम्, एवं ग्रहैकत्वस्यापि प्रतिपादनीयम्। ननु 704
चैकपदलक्षणया श्रुत्यैकत्वं ग्रहविशेषणं गम्यमानं न युक्तं वाक्येन भावनाविशेषणमापादयितुम्। नैष दोषः। विरोधाभावात्। ग्रहसंबन्धाविच्छेदेनैव हि भावनासंबन्धोऽवकल्पिष्यते। भिन्नविषयत्वाद्वा विरोधाभावः। यदि ह्युभयत्रापि तादर्थ्यलक्षण एवाऽऽश्रयाश्रयिविशेषणविशेष्यरूपो वा संबन्धः स्यात्ततः समानविषयत्वं प्रतीयेत। न त्वेवमप्यस्ति। ग्रहैकत्वयोराश्रयाश्रयिरूपेण विशेषणविशेष्यभावाद्भावनया च सह शेषशेषित्वाभ्युपगमात्। तेन ग्रहाश्रितेनैकत्वेन संमार्गभावनां कुर्यादित्येवमवगमयिष्यामः। तादर्थ्यसंबन्धे च भावनां प्रति निर्वृत्तेऽरुणैकहायनीन्यायेन पश्चात्तनो विशेषणविशेष्यभावः। सोऽयं पदेन प्रत्याय्यते। अथवा यदैकत्वं स्वार्थत्वेन ग्रहो नोपजीवितुं समर्थ इत्यवधारितं भवति तदाऽसौ तद्भावनां वाक्येनापि गच्छन्न निवारयति। यद्वा सुतरां प्रेरयति। भावनार्थं हि सदेतद्विधिना गृह्यमाणं पश्चादपि तावन्नियम्यमानं मां परिच्छेत्स्यति। अन्यथा तु मयाऽगृहीतं विधिनोपेक्षितं तावद्भावनाया न मम स्यात्। अथवा ग्रहार्थमेवैतदस्तु। तच्च ग्रहार्थत्वं येन प्रकारेणोपपद्यते स दर्शयितव्यः। तत्र यदि ग्रहः स्वरूपमात्रेण भावनायामनुप्रविशेत्तत एकत्वं पश्चाद्भविष्यदगृहीतं भावनया भावनागतं न स्यात्। ग्रहस्वरूपस्यैव स्यात्। अतोऽसावेकत्वपुरःसरमेव तत्समानदेशं वा पृथक्पदोपात्तारुणादिवदेवाऽऽत्मानं प्रतिपद्यते। कुतः। § 5187

विशिष्टो हि विधिः कृत्स्नो नाप्रकॢप्तविशेषणः।
विशिष्टो विशिनष्टीति तत्पूर्वं प्रविशत्यसौ॥§ 5189

गृह्णती भावनाऽप्येवमेकसंख्यं ग्रहं श्रुतम्।
न गृह्णाति विशिष्टं तमगृहीतविशेषणम्॥ § 5191

एवं च सति भावनाप्रविष्टं तद्विधिनाऽपि संस्पृश्यमानं द्रव्यगुणयोर्नियमे सति ग्रहस्य जातं भवति। अथ श्रुतिबलीयस्त्वादस्य द्रव्यसंबन्ध उच्यते। त-देवात्यन्तविपरीतम्। प्रातिपदिकोपात्तं हि द्रव्यं समानपदोपात्तत्वेन प्रत्यासन्नं स्यात्। इह तु समानविभक्त्युपादानादेकत्वं कारकविशेषणं शीघ्रतरं गम्यते। कारकं च विभक्तिप्रतिपादितमाविर्भूतपूर्वापरीभूतभावनैकदेश इत्युक्तम्। प्र-त्ययार्थत्वादेतदेव प्रधानम्। सर्वं च संभवत्प्रधानगामि भवति। तेन ग्रहश्चैकत्वं चोभयमपि कारकीभूतं विभक्तिश्रुत्यैव भावनायां प्रक्षिप्यत इति विधीयते। तत्तु विशिष्टविधानात्। वक्ष्यति हि 'शब्दवत्तूपलभ्यते तदागमे हि तद्दृश्यते
705 तस्य ज्ञानं यथाऽन्येषाम्' इति। यथैव दशापवित्रेण श्रुतो नान्येन क्रियते, संमार्गश्च श्रुतो नावघातः क्रियते, ग्रहस्य श्रुतो नाग्रहस्य क्रियते, तथैकस्य श्रुतो नानेकस्य कर्तव्यः। सर्वेषां चैतेषां पूर्वाधिकरणन्यायेन परस्परनियमः। तस्मादुपादीयमानपश्वादिवदेवोद्दिश्यमानस्यापि संख्या विवक्षिता। पुंपशुश्चेति प्रसङ्गादुदाहृतम्। न त्वत्र लिङ्गमपि तुल्यन्यायत्वात्संख्याविचारेण विचारित-प्रायमेवेत्युदाहियते, मा भूत् 'लिङ्गविशेषनिर्देशात्पुंयुक्तमैतिशायनः' इत्यस्य पुनरुक्तता॥ १३॥ § 5192

व्यक्तीरुद्दिश्य यत्कर्म स्वजात्याद्युपलक्षिताः।
विहितं गुणभावेन तत्सर्वार्थं प्रतीयते॥ § 5194

इह तावत् 'तुल्यश्रुतित्वाद्वेतरैः स धर्मः स्यात्' इत्येवं द्वितीयानिर्देशात्प्र-योजनवत्त्वाच्च ग्रहप्राधान्यं संमार्गस्य च गुणभावो विज्ञायते। तत्रापि ग्रहत्वस्य संमार्गानर्हत्वाद्व्यक्तयः संस्कार्यत्वेनावतिष्ठन्ते। तासां साक्षात्प्रत्यायनाभावाद्ग्र-हत्वं लक्षणत्वेनाऽऽश्रितम्। एष चोदनार्थोऽवगम्यते। यद्ग्रहकार्यं तत्संमार्गेण सगुणं भवति। तत्र य एव न संमृज्येत तस्यैव कार्यं विगुणं भवेत्। अतः सर्वे संमार्जनीयाः। यदि तु संमार्गगुणत्वेन यागाङ्गपशुवद् ग्रहश्चोद्येत तत एकेनैव सिद्धे कार्ये नापरो गृह्येत। न हि तदानीं ग्रहान्तरेष्वगृह्यमाणेषु कस्यचिद्वैगुण्यं दृश्यते। शास्त्रार्थस्य निर्वृत्तत्वात्। प्राधान्यपक्षे तु प्रतिप्रधानं शास्त्रभेदादेकस्मिन्नप्यसंस्क्रियमाणे तद्गतशास्त्रबाधप्रसङ्गः। § 5195

अथापि शास्त्रतन्त्रत्वात्संमार्गः स्यात्प्रतिग्रहम्।
तथाऽप्यकरणे तस्य ज्ञानं बाध्येत तद्गतम्॥ § 5197

१० ब्द] ( अ० ४ पा० १ अ० ५ सू० १५ )
१६ लिङ्ग] ( अ० ६ पा० १ अ० ३ सू० ६ )
३ तुल्य] ( अ० २ पा० १ अ० ४ सू० १० )
५ सा] साक्षात्—ग्रहपदशक्त्येत्यर्थः।

अबाधिते तु विज्ञाने योऽन्यो न क्रियते तथा। 706
विहिताकरणात्तत्र प्रत्यवायः प्रसज्यते॥§ 5199

तस्माद्ग्रहत्वापूर्वसंयोगाविशेषात्प्रकरणाविशेषाच्च सर्वप्रत्ययः। **ननु चैकवचनं श्रूयत** इति—अविवक्षाकारणमपश्यन्नाह। तत्रोत्तरम्। § 5200

श्रुतमात्रस्य सर्वस्य नानुष्ठेयत्वमिष्यते।
विधानविनियोगौ हि तत्रापेक्ष्यौ श्रुताश्रुतौ॥§ 5202

विहितो विनियुक्तश्च गृह्यते ह्यश्रुतोऽपि सन्।
श्रुतोऽपि तु न गृह्येत योऽर्थस्ताभ्यामुपेक्षितः॥§ 5204

तदेकस्मिन्वाक्ये प्रकृतिप्रत्ययपदश्रुतिप्रतिपादितानां बहूनामर्थानां को विधिविनियोगाभ्यां परिगृहीतः को वा त्यक्त इति चिन्तायाम्। § 5205

वचनव्यक्तिभेदेन सर्वेषामेव दर्शनात्।
विहितो विनियुक्तश्च कः को नेति विचार्यते॥§ 5207

मीमांसका हि वाक्यार्थविचारे प्रस्तुते सति।
लोकदृष्टीः प्रतिघ्नन्ति वचनाव्यक्तिपांसुभिः॥§ 5209

वर्तमानरूपेण लिङर्थस्मृतिसाधुना।
पञ्चमेन लकारेण किं नामात्र विधीयते॥§ 5211

केवला भावना तावन्न कदाचिद्विधीयते।
अननुष्ठेयरूपत्वाद्विशिष्टा सा विधीयते॥§ 5213

सा किं धात्वर्थमात्रेण संमार्गेण विशेष्यते।
लोकप्रसिद्धरूपेण शक्याऽनुष्ठेयतात्मना॥§ 5215

ग्रहद्रव्येण किं किंवा तदीयैकत्वसंख्यया।
दशापवित्रशब्दस्तु सर्वार्थेषु विवक्षितः॥§ 5217

तुल्यार्थत्वात्स भेदेन नान्यैः सह विचार्यते।
ग्रहादीनां च किं चेह नियोगेन निरूपणा॥§ 5219 707

---

९ त] तदिति—तस्मादित्यर्थः।
२४ हा]
ग्रहादीनामिति—ग्रहतदेकत्वसंमार्गाणां मध्ये ग्रहसंमार्गयोस्तावत्, एवमष्टपक्षी विचारणा कार्या। किं ग्रह एव भावनां विशिनष्टि किं वा संमार्ग एव उत ग्रहो वा संमार्गो वा। अथवा ग्रहश्च संमार्गश्च। आहोस्विदुभयोः संबन्धः। अथ समुदायो वा। अथवा ग्रहविशिष्टः संमार्गः, संमार्गविशिष्टो वा ग्रह इति।

संमार्गग्रहयोः किंवा विकल्पोऽथ समुच्चयः।
संबन्धः समुदायो वा विशिनष्टीह भावनाम्॥§ 5221

अथवाऽन्यतरेणैको विशिष्टोऽन्यतरस्तयोः।
विशिंषन्भावनामेव तद्द्वारेण विधीयते॥§ 5223

संमार्गैकत्वयोरेवमष्टपक्षी विचारणा।
विचार्यैवं पुनः सैव ग्रहत्वैकत्वयोरपि॥§ 5225

तथा कृत्वा द्वयोः पूर्वं विशेषणविशेष्यताम्।
तृतीयेन सहैकेन तादृश्येव विचारणा॥§ 5227

तथा। § 5228

किमुपादेयता तेषां स्यादथोद्दिश्यमानता।
संमार्गं प्रति संहत्य प्रत्येकं वा समागमे॥§ 5230

तत्र क्रियाप्रधानत्वे साहित्यं द्रव्यसंख्ययोः।
सकृच्च तादृशीं कृत्वा कृत्स्नां कर्ता कृती भवेत्॥§ 5232

ग्रहैकत्वे यदोद्दिश्य संमार्ग उपदिश्यते।
एकैकस्मिन्समाप्येते क्रियावाक्ये तदा तयोः॥§ 5234

तत्रापि तु ग्रहस्यैव संमार्गः किं विधीयते।
एकत्वस्यैव किं किंवा विकल्पेन द्वयोरपि॥§ 5236

किं समुच्चितयोः किंवा संबन्धसमुदाययोः।
किं वैकत्वविशिष्टस्य ग्रहस्यैव विधीयते॥§ 5238

ग्रहेण वा विशिष्टां किं संख्यां प्रति विधीयते।
क्रियां वा प्रत्युपादानं किं ग्रहस्यैव गम्यते॥§ 5240

एकत्वस्यैव किं किंवा विकल्पेन द्वयोरपि।
किं समुच्चितयोः किं वा संबन्धसमुदाययोः॥§ 5242

किमेकत्वविशिष्टस्य ग्रहस्यैव विधीयते।
708 किं वा ग्रहविशिष्टैकसंख्या संमार्गगामिनी॥§ 5244

एवं संदेह एताभिर्वचनव्यक्तिभिः कृते।
उपादेयतया संख्यां विधेयां मन्यते परः॥ § 5246

येन येन प्रकारेण संख्योपादीयते ग्रहे।
संमार्गे वा विधीयेत स तमापादयिष्यति॥ § 5248

यथा वोद्दिश्यमानत्वे विधानं देशकालयोः।
क्रियाद्वारं तथैव स्याद्ग्रहत्वैकत्वयोरपि॥ § 5250

यां यां स वचनव्यक्तिं विधेये रचयिष्यति।
वाक्यभेदेन तां तां तु सिद्धान्ती दूषयिष्यति॥ § 5252

प्राधान्यान्न ग्रहस्तावदुपादेयो भविष्यति।
तद्वशत्वात्तथैकत्वमुपादातुं न शक्यते। § 5254

ग्रहं चोद्दिश्य संमार्गविधानाश्रयणे सति।
तन्मात्रक्षीणशक्तित्वादेकत्वं न विधास्यते॥ § 5256

न तावत्तद्ग्रहे शक्यं विधातुमपुनःश्रुतेः।
द्वौ तत्राऽऽवर्तनीयौ हि स्यातां ग्रहविधायकौ॥ § 5258

ध्रुवं विधीयमाने हि संबन्धे ग्रहसंख्ययोः।
ग्रहसंमार्गसंबन्धादधिकेऽर्थे विधित्सिते॥ § 5260

ग्रहोऽप्यावर्तनीयः स्यात्संबन्धद्वयसिद्धये।
विधायकश्च नैकेन विधिना तौ हि सिध्यतः॥ § 5262

विदधद्वौ हि संबन्धौ युगपद्वा क्रमेण वा।
द्विरनुच्चार्यमाणस्तौ विदध्यात्प्रत्ययः कथम्॥ § 5264

संख्यासंमार्गसंबन्धौ ग्रहोऽपि प्राप्नुवन्नुभौ।
द्विरनुच्चार्यमाणस्तौ प्राप्नुयान्न सकृच्छ्रुतः॥ § 5266

ग्रहे विधाय संमार्गं क्षीणमुच्चारणं यदा।
तदैकत्वविधानाय कार्यमुच्चारणान्तरम्॥ § 5268

पुनरुच्चार्यमाणश्च समाम्नायाद्बहिः स्थितः।

प्रत्ययः पौरुषेयत्वादप्रमाणं प्रसज्यते॥§ 5270

सर्वप्रकारमन्विष्टं वचनव्यक्तिभिः पृथक्।
न शक्यते विधातुं चेदेकत्वं न ग्रहीष्यते॥§ 5272

709 केनचित्तु प्रकारेण विधिरस्य भवेद्यदि।
ग्रहादिवदनुष्ठाने क एकत्वं परित्यजेत्॥§ 5274

तत्र क्रियाप्रधानत्वे तद्विशिष्टविधेर्बलात्।
विशेषणविधानं स्यादार्थविध्यन्तरोद्भवम्॥§ 5276

यदि क्रियाप्रधानत्वं लप्स्यते पूर्वपक्षिणा।
ततः सर्वविवक्षाऽपि तद्वारेणास्य सेत्स्यति॥§ 5278

तस्मान्न श्रुतमात्रत्वं विधिग्रहणकारणम्।
अतः शुक्लादिभिस्तुल्यं नैतदन्यैर्विशेषणैः॥§ 5280

द्रव्यस्य क्रिययोर्वैतदेकत्वं स्याद्विशेषणम्।
येनेदमात्मसात्कुर्युर्ग्रहसंमार्गभावनाः॥§ 5282

तत्र द्रव्यविशेषणं तावन्निराक्रियते। तद्धि स्वरूपप्रक्षेपेण वा भवेदनेकत्वनिराकरणेन वा। तत्र स्वरूपप्रक्षेपविशेषणफलं तावत्सर्वेष्वपि संमृज्यमानेषु संभवत्येव। कथम्। यो हि बहून् ग्रहान्संमार्ष्टि संमार्ष्ट्यसावेकम्। अतश्च ग्रहत्वसंबन्धेन प्राप्त एकवचनेन चाप्रतिषिद्धः किमिव द्वितीयादेः संमार्गो न क्रियेत। तत्रैतत्स्यात्। प्रातिपदिकादेवैकस्मिन्ननेकस्मिंश्च ग्रहे संमार्जनीये प्राप्ते पुनरेकवचनश्रुतिर्गुणार्थवादत्वेनासंभवन्ती परिसंख्यार्था भविष्यतीति। नैतदेवम्। कुतः। § 5283

यत्र सामान्यतः प्राप्स्यन्विशेषे श्रूयते पुनः।
परिसंख्येष्यते तत्र न त्विहैवं पुनः श्रुतिः॥§ 5285

तच्च नानावाक्यत्वे सत्येव भवति। इह त्वेकेनैव वाक्येन प्राप्तिः परिसंख्या च क्रियत इत्युक्तम्। तच्चात्यन्तमेवानुपपन्नम्। § 5286

न चैकवाक्यमात्रेण द्वयमेतच्चिकीर्षितम्।
किं त्वेकेन पदेनापि तच्चाऽऽश्चर्यमतीन्द्रियम्॥§ 5288

११ शु] 'सोमारौद्रं घृते चरुं निर्वपेच्छुक्लानां व्रीहीणाम्' इत्यत्रोपादीयमानविशेषणैः शुक्लादिभिरित्यर्थः।

प्रातिपदिकेन हि सर्वग्रहसंबन्धः प्राप्यते। प्रत्ययैकवचनेन तत्रैव पदे 710
निवर्त्यते। न चैतदुत्प्रेक्षितुमपि शक्यते। § 5289

अन्या हि वचनव्यक्तिर्वाक्ये प्रापकहायके।
यथा तथा पदव्यक्तिभेदोऽप्यत्र प्रसज्यते॥§ 5291

तत्रैव च क्षणे प्राप्तिस्तत्रैव च निवर्तनम्।
कथमेकपदेनैतद्विरुद्धमभिधीयते॥§ 5293

किं च। § 5294

सामान्यप्रापणाशङ्का वाक्याद्यत्राऽऽनुमानिकात्।
श्रुतात्प्राप्तिर्विशेषे च परिसंख्या तदाश्रया॥§ 5296

निर्दोषत्वं हि तत्रास्या विधाने सति लभ्यते।
कल्प्यत्वेन हि तस्यैषा क्लृप्तादाश्रीयते फलात्॥§ 5298

समानवाक्यपदपूर्वभागावस्थितप्रातिपदिकप्रापितसर्वग्रहसंमार्गज्ञानप्रत्याख्यानेन तदधीनात्मलाभप्रत्ययप्रतिपाद्यायाः परिसंख्यायास्त्रिदोषत्वमपरिहार्यम्। यत्तु भाष्यकारेण निर्दोषपरिसंख्याविषयं प्रदर्शयतेष्टानिष्टवचनव्यक्तिद्वयं प्रदर्शितम्—**इत्यश्वाभिधानीमिति**। **नेत्यादत्त इति**। मन्त्रस्य रूपादेवाऽऽदाने प्राप्तत्वादिति च कारणमुक्तम्। तदयुक्तम्। कुतः। § 5299

इत्यादत्त इति ह्यस्मादाख्याताद्विधिसंभवः।
संबन्धेऽश्वाभिधान्यां तु नास्ति कश्चिद्विधायकः॥§ 5301

आदाने च यथा प्राप्तिरगृभ्णन्निति रूपतः।
तथैवाश्वाभिधान्यां सा तुल्या स्याद्रशनापदात्।§ 5303

न वाऽर्थविप्रकर्षोऽस्य रशनां प्रति कश्चन।
संयोगतो विशेषेण युगपत्प्रत्ययाद्द्वयोः॥§ 5305

सुतरां विधिवाक्ये तु विशेषः श्रुतिवाक्ययोः।
धात्वर्थनामसंबन्धविवेकेनोपलभ्यते॥§ 5307

पदत्रयाद्विना नामसंबन्धो नावकल्पते।
इत्यादत्त इति त्वेष द्वाभ्यामेव समाप्यते॥§ 5309

प्रत्ययश्च यथा मन्त्रं विधत्ते धातुगोचरे।

स्वपदार्थे श्रुते शीघ्रं न नामार्थे तथा श्रुते॥[§ 5311]

711 मन्त्रोऽपि रशनां शीघ्रं यथा याति स्फुटश्रुताम्।
न तथा ग्रहणं कष्टं छान्दसीयपदोदितम्॥[§ 5313]

न चाश्वरशनायां स प्राप्त्यन्तरमपेक्षते।
विशेषशब्दतुल्यं हि प्रापणं रशनापदात्॥[§ 5315]

अपूर्वसाधनत्वांशलक्षणाऽवश्यमेव हि।
सर्वत्रैवाऽऽश्रिता श्रुत्या विधिः स्यान्निष्प्रयोजनः॥[§ 5317]

तत्राश्वरशनाशब्दो लक्षणां याति यावता।
तावता रशनाशब्द इति तुल्यार्थता तयोः॥[§ 5319]

तस्मा**न्नाऽऽदत्त** इत्येतद्रूपात्प्राप्तमनूद्यते।
न **वेत्यश्वाभिधानी**मित्येतदत्र विधीयते॥[§ 5321]

किं त्वश्वरशनामन्त्रधात्वर्थैर्युगपत्त्रिभिः।
विशिष्टा भावनैवैका प्रत्ययेन विधीयते॥[§ 5323]

न चाऽऽदानेऽस्ति मन्त्रस्य रूपात्प्राप्तिः कथंचन।
न हि श्रुत्यनुमानात्प्राक्स्वयं मन्त्रो विधीयते॥[§ 5325]

रूपप्रकरणद्वारा श्रुतिर्यावत्तु कल्प्यते।
तावत्प्रत्यक्षया श्रुत्या विधिः शीघ्रं समाप्यते॥[§ 5327]

अप्राप्तविधिरेवायमतो मन्त्रस्य निश्चितः।
परिसंख्या फलेनोक्ता न विशेषपुनःश्रुतेः॥[§ 5329]

प्रयोजनं विधेः किं स्यादस्येति तु निरूपणे।
न गर्दभाभिधानीतः फलमन्यन्निवर्तनात्॥[§ 5331]

न तु वाक्यार्थ एवान्यनिवृत्तिर्भेदपक्षवत्।
अप्रवृत्त्यैव तत्सिद्धेः प्रवृत्तो हि निवर्त्यते॥[§ 5333]

न च गर्दभबन्धन्यां प्राप्तोऽननुमितश्रुतिः।

१४ रू] रूपात्—सामर्थ्यादित्यर्थः।

मन्त्रो येन निवर्त्येत वाजिरज्जुपुनःश्रुतेः॥§ 5335

शीघ्रश्रुत्या पुरा प्राप्ते पश्चिमा स्यात्पुनःश्रुतिः।
न गर्दभश्रुतिप्राप्त्या युक्ता ह्यश्वपुनःश्रुतिः॥§ 5337

अश्वश्रुत्यैव शीघ्रत्वान्मन्त्रे प्राग्विहिते सति।
निराकाङ्क्षीकृताऽऽम्नाये तथा प्रकरणिन्यपि॥§ 5339

लिङ्गप्रकरणद्वारा श्रुतिर्नैवानुमीयते।
तस्यामप्रापितायां च मन्त्रप्राप्तिर्न गर्दभे॥§ 5341

सोऽयमाभाणको लोके यदश्वेन हृतं पुरा। 712
तत्पश्चाद्गर्दभः प्राप्तुं केनोपायेन शक्नुयात्॥§ 5343

प्रयोजनं तु प्रत्यक्षश्रुतेरालोच्यते यदा।
भवत्या किं प्रभुत्वेन निरुद्धा लैङ्गिकी श्रुतिः॥§ 5345

यदाऽनुमितयाऽप्येष श्रुत्याऽश्वरशनां प्रति।
प्राप्नुयादेव मन्त्रः किं त्वरया विहितस्त्वया॥§ 5347

सत्यं त्वद्विहितस्यास्य श्रुतिर्नास्त्यानुमानिकी।
तथाऽपि तन्निरोधस्य फलं किमधिकं तव॥§ 5349

यद्यश्वरशनाप्राप्तिं केवलामानुमानिकी।
प्रत्यक्षश्रुतिवत्कुर्यात्ततः सा स्यादनर्थिका॥§ 5351

लिङ्गानुमितया श्रुत्या प्राप्नुयाद्रशनाद्वये।
स मा प्रापत्तयेत्येवं प्रत्यक्षां त्वरिता श्रुतिः॥§ 5353

केवलाश्वाभिधान्यां हि विधिः प्रत्यक्षया यथा।
न स्यात्तथाऽऽनुमानिक्या श्रुत्येत्याम्नायते ह्यसौ॥§ 5355

अतश्चापनरुक्तत्वात्प्रत्यक्षाऽर्थवती श्रुतिः।
तस्यां सत्यां निराकाङ्क्षान्मत्रान्नान्याऽनुमीयते॥§ 5357

---

८ सोऽय ] शीघ्रापहृतेऽर्थे मन्थरानर्थक्यमित्यत्र लोकप्रसिद्धिं प्रमाणयति—सोऽयमित्यादिना।

यद्यस्य विनियुक्तस्य प्रत्यक्षा स्यात्पुनःश्रुतिः।
ततश्च परिसंख्यानात्प्रसज्येत त्रिदोषता॥§ 5359

यदा तु प्रतिबद्धत्वात्सामान्यविनियोगकृत्।
नैव चेच्छ्रुतिरस्तीह न प्राप्नोति त्रिदोषता॥§ 5361

तदिदं परिसंख्येति सूत्रेऽस्मिन्नुपवर्णितम्।
निर्दोषत्वं तथैवेह वाच्यं न पुनरन्यथा॥§ 5363

ततश्च भाष्यकारेण यदिहोक्तमचिन्तितम्।
713 वाक्यभङ्ग्यन्तरं तत्र कर्तव्योऽतीव नाऽऽदरः॥§ 5365

न चैकत्वसंबन्धमात्रविधिः शक्यः। संमार्गग्रहसंबन्धमात्रविधानोपक्षीणशक्तित्वाद्विधायकस्य। यथौदनोपघातनिवारणविधिपरे वाक्ये श्रुतानामपि **श्वमार्जारादी**नामविधीयमानत्वादविशेषणत्वम्। कुतः। § 5366

न ह्यन्नभक्षणाद्रक्ष्याः श्वमार्जारादयोऽत्र नः।
तुल्यान्नाद्योपघातात्तु काकादेरपि वारणा॥§ 5368

तथा चाऽऽह। § 5369

काकेभ्यो रक्ष्यतामन्नमिति बालोऽपि चोदितः।
उपघातप्रधानत्वान्न श्वादिभ्यो न रक्षति॥§ 5371

न त्विदमत्रोदाहरणं घटते। कुतः। § 5372

पदार्थ एव काकादिः सर्वो ह्यत्राविवक्षितः।
संख्यामात्राविवक्षा तु ग्रहस्येति विलक्षणम्॥§ 5374

चमसेष्वपि संमार्गप्रसङ्गो यत्र वक्ष्यते।
तत्रैवेतदुदाहार्थं स्थालसंमार्जनादिवत्॥§ 5376

स्थितसिद्धान्तोदाहरणमपि पशुप्रकरणे श्रूयते ‘यद्यपि चतुरवत्ती यजमानः पञ्चावत्तैव वपा कार्या’ इति। यदवत्तं तत्पञ्चसंख्यं कार्यमित्येतद्विधिपरे वाक्ये वपाग्रहणमविवक्षितं वाक्यभेदप्रसङ्गादिति दशमे वक्ष्यति। § 5377

---

५ दिदं] ( अ॰ १ पा॰ २ अ॰ ४ सू॰ ३४ )
७ भा] यद्भाष्यकारेण ‘इत्यश्वाभिधानीमादत्ते’ इत्यस्मिन्वाक्य इत्यश्वाभिधानीमिति वचनव्यक्त्यन्तरमाश्रितं तत्र यथाश्रुतत्वादरो न कार्यः। किंतु विशिष्टादानभावनाविध्युत्तरकालीनो योऽरुणैकहायन्योरिव मन्त्राश्वाभिधान्योः परस्परनियमस्तत्परा वचनव्यक्त्यन्तरोक्तिः। एवं ‘नाऽऽदत्ते’ इत्यनेन आददातिसंबन्धबोधकवचनव्यक्तिनिरासश्चाऽऽदानसामान्यान्वयनिरासार्थः। तथा लिङ्गेनैवाऽऽदाने मन्त्रप्राप्त्युक्तिश्च संभवमात्राभिप्रायेत्येवं भाष्यतात्पर्यमाह—ततश्च भाष्येत्यादिना।
२४ क्ष्य] ( अ॰ १० पा॰ ७ सू॰ ७३ ) इत्यत्रेति शेषः

तत्र श्वमार्जारादिसंबन्धाविवक्षोदाहरणं घटते। इह तु। § 5378

संख्यामात्रविवक्षायां लोके यच्छ्रूयते वचः।
तदुदाहरणं देयं वृषलस्थबहुत्ववत्॥ § 5380

वृषलैर्न प्रवेष्टव्यं गृहेऽस्मिन्निति चोदिते। 714
प्रत्येकं संहतानां च प्रवेशः प्रतिषिध्यते॥ § 5382

बहुत्वस्याविवक्षितत्वात्। **ननु संमार्ष्टीति**—अयमेव ग्रहैकत्वसंबन्धमपि विधास्यति। न। श्रुतिविप्रतिषेधात्। न ह्येको विधायकः शक्नोति संमार्गभावनां च विधातुं ग्रहैकत्वसंबन्धं च। तत्र विरोधे सति संनिकर्षबलीयस्त्वात्संमार्गभावनाविधान आश्रीयमाणे विध्यन्तरानुपपत्तेरग्रहणमेकत्वस्य। यत्तूक्तं विशेषणविशेषणमपि विधीयत इति। तदनुपपन्नम्। § 5383

यदि तावद्ग्रहः संख्यां क्रियार्थे न प्रयच्छति।
शुद्धेनैव विशिष्टत्वान्न विशिष्टविशिष्टता॥ § 5385

यदा ह्येकत्वविशिष्टमात्मानं ग्रहो भावनायां प्रक्षिपति तदाऽवश्यं विशेषणं पूर्वतरं प्रक्षेप्तव्यम्। न ह्यन्यथा विशिष्टेन विशेषिता स्यादित्येवं भावनाऽप्येकात्वविशिष्टं ग्रहं गृह्णती नैकत्वमगृहीत्वा तद्विशिष्टं ग्रहं शक्नोति ग्रहीतुम्। तद्यथा शब्दो जात्यादिविशिष्टं द्रव्यमभिदधन्न विशेषणमनभिधाय विशिष्टे वर्तते। तेनावश्यं भावनाविशेषणं तावदेकत्वमित्याश्रयणीयम्। तच्चोपरिष्टान्निराकरिष्यामः। शुद्धद्रव्यविशेषणत्वे तु भावनाऽपि ग्रहमात्रेण संबद्धा। न संख्यया। संख्याऽपि ग्रहमात्रेण संबद्धा न भावनया। तत्र विशिष्टविधिना भावनाविशेषणमात्राक्षेपपर्यवसायिना नार्थान्तराक्षेपः शक्यः कर्तुम्। न हि भावनां विशिंषतस्तस्य तदेकत्वं विशेषणम्। § 5386

न चैकत्वविशिष्टं तं ग्रहं गृह्णाति भावना।
स्वरूपान्तरितत्वाद्धि सा संख्यां नैव पश्यति॥ § 5388

नापि भावनाविशिष्टस्य मा भूत्पुनरपि भावनाविशेषणत्वमेव। न हि भावनाऽविशिष्टं ग्रहं विशेष्टुं शक्नोति। तस्मान्मौलिकेन विधिनाऽनाकाङ्क्षित- 715
त्वान्न द्रव्यविशेषणाक्षेपः संभवति। तथा सत्यपि चेद्विधिरभ्युपगम्येत तत्प्रत्यावृत्तिमन्तरेण तदनुपपत्तेर्वाक्यभेदः स्यात्। अभ्युपेत्यापि तु, संमार्गवेलायां नैकत्वमादर्तव्यम्। स्वतन्त्रस्य ग्रहस्यैवैकत्वसंबन्धविधानात्। न हि विधीय-

२३ रूपा] स्वरूपेति—ग्रहविशेषणीभूतायाः संख्यायाः ग्रहस्वरूपेण—भावनाविशेषणेन, व्यवहितत्वादित्यर्थः।
२४ भा] भावनाविशिष्टस्य—भावनां प्रति विशेष्यभूतस्यापि ग्रहस्य, नाप्येकत्वं विशेषणमित्यध्याहारेण पूरणम्।
२५ शि] अविशिष्टमिति—एकत्वेनेति शेषः।
२६ था] अयं चापर इत्यादि—शक्यमाश्रयितुमित्यन्तं भाष्यं व्याख्यास्यति—तथा सतीत्यादि—ग्रहणमन्तेन।

मानावस्थः क्रयो गुणेन संबध्यमानं द्रव्यं विशिनष्टीत्युक्तमरुणाधिकरणे। तस्मात्तावन्न द्रव्यविशेषणभूतस्य ग्रहणम्। **अथैतदेकत्वं संमार्ग**भावनायाश्चोद्यते तथाऽपि न गुणत्वेन नापि प्रधानत्वेन संभवति। तत्र प्राधान्यं तावदनुपपन्नम्। अमूर्तस्य संस्कर्तुमशक्यत्वात्। न च द्रव्यसंस्कारेण तत्संस्कारः। अन्यत्वात्। ग्रहस्य वाऽयमेकत्वद्वारेण विधीयते। तस्य च स्वयमेव विहितत्वात्पुनर्विधानानर्थक्यम्। अनुष्ठानकालेऽपि च ग्रहस्याऽऽत्मीय एव संमार्गः प्रत्यभिज्ञायत इति नैकत्वनिमित्तबुद्धिः स्यात्। एवं गुणभावोऽपि निराकर्तव्यः। कथमरुणत्वस्य गुणत्वमिति चेदत आह। § 5389

716 क्रयद्रव्यपरिच्छेदाद्गुणोऽपि गुण इष्यते।
न तु निष्फलसंमार्गगुणो ग्रह इहेष्यते॥ § 5391

अनङ्गमाश्रितो हि गुणोऽप्यनङ्गमेव स्यात्। **ननु प्रधानभूतमपीति**। यद्द्रव्यस्याऽऽदौ निर्वर्तकत्वं प्रासङ्गिकं तद्द्वारेमैकत्वं संमार्गस्योपकरिष्यति। प्रधानभूतोऽपि च ग्रहो गुणभूतद्रव्यधर्मं क्रियाङ्गगुणपरिच्छेद्यत्वं प्रतिपत्स्यते। न हि शेषमाश्रितः शेषः। किं तर्हि। उपकारिणमाश्रित उपकारोतीति सर्वत्र स्थापयिष्यामः। शेषत्वं तु श्रुत्यादिप्रमाणकमेव भविष्यतीति। सिद्धान्तवादी तु वस्तुन्युपपद्यमानेऽप्यनेकार्थत्वे विधिशब्दस्यासामर्थ्याद्व्यवहितो वा गुणो वा
717 हातव्यो भवतीत्येवमेकत्वपरित्यागं वदति। न त्वेतदेवमविवक्षितं भवितुमर्हति। कथम्। § 5392

अविवक्षोपपन्ना स्यात्सत्यं द्रव्यविशेषणे।
संमार्गेण तु संबन्धो न द्वेधाऽपि निराकृतः॥ § 5394

यत्तावदुक्तममूर्तत्वात्संस्कर्तुं न शक्यत इति। तत्प्रातिपदिकार्थेऽपि ग्रहत्वे तुल्यम्। जातेरमूर्तत्वात्। अथापि व्यक्तिद्वारेणास्याः संस्कारः स संख्यायामपि तुल्यः। अथ व्यक्तौ कृतो जातेः कृतो भवतीति तथैकत्वस्यापि। तथा यदि जातिर्द्रव्यलक्षणार्था तथैकत्वमपि। अथ जातेर्मूर्तत्वं द्रव्याव्यतिरेकं चाऽऽश्रित्य साक्षादेव संस्कार इत्युच्यते। तदप्येकत्वस्याविशिष्टम्। यदप्युक्तं न च द्रव्ये क्रियमाणः संख्यायाः कृतो भवतीति। तदपि त्वत्पक्षे जातेरविशिष्टम्। अथ ग्रहशब्दस्य व्यक्तिवाचित्वात्परिहार उच्यते। तत आकृत्यधिकरणन्यायो बाध्येत। न ह्यनेकदेशकालवर्तिज्योतिष्टोमप्रयोगस्थग्रहव्यक्तिसंबन्धानुभवोऽस्ति। अद्य दृष्टेषु ग्रहेषु प्रथमः शब्दप्रयोगो न स्यात्।

१ र] ( अ° ३ पा° १ अ° ६ )
५ त्वा] द्रव्यादिति शेषः।
९ द्र] क्रयद्रव्येति—सोमक्रयाङ्गभूतैकहायनीद्रव्यपरिच्छेदद्वाराऽऽरुण्यं गुणोऽपि क्रयाङ्गमिष्यते। ग्रहस्य तु निष्फलसंमार्गाङ्गत्वासंभवान्न तत्परिच्छेदद्वारैकत्वस्य ग्रहाङ्गत्वं संभवतीति कारिकार्थः।
१७ न] अत्रोच्यते। न ब्रूम इत्यादि तस्मान्नैतत्किंचिदपि कर्तुमित्यन्तं भाष्यं सिद्धान्तवादीत्वित्यारभ्य—परित्यागं वदतीत्येवमन्तेन संक्षेपतो व्याख्याय क्रियाविशेषणत्वपक्ष एकत्वस्य विवक्षानिरासभाष्यमाक्षिपति—नत्वित्यादिना।

अतोऽवश्यं सामान्यं किंचिदुपलक्षणमाश्रयितव्यम्। न च तद्ग्रहत्वादन्यत्संभवतीति तदेव विशेषणत्वात्पूर्वमभिधेयमापद्यते। न चाऽऽकारवचनत्वं ग्रहशब्दस्य। प्रतिग्रहमवयवसंनिवेशस्य किंचिन्न्यूनातिरिक्तावयवत्वेन भिन्नत्वात्। न च तत्सामान्यं द्रव्यान्तरेभ्यो निवृत्तं तेषु तेषु चानुवृत्तं ग्रहत्वादन्यदस्ति। तस्मात्तदेव वाच्यम्। यत्तु ग्रहस्य क्रियमाणः संमार्गस्तदीयत्वावधारणेनैकत्वविषयो विज्ञायत इति मन्दफला च पुनः श्रुतिरिति। तत्राभिधीयते। § 5395

एकत्वेनापि संबध्य तावत्येव क्रिया यदि।
ततो निष्फलतोच्येत भेदस्त्वस्त्येकसंस्कृतेः॥ § 5397

अयमेवैकत्वसंबन्धाद्विशेषो यदेकस्मिन्क्रियते। अन्यथा हि ग्रहमात्रसंस्कारः स्यात्। तस्माद्द्रव्यगुणयोर्नियमसिद्धेरस्त्यरुणाशब्दस्येवैकत्वसंबन्धस्य पृथक्प्रयोजनमिति संस्कार्यत्वोपपत्तिः। गुणत्वप्रतिज्ञानं तु प्रणीताधर्मवद्भाष्यकारेणैव प्रतिपादितम्। मन्दयुक्तिक एवायमभ्युपगमो यद्गुणमेवाऽऽश्रितेन गुणेनोपकर्तव्यमिति। कुतः। § 5398

साक्षादयोग्यसंबन्धाः क्रियासंबन्धिनि स्थिताः।
असंबद्धैरसंबद्धाः साधयन्ति गुणाः क्रियाम्॥ § 5400

असंबद्धेषु क्रियमाणा गुणाः क्रियां न परिच्छिन्द्युरिति क्रियासंबन्धिनमाश्रयन्ति। न तु तद्गतगुणप्रधानत्वयोः कश्चिद्विशेष इति तयोरुपेक्षा। यथा च 718
क्रियासाधनं किंसंख्यमेतद्भविष्यतीत्येवमपेक्ष्यते। तथैव प्रधानमपि किंसंख्यं यस्य मयोपकर्तव्यमिति। एतावच्च संबन्धे कारणम्। अपि च। § 5401

या गुणस्योपकुर्वाणमात्मसात्कुरुते गुणम्।
ग्रहीष्यतितरामेषा तं तु संस्कार्यवर्तिनम्॥ § 5403

क्रियया हि प्रधानस्योपकर्तव्यं गुणेनापि। न च साधनगतोऽसौ तथागतां याति। यथा प्रधानगतः को नु खलु मम प्रधानस्योपकुर्वन्त्याः किंचिदनुग्रहं कुर्यादिति। महांश्चायमनुग्रहो यत्प्रधानेयत्तावधारणं नाम। यजमानसंस्काराणां च यागगुणभूतकर्त्रंशातिरेकेण फलप्रतिग्रहणयोग्यपुरुषकरणाद्भोक्तृत्वांशपातिनामपि यागाङ्गत्वं वक्ष्यते। स एवात्र न्याय इत्यविरुद्धं प्रधानाश्रयिणां गुणत्वम्। एवं स्थितेषु तु यद्विधेरसामर्थ्यमित्युक्तं तदुपादीयमानेष्वपि पश्वादिष्वविशिष्टम्। तत्रापि हि द्रव्यदेवतायागविशिष्टभावनाविधिपरे वाक्ये यदि लिङ्गसंख्यासंबन्धोऽपरः। क्रियायां द्रव्ये वा विधीयते ततो वाक्यं भिद्येतेति शक्यं वदितुम्। अथ तु विशिष्टविधानादवाक्यभेदः। स संमार्गेऽप्यप्राप्तत्वादविशिष्टः। तदिहैतावानेव विशेषोऽवशिष्यते यदग्रह उद्दिश्यमानः पशुरुपादीयमानः। न चैतावता किंचित्सिध्यति। अन्यथा पशुग्रहसंबन्धमात्र-

२६ क्ष्य] ( अ° ३ पा° ७ अ° २ ) इत्यत्रेति शेषः

भेदेनापि विवक्षिताविवक्षितत्वसिद्धिः स्यात्। अपि चास्मिन्नेव वाक्ये ग्रहमुद्दिश्य संमार्गे विधीयमानेऽपि दशापवित्रतदेकत्वादीनां विवक्षाऽभ्युपगम्यते। न च वाक्यभेदः। तथा ग्रहैकत्वेऽपि भविष्यति। यस्तु पदान्तरोपादानाद्विशेषं ब्रूयात्तस्य सर्वत्र यः कश्चिद्विशेषोऽस्तीति न क्वचिद्दृष्टान्तो नोपमा। तुल्यन्यायानां विषयाभावात्। किं च। § 5404

पदान्तरगतो यस्य गुणोऽभीष्टो विवक्षितः।
तस्य तुल्यपदोपात्तः कथं स्यादविवक्षितः॥§ 5406

तस्माद्ग्रहैकत्वमपि विवक्षितम्। अस्ति ह्युद्दिश्यमानस्यापि ग्रहस्य विधिसंस्पर्शः। अन्यथा हि विनाऽपि ग्रहेण संमार्गे कृते तत्कृतः शास्त्रार्थो भवेत्। अथ प्राप्तत्वाद्ग्रहस्याविधानमुच्येत। तदयुक्तम्। संमार्गं प्रत्यप्राप्तत्वात्। अथ ज्योतिष्टोमे प्राप्तेरविधिरुच्यते। स पश्वादेरपि लोके प्राप्तत्वात्प्राप्नोति। अथासौ यागेऽप्राप्तो विधीयते। तद्ग्रहस्याप्यविशिष्टम्। अथ संमार्गस्य ज्योतिष्टोमप्रकरणाबहिर्भावाद्ग्रहाविधानमुच्येत। तत्पशुयागस्यापि
719 लोकान्तर्गतत्वादविशिष्टम्। शक्यं हि यो ग्रह इतिवद्यः पशुरित्यपि वक्तुम्। उद्दिश्यमानत्वात्तु याऽत्र ग्रहस्याविधानाशङ्का सा विध्यनुवादयोरुद्दिश्यमानोपादीयमानयोश्चात्यन्तभेदादयुक्ता। तथा हि। § 5407

उद्देश्यस्यापि देशादेरेकान्तेन विधिः स्थितः।
उपादेयोऽपि चाऽऽलम्भः प्राप्तत्वान्न विधीयते॥§ 5409

तस्माद्विशिष्टसंमार्गविध्याक्षेपाद्ग्रहत्ववदेकत्वस्यापि विधिसंस्पर्शे सत्यर्थाद्गुणप्रधानभाव इत्येकत्वं निष्प्रयोजनत्वाद्गुणभूतं ग्रहश्च प्रयोजनवत्त्वात्प्रधानभूतः। किं च। § 5410

सह विध्यविधी युक्तौ न चैकपदगोचरौ।
पदभेदो न च न्याय्यः प्रकृतिप्रत्ययौ प्रति॥§ 5412

एकस्मिन्नेव च पदे युगपदुच्चरिते ग्रहानुष्ठानं प्रति विदिराश्रीयते नैकत्वमिति विप्रतिषिद्धम्। न च विभक्तिः पदान्तरम्। स्वातन्त्र्येणानियतपूर्वापरत्वेन चाप्रयुज्यमानत्वात्। गमकत्वात्पदमिति चेन्न। धूमादिष्वतिप्रसङ्गात्। एकस्मिन्नपि चाऽऽख्यातादिप्रत्ययेनैकोऽर्थः प्रतीयत इति प्रत्यर्थं पदत्वप्रसङ्गः। पदमिति च लौकिकः शब्दः स यत्र लोकेन प्रयुज्यते यत्र च स्मर्तृभिः स्मर्यते न ततोऽपनेतुं शक्यते। 'सुप्तिङन्तं पदम्' इति च स्मृतिः। तत्रैव च पदशब्दः प्रयुज्यते। तस्मात्प्रकृतिप्रत्ययसमुदायः पदं नावयवः। अभ्युपेत्यापि तु। § 5413

---

४ ब्रूयात्त ] तस्य सर्वत्रेति—यदि कश्चिद्यत्किंचिद्वैलक्षण्यमात्रेणातुल्यन्यायत्वं ब्रूयात्तदा तस्य तुल्यन्यायविषयाभावान्न क्वचिदप्यनुमानाङ्गं दृष्टान्तो नाप्युपमानव्यवहाराङ्गमुपमा सिध्येदित्याशयः।

२९ सुप्ति ] पा॰ सू॰ ( १-४-१४ )।

विभक्त्युपात्तकर्मत्वविवक्षा चेदिहेष्यते।
संख्याऽपि तदुपात्तत्वान्न शक्या न विवक्षितुम्॥§ 5415

अविवक्षायां शब्दस्याश्रुतसमत्वमाश्रीयते। § 5416

यावच्छ्रुतोऽपि शब्दः सन्नाश्रुतः परिकल्प्यते।
तावत्तदुक्तमर्थं को वाक्यार्थादपनेष्यति॥§ 5418

तदिह यदि तावत्संख्यापरित्यागाद्विभक्तिः परित्यक्ता ततः कर्मत्वपरित्यागोऽपि प्राप्नोति। ततश्च ग्रहस्य संस्कार्यत्वं हीयेत। प्रयोजनवत्त्वात्संस्कार्यत्वमिति चेन्न। कारकविभक्तिमन्तरेण क्रियासंबन्धाभावात्। न ह्यविभक्तिकस्य ग्रह इत्येतावतः संमार्ष्टीत्यनेन संबन्धोऽवकल्पते। ततोऽवश्यं कर्मत्वं विवक्षितव्यम्। अतश्चाऽऽदृतायां विभक्तावेकदेशप- 720
रित्यागाभावात्संख्याविवक्षा दुर्निवारेत्यशक्यः सर्वेषां संमार्गः। तेथा हि।
§ 5419

संमार्गो यदि सर्वेषामेकत्वस्याविवक्षया।
न कस्यचिद्भवेदेष ग्रहकर्माविवक्षया॥§ 5421

न ह्येकस्मिन्पदे युक्तः प्रकृतौ प्रत्ययेऽपि वा।
श्रुताश्रुतत्वसंकल्पो विरोधात्सदसत्त्ववत्॥§ 5423

श्रुतशब्दाभिधेयानां नार्थानां युगपत्तथा।
ग्रहणाग्रहणं युक्तमर्द्धकुक्कुटिपाकवत्॥§ 5425

अत्र प्रतिविधीयते। § 5426

प्राप्नोति हि प्रधानस्य विस्पष्टा सर्वसंस्क्रिया।
गुणभूतविवक्षा तु न द्वितीयाविरोधतः॥§ 5428

यदा हि ग्रहैकत्वोद्देशेन संमार्गो विधीयते तदोद्दिश्यमानयोः परस्परसंबन्धाभावात्प्रत्येकं वाक्यपरिसमाप्तिलक्षणस्तावदेको वाक्यभेदः। उपादेयनानात्वे पुनः सर्वविशिष्टभावनाप्रयोजनत्वादेककार्यत्वे सत्याश्रस्येनैवैकवाक्यत्वं स्यात्। अस्मिन्नेव च पक्षे प्रधानभूतक्रियावशीकाराद्विशेषणानामन्योन्य-

---

७ प्र] यथा 'प्रयाजशेषेण हवींष्यभिघारयति' इत्यत्र प्रयाजनिर्वृत्तिरूपकृतप्रयोजनत्वात्प्रयाजशेषस्य संस्कार्यत्वमिष्यते। तद्वदत्रापिभविष्यतीत्याशयः।
१८ कु] अर्धकुक्कुटिपाकवदिति—कुक्कुट्या अर्धं पच्यतामर्धं प्रसवाय धार्यतामिति केनचिदुक्ते कथं वैकस्य वस्तुनोऽर्धस्य पाको धारणं वा प्रसवायार्धस्य शक्यते कर्तुमित्येवंरूपमर्धजरतीयं लोकप्रवादायातमत्र दृष्टान्तार्थः।
१९ अत्र] एवमाक्षिप्तं सिद्धान्तभाष्यं समाधातुमारभते—अत्रेत्यादिना।

नियमसिद्धिः। उद्दिश्यमानानां पुनरवशीकृतत्वात्प्रत्येकं क्रियाग्रहणसामर्थ्यात्क्रियैव वशीकृता तैराकृष्यत इत्येकैकस्यान्योन्यनिरपेक्षस्य कर्तव्यताऽवगम्यते। तदिह ग्रह एकत्वनिरपेक्षः संस्कर्तव्यः, एकत्वमपि ग्रहनिरपेक्षं संस्कर्तव्यम्। तत्र यदि तावद्ग्रहगतमेवैकत्वं संस्क्रियते ततः सापेक्षकरणादुभयोर्निरपेक्षसंबन्धावधृतं प्राधान्यं विहन्येत। अथ द्रव्यान्तरगतम्। तन्न ज्ञायेत किमिति। न हि ग्रहवत्किंचिदेकं नाम प्रकरणे पश्यामः। यदेव ह्येकं तदेवान्यापेक्षयाऽनेकम्। न चावच्छेदे कारणं किंचिदस्ति। येनान्यनिरपेक्षत्वेनैकमवधार्येत। ननुत्पत्तौ यदेकवचनान्तशब्दचोदितं तदेकं भविष्यति। न। तेषामपि बहुत्वात्किमिति निरूपणाशक्तेः। अथ सर्वेषां कस्मान्न भवति। न। तत्रापि चोदितहान्यचोदितकरणापत्तेः। तथा हि। § 5429

यदि तावद्विकल्पेन किंचित्संस्कृत्य तिष्ठति।
अन्येषां चोदितं सन्तं विना हेतोस्ततस्त्यजेत्॥ § 5431

721 गुणभूतेन ह्येकेनैकत्वयुक्तेन क्रिया साध्यमाना नान्यमपेक्षत इति यत्किंचिदप्युपादाय शास्त्रार्थः कृतः स्यात्। प्राधान्ये पुनर्यदेवैकत्वयुक्तं न गृह्येत तस्यैव वैगुण्यं प्रसज्येत। यदि त्वन्यदपि संस्क्रियेत ततोऽनेकैकत्वसंनिपातात्संख्यान्तरोपजने सति श्रुतैकत्वपरित्यागेनानेकसंस्काराच्छ्रुतं हीयेताश्रुतं च परिगृह्येत। वीप्सार्थश्च कल्प्येतैकैकं संमार्ष्टीति। जात्युद्देशेन शुक्लादिगुणान्तरोद्देशेन वा संस्कारे विहितेन संस्कृतावपि न जातिगुणान्तरापत्तिर्भवति। तथा हि। § 5432

न ग्रहान्तरसंमार्गे तस्माज्जात्यन्तरोद्भवः।
संख्यान्तरवदित्येवं नैवाऽऽवृत्तिर्विरुध्यते॥ § 5434

तत्रैतत्स्यात्। सर्वेष्वपि संस्क्रियमाणेष्वनुष्ठानवेलायामेकैक एव दृश्यते। तस्मादविरोध इत्युच्यते। § 5435

तथा सति ग्रहैकत्वमस्तु नाम विवक्षितम्।
सर्वः संमार्गवेलायां ग्रह एको भविष्यति॥ § 5437

न हि कश्चिदपि युगपदनेकं ग्रहं संमार्ष्टि। ततश्च विवक्षितेऽपि तादृशमेवेति मन्दं विवक्षाफलम्। *ननु युगपत्संमार्गविरोध एव फलं भवति। नैतदस्ति। प्रत्येकं गृह्यमाणानां तद्वदेव संस्कारे सति यौगपद्यप्रसङ्गभावात्। अभ्युपेत्यवादमात्रं चैतत्त्वतन्त्रैकत्वाप्रतीतेः। अतश्चैकत्वांशसंबन्धस्यानवधारणेनाशास्त्रविषयत्वात्केवलग्रहपरमेव शास्त्रं विज्ञायते। यद्यपि च द्रव्यान्तरगतत्वेन तद्विवक्षितमेव तथाऽपि ग्रहस्य तावदविवक्षितमिति सिद्धः सर्वेषां संमार्गः। § 5438

२७ *] नन्विति—सर्वग्रहसंमार्गेऽपि प्रत्येकमनुष्ठानसिद्धिरेकत्वविवक्षाफलं भविष्यतीत्येकदेश्याशयः

तस्माल्लक्षणमेवैतद्द्रष्टव्यं हि स्वगोचरे।
संख्योद्देशेन संस्कारो नैव कश्चिद्विधीयते॥§ 5440

अथ तु गुणभूतमेकत्वं विधीयेत तत्र द्वितीया तावद्गुणभावं नैव ब्रवीतीति व्याख्यातं सक्त्वधिकरणे। सा यद्यविवक्षितेप्सितार्था कारकमात्रलक्षणार्थेति विवक्ष्यते ततः स एव तावदेको दोष इत्येकत्ववच्च ग्रहस्यापि गुणत्वप्रसङ्ग। अथ ग्रहस्य प्राधान्यमेकत्वस्य च गुणत्वं परिगृह्येयातां तथाऽपि सकृदुच्चारणे गुणप्रधानत्वश्रुतिलक्षणाश्रयणाद्विभक्तिविरूप्यादिनिमित्तो वाक्यभेदः। तत्रैतत्स्यात्। ऐकरूप्यार्थमेकत्ववद्ग्रहस्यापि तावद्गुणत्वमेवावगमयेत्। ततः प्रयोजनवत्तावशेन ग्रहस्य प्राधान्यम्। न चार्थाद्भवच्छब्दस्य वैरूप्यमापादयतीति। तत्र ब्रूमः। § 5441

कथमादावसन्नेव गुणभावो विवक्ष्यते। 722
कथं च संभवच्छब्दादर्थात्प्राधान्यमिष्यते॥§ 5443

सर्वैव शब्दप्रवृत्तिरसंभवाद्विप्रकर्षं प्रतिपद्यते। नास्मदिच्छामात्रेण। तदिह यदि तावच्छ्रुतिवशात्प्राधान्यं परिगृह्यते ततस्तदेवैकम्। अथास्य कथंचिदसंभवं कल्पयित्वा लक्षणाऽऽश्रीयते। ततः पुनः संभवकल्पनाविरोधात्सत्यपि प्रयोजनवत्त्वे शास्त्रवशेन गुणत्वप्रसङ्गः। युगपत्संभवासंभवपरिग्रहात्प्राधान्यगुणत्वयोः प्राधान्याल्लोचनेन विक्षेपाच्च शब्दक्लेशः। प्रथमं हि श्रुतिवशात्प्राधान्यं प्रतीयते ततस्तदुज्झित्वा मध्ये गुणत्वं ततस्तस्याप्यसंभवादन्ते पुनः प्राधान्यमिति विक्षेपः। पश्चात्तनमपि च प्राधान्यमवश्यं शब्द एवाऽऽरोपयितव्यम्। न ह्यर्थो नाम किंचित्प्रमाणम्। किं तर्हि। शब्दशक्तिकल्प नाहेतुः। अतश्चानेककल्पनानिमित्तो ह्यस्त्येव वाक्यभेदः। किं च। § 5444

विधीयमानमप्यर्थमन्यतो वाऽवधारितम्।
अवश्यं भाविनं प्राप्य न शब्दोऽन्यत्र वर्तते॥§ 5446

यद्यपि च ग्रहस्य प्राधान्यं प्रयोजनवत्तयैव सिद्धं तथाऽपि द्वितीया तदापादयन्ती सती नानुवादमात्रमपि लभमानाऽर्थान्तरे वर्तेत। तद्यथा 'दध्नेन्द्रियकामस्य जुहुयात्' इत्यत्र प्रकरणप्राप्तमपि सन्तं होममेव धातुरनुवदति न विधानार्थमप्यन्यदेव गमनादि धात्वर्थान्तरं ब्रवीतीति। ततश्च ग्रहस्य प्राधान्यानुवादादेकत्वस्य च गुणभावविधानादपरो वाक्यभेदः। श्रुत्या चावश्यंभाविनि ग्रहप्राधान्यविधाने लभ्यमाने को जातुचिदर्थात्क्लेशेन कल्पयिष्यति। § 5447

क्वचिद्द्रव्यपरिच्छेदादेकत्वमपि चार्थवत्।
अतो न तद्वशेनापि द्वितीया स्वार्थमुज्झति॥§ 5449

४ व्याख्यातं] ( अ॰ २ पा॰ १ अ॰ ४ सू॰ १२ )

तस्माच्छब्दसामर्थ्यादुभयत्र प्राधान्यं ग्रहीतव्यम्। तत्र चानिरूपणादविवक्षेत्युक्तम्। भाष्यमप्येतेष्वेव वाक्यभेदेषु योजयितव्यम्। ननु च ‘अग्नेस्तृणानि’ इत्यत्र द्वितीयासंयोगाभावाद्यथोक्तवाक्यभेदाभावादेकत्वविवक्षा स्यात्। नैष दोषः। यद्यप्येषा षष्ठी विशेषणत्वाद्गुणभूतमिवाग्निं प्रतिपादयति तथाऽपि संबन्धान्तराभावादङ्गाङ्गिसंबन्ध एव ज्ञायते। तत्राप्यग्नेः प्रयोजनवत्त्वात्तृणापचयस्य तदभावाद्राज्ञः पुरुष इत्यत्र यथा राजा पुरुषस्य स्वाम्येवमग्निस्तृणापचयस्य स्वामीत्येतदेव गम्यते। यद्यपि चैषा पञ्चमी स्यात्। तथाऽप्यग्न्यपादानकस्य तृणापचयस्य फलाभावादवश्यं ‘मध्यात्पूर्वार्धाच्च द्विरवद्यति’ इतिवदविवक्षितगुणार्था कार्यवशेनाग्निप्राधान्यं लक्षयन्ती प्रवर्तते। ततश्चाग्नेः
723 प्राधान्यमेकत्वस्य च गुणभाव इत्यादि पूर्ववदेव योजनीयम्। तृणानीत्येतदपि बहुवचनमविवक्षितमिति व्याख्येयम्। तथा ‘भिन्ने जुहोति’ इत्यादिषु। यदि तावद्भिन्नैकत्वयोर्नियोगविकल्पसमुच्चयादिभिर्निमित्तत्वं सप्तम्योच्येत ततः प्रत्येकं वाक्यपरिसमाप्तेः परस्परसंबन्धाभावः। अथैकत्वमुपादेयत्वेन प्रतिपाद्येत भिन्नमनुपादेयत्वेन ततो यद्यपि गुणत्वप्रधानत्वविरोधो नास्ति तथाऽपि पूर्ववदेव विरोधः। एकवाक्यत्वे नानारूपत्वं नामेत्यविवक्षा। सत्यां चाऽऽकाङ्क्षायां विवक्ष्येत। सा चोपादीयमानेष्वाकाङ्क्षोपजायते नोद्दिश्यमानेषु। उद्दिश्यमाने हि प्रातिपादिकार्थसंबन्धिमात्रापेक्षित्वान्न संख्याकाङ्क्षा। प्रमाणान्तरादेव विज्ञातसंख्यत्वात्। अतो यादृशं ग्रहादि प्रमाणान्तरेऽवधृतं तादृश्यस्य संमार्गादय इति निश्चीयते। सर्वलक्षणेषु प्रतीतिमात्रोपयिकत्वादनुष्ठानानङ्गत्वम्। यथा योऽयं शुक्लवासा दृश्यते तमानयेत्यादिषु वासःप्रभृतीनाम्। तत्र यावता विनाऽनुष्ठानं न सिध्यति तावदुपादातव्यमिति ग्रहादिमात्रं परिगृह्यते। **ननु बहुषु विवक्षितेषु बहुवचनमिति**—अविवक्षितोऽप्यविद्यमानोऽर्थो न शक्यो वक्तुमिति मन्यते। तत्र वेदस्य नित्यत्वाद्यथोच्चरितार्थान्वेषणमात्रे पुरुषाणां व्यापार इति न कर्तेव पर्यनुयुज्यते। तेन प्रातिपदिकार्थानुग्रहार्था विभक्तिरिति द्रष्टव्यम्। कारकप्रतीतिपरा वा सती नान्तरीयकत्वात्संख्यां प्रतिपादयति। यथा प्रकाशनार्थं प्रज्वालितोऽग्निरिन्धनं भस्मी करोति, एवमत्रापि ‘प्रथमं वा नियम्येत’ इत्येवं कर्मत्वप्रतिपादकमेकवचनम्। ‘यस्य पुरोडाशौ’ इत्यादिषु चाऽऽधिकारिकं हविरुभयत्ववद्द्विवचनम्। अन्यथा हि ‘मुख्यं वा’ इति कदाचिदाग्नेयग्रहणाभ्रान्तिः स्यात्। **अपि च ग्रहः प्रातिपदिकार्थ** इति—य-
724 दाऽन्विष्यमाणमपि क्रियासंबन्धित्वं न घटते तदा तुल्यायामविवक्षायां वरं द्रव्यविशेषणमेवेदमित्यभिप्रायः। ततश्च संमार्गस्तेन विनाऽप्यविगुणः। जातिसंख्या चैषा प्रत्येकं संमृज्यमानव्यक्तिगता वा समर्थनीया॥ १४॥ § 5450

पशौ पुनर्द्रव्यस्य निष्प्रयोजनत्वात्सक्तुवदविवक्षितेप्सितार्थया द्वितीयया कारक सामान्यं लक्षयित्वा तद्विशेषाकाङ्क्षायां सत्यां भूतभव्यसमुच्चारणद्रव्यकर्मसंयोगन्यायेन करणत्वेन गुणभावेऽवगमिते स-

२६ त्रापि] ( अ॰ ११ पा॰ १ सू॰ ४२ )
२८ हि] ( अ॰ १२ पा॰ २ सू॰ २५ )
३ न्यायेन] षष्ठाध्यायाद्याधिकरणन्यायेनेत्यर्थः

र्वेषामेव जातिद्रव्यसंख्यालिङ्गानां भावनां यागं च प्रत्युपादीयमानत्वाद-वैरूप्येण विशिष्टैकभावनाविधानादर्थापत्तिलभ्यविशेषणविध्यन्तराविर्भावाच्चैक-वाक्यत्वसिद्धिः॥ १५॥ § 5451

इति ग्रहैकत्वाधिकरणम्॥ ७॥

## ०.०.८१ चमसाधिकरणम्

एकत्ववदेव ग्रहत्वस्यापि प्रदर्शनार्थत्वाच्चमसेष्वपि संमार्ग इत्युपन्यस्य प्र- 725
दर्शनार्थत्वे प्रमाणाभावाद्वाक्येन च संबन्धोपादानाद्ग्रहादवच्छिद्य श्रुत्या केवल-संमार्गविधानात्पूर्वपक्षः परिगृहीतः। इह त्ववघातादिवदेव भङ्गोद्धारौ कर्तव्यौ। नन्वेवं सति तेनैव गतत्वादधिकरणमेव नाऽऽरब्धव्यम्। सत्यं नाऽऽर-भ्येत यदि ग्रहाधिकरणेनाविवक्षाकालुष्यबुद्धिर्न स्यात्। एवं त्वेकत्वविव-क्षासंत्रासितः सर्वमेवाविवक्षितं मन्यते। अथवाऽऽग्नेयाद्यपूर्वाणां कर्मभेदाद्भेदे सति युक्ताऽवघादीनां व्यवस्था। ज्योतिष्टोमकर्मणस्त्वेकत्वादेकापूर्वसाधन-योर्ग्रहचमसयोर्धर्मसंकर इत्यभिप्रायः। संस्काराद्वेति चापूर्वसाधनप्रयुक्तत्वेन प्रतिप्रधानावृत्तिक्रियोपपादनार्थम्॥ १६॥ § 5453

यथास्थूलं तावदुत्तरम्। ग्रहासंबन्धे सति संमार्गविधानाभावादव- 726
श्यंभावित्वाच्च संबन्ध्यन्तरस्य न केवलसंमार्गविधानम्। अथवा ग्रहशब्देन य-दपूर्वं लक्षितं तत्प्रयुक्तत्वाद्व्यवस्था। नन्वपूर्वसंयोगाविशेषादित्येकापूर्वाभिप्राय-म्। सत्यपि तु कर्मैकत्वे तदपूर्वाभेदे च ग्रहचमसाभ्यासानामयुगपत्काल-त्वात्स्वरूपसाहित्यमेकस्मिन्कर्मण्यपूर्वे वा न संभवतीत्यवश्यं प्रत्यभ्यास-मवान्तरापूर्वभेदेन भवितव्यम्। विनाऽपि चाभ्यासेन यागस्वरूपसिद्धेर-दृष्टार्थ एवाभ्यासः। ततश्च ग्रहशब्दोपस्थापितप्रत्यासन्नावान्तरापूर्वातिक्रम-कारणाभावाद्व्यवस्थासिद्धिः। अवघातादिवदेव ‘फलं तु सह चेष्टया’ इत्ये-
षोऽर्थो योजयितव्यः। न चैकत्वविवक्षावद्ग्रहत्वविवक्षायां वाक्यभेदो भविष्य- 727
तीति पूर्वाधिकरणेन भ्रमितव्यम्॥ १७॥ § 5454

इति चमसाधिकरणम्॥ ८॥

---

३ ङ्गो] भङ्गोद्धारौ—आक्षेपपरिहारावित्यर्थः।
३ क] कर्तव्यविति—‘विधीयतेऽवघातादिः श्रुत्या व्रीह्यादिसंगतः’। इत्यादि तेषामर्थाधिकरणस्थवार्त्तिकोक्तप्रकारेणेत्यर्थः।
८ फ] ( अ० ३ पा० १ अ० ४ सू० १० )

## ०.०.८२ आनर्थक्यतदङ्गाधिकरणम्

यदि सप्तदशारत्निः, वाजपेयस्येति विधीयते, यूपशब्दो यथाकथंचित्तदनुवादः। ततः षोडशिपात्रे निवेशः। अथापि यो वाजपेयस्य संबन्धी स सप्तदशारत्निरिति विधीयते तथाऽप्येवम्। अथ यो यूपः स सप्तदशारत्निरिति वचनव्यक्तिः, वाजपेयशब्दो यथाकथंचिद्विशेषणं प्रकरणप्राप्तानुवादो वा। ततस्तदङ्गपशुयूपस्येदं परिमाणमिति। किं प्राप्तम्। § 5456

आनन्तर्यात्प्रधानत्वात्तथा प्रकरणाच्छ्रुतेः।
वाजपेयेन संबन्धः साक्षान्न पशुना सह॥§ 5458

साक्षात्कर्मणः सप्तदशारत्नित्वं न संभवतीति तदङ्गद्रव्यं गृह्यते। यत्र यदेव साक्षात्संबन्धि तदेव ग्रहीतव्यम्। यद्यपि पशुरपि वाजपेयप्रकरणान्तर्गत इति तत्संबन्धेऽपि प्रकरणादनतिरेको भवत्येव, वाजपेयस्य तद्धि भवति। तथाऽप्यङ्गप्रधानानां भिन्नकथंभावयोगित्वाद्वाजपेयकथंभावेनाग्रहणात्प्रकरणबाधोऽभिधीयते। वाजपेयस्येति च षष्ठीश्रुत्या संबन्धो भवति। भवतस्तु यूपसामानाधिकरण्याद्वाक्येन स्यात्। न च वाजपेयशब्दवेलायां कश्चिद्विरोधो
728 येन लक्षणाऽऽश्रीयते 'गुणे त्वन्यायकल्पना' इति तद्वरं यूपशब्द एव लक्षणा। तस्मादूर्ध्वपात्र एव निवेश इति प्राप्तेऽभिधीयते। § 5459

अगत्या लक्षणावृत्तिः समभिव्याहृतेर्भवेत्।
न चोर्ध्वपात्रसंबन्धी यूपशब्दः प्रतीयते॥§ 5461

यो हि प्रकरणमव्यवहितसंबन्धं चानुजिघृक्षति तस्य यूपशब्दोऽनर्थकः स्यात्। ऊर्ध्वपात्रं लक्षयिष्यतीति चेन्न। असति सामानाधिकरण्येऽन्यथा संभवे वा लक्षणाभावात्। अस्मत्पक्षे पुनर्न किंचिल्लक्षणावृत्तम्। षष्ठ्याः संबन्धमात्रवाचित्वेनानङ्गेऽप्युपकारकमात्रापेक्षयोपपन्नत्वात्। न ह्यसावङ्गाङ्गिसंबन्धमेवैकं ब्रवीति। अनङ्गमपि स यूपस्तदङ्गपश्वर्थत्वादुपकारको वाजपेयस्य। यत्त्वानन्तर्येण षष्ठीश्रुतिर्विनियोजिकेति, तद्यूप शब्देनापि सहाविशिष्टम्। अतश्च सप्तदशारत्निविधिपरेऽनूद्यमानत्वाद्यादृशं वयं वाजपेयस्य यूपं पश्यामस्तादृशस्य ग्रहणमिति पशुयूपाश्रयणम्। अस्ति त्वेषाऽपि जिज्ञासा यदि वाजपेयस्य साक्षाद्यूपः स्यादिति। यदा तु से नोपलब्धस्तदा पक्षान्तरमवलम्बितम्। किं च। § 5462

वाजपेयेन संबन्धस्त्रेधाऽपि न निरूप्यते।
साक्षात्संबन्धिमात्रेण तद्रूपेनाथवा स्फुटः॥§ 5464

साक्षात्तावन्न सप्तदशारत्नित्वं युज्यत इत्युक्तम्। संबन्धिमात्रमप्यनिर्दिष्टं, वाजपेयस्येत्येतावन्मात्रेण न ज्ञायेत। यूपशब्दार्थस्त्वतत्संबन्धित्वाद्दूरभ्रष्टः। त-

१४ गु] ( अ० ९ पा० ३ अ० ५ सू० १५)

स्माद्यथोक्तमेवास्य विशेषणत्वम्। अधिकारप्रकरणप्राप्तमनुवदिष्यति। वक्ष्यति ह्येतत् 'आरादपीति चेन्न। तद्वाक्ये हि तदर्थत्वात्, इत्यत्र यथा प्रकरणव- 729
शेन तदुपकारिमात्रे धर्मा विधीयन्ते न साक्षादङ्गेष्वेव केवलेष्विति। तस्मान्न केनचित्प्रमाणेन विरोध इति॥ १८॥ § 5465

इति आनर्थक्यतदङ्गाधिकरणम्॥ ९॥

## ०.०.८३ अभिक्रमणाधिकरणम्

एवं संस्कारद्रव्यगुणा विचारिताः। इदानीं यत्कर्मैव कर्मसंबन्धित्वेन श्रूयमाणमर्थात्संस्कारत्वं प्रतिपत्स्यते तद्विचार्यते। तत्राभिक्राममिति णमुला वीप्सार्थोपादानादभिक्रम्याभिक्रम्य किमपि करोतीत्यपेक्षिते परश्च जुहोतिः प्रकृतप्रयाजग्राही दृश्यते। तत्किमभिक्रमणं तेनैव संबध्यत उत प्रकृतमात्रेणेति। संबन्धश्रवणे च सति संशयाक्षेपपरिहारावरुणाधिकरणवद्द्रष्टव्यौ। कर्मणोऽमूर्तत्वाद्वाक्येन च स्वसंबन्धोपादानात्। अनेनैव विशेषेण पुनरारम्भः। यत्तत्र समानाधिकरणं द्रव्यमुपात्तं तद्विषयनियमे च तत्साध्याक्रियासंबन्धस्योपपत्तित्वम्। इह तु तस्यैव साध्यत्वम्। अपेक्षितश्च गुणः परिच्छेदकत्वेन विज्ञातक्रियासंबन्धप्रकारः। त त्वत्राभिक्रिया। नानाभूतानि च तत्र क्रियान्तरद्रव्याणि। अत्र पुनः सर्वकर्मसु स एवाध्वर्युः कर्तेत्यपुनरुक्तता। किं तावत्प्राप्तं सर्वार्थमिति। कुतः। § 5467

कर्मणः कर्मसाध्यत्वं नामूर्तत्वात्प्रतीयते। 730
तस्माज्जुहोतिसंबन्धं परित्यज्य विधीयते॥§ 5469

न तावदभिक्रमणेन होमं करोतीति वक्तुं शक्यम्। अतो न प्रयाजैः संबध्यते। ततश्चारुणाधिकरणपूर्वपक्षवद्वाक्यभेदः स्यात्। **नन्वनेनैव हेतुना**ऽन्यत्राप्यनमिनिवेश इत्यरुणाचोद्यमेव। परिहारश्चाऽऽख्याते कर्तुर्गुणभूतत्वाद्बलाद्धोमसंबन्धापत्तेर्न जुहोतिना गृहीतेन प्रयाजादीनां कर्त्रा संबन्धः। अन्यत्र तु प्रकरणगृहीतस्य प्रधानभूतस्य कर्तुः संबन्धो न विरोत्स्यते॥ १९॥ § 5470

सर्वथा तावदभिक्राममित्येतत्पदं न क्रियान्तरमन्तरेण निराकाङ्क्षी भवति। न ह्येतद्द्रव्यसंबन्धं कथंचिदपि ब्रवीति। तस्मात्प्रकृतप्रयाजग्राहिणा जुहोतिनैकवाक्यत्वात्तादर्थ्यं विज्ञायते। शक्नोति च कर्तृप्रत्यासत्तिकरणेन तदुपकर्तुम्। अपेक्षिता चाऽऽहवनीयप्रत्यासत्तिरध्वर्योः प्रयाजैः। अरुण-

---

२ आ] ( अ° ३ पा° ७ अ° १ सू° ३)
१७ न्धा] अभिक्रमणस्येति शेषः।
१ क्रि]

क्रियान्तरमन्तरेणेति—अभिक्राममिति णमुलो धातुसंबन्धाधिकारविहितत्वादिति शेषः।

त्ववदेव वाऽर्थाद्द्रव्यसंबन्ध इति कर्तुरुपसर्जनत्वेऽपि न कश्चिद्दोषः। एवं
731 चोपकाररूपेण कर्मापि कर्मसाध्यं भवतीत्येतदपि सिद्धम्। यदा त्वतिस्थूलत्वान्नैवाभिक्रामममित्येतत्पदमात्रविच्छेदेन पूर्वपक्षः। क्रियते। कथं तर्हि। यज्जुहोतीति समस्तप्रकरणजुहोत्यनुवादेनाभिक्रमणविधानादवान्तरप्रकरणस्य चाभावान्महाप्रकरणविनियोगाश्रयेण पूर्वपक्षाश्रयणम्। तदा ‘कर्तृगुणे तु’ अभिक्रमणेऽवान्तरप्रकरणापर्युपस्थापितप्रयाजकर्मासमवायात्तत्प्रकरणैकवाक्यत्वाभावमात्रमेव वाक्यभेदः स्यादित्युक्त्वा ‘साकाङ्क्षं त्विति’ अवान्तरप्रकरणमेव प्रयाजचोदनाप्रसृतकथंभावाकाङ्क्षासंबन्धद्वारा तदेकवाक्यत्वेन सिद्धान्तोऽभिधीयते। यदपि ‘असमाप्तं हि पूर्वेणेति’ तन्न वाक्यासमाप्त्यभिप्रायेण। किं तर्हि। असमाप्तं ह्यवान्तरप्रकरणं पूर्वेण प्रयाजस्वरूपगुणविधिनेत्यर्थः। § 5471

येनाभिक्रमणादूर्ध्वं प्रयाजानां गुणोऽपरः।
विधास्यते प्रयाजानां तस्मात्प्रकरणास्तिता॥ २०॥ § 5473

इति अभिक्रमणाधिकरणम्॥ १०॥

---

२ य] एवं
तावद्भाष्यमनुसृत्याधिकरणमारचय्य तत्र च पूर्वपक्षस्यातिफल्गुतया, अरुणाधिकरणेन गतप्रायत्वाच्चान्यथाऽधिकरणमारचयति—यदा त्वित्यादिना।
इदमाकूतम्—अभिक्रमणस्य स्ववाक्योपात्तक्रियान्वयेऽप्यङ्गभावनाया अफलत्वेनेतिकर्तव्यताकाङ्क्षात्मकप्रकरणाभावाज्जुहोतिना प्रयाजहोममात्रग्रहणे प्रमाणाभावान्महाप्रकरणोपस्थितसर्वहोमानुवादेनाभिक्रमणविधानात्प्राकरणिकसर्वहोमाङ्गत्वमभिक्रमणस्य तत्कर्तृसंस्कारद्वारा युक्तम्। सूत्रार्थस्तु कर्तृगुणे—अभिक्रमणे, कर्मासमवायात्—प्रयाजकर्मण्यसमवायात्, तद्वाक्यैकवाक्यता न स्यादिति। एवं प्राप्ते सिद्धान्तस्तु नाभिक्रमणं प्राकरणिकसर्वहोमाङ्गम्। किं तु प्रयाजहोमाङ्गमेव। कुतः। प्रयाजावान्तराधिकारोपस्थितस्यैव जुहोतिनाऽनुवादात्। न चाङ्गाधिकारोऽप्रामाणिक इति वाच्यम्। भावनास्वाभाव्येन सर्वत्रेतिकर्तव्यताकाङ्क्षात्मकप्रकरणस्यापह्नोतुमशक्यत्वात्। परं तु साऽगङ्गभावनेतिकर्तव्यताकाङ्क्षा प्रधानाधिकारेण प्रतिबद्धेत्यङ्गग्रहणासामर्थ्यान्न परस्पराङ्गत्वप्रसक्तिः। यत्र त्वन्यानिवेश्यङ्गसंबन्धानुपपत्तिरूपोत्तेजकं तस्याः संभाव्यते, यथाऽत्रैव, प्रथमतः ‘अतिहायेडो बर्हिः प्रति समानयते जुह्वामौपभृतम्’ इत्यनेन प्रयाजोद्देशेन समानयनं विधाय मध्येऽभिक्रमणमाम्नाय पुनः श्रूयते ‘प्रयाजशेषेण हवींष्यभिधारयति’ इति। तत्र तु प्रथमाङ्गेनोत्तेजिताया यावदुत्तराङ्गसंबन्धमनुस्यूतायाः प्रयाजभावनेतिकर्तव्यताकाङ्क्षायाः प्रधानाधिकारापेक्षया बलीयस्याः सत्त्वात्तयैव मध्यपात्यभिक्रमणस्यापि ग्रहणत्सिद्धं तस्य प्रयाजहोममात्राङ्गत्वमिति।
सूत्रार्थस्तु—साकाङ्क्षं—संदंशेनाभिव्यक्ताकाङ्क्षाभिक्रमणवाक्यं प्रयाजैकवाक्यं स्यात्। न ह्याद्योत्तेजनमात्रेणाभिव्यक्तेः समाप्तिरस्ति। लाघवादन्तिमनाश्यत्वाभ्युपगमादिति।

## ०.०.८४ उपवीतस्य दर्शपूर्णमासाङ्गताधिकरणम्

सिद्धे कर्मणां कर्मसमवायेऽधुनाऽवान्तरप्रकरणमहाप्रकरणयोः क- 732
तरद्विनियोजकमित्युपवीतमुदाहृतम्। तत्र सामिधेन्यनुवाकविभागप्रदर्श- नं सामिधेनीप्रकरणसदसद्भावविवेकार्थम्। **ननु दर्शपूर्णमासयोरेव प्रकरणमिति**—महाप्रकरणग्रस्तत्वान्नैवावान्तरप्रकरणान्याविर्भवन्ति। अथवाऽग्निसमिन्धनप्रकाशनद्वारेण दृष्टसंस्कारार्थत्वान्न तासां प्रकरणमिति मन्यते। नैतदेवम्। § 5475

कथंभावो हि भावानां यावदाख्यातमिष्यते।
न तस्य प्रतिबन्धोऽस्ति महाप्रकरणादिभिः॥§ 5477

नान्यप्रकरणापत्तिः संस्कारो वा विहन्ति तम्।§ 5478

यथैवाङ्गवाक्यानि परिपूर्णस्वार्थानि सन्ति दर्शपूर्णमासवाक्यैनैकवाक्यतां यान्ति न चाऽऽत्मरूपं जहति, एवमङ्गभावनाः स्वाङ्गपरिपूर्णाः परमभावनायां संबध्यन्ते। न तदधीनत्वेन तासां स्वधर्मनिवृत्तिः। संस्कारोऽपि चापूर्वार्थत्वात्तत्सिद्ध्युपायमपेक्षमाणः प्रकरणी भवति। दृष्टार्थेष्वपि नियमादृष्टसिद्ध्यर्थं कथंभावापेक्षोत्पत्तेः प्रकरणसद्भावः। § 5479

दृष्टेऽपि च फले नैव साऽपेक्षा न प्रवर्तते।
दृष्टेनैव तु केनापि सोपायेन निवर्त्यते॥§ 5481

तस्मादेवंविधानामप्यङ्गानामवान्तरप्रकरणेन भवितव्यम्। अतश्च यद्य- 733
पि दृष्टार्थाकाङ्क्षा दृष्टेनैव पूर्यते। अग्निसमिन्धनप्रकाशनं भावयेत्केन—सामिधेन्यनुवचनेन, कथं, विवक्षाप्रयत्नाभिधातादिक्रमोपजनितवर्णग्रहणसामर्थ्यकरणश्रोत्रसंस्कारानुगृहीतेनेति, तथाऽपि नियमादृष्टं कथं सेत्स्यतीत्यनुवर्तत एवाऽऽकाङ्क्षा। सा च शास्त्रचोदितेनादृष्टार्थेनैवोपायेन पूर्यते। तस्मादस्ति सामिधेन्यनुवचनस्योपवीतादिग्रहणसमर्थमवान्तरप्रकरणम्। एवं तर्हि तस्य संनिकर्षेण बलीयस्त्वात्तदङ्गत्वेनैव भवितव्यमिति कुतो महाप्रकरणविनियोगाशङ्का। उच्यते। सत्यमेतदेवं स्यात्। यदि तस्य निवित्पदव्यवधानेन प्रकरणविच्छेदाशङ्का न स्यात्। एवं तर्हि विच्छिन्ने तस्मिन्नितं महाप्रकरणेनेति। नैतदेवम्। कुतः। काम्यसाभिधेनीकल्पसंकीर्तनेनाविच्छेदसंदेहादविस्पष्टं महाप्रकरणम्। किं तावत्प्राप्तम्। § 5482

अभितः सामिधेनीनां कीर्तनात्प्रक्रिया स्थिता।
परप्रकरणे पाठो निविदामथवाऽङ्गता॥§ 5484

१९ विव] विवक्षाप्रयत्नेति—विवक्षाप्रयत्नादिक्रमेणोपजनितो यो वर्णग्रहणसामर्थ्यकरणरूपः श्रोत्रसंस्कारस्तदनुगृहीतेनेत्यर्थः।

यथा दर्शपूर्णमासप्रकरणे पूषाद्यनुमन्त्रणान्यसंबद्धान्यपि न पुरस्तात्प्रकरणं विच्छिन्दन्ति तथा निवित्पदान्यपि न विच्छिन्द्युः प्रकरणम्। अथवाऽवान्तरप्रकरणेन निविदामपि साभिधेन्यनुवनचनाङ्गत्वान्नैवासंबद्धपदव्यवाय इत्युपपन्नमुपवीतमपि तदङ्गमेवेत्येवं प्राप्ते ब्रूमः। § 5485

734 विच्छिन्ना सामिधेनीनां निविद्भिः प्रक्रिया यतः।
न हि काम्यैः पुनः कल्पैः संधातुं सा हि शक्यते॥§ 5487

तावद्धि प्रकरणमनुवर्तते यावद्विनियोगार्हं पश्यति। असंयुक्तं च प्रकरणेन विनि युज्यते। तदिह निवित्पदानि तावल्लिङ्गेन सामिधेनीभिस्तुल्यान्यग्निसमिन्धने विनियुज्यन्ते 'देवेद्धो मन्विद्ध' इति। तत्र यद्यग्निः सामिधेन्यङ्गं भवेत्ततस्तद्द्वारेण तान्यप्यङ्गं भवेयुः। अथानङ्गे सत्यप्यङ्गता कल्प्यते ततः सामिधेनीनामपि निवित्पदाङ्गत्वं कश्चित्कल्पयेत्। तेन निवित्सु तावत्प्रकरणं नानुवृत्तम्। काम्यास्तु कल्पाः श्रुत्यैव पुरुषा र्थत्वेनावगता इति नैव सामिधेन्यनुवचनेन गृह्यन्ते। यदि पुनर्निविदोऽङ्गं भवेयुस्ततो गोदाहेनन्यायेनाऽऽश्रयग्रहणादपि तावत्काम्येषु प्रकरणानुवृत्तिः स्यात्। अथापि काम्यानामङ्गत्वं भवेत्तथाऽपि पूषाद्यनुमन्त्रणवत्प्रकरणाबाधं निविदां कथंचिदनुसंधानेनाध्यवस्येम। न त्वन्यतरदस्तीत्यसत्यवान्तरप्रकरणे महाप्रकरणेन सर्वार्थता। ननु च यदि विच्छिन्ने प्रकरणे काम्याः कल्पाः श्रूयन्ते तत एकविंशत्या प्रतिष्ठां भावयेत्किमाश्रितयेति प्रकरणेनाऽऽश्रयेऽनुपनीयमाने साकाङ्क्षत्वादपरिपूर्णता प्राप्नोति। अथ वाक्येनाऽऽश्रय उपनीयेत ततः
735 प्राप्ते कर्मणि संबन्धद्वयकरणाद्वाक्यं भिद्येत। तत्र यदि वाक्यभेदोऽभ्युपगम्येत कथंचिद्वा परिह्रियेत ततो रेवतीवारवन्तीयसौभरादिष्वप्येवमेव वाक्येन प्रकृताश्रयदानात्सिद्धान्तहानिः। अथाऽऽश्रयलाभार्थं कथंचिदनुवर्तेत प्रकरणं तत उपवीतमपि तथैव प्राप्नोतीति सर्वथा संकटमेतत्। उच्यते। § 5488

गुणात्कामो न युक्तोऽत्र विच्छिन्नप्रक्रियाश्रयात्।
अनेकार्थविधिः शक्यो नापूर्वात्कर्मणो विना॥§ 5490

नैवात्रैकविंशत्यादेर्गुणात्फलम्। किं तर्हि। रेवतीवारवन्तीयादिवाक्यवदेवानेनापि विशिष्टं कर्म विधीयते। ततश्च भावार्थाधिकरणन्यायेन धात्वर्थात्फलम्। अत एकविंशत्यादिवीशिष्टेनानुवचनेन प्रतिष्ठादि साधयेत्। कथमिति—अनुब्रूयादिति शब्दसामान्यात्संख्याप्रत्यासत्तेश्च सामिधेन्यनुवचनवदिति गम्यते। ततश्च संख्येयानामृचामन्येषां च धर्माणां प्राप्तिः। यद्यपि चात्र कर्मान्तरत्वाकर्मान्तरत्वयोः फलं नास्ति तथाऽपि वाक्यमेवमवकल्पत इतीत्थं वर्णितम्। न त्वेवं सत्येतान्यनुवचनान्तराणि दर्शपूर्णमासाभ्यामगृहीत-

९ द्य] अग्निरिति—अग्निसमिन्धनमित्यर्थः।
१० द्वा] तद्द्वारेण-सामिधेनीफलप्रकाशनद्वारेणेत्यर्थः।
१४ गोदा] (अ॰ ४ पा॰ १ अ॰ २)
२७ भा] ( अ॰ २ पा॰ १ अ॰ १ )

त्वात्पृथगेव प्रयोक्तव्यानि। न तावदेतेनास्मत्पक्षो निवर्त्यते। सर्वथोपवीतस्य सर्वार्थत्वसिद्धेः। न च स्वतन्त्रः प्रयोगः स्यात्। कुतः। § 5491

पश्चाद्यस्योच्यमानोऽयमनुशब्दः प्रयुज्यते।
न तस्यान्यप्रयुक्तत्वात्स्वातन्त्र्ये सति लभ्यते॥§ 5493

यो हि निगदः प्राक् सामिधेनीभ्यः प्रयुज्यते स निवित्पदवदेव न सामिधेन्यङ्गम्। तदनन्तरत्वेन चोच्यमानास्त्वनुब्रूयादिति विधिर्न स्वतन्त्राणाम्। तद्यदि पृथक् प्रयोगः स्यात्ततः सामिधेन्यङ्गमात्रग्रहणादितरेण निगदेन विनाऽनुवचनत्वं विहन्येत। किं च। § 5494

सामिधेनीत्वमप्यासां न स्यादग्निसमिन्धनात्।
न चाप्रयोगमध्यस्थः शक्यो वह्निः समिन्धितुम्॥§ 5496

एकविंशत्यादिभिस्तावदवश्यं सामिधेन्यः संख्यातव्याः। ताश्चाग्निसामिन्धनं प्रकाशयन्त्यः सामिधेन्य इत्युच्यन्ते। स चाग्निः परप्रयुक्तस्ताभिः प्रकाशयितव्यः। तेन 'अर्थाभिधानकर्म च' इत्यस्य प्रकृतिवदनुप्रवेशात्प्राकृत- 736 स्य सामिधेनीकार्यस्याग्निसमिन्धनप्रकाशनस्यैतेनैव प्रसङ्गतः प्राप्तेरर्थात्प्रयोगमध्यपातिसमिन्धनाधीनत्वम्। नन्वेवमप्येषामेव काम्यानां कल्पानां सर्वेषामन्त्यस्य वोपवीतमङ्गं स्यात्। नैतदेवम्। कुतः। § 5497

प्राकृतेन कथंभावे तदीये पूरिते सति।
पश्चात्संनिधिनाऽङ्गं स्यात्स च प्रकरणावरः।§ 5499

सर्वास्वेव विकृतिषु यत्प्राकृताङ्गमध्ये न पठितं तदक्लृप्तोपकारत्वात्प्राकृतैर्निराकाङ्क्षीकृते प्रकरणे पश्चादागच्छत्संनिधिविषयो भवति। स चाविरोधे विनियुङ्क्ते, विरोधे तु विदेवनादिवत्प्रकरणेन बाध्यते। तस्मात्कृत्स्नदर्शपूर्णमासार्थमुपवीतमिति सिद्धम्॥ २१॥ § 5500

इति उपवीतस्य दर्शपूर्णमासाङ्गताधिकरणम्॥ ११॥

## ०.०.८५ वारणादीनां सर्वयज्ञाङ्गताधिकरणम्

*'आनर्थक्यात्तदङ्गेषु' इत्यस्यापवाद आरभ्यते। वारणवैकङ्कतानि होमार्थान्यहोमार्थानि च पात्राणि यज्ञगामित्वेन विहितान्याधानप्रकरणं बा- 737

४ त] ऋतुप्रयुक्तेति पा०।
१३ अर्थाभि] ( अ ४ पा० १ अ० ११ सू० २६ )
१ *] ( अ० ३ पा० १ अ० ९ सू० १८ )

धित्वा कतमस्य यज्ञस्य भवन्तिति 'आनर्थक्यात्तदङ्गेषु' इति पवमानहविःषु विज्ञायन्ते। तथा प्राप्तेऽभिधीयते। § 5502

वाक्येनाऽऽधानतुल्यानि पवमानहवींष्यपि।
तेनासति तदङ्गत्वे सर्वयज्ञार्थतेष्यते॥ § 5504

प्रकरणगम्या पवमानहविषामाधानार्थतां बाधित्वा वाक्येनाग्न्यर्थता विज्ञायते 'यदाहवनीये जुह्वति' इति। तत्र चोद्यते। यद्यस्माद्वाक्यादाहवनीयः पवमानहविषां संस्कार्यो भवति ततः समानवाक्यनिर्देशादग्निहोत्रादीनामपि प्राप्नोति। अथ तेषां फलवत्त्वादाहवनीयोऽङ्गं ततः पवमानहविषामप्यङ्गमेव स्यात्। न ह्येकं वाक्यं फलवतां गुणभूतमफलानां च प्रधानभूतमाहवनीयं वक्तुं समर्थम्। विध्यनुवादोद्देश्योपादेयगुणप्रधानानां युगपद्विरोधात्। सप्तमी चैकत्र द्वितीयार्थं लक्षयति। अन्यत्र स्वार्थमेव वदतीति विरोधः। तथा च विश्वजिदादीनामश्रुतफलानामङ्गत्वप्रसङ्गः। सर्वं चायुक्तमेतत्। निष्पन्नश्चाऽऽहवनीय उपदिश्यते। फलवत्कर्मानुरोधेन च भाव्याह- 738 वनीयसंज्ञा विज्ञायते। तस्मात्किलैवं वर्णनीयम्। द्वे ह्येते वाक्ये तुल्यरूपे। पवमानहविष्प्रकरण एकमपरमनारभ्यवादे। तत्र प्राकरणिकेन निष्पाद्यमानत्वात्संस्कारापेक्षिण आहवनीयस्याफलानां पवमानहविष्प्रभृतीनां संस्कारत्वेन विधानम्। अनारभ्यवादेन तु निष्पन्नस्य सतः सर्वकर्माण्युद्दिश्याधिकरणत्वेन विधानम्। तस्मादविरोध इति। वयं तु ब्रूमः। किमनेनाश्रुतवाक्यकल्पनाक्लेशेन। अन्यथाऽप्येतदुपपद्यत एव। भवन्तु नाम पवमानहवींष्याधानाङ्गम्। तथाऽपि न तत्र पात्राणि भवन्ति। वाजपेयस्य यूप इति हि यूपग्रहणाद्व्यवहितसंबन्धेऽपि षष्ठ्युपपत्तेस्तथा कल्पितम्। न त्विहैवं किंचिदस्ति। यत्तु यज्ञावचरग्रहणं तत्प्रकृतयज्ञाभावादनारभ्यवादरूपेण सर्वत्र विदधाति। तच्चैतत्पूषाद्यनुमन्त्रणन्यायेनैव सेत्स्यतीति नार्थोऽधिकरणेन। सूत्रं तु पूर्वस्यैव पदोत्तरत्वेन नेयम्। ननु निविदां सामिधेन्यङ्गत्वान्न व्यवधायकत्वं स्यात्। अत आह—गुणानां च परार्थत्वादिति। तद्व्याख्यातम्। तथा हि। § 5505

वदन्ति सामिधेनीवन्निविदोऽग्निसमिन्धनम्।
संयुक्तत्वादतस्तासां नाङ्गं प्रकरणेन ताः॥ २२॥ § 5507

इति वारणादीनां सर्वयज्ञाङ्गताधिकरणम्॥ १२॥

१ क्या] (अ॰ ३ पा॰ १ अ॰ ९ सू॰ १८ )
६ त्र] एवमुपपादितं सिद्धान्तभाष्यमाक्षिपति—तत्र चोद्यत इत्यादिना।
१३ उ] उपदिश्यत इति—फलवदग्निहोत्रादिकर्मणामिति शेषः।
१४ त] एवमाक्षिप्तं भाष्यं परमतेन समाधातुमारभते—तस्मादित्यादिना।
२३ पूर्व] पूर्वस्यैव—संदिग्धे तु व्यवायात्' इति सूत्रस्यैव शेषतयेत्यर्थः।
२४ दोत्त] पदोत्तरत्वेन—शङ्कापदोत्तरत्वेनेत्यर्थः।

## ०.०.८६ वार्त्रघ्न्यादीनामाज्यभागाङ्गताधिकरणम्

यथासंयोगं निवेशार्थमारम्भः। कुतः संदेह इति। संयोगस्यैव द्वेधा प्रतिभानात्। § 5509

साधारण्येन संयोगः संदिग्धः कालकर्मभिः।
विरुद्धः कर्मसंबन्धे न क्रमः कालसंगतौ॥§ 5511

तुल्यकक्षौ हि संबन्धौ विरुद्धौ न विलक्षणौ।
तुल्यत्वं कर्मसंबन्धे वैषम्यं कालसंगतौ॥§ 5513 739

नित्यं तत्रानुवाक्याभिर्यागानामेव संगतिः।
न कालयोः क्रमस्तस्मात्प्रधानाङ्गतया हतः॥§ 5515

गुणानां च परार्थत्वादित्यनेनापि हेतुना।
संबद्धं नाऽऽज्यभागाभ्यामनुवाक्याचतुष्टयम्॥§ 5517

तस्मादाज्यभागक्रमं बाधित्वा वाक्येन प्रधानार्थत्वे प्राप्तेऽभिधीयते। § 5518

मिथश्चानर्थसंबन्धादिष्टो नाङ्गाङ्गिसंगमः।
न चेहास्त्यनुवाक्यानां प्रधानैरर्थसंगतिः॥§ 5520

द्वे तावन्नानुवाक्ये स्तः कर्मैकत्वे कथंचन।
द्वयोरपि न नैवैते देवते कर्मणोरिह॥§ 5522

अमावास्यायां तावत्सौमी नैव विद्यमानार्था। न ह्यमावास्यायां सोमः प्रधानदेवता। पौर्णमास्यामप्यग्निसहितस्य चोदितत्वात्केवलस्य प्रकाशनं महेन्द्राधिकरणे निराकृतम्। न चाग्नीषोमयोर्द्वयोरपि प्रयोगः, 'पुरोनुवाक्यामन्वाह' इत्येककर्मणि विवक्षितैकसंख्यत्वात्। अथाप्राप्तमपि द्वित्वं विधीयते ततो मन्त्रविशेषस्य द्वित्वस्य च विधाना द्वाक्यं भिद्यते। आज्यभागयोस्तु कालकृतं व्यवस्थामात्रं सुकरमित्युक्तम्। § 5523

तस्मात्कालार्थ एवायं संयोगोऽङ्गाङ्गिकल्पनात्। 740
न्याय्यः पूर्वप्रतीतत्वात्कालो हि दुरतिक्रमः॥ २३॥§ 5525

इति वार्त्रघ्न्यादीनामाज्यभागाङ्गताधिकरणम्॥ १३॥

---

१ था] यथासंयोगमिति—आज्यभागक्रमाम्नातस्य वार्त्रघ्नीवृधन्वतीमन्त्रचतुष्टयस्य क्रमावगताज्यभागसंबन्धाबाधेन निवेशार्थमित्यर्थः।

९ गुणा] (अ॰ ३ पा॰ १ अ॰ १२ सू॰ २२ )

२१ मित्युक्त] पौर्णमास्यधिकरण इति शेषः।

## ०.०.८७ आनन्तर्यानियामकत्वाधिकरणम्

क्रमविनियोगोऽनन्तरमवस्थितः। इदानीं तदपवादः क्रियते। मुष्ट्योः करणं वाग्यमश्च याजमानम्। आवेदनमाध्वर्यवम्। तत्र कथमङ्गाङ्गिभाव आशङ्क्यते। नैष दोषः। आध्वर्यवेष्वपि प्रयोक्तृत्वेन यजमानस्य कर्तृत्वात्। अथवा यत्तत्र दीक्षितस्याऽऽवेद्यमानं तस्याङ्गत्वेनेतरौ संदिह्येते। कस्मात्पुनस्तुल्य आनन्तर्ये पूर्वस्यैवाङ्गत्वमुच्यते न परस्य। केचिदाहुः। अनियमप्रदर्शनार्थमेव प्राथम्यात्पूर्वोपादनम्। अथवा सर्वभावनासु किमित्युपकार्यपेक्षणं प्रथममुत्पद्यते। सर्वापेक्षणेषु च पुरस्तादुच्चरितस्य ग्रन्थानुगुण्यात्पूर्वमालोचनं भवति। तेन मुष्टिकरणवाग्यमाभ्यां किं कर्तव्यमित्यपेक्षिते 'दीक्षितमावेदयति' इत्युपतिष्ठते। न च तदतिक्रमे हेतुरस्ति। शक्यते च तस्यापि परतः प्रयोजनवत्त्वं कल्पयितुम्। अतस्तदर्थत्वमेव युक्तम्। एवं हस्तावनेजनस्योलपराजिस्तरणार्थत्वम्। ऊर्ध्वैस्तृणैर्दीर्घं वेदिमध्ये स्तरणमुलपराजिस्तरणं प्रत्येतव्यम्। सर्वत्र च योग्यत्वमवान्तरप्रकरणमेकवाक्यत्वं च महाप्रकरण-
741 द्बलीयांसि विनियोजकानि। तस्मात्सर्वं पूर्वसमाम्नातमुत्तरसमाम्नातस्याङ्गम्। योग्यत्वाभावात्तु मुष्टिकरणवाग्यमयोः परस्पराङ्गत्वं नोपन्यस्तम्। न ह्युभयोः प्रधानार्थयोरन्योन्यापेक्षा। तेनायोग्यमात्रमतिक्रम्य न दूरं गन्तव्यमित्येवं प्राप्ते ब्रूमः। § 5527

> न तावदेकवाक्यत्वं दृश्यते योग्यता समा।
> अवान्तरकथंभावस्तदानीं नावगम्यते॥ § 5529

न हि द्वयोराख्यातयोः केनचिदुपबन्धेन विनैकवाक्यत्वं संभवति। यत्प्रकरणं बाधेत। योग्यता पुनरनन्तरार्थत्वे च समा। यद्वा सर्वार्थत्वे युक्ततरा। बहुषु हि पदार्थेष्ववधानमुपयुज्यतेतराम्। एकस्तु यथाकथंचिदपि क्रियते। न चावान्तरप्रकरणमिह विद्यते। यदि तावत्पूर्वस्य कथंभावस्तत उत्तरमेवाङ्गं प्राप्नोति। न चैवं भवितुमर्हति। साध्यांशस्यापरिपूर्णत्वात्। न चोत्तरेणासावक्लृप्तप्रयोजनावस्थेन शक्यः पूरयितुम्। एवं तस्याप्युत्तरेणेति यावत्प्रधानं प्राप्तम्। यद्येवं ततो योऽन्तराले गुणकामस्तेन सह सर्वमाधस्त्यमङ्गं संबध्येत, नैव प्रधानं यावत्प्राप्नुयात्, अवान्तरकथंभावस्य निष्पन्नत्वादिति। उच्यते। § 5530

> यदि नामास्य विज्ञातौ स्यातां वाक्यगतौ गुणौ।

---

११ ऊ] 'उलपराजिं स्तृणाति' इत्यत्रोलपराजिशब्दार्थमाह—ऊर्ध्वैरित्यादिना। उत्पूर्वस्य लुनातेः कपन्प्रत्ययान्त उलपशब्दः। उलपैः—ऊर्ध्वलवनयोग्यसुगन्ध्यादिकठिनतृणैः कृता राजिः—रेखापरपर्यायराज्याकारत्वमित्यर्थः।

२३ रेणासा] असौ—कथंभाव इत्यर्थः।

२५ गुण] गुणकाम इति—'गोदोहनेन पशुकामस्य प्रणयेत्' इत्यादिवाक्यविहितो गोदोहनादिरित्यर्थः।

अवान्तरकथंभावस्ततस्तावन्तरा भवेत्॥§ 5532

प्रधानकथंभावस्त्वभितोऽन्यसंबन्धमात्रमुक्त्वा यावदन्तं गच्छतीत्यनुषङ्गाधिकरणे व्याख्यातम्। नन्वेवं सति सर्वावान्तरप्रकरणोच्छेद एव प्राप्नोति। उच्यते। § 5533

परप्रकरणस्थानामङ्गे श्रुत्यादिभिस्त्रिभिः।
ज्ञाते पुनश्च तैरेव संदंशेन तदिष्यते॥§ 5535

सर्वेषां हि प्रयाजादीनामङ्गं किंचिदुक्त्वा पुनः परामर्शोऽस्तीति तत्पर्य- 742
न्तावान्तरप्रकरणकल्पना भवति। अन्यथा ह्यव्यवस्थैव स्यात्सर्वशेषाणां परस्परशेषत्वप्रसङ्गात्। यत्र पुनः संकीर्तनं नास्ति तत्र सर्वं प्रधानार्थमेवाध्यवसातव्यम्। तस्य तु किं केवलस्याथ साङ्गस्येत्यत्र विवेकं 'प्रकरणविशेषादसंयुक्तं प्रधानस्य' इत्यारभ्य वक्ष्यति। तदिह योग्यतया मुष्टिकरणादीनां साङ्गप्रधानार्थत्वं निश्चितम्। यदि त्वावेदयितुं स्तरितुमिति च श्रूयेत ततः 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इत्येकवाक्यतया विनियोगो भवेत्। न त्वेवमस्ति। तस्मात्सर्वार्थत्वमिति॥ २४॥ § 5536

इतश्चाऽऽनन्तर्यमप्रमाणम्। यत एकवाक्यतालक्षणमेषु प्रत्येकं दृश्यते न सर्वेषु। तस्मादपि नान्योन्यार्थता॥ २५॥ § 5537

इति आनन्तर्यानियामकत्वाधिकरणम्॥ १४॥

## ०.०.८८ चतुर्धाकरणाधिकरणम्

यथासंयोगं धर्मव्यवस्थोक्ता। स तु संयोगः किमेकदेशेनापि भवत्युत समस्तेनैवेति विचारः। किं चतुर्धाकरणविधावाग्नेयशब्देन द्विदेवत्यो गृह्यते न वेति। गृह्यत इति ब्रूमः। कुतः। § 5539

शक्यते हि द्विदेवत्यः संलक्षयितुमेकया।
अग्नीषोमहविर्योगो मनोतायामिवाग्निना॥§ 5541

यद्यप्यग्निरदेवता न त्वसमवेतः। समवेतत्वं चोपलक्षणकारणं न देवतात्व- 743
म्। न चात्राग्निः कार्ययोगी। येनात्यन्तमाद्रियेत। किं तर्हि। उपलक्षणार्थः। न चोपलक्षणानि यथाश्रुतान्येवोपांशुयाजान्तरालकाललक्षणार्थपुरोडाशद्वयवत्कार्येष्वाश्रीयन्ते। § 5542

---

५ र] परप्रकरणस्थानां—दर्शपूर्णमासादिप्रकरणस्थानां प्रयाजादीनां, श्रुत्यादिभिस्त्रिभिः कस्मिंश्चिदङ्गे ज्ञाते, पुनश्च तैरेव प्रमाणैरपरस्मिन्नङ्गे ज्ञाते, संदंशेन-संदंशसंभवेन तदिष्यते—अवान्तरप्रकरणमिष्यते। न सर्वत्रेति कारिकार्थः।

१० र] ( अ° ३ पा° ७ अ° १ सू° १)

तथा पात्नीवतेऽप्युक्ता तेन त्वष्टुरतन्त्रता।
तथा डित्थस्य मातेति माता डित्थडवित्थयोः॥ § 5544

उपलक्षणकार्ययोर्मिथः संबन्धाभावात्साधारणत्वम्। भाष्यकारेण त्वेतदेवानुषज्योक्तं मिथस्तेषामसंबन्धादचोदना स्यादिति। भवति चैवंविधानां साधारणत्वं तथा च प्राशित्रे दृश्यत इति॥ २६॥ § 5545

यथैव हि ग्रहत्वेन चमसा नोपलक्षिताः।
आग्नेयत्वं तथा न स्याद्द्विदेवत्योपलक्षणम्॥ § 5547

उद्दिश्यमानं तावद्विवक्षितमित्युक्तम्। न चाग्नीषोमीयैन्द्राग्नयोराग्नेयत्वमस्ति। न ह्यत्राग्निसत्तामात्रमुपलक्षणम्। किं तर्हि। तद्धितोपात्तं देवतात्वम्। अग्निः पुनस्तद्विशेषणम्। यां चोद्दिश्य द्रव्यं त्यज्यते सा देवता। न च द्विदेवत्योऽग्निमुद्दिश्य त्यज्यते। § 5548

न हि व्यासङ्गिविज्ञानमेकेन व्यपदिश्यते।
नाग्नीषोमीय आग्नेय ऐन्द्राग्नो वा तदुच्यते॥ § 5550

744 तद्धितार्थोऽत्र लिङ्गं हि समर्थानां च तद्धितः।
असमर्थात्समासस्थान्न चाग्नेरस्ति तद्धितः॥ § 5552

आग्नेय इति यो निरपेक्षाग्निदेवत्यः सोऽभिधीयते। न च द्विदेवत्ये निरपेक्षोऽग्निर्देवता। तेनायं तद्धितो नाग्नीषोमादिगताग्निशब्दादुत्पद्यत इति न तदर्थस्य देवतात्वमाह। यत्र त्वसौ निरपेक्षो देवता स शक्य आग्नेय इति वक्तुम्। यत्तु प्राशित्रवदिति। तत्रोच्यते। देशविशेषलक्षणार्थाऽस्मिन्नाग्नेयगुणश्रुतिः। सामान्यवाक्येन सर्वत्र प्राशित्रावदाने प्राप्ते मस्तकविरोगविशेषविधानार्थमेतद्वचनमिति वैषम्यम्। § 5553

स्थितेऽधिकरणे त्वेवं प्रत्यवस्थीयते पुनः।
अविशेषादुभौ वेति कातीयवचनश्रुतेः॥ § 5555

उक्तं कात्यायनेनेह दृष्ट्वा शातपथीं श्रुतिम्॥ § 5556

तं चतुर्धा कृत्वा पुरोडाशं बर्हिषदं करोति इति। § 5557
अत्रोच्यते। § 5558

सत्यमस्ति श्रुतिर्येयमविशेषेण दृश्यते।
विशेषे स्थाप्यते सा तु नित्यं शाखान्तरीयया॥ § 5560

प्राशित्रेऽपि तथेति चेत्। न। गुणार्थत्वात्। मस्तकं विरुज्येति गुणपरत्वादशक्यः सामान्यविधिरुपसंहर्तुम्। इदं तु निर्गुणं पुनर्वचनं शक्नोति

सामान्यं स्वविषये स्थापयितुम्। दूरस्थत्वादशक्योऽस्योपसंहार इति चेत्। न। यस्य येनार्थसंबन्ध इति न्यायात्। तेन— § 5561

अवश्यमेव सामान्यं विशेषं प्रति गच्छति। 745
गतमात्रं च तत्तेन विशेषे स्थाप्यते ध्रुवम्॥§ 5563

अथवा विशेषेण प्राप्तत्वात्सामान्यमनूद्यते बर्हिषत्त्वकरणाविधानार्थम्। अथ तदपि प्राप्तं ततः क्रमार्थं श्रवणमिति वक्तव्यम्। अतश्चाऽऽग्नेयस्यैव चतुर्धाकरणमिति सिद्धम्। **यदि तु तत्र केवलाग्निदेवत्यो नाभविष्यादिति**—लक्षणार्था गुणश्रुतिरित्येतस्यैव व्याख्या। केवलदेवत्याभावे हि मनोतायाभिवाग्निशब्द उभौ लक्षयेत्। तदर्था वा गुणश्रुतिर्भवेत्। अस्ति त्वेकदेवत्यस्तस्मात्तस्यैव चतुर्धाकरणम्। यद्यपि चोपलक्षणं कार्ययोगि न भवति तथाऽपि तेनानुपलक्षितं न शक्यं ग्रहीतुमित्येकदेवत्यस्यैव ग्रहणमिति सिद्धम्॥ २७॥ § 5564

इति चतुर्धाकरणाधिकरणम्॥ १५॥

इति श्रीभट्टकुमारिलविरचिते मीमांसाभाष्यव्याख्याने तन्त्रवार्तिके
तृतीयस्याध्यायस्य प्रथमः पादः समाप्तः॥

## ०.०.८९ मन्त्राणां मुख्यार्थविनियोगाधिकरणम्

इदानीं लिङ्गविनियोगः स्तूयते। लिङ्गं नाम मन्त्राणामर्थप्रत्यायनसामर्थ्यम्। तच्च मुख्ये गौणे च केनचित्प्रकारेण विद्यते। तत्र विनियोगः किं 746
मुख्य एवार्थे भवत्युत गौणेऽपीति संदेहे नैव गौणो नाम कश्चिदस्तीति मन्वान आह—**कः पुनर्मुख्यः को वा गौण** इति। तत्सिद्धिसूत्रे तु सिद्धे गौणे तन्निमित्तभेदः स्वार्थापरित्यागवृत्तित्वं च व्याख्यातमित्ययमर्थाद्विचारः पूर्वं प्रत्येतव्यः। तत्र च। § 5567

शब्दार्थस्यैव मुख्यत्वं मुखवत्प्रथमोद्गतेः।
अर्थगम्यस्य गौणत्वं गुणागमनहेतुकम्॥§ 5569

शाखादिभ्यो य इत्येवमिवार्थे मुख्य इत्ययम्।
शब्दः शब्दाभिधेयत्वात्सर्वेष्वेव प्रसज्यते॥§ 5571

---

२ स्य] यस्य येनार्थसंबन्धो दूरस्थेनापि तस्य सः। अर्थतो ह्यसमर्थानामानन्तर्यमकारणम्। इति श्लोकपूरणम्।
९ शा] पा॰ सू॰ ( ५-३-१०३ )।

परगुणानां परत्राभावादवश्यं गुणेभ्य आयात इत्येवंलक्षणं गौणत्वमित्यतः सर्व एव शब्द उच्चरितेऽभिधीयमानत्वादनन्यगतिः शब्दशक्तिकल्पनां कुर्वन्नर्थान्तरेणाव्यवहितत्वात्प्रथममेव मुखमिव भवतीति मुख्यः। तत्र परपरिकल्पितानि तावद्गौणत्वकारणान्युपन्यस्यन्नाह—**अथोच्येत। यस्मिन्निरुपपदादित्यादि।** § 5572

सर्वथा लक्षणं नाम यद्व्यवच्छेदकारणम्।
पराधीनप्रवृत्तिश्च गौणो नित्यं प्रतीयते॥ § 5574

न हि यथा केवलादग्निशब्दाज्ज्वलनप्रत्ययो भवत्येवं माणवकप्रत्ययः। पदान्तराधीनत्वात्। यत्रापि पदान्तरं न श्रूयते तत्राप्यर्थप्रकरणादिलभ्यं तदेव व्याप्रियत इत्यव्यभिचारः। तदेव च सामान्यं नाम प्रवृत्तिहेतुर्गुण इति। नैतदेवम्। कुतः। § 5575

747 शब्दार्थस्यैव साहित्यादभिव्यक्तिरियं कृता।
अन्यस्य द्योतकत्वात्तु नापेतं मुख्यलक्षणम्॥ § 5577

यथैव चक्षुषः प्रकाशानुग्रहापेक्षित्वेऽपि रूपमर्थो, यथा वा मुक्तसंशयस्य मुख्यस्य वर्णक्रममात्राग्रहणसंस्कारस्मृतिसंबन्धानुभवाद्यपेक्षित्वं तथाऽत्रोपपदमपि नैव विना सामर्थ्यं नामापेक्षितुं शक्यते। अपेक्ष्यमाणमपि च द्योतकत्वेनेतिकर्तव्यतास्थानीयत्वान्न मुख्यतां विहन्ति। तेन विनाऽप्युपपदेन स तस्यार्थो भवत्येव। कथंचित्तु नाभिव्यज्यते। तद्यथा गवादिशब्दानां पृथिव्यादिः। अथोपपदस्य द्योतकत्वं परित्यज्य तुल्यकल्पतोच्यते। यस्मान्नित्यं माणवकाग्निशब्दसमुदायादस्यार्थस्य प्रतीतिरतोऽश्वकर्णादिवत्समुदायवाच्यत्वे सत्यवयवस्य गौणत्वमिति। तदुच्यते। § 5578

**न चासौ समुदायार्थः** शक्यो वक्तुमिह त्वया।
अन्वयव्यतिरेकाभ्यामर्थभेदो हि दृश्यते॥ § 5580

तत्र समुदायप्रसिद्धिर्भवति यत्रावयवार्थौ तिरोधाय त्यक्तभेदः समुदाय एव प्रतीयते। गम्यते त्वत्राग्निशब्दस्य पैङ्गल्यं माणवकशब्दस्य च पिण्डस्वरूपं विविक्तं वाच्यम्। अत उभावपि प्रात्यात्मिकयोरपि वाचकत्वान्मुख्याविति। इदानीमवयवानुसारेणैव समुदायार्थत्वं समर्थयमान आह—अनुगतस्वार्थपदद्वयगम्यत्वान्नीलोत्पलवद्वाक्यार्थः। अतश्च तस्य पदार्थप्रत्याय्यत्वाच्छब्दं प्रति पूर्ववदेव गौणत्वमिति। तन्निराकरोति। § 5581

अग्निमाणवकत्वाभ्यां यद्येकोऽर्थो विशेषितः।
नीलोत्पलवदिष्येत ततो वाक्यार्थता भवेत्॥ § 5583

७ प] पराधीना शब्दप्रवृत्तिर्यस्मिन्नर्थे स गौण इत्यर्थः।

१४ काशा] प्रकाशापेक्षितत्वेऽपीति पा०।

न त्वत्र तदीयो मुख्यार्थोऽग्नित्वमस्ति। न च भवतः पैङ्गल्यं वाच्यम्। अस्मत्पक्षाभेदप्रसङ्गात्। तस्मान्न वाक्यार्थः। तेन ज्वलने माणवकस्य च पैङ्गल्ये तुल्यवच्छब्दप्रवृत्तिरिति मुख्यत्वम्। **माणवकस्येति** भाष्ये पैङ्गल्यव्यतिरेकजनिता षष्ठी। नाभिधातृव्यतिरेकजनिता। न हि माणवकस्वरूपम- 748
ग्निशब्दाद्गम्यते। न हि पर्यायत्वे माणवकशब्दः प्रयुज्येत। **अथोच्येत यः सुष्ठु प्रसिद्ध** इति मुक्तोपपदव्यापारं यत्कृतं तस्याऽऽश्रयणमनाश्रयणं च ते एव मन्दसुष्ठुप्रसिद्धी गौणमुख्यविभागाय दर्शयति। तत्रोत्तरम्। § 5584

प्रसिद्धिरिति विज्ञानं न चास्योनातिरिक्तते।
तस्मान्न तत्कृतः शक्यो विशेषो वक्तुमञ्जसा॥§ 5586

इदानीं श्रोतृगतप्रसिद्धिभेदमूलं वक्तृगतं बह्वल्पप्रयोगित्वं विभागार्थं दर्शयति। **यस्य च बहुशः प्रयोग** इत्यादि। तन्निराक्रियते। § 5587

अल्पशोऽपि प्रयुक्तस्य सकृच्छक्तिर्निरूपिता।
न निवर्तत इत्येवमुभयोस्तुल्यता पुनः॥§ 5589

इहापि च गोशब्दस्य पृथिव्यादौ मन्दसुष्ठुप्रसिद्धिप्रयोगौ दर्शयितव्यौ। तथा चाऽऽहुः। § 5590

मण्डकैर्बहुशस्तृप्तिः कदाचित्खण्डमोदकैः।
न चात्र मण्डका मुख्या गौणा वा खण्डमोदकाः॥§ 5592

इदानीं विशेषं कथयति। सत्यपि तावन्माणवकसामानाधिकरण्येऽरुणाशब्दन्यायेन, सति सादृश्येऽभिधानादसति चानभिधानादन्यत्रासादृश्यवति वृत्तिदर्शनादसति चादर्शनाद्विशेषणत्वादवश्यंभाविप्रथमप्रत्यायने सादृश्यमेव प्रथमं प्रत्याययितव्यम्। न चानवगतेऽग्नौ तत्प्रतीयत इति प्र- 749
थमतरमग्नेरभिधानम्। ततश्च तत्संबन्धादेव शेषप्रतीतेर्व्यक्तिवदनभिधेयत्वम्। सन्ति चैवमादिषु कानिचिद्रूपादिसामान्यानीत्युक्तम्। तस्मादस्ति गौणमुख्यविभाग इत्यारम्भमधिकरणम्। एते च तत्सिद्धिसूत्रोक्तैः सह नव गौणपक्षा द्रष्टव्याः। § 5593

जहत्स्वार्थाभिधायित्वं संघातः परिकल्पना।
तथा सोपपदा वृत्तिः समुदायप्रसिद्धिता॥§ 5595

वाक्यार्थोऽल्पप्रसिद्धित्वमेवमल्पप्रयोगिता।
अष्टावेतान्निराकृत्य साधिता गुणलक्षणा॥§ 5597

---

२२ शेष ]
शेषप्रतीतेः-अवशिष्टार्थप्रतीतेरित्यर्थः।
२२ क्ति ]
व्यक्तिवदिति-आकृत्यधिकरणन्यायेनेत्यर्थः।

तत्र नित्यं परार्थत्वादुभयत्र प्रयोगिता।
साक्षान्न ह्यभिधानस्य किंचिदभ्यधिकं फलम्॥§ 5599

एवं च सति गौण्या वृत्त्या पूषादिशब्दैरग्न्याद्यभिधानादनुत्कर्षो भविष्यति। अन्यथा यत्र पूषादयस्तत्र नीयेरन्। तथाऽग्न्यादिशब्दैः सूर्याद्यभिधानादविकारे सत्यार्षचोदकोऽनुग्रहीष्यते। इत्येवं प्राप्ते ब्रूमः। § 5600

अर्थाभिधानसंयोगान्मन्त्राणां क्रतुशेषता।
मुख्येन च कृतार्थानां न गौणे श्रुतिकल्पना॥§ 5602

750 *‘अपि वा प्रयोगसामर्थ्यात्’ इत्यनेन हि न्यायेनाभिधेये तावद्विनियोगाय मन्त्राः श्रुतिं परिकल्पयन्ति। तत्र यदि जहत्स्वार्था गौणी वृत्तिर्भवेत्ततस्तुल्यवदुभयत्रापि श्रुतिः कल्प्येत। यदि तु गौणमपि वदता पूर्वतरं स्वार्थोऽभिधेयस्तदा तदतिक्रमकारणाभावात्तद्विनियोगश्रुतौ कल्पितायां निराकाङ्क्षेषु मन्त्रप्रकरणस्वाध्यायाध्ययनविधिषु न पुनः श्रुतिकल्पनहेतुरस्तीति न विनियोगः। किं च। § 5603

कृतार्थे मन्त्रपाठे च गौणानां स्मारकान्तरम्।
अनिवारितसामर्थ्यप्राप्तं किमिति बाध्यते॥§ 5605

अपि च। § 5606

मुख्यः प्रत्याय्यते कस्माद्गौणेऽप्यर्थे विवक्षिते।
अन्यथानुपपत्त्या चेन्न ध्यानाद्युपपत्तितः॥§ 5608

751 पाक्षिकत्वेऽप्यनित्यत्वात्पक्षेऽनर्थकता भवेत्।
नित्यं मुख्यापरित्यागान्मत्पक्षश्चाऽऽश्रितो भवेत्॥§ 5610

न चार्थप्रत्यये सिद्धे मन्त्रः कार्योऽभिधायकः।
मन्त्राम्नानार्थवत्त्वं च मुख्येनार्थेन सेत्स्यति॥§ 5612

तेनैष सूत्रार्थः। यस्मादर्थाभिधानसंयोगान्मन्त्रेषु शेषभावस्तस्मादौत्पत्तिकेनैवार्थेनैषां संयोगः स्यात्। कुतः। तेनैवाव्यभिचारितया नित्यसंयोगात्॥ १॥ § 5613

अचोदिते—पूषादौ, दर्शपूर्णमासयोर्थन्मन्त्रा न विनियुज्यन्ते युक्तमेव तत्। संस्कारस्य संस्कार्यपरत्वाल्लिङ्गेन च प्रकरणबाधात्। कथं पुनरेषामुत्कृष्टानां वैदिकैः कर्मभिर्योगः। कथं वा क्रत्वङ्गसामान्यविनियोगमन्तरेण लिङ्गं देवतायामेव केवलायां विनियोजकमिति। तदुच्यते। § 5614

---

८ *] ( अ॰ २ पा॰ १ अ॰ ६ सू॰ ३१ )
१३ च] ‘अपि च गौणस्येत्यादि—मुख्ये च विशेषः’ इत्यन्तं भाष्यं व्याचष्टे—किं चेत्यादिना बाध्यतेन्तेन।

यागानुमन्त्रणानीति समाख्या क्रतुयोजिनी।
तस्माच्छक्त्यनुरोधेन प्राप्तिस्तद्देवते क्रतौ॥§ 5616

यागानुमन्त्रणसमाख्या ह्येषां यागसंबन्धादृतेऽनुपपद्यमाना यागसामान्याङ्गत्वं गमयति। § 5617

अतो विशेषचिन्तायामशक्येष्वनियोजनात्।
शक्यार्थविनियोगाय लिङ्गव्यापारसंभवः॥ २॥§ 5619

इति मन्त्राणां मुख्यार्थविनियोगाधिकरणम्॥ १॥

## ०.०.१० ऐन्द्र्यधिकरणम्

अपवाद आरभ्यते। **निवेशनः संगमनो वसूनामित्यैन्द्र्या गार्हपत्यमुपतिष्ठत इति**। यद्यपि मन्त्रार्थोऽग्नावप्युपपद्यते तथाऽपि तद्धितश्रुत्यैवेन्द्राभिधानसामर्थ्यमत्र मुख्यमिति विज्ञायते। केषांचित्तु 'कदाचन स्तरीरसि' इत्येषा ऋक् पठ्यते। तत्र पूर्ववदेव संदेहः, किं मुख्यत्वादिन्द्रोऽभिधातव्य उत वचनसामर्थ्याद्गौणो गार्हपत्य इति। सत्यपि च संयुक्तश्रवणेऽरुणावदशक्तेः संदेहो योजनीयः। तत्र द्रव्यपरिच्छेदद्वाराऽपि क्रयसंबन्धो लब्धः। इह तु शब्दार्थसंबन्धस्यौत्पत्तिकत्वेनाशास्त्रहेतुत्वादत्यन्ताशक्तत्वम्। न हि कथंचिदिन्द्रशब्दो गार्हपत्यं ब्रवीति। अभिधानं चेदं चोदितम्। उपतिष्ठत इत्यात्मनेपदनिर्देशात्। मन्त्रकरणव्यापाराभिधाने ह्येतत्। न चाभिधानं मुक्त्वाऽन्यत्र मन्त्रः करणं भवति। तेन 'ऐन्द्र्योपतिष्ठते' इत्येतावता तावदिन्द्रोपस्थानं विज्ञायते। गार्हपत्यमिति च द्वितीययाऽग्नेः प्रकाश्यत्वम्। तत्र किं समञ्जसं किमसमञ्जसमिति जायते संशयः। न हीन्द्रोपस्थान एव साधनान्तरं गार्हपत्यो ज्ञायते। किं प्राप्तम्। पूर्वाधिकरणेनेन्द्रोपस्थानमिति। **कथं द्वितीयेति चेत्**। सक्तुवत्साधनान्तरमधिकरणापादानादि लक्षयिष्यति। शक्नोति विरोधादीप्सिततमत्वमविवक्ष्यमाणं कारकमात्रं लक्षयितुम्। तत्र च 'द्रव्याणा कर्मसंयोगे' इत्यनेन गार्हपत्यस्याङ्गत्वं भविष्यति। **यद्वोपस्थानविशेषणं संबन्धाद्गार्हपत्यशब्द** इन्द्रलक्षणार्थ इति केचित्। एतदुक्तं भवति। विभक्तिर्वा लक्षणावृत्ता प्रातिपदिकं श्रुतिवृत्तम्। प्रातिपदिकं वा यज्ञसाधनसाधर्म्याल्लक्षणार्थं द्वितीया मुख्येति। अथ**वोपस्थानविशेषणमित्यत्र** धात्वर्थमात्रमुक्तम्। एककर्मविषयत्वं हि गार्हपत्यमन्त्रयोर्विप्रतिषिद्धम्। यस्य मन्त्रः

752 / 753

३ विज्ञा] विज्ञायत इति—इति कृत्वा भाष्यकृदुदाहरणं युक्तमित्यध्याहारः।
१६ व्या] ( अ० ६ पा० १ अ० १ सू० १ )
२० य] यस्य—प्रकाशनस्येत्यर्थः।

करणं न तस्य गार्हपत्यः कर्म। यस्यासौ कर्म न तस्य मन्त्रः करणम्। द्वौ चेह प्रकृतिप्रत्ययसमूहेन व्यापारावुपात्तौ। प्रकृत्या समीपस्थानं प्रत्ययेन प्रकाशनम्। तत्र प्रकाशने यादृशं गार्हपत्यस्य कारकत्वं तादृशं व्याख्यातम्। इदानीं मुख्यमेव कर्मत्वं प्रकृत्यर्थं प्रत्युच्यते। तेनैतदुक्तं भवति। गार्हपत्यं समासीदन्निन्द्रं प्रकाशयेदिति। यद्यपि च प्रत्ययार्थप्राधान्यात्तत्कर्मत्वं युक्तं तथाऽप्ययोग्यत्वात्ततो निवृत्तं **संबन्धा**- त्प्रकृत्यर्थमुपसंक्रामति। तस्मान्मुख्यमेव कार्यं मन्त्राणामित्येवं प्राप्ते ब्रूमः। वचनादयथार्थत्वं मन्त्राणामिति। कुतः। § 5621

गौणत्वं यत्र नाम स्यात्क्वचिद्ब्राह्मणमन्त्रयोः।
तत्रानुवादरूपत्वान्मन्त्राणां गौणतेष्यते॥§ 5623

गार्हपत्यस्तावद्द्वितीयया प्रधानस्य प्रत्ययार्थस्य कर्मेति श्रुत्या गम्यते। तेनैन्द्र्या स प्रकाशयितव्यः। तत्र यद्ययथार्थत्वं वचनानुरोधेन संजातं तथा नामेत्यध्यवसातव्यम्। अवश्यं भावि ह्यत्र ब्राह्मणस्य मन्त्रस्य वा गौणत्वं। तत्र ब्राह्मणस्यात्यन्ताप्राप्तविधित्वात्प्रथमप्रवृत्तेश्चानन्यप्रमाणकेऽर्थे गौणत्वमयुक्तम्। § 5624

मन्त्रस्य तु ब्राह्मणचोदितार्थप्रकाशनात्तत्परतन्त्रवृत्तेः।
विरोधिनं स्वार्थमतीत्य मुख्यं युक्तो हि
गौणार्थनिमित्तभावः॥§ 5626

754 तेन कारकसामान्यं लक्ष्यते न द्वितीयया।
येनात्र गार्हपत्योऽपि संबन्धात्स्याद्विशेषणम्॥§ 5628

न चावयवसंबन्धादिन्द्रो गृहपतेर्यतः।
तेनात्र गार्हपत्यः स्याद्रूढ्याऽग्निप्रत्ययादृढात्॥ ३॥§ 5630

ननु च मन्त्रोऽप्यशक्य एव गार्हपत्ये विनियोक्तुम्। तथा हि। § 5631

गौणेऽपि तावदेतस्य वृत्तिः क्लेशेन जायते।
अत्यन्तासदृशत्वात्तु न गौणोऽप्यत्र दृश्यते॥§ 5633

न हि वचनशतेनेन्द्रशब्दः शक्यो गार्हपत्याभिधानसमर्थः कर्तुम्। § 5634

---

१ य] यस्यासौ-समीपस्थितेर्गार्हपत्य इत्यर्थः।
३ का] प्रकाशने-समीपस्थितिविशिष्टप्रकाशन इत्यर्थः।
२० चा] यदप्यत्र ब्राह्मणवाक्ये गार्हपत्यशब्दवाच्योऽवयवयोगादिन्द्रः स्यादित्युक्तं तदपि रूढ्या योगबाधान्न युक्तमिति कारिकार्थः।

न वाऽदेङ्गुणवच्छास्त्रादिन्द्रोऽग्निः पारिभाषिकः।
न हि शब्दार्थसंबन्धः प्रसिद्धः शास्त्रहेतुकः॥§ 5636

अत्रोच्यते। § 5637

स्यादग्नेर्गौणमिन्द्रत्वं यज्ञसंबन्धकारितम्। 755
इन्दत्यर्थानुसाराद्वा स्वकार्ये सोऽपि हीश्वरः॥§ 5639

तस्मादन्यथानुपपत्तेर्गौणमभिधानमिति सिद्धम्॥ ४॥ § 5640

इति ऐन्द्र्यधिकरणम्॥ २॥

## ०.०.९१ हविष्कृन्मन्त्रविनियोगाधिकरणम्

एवं तावन्मुख्यं कार्यं मन्त्राणामिति सापवादमवस्थितम्। अतः परमेतद्विचार्यते क उत्सर्गस्य विषयः कोऽपवादस्येति। तत्र 'हविष्कृदेहि' इति या हविः करोति यजमानस्य पत्नी तदाह्वानप्रकाशनसमर्थो मन्त्रः, स किं तत्रैव विनियुज्येत, अवहन्तिसंयोगस्य कालार्थत्वेनाविरोधात्। अथवा वचनादयथार्थं पूर्वतरप्रतीतावघाताङ्गमेवेति। यदि हविष्कृदेहीत्यनेनावघ्नन्नाह्वयतीति विधीयते ततोऽवघाताङ्गत्वम्। अथावघ्नन्नेतेनाऽऽह्वयतीत्येवं संबन्ध्य रूपादेव प्राप्तमाह्वानकाले मन्त्रमनूद्य त्रिरिति विधीयते, ततोऽवघ्नन्नित्यस्य स्वकाललक्षणार्थत्वान्नायथार्थं वचनमिति यथार्थ एव मन्त्रः। किं प्राप्तम्। अव- 756
हन्तिश्रुत्यनुग्रहादाह्वयतेश्च मन्त्ररूपादेव प्राप्तत्वादवहन्तेरेव हविष्करणे कर्तृत्वं कथंचिदस्तीत्ययथार्थत्वम्। गुणयोगात्प्रत्यायनं च॥ ५॥ § 5642

त्रिरभ्यासपरत्वात्तु न मन्त्रोऽत्र विधीयते।
लक्षणे च शतुर्वृत्तिः प्राप्तं चान्यदनूद्यते॥§ 5644

अवघ्नन्नित्यत्र हि धात्वर्थोपसर्जनः कर्ता लक्षणार्थयुक्तः प्रतीयते। 'लक्षणहेत्वोः क्रियायाः' इति शतृप्रत्ययात्। तेन न क्वचिच्छ्रुतिपीढा। तस्मात्सर्वमेतदनूद्य त्रिरिति विधीयते नान्यत्। वाक्यभेदप्रसङ्गात्। § 5645

योग्यत्वेन च सिद्धत्वात्कालोऽपि न विधीयते।
अभिधामात्रमेवास्य विधिरित्यभिधीयते॥§ 5647

१ वाऽदेङ्गु] पा॰ सू॰ ( १-१-२ )। अत-एङ् च यथा परिभाषया गुणो नैवमग्निः परिभाषयेन्द्र इत्यर्थः।
४ क्ष] पा॰ सू॰ ( ३-२-१२६ )।

सकृदुच्चारणाद्यो वा त्रिरभ्यासेन जायते।
अभ्यासे विहितेऽर्थेन स कालोऽस्मिन्विधीयते॥§ 5649

757 तथा च ‘यावज्जीविकोऽभ्यासः’ इत्यत्र कालाभ्यासयोरन्योन्यविधिहेतुत्वं व्याख्यातम्॥ ६॥ § 5650

अथ यदुक्तं हन्तिरेव हविष्कृद्भविष्यतीति। तत्रोच्यते। § 5651

गुणाभावाद्धविष्कृत्त्वमन्त्राभावो यदोच्यते।
आमन्त्रणादिसामर्थ्यं लिङ्गमाश्रीयते तदा॥§ 5653

अथवा पदोत्तरमेतत्सूत्रम्। § 5654

त्रिरभ्यासपरत्वात्तु न मन्त्रोऽत्र विधीयते।
रूपादेवावघाताङ्गं भवत्विति तदुच्यते॥§ 5656

यद्यप्यस्य हविष्कृत्त्वं कथंचित्कल्प्यते त्वया।
तथाऽप्याह्वयतीत्येतद्व्यर्थं तस्मिन्नचेतने॥§ 5658

आमन्त्रणविभक्तिश्च प्रैषश्चेहीति मध्यमः।
व्यर्थं मन्त्रे भवेत्सर्वमवघातपरे सति॥§ 5660

चेतनवत्यां तु पत्न्यामर्थवत्। तस्मान्न रूपादेवावघाताङ्गत्वमिति॥ ७॥ § 5661

758 एवं च वागित्यर्थरूपेणैकान्तिकेनैव स्त्रीत्वेन संस्तवो भविष्यति। अन्यथाऽनुपात्तस्त्रीलिङ्गक्रियादिपदेनानेकान्ताव्यक्तलिङ्गेन शब्दधर्मतया कथंचित्कल्प्यः स्यात्। तस्मादाह्वनाङ्गत्वमिति॥ ८॥ § 5662

अवघातमन्त्रान्तरविरोधश्चान्याय्यः स्यात्। आह्वाने त्वयमेवेत्यविरोधः॥ ९॥ § 5663

इति हविष्कृन्मन्त्रविनियोगाधिकरणम्॥ ३॥

---

१ स] सकृदुच्चारणादिति कारिकाया अयमर्थः—त्रिरभ्यासे विहिते यः सकृदुच्चारणकालादधिकः कालस्त्रिरभ्यासेन जायते सोऽस्मिन्वाक्येऽर्थापत्तिप्रमाणेन विधीयते। अन्यथा तत्रापि श्रौतव्यापारत्वे वाक्यभेदापत्तेरिति।
३ ज्जी] ( अ॰ २ पा॰ ४ अ॰ १ सू॰ १ )

२ गुणा] गुणाभावादिति—अचेतनेऽवघात आहवानादिविषयत्वलक्षणगुणाभावाद्धविष्कृत्प्रकाशकस्य मन्त्रस्य तत्र विनियोगाभावो यदोच्यते तदा ‘लिङ्गाच्च’ इति सूत्रे लिङ्गपदेनाऽऽमन्त्रणादियोग्यत्वरूपं पत्न्याः सामर्थ्यं मन्त्रस्य पत्न्याहवानाङ्गत्वेनाऽऽश्रीयते न तु स्त्रीलिङ्गत्वेन स्तुतिरित्यर्थः।

## ०.०.१२ आग्निविहरणादिमन्त्रविनियोगाधिकरणम्

अतिदेशसूत्रत्वात्सर्वे पूर्वसूत्रार्था योजयितव्याः। पूर्वत्रानुवादे कालार्थत्वमुक्तम्। इदानीं विधानार्थेऽपीति विशेषः। त्रिरभ्यासपरत्वाच्च तत्र मन्त्रोपदेशो न जातो न त्विह तथेति पूर्वपक्षे बीजम्। **उत्थानेनाग्निरिध्यत** इति—अनेनोत्थानं प्रकाश्यत इति प्रतिपाद्यते। यदाऽयमुत्थानाङ्गं भवति 759
तदा प्रैषाभावात्पराधिकारो नास्तीति प्राप्तकालतायां लोटं कल्पयित्वाऽध्वर्युकतृकाण्येवाग्निविहरणादीनि भवेयुः। अतश्च तदीयमुत्थानं तेषां कर्तृत्वेन। विवक्ष्यमाणमग्नीदित्यादिभिः शक्यं प्रकाशयितुम्। एवं 'व्रतं कृणुत' इति वागभिधानं वाक्तृप्यत्वितिवदात्स्याधारत्वाद्वाचो यदास्यस्य व्रतकरणे कर्तृत्वं तच्छक्यं वाच्येवोपचरितुं तत्र व्रतं कर्तुं प्राप्तः काल इति। तात्वाद्याधिष्ठानभे- दाच्च बहुवचनम्। गुणाभावात्-मन्त्रगुणाभावादित्येतदेवादृष्टार्थत्वप्रसङ्गमुखेनोत्तरम्। न हि मध्यमपुरुषः परप्रेषणमन्तरेणोपपद्यत इति वक्ष्यामः। लिङ्गमपि किंचिदन्वेष्टव्यम्। विधिकोपश्च वाग्विसर्जने 'याः पशूनामृषभो वाच' इति मन्त्रान्तराम्नानात्॥ १०॥ § 5665

इति आग्निविहरणादिमन्त्रविनियोगाधिकरणम्॥ ४॥

## ०.०.१३ सूक्तवाकाधिकरणम्

देवताप्रकाशस्त्रुग्धारणाभ्यां कृतार्थत्वादङ्गाङ्गिभावापेक्षा नास्तीति कालार्थता। सर्वत्र च कृतार्थयोः संबन्धे कालार्थत्वं स्थास्यति। तृतीयां चेत्थंभूतलक्षणार्थां मन्यते। प्रस्तरकृतार्थत्वाभिधानं च प्रतिपाद्यमानप्रधानत्वादस्य सूक्तवाकाङ्गत्वं तद्वाच्यदेवताङ्गत्वं वा न घटत इत्यस्य प्रतिपादनार्थम्। तथा 760
सदेवतस्य सूक्तवाकस्यापि तदङ्गत्वमिति॥ ११॥ § 5667

५ ना] नास्तीति—( अ° ३ पा° ८ अ° ११ सू° २२ ) इत्यनेन न्यायेनेत्यर्थः।
१ कृता] कृतार्थत्वादिति—सूक्तवाकप्रस्तरयोरिति शेषः।
२ त्र] सर्वत्र च—दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्यादावित्यर्थः।
२ स्थास्य] ( अ° ४ पा° २ ) अत्रेति शेषः
३ स्त] प्रस्तरस्य चेति भाष्यतात्पर्यमाह—प्रस्तरेत्यादिना। यद्यपि प्रस्तरे कृतार्थत्वाभिधानं नाङ्गत्वनिराकरणार्थम्। सिद्धान्तिनोऽप्यनभिप्रेतत्वात्। तथाऽपि यदि कश्चित्प्रहरणस्य सूक्तवाकाङ्गत्वं तत्प्रकाश्यदेवताङ्गत्वं वा ब्रूयात्तदा कालार्थपूर्वपक्षासिद्धेः प्रहरणस्य च प्रस्तरकृतार्थत्वमन्तरा तदर्थत्वायोगादित्येव प्रहरणस्य प्रस्तरार्थत्वप्रतिपादनद्वारा सूक्तवाकाङ्गत्वनिराकरणार्थमेव तदिति वेदितव्यम्।
४ था] एवं प्रस्तरप्राधान्यप्रतिपादनेन प्रहरणस्य प्रतिपत्तित्वावगतेः प्रतिपत्तेश्च देवतया कार्याभावाद्देवताप्रकाशकस्य सूक्तवाकस्य प्रहरणाङ्गत्वं न घटत इत्येवमर्थं च प्रस्तरस्योपयुक्तत्वाभिधानमिति प्रयोजनान्तरमाह—तथेत्यादिना।

‘सूक्तवाकेन प्रस्तरं प्रहरति’ इति प्रत्यक्षात्क्रियासंबन्धात्करणत्वं गम्यमानं न शक्यमुत्स्रष्टुम्, कारकविभक्तिबलीयस्त्वात्। एवं च श्रुतिवृत्तः सूक्तवाक एव कार्येण संभन्त्स्यते। अन्यथा तल्लक्षितः कालः संबध्येत। तथा चाङ्गत्वे सति साधर्म्याद्याज्याशब्द उपपत्स्यते ‘सूक्तवाक एव याज्या’ इति। किं पुनरस्य पारमार्थिकमेव याज्यात्वमुतोपचारमात्रम्। कश्चात्र विशेषः। सति याज्यात्वे तद्धर्मैर्भवितव्यम् ‘आसीनो यजति’ ‘अनवानं यजति’ ‘याज्याया अधि वषट्करोति’ ‘पुरोनुवाक्यां च प्रथमं प्रयुङ्क्ते’ इत्यादिभिः। अथ स्तुतिमात्रं ततो नैषां कश्चिदादर्तव्य इति। किं प्राप्तम्। भवितव्यं धर्मैः। ययेज्यते सा याज्या। सूक्तवाकेन चेज्यते। तस्मादस्ति याज्यात्वम्। तत्रैतत्स्यात्। अस्त्रीलिङ्गत्वादनृचि स्त्रीप्रत्ययो न प्राप्नोति। नैष दोषः। समिदादियाज्यास्वनृक्ष्वपि याज्यात्वप्रसिद्धेः। अथोच्येत, आध्वर्यवेषु दर्विहोमसाधनेषु सत्यपि यागकरणत्वे याज्यात्वं न दृष्टमतो नैतदेकान्तिकं कारणमिति। यत्रैव याज्याशब्दः प्रयुक्तः सैव केवला याज्या। तेन तर्हि ‘सूक्तवाक एव याज्या’ इत्यत्रापि प्रयोगाद्भवितव्यं धर्मैः। न चास्यौपचारिकत्वम्। मुख्यकारणसंनिधेः प्रत्यक्षत्वात्। अपि च सामान्यशब्दोऽयं याज्येति। स न शक्यो लक्षणमन्तरेण प्रयोगतो विविक्तविषयोऽवधारयितुम्। तत्रैतल्लक्षणं स्यात्। हौत्रेण येनेज्यते तद्वस्तु याज्येति। तथा सति सूक्तवाकेऽपि प्रसङ्गः। तस्मान्मुख्यमेवास्य याज्यात्वमित्येवं प्राप्ते ब्रूमः। § 5668

येन मन्त्रेण यागाङ्गं होता यजति देवताम्।
प्रसिद्धेस्तस्य याज्यात्वं सूक्तवाको हि नेदृशः॥ § 5670

761 प्रकृतौ हि सर्वमेव तादर्थ्योत्पत्त्या वस्तु निरूप्यते। याज्यात्वं च त्यज्यमानहविर्द्रव्यदेवतोद्देशार्थविहितमन्त्रत्वेनावधारितम्। न च सूक्तवाकस्त्यज्यमानप्रस्तरदेवतोद्देशार्थमुत्पन्नः। इष्टदेवताभिधानस्वरूपत्वात्। लिङ्गं श्रुत्या बाध्यत इति चेत्। न। श्रुतेर्लीङ्गविनियोगाभ्यनुज्ञामन्तरेणाग्निसेकादिवदसामर्थ्यात्। तथा चोत्तरसूत्रे वक्ष्यामः। तेन स्वतस्तावन्न याज्यात्वम्। न चान्या काचिदेवंविषया याज्याऽस्ति। यस्याः कार्ये वर्तमानो याज्याधर्माँल्लँमेत। प्राक्च यस्य यागत्वमवधारितं तस्य साधनं पश्चाच्चोद्यमानं याज्येत्यवगम्यते। न त्वत्र प्राक्सूक्तवाकसंबन्धात्केनचिद्यागत्वमवधारितम्। तदितरेतराश्रयं प्राप्नोति। याज्यायोगाद्यागो यागसंबन्धाद्याज्येति। अथैवं परिह्रियेत। विनैव तावद्याज्याव्यपदेशेन सूक्तवाकमात्रतया गृह्यमाणो यागे विनियुज्येत ततो याज्यातस्तदभिधेयदेवतासंबन्धलभ्ययागत्वप्रधानप्रहरणसंबन्धाद्याज्यात्वं लभ्यत इति। तदुच्यते। § 5671

---

२१ याज्या] ‘किं पुनरस्य पारमार्थिकमेव याज्यात्वम्’ इत्यादिना प्रसङ्गाच्चिन्तान्तरं प्रस्तुत्य पराभिमतं च याज्यात्वं प्रदृष्य निर्दुष्टं स्वाभिप्रेतं याज्यात्वं निर्वाक्ति-याज्यात्वं चेत्यादिना तत्त्वं तु होतुप्रवचनविहितेज्यमानद्रव्यसंबन्ध्युद्देशाङ्गभूतदेवताप्रकाशकमन्त्रत्वं याज्यात्वं माज्ञिकप्रासिद्ध्यवगतं विज्ञेयम्।

येनोत्पत्तौ न याज्यात्वं विनियोगे च लभ्यते।
तस्य पश्चात्कथं नाम तल्लाभोऽध्यवसीयते॥ § 5673

यो हि यूपादिशब्दो न क्वचित्प्रसिद्धः स एवं प्रसिद्धिं लभते। अयं पुनर्याज्याशब्द उत्पत्तिवेलायामेव विनियोगवेलायां वाऽर्थं लभमानो नोत्तरकालभावमपेक्षते। येऽपि च याज्याधर्मास्तेऽपि प्रथमसिद्धेषु यागेषु लब्धात्मानो नेदं क्लेशेन लभ्यमानं याज्यात्वं प्रतीक्षन्ते। यदि तु विकृतिर्भवेत्ततः परिधिखलेवाल्योरिव यूपत्वं, कार्येण याज्यात्वमध्यवसीयेत। प्रकृतिस्त्वियं नात्र कार्यपूर्वकं धर्मनिरूपणमतोऽपि न याज्याधर्माः। तथा च 'सूक्तवाक एव याज्या' इत्येवकार उपचारं द्योतयति। अयाज्यायां हि याज्योपचारे सत्येवमुपपद्यते न मुख्य एव याज्यात्वे। मुख्यायां त्वाहुतौ नैवकारः प्रयुक्तः। तदाहुतिः पारमार्थिकी। § 5674

न च प्रहरणं यागमात्ररूपेऽवतिष्ठते।
होम एव त्वयं स्पष्टः प्रक्षेपाधिक्यचोदनात्॥ § 5676

आधारादि यथा द्रव्यक्षारणाद्धोमतां गतम्।
तथा प्रक्षेपरूपत्वाद्धरणस्यापि होमता॥ § 5678

होमाङ्गस्य च याज्यात्वं न कस्यचिदपीष्यते।
निगदत्वाद्विशेषेण सूक्तवाके निषिध्यते॥ § 5680

नितरां गद्यमानत्वान्निगदो ह्येष गद्यते। 762
निगदानां च याज्यात्वमाहत्य प्रतिषिध्यते॥ § 5682

अयाज्या एव निगदा ऋचैव यजतीति हि।
निषिद्धमपि याज्यात्वं प्रशंसार्थमिहोदितम्॥ § 5684

तत्संबन्धात्तु सूक्तवाको याज्यात्वेन स्तूयते। न चोभयोः स्तुतिः। अत्यन्तं निरालम्बनत्वप्रसङ्गात्॥ १२॥ § 5685

यत्त्विष्टदेवतासंकीर्तनेन सूक्तवाकस्य कृतार्थत्वान्न भूयो विनियोगः संभवतीति। तत्राभिधीयते। § 5686

भेदेन श्रुतिलिङ्गाभ्यां सूक्तवाकाङ्गता यदि।
स्याद्विरोधस्ततः किं तु तुल्यार्थत्वेन नास्त्यसौ॥ § 5688

यत्त्वस्य स्वसामर्थ्येन देवताप्रकाशनसाधनत्वं, प्रस्तरप्रहरणेऽपि विनियुज्यमानस्य तन्नैवापगच्छति। तत्रापि प्रकारान्तरेणानुपयुज्यमानत्वात्। इह हि यदिष्टदेवताभिधानसामर्थ्यं तत्सूक्तवाकेनेत्यनया श्रुत्या सहाविरोधं

प्रार्थयते। श्रुतिरपि च प्रस्तरप्रहरणानभिधायिनं सन्तमसति सामर्थ्ये विनियोक्तुमशक्नुवन्ती सामर्थ्यान्तरं चानुत्पादयन्ती यदयमभिधातुं समर्थः कथं नाम तदेवाभिदधन्मदर्थं कुर्यादित्येवमपेक्षते। सर्वत्र क्रियां तत्साधनं वाऽभिदधन्मन्त्रोऽङ्गभावं गच्छति। तत्रापि प्रथमं तावदियं गतिः, यत्प्रसिद्धं शेषिणि रूपं तन्मन्त्रेणाभिधातव्यमिति। यदा त्वसामर्थ्यात्तादर्थ्यं न प्रतिपद्यते तदाऽर्थाद्विपर्ययो भवति यदयमभिधत्ते तन्नूनमस्यां क्रियायामस्तीति। न ह्यन्यथा तस्य श्रुतमङ्गत्वमुपपद्यते। तस्मात्सूक्तवाकेनेत्यनया श्रुत्यैतत्प्रतिपाद्यते।
763 यत्त्वमभिधत्से तदेवाभिदधानः प्रस्तरप्रहरणं साधयेति। मन्त्रोऽपि चेत्थमेव ब्रवीति। इष्टदेवताभिधानं कुर्वन्नहं यत्करोनि तत्सर्वं करोमीति। तत्र यदीष्टा देवताः पूर्वयागसंबन्धिन्य एव केवला भवन्ति ततो न किंचित्प्रहरणस्य कृतं स्यात्। अथ तु ता एवास्याप्यङ्गभूतास्ततस्तत्प्रकाशनद्वारेण सूक्तवाकेन प्रस्तरः प्रहृतो भवति। न च तासां देवतात्वादन्येन प्रकारेणोपयोगो विज्ञायत इत्यत्रापि देवतात्वम्। अतश्च प्रस्तरद्रव्यस्य हविष्ट्वसंकीर्तनादग्न्यादीनां च देवतात्वाद्यागोऽयं विज्ञायमानो 'हरणे तु जुहोति'इति प्रक्षेपाधिकत्वाद्धोम इत्यवधार्यते। तस्मादविरोधः श्रुतिलिङ्गयोः। एवं च सूत्रमिहापि स देवतार्थ एव। कुतः। ताभिरस्यापि हरतेः संयोगात्कालार्थताऽपि च प्रसङ्गाद्भविष्यत्येव। मन्त्रपाठक्रमेण सूक्तवाकस्य ज्ञातकालत्वात्। **यद्यग्निरिदं हविरजुषतेत्येवमाद्येव श्रूत्येतेति**। प्रागपि सक्तवाकेनेति श्रुतेरस्त्येवैकदेशस्य प्रहरणं प्रति सामर्थ्यमिति दर्शयति। यद्यपि च साधारणं मन्त्रस्य सामर्थ्यं तथाऽपि श्रुत्यनुग्रहार्थं प्रस्तर एव 'यदनेन हविषा' इति निर्देष्टव्यः। अथवाऽऽदित एवाऽऽरभ्येदंशब्देन प्रस्तरनिर्देशः। पुरोडाशादीनामप्रत्यक्षत्वात्। अजुषतेत्यनर्थकमिति चेत्। न। पूर्वसेवितप्रसिद्धिद्वारेण स्तुत्यर्थत्वात्। अत उपपन्नमङ्गत्वम्॥ १३॥ § 5689

764 अनुभाषणं परिचोदना वा॥ १४॥ § 5690

कथमप्रधानकर्मणः सूक्तवाकोऽग्न्यादयो वाऽङ्गमित्यत उत्तरसूत्रं पठति—**स्विष्टकृद्वदुभयसंस्कारः स्यात्**। आचार्यशैल्या द्वे सूत्रे मन्यामहे। यथैव स्विष्टकृत्प्रतिपत्तिर्यागश्च तथाऽयमपि भविष्यति। यथा च तत्र मन्त्राणामङ्गत्वं तथेह। न हि प्रतिपत्तित्वेन यागत्वं विरुध्यते। द्रव्यदेवतासंबन्धेन हि यागो भवति। तस्य च स्वरूपावधारणोत्तरकालं प्रतिपत्त्यर्थकर्मत्वादिविचारे सति 'उत्पत्तौ येन संयुक्तम्' इत्यनेन लक्षणेन प्रतिपत्तित्वम्। न च तावता कश्चिद्दोषः। तेन यागप्रतिपत्त्यात्मकत्वमुभय संस्कारशब्देनोच्यते। अथवा यगा स्विष्टकृद्द्रव्यसंस्कारार्थः, स्विष्टकृतोऽग्नेः कृतार्थत्वेन शेषत्वात्। अथ च यागत्वं न जहाति। एवमुभयोः कृतार्थयोः संस्कारः। परस्परनियमाच्चादृष्टं साधयन्यागो भविष्यति। अथवा स्विष्टकृत्यपि 'अयाडग्निकग्नेः प्रिया धामानि' इत्येवमादिभिरिष्टदेवताप्रकाशनमस्तीत्युभयसंस्कारत्वेनैव दृष्टान्तः। न च प्र-

१४ ह] (अ° ४ पा° २ अ° ४ सू° १०)

६ त्तौ] (अ° ४ पा° २ अ° ७ सू° १९)

तिपत्तेर्मन्त्रोऽङ्गं न भवति। निष्प्रयोजनस्य त्वङ्गं नेष्यते। प्रतिपत्तिस्तु दृष्टार्थत्वेन सुतरां प्रयोजनवती। नियमादृष्टसिद्ध्यर्थं चापेक्षते वैदिकानि साधनानीत्यविरुद्धं सूक्तवाकग्रहणम्॥ १५॥ § 5691

इति सूक्तवाकाधिकरणम्॥ ५॥

## ०.०.९४ सूक्तवाकस्य विभज्य विनियोगाधिकरणम्

अधिकारमुपजीवयन्विचारयति। किमुभयोर्दर्शपूर्णमासयोः सकलः 765
सूक्तवाकः प्रयोक्तव्य उतेष्टदेवतानुरोधेन निष्कर्ष इति। किं प्राप्तम्। एकैकत्र सकल इति। कुतः। § 5693

मन्त्रो यथा समाम्नातः सूक्तवाकोऽभिधीयते।
तस्य निष्कृष्यमाणस्य नैव स्यात्सूक्तवाकता॥ § 5695

ततश्चासूक्तवाकेनैव प्रहृतः स्यात्॥ १६॥ § 5696

एवमादीनामपकर्ष इत्युक्तं स्तुतशस्त्राधिकरणे पूषाद्यनुमन्त्रणेषु चोक्तम्। यद्येतानि केवलप्रहरणाङ्गभूतानि देवतान्तराणि भवेयुस्तत उभयत्र सकलः प्रयुज्येत। त एव त्विहाप्यग्न्यादयः प्रत्यभिज्ञायन्त इति न भेदहेतुरस्ति। अतश्चेष्टदेवताप्रकाशनोपजीवित्वादप्रयोजकं प्रहरणं सूक्तवाकस्य प्रधानप्रयुक्तदेवताश्रयत्वात्तु तदधीनं विज्ञायते। तानि च प्रधानानि यथादेवतं प्रयुज्ञते नाविशेषेण। तस्मादपकर्ष इति॥ १७॥ § 5697

सूक्तवाकशब्दः कथमिति चेदत आह॥ १८॥ § 5698 766

द्वौ हि प्रस्तरप्रहरणप्रयोगौ। भिन्नकालपौर्णमास्यमावस्याधीनत्वात्। अतश्चोभे प्रति कृत्स्नः सूक्तवाकशब्दः—तयोरुभयोरपि सकलसूक्तवाकः साधनम्। प्रकरणस्याविभक्तत्वाद्विज्ञायते। यदा तु भेदेन प्रहरणमात्रमालोच्यते तदा प्रायणीयोदयनीयैकादशिनीवच्चातुर्विद्यधनवच्चावयवशः संबन्धो भवति।

---

१ अधिका] अधिकारमुपजीवयन्निति—अनेन च ऐन्द्रयधिकरणापवादतया श्रुतिविनियुक्तस्यापि सूक्तवाकस्य मुख्यार्थविनियोगस्य पूर्वाधिकरणोक्तस्याऽऽक्षेपसमाधानार्थतया संगतिः सूचिता भवति

१ श] (अ° २ पा° १ अ° ५)

१ चोक्त] (अ° ३ पा° १ अ° १ सू° २) इत्यत्रेति शेषः

४ प्राय] प्रायणीयोदयनीयैकादशिनीवच्चेति—द्वादशाहे श्रुतेन 'ऐकादशिनान्प्रायणीयोदयनीययो' रालभेरन्' इति वचनेन द्वंद्वोपात्तेतरेतरयुक्तप्रायणीयोदयनीयोपलक्षितकाले कर्तव्यतया विहितानामेकादशपशुयागानां यथा प्रायणीये पञ्चोदयनीये पञ्चावशिष्टस्यापि संनिधानादुदनीय एवेत्येवं विभज्य विनियोगः (अ° १० पा° ६ अ° ४) इत्यत्र वक्ष्यते। यथा वा लोकेऽपि चातुर्विद्येभ्यः शते देयमित्यादौ चतुर्वेदविद्देयत्वेनोक्तस्य शतस्यैकैकवेदविदे चतुर्थश्चतुर्थो भाग इत्यवयवशो विनियोगः प्रसिद्धस्तद्वत्सूक्तवाकस्यापि दर्शपूर्णमासकालिकप्रहरणद्वयान्वयोऽवयवशः संभवतीत्यर्थः।

तस्माच्छ्रुतिलिङ्गप्रकरणानामविरोध इति सूत्रम्। तदिदानीं भाष्यकारो दूषयति—**नैतदेवम्। न हि सापेक्षाणामितिकर्तव्यतया संबन्ध** इति। कुतः।
§ 5699

विधिर्यदि प्रधानानामितिकर्तव्यतां प्रति।
उभे प्रति ततः कृत्स्नः सूक्तवाको भवेदयम्॥§ 5701

प्रधानानि हि फलं प्रति विधीयन्ते नेतिकर्तव्यतायाम्। अतस्तेषां फले विवक्षितं **साहित्यं** नेतिकर्तव्यतायाम्। इतिकर्तव्यतां हि प्रति ता उद्दिश्यमानानि भवन्ति। अविधीयमानायास्तस्या गुणत्वाभावप्रसङ्गात्। सा चेद्विधीयते द्वयोरन्योन्यं प्रति विधानासंभवादसंबन्धादवश्यं प्रधानोद्देशेन भवितव्यम्। ततश्चोद्दिश्यमानानां द्वन्द्वावगमितमितरेतरसाहित्यं न विवक्ष्यते। तेन प्र-
767 त्येकमितिकर्तव्यतावाक्यसमाप्तेरेकैकं प्रधानं समस्तेतिकर्तव्यतायुक्तमवगतम्। तथैवानुष्ठानेऽपि प्राप्ते सकृत्कृतानामेवैककालवर्तिनां प्रत्येकं कात्स्न्यमस्तीति तन्त्रेणानुष्ठानं भविष्यति। तदिहापि प्रत्याग्नेयादि प्रधानं मा नाम सूक्तवाक आवर्तिष्ट। प्रयाजादिवत्तु पौर्णमास्याममावास्यायां च सकलेन भवितव्यम्। इतरथा वा प्रयाजादयोऽपि विभज्यैव प्रयुज्येरन्। न चेदं प्रमाणवत्। अतः श्रुतिबलीयस्त्वाल्लिङ्गं बाधित्वा गौणत्वमदृष्टार्थत्वं तद्विषयं वा प्रहरणस्य देवतान्तरमध्यवस्यामः। कथं पुनः समुदाये फलसाधनत्वेन चोद्यमाने साधनत्वरहितानामवयवानामितिकर्तव्यतासंबन्ध इति। उच्यते। § 5702

यागस्य फलसंबन्धात्प्रत्येकसमवायिनः।
समुदायः फलार्थः स्यादिति केनावगम्यते।§ 5704

यागत्वं हि प्रत्येकं समवेतं, तद्वाचिना च धातुनैकैकस्येतरानवेक्षस्य साधनशक्तिरवधार्यते। ननु समुदायवाचिनामविशेषितत्वाद्धातुरपि समुदायलक्षणार्थ एव भवेत्। न। नाम्न एव च धात्वधीनत्वेन प्रत्येकवृत्तित्वात्। तदुक्तं पौर्णमास्यधिकरणे। तेन सहापि नाम्नेतरेतरयुक्तत्वमात्रमेव धर्मोऽभ्यधिको न समुदायः फलवान्। नन्वेवमपि यथैव साधनत्वमितरेतरयुक्तानामेवं तदनुग्रहार्थत्वादितिकर्तव्यताऽपि तथैव स्यात्। न। तस्यैव साहित्यस्योद्दिश्यमानत्वेनेतिकर्तव्यतां प्रत्यविवक्षितत्वात्। एकमपि हि वस्तु लक्षणतः क्वचिदेव विवक्ष्यते न सर्वत्र। कथमेकस्य युगपदुद्दिश्यमानोपादीयमानत्वमिति चेत्। अपेक्षाहेतुभेदादीदृशान्यपि भवन्तीत्युक्तम्। ननु वैरूप्याद्वाक्यभेदः स्यात्। को

१० द्व] 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादौ दर्शपूर्णमासाभ्यामिति द्वंद्वावगमितमित्यर्थः।
२४ मा] (अ° २ पा° २ अ° ३)
२७ क्ष] लक्षणतः—उपादेयोद्देश्यगतत्वरूपलक्षणभेदादित्यर्थः।
२९ न्तीत्युक्त] आचार्यो मातुलश्चेति द्रव्यैकत्वेऽपि सिध्यति। अपेक्षाहेतुभेदेन व्यवहारः पृथकता॥ इत्यादिना स्तुतशस्त्राधिकरण उक्तमित्यर्थः।

वा प्रधानोद्देशेनेतिकर्तव्यतां विदधतः प्रकरणाम्नानानुमितस्य श्रुताद्वाक्यान्तरत्वं
नेच्छति। ननु चायमितरेतरयोगः फलार्थमपि विवक्ष्यमाण इतिकर्तव्यतासंब-
न्धवेलायामपि बलात्प्रसज्यमानो न शक्यते वारयितुम्। सत्यं प्रतीतितो न
शक्यते। विधितस्तु शकते। कथम्। इह हि विशिष्टभावनाविध्युत्तरकालम-
वान्तरविधिषु कल्प्यमानेषु कर्मणः फलसाधनांशे पुरुषः प्रवर्त्यमानः कर्म-
साहित्येऽपि पश्वेकत्ववत्प्रवर्तितः प्रधानेतिकर्तव्यतासंबन्धांशे प्रधानानि प्रत्य-
प्रवर्त्यमानत्वात्तदीयसाहित्येऽपि प्रवर्तितोऽङ्गानि तु सहितानि प्रति नियुक्तः।
तस्मादितिकर्तव्यतां प्रति ग्रहैकत्ववत्प्रधानसाहित्यमविवक्षितम्। न ह्येके- 768
नैव प्रधानशब्देन प्रधानान्यङ्गार्थमुद्दिशता तत्साहित्यमुपादातुं शक्यम्, वचन-
व्यक्तिभेदात्। तस्मात्प्रत्येकमितिकर्तव्यता। तद्दर्शयति—**संनिधानाविशेषात्।
साधनत्वेन च सर्वेषां निर्देशा**देकस्यापि चेतिकर्तव्यतान्तरानुपदेशात्। अस्य च
कथंभावरूपस्य प्रकरणसामर्थ्यस्याविशेषादेकैकस्य कृत्स्नमन्योन्यनिरपेक्षस्य
प्रकरणमिति। ततश्च 'वचनादिति चेत्' इत्ययमेव पक्षोऽवशिष्यते। एवं च
भत्त्वा **सूत्रमत्रोच्यते। नैतदेवमिति**—स्वयमुत्तरपक्षमभिधत्ते। न तावद्गौणत्व-
मदृष्टार्थत्वं देवतान्तरं वा युक्तम्। पुरस्तान्निराकरणात्। अतो यथार्थनिष्क-
र्षे सति सूक्तवाकशब्द उपपद्येत। सूक्तवाकबहुत्वात्। न हि भिन्नकर्मग-
तभिन्नदेवताप्रकाशनसमर्थानामन्योन्यनिरपेक्षनानाप्रयोजनयुक्तानाम् 'अग्नि-
रिदं हविरजुषत' इत्येवमादीनामेकवाक्यतालक्षणमस्ति। तस्मात्पुरस्तात्प-
रस्ताद्यानुषङ्गयुक्ता बहव एते सूक्तवाका ईदृशा द्रष्टव्याः। 'इदं द्यावा-
पृथिवी' इत्यारभ्य 'अग्निरिदं हविरजुषतावीवृधत महो ज्यायोऽक्रत—
अस्यामृधेद्धोत्रायां देवंगमायाम्' इति यावत्समाप्तिः। ततः पुनः 'इदं द्या-
वापृथिवी' इत्यारभ्य 'सोम इदम्' इत्युक्त्वा 'अस्यामृधेद्धोत्रायाम्' इति
समाप्यते। तेन प्रतिदेवतं भिन्नानां सूक्तवाकानां समानप्रयोगभाजामाम्नान-
वत्तन्त्रेण कतिपयानां पाठः। येन केनचित्तु प्रहृते सूक्तवाकेन प्रहृतं भवति। 769
जातिवत्प्रत्येकं सूक्तवाकत्वस्य सूभाषितयोगात्मकस्य समाप्तत्वात्। तत्रोपपन्ने
सूक्तवाकशब्दे यदन्यदेवतावाचीन्यन्यत्र न प्रयुज्यन्ते न तत्र श्रुतिः पीड्यते।
किं तर्हि। लिङ्गवाक्याभ्यां प्रकरणम्। तच्च न्याय्यमेवेति निष्कृष्य प्रयोगः।
इदमपि तु न युक्तमभिहितम्। तन्त्रपदैर्वैश्वानरवाक्यवदेकवाक्यतायाः प्र-
त्यक्षत्वात्। न हि प्रतिपदं परस्पराकाङ्क्षा संबन्धो वा भवति। किं तर्हि।

---

१ णाम्नानानुमित] अनुमितस्य—प्रयाजादिभिर्दर्शपूर्णमासावुपकुर्मादित्येवं रूपस्येत्यर्थः।

१ श्रु] श्रूतात्—'दर्शपूर्णमासाभ्यां स्वर्गकामो वजेत' इत्यस्मादित्यर्थः।

११ स्या] यदि कस्यचित्प्रधानस्येतिकर्तव्यतान्तरं निरांकाङ्क्षीकरणसमर्थं साक्षाद्वचनोपदिष्टं भवेत्तदा तव्द्यतिरिक्तानामेव प्रधानानामितिकर्तव्यताकाङ्क्षात्मकं प्रकरणं भवेत्। न त्वेतदस्तीत्येवमभिधानार्थं यदवचनाच्चेति भाष्यं तदध्याहृत्य व्याचष्टे—एकस्यापीत्यादिना।

११ अस्य] 'अस्य प्रकरणलिङ्ग गस्य' इति भाष्यं व्याकरोति—अस्य च कथंभावेत्यादिना।

२८ यु] सूक्तवाकनानात्वमभ्युपगम्य भाष्योक्तमपि कृत्स्नोपदेशपरिहारं यथाश्रुतं दूषयितुमुपक्रमते— इदमपि तु न

केनचिदेकेन संबध्यमानानि सर्वाण्येकवाक्यतां गच्छन्ति। तद्यथा ‘अरुणया पिङ्गाक्ष्यैकहायन्या’ इति परस्परेणासंबद्धानामपि क्रीणातिनाऽभिसंबन्धादेकवाक्यत्वम्। एवमिहापि ‘यदनेन हविषाऽऽशास्ते’ इत्यादिभिः संबन्धादेकवाक्यत्वं भविष्यति। अस्ति चेष्टदेवताप्रकाशनं नामैकं प्रयोजनं तन्त्रपदवशेन साकाङ्क्षावयवत्वम्। तस्माद्यद्यपि तावदर्थतः प्रत्येकं वाक्यपरिसमाप्तिस्तथाऽपि शब्दतः सिद्धमेवैकवाक्यत्वम्। किमुत हरतिं प्रत्युपादीयमानत्वेन समुदाये वाक्यपरिसमाप्त्यङ्गीकरणात्। यदि च भिन्नानि वाक्यानि भवेयुस्तत 770 उपसद्दक्षिणादिमन्त्रवत्प्रयोगकाले देवतापदप्राधान्याद्भेदेनैव प्रयोगः प्राप्नोति। प्रस्तरप्रहरणे च विवक्षितैकसंख्यत्वात्तावता कृतार्थत्वादेकदेवत्यस्यायं कस्यचित्प्रयोगः प्राप्नोति। तस्मात्समस्तमेकं वाक्यम्। अतश्च वक्तव्यः कृत्स्नवचनस्य परिहारः। स उच्यते। § 5705

बिन्दौ च समुदाये च तोयशब्दो यथेष्यते।
संसर्गिद्रव्यरूपत्वात्सूक्तवाकपदं तथा॥§ 5707

सूक्तवाको हि सामर्थ्यतः प्रयोजनतश्चेदृगवधार्यते। प्रयोगमध्यवर्तिदेवतापदसहितमभितः श्रूयमाणतन्त्रपदोपेतमिष्टदेवताप्रकाशनं कुर्वद्वाक्यं सूक्तवाकः। ततश्चैकस्मिन्देवतापदे सति अनेकस्मिंश्च प्राकृते वैकृते च तन्त्रपदमध्यस्थे सकलः सूक्तवाकः। प्रयोगासंबद्धदेवतापदसाहित्ये तु दुरुक्तवाको भवति। तेन पौर्णमास्यमावास्ययोः स्वदेवताप दोपेतः सूक्तवाको युक्तिसहितेन पाठेनानुषङ्गादिपूरितमन्त्रवदवधारित इत्यसमवेतार्थप दप्रयोगेऽसत्यसूक्तवाकत्वात्सुतरां श्रुतिपीडा स्यात्। अतश्च हरतिरपि यथा विद्यमानसूक्तवाकसाध्यत्वात्कृत्स्नेनैव साधितो भवतीत्यदोषः। § 5708

तेन त्रिधैव मन्तव्यः सूक्तवाकः प्रतिष्ठितः।
स्वाध्याये कर्मकाले च प्रकृतौ विकृतावपि॥§ 5710

सर्वप्राकृतदेवत्यः स्वाध्याये तावदिष्यते।
पठन्नन्यादृशं तत्र तं विनाशयति ध्रुवम्॥§ 5712

निष्कृष्टदेवतामध्यः प्रकृतौ समुदाययोः।
सूर्यादिपदमध्यश्च विकृतावधार्यते॥§ 5714

सूक्तवाकः स तत्रैव यत्र यादृङ्निरूपितः।

---

युक्तमित्यादिना। अयमाशयः। यथैव ‘वैश्वानरं द्वादश कपालं निर्वपेत्पुत्रे जाते’ इति जातेष्टिमुपक्रम्य ‘यस्मिञ्जात एतमिष्टिं निर्वपति’ इत्यादिना जातेष्ट्यैवोपसंहारादेकवाक्यत्वं प्रत्यक्षमवगम्यते तथैवात्रापि, उपक्रमोपसंहारयोस्तन्त्रपदयोगेनैकवाक्यत्वस्यावगमाद्वाक्यनानात्वमयुक्तमिति।

जहाति सूक्तवाकत्वमसंगतनिरूपणात्॥[§ 5716]

भाष्येऽपि च यावद्देवतं सूक्तवाकसंभवादेकस्यापि बहुत्वमभिहितमिति द्रष्टव्यम्। तथा सूत्रमप्युभे प्रति स्वदेवतापदसाहित्यमात्रेण कृत्स्नसूक्तवाकशब्दः प्रकरणाविभागात्कल्पित इत्येवमेव गमयितव्यमिति सर्वेषामविरोधः॥ १९॥ [§ 5717]

इति सूक्तवाकस्य विभज्य विनियोगाधिकरणम्॥ ६॥

## ०.०.९५ लिङ्गस्य दुर्बलप्रमाणोपजीवित्वाधिकरणम्

येन क्रमेणैन्द्राग्नादीनि काम्यानि कर्माण्याम्नातानि तेनैव क्रमेण त- 771
द्देवत्यानि काम्यसमाख्यायुक्तानि याज्यापुरोनुवाक्यायुगलानि। तानि किं क्रममुल्लङ्घ्य तद्देवत्यकर्ममात्रार्थानि लिङ्गाद्भवन्त्युत केनचित्प्रकारेण तास्वेव काम्यास्विष्टिषु यथाक्रमं विनियुज्यन्त इति। उदाहरणबहुत्वं हि सूत्रोपात्तविशेषणविषयप्रकल्पनार्थम्। तत्र लिङ्गात्सर्वोर्थत्वे प्राप्तेऽभिधीयते। [§ 5719]

नासति क्रतुसंबन्धे सामर्थ्यं विनियोजकम्।
येन च क्रतुसंबन्धस्तेन काम्यार्थता स्फुटा॥[§ 5721]

लिङ्गं हि देवतासंबन्धं कुर्यात्। न च तत्स्वरूपप्रयुक्तत्वे फलमस्ति। यज्ञसंबन्धिता तदनुरक्तदेवतासंबन्धिता वा नैतावता वाक्यप्रकरणादिरहितेन
शक्योपादातुम्। न च ज्ञायते क्वांशे विनियोग इति। तेनावश्यं समाख्या 772
तावदाश्रयणीया। तया हि यज्ञसंबन्धः कार्यविशेषश्च सिध्यति। इज्यतेऽनयेति यागसंबन्धः। तस्याश्च हविःप्रदानार्थत्वात्कार्यविशेषोऽप्यवधृतः। ततश्च केन यज्ञेन संबन्ध इति लिङ्गात्तद्देवत्येनेति विज्ञायते। नन्वेवमपीष्टं न सिध्यत्येव। कथं न सिध्यति। यदा काम्यं याज्याकाण्डमित्येतावत्या समाख्यया काम्येष्टिविषयत्वं नियतम्। अपि च। यद्यपि समाख्या यज्ञमात्रसंबन्धं कुर्यात्तथाऽपि बलीयसा क्रमेण बाध्येतैव। तस्मात्काम्येष्टियुक्तमेवैतत्समाम्नानमिति। **किमर्थमुभयं** सूत्रितमिति। क्रमानुगृहीतेन लिङ्गेनैव काम्येष्टिविषयत्वसिद्धेरथवा काम्यं याज्याकाण्डमित्येतावतैव सर्वं सिद्धमिति मन्यते। तत्राभिधीयते। सत्यम्। ऐन्द्राग्नादिषु लिङ्गक्रममात्रेणापि सिध्येदृचां याज्यानुवाक्यात्वादन्यत्राविनियोगात्। यानि त्वाग्नेयादीनि कर्माणि 'अग्नये व्रतपतये' इत्येवमादिचोदितानि तत्र स्थानद्वयमृचामग्निप्रकाशने सामिधेनीत्वं याज्यानुवाक्यात्वं च। साप्तदश्याम्नानाच्चास्ति सामि-

३ सू] अयं चात्र सूत्रार्थः। प्रकरणस्य—प्रकृष्टकरणस्यावयवशक्तिरूपस्य, अविभागात्—प्रत्यभिज्ञानाद्रूढिकल्पनानुपपत्तेः, उभे प्रति, अवयवप्रयोगेऽपि कृत्स्नसूक्तवाकशब्दार्थो नानुपपन्न इति।

धेनीनां द्वे ऋचौ प्रत्यपेक्षा। तत्र यदि याज्यासमाख्या विनियोजिका नाऽऽश्रीयेत ततः सामिधेनीष्वपि लिङ्गक्रमावुपपद्येते इति। प्रथमातिक्रमे कारणाभावात्तत्रैव विनियोगः पाप्नोति। समाख्यया तु तन्निवर्तितं भवति। तेन तर्हि तन्मात्रमेवास्तु नार्थो लिङ्गक्रमाभ्यामिति। तदुच्यते। यद्यत्रेष्टिपरिमिता एवात्यन्तं तद्देवत्याश्चाम्नायेरंस्तत एतदेवं स्यात्। इह त्वन्यदेवत्यस्य 773 स्वानुरूपयाज्यानुवाक्यापूरितस्य कर्मणः क्रमे या आग्नेय्य ऋचः पठ्यन्ते ताः समाख्यया केवलया विनियुज्यमाना याज्याकार्ये विनियुज्येरन्। न चास्ति संभवः। विलिङ्गत्वादन्याभ्यां तल्लिङ्गाभ्यां बाधितत्वात्। तेनाविनियोग एव स्यात्। लिङ्गक्रमाश्रयणे पुनः समाख्यायां निवृत्तव्यापारायां ताभ्यां विनियोगे सति सामिधेनीषु प्रयोगः सिद्धो भवति। तं विषयं दर्शयति—**आग्निवारुण्या इष्टेर्या**ज्यापुरोनुवाक्ये पठित्वा सौमारौद्रीणामिष्टीनां याज्यापुरोनुवाक्यांस्त्वनागतासु मनोर्ऋचः पठ्यन्ते। ताः सामिधेनीषु धाय्या भवन्तीति। तथा पृथुपाजवत्यावपि द्रष्टव्ये। तत्रापि पूर्वस्याः सामिधेनीक्रममतिक्रम्य याज्यापुरोनुवाक्योत्तरकालपाठादुत्तरेष्टिविषयत्वं विज्ञायते। यदि च क्रमो नाऽऽश्रीयेत ततो लिङ्गसमाख्यामात्रेण प्रथममैन्द्राग्नयुगलं द्वितीयस्यामैन्द्राग्न्यां विनियुज्येत द्वितीयं च प्रथमायाम्। क्रमे तु सति समाख्यातः पूर्वतरं तेन क्रतुसंबन्धकरणात्तत्संनिरुद्धमेव लिङ्गं श्रुतिं कल्पयतीत्यक्रमविनियोगः परिहृतो भवति। तस्मात्सम्यक् सूत्रितमिति॥ २०॥ § 5722

इति लिङ्गस्य दुर्बलप्रमाणोपजीवित्वाधिकरणम्॥ ७॥

## ०.०.१६ आग्नेय्यधिकरणम्

ज्योतिष्टोमे प्रथममाग्नेय्यैन्द्र्यादयः स्तोत्रशस्त्रादिसाधनत्वेन ‘अग्न आयाहि वीतये’ इत्येवमादयो विशेषरूपेणाऽऽम्नाता विहिताश्च। पुनश्च सामान्येन ‘आग्नेय्याऽऽग्नीध्रमुपतिष्ठते’ इत्यादिषूपदिश्यन्ते। तत्र संदेहः। किं तद्व्यतिरिक्ता ग्रहीतव्या उत ता वा, अन्या वाऽथवा ता एवेति। ग्रन्थात्रयः पक्षाः प्रतिभान्ति। न त्विहाप्रकृता एवेत्यस्य पक्षस्य प्रमाणमस्ति। महता हि प्रबन्धेनाविशेषग्रहणं प्रतिपाद्यते न केवलाप्रकृतनिश्चयः। येन हि प्रमाणेनाऽऽग्नेयीशब्दाविशेषेणाप्रकृता गृह्येरंस्तेनैव प्रकृता अपि। न च 774 किं चित्कारणमस्ति येन प्रकृताः परित्यज्येरन्। न च भाष्यकारेण त्रयः पक्षाः प्रदर्शिताः। किं तर्हि। अविशेषपक्ष एवाऽऽदावपिशब्दरहितेनाप्रकृतशब्देन परिगृहीतः। येनाप्रकृता एवेति भ्रान्तिर्भवति। यत्तु तत्र प्र-

२ थ] ‘सामिधेनीकार्येऽपि’ इति भाष्यस्थापिशब्दमेवकारार्थपरतया व्याचष्टे—प्रथमातिक्रम इत्यादिना।

५ न] भाष्यग्रन्थात्पराभिमतं संदेहमुपन्यस्य दूषयितुमारभते—न त्विहेत्यादिना।

माणं तदविशेषपक्षमेव साधयति। तथा च परस्ताद्विवृतमप्रकृतेऽपि प्रत्ययो भवति प्रकृतमप्युपाददीरन्निति च। यदि त्ववश्यं तृतीयोऽपि पक्षः समर्थनीयस्तत एतावती श्रोत्रियोपपत्तिः। प्रकृतस्य कार्यान्तरोपयोगेन यातयामत्वादग्रहणम्। अथवा सामान्यविधानमिदम्। तानि त्वाग्नेयीविशेषविधानानि परिहृत्य च विशेषविधिविषयं सामान्यशास्त्राणि प्रवर्तन्ते। यदि तु तत्रापि विशेषग्रहणं नस्यात्ततस्तदप्यनेनैव तुल्यमित्युदाहरणत्वेन गृह्येत। तस्मादप्रकृता एव ग्रहीतव्याः। अथवाऽऽग्नेयादिशब्दैरविशेषप्रत्ययो जातः। न चान्यत्प्रकृतग्रहणक्षमं विशेषणं पश्यामः। प्रकरणस्य ग्राहकत्वेनाविशेषकत्वात्। संनिधिलक्षणलौकिकप्रकरणस्य च यौगिकश्रुतिजनिताविशेषप्रत्ययेन बाध्यमानत्वात्। तस्मात्सर्वप्रत्ययः। **उपदिष्टोपदेशो हि न न्याय्य इति**। इह उपदिष्टस्यैवेत्यर्थः। **एवंजातीयकस्येति**—विशेषणरहितस्येत्यर्थः। **कथंजातीयकस्येति**—अस्ति विनाऽपि विशेषणेन विशेषग्रहणप्रमाणं प्रकरणामिति सिद्धान्तवादी मन्यते। परः पुनः स्वाभिप्रायेणैव सिद्धान्तवाद्यभिमतां विशेषग्रहणोपपत्तिमनभिमतामेव परिकल्प्य **कथम्**। **यदि तल्लिङ्गं तस्योपलक्षणत्वेनेत्याह**। न चात्रोपरि वक्ष्यमाणदेवतालिङ्गाभिप्रायेण लिङ्गपदं युक्तम्। किं तर्हि। आख्यातप्रत्ययसामर्थ्यं तद्विहितत्वं वा। तदुपक्षीणशक्तौ तस्मिन्विध्यभावप्रसङ्गोपन्यासात्। **नासौ सामान्येन लिङ्गेनेति**—अग्निना चिह्नेन, सर्वासु प्रतीयमानासु स्फुटेन विशेषणेन 775
विना न शक्यो मन्त्रविशेषः प्रतिपत्तुमित्यभिप्रायः। तदिह यदि विशेषणमिष्यते ततो दार्शपौर्णमासिकनिर्वापालम्मन्यायेन कर्तव्यतावचनेन लिङ्गेन विशेष्टव्यम्। तद्यकर्माङ्गभूतेभ्यो दाशतयेभ्यो निवृत्तमत एव विशेषणम्। तथा च दर्शयति—**येनानेनैवंलिङ्गेनैतत्करोतीति** ( कर्तव्यम् )। येनानेनैवंलिङ्गेन—अग्निलिङ्गेनेन्द्रालिङ्गेन वा, किंचित्करोतीति—आख्यातप्रत्ययविहितत्वेनोपलक्षितेनाऽऽग्नीध्रोपस्थानमिति, ततो विधायकस्योपलक्षणत्वेनोपक्षीणत्वान्नोपदिष्टो भवति। **अथोपदिश्येताऽऽग्नेय्यादिना** करोतीति ततो न विशेषितो भवति। ततश्चाविशेषिताग्नेयीमात्रग्रहणप्रसङ्गः। तेनोपदिष्टस्यैव तदुपलक्षितस्य पुनरुपदेश इत्यप्रमाणकम्। तस्मात्कर्तव्यतावचनवर्जितकेवलाग्न्यादिदेवतोपलक्षणसामर्थ्यात्पुनर्दाशतया अपि ग्रहीतव्या इति। **ननु प्रकरणसामर्थ्यादिति**—सिद्धान्ताभिप्रायेणोक्तम्। **लिङ्गं प्रकरणाद्बलीय इति**—लिङ्गशब्देनात्र देवतासंबन्धाद्यौगिकी श्रुतिरभिधीयते न सामर्थ्यमात्र-

४ या] यातयामत्वादिति—यथा पक्वस्यौदनादेः प्रहरे गते सति गतरसत्वाद्यातयामत्वमुच्यते तद्वदन्यदपि गतवीर्यं यातयाममित्युच्यते।
७ अ] एतावता प्रौढ्या भाष्यमप्रकृतपरत्वेनापि संयोज्याधुना स्वमतेनाविशेषपक्षविषयतया संयोजयितुमुपक्रमते—अथवेत्यादिना।

१४ विशेष] विशेषग्रहणोपपत्तिमनभिमतामिति—यथाऽऽग्नेय्या स्तोत्रादि करोति, इत्येवमाख्यातप्रत्ययविहितत्वरूपोपदिष्टत्वोपलक्षणरूपां प्रकृतग्रहणोपपत्तिं परमार्थतः सिद्धान्त्यनभिप्रेतां तदभिमतां परिकल्प्येति समुदितार्थः।
२० न्या] ( अ॰ २ पा॰ ३ अ॰ ५ ) अत्रत्यभाष्योक्तन्यायेनेत्यर्थः

म्। उपरिष्टाद्बहुप्रयोगगतोऽपि लिङ्गशब्द एवमेव यौगिकश्रुतिवचनो व्या-
ख्येयः। **आह। विरोधे सतीति**—यदि प्रकृतमनाग्नेयं गृह्णीमस्ततो विरोधो
भवेत्। प्रकृताग्नेयग्रहणे तु द्वयमप्यनुगृह्यते। तथा तद्भूताधिकरणे श्रुतिवाक्य-
776 योरविरुद्धत्वमुक्तम्। **नैतदेवमिति**। दाशतयानामपि विकल्पेन प्राप्तानां न
युक्तः प्रकरणानुरोधेन बाधः। तस्मान्नोभयमनुग्रहीतव्यमिति। सामान्यस्य
प्रविव्यक्ति समाप्तेः प्रकृतायामपि व्यक्तौ समस्तपदार्थसंभवान्न कश्चिद्विरोध
इति मत्वाऽऽह—**तल्लिङ्गवत्ताऽनेनानुग्रहीतव्येति**। तस्माल्लिङ्गयुक्तस्य वाक्यस्य
सामान्यविषयत्वात्प्रकरणेन तदाकाङ्क्षितविशेषसमर्पणादसति समवायविरोधे
न युक्तो बाधः। इतरस्तु व्यक्त्यभिधानाभिप्रायेण दाशतयप्राप्तिनिवर्तनाद्विरोधं
समर्थयते। **ननु व्यक्तिरपदार्थ** इत्यभिप्रायप्रत्यादेशः। परस्त्वाह। **एतदेव न
विजानीमस्तल्लिङ्गवत्ता** सामान्यभूताऽत्राङ्गं **नवेति**। यदि हि गवादिशब्दव-
द्व्यक्त्यभिधानसंभवस्ततः सामान्यचोदनायां सत्यामश्रुतव्यक्तिग्रहणानुषङ्गिणी
प्रकृतव्यक्तिग्रहणेऽप्यदोषोऽथ तु देवतोपलक्षिता व्यक्तिरेव शब्दार्थस्ततः प्र-
कृतग्रहणे सति श्रुतिजनितप्रत्ययैकदेशबाधः स्यात्। सा चेह **व्यक्तिरेव
साधनं न सामान्यं नाम किंचित्**। किं पुनरिदानीमाकृत्यधिकरणोक्त-
777 सामान्यापह्नवं भाष्यकारः करोति। नेति ब्रूमः। तस्याङ्गत्वासंभवमात्रमाहेति
केचित्। तदयुक्तम्। तथा सति व्यक्तीनामश्रुतत्वादपरिग्रहेऽपि दोषाभावात्।
अतः प्रकृतापेक्षया सामान्यमपह्नूयत इति वक्तव्यम्। व्यक्तिशब्दो ह्ययं
यौगिकत्वान्न जातिशब्दत्वं प्रतिपद्यते। न चात्र जातिः काचित्प्रतीयते। नाना-
रूपासु नानाच्छन्दस्कास्वपि च देवतैकत्वमात्रेणाऽऽग्नेय्यादिशब्दप्रयोगात्। न
हि 'अग्न आयाहि वीतये' 'अग्निं होतारं मन्ये दास्वन्तम्' इत्येतयोर्देवताव्य-
तिरिक्तं किंचित्सामान्यं दृश्यते। देवतासंबन्धमेवैष न व्यभिचरति। व्यभिच-
रति तु ऋग्जातिं, द्रव्यकर्मादिष्वपि प्रयोगात्। अतो देवतैवात्र समानेत्याह।
संबन्धस्तु समानः सन्नपि नाभिधेयत्वेनार्थसिद्धत्वाद्भाष्यकारेणोपन्यस्तः। त-
स्या एव च देवतायाः समानत्वाद्व्यक्त्यानन्त्यादिदोषनिवृत्तिः। पूर्वाभिहितेऽपि
च विशेषणे प्रकृतिप्रत्यययोः शक्तिभेदात्प्रत्ययेन विशेष्याभिधानमविरुद्धम्।
यत्र तु तावानेव शब्द उभयत्र व्यापारयितव्यस्तत्र विशेष्यानभिधानं, यथा

---

३ द्भ] गौरश्व इति वा श्रुत्या यद्वो त्वाद्यवबोधितम्। विशेषे यदि तत्र स्यात्तत्र स्याच्छ्रुतिबाधनम्॥ जातिव्यक्ती गृहीत्वैव वयं तु श्रुतिलक्षिते। कृष्णादि यदि मुञ्चामः का श्रुतिस्तत्र बाध्यते॥ इत्यादिना तद्भूताधिकरणस्थश्लोकवार्तिके ( अ° १ पा° १ अ° ७ श्लो° ३४७—३४८ ) श्रुतिवाक्ययोरविरोध उक्तः। तन्न्यायेन प्रकृतेऽपि श्रुतिप्रकरणयोरविरोध इत्याशयः।

४ देव] आग्नेय्यादिशब्दानां व्यक्तिवाचित्वेन जातिवाचिगवादिशब्दवैषम्याद्विरोधप-रिहारासंभवोपपादनार्थं नैतदेवमिति भाष्यमित्याह—नैतदेवमिति।

५ सामान्य] उच्यत इति भाष्याभिप्रायमाह—सामान्यस्येत्यादिना। आग्नेय्यादिशब्दस्य जातिवाचित्वाभावेऽपि वैयाकरणवत्संबन्धवाचित्वाभ्युपगमान्मन्त्रदेव-तासंबन्धरूपस्य सामान्यस्य च प्रतिमन्त्रव्यक्ति विश्रान्तेर्जातिवाचित्वपक्ष इव विरोधपरिहारः सुलभ इत्याशयः।

२३ व्य] द्रव्यकर्मादिष्वपि प्रयोगादिति—'यदाग्नेयोऽष्टाकपालः' 'शिरो वा एतद्यज्ञस्य यदाग्नेयः आग्नेयो वै ब्राह्मणः' इत्यादाविति शेषः।

गवादौ। न चात्र विशेषणाभिधानमात्रस्याग्निशब्दस्य कदाचिदपि विशेष्येषु प्रयोगो नाप्याग्नेयीशब्दस्याग्नौ यतो विशेष्यं यावन्नीयेत। यदि चेह विशेषणमात्रमभिधीयेत ततस्तस्यैव कार्यक्षमत्वान्नैव विशेष्यं परिगृह्येत। तस्माद्व्यक्तय एवात्राभिधेयाः। तदुक्तं पिङ्गाक्ष्यैकहायनीशब्दयोः। ततश्च पक्षे प्रकृतमप्युपाददीरन्। **नन्वेतदुक्त**मिति—आद्यपक्षाभिप्रायेण। ननु त्वयैव यातयामत्वादिदोषात्तस्यानुपादानमुक्तम्। परस्तु मध्यमपक्षं परिगृह्याऽऽह। केवलप्रकृतग्रहणे हि प्रत्ययस्य युगपद्विधिलक्षणव्यापाराद्विरोधोऽभिहितः, मत्पक्षे तु न नियोगतः स एवात्राऽऽग्नीध्राद्युपस्थाने। किं तर्हि। अविशेषवचनेन स चान्यश्चेत्यविरोधः। नन्वे **तद्दुष्यतीति**—विना कारणेन प्रकरणपीडामसहमानो 778
वदति। परस्तु देवतालिङ्गयुक्तश्रुतिबलीयस्त्वमेवोत्तरं ददाति। **अपि च। न लिङ्गं**—यौगिकश्रुत्यात्मकं, प्रकरणं **चानुग्रहीतव्यमिति**—लोकस्यातिसंमुग्धां वाचोयुक्तिं निराकर्तुमुपन्यस्यति। सर्वप्रमाणव्यवहारेष्वेव न प्रमाणमनुग्रहीतुं पुरुषाः प्रमेयेषु प्रवर्तन्ते। किं तर्हि। आत्मानम्। ततः किमिति चेदत आह—**एतदतो भवति**। बहुष्वप्येकरूपं प्रमाणं क्वचिदनुगृहीतमिति कृतार्थत्वान्न पुरुषार्थोपयिकान्यपि सन्त्यर्थान्तराणि न गृह्यन्ते। सकृत्प्रयुक्ते वा काम्ये फलभूमार्थिनामपि न भूयः प्रयोगो भवेत्। तस्मात्प्रमाणानुग्रहमनाहत्याऽऽत्मानुग्रहार्थं तत्र तत्र प्रवर्तितव्यमित्यविशेषग्रहणसामर्थ्यम्। **लिङ्गप्रत्ययविरुद्धत्वा**- दिति-अत्रापि लिङ्गशब्दस्तस्मिन्नेव प्रयुक्त इति द्रष्टव्यम्। सूत्रमप्यतदाख्यप्रापणं करोतीति नातदाख्यमात्रनियमार्थमिति व्याख्येयम्। तदाख्येषु त्वसंवाद एवेति न परामृश्यन्ते॥ २१॥ § 5724

अधिकाराख्योऽधिकृतसंज्ञक इति। अथवा तत्राऽऽख्यायत इत्येवं तदाख्यः। तदीयत्वेन वा य आख्यातः स ग्रहीतव्य इति। कुतः। § 5725

> क्रतुकार्यविशेषोऽयं मन्त्रस्यास्योपदिश्यते।
> सामान्यप्राप्त्यपेक्षश्च विशेषो नित्यमिष्यते॥§ 5727

'आग्नेय्याऽऽग्नीध्रम्' इति हि नाऽऽग्नीध्रस्वरूपप्रयुक्तमुपस्थानम्। नापि स्वतन्त्रं पुरुषार्थम्। फलाश्रवणात्। अतोऽवश्यमेवमाश्रयितव्यं ज्योतिष्टोमापूर्वसिद्ध्यर्थमाग्नीध्रोपस्थानं करोतीति। ततश्च ज्योतिष्टोमकार्यविशेषविधानमेतदिति निश्चीयते। स च विशेषः सामान्यप्राप्तौ सत्यां शक्यो 779
विधातुं नान्यथा। तत्र यदि द्वावपि सामान्यविशेषसंबन्धाविदमेव वाक्यं कुर्यात्ततो वाक्यं भिद्येत। ननु चानेन विशेषमात्रमाग्नीध्रसंबन्धः क्रियते। प्रकरणात्सामान्यसंबन्धः सेत्स्यतीति। सत्यं प्रकरणात्सिध्यति न तु श्रुतिमकल्पयित्वा। सा च श्रुतिः क्लृप्तायां सत्यां कल्पयितुं न शक्यते। ननु

---

४ दु] ( अ० ३ पा० १ अ० ६ ) इत्यत्रेति शेषः

११ सू] सूत्रमिति—'आग्नेय्याऽग्नीध्रम्' इत्ययं मन्त्रविधिः,

अधिकारे—अधिकृतमन्त्रविषये, अतदाख्येषु-तद्भिन्नेषु चावगन्तव्यः। यदि परं प्रकृतानां शिष्टत्वान्निराकाङ्क्षत्वमालोच्यते ततोऽस्तु तद्भिन्नेष्वेवेत्येवं व्याख्येयमित्यर्थः।

विशेषे विधीयमानेऽर्थादेव सामान्यमन्तर्भविष्यति। न। अर्थस्यापि प्रकरणतुल्यत्वात्। यदि त्वाग्नीध्रसंबन्धे कृते भोजनादिवत्तृप्तिर्ज्योतिष्टोमसंबन्धो नान्तरीयकत्वेनानुनिष्पादी स्यात्ततः शास्त्रं नाऽऽयस्येत्। अयं तु द्रव्यस्वरूपेण संबन्धस्य निष्फलत्वात्प्रथमतरमाश्रीयते। न च शास्त्रादृते तदुपपद्यत इत्यस्त्येवाश्रुतकल्पनाक्लेशः। किं च। § 5728

लौकिकेऽप्युपपन्नत्वासंबन्धोऽयं यथाश्रुतः।
नैकान्तात्कर्मसंबन्धमुपपादयितुं क्षमः॥§ 5730

तेनावश्यं प्रकरणानुमितैव श्रुतिः कल्पयितव्या। सर्वत्र चैवमादावर्थापत्तेः प्रामाण्यम्। सा चान्यथानुपपत्त्या भवति। तद्यदीदं विशेषसंबन्धवाक्यं सामान्यसंबन्धश्रुतिमकल्पयन्नोपपद्येत ततः कल्पयेत्। उपपद्यते त्वस्य कॢप्तसामान्यसंबन्धास्वृक्षु स्वार्थमात्रविधानम्। तावता च सिद्धार्थत्वान्न गुर्वी कल्पनामवलम्बते। तद्दर्शयति— **न ज्योतिष्टोमं प्रति मन्त्रस्य व्यापारविधानमुपपद्यते**। अन्यत **एव प्राप्तत्वात्** । यथा वसन्तादिश्रुतिभिः प्राप्तेर्न कामश्रुतय आधानाक्षेपसमर्था इत्याहिताग्नीनेवाधिकुर्वन्ति। तथैताः प्राप्तज्योतिष्टोमसंबन्धाधिकारिण्य इत्यभिप्रायः। इतरथा यदि तावदप्रकृता एव गृह्यन्ते ततो गत्यन्तरसंभवे सति वेदेनानभ्युपगतः सन्नतिभारो निष्प्रमाणक आपद्येत। अथाविशेषग्रहणं तथाऽप्येकत्र प्राप्तसामान्यसंबन्धानुवादेन विशेषमात्रकरणादपरत्र च सामान्यविशेषप्रापणाद्वैरूप्यनिमित्तोऽपि वाक्यभेदः स्यात्। प्रकृतग्रहणे न कश्चिद्दोषः। एवं च प्रत्यासत्तेः प्रत्ययविप्रकर्षो न भविष्यति। ननु च प्रकरणेऽपि यथाभिलषितः सामान्यसंबन्धो नैव कस्यचिदस्ति। यद्यपि स्यात्तथाऽपि कार्यान्तरे विनियुक्त इत्यादि विरुध्येत। उच्यते। नैष दोषः। कार्यान्तरविनियुक्तानामेव ग्रहणात्। नन्वेवं सति सामान्यसंबन्धप्राप्तिवाचोयुक्तिर्न घटते। कथं न घटते, यदा सर्वविशेषेषु सामान्यमन्तर्ग-
780 तम्। तेन यत्तत्र विशेषरूपं तद्विशेषान्तरेऽनुपयुज्यमानत्वादविवक्षितं कृत्वा तद्द्वारसिद्धसामान्याश्रयणमविरुद्धम्। यस्तु भाष्यकारेण वाक्यभेदो दर्शितः स सर्वविशिष्टविधानेषु तुल्यः। यागं कुर्यात्तं च सोमेनेत्यपि शक्यं दर्शयितुम्। अपूर्वकर्मविधानाच्च नायमन्येभ्यो विशिष्टविधानेभ्यो न्यूनतरो विज्ञायते। सिद्धान्तेऽपि चान्यलिङ्गानाश्रयणात्, तच्चैवंलिङ्गेनेत्येतदस्त्येव। न ह्यविधीयमानः प्रकृतोऽप्येवंलिङ्गमुपस्थानाङ्गम्। तस्माद्यथाकथंचित्पूर्वोक्त एवात्र वाक्यभेदो योजयितव्यः। तत्र, **उपस्थानं च कुर्यादिति**—एतज्ज्योतिष्टोमकार्यविशेषप्रदर्शनं, **तच्चैवंलिङ्गेनेति**—प्रकरणनिरपेक्षाप्राप्तज्योतिष्टोमसंबन्धदेवतालिङ्गोपलक्षितमन्त्रमात्रप्रदर्शनार्थम्॥ २२॥ § 5731

१ स्या ] अर्थस्यापीति—श्रुतार्थापत्त्याख्यस्य प्रमाणस्यापि श्रुतिकल्पकत्वेन प्रकरणतुल्यत्वमित्यर्थः।
२९ वाक्य ] विधिगौरवमेव भाष्ये वाक्यभेदत्वेनोपचरितमित्याशयः।
३१ निर ] प्रकरणनिरपक्षेस्याप्राप्तज्योतेष्टोमसंबन्धस्य देवताख्यचिह्नोपलक्षितमन्त्रमात्रस्य ज्योतिष्टोमान्वयप्रदर्शनार्थमित्यर्थः।

अथ वाक्यभेदं परिहर्तुं यथाश्रुताग्नीध्राद्युपस्थानसंबन्धमात्रमित्युच्यते। तत्राऽऽह **अनर्थकश्चोपदेशः स्यादसंबन्धात्फलवतेति**। § 5732

**ननु प्रकरणाज्ज्योतिष्टोमस्योपकारकः स्यादिति**—अन्यतः सामान्यसंबन्धसिद्धिं मन्यते। न ह्यसावप्यविधीयमानः संभवतीति दर्शयति—**यद्युपस्थानज्योतिष्टोमसंबन्धो विवक्ष्येत ततस्तेनैकवाक्यतामियात्। यदा तु खलु** तमविधायोपस्थानमनूद्य विशिष्टविधानेन वा मन्त्रसंबन्धो विधीयेत तदा लौकिके निष्फले शुद्ध एवोपस्थाने मन्त्रः प्राप्नोत्यननुमितश्रुतिप्रकरणं बाधित्वा। न हि तदा प्रकरणाद्विशेषप्रत्ययः। अस्मत्पक्षे तु प्रथममेव ज्योतिष्टोमेन स्वीकृतत्वान्नान्यत्र प्राप्तिरित्यर्थवत्ता लाघवं च। अथवाऽऽग्नीध्रादीनां कर्माङ्गभूतानां 781
मन्त्राणां च करणानां संबन्धे विधीयमान उपस्थानमप्यनूद्यत इति लघुतरम्॥ २३॥ § 5733

यत्तु यातयामत्वात्सामान्यविशेषबाधाद्वा न प्रकृतग्रहणमिति। तन्न। वचनाद्यातयामविधानाद्गुणभूतमन्त्रावृत्त्या च समुच्चये सति विरोधाभावादुभयमप्यदोषम्। तथा, येनैवंलिङ्गेनैवं कुर्यादित्येषाऽपि वचनव्यक्तिर्नाऽऽश्रीयते। सर्वेषां क्वचिदुपदिष्टत्वेनाविशेषणत्वात्। यत्तु प्रत्ययेन विशेष्टव्यमिति। तदन्यथैव विशेषसिद्धेरसंबद्धाध्यारोपणमात्रमेव शोभते। तथा हि। § 5734

यद्यप्यहमृचां कुर्यां प्रत्ययेन विशेषणम्।
तथाऽपि नैव मुच्येय सर्वासां ग्रहणादिह॥ § 5736

सर्वा ह्यध्ययनस्थेन ब्रह्मयज्ञाश्रितेन च।
वाचस्तोमाश्विनावस्थागतेन विहिता हि ताः॥ § 5738

अतो नैवेदमाशङ्क्यमाख्यातेन विशेषणम्।
सर्वप्रत्यय एव स्यात्कृतेऽपि हि विशेषणे॥ § 5740

तस्मादर्थापत्तिप्रतिबन्धमात्रेणैव प्रकृतप्रत्ययसिद्धिः॥ २४॥ § 5741

इति आग्नेय्यधिकरणम्॥ ८॥

## ०.०.९७ भक्षानुवाकस्य यथालिङ्गं विनियोगाधिकरणम्

समस्तानुवाकोदाहरणं कानि पदानि क्व समर्थानीति वक्ष्यमाणविषय- 782
विवेकार्थम्। अत्र सूक्तवाकवदेव प्रातःसवनादिशब्दास्तत्सामानाधिकरण्य-

---

२ च] वचनादिति—कुशा दर्व्यादयो मन्त्रा ब्राह्मणाश्चबहुश्रुताः। न ते निर्माल्यतां यान्ति विनियोज्याः पुनः पुनः॥ इत्यस्माद्वचनादित्यर्थः।

संस्तुताश्च वसुमद्गणादयो गायत्रच्छन्दःप्रभृतय इन्द्रपीतादयश्च क्रमेण य-
थासवनं निष्कृष्य प्रयोक्तव्याः। इदं तु विचार्यते। किं समस्तोऽनुवाको
भक्षण एव विनियोक्तव्यः, उत ग्रहणावेक्षणसम्यग्जरणेष्वपि यथालिङ्गमिति।
तत्र भक्षस्य चोदितत्वाद्भक्षयामिपदस्य च तत्प्रकाशनसामर्थ्यादाद्यन्तपदसंदंश-
गृहीतेतरपदानामनन्यगामित्वात् ‘ततश्चावचनं तेषामितरार्थं प्रयुज्यते’ इतिवद्
ग्रहणादीनामपि चोदितभक्षविशेषणत्वेनैकप्रधानार्थानामेकवाक्यत्वात्तत्रैव वि-
नियोग इत्युक्ते, परिचोदना। ‘भक्षे हि मा विश’ इत्यस्य भक्षणेऽप्युपप-
त्तिः। ‘एहि वसो’ इत्यादेस्तु सध्यासमित्येवमन्तस्य ग्रहणार्थत्वम्। यद्यपि
783 ‘सधि हिंसायाम्’ इति पाठात्सध्यासमित्यस्य ग्रहणार्थता न विस्पष्टा। त-
थाऽपि बाहुकरणकत्वान्निर्वपतिवद्ग्रहणप्रतीतिः। अस्ति चानेकार्थत्वं धातूनाम्।
ग्रहणकृतैव वा हिंसा विवक्ष्यतेत्यदोषः। तथा ‘नृचक्षसम्’ इत्यादेरवेक्ष-
णार्थत्वं यद्यपि ‘चाक्षिङ् व्यक्तायां वाचि’ इति स्मर्यते तथाऽपि प्रयोगेषु
प्रकाशनमात्रार्थता गम्यते। तेन नृषु यः ख्यातः स नृचक्षास्तमवख्येष-
मिति ‘चक्षिङः ख्याञ्’ इत्यत्र ख्येञ् इत्युपसंख्यायते। तेनावेक्षणार्थत्व-
म्। ‘हिन्व मे गात्राणि’ इति सम्यक्परिणतः शक्नोति गात्राणि प्रीणयितुं
नामेश्चाधस्तादगन्तुमिति सम्यग्जरणार्थता। तस्माल्लिङ्गाविरोधादयुक्तमकेवाक्य-
त्वमिति। तदुच्यते। सर्वाण्येतानि भक्षणस्य प्रागूर्ध्वं च वर्तमानानि विशेषणं
भवन्ति। तेन विशिष्टभक्षप्रकाशनेऽर्थाद्विशेषणाक्षेपादेकार्थत्वाविरोधः। यद्य-
पि च ग्रहणादीनां स्वप्राधान्यापरित्यागाच्छ्रौतत्वाच्च भेदेन प्रकाशनं युक्तं,
तंथांऽप्येचोदितप्रकाशने न किंचित्फलमस्तीति चोदितशेषत्वमेव युक्ततरम्।
तदुक्तं निर्वापमन्त्रे। तस्माल्लिङ्गमविरुद्धम्। तथा च समाख्याऽनुग्रहीष्यते।
तत्र चौदयन्ति। सा नाम समाख्या विनियोक्त्री युक्ता या वेद एव पठ्यते।
784 भक्षानुवाकसमाख्या त्वसमाम्नानात्कथं विनियोक्ष्यत इति। तदुच्यते। § 5743

लौकिकं वैदिकं वाऽपि प्रमाणं दोषवर्जितम्।
सर्वमाश्रीयते स्वार्थे न चास्मिन्दोषसंभवः॥§ 5745

यथैव वेदस्य वक्तृदोषरहितत्वात्प्रामाण्यम्, एवं लौकिकस्यापि पद-स्यानादित्वाविशेषात्। न चात्रान्धपरम्परान्यायः। अभिधानाभिधेययोः सर्व-प्रत्यक्षत्वात्। न ह्याग्निहोत्रस्वर्गादिसाध्यसाधनभाववदनुवाकस्याप्रत्यक्षत्वम्। अतो भक्षानुवाकशब्दवाच्योऽयमित्येतत्तावत्प्रमाणम्। अतश्च प्रकरणे पठ्य-मानमनुवाकमालोच्य समाख्या हृदयमागच्छति। सा च भक्षस्यानुवाक इत्येवं विगृह्यमाणा भक्षसंबन्ध इत्येवं मनसि निधापयति। ततश्चोभ-योर्बुद्धावुपप्लवमानयोरपेक्षावशेन तदेव संबन्धसामान्यं विशेषसंबन्धो भवति। भक्षोऽपि हि स्मारकमपेक्षते। अनुवाकोऽपि प्रकाश्यम्। अस्ति चोभयोरपि

---

५ श्चा] (अ॰ ९ पा॰ १ अ॰ ११ सू॰ ३७)
१० अस्ति] क्रियावाचित्वमाख्यातुमेकैकोऽर्थो निदर्शितः। प्रयोगतोऽनुमन्तव्या अनेकार्था हि धातवः। इत्यादिस्मृत्येति शेषः।

योग्यत्वमिति। तथावस्थितयोः प्रकाश्यप्रकाशकयोः प्रयोगवचनेन विधानम्। तैनापि भक्षार्थत्वमिति॥ २५॥ § 5746

परिचोदनोक्तेनैव मार्गेणापकर्षः कर्तव्यः। श्रुतिप्राधान्यानुग्रहात्। ग्रह-
णादिवच्च रूपेण सामर्थ्या(त्प्रकरणेन)त्मकेन लिङ्गेन वाक्यस्य बाधितत्वात्।
ननु भक्षणैकवाक्यत्वमपि लिङ्गकृतमेव। सत्यम्। तथाऽपि श्रुतिविप्रक-
र्षाद्दौर्बल्यम्। ग्रहणाद्यभिधानसामर्थ्येन हि श्रुतिमनुमाय शीघ्रं विनियोगः
क्रियते। इतरेण पुनरेकवाक्यता। ततो लक्षणाद्वारेण भक्षं प्रति साम-
र्थ्यं ततः श्रुत्यनुमानमिति विप्रकर्षः। तेन भक्षस्य प्रत्यासन्नतरेण म- 785
न्त्रादिनाऽवरुद्धत्वादेतेषामपि च स्वयमन्यत्राप्रवृत्तेरपकर्षः। नन्वर्थप्राप्तानां प्र-
काशनं निष्प्रयोजनम्। कथं निष्प्रयोजनम्। यदा तान्यप्यप्रकाशितानि नैव
शक्यन्तेऽनुष्ठातुम्। तन्नामार्थप्राप्तं न प्रकाश्यते यदेवमेव विना प्रयत्नेन निष्प-
द्यते। ग्रहणादीनि तु सर्वाणि पृथक्प्रयत्नसाध्यानि तान्यस्मृतानि न शक्यन्ते
कर्तुमित्यवश्यं स्मर्तव्यानि। भक्षविधिरपि तान्यचोदयित्वा न शक्नोति स्वार्थ-
मनुष्ठापयितुमिति तान्यपि चोदयति। अतो मन्त्रस्वरूपात्तेषां चोपदेशात्सम्य-
ग्गुरणतन्मन्त्रयोश्चोपदेशादेवापकर्षोऽर्थस्यैव चोदितत्वात्। तेन यद्यप्यनुदाहृत-
त्वात्प्रत्यक्षोपदेशोऽत्र न शक्यो वक्तुं तथाऽप्यदोषः। सम्यग्गुरणं तु वमन-
विरेचनयोः प्रायश्चित्ताम्नानात्प्रत्यक्षोपदिष्टमेव द्रष्टव्यम्॥ २६॥ § 5747

इति भक्षानुवाकस्य यथालिङ्गं विनियोगाधिकरणम्॥ ९॥

## ०.०.१८ तृप्तिप्रकाशकमन्त्रस्य भक्षमन्त्रस्यैकवाक्यतयाधिकरणम्

ग्रहणादिवदेकार्थाक्षिप्ततृप्तिप्रकाशनात्। 786
तृप्यत्वन्तः पृथङ्मन्त्र इति प्राप्तेऽभिधीयते॥ § 5750

येषां पृथगनुष्ठानमर्थाक्षिप्तं प्रतीयते।
तेषां मन्त्रप्रकाश्यत्वं नानुनिष्पादिनां भवेत्॥ § 5752

ग्रहणादीन्यकृत्वा भक्षानुष्ठानाशक्तेस्तेषु पृथक्पुरुषस्य शास्त्रस्य च व्यापारो युज्यते। न त्वेवं भक्षणादन्यस्तृप्तौ व्यापार इति नार्थस्तत्प्रकाशनेन। तस्मात्प्रार्थनायां प्राप्तकालतायां वा लोटमन्वाख्यायैकवाक्यतामापाद्य तृप्तिविशिष्टभक्षप्रकाशनार्थः सकल इत्यभ्युपगम्यते॥ २७॥ § 5753

---

२ णा]
ग्रहणादिवच्च—ग्रहणादिप्रकाशनार्हेण।
२ रू] रूपेण—सौत्ररूपशब्दोक्तेन।

१५ प्राय] ( अ० ३ पा० १ अ० १५ )
इत्येत्रति शेषः

इति तृप्तिप्रकाशकमन्त्रस्य भक्षमन्त्रस्यैकवाक्यतयाधिकरणम्॥ १०॥

## ०.०.९९

787 इन्द्रपीतस्येति सोमसामानाधिकरण्यादनैन्द्राणां विलिङ्गत्वात्प्रकृतौ
चोहाभावादमन्त्रकं भक्षणमिति॥ २८॥ § 5755

अनैन्द्रेष्वप्यूहेन प्रयोगो विकृतित्वात्। समानेऽपि कर्मणि प्रदानभेदात्प्र-
कृतिविकारभावो भविष्यति। ध्रुवचमसाश्चैन्द्राः प्रकृतिभूताः। कथमवगम्यते।
ग्रहणमन्त्रेण सोमस्येन्द्रप्रदानविषयत्वात्। भवति हि साधनवशेन साध्यस्य
नियमः। तद्यथाऽऽहवनीयादिवशेनाग्निहोत्रादेः। यत्र च सोमस्तत्र सर्वे तद्ध-
र्माः। तेनैन्द्राणि प्रदानानि धर्मवन्ति। इतराणि त्वधर्मकत्वादतिदेशेन ग्रहीष्य-
न्ति। ततश्च सिद्ध ऊहः। तथा च सिद्धवत् ‘नमति’ इत्यनूद्य ‘अनुष्टुप्छ-
न्दसः’ इति वेशेषविधानमुपपत्स्यते। संस्थानां च विकारत्वमद्याप्य सिद्ध-
मिति दर्शनं मन्यते। विकारत्वे त्वन्यथाऽस्त्येवोह इत्यदर्शनमेव स्यात्। ननु
788 संस्था विकारभूतैवेत्यलिङ्गं विपरिणामदर्शनम्। नेति ब्रूमः। अग्निष्टोमान्तानां
हि प्रदानानां समानविधानत्वे संस्थानां विकारत्वेऽपि प्रकृतिवद्विकृतावप्य-
विकृतस्यैवोपकारकत्वसंभवात्कुतो विपरिणामदर्शनम्। ऐन्द्राणां तु प्रकृतित्वे
तार्तीयसवनिकेष्वप्यग्निष्टोमादिषु विपरिणत एवेत्युपपन्नं विपरिणामदर्शनम्।
(विशिष्टपदाक्षेपश्चैष विपरिणामव्यपदेशः। न विधिनाऽनुष्टुप्छन्दः शब्दाक्षेप
इति।) तस्माद्यथादेवतमूह इति॥ २९॥ § 5756

## ०.०.१०० पुनरभ्युन्नीतभक्षणे इन्द्रस्याप्युपलक्षणाधिकरणम्

एवं पूर्वपक्षस्थ एवाधिकरणे कृत्वाचिन्तयोहविषयत्वं चिन्तयति। हुतेषु
चमसेषु सशेषेष्वेवाभ्युन्नीताः सोमाः **पुनरभ्युन्नीता** इत्युच्यन्ते। तेषां तु य-
था पुनरभ्युन्नीतत्वं यथा चोहचिन्ताविषयता तथा विभज्य दर्शयति। सन्ति
दश चमसास्तेषां ये मध्यतःकरिणां ब्रह्मादीनां चत्वारस्तैर्होतुर्वषट्कारानुवष-
789 ट्कारयोर्द्विर्द्विर्हुतं होत्रकचमसैस्तु सकृद्वषट्कार एव हुतं, सर्वेषु चेन्द्रो देवता।
ततश्चमसेषु सशेषेष्वेव सोमोऽभ्युन्नीय हूयते। कथमवगम्येते तत्सर्वं प्रैषेण

१३ विशिष्ट ] षड्ढोत्रकाः।
मैत्रावणब्राह्मणाच्छंसिपोतृनेष्टृच्छावाकाग्नीध्राः

दर्शयति। तत्र द्वितीये होमे **होत्रका नानादेवता** यजन्ति। **मैत्रावरुणो मित्रावरुणौ 'मित्रं वयं हवामह'** इत्यादियाज्यभिरेव दर्शयति। तत्र यदैते चमसा हुत्वा भक्षणार्थमानीयन्ते तदा द्वौ द्वौ शेषौ दृश्येते। पूर्वहोमशेषश्चैन्द्र उत्तरश्च मित्रावरुणादिदेवत्यः। तस्योपलक्षणे क्रियमाणे संदेहः, किं प्रस्थितदेवता— अतिक्रान्तोऽपीन्द्र उपलक्षयितव्य उत्तराश्च भित्रावरुणाद्या इन्द्रमित्रावरुणपीतस्येत्येवमुतेन्द्रमित्रावरुणादाय एव केवला इति। कुतः संशयः। किं देवतान्तरसंचारेण पूर्वदेवतासंबन्धोऽपनीत उत नेति। यद्यपनीतस्ततः केवलमित्रावरुणाद्युपलक्षणम्। अथानपनीतस्तत इन्द्रोऽप्युपलक्षणीय इति। किं प्राप्तम्। सिद्धान्तेनैव तावदुपक्रमः 'सर्वेषामुपलक्षणम् द्विशेषत्वात्' इति॥ ३०॥ § 5758

आश्रावणप्रत्याश्रावणादिभिः प्रदानकाले देवतान्तरसंवादादस्य द्रव्यस्याप-
नीता पूर्वदेवता। न च प्रकृतावपनीतदेवतासंबन्धोपलक्षणं कृतम्। त- 790
स्मादिहापि न कर्तव्यमिति॥ ३१॥ § 5759

अथवा नापनीतमिन्द्रस्य देवतात्वम्। कुतः। § 5760

देवतां यां यदुद्दिश्य द्रव्यं स्वत्वेन गृह्यते।
तस्यास्तदेव संबन्धि नान्यत्तन्मध्यपात्यपि॥ § 5762

शास्त्रलक्षणो हि देवतासंबन्धः शास्त्रेणैव ग्रहणवेलायां देवतार्थत्वं प्र-
क्रम्यते। यच्च प्रक्रम्यते तदेव समाप्यते नान्यत्। इह च वचनात्सशेषेषु
चमसेष्वन्यदुत्तरदेवतार्थं द्रव्यं ग्रहीतव्यमिति गम्यते। तत्र चमसोपलक्ष-
णत्वेनोपपन्नः शेषः। यदा च ग्रहणवेलायामस्य देवातार्थत्वं नावधृतं तदा
प्रदानवेलायां यथागृहीतहोमात्संनिहितोऽप्यसावसंकल्पितत्वान्न देवतार्थो भ-
वति। न वाऽस्य तदानीं संकल्पान्तरमस्ति। वचनाभावात्। न चेतरसंक-
ल्पेन प्रसङ्गात्संस्पृश्यते। विभक्तवेलायां संकल्पित्वात्। न च प्रदानकाले
पुनः संकल्पान्तरमस्ति। सकृत्संकल्पितस्य पुनः संकल्पयितुमशक्यत्वात्।
न ह्येकमेव द्रव्यमसकृत्त्यज्यते। तस्मान्न प्रदानकाले संकल्पोऽस्तीति। य-
द्यपि तावद्देवता प्रत्यक्षं भुञ्जीत तथाऽपि हंस इवोदकात्क्षीरं पश्चात्तनमेव
सा सोमं विविच्य भुञ्जीत, किमुत यदोद्देशमात्रोपकारिणी देवता पुन-
रभ्युन्नीतस्यैवोद्दिश्यते न पूर्वशेषस्य। तेन पुनरभ्युन्नीते दीयमाने पूर्वशेषः
केवलमुत्सृज्यते न तु दीयते। यस्तु भक्षणवेलायां तदेकदेशः कश्चित्सोऽन- 791
पनीतेन्द्रसंबन्धित्वात्तथैवोपलक्षयितव्य इति॥ ३२॥ § 5763

इति पुनरभ्युन्नीतभक्षणे इन्द्रस्याप्युपलक्षणाधिकरणम्॥ १२॥

---

५ अतिक्रा ] अतिक्रान्तः—अतिक्रान्तयागान्वयः। अनेन च भाष्यस्थं प्रस्थितपदं व्याख्यातं वेदितव्यम्।

## ०.०.१०१ पात्नीवतभक्षणे पूर्वदेवतानुपलक्षणाधिकरणम्

पूर्वापवादार्थमारम्भः। द्विदेवत्यानामैन्द्रवायवादीनां शेषा आदित्यस्थाल्यां निक्षिप्यन्ते। ततोऽपि पुनराग्रयणस्थाल्यामागच्छन्ति। ततश्च पात्नीवतग्रहणं श्रूयते 'उपांशुपात्रेण पात्नीवतमाग्रयणात्गृह्णाति' इति। तस्य हुतशेषे भक्ष्यमाणे पूर्ववदेवेन्द्रवायुपत्नीवत्पीतस्यैवमाद्युपलक्षणं कर्तव्यमिति पूर्वपक्षः॥ ३३॥ § 5765

नैतत्पूर्वेण सदृशम्। कुतः। § 5766

यस्य ग्रहणवेलायां संनिधिः सोऽपनीयते।
संहतेन हि संकल्पः कर्तव्यस्तत्र चोद्यते॥ § 5768

आग्रयणप्राप्तेषु हि द्विदेवत्येषु पत्नीवत्संकल्पश्चोद्यते। तत्र यद्यपि तावत्परकीय एवं संकल्पस्तथाऽपि प्रसङ्गसिद्धिरमिवार्या किमुत यदा सोऽपि संकल्पनीयः श्रुत एव। तथा हि। § 5769

योऽपैत्याग्रयणात्सोमः स पात्नीवत इष्यते।
शेषश्चैव ततोऽपैति तेन संकल्प्यते तदा॥ § 5771

792 यदा ह्याग्रयणं पात्नीवतं करोतीति श्रूयेत ततः संनिहितोऽप्यनाग्रयणत्वाच्छास्त्रवलेन शेषः कथंचित्संकल्पादपनीयेत। अत्र पुनः 'आग्रयणाद्गृह्णाति' इति श्रूयते। नाऽऽग्रयणस्याऽऽग्रयणमिति वा। तद्यथा वृक्षात्पर्णं पततीत्युक्ते कङ्ककुररादिपत्रमपि प्रतीयते। वृक्षस्यापादानमात्रोपक्षीणत्वात्। एवमिहाप्याग्रयणादपेतत्वं पत्नीवत्संबन्धकारणं नाऽऽग्रयणत्वम्। समानदेशयोश्च संपाताग्रयणयोर्य एवापैति स एवाऽऽग्रयणादपेत इति शक्यते वक्तुम्। तावच्चेह निमित्तम्। यत्तु तन्मिश्रादनाग्रयणादप्यपैति न तत्प्रतिषेधे विधौ वोपयुज्यते। न ह्यनाग्रयणादपेतो न पात्नीवत इति वचनमस्ति। यदि वाऽयमर्थः स्यात्ततो योऽप्याग्रयणस्ततोऽपैति सोऽप्याग्रयणानाग्रयणापेतत्वादपात्नीवतः प्राप्नोति। तस्मादाग्रयणादेवेत्यस्याशक्यत्वादप्रमाणकत्वाच्चावश्यमेवमाश्रयितव्यम्। आग्रयणात्तावदपेत इति। तच्च संपातस्याप्यविशिष्टमित्युपपन्नं देवतासंबन्धित्वम्। न च पूर्वदेवतार्थत्वमनपनीयोत्तरसंबन्धोऽवकल्पत इत्युपपन्नं पूर्णकभोजनवदनुपलक्षणम्। **ननु योऽसौ पूर्वदेवतार्थस्तस्यैवायमवयव** इति—भूतपूर्वगत्यभिप्रायम्। आचार्यस्तु स्वयमेवैनमभ्युपगमयामीति मन्वानः परिहसति तावत्। **न हि हुतस्यावयवो दृश्यत इति**। न हि हुतादन्यत्तस्या देवताया विद्यते तस्यापनीतत्वादित्यभिप्रायः। परस्त्वव्युत्पन्नाभिप्राय आह—**ननु प्रकृतावपीति**। संकल्पवेलायां तत्र देवताव्यपदेश इत्युत्तरम्। इतर आह—अत्राप्येवमेवाऽऽसीदिति। सिद्धान्तवादी वदति। एतदेव

४ माद्यु] वाय्विन्द्रवायुमित्रावरुणाश्विपत्नीवत्पीतस्येत्येवमूहप्रकार आदिशब्देन सूचितः।
१४ संपा] संपातः—द्विदेवत्यशेषः।

प्रकृतिविलक्षणमिति। न चापनीतस्य तत्रोपलक्षणं कृतम्। इह तु स्फुटम- 793
पनीतत्वमुक्तम्। तस्मात्पत्नीवानेवोपलक्षणीय इति सिद्धम्॥ ३४॥ § 5772

इति पात्नीवतभक्षणे पूर्वदेवतानुपलक्षणाधिकरणम्॥ १३॥

## ०.०.१०२ पात्नीवतभक्षणे त्वष्टुरनुपलक्षणाधिकरणम्

तस्मिन्नेव पात्नीवते पत्नीवता सह पातृत्वनिर्देशान्मान्त्रवर्णिकं त्वष्टुर्देवतात्वमिति पूर्वपक्षः॥ ३५॥ § 5774

नैवोपलक्षयितव्यस्त्वष्टा। कुतः। § 5775

मन्त्रचोदकयोस्तावदतुल्यत्वं बलाबले।
पातृत्वेनाप्यतुल्यत्वं सह मात्राऽभिधानतः॥ § 5777

विधौ हि केवलः पत्नीवान्देवता नान्यसहितः। तद्धितेनासौ चोद्यते। न च तद्धितोऽन्यसापेक्षादुत्पद्यते। तेनापि मान्त्रवर्णिकी दुर्बला। न च मन्त्रवर्णस्य तद्देवतात्वकल्पनया विना कर्मानङ्गत्वम्। पत्नीवदभिधानेन तत्सिद्धेः। न च त्वष्टुरभिधानमन्यथा नोपपद्यते। स्तुत्यर्थमात्रत्वेनोपपद्यमानत्वात्। अत एव च
मन्त्रार्थो भवति यस्त्वं त्वष्ट्रा सहितः स सोमं पिबेति। इतरथा पातृत्वेनैव 794
तावत्कीदृशं देवताभिधानं, देवताया उद्देशमात्रोपकारित्वात्। किं पुनर्यदा तत्रापि साहित्यमात्रश्रवणात्केवलमुत्प्रेक्षा। न चासावैकान्तिकी। विनाऽपि कार्ययोगित्वेन सहशब्दप्रयोगात्। तद्यथा। सहैव दशभिः पुत्रैर्भारं वहति गर्दभी। तत्र ह्येतावानेवार्थो विज्ञायते सत्स्वपि दशसु पुत्रेषु सैव वहतीति। तस्मान्न त्वष्टुर्देवतात्वमवगम्यते। अतो नोपलक्षयितव्यः॥ ३६॥ § 5778

इति पात्नीवतभक्षणे त्वष्टुरनुपलक्षणाधिकरणम्॥ १४॥

## ०.०.१०३ पात्नीवतभक्षणे त्रयस्त्रिंशतोऽनुपलक्षणाधिकरणम्

अधिकरणातिदेशोऽयम्। एतावता तु विशेषेणातुल्यत्वाशङ्का। येन य एवासावग्निर्देवताभूतः स एवात्र त्रयस्त्रिंशद्देवेषु भोक्तृषु परिवेष्टृत्वेन विनियुज्यत। तेन मन्त्रवर्णात्तेषामेव प्राधान्येन देवतात्वं विज्ञायते। गुणभूतोऽग्निः। पूर्वत्र च सहत्वमात्राभिधानादतुल्यत्वेन त्वष्टा निराकृतः। तदिह विपरीतमतुल्यत्वम्। पत्नीवत्त्वगुणमात्रदेवतात्वप्रतिपादनमात्रार्था च त-

५ त्नीव ] पत्नीवत्त्वस्य देवतागुणमात्रतया दवतात्वप्रतिपादनमात्रार्था तद्धितयुक्ता चोदना 'पात्नीवतं गृह्णाति' इतीत्यर्थः।

द्धितचोदना। सा यथा ‘अग्ना इ पत्नीवाः’ इति मन्त्रवर्णात्प्राप्नुवताऽग्निना
795 गुणिना न विरुध्यते। एवं त्रयस्त्रिंशताऽपि देवैः। अविशिष्टो हि तेषामपि मन्त्रवर्णः ‘पत्नीवतस्त्रिंशतं त्रींश्च देवान्’ इति। न च चोदनया देवतान्तरं प्रतिषिद्धम्। येन मन्त्रवर्णगम्यं नेष्यते। न च मात्रवर्णिक्यां चोदितापरित्यागेन गृह्यमाणायां कश्चिद्विरोधः। न च प्रमाणान्तरगम्यायां तद्धितस्य सापेक्षत्वम्। यदि स एव त्रिंशदपेक्षं पत्नीवन्तं विदध्यात्ततः सापेक्षदोषं प्रतिपद्येत। मन्त्रस्य तु सापेक्षमपि वदतो नैव कश्चिद्विरोधः। समुच्चयाश्रयणाच्चाविरोधित्वम्। कथं तुल्यार्थयोः समुच्चय इति चेत्। न स्यात्समुच्चयः। यदि मन्त्रेणोभयपरामर्शो न क्रियते। स तु चोदनावगतमग्निमपरित्यजन्नेव परिवेष्टृत्वेन न सिद्धं देवतात्वमभिदधत्त्रयस्त्रिंशतो देवतात्वमाह। तस्मात्समुच्चये सति सर्वेषामुपलक्षणम्। तन्मन्त्रव्याख्यानेन दर्शयति—याज्यामभिदधदेवं ह्यग्नेरग्नीदध्येषणं करोति। सन्मानपूर्वको नियोगोऽध्येषणम्। तदेवं क्रियते आयाहीति। छन्दसि ‘व्यवहिताश्च’ इति व्यवहितस्याऽऽङः प्रयोग ऐभिरिति। उपरि वक्ष्यमाणत्रयस्त्रिंशता देवैः सहैकरथारूढोऽश्वविभवाद्वा नानारथारूढः। ततश्चार्वागागत्य तांश्च पत्नीबतस्त्रिंशतं देवान्, ‘अनुष्वधं-स्वधां-अन्नं सोमाख्यमनु, आवह। ततश्च मादय—संतर्पयेत्यर्थः। तेन स्फुटमेषां भोक्तृत्वमित्येवं प्राप्ते ब्रूमः। त्रयस्त्रिंशतो नोपलक्षणीया इति। कुतः। § 5780

चोदितार्थानुरोधेन मन्त्रः सर्वः प्रवर्तते।
तेन त्वष्टृवदेवात्र त्रिंशताऽग्नेरभिष्टुतिः॥ § 5782

पात्नीवतचोदनार्थस्मरणहेतुना मन्त्रेण न शक्यमचोदितमग्नेः परिवेष्टृत्वमितरेषां च मोक्तृत्वं प्रकाशयितुम्। अतो मन्त्रस्य परार्थत्वान्न चोदनामतिक्रम्य स्वातन्त्र्येण त्रयस्त्रिंशत्प्रकाशनसामर्थ्यमवकल्पते। विधानसामर्थ्यं तु दूर-
796 भ्रष्टमेव। न च त्रिंशतो देवतात्वमेव स्मारयति चोदिताग्न्यैश्वर्यप्रकाशनपरत्वेन त्रयस्त्रिंशत्प्रकीर्तनात्। कथम्। § 5783

अप्रसिद्धेश्वरत्वस्य दातृत्वं यस्य कीर्त्यते।
तदसंभाव्य मुख्यार्थं ऐश्वर्यार्थं प्रतीयते॥ § 5785

यदि ह्यप्रत्तावस्थमेव द्रव्यं त्वं देहीति मुख्यमेवोच्यते, ततः प्रतारणमेव स्यात्। अथ तु त्वमेवात्र दाता स्वामी न वयं स्वामिन इत्येतत्परं भवति। यथा लोके कश्चिदुच्यत किं त्वयि भवति निमन्त्रिते त्वयैवान्ये निमन्त्रणीया इति। ततो वाक्यं संबद्धं भवति। चोदितकरणाच्च दृष्टार्थं भवति। मादयस्वेत्यपि मुख्यस्य मदस्यासंभवादेतेभ्य इत्येतल्लक्षयति। दातृत्वमप्यग्नेर्दृष्टार्थ-

१३ व्य] ( पा° सू° १-४-८२ )
१५ सोमाख्य] अनु—उपलक्षणीकृत्य।
२५ अ] अप्रसिद्धेतिकारिकाया अयमर्थः—यस्यान्यतोऽप्रसिद्धेश्वरत्वस्याग्नेर्दातृत्वं कीर्त्यते तस्यैश्वर्यार्थं तद्दातृत्वं कीर्तितं प्रतीयते। न हि तस्ये दातृत्वकीर्तनस्य मुख्यो दातृत्वरूपोऽर्थः संभावनार्ह इति नवर्णमध्याहृत्य ज्ञेयः।
३१ म] मदस्यासंभवादिति—शब्दरूपत्वाद्देवताया विग्रहादिपञ्चकाभावादिति शेषः।

मेवेति संप्रदानलक्षणार्थं विज्ञायते। विस्पष्टं च तद्धितेन यदन्यनिरपेक्षमवगतं
तन्मन्त्रानुरोधेन बाधितं न स्यात्। कथं पुनः पात्नीवतमिति चोदितेऽग्निर्देव-
ताऽवगम्यते न पुनस्त्रयस्त्रिंशद्देवता स्यात्। अत आह—**पत्नीवांश्चा ग्निरिह** 797
गृह्यते, न त्रयस्त्रिंशत्, **अग्ने पत्नीवन्निति** सामानाधिकरण्यदर्शनात्। ननु
त्रिंशताऽपि सह सामानाधि**करण्य**मस्ति 'पत्नीवतस्त्रिंशतम्' इति। सत्य-
मस्ति। तथाऽप्यत्राग्निः पत्नीवान्गृह्यते। तद्धितनिर्देशेन हि प्रातिपदिकार्थस्य
संख्याविशेषाभिव्यक्तिर्भवति। तत्र प्रातिपदिकार्थानन्यथासंभवादेकवचनान्तेन
विग्रहो भवति। पत्नीवान्देवताऽस्येति। त्रिंशच्च नित्यं बहुवचनान्तः। तस्मान्न
तेभ्यस्तद्धित इति देवतात्वाभाव इति॥ ३७॥ § 5786

इति पात्नीवतभक्षणे त्रयस्त्रिंशतोऽनुपलक्षणाधिकरणम्॥ १५॥

## ०.०.१०४ अनुवषट्कारदेवतानुपलक्षणाधिकरणम्

अनुवषट्कारदेवतायाश्चोदनया मन्त्रवर्णेन च देवतात्वमैकान्तिकम्। त-
स्मादुपलक्षणीया इति। एवं प्राप्तेऽभिधीयते। § 5788

यथा पश्चात्तनः पाता पूर्वपात्रुपलक्षणम्।
अप्राकृतं न कुर्वीत तथैनामपि देवताम्॥ § 5790

न ह्येषा प्रकृतावुपलक्षिता। न चेह प्राकृतकार्यापन्ना। तस्मान्नोपलक्ष-
यितव्येति॥ ३८॥ § 5791

इति अनुवषट्कारदेवतानुपलक्षणाधिकरणम्॥ १६॥

## ०.०.१०५ इन्द्रपीताधिकरणोक्तद्वितीयोहपूर्वपक्षनिराकरणम्

स्थितादुत्तरम्। न यथादेवतमूहः। किं तर्हि। अनैन्द्राणाममन्त्रकमेवेति। 798
कुतः। § 5793

तुल्यप्रकरणा ह्येषा ज्योतिष्टोमक्रियेष्यते।

---

७ प्रा] प्रातिपदिकार्थानन्यथेति। अयमाश-
यः—निःसंख्यप्रतिपदिकार्थायोगात्संख्यायां
कल्प्यमानायां
नियतक्रमत्वात्संख्यानामेकादिक्रमेण
कल्प्यत्वादेकत्वकल्पनेनानुपपत्तौ परिहृतायां
द्वित्वादिकल्पने प्रमाणाभाव इति।

१ स्थि] इन्द्रपीताधिकरणपूर्वपक्षप्रयोजन-
स्यानैन्द्रसोभक्षणानाममन्त्रकत्वस्य 'यथादेवतं
चं' इति सूत्रेण कृतमाक्षेपमपेक्ष्येत्यर्थः।

प्रकृतिर्विकृतिश्चेष्टा न चाऽऽत्मैवाऽऽत्मनः क्वचित्॥§ 5795

यदि ह्यभ्यासाः पृथक्कर्माणि भवेयुस्ततः प्रकृतिविकारभावः स्यात्। न त्वेवमस्ति। न चैषां सोमो धर्मा वा केनचिद्विहिताः। येन तु प्रकारेणैको गृह्णाति तेन सर्वे। यथा वक्ष्यति ‘तद्वत्सवनान्तरे ग्रहाम्नानम्’ इति। न च मन्त्रवशेनैन्द्रविषयता सोमस्य। प्रत्यक्षता श्रुत्या सर्वविषयत्वबोधात्। न च यथाऽनारभ्यवादेनाऽऽहवनीयः सर्वहोमार्थ इति तद्रहितकर्मान्तराभावादाहिताग्नेरधिकारः, एवमिह मन्त्रः सर्वसोमार्थः। प्रकरणपठितः सामर्थ्यादिन्द्रार्थं प्रकाशयिष्यति। अन्यस्तु तेनाप्रकाशित एव ग्रहीष्यते मास्यते वा। अथवा विवेकाभावात्सर्वस्मिन्नेव गृह्यमाणे संकल्पमात्रेण व्यवस्थास्यते। अथवा सुब्रह्मण्यावन्मुख्यतयेन्द्रप्रकाशनार्थो भवति। तत्प्रभृतये देवतासमुदायायेत्यर्थः। अथवा विधिशब्दे वसुमत्त्वस्याभावात्तद्गुणप्रकाशनं व्यर्थमिति वसुमत्त्वेनेतरदेवतासहितायेत्येतदभिधीयते। तस्मात्सर्वत्र समानविधानः सोमः। ततश्च विकारत्वाभावः। यत्त्वनुष्टुप्छन्दसो विनाम—
799 विधानाद्विकृतित्वमिति तत्समानविधानत्वेऽपि तृतीयसवनत्वाज्जगच्छन्दस्त्वे प्राप्ते विशिष्टविधानत्वेनोपपत्स्यते। अथवा संस्थानां विकारत्वादुपपन्न एवात्रोह इत्यदर्शनमेव। तस्मादैन्द्रेष्वेव भक्षणमन्त्रो मानग्रहणवच्च न तद्वशेन भक्षनियम इत्यन्येषाममन्त्रकं भक्षणम्॥ ३९॥ § 5796

इति इन्द्रपीताधिकरणोक्तद्वितीयोहपूर्वपक्षनिराकरणम्॥

## ०.०.१०६ ऐन्द्राग्नभक्षस्यामन्त्रकत्वाधिकरणम्

अथ यत्रान्यसहित इन्द्रो देवता तत्र किमिन्द्रपीतव्यपदेशोऽस्ति नेति संदेहेऽस्तीति ब्रूमः। कुतः। § 5798

न देवतात्वमिन्द्रस्य तत्पीतत्वेन कथ्यते।
तेन नाऽऽग्नेयतुल्यत्वमसामर्थ्यादिहेष्यते॥§ 5800

आग्नेये हि यजमानसंकल्पो विशेषणत्वेन संकीर्त्यते। स च तद्धितेनान्यनिरपेक्षाग्निविषय उपात्त इति सापेक्षं न प्रतिपादयति। अत्र पुनरिन्द्रपीत इति संप्रदानव्यापारो विशेषणम्। स चोभयोरपि संकल्प्यमानयोः प्रत्येकं केनचिदंशेन विद्यते। यस्य च यावान्व्यापारः स तेन पातेत्युपलक्ष्यते।

४ त्स] ( अ॰ ३ पा॰ ६ अ॰ ९ सू॰ ३०)

१३ नु] ‘यल्लिङ्गमुक्तम्, इति भाष्यमसंबन्धिपदव्यवायात्तत उत्कृष्याधुना व्याकरोति-यत्त्वित्यादिना। जगतीच्छन्दस इति पदस्थानेऽनुष्टुच्छन्दस इति पदप्रक्षेप कार्य इत्यर्थः।

तेनैन्द्राग्नस्येन्द्राग्निभ्यां पिबद्भ्यामर्धमिन्द्रपीतमर्द्धमग्निपीतमिति शक्यं वदितुम्। न च वर्तमानस्य साक्षादिन्द्रपीतत्वमिति हुतावयवद्वारेण व्यपदेशः। न च तस्येयत्तानियमोऽस्ति, एतावता पीतेन व्यपदेष्टव्य इति। तस्माद्विशेषणोपपत्तेर्मन्त्रवद्भक्षणमिति॥ ४०॥ § 5801

सत्यं यदि देवताव्यापारः पातृत्वमिह विशेषणं स्यात्तत ऐन्द्राग्नोऽपि 800
गृह्येत। न त्वस्माकं देवता पिबति। किं तर्हि। संकल्पविषयत्वेनैवोपयुज्यते। न च मिश्रसंकल्पेऽन्यतरव्यपदेशः संभवति। तद्धितवत्समासस्य सापेक्षेष्वप्रवृत्तेः। तस्मादाग्नेयचतुर्धाकरणवदेव केवलेन्द्रदेवत्यविषयत्वान्नैव व्यपदेश उभयदेवत्यः संभवतीति मन्त्रनिवृत्तिः। अनेनैव च विशेषेणास्यापुनरुक्तत्वम्। यत्पूर्वपक्षवादी न देवतात्वमिह विशेषणं, किं तर्हि, संप्रदानगतं पातृत्वं, तच्च प्रत्येकमप्यस्तीति मन्यते। सिद्धान्तवादी तु मुख्यपातृत्वासंभवाद्देवतात्वमेवानेन लक्ष्यत इत्यापादयति। यद्यपि च मुख्यं पातृत्वं देवतायां भवेत्तथाऽपि द्रव्यस्य तत्पीतत्वमशक्यं वक्तुम्। कथम्। § 5802

यो हि तावद्धुतः सोमः स नैवमभिधीयते।
न च तस्येन्द्रपीतत्वादहुतस्येन्द्रपीतता॥ § 5804

चमसस्थो हीन्द्रपीतत्वेन व्यपदिश्यते। न चासाविन्द्रपीतः हुतविषयत्वादिन्द्रपीतव्यपदेशस्य। तस्मादवश्यविद्यमानधर्माभिधानादिन्द्राय संकल्पित इन्द्रपीतः प्रत्येतव्यः। ततश्चाऽऽपन्नं देवतात्वमेवोपलक्षणमिति। न च हुतसोमगतं पीतत्वं तत्रोपचरितुं शक्यम्। आत्मधर्मेणैव संकल्पेनाभिधानोपपत्तेः। एकदेशेऽपि हि हूयमाने सर्वमिदं द्रव्यं देवतोद्देशेन त्यज्यमानं यागं साधयति। अतोऽसौ निर्वपतेरिव यजिरेवात्र पिबतेरर्थः। तेनैन्द्रयागसाधनादिन्द्रपीतप्रत्ययसामर्थ्यान्मन्त्रनिवृत्तिः॥ ४१॥ § 5805

इति ऐन्द्राग्नभक्षस्यामन्त्रकत्वाधिकरणम्॥ १७॥

## ०.०.१०७ गायत्रच्छन्दस इत्यादेर्नानाछन्दस्के विनियोगाधिकरणम्

१ तेनैन्द्रा] 'यस्य ह्यवयवान्तरम्' इति भाष्यं पूर्वभाष्येणासंबद्धत्वादुत्कृष्य व्याख्येयतां मत्वा कथमुभाभ्यां पेये, एकस्य पातृतेतिशङ्कानिरासार्थतया 'तस्येन्द्राग्निभ्याम्' इति भाष्यं तावदादौ व्याचष्टे—तेनैद्राग्नस्येत्यादिना।

२ च] हुतविषयत्वात्पीतत्वव्यपदेशस्य केवलेन्द्रदेवत्येऽपि हुतशेषस्य नेन्द्रपीतत्वमिति शङ्कानिरसार्थं 'यस्य हीति' पूर्वमुपेक्षितं भाष्यमधुना व्याचष्टे-न च वर्तमानस्येत्यादिना।

801 इदमपवादाधिकरणम्। तत्र पूर्ववदेव तावत्सापेक्षमायत्रच्छन्दःसाधनके समासाभावाद्गायत्रच्छन्दस्त्वानुपपत्तेर्यत्र केवला गायत्र्युपयुक्ता स एव मन्त्रेणाभिधातव्यो नान्य इति प्राप्तेऽभिधीयते॥ ४२॥ § 5807

यत्र नामोपपद्येत निरपेक्षं विशेषणम्।
सापेक्षस्याग्रहस्तत्र न तु यत्रापि नास्ति तत्॥ § 5809

उक्तं ह्येतच्चतुर्धाकरणेऽपि। यदि केवलाग्निदेवत्यः प्रकरणे न स्यात्ततः सापेक्षदेवत्योऽपि गृह्येतेति। तदिह केवलेन्द्रदेवत्यसद्भावादिन्द्रपीतत्वं सापेक्षेन्द्रदेवत्यान्निवृत्तं न तु केवलगायत्रच्छन्दस्त्वं कस्यचिदस्ति। त्रयाणामपि वेदानां क्वचित्साधनांश छन्दोन्तराणामवश्यंभावित्वात्। अतो रथंतरसामत्वमिव नानाछन्दस्कास्वेव गायत्रच्छन्दस्त्वम्। अत एव नित्यसापेक्षेषु नैतद्भविष्यति सापेक्षमसमर्थमिति। तस्मान्नानाछन्दस्केऽपि मन्त्र इति सिद्धम्॥ ४३॥ § 5810

इति गायत्रच्छन्दस इत्यादेर्नानाछन्दस्के विनियोगाधिकरणम्॥ १८॥

## ०.०.१०८ इन्द्रपीताधिकरणम्

स्थितादुत्तरम्। अनिन्द्रपीतेष्वप्यविकृत एव मन्त्रः प्रयोक्तव्यो नामन्त्रकं भक्षणम्। कुतः। § 5812

802 इन्द्रेण यस्मिन्सवने पीतः सोमो निरूप्यते।
तस्य योऽन्योऽपि संबन्धी स एवं व्यपदिश्यते॥ § 5814

नैवमभिसंबन्धः इन्द्रपीतस्य सोमस्येति। किं तर्हि। इन्द्रपीतस्य प्रातःसवनस्य यः संबन्धीति। न च प्रातःसवनशब्दः सोमसमानाधिकरणः, क्रतुभागवचनत्वात्। तद्गतसोमवाचित्वे च प्रातःसवनीयस्येति प्रसङ्गात्। अतः सवनस्येन्द्रपीतस्येति च समानाधिकरणे सोमसंबन्धव्यतिरेकजनिते षष्ठ्यौ। सोमस्येति तु व्यधिकरणा सोमविषयाऽवयवव्यतिरेकनिमित्ता षष्ठी। तेन पदान्तरसामर्थ्यात्संयोगप्रकरणाविशेषाच्च प्रयोक्तव्य एव एष मन्त्रः। कस्मादेवं गृह्यत इति चेत्। *सोमे भाक्तत्वप्रसङ्गात्। पूर्वसंकल्पितो हि समुदाय इन्द्रपीतो मुख्यस्तस्य चायमवयव उपचारादेवमभिधीयते। न चैत-

३ उ] गृह्यत इति—इद्रपीतशब्दः सवनपरतयेति शेषः।
११ गृ] प्रायश्चित्ताम्नानादिति—'वि वा एष इन्द्रियेण वीर्येणर्ध्यते यः सोमं वमिति। तस्मात्सोमेन्द्रं चरुं निर्वपेत्सोमवामिनः' इत्यादिनेति शेषः।
११ *] सोम इति—इन्द्रपीतशब्देनाभिधीयमान इत्यर्थः। अनेन च 'भक्त्या ह्यपीतः' इति भाष्यं व्याख्यातं वेदितव्यम्।

द्युक्तम्। तस्मात्सर्वसोमानामिन्द्रपीतसवनसंबधित्वान्मन्त्रवद्भक्षणमिति सिद्ध- मिति॥ ४४॥ § 5815

इति इन्द्रपीताधिकरणम्॥ १९॥

इति श्रीभट्टकुमारिलविरचिते मीमांसाभाष्यव्याख्याने तन्त्रवार्तिके
तृतीयाध्यायस्य द्वितीयः पादः।

## ०.०.१०९ वेदोपक्रमाधिकरणम्

एवं लिङ्गविनियोगमुपवर्ण्य संप्रति वाक्यविनियोगः प्रस्तूयते। तत्रोदाह- 803
रणम्। 'उच्चैर्ऋचा क्रियते' इत्यादि वाक्यम्। 'तद्यदि ऋक्त उल्बणं क्रियते गार्हपत्यं परेत्य भूः स्वाहेति जुहुयात्' 'यदि यजुष्टो यदि सामतः' इत्यादि च। तत्र किमृग्यजुःसामशब्दैरुच्चैस्त्वोपांशुत्वधर्मविधौ महाव्याहृत्यग्नित्रयसंब- द्धहोमविधौ च पूर्वोत्तरपदसंबन्धनिरपेक्षाभिधानश्रुतिवशेन 'तेषामृग्यत्रार्थ- वशेन पादव्यवस्था' इत्येवंलक्षणानामृगादिजातानां ग्रहणमुत समस्तम- न्त्रब्राह्मणात्मकानां वेदानामिति। कुतः संशयः। एकवाक्योपक्रमोपसंहार- श्रुत्योर्विप्रतिपत्तेः। उपक्रमे हि वेदाः श्रूयन्ते। उपसंहारे तु ऋगादिजातानि। तत्र यदि वोपक्रमस्थवेदपदमवयवभूतजातलक्षणार्थम्। अथवोपसंहारस्थ- मृगादिजातं सब्राह्मणकसमुदायलक्षणार्थमिति समञ्जसासमञ्जसयोः संदेहः। स च 'अक्ताः शर्कराः' इतिवदाक्षेपपरिहाराभ्यां समर्थनीयः। एवं तर्हि तेनैव गतत्वान्नैतदारब्धव्यम्। नायमुपालम्भः। संदिग्धेषु हि वाक्यशेषस्य तत्र प्रामाण्यमुक्तम्। इह पुनर्विध्युद्देशवर्तिनामृगादिशब्दानां निःसंदिग्धमन्त्रभेद- जातवचनत्वादसंदिग्ध एव विध्युद्देशः। तेन व्यवधारणकल्पनयाऽन्यतरप- क्षावधारणं कार्यमित्यारभ्यते। किं प्राप्तम्। तदीयपूर्वपक्षन्यायेनैव विध्युद्देश- श्रुतिबलीयस्त्वाज्जाताधिकार इति। किं च। § 5818

यथा च द्रव्यसामान्यं क्रिया वा न विरुध्यते।
विशेषैर्वाक्यशेषस्थैर्नैवं वेदैर्ऋगादयः॥§ 5820

न कथंचिदृगादिशब्देन ब्राह्मणं वक्तुं शक्यम्। शक्नोति तु वेदशब्द एक- देशेऽपि वर्तितुं, समुदायशब्दानामेकदेशेष्वप्युपलब्धेः, यथा ग्राम आयात

५ पूर्वोत्त]
पूर्वोत्तरपदेति—उपक्रमोपसंहारस्थपदेत्यर्थः।
५ तेषामृ] ( अ० २ पा० १ अ० १० सू० ३५ )

१२ तेनैव]
तेनैवेति—अक्ताधिकरणेनैवेत्यर्थः।

इति। तथा चाध्येतारस्तत्रैव सुतरां प्रयुञ्जते वेदमधीमहे वेदो वर्तत इति।
804 न च ब्राह्मणमधीयानास्तथा वदन्ति। किं च। § 5821

जातस्य हि व्यवस्थानाच्छक्यं धर्मावधारणम्।
संकीर्णत्वात्तु वेदानां भवेत्तद्धर्मसंकरः॥§ 5823

ऋचो हि ता एव काश्चित्त्रिष्वपि वेदेषु पठ्यन्ते। तथा यजूंषि। तत्र यदि वेदत्वं धर्मसंबन्धहेतुतस्तादृशेषु न ज्ञायते को धर्मः क्रियतामित्यन्याय्यो वा विकल्प आश्रीयते। वेदान्तरव्यपदेशस्य तुल्यबलत्वात्। जातिपक्षे तु नैष दोषः। न ह्येकस्मिन्वर्णसमूहे जातिद्वयं समवेतम्। ज्योतिष्टोमप्रकरणं चैवमनुग्रहीष्यते। अन्यथा वेदस्य समस्तेष्टिपश्वेकाहाहीनसत्रविषयत्वाद्याव-द्वेदानुसारी धर्मः प्रकरणमुल्लङ्घ्य सार्वत्रिकः स्यात्। ननु जाताधिकारेऽपि वेदवज्जातस्य प्रकरणान्तरेष्वपि भावात्तुल्यमेतत्। अथ प्रकृतजातातिक्रम-कारणाभावादिह व्यवस्था, सा वेदपक्षेऽप्यविशिष्टा। यावत्प्रकरणे वेद इत्य-वधारणात्। नैतत्तुल्यम्। कुतः। § 5824

प्रतिसंघातवर्तित्वाज्जातं प्रकरणेऽस्ति नः।
वेदो महासमूहत्वात्प्रकृतौ न समाप्यते॥§ 5826

सर्वर्गादिसमूहेषु जातं व्यासङ्गि चेद्भवेत्।
प्रकृतौ न समाप्येत ततस्तदपि वेदवत्॥§ 5828

मन्त्रब्राह्मणतर्काणां समूहे काठकादिके।
वेदत्वं वर्तते नित्यमनेकक्रतुगामिनि॥§ 5830

समूहास्त्वेकवाक्यानां ये पादपदपर्वणाम्।
ऋग्यजुःसामजातानि प्रत्येकं तेषु सन्ति नः।§ 5832

यथा वनादिसंघाताः प्राक्सामान्यसमन्विताः।
805 तथर्गादिसमूहानां सामान्यं जातमुच्यते॥§ 5834

जातिरेव तु यज्जातं भाष्यकारेण वर्णितम्।

---

२ किं] अपि चेत्यादि भाष्यं व्याचष्टे—किं चेत्यादिना।
१८ न्त्र]
मन्त्रब्राह्मणेत्यादिश्लोकद्वयस्यायमर्थः—‘विधिर्विधेयं तर्कश्च वेदः’ इति कातीयानां विधिशब्दोक्तस्य ब्राह्मणस्य विधेयशब्दोक्तानां मन्त्राणां तर्कपदोक्तस्य ‘यतो वा इमानि भूतानि जायन्ते’ इत्याद्युपनिषद्भागस्य च वेदत्वस्मृतेस्तत्समूहे काठकाद्याख्ये क्रतुविषये वेदत्वं व्यासज्य वतते। पादसमूहे एकवाक्यभूतमृग्जातं, पदसमूहे यजुर्जातम-वच्छेदरूपभक्त्यवयवात्मकपर्वसमूहे सामजातं च पर्याप्य वर्तत इति।

व्याख्यातृभिश्च तन्नैवमृगादौ जात्यसंभवात्॥§ 5836

द्विवर्णे च पदे जातिर्गोशब्दत्वं न कल्पितम्।
वाक्यत्ववत्कथं नु स्युर्ऋग्यजुः सामजातयः॥§ 5838

यथैव हि वाक्यत्वं नाम जातिर्भिन्नस्थानकरणप्रपन्नाभिव्यङ्ग्यक्रमवद्वर्णात्मकपदसमूहेऽन्त्यवर्णे वा विलक्षणावयवपदार्थसंबन्धप्रत्ययाकाङ्क्षाव्यवधानाद्भ्रमणत्वादिन्यायेन कल्पयितुं तद्भूताधिकरणे नाध्यवसितम्। तथैवर्क्त्वयजुष्ट्वसामत्वानि क्रमवद्वर्णस्वराश्रयाणि न शक्यानि कल्पयितुम्। § 5839

किं त्वेकार्थसमूहस्थमृग्यजुः सामसंज्ञितम्।
जातं समूहसामान्यं न जातिर्नाम काचन॥§ 5841

यौगिकानां यथा जातेरन्यत्सामान्यमिष्यते।
तथा समूहसामान्यं जातं जातिविलक्षणम्॥§ 5843

लोकेऽपि चैषैव जातिजातशब्दार्थप्रसिद्धिरित्येवमेव व्याख्येयम्॥ १॥
§ 5844

**किमिदं प्रायदर्शनादिति**—नेदमन्यैः प्रायदर्शनैस्तुल्यमिति पश्यन्पृच्छति। 'प्रायवचनाच्च' इत्यत्र हि प्रधानप्राये यत्रान्यानि प्रधानानि तत्र वचनादित्युक्तम्। तथा 'विशये प्रायदर्शनात्' इति संस्कारप्राये यत्रान्ये संस्कारा गोदोहनादयस्तत्रास्य दर्शनमिति। न त्विह यत्रान्ये वेदास्तत्रैषामृगादीनां दर्शनमित्यपि शक्यं वक्तुम्। न ह्येतद्व्यतिरिक्ता वेदाः सन्ति, येषां मध्यपाते संकीर्त्येरन्। अतो नेह प्रायदर्शनमस्तीति। तत्रोत्तरमाह—**वेदप्राये वेदोप-**
**क्रमे**—वेदबुद्धिजनितसंस्कारव्याप्ते मनसि, इमे **शब्दाः श्रूयन्ते**। तद्दर्शय- 806
ति—**प्रजापतिर्वा इदमेकं आसीत्**। यत्तु विध्युद्देशबलीयस्त्वादर्थवादपदस्थो वेदशब्दोऽवयवविषयो भविष्यतीति। तत्र ब्रूमः। § 5845

विध्यर्थवादसंबद्धमन्यदेव बलाबलम्।
मुख्यपश्चात्तनत्वेन ज्ञानानामन्यदेव तत्॥§ 5847

ये हि विध्युद्देशात्परस्तादर्थवादाः श्रूयन्ते तेषामस्ति दौर्बल्यम्। ये पुरस्ताच्छ्रूयन्ते ते मुख्यत्वाद्बलीयांसो भवन्ति। सर्वस्यैव हि शब्दस्य स्वार्थातिल-

२ द्वि] विच्छिन्नयत्नव्यङ्ग्यैश्च नित्यैः सर्वगतैरपि व्यतिरिक्तपदारम्भो वर्णैर्नात्रोपपद्यते॥ अनारब्धे च गोशब्दे गोशब्दत्वं कथं भवेत्। इत्यादिना श्लोकवार्तिकोक्तगोशब्दत्वन्यायं प्रकृतेऽतिदिशतिद्विवर्णे चेत्यादिना।
६ त] ( अ० १ पा० १ अ० ७ ) इत्यत्रेति शेषः
२ प्राय] ( अ० २ पा० २ अ० ४ सू० १२ )
३ विश] ( अ० २ पा० ३ अ० ६ सू० १६ )
८ त्तु] 'कुत एतदिति' भाष्यमवतारयति—यत्त्वित्यादिना।

ङ्गने विरोधः कारणम्। स च प्रतियोगिनि दृष्टे विरोधो विज्ञायते। तदिह यदा ‘त्रयो वेदा असृज्यन्त। अग्नेर्ऋग्वेदः’ इत्यादि श्रूयते न तदा जातवचनानामृगादीनामुच्चारणमस्ति। यद्दर्शनेन वेदशब्दोऽवयवलक्षणार्थो भवेत्। अतस्तेन तावच्छ्रुतिवृत्तेनैव व्याप्ता बुद्धिः। अथेदानीमृगादिशब्दाः स्वार्थपराः सन्तो न संबध्यन्त इति बलाल्लक्षणां प्रतिपद्यन्त इति। तेन सत्यपि विध्युद्देशगतत्वे दौर्बल्यं ‘मुख्यं वा पूर्वचोदनाल्लोकवत्’ इत्येवमितरबलीयस्त्वात्। ननु ‘पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्’ इत्यनेनोत्पन्नमप्यर्थवादान्मुख्यवेदज्ञानं बाधित्वा विध्युद्देशज्ञानमेव गृह्येत। नैतदेवम्। § 5848

पौर्वापर्यबलीयस्त्वं तत्र नाम प्रतीयते।
अन्योन्यनिरपेक्षाणां यत्र जन्म धियां भवेत्॥ § 5850

ये हि भिन्नवाक्यगताः परस्परनिरपेक्षा विरोधिनोऽर्थाः श्रूयन्ते तेषां पूर्वस्योत्तरानुपमर्देनैव लब्धात्मकत्वादुत्तरस्य पूर्वोपमर्देन विनाऽऽत्मलाभानुपपत्तेः पौर्वापर्यबलीयस्त्वन्यायो भवति। यत्र त्वेकवाक्यतया परस्परापेक्षाणां श्रवणं न तत्रैतद्भवति। तत्र ह्याकाङ्क्षावशेनैकवाक्यता भवति। पूर्वप्रतीते चोत्तरमात्मानुगुणमधिकं वाऽकाङ्क्षति। अतश्च यदनधिकमननुगुणं वा तद-
807 नपेक्षितत्वान्नैव तस्मिन्वाक्येऽस्ति। न चाविद्यमानेन पूर्वबाधः शक्यत इति पूर्वबलीयस्त्वं भवति। तदिह विध्यर्थवादयोः समानविषयत्वाद्यावदेवार्थवादे वेदाः संकीर्त्तितास्तावदेव किमप्येषां विधास्यत इत्येतदवधृतम्। ततश्च किमेषां विधेयमित्येतावन्मात्रमपेक्षते। न तु कस्य किं विधास्यत इति। तेनोत्तरस्मादवयवादपेक्षितमात्रं गृह्यते। विधेयं चापेक्षितं न विधिविषय इत्युच्चैस्त्वादिमात्रं संबध्यते न त्वृगादयः। ततश्चाविवक्षितत्वान्नैवैषां विध्युद्देशेऽस्तित्वमिति नार्थवादं बाधन्ते। अर्थवादस्थ एव तु विध्युद्देशविषयत्वेनापि वेदोऽवधार्यते। तस्माद्वेदलक्षणार्थत्वमृगादीनाम्। वेदश्च व्यापकत्वादहेतुलक्षणयुक्तः सन्न शक्नोत्येवावयवं लक्षयितुम्। ऋगादयस्तु नियम्यत्वात्समुदायं लक्षयन्ति। यथा चान्यत्रार्थवादानामनुवादत्वाल्लक्षणावृत्तिरदोषस्तथाऽत्रार्थवादावगतविषये विधावृगादिशब्दानामनुवादकत्वाल्लक्षणायामप्यदोषः। तेनैषा वचनव्यक्तिः, यस्मादेवमेते वेदा जातास्तस्मादेषामुच्चैस्त्वादि कर्तव्यमिति वक्तव्ये तमेवार्थसिद्धमङ्गीकृत्य ऋगादय उच्चार्यन्ते। अन्यथा ह्यसंबद्धमेव स्यात्। विध्यर्थवादयोर्नानाविषयत्वात्। तस्माद्वेदाधिकार इति॥ २॥ § 5851

लक्षणाऽपि च या दृष्टपूर्वा तस्यामेव शीघ्रतरबुद्धिर्भवति। ऋगादयश्च वेदे दृष्टपूर्वाः। तद्दर्शयति—ऋग्भिः प्रातरिति। त्रिष्वेव तावत्पादेषु वेदशब्दसाह-

६ ग] ऋगादिशब्दानामिति शेषः।
६ वा] ( अ° १२ पा° २ अ° ८ सू° २५ )
७ पौर्वाप] ( अ° ६ पा° ५ अ° ११ सू° ५४ )
२३ त्वाद] अहेतुलक्षणयुक्तः—व्याप्यत्वरूपहेतुलक्षणशून्य इत्यर्थः।

चर्यादृक्शब्दस्य वेदविषयत्वं ज्ञातम्। चतुर्थे तु वेदैरशून्य इत्यवश्यमृक्शब्दः सब्राह्मणके वेदे प्रयुक्त इति गृह्यते। यस्त्वध्येतृणां वेदशब्दप्रयोगो मन्त्रेषु दृष्ट इति। सत्यमस्ति। अत्रापि लक्षणा तथाऽपि तु 'शास्त्रस्था वा तन्निमित्तत्वात्' इतीतरैव ज्यायसी॥ ३॥ § 5852

यदि च लौकिकेनापि प्रयोगेण कार्यं सोऽप्यस्ति वेद ऋगादीनाम्। क- 808
थम्। ऋग्यजुः सामानि तावत्त्रयीत्येव प्रसिद्धानि। ततश्च त्रयी विद्याऽस्येत्येवं त्रयीविद्यशब्दव्युत्पत्तिः। स च वेदत्रयाध्यायिनि प्रयुज्यते न जातत्रयविदि। छन्दोगेषु जातत्रयज्ञेष्वप्यप्रयोगात्। अतस्त्रयीविद्यशब्दे त्रयीशब्दो वेदेषु प्रयुक्त इति तत्समानाधिकरणानामृगादिशब्दानामपि तद्विषयत्वं विज्ञायते। तस्मादपि वेदेषु ऋगादिप्रसिद्धिः॥ ५॥ § 5853

अनुभाषणमेतत्॥ ६॥ § 5854

न पाठमात्रेण, वेदान्तरव्यपदेशो भवति। यद्येन वेदेन विधीयते तत्तेनैव प्रमाणेन क्रियत इत्युच्यते। ततश्च यस्यैव मन्त्रस्य यत्र विधानं स एव तेन
व्यपदेक्ष्यते। यदि तूभयत्र विधास्यते तत्रोभयत्र 'भूयस्त्वेनोभयश्रुति' इत्यादि 809
नास्ति तत्रागत्या विकल्पो ग्रहीष्यते॥ ७॥ § 5855

बाधेतेति वा पाठः॥ ८॥ § 5856

जातधर्मपक्षे 'ऋच्यध्यूढं साम गायति' इत्यृक्सामयोरवियोगादृग्धर्मेणैव सामधर्मसिद्धेर्वृथा पुनरुपदेशः। न हि कश्चित्सामाधारभूतामृचमुच्चैरुच्चारयन्सामान्यन्यथोच्चारयितुं समर्थः। वेदाधिकारे त्वन्यदृग्वेदेन विधीयते। अन्यच्च सामवेदेनेत्यर्थवदुपदेशद्वयम्। अनृक्प्रजापतिहृदयाद्यर्थमितरत्रापि भविष्यतीति चेत्। न। तस्य ज्योतिष्टोमाङ्गत्वात्। प्रकरणे ह्ययं स्तोत्रसाम्नामुपदेशः। न च तेषामनृक्काणां प्रयोगः। अल्पविषयत्वाच्च मन्दपरिहृतमेवाऽऽनर्थक्यम्। तस्मादपि वेदाधिकार इति सिद्धम्॥ ४॥ § 5857

इति वेदोपक्रमाधिकरणम्॥ १॥

## ०.०.११० गुणमुख्यव्यतिक्रमाधिकरणम्

इदानीं यत्र वेदान्तरीयस्य प्रधानस्य वेदान्तरीयमङ्गं भवति तत्राङ्गस्य वेदधर्मः कतमः कर्तव्य इति संदेहे प्राप्त्यात्मकत्वाद्व्यपदेशधर्माणां यस्य यत्र
समाम्नानं तदीयो धर्मः स्यादिति प्राप्तेऽभिधीयते। § 5859 810

३ शास्त्र] ( अ॰ १ पा॰ ३ अ॰ ४ सू॰ ९ )
१ य] 'धर्मोपदेशाच्च' इति सूत्रमसंबद्धपदव्यवायापत्त्या स्वस्थानादुत्कृष्य 'त्रयीविद्याख्या च तद्विदि' इति सूत्रं तावदादौ व्याचष्टे—यदि चेत्यादिना।
१ ध] 'लिङ्गाच्च' इति सूत्रानन्तरं पठितमपि 'धर्मोपदेशाच्च न हि द्रव्येण संबन्धः' इति सूत्रं पूर्वपक्षनिरासार्थतया संप्रति व्याख्यास्यति—जातधर्मपक्ष इत्यादिना।
२ देश] व्यपदेशधर्माणामिति—वेदव्यपदेशनिबन्धनकोच्चैस्त्वादिधर्माणां प्रत्यात्मनियतोत्पत्तिविधिविषयत्वादित्यर्थः।

गुणे स्वरूपतो धर्मः प्रधानद्वारतोऽपरः।
यत्र स्यात्तत्र विज्ञेयं गुणधर्मस्य बाधनम्॥ § 5861

अवश्यं कर्तव्येऽन्यतरधर्मातिक्रमे गुणधर्मोऽतिक्रमितव्यः। तथा हि—प्रधानमविगुणं कृतं भवति। तच्च गुणस्यापि कार्यम्। सोऽपि हि तदर्थमेव प्रवर्तते। यदि त्वात्मीयधर्मानुरोधेन प्रधानं विगुणं कुर्यात्ततोऽस्य यदर्थैव प्रवृत्तिस्तदेव हीयेत। तत्स्वरूपे सगुणे जाते यद्यप्यङ्गं विगुणमेव तथाऽपि तत्र गुणत्वस्याचिकीर्षितत्वान्न कश्चिद्विरोधः। तस्मादाधानस्य याजुर्वेदिकत्वात्तदङ्गभूतानां साम्नामुपांशुत्वं कर्तव्यमिति। ननु यावन्मात्रमाधानस्य यजुर्वेदविहितं तन्मात्रस्यैवोपांशुत्वमित्यवगमात्रैव सामगानस्य प्राप्नोति। प्रधानमात्रं चाङ्गान्तराणि च याजुर्वेदिकानि। तेन तेषां केवलमुपांशुत्वमिति। नैतदेवम्। वक्ष्यति हि—'अङ्गानि तु विधानत्वात्प्रधानेनोपदिश्येरन्' इति। तथा 'विधेस्त्वेकश्रुतित्वादपर्यायविधानात्' इति। तस्मात्प्रधानप्रयोगवचनपरिगृहीतत्वादन्यत्राप्युत्पन्नानामङ्गानां यत्रैव प्रधानं तत्रैव विधिः। अतश्च साङ्गस्यैव प्रधानस्य याजुर्वेदिकत्वादुपांशुत्वेनैव भवितव्यमिति। एवं तर्हि स्वयमेवाङ्गानां याजुर्वेदिकत्वादुपांशुत्वं न गुणप्रधानधर्मविरोधद्वारम्। यच्च सामगतमुपांशुत्वं तदङ्गवर्तित्वादुच्चैस्त्वेन तुल्यम्। नैतत्तत्र वर्तमानं प्रधानस्येति शक्यं वदितुम्। नापि तद्गते बाधिते प्रधानधर्मबाधः। न हि तदा प्रधानमुपांशु न कृतं स्यात्। अथ केनचित्प्रकारेणाङ्गधर्मोऽपि प्रधानस्याभिधीयते तत उच्चैस्त्वमपि प्रधानधर्म एव स्यादिति पुनस्तुल्यबलत्वम्। उच्यते। § 5862

उत्पत्तिविधिमालोच्य साम्नां वेदान्तरीयता।
साङ्गप्रधानसंबन्धादुपांशुत्वं तु गम्यते॥ § 5864

यदि हि यजुर्वेद एवैषामुत्पत्तिः स्यात्तत्स्वरूपनिमित्तमेवोपांशुत्वं स्यात्।
811 एतेषां तु सामवेदोत्पन्नानां स्वरूपत उच्चैस्त्वप्रसङ्गे प्रधानसंस्पर्शनिमित्तमुपांशुत्वमिति प्रधानधर्मता। ननु यजुर्वेदेन साङ्गं कुर्यादित्युपबन्धात्साङ्गस्यैवोपांशुत्वमित्यवधारणादस्त्येवाङ्गस्वरूपसंस्पर्श इति। न। साङ्गकथनेनैवाप्राधान्यनिर्देशात्। उपसर्जनभूताङ्गं हि प्रधानमेवं निर्दिश्यते। तेन प्रधानमेव याजुर्वेदिकमुपांशुत्वं तु तद्धर्म एव सन्नङ्गान्युपसर्प न्नेवं कथ्यते। न त्वेवमेव चोदनाऽप्यस्ति। ततः प्रधानधर्मोऽयमङ्गं प्राप्तोऽतिक्रम्येत। प्रधानेन हि स्वधर्मोऽङ्गेषु विक्षिप्तः। स यत्रैव बाधितस्तत्रैव प्रधानं विगुणं न त्वेवमुच्चैस्त्वं प्रधानधर्म इत्यवधार्यते। न ह्यङ्गधर्माः प्रधानानि संक्रामन्ति। नन्वेवमप्यङ्गधर्मः साक्षात्प्राप्नोति। प्रधानधर्मः पुनः परद्वारेण परोक्ष इति विपरीतं बलाबलं प्राप्नोति। सत्यं, साक्षात्प्राप्ताङ्गधर्मः शीघ्रतरमवगम्यते। प्रयोगवचनग्रहणोत्त-

---

११ अङ्गा] ( अ॰ ११ पा॰ २ अ॰ १ सू॰ ८ )
१२ विधेस्त्वे] ( अ॰ ११ पा॰ १ अ॰ २ सू॰ १६ )

रकालं तु पश्चात्तन एव प्रधानधर्मः ‘पौर्वापर्ये पूर्वदौर्बल्यं प्रकृतिवत्’ इत्येवं बाधते। ननु याजुर्वेदिकज्योतिष्टोमाद्यङ्गानां स्तोत्रशस्त्रादीनामप्यनेनैव न्यायेनोपांशुत्वं पाप्नोति। सत्यं प्राप्नोति। वचानात्तु सर्वत्र स्वरान्तरलाभः। कथम्। दर्शपूर्णमासयोस्तावद्वेदद्वयविहितष्वङ्गेषु नानावेदस्वरे प्राप्ते गुणमुख्यव्यतिक्रमन्यायेन याजुर्वेदिकप्रधानधर्म उपांशुत्वं प्राप्नोति। ततो वाचनिकः स्वरो भवति ‘मन्द्रयाऽऽज्यभागान्तं’ ‘परं मध्यमया’ ‘उत्तमयाऽनुयाजादि’ इति। तथा विकृतीनामिष्टिपशुबन्धादीनामेतस्मिन्नेव प्राकृते स्वरत्रये प्राप्नुवति प्रत्यक्षोपदेशवशेन प्रधानवेदस्वरप्रसक्तौ ‘तद्ग्रहणाद्वा स्वधर्मः स्यात्’ इत्यनेन न्यायेन प्रयोगवचनस्य चोदकापेक्षित्वेन दुर्बलात्वाच्चोदकप्रापितस्वरग्रहणमेवेष्टम। एवं ज्योतिष्टोमाङ्गानामपि दीक्षणीयादीनां प्राकृते स्वरे प्राप्ते प्रत्यक्षोपदेशवशेन बाध्यमाने चोदकबलीयस्त्वेन पुनरुपस्थिते ज्योतिष्टोमस्य याजुर्वेदिकत्वात्क्लृप्तोपकारप्राकृतधर्माग्रहणाच्च गुणमुख्यव्यतिक्रमन्यायेनैव तद्गतोपांशुत्वधर्मप्रसङ्गे सति ‘यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयात्’ इत्येते स्वरा गुणमुख्यव्यतिक्रमन्यायबाधेनैव साङ्गानां प्राप्ताः। तथा ज्योतिष्टोमस्य वाचनिकसवनविभागविहितमन्द्रमध्यमोत्तमोच्चारणावधारणात्तदङ्गानामपि सर्वेषां प्राकृततुल्यमन्द्रमध्यमोत्तमोच्चारणान्येव प्रधानद्वारेण प्राप्तानि। ततो ‘यत्किंचित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्ति’ इत्युपांशुत्वे साङ्गानां दीक्षणीयादीनां प्राप्ते प्रधानमात्रवाचिदीक्षणीयादिशब्दोद्देशेन विहिताः प्रधानमात्रेष्वेते स्वरविशेषा भवन्ति ‘यावत्या वाचा कामयेत तावत्या दीक्ष- 812
णीयायामनुब्रूयात्’ ‘मन्द्रं प्रायणीयायाम्’ ‘मन्द्रतरमातिथ्यायाम्’ ‘उपांशुपसत्सु’ इति। तत्रोपांशुत्वस्य पूर्वेणैव सर्वव्यापिनोपांशुत्वविधिना प्राप्तत्वाद्दीक्षणीयादिस्वरप्रशंसार्थो नित्यानुवाद एव। अग्नीषोमीये तु सवनविभागस्वरेणैव ‘मन्द्रयाऽऽज्यभागान्तम्’ इत्यादिप्राकृतस्वरप्रतिप्रसवः। सवनविभागतुल्यं वा साङ्गं प्रयोगं त्रेधा विभज्य मन्द्रमध्योत्तमोच्चारणसंपादनं कार्यम्। एतेनानूबन्ध्यावभृथोदयनीयोदवसानीयास्वप्युच्चारणविशेषा व्याख्याताः। सुत्याकालसवनीयादीनामप्येवं स्वरे प्राप्ते प्रातःसवनाद्यन्तर्गतत्वाद्यथासवनमेव स्वरा भवन्ति। ननु सवनशब्दानां सोमयागावयववचनत्वाद्दीक्षणीयाद्यङ्गवत्तदीयस्वराभावप्रसङ्ग इति चेत्। न। सप्तमीनिर्देशेन तत्कालप्र युज्यमानत्वमात्राश्रयणात्। § 5865

यदि षष्ठी भवेदत्र सवनेभ्यः परा ततः।
तदङ्गमन्त्रमात्रेषु मन्द्रत्वादिविधिर्भवेत्॥ § 5867

---

१ पौ] ( अ॰ ६ पा॰ ५ अ॰ १४ सू॰ ५४)
८ ह] ( अ॰ ३ पा॰ ७ अ॰ २४ सू॰ ५१ )
१२ प्राक्] अपेक्षियावदङ्गाम्नानेन कृत्स्नविधानत्वाज्ज्योतिष्टोमस्य धर्माकाङ्क्षाविरहादिनाऽष्टमे दर्शपूर्णमासविकारत्वस्य निराकरणादित्यभिप्रेत्याऽऽह—प्राकृतधर्माग्रहणाच्चेति।
१५ था] तथेति—प्राप्ते सतीत्यध्याहार्यम्। तत इति वा पाठान्तरं स्वीकार्यम्।

सप्तम्यां तु तदाधारो यावान्मन्त्रः प्रयुज्यते।
तम्य सर्वस्य मन्द्रादिस्वरयोगोऽङ्गमाश्रितः॥§ 5869

केचिदाहुर्यदाऽऽधारमात्रत्वं सवनेष्विह।
तदा तेषां न मन्द्रादिः स्यादनाधेयताश्रुतेः॥§ 5871

आधारे सवने भिन्नं यदाधेयतया श्रुतम्।
सवनीयादि तस्यैव मन्द्राद्युच्चारणं भवेत्॥§ 5873

स्तोत्रशस्त्रानुवाक्यादिशेषस्तु सवनस्य यः।
षष्ठ्यभावान्न तस्यैते युक्ता मन्द्रादयः स्वराः॥§ 5875

इत्युक्ते नैष दोषोऽस्ति यतः षष्ठ्या विनाऽप्ययम्।
षष्ठ्यर्थः संभवत्येव तदाधारत्वकल्पितः॥§ 5877

यथा हि शकुनिर्वृक्षे पुष्पाद्यपि तथेष्यते।
ततश्चाऽऽधेयधर्मोऽर्थः स द्वयेऽपि विधीयते॥§ 5879

यदि वा स्तोत्रशस्त्रादि कृत्स्नं सुत्याङ्गमेव नः।
आधार एव तस्यापि सवनानीतराङ्गवत्॥§ 5881

नानावेदस्वरम्तस्मात्स्तोत्रादेः प्राप्त आदितः।
प्रधानाङ्गतया पश्चादुपांशुत्वेन बाधितः॥§ 5883

813 ततो वाचनिकेनैव यथासवनभाविना।
मन्द्रादिना समस्तानि सुत्याङ्गानि प्रयुञ्जमहे॥§ 5885

एतेन सर्वे ज्योतिष्टोमविकारा व्याख्याताः। क्व पुनरिदानी नानावेदस्वरस्यावकाशो भविष्यति। उच्यते। ‘तद्ग्रहणाद्वा स्वधर्मः स्यादधिकारसामर्थ्यादव्यक्तः शेषे’ इतिवत्कल्पनीयः। यत्प्राकृतस्वराङ्गयुक्तायां विकृतौ वेदान्तरीयमपूर्वमङ्गं चोद्यत इति। ननु तत्रापि गुणमुख्यव्यतिक्रमन्यायेन प्रधानधर्मभाव एव। एवं तर्हि या विकृतिर्यास्मिन्वेदे भवति तस्याः शेषेष्वङ्गेषु यथाप्रकृति प्राप्तेषु यत्तस्मिन्नेव वेदेऽङ्गन्तरमपूर्वं चोद्यते स विषय इति।

२० द्व] ( अ॰ ३ पा॰ ७ अ॰ २४ सू॰ ५१)
२१ इतिव] इतिवत्कल्पनीय इति—यथैव श्येनादावौद्गात्रादिसमाख्याप्राप्तस्य कर्तुः प्राकृताङ्गव्यतिरिक्तापूर्वाङ्गविषयत्वं कल्प्यते तद्वदिहापि नानावेदस्वरस्यापूर्वाङ्गविषयत्वं कल्प्यत इत्याशयः।

सोऽपि प्रधानद्वारेणैव लब्धत्वात्। तदेव तर्हि प्रधानं विषय इति। न। तस्यापि प्राकृतावरुद्धत्वात्। न, तर्हि प्रधानद्वारेणापूर्वस्याङ्गस्य प्राप्तिरिति तदेव विषय इति। नैवमपि यः प्रधानस्य धर्मस्तस्यैव तत्रापि भावात्। अपि च त्रेधा विभक्तेषु यज्ञभागधर्मे च स्वरे स्थिते यदपूर्वमपि तद्भागपाति भवति। तस्य न यूपावटस्तरणबर्हिस्तुल्यत्वमिति भवितव्यमेव प्राकृतेन धर्मेण। तस्मादपि नास्ति विषयः। प्रकरणाम्नानं चात्यन्तमेवानर्थकं स्यात्। अत्र समाधिः। 'उपांशु यजुषा' इति तावत्सर्वदर्विहोमेष्वर्थवत्। ऋक्सामवेदयोरपि काम्यनैमित्तिकेष्वङ्गेष्वर्थवत्ता। 'मन्द्रं प्रातःसवने' इत्यादि हि नित्यत्वादनित्यैः काम्यनैमित्तिकैरसंबध्यमानं नित्याङ्गविषयमेव भवति। तेन यदृग्वेदसामवेदाभ्यां किंचित्काम्यं नैमित्तिकं वा चोद्यते तत्सर्वमुच्चैः कर्तव्यम्। तथा 'तं भिन्नमभिमृशेद्यदृते चिदमिश्रिष' इत्यादि। एवं याजुर्वेदिकमप्युपांशुत्वमुदाहर्तव्यम्। तथा यानि सुत्योत्तरकालान्यङ्गानि तेषु सवनग्रहणाभावाद्यथावेदमेव स्वर इत्यवभृथसामादीनामप्युच्चैस्त्वसिद्धिः। अन्यथा हि यथेष्टं प्रयोगः स्यात्। दीक्षणीयादिपरिसामसु तु 'प्राचीनमग्नीषोमीयात्' इत्यनेनोपांशुत्वम्। प्रवर्ग्यसाम्नां पुनः 'उच्चैः प्रवर्ग्येण' इत्येवमुच्चैस्त्वम्। आधानसाम्नां तु याजुर्वेदिकप्रधानविधिविहितत्वादेवोपांशुत्वम्। 'य एवं विद्वान्वामदेव्यं गायति' इत्यादीनि यजुर्वेदवाक्यान्येव। तस्मादिहानुदाहरणम्। तत्र केचिदाहुः—स्व- 814
रूपोत्पत्तिमात्रापेक्षया तेन क्रियत इति न कारकहेत्वभिप्रायेणोपन्यास इति। तत्तु न युक्तम्। एवं सति ह्युत्पत्तिविनियोगबलाबलचिन्तैव क्रियते न गुणमुख्यविरोधचिन्ता। तत्र च विनियोगाधीनत्वादनुष्ठानस्य तद्बलीयस्त्वमित्येष निर्णयः स्यात्। तस्मात्सामवेदशाखायामपि कस्यांचिदस्त्येषां विधिरत उदाहरणमित्यपरे। तदा तु यजुर्वेदपुनःश्रुतेर्मन्दं फलं स्यात्। अथापि शाखान्तरविधिवदाश्रीयेत स्वरविकल्पश्च पूर्वपक्षे क्रियेत यद्युदाह्रियेत। अनुदाहरणात्तु नैतदुपपद्यते। तस्मादुत्पत्तिविनियोगयोरेव गुणमुख्यत्वमित्येवमधिकरणमारभ्यते। यत्र वेदान्तरोत्पन्नं वस्तु वेदान्तरेण विनियुज्यते तत्र किमुत्पत्तिवेदधर्मः कर्तव्य उत विनियोगवेदधर्म इति। उत्पत्तिपूर्वकत्वाद्विनियोगस्योत्पत्तिवेदधर्म इति प्राप्ते। विनियोगवेदधर्म इति गृह्यते। कुतः। उत्पत्तेस्तदर्थत्वाद्विनियुज्यमानस्य च स्वरापेक्षित्वात्तदानीमेव यः स्वरोवगम्यते स एव चोदितो नोत्पत्तिस्थः। तत्काले विधानाभावात्। अथवा नैवात्र व्यतिक्रमशब्देन बाधो विरोधो वाऽभिधीयते। किं तर्हि। व्यभिचारोऽन्यत्रान्यत्र च वृत्तिः। तेनैवं चिन्त्यते। यत्रोत्पत्तिविनियोगौ व्यतिक्रान्तौ, अन्यत्रोत्पत्तिरन्यत्र विनियोगस्तत्र कतरवेदसंयोगो भवत्विति। तथैवोत्पत्तिसंयोगे विकल्पे वा प्राप्ते विनियोगवेदसंयोगः प्राधान्यादित्युत्तरम्। अथवैवं चिन्ता। यत्रान्यत्र च प्रधानमन्यत्र

७ योर] ऋक्सामवेदयारेपीति—ऋक्सामवेदनिमित्तकयोः स्वरयोरित्यर्थः।
१० त] एवं सामवंदविहित प्रवर्ग्याङ्गमहावीरभेदननिमित्तकमङ्गमुदाहरति—तथेत्यादिना।
२७ उत्प] उत्पत्तेः—पाठाख्याया उत्पत्तेः। तदर्थत्वात्—विधानार्थत्वात्।

चाङ्गं तत्राङ्गस्य केन वेदेन व्यपदेशोऽस्त्विति। ततश्च तथैव प्रधानवेदेन व्यपदेश इति निर्णयः। अस्मिंस्तु पक्षे ‘तद्ग्रहणाद्वा स्वधर्मा स्यात्’ इत्येतद्बाधित्वा प्रधानसमाख्यात एक एव प्रकृतौ विकृतौ च कर्ता प्राप्नोति। अथ तु चोदकबलीयस्त्वादङ्गवेदसमाख्यातवर्तृग्रहणं, ततः स्वरोऽपि तथैवेत्ययुक्तं प्रधानस्वरग्रहणम्। अत उत्पत्तिविनियोगापेक्षयैवैष विचार इत्येषैव व्याख्या शोभना। तथैवाऽऽधानोदाहरणं समर्थितं भवति। यदि तु गुणमुख्यव्यतिक्रमोऽङ्गप्रधानधर्मविरोधो व्याख्यायते ततः ‘अङ्गगुणविरोधे च तादर्थ्यात्’ इत्यनेन सहापौनरुक्त्यं संप्रधारणीयम्॥ ९॥ § 5886

इति गुणमुख्यव्यतिक्रमाधिकरणम्॥ २॥

## ०.०.१११ वेदभेदेन श्रूयमाणेषु कर्मोत्पत्तिनिर्णयाधिकरणम्

815 इदानीं यानि वेदान्तरेषु श्रूयन्ते प्रधानानि तानि केन व्यपदेष्टव्यानीति विचार्यते। तत्रैष निर्णयो यत्रोत्पद्यन्ते न यत्र गुणार्थं श्रूयन्ते। किं प्राप्तम्। शाखान्तरवत्सर्वत्रोत्पद्यन्ते। ततश्च धर्मविकल्पः। अथवोभयत्र स्वरूपस्य गुणानां च श्रवणात्कदाचित्किंचिदुत्पत्त्यर्थम्। एवं विकल्पप्राप्तावुच्यते। § 5888

न शाखान्तरवद्युक्तो विकल्पो वेदगोचरः।
तस्मादेको गुणार्थोऽत्र कश्चिदेको विधायकः॥ § 5890

स तु ज्योतिष्टोमादेः कतम इति। § 5891

गुणानां यत्र भूयस्त्वमितिकर्तव्यतात्मकम्।
तत्र तेनैव लिङ्गेन तस्य कर्तव्यतेष्यते॥ § 5893

यजुर्वेदज्योतिष्टोमस्य दीक्षणीयादिकेतिकर्तव्यता बह्वी। तस्मात्तत्रैवास्योत्पत्तिः। अतश्चासौ यजुर्वेदेन क्रियत इत्युच्यते। तेन प्रमीयमाणत्वात्तेन प्रमाणेन क्रियत इत्यर्थः। अथवा तेनैव व्यापारेणानुष्ठानमपि तेनैव क्रियत इति व्यपदिश्यते। न त्वेतद्भूयस्त्वव्याख्यानं युक्तम्। कुतः। § 5894

816 यद्यस्य गमकत्वेन स्वशक्तेरवधारितम्।
तदल्पं बहु वा तस्य प्रतीतौ न विशिष्यते॥ § 5896

---

२ द्ग] ( अ॰ ३ पा॰ ७ अ॰ २४ सू॰ ५१ )
७ गु] ( अ॰ १२ पा॰ २ अ॰ ९ सू॰ २७)
३ अथ] वेदभेदे

शाखान्तरवदध्येतृभेदाभावान्नित्यं सर्वेषु वेदेषूत्पत्त्यानर्थक्यापत्तेर्नियामकाभावेन चान्यतरत्रोत्पत्त्यनिर्णयादित्यभिप्रेत्य पक्षान्तरमनुधावाति—अथवेत्यादिना।

याद‍ृशस्य हि धूमस्य गमकत्वावधारणा।
स ताद‍ृग् बहुरल्पो वा वह्निं गमयति ध्रुवम्॥§ 5898

तथेहेतिकर्तव्यता लिङ्गत्वेनोपन्यस्ता। सा यत्राप्यल्पा तत्रापि कर्तव्यतया विनाऽनुपपद्यमाना शक्नोत्येव गमयितुम्। § 5899

नैव हिहाङ्गभूयस्त्वमितिकर्तव्यता मता।
किं तर्ह्यङ्गं यदेवाऽऽहुरितिकर्तव्यताऽपि सा॥§ 5901

तत्र यदि वेदान्तरस्थप्रधानानुवादेनाल्पा विधीयत इति। उच्यते। शक्यं वक्तुं बह्व्यपि तथैव विधास्यत इति। तत्रैतत्स्यात्। अल्पा सुखं वेदान्तरस्थस्य विधीयते। बह्वी तु दुःखमिति। नैतदेवम्। बह्वृचामपि वाक्यबहुत्वस्य क्षमत्वात्। तस्मादकारणमित्येवं वर्णनीयम्। इह द्रव्यदेवताक्रियं कर्मस्वरूपत्वेनावधार्य तच्च यजुर्वेदे सकलमाम्नायते। वेदान्तरे तु क्रियामात्रं संकीर्त्य स्तोत्रशस्त्रादीनि पठ्यन्ते। ततश्च द्रव्यदेवताकाङ्क्षित्वमपनीतमित्यशक्यं स्वतन्त्रक्रियाविधानम्। तथा च शाखान्तराधिकरणे व्याख्यातम्। यजुर्वेदे तु समस्तस्वरूपाम्नानाद्विनाऽपि स्तोत्रादिभिः शक्यते यागो निर्वर्तयितुम्। वचनसामर्थ्याददृष्टार्थानां स्तोत्रादीनां ग्रहणम्। अतोऽयं सूत्रार्थो यदुभयवेदश्रुति कर्म तद्रूपभूयस्त्वेन सामस्त्येन निराकाङ्क्षीकरणसमर्थेन निर्णेतव्यमिति। ऋक्सामवेदयोश्च तुल्यधर्मत्वात्तद्गतभेदोपादानं निष्फलमिति मत्वोभयश्रुतीत्युक्तम्॥ १०॥ § 5902

इति वेदभेदेन श्रूयमाणेषु कर्मोत्पत्तिनिर्णयाधिकरणम्॥ ३॥

## ०.०.११२ प्रकरणविनियोगाधिकरणम्

एवं तावच्छ्रुतिलिङ्गवाक्यानि प्रधानज्ञेयसंकीर्णविविक्तविषयाणि प्रत्युदाहरणं व्याख्यातानि। तत्र विधिविनियोगाभिधानात्मिकायाः श्रुतेर्विनियोग- 817
सामर्थ्यात्मकस्य च लिङ्गस्य केवलपदप्रयोगाभावात्पदान्तरसंनिधेरवश्यंभावित्वाद्वाक्यमन्तर्गतप्रायमेवेति न साक्षाद्ग्रहणेन सूत्रितम्। अथवा 'वेदो वा प्रायदर्शनात्' इत्युपक्रमोपसंहारवशेनैव वेदधर्मत्वावधारणादिदमेव वाक्याविनियोगसूत्रमिति न पूर्वान्तर्गतिमात्रेण वाक्यस्य विनियोजकत्वं व्याख्येयम्। यत्तु भाष्यकारेण 'अरुणया' इत्युदाहृतं, शक्यं तत्राप्यैन्द्रीवंत्तृतीयाश्रुतिरेव विनियोजिकेति वक्तुम्। अथ क्रियामात्रसंबन्धे श्रु-

---

१७ ऋक्सा] त्रिप्वपि वेदेषु ज्योतिष्टोमाम्नानात्सूत्र उभयग्रहणमप्ययुक्तमित्याशङ्क्य तदभिप्रायमाहऋक्सामवेदयोश्चेति।

त्या कृते विशेषसंबन्धो वाक्येनेत्यभिप्रायः। स ऐन्द्र्यामपि तुल्यः। तत्रापि ह्यैन्द्र्येत्युपस्थातव्यमात्रापेक्षणाद्गार्हपत्यमिति च साधनमात्रापेक्षित्वाद्विशेषसंबन्धो वाक्येनैव। तस्मादुभयत्रापि तदन्तर्गतिः शक्या दर्शयितुमित्युभयोः श्रुतिवाक्ययोरुभयमुदाहरणम्। इदानीं बलाबलचिन्ता प्रत्यासन्नेत्युत्तराण्यपि त्रीणि प्रमाणानि स्वरूपेण विनियोगसामर्थ्येन च दर्शयति। तत्र प्रकरणं विनियोगाज्ञानसंशयविपर्ययाणामन्यतमेनोपन्यस्यति स्म। यावच्चान्यन्न कथ्यते तावदज्ञानं भवति। अथवा सदपि प्रसङ्गाभावान्नाऽऽख्यातं स्यादिति संदेहोऽथवा नैवाक्षरश्रवणतत्सामर्थ्यानुसरणकाङ्क्षितयोग्यार्थपदान्तरसंनिधानेभ्योऽन्यः शब्दप्रकारोऽस्ति। तस्मान्न प्रकरणादीनि प्रमाणान्तराणीति प्राप्तेऽभिधीयते। § 5904

अविच्छिन्ने कथंभावे यत्प्रधानस्य पठ्यते।
अनिर्ज्ञातफलं कर्म तस्य प्रकरणाङ्गता॥§ 5906

818 दर्शपूर्णमासाभ्यां स्वर्गं साधयेत्कथमित्येतस्यामाकाङ्क्षायामविच्छिन्नायामश्रुतप्रयोजनानि कर्माणि पठ्यन्ते 'समिधो यजति' 'तनूनपातं यजति' इत्येवमादीनि। ततश्च दर्शपूर्णमासयोः कुतश्चिदनुग्रहसिद्ध्या भवितव्यम्। प्रयाजादीनां च केनचित्साध्येन। न च दर्शपूर्णमासयोः सिद्धमुपकारं स्वपदस्ववाक्यस्वप्रकरणप्रकरणान्तरेषु प्रत्यक्षादिपञ्चकेन प्रत्यक्षादिपञ्चकावगतेन वा शब्देनोपलभामहे। तथा प्रयाजादीनामवश्यं चोभयेनापि कुतश्चिद्भवितव्यम्। यदि तु केनचित्प्रकारेण नावगमिष्यामस्ततो नास्तीत्यवगमिष्यामः। अस्ति च प्रमाणं प्रकरणम्। न ह्यत्यन्तसंनिकर्ष एवैकं संबन्धकारणम्। यथा यथा हि संनिकृष्टं न लभ्यते तथा तथा विप्रकृष्टे वेदशक्तिः संचरति। तदिहोपकारककल्पनाप्रमाणम्। संनिकृष्टमलब्ध्वा विप्रकृष्टमप्यनुज्ञातमित्युभयाकाङ्क्षावशेनैवं विज्ञायते यं दर्शपूर्णमासावुपकारमाकाङ्क्षतः स नूनमेभिः प्रयाजादिभिः क्रियते। यच्च प्रयाजादयः प्रयोजनमपेक्षन्ते तद्दर्शपूर्णमासोपकार इति। न ह्युभयोरप्यन्यत्संनिकृष्टतरमस्ति। यच्चान्यत्कल्प्यते। तस्यान्येन सह संबध्य निराकाङ्क्षीभूतस्य नेह संबन्धाकाङ्क्षा विद्यते। तेन न प्रयाजादीनां विश्वजिदादिवत्फलकल्पनम्। नापि दर्शपूर्णमासफलानुषङ्गः। उभयाकाङ्क्षालक्षणसंबन्धाभावे ह्यन्यतराकाङ्क्षालक्षणः संबन्धो गृह्यते न संभवे। तस्मान्नष्टाश्वदग्धरथवदेव परस्परनियमः सिद्धः। असंयुक्तग्रहणं किमर्थम्। श्रुतिलिङ्गवाक्यैः संयुक्तानां द्वित्वबहुत्वयुक्तप्रतिपद्विधानपूषादिशब्द—तच्छेषाणां प्रकरणविनियोगनिवृत्त्यर्थम्। प्रकरणविरोधिना वाऽसंयुक्तमिति द्र-

१ ऐन्द्र्या] ऐन्द्र्यामपीति—'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इत्यत्रापीत्यर्थः।
६ याव] सूत्राधीनज्ञानस्य पुंसः सूत्रकारैः कथनात्प्राक्संशयाज्ञानविपर्ययाः स्वाभाविका इत्युपपादयति—यावच्चेत्यादिना।
१७ त्य] यद्यपि भावगोचराणां प्रत्यक्षानुमानोपमानशब्दार्थापत्तिरूपाणामुपकारप्रापकत्वानिरासेनैव शब्दस्यापि तन्निरासः संपद्यते। तथाऽपि पुनर्निषेधो लौकिकशब्दाभिप्रायेणेति ज्ञेयम्।

ष्टव्यम्। अविरोधिसंयुक्तानां ‘व्रीहिन्प्रोक्षति’ ‘बर्हिर्देवसदनं दामि’ ‘अरुणया क्रीणाति’ इत्येवमादीनां प्रकरणस्थव्रीहिबर्हिःक्रियैः संबध्यमानानां प्रकरणसमावेशोपपत्तेः। तत्तु सामर्थ्यसिद्धत्वात्सूत्रकारेण नोक्तम्॥ ११॥ § 5907

इति प्रकरणविनियोगाधिकरणम्॥ ४॥

## ०.०.११३ क्रमविनियोगाधिकरणम्

पूर्ववदेव क्रमसमाख्ययोरप्यज्ञानादिभिरुपन्यासः कर्तव्यः। § 5909 819

तत्र क्रमो द्विधैवेष्टो देशसामान्यलक्षणः।
पाठानुष्ठानसादेश्याद्विनियोगस्य कारणम्॥ § 5911

विनाऽप्यनुष्ठानदेशसाम्येन यावति प्रदेशे ब्राह्मणे प्रधानं पठ्यते तावत्येव मन्त्रेषु मन्त्रः। तयोश्चाङ्गाङ्गयपेक्षावेलायां यथासख्यन्यायेन समानदेशत्वाद्बुद्धौ संनिधानं भवति। प्रथमस्य हि प्रधानस्य मन्त्रमन्विच्छन्नवश्यं मन्त्रसमाम्नायमादित आरभ्याऽऽलोचयति। ततश्च प्रथम एव मन्त्रः प्रथमं हृदयमागच्छति। न चास्यातिक्रमे हेतुरस्तीति स एव गृह्यते। तथा मन्त्रस्य शेषिणमपेक्षमाणस्यानयैव प्रक्रिययाऽऽद्येन शेषिणा सह संबन्धो भवति। ततश्च तन्निराकाङ्क्षतया द्वितीयादीनामप्येवमेव द्वितीयादिभिरेव योगेन भवितव्यम्। तत्राऽऽग्नेयाद्यनुमन्त्रणानामाग्नेयादिलिङ्गत्वात्तेनापि व्यवस्था सिध्यतीत्यव्यक्तलिङ्गमुपांशुयाजक्रमाधीतं ‘दब्धिर्नामासि’ इत्युदाहरति। ननु चास्य प्रकरणात्सर्वार्थत्वं विज्ञायते तच्च बलीय इत्यन्यत्रापि विनियोगः प्राप्नोति। अत्र केचिदाहुः। उपांशुयाजग्रहणाद्द्वयमप्यनुगृह्यते तस्मात्तद्ग्रहणमिति। शक्यं तु वक्तुमननुग्राह्य एव क्रमः प्रकरणप्रत्ययविरुद्धत्वादिति। शेषस्य हि सर्वार्थत्वं प्रतिप्रधानानावृत्तेः प्रकरणावगतं न शक्यं बाधितुम्। तत्रैतावदुत्तरं भवति। येऽन्ये शेषिण आग्नेयादयस्ते विस्पष्टलिङ्गैः क्रमप्रकरणवद्भिर्मन्त्रान्तरैरवरुद्धत्वान्नैनमपक्षेन्ते। न च विकल्पः। अस्पष्टालिङ्गत्वेन वैषम्यात्। अदृष्टार्थानां समुच्चय इति चेन्न। प्रकृतयागप्रत्यवेक्षणेन दृष्टार्थत्वात्। सत्यपि 820 चादृष्टार्थत्वे निरपेक्षाणां गत्यन्तरे सति समुच्चयानाश्रयणात्। आग्नेयादिभिः कृतार्थैरुपेक्षितः सन्नगत्या पुनस्तेष्वेव भवेत्। अस्ति चास्य गतिरुपांशुयाज इति। किं च। § 5912

१६ तिप्र] प्रतिप्रधानावृत्तेरिति—प्रतिप्रधानं गुणावृत्तेर्न्यायलभ्यत्वात्प्रकरणात्सर्वार्धत्वे नाश्रुताभ्यासकल्पना मन्त्राणामापद्यत इत्याशयः।

१९ दृष्टा] मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरन्। शेषिणं तन्मना भूत्वा स्यादेतदनुमन्त्रणम्। इत्यभियुक्तप्रसिद्धिसिद्धं लक्षणमभिप्रेत्याऽऽह—दृष्टार्थत्वादिति। यन्मन्त्रोच्चारणेन शेषिमना भूत्वा शेषिणं मन्त्रार्थत्वेन संस्मरन्स्यात्तदेतदनुमन्त्रणमिति च कारिकार्थः।

न वा विज्ञातलिङ्गानां प्रक्रिया विनियोजिका।
असीत्यस्य च सामर्थ्यं संनिधावुपसंहृम्॥ § 5914

‘दब्धिर्नामासि’ इत्यस्पष्टलिङ्गोऽयम्। न चेदृशं सन्तं प्रकरणं विनियोक्तुं क्षमम्। अयं त्वसिशब्दो युष्मदर्थविषयत्वात्संनिहितमभिमुखं वाऽभिधत्ते नान्यम्। उपांशुयाजश्च संनिहितोऽभिमुखश्चेत्यभिधानसामर्थ्यं क्रमादुपांशुयाजविषयं विज्ञायते। ततश्च लिङ्गेन प्रकरणं बाध्यत एवेत्यदोषः। काम्ययाज्याकाण्डक्रमस्तु व्याख्यात एव। अनुष्ठानदेशक्रमोऽपि पशुधर्माणामग्नीषोमीयार्थत्वेन भविष्यति॥ १२॥ § 5915

इति क्रमविनियोगाधिकरणम्॥ ५॥

## ०.०.११४ समाख्याविनियोगाधिकरणम्

यौगिकी या समाख्या सा संबन्धप्रतिपादिनी।
सोऽपि बुद्धावुपस्थाप्य शेषसंबन्धबोधकः॥ § 5918

आध्वर्यवादिसमाख्यानां वेद एव प्रयोग इति न लौकिकत्वचोद्यं क्रिय-
821 ते। तत्राध्वर्युर्वृत्तमात्रमेवापेक्षते। किं मया कर्तव्यमिति। तदपेक्षमाणस्य च यदि न कुतश्चिद्विशेषोऽवगम्यते ततो यत्किंचिदिति भविष्यति। तथाऽऽध्वर्यवसंज्ञितं कर्म, को मे कर्ता भविष्यतीत्येवमेव शेषमपेक्षते। तत्र शब्दज्ञस्याऽऽदित एवैषोत्प्रेक्षा प्रत्येकं भवति यदस्याध्वर्योः कर्म तदाध्वर्यवशब्दवाच्यं भविष्यति। तथाऽप्यस्याऽऽध्वर्यवस्य यः कर्ता तस्याध्वर्युर्नामेति प्रकृतेर्वा विकारस्तदनुरूपोऽनुमीयते विकाराद्वा प्रकृतिः। यद्यपि शब्दान्तरं विकार इत्युभावप्येतौ परस्परनिरपेक्षौ नित्यसंबन्धौ च तथाऽपि नित्याया एव शब्दप्रवृत्तेर्नित्यः संबन्धो निमित्तमिति सर्व यौगिकानामेवमन्वाख्यानम्। न हि राज्यशब्दस्याप्यादिमती प्रवृत्तिरित्युक्तम्। निमित्तनैमित्तिकभावस्त्वनादित्वेऽपि शब्दार्थयोरिवेहाविरुद्धः। तत्र केचिद्वदन्ति। प्रागेतस्मात्समाख्याविनियोगादध्वर्य्वाध्वर्यवयोरसंबन्धादशक्यं यौगिकत्वं समाख्याया विज्ञातुम्। अथ तु प्रथमं सिद्धे संबन्धे पश्चात्समाख्यायाः प्रवृत्तिः। ततो न समाख्या विनियोजिका स्यात्। अतः परस्परनिरपेक्षयोरेव रूढयोः सारूप्यादुपतिष्ठमानयोरेष विनियोग इति। न त्वेतद्युक्तम्। न हि रूढानां सारूप्यादुपस्थापनसामर्थ्यं धर्मसंबन्धेऽप्यस्ति। यथा कण्वरथंतरे रथंतर-

१ क्रिया] प्रक्रियेति—प्रकरणमित्यर्थः।
१२ वृत्तिरित्यु] ( अ० २ पा० ३ अ० २ ) इत्यत्रेति शेषः

धर्मान्निराकरिष्यति किमुतात्र क्रियाकर्तृसंबन्धे। पाचकाद्युदाहरणं वा युक्तं स्यात्। तस्माद्यौगिकत्वमेवाभ्युपगन्तव्यम्। यत्तु प्राक्प्रयोगात्प्रमाणं नास्तीति। सत्यं प्रत्यक्षं नास्तीति। समाख्ययैवानुमीयमानं भविष्यति। वेदे हि प्रथममेव क्रियाकर्तृसंबन्धो निष्पन्नः। तस्मिन्सति समाख्या प्रवृत्ता। वयं तु तं संबन्धं प्रमाणान्तरेणाप्रतिपद्यमानाः समाख्यादर्शनेन प्रतिपद्यामहे। तेन ज्ञायते पूर्वं समाख्या पश्चात्संबन्ध इति। वस्तुतस्तु प्रथममेव संबन्धः। स चाप्रतीतोऽपि सत्तामात्रेणैव समाख्यां प्रवर्तितवान्। यदि ह्येषाऽऽदिमती स्यात्ततः प्रयोक्तुः प्रथमं संबन्धावगत्या भवितव्यम्। न च सा तथा भवतीति न पर्यनुयुज्येमहि। नित्यसंबन्धाश्रयणे तत्र नित्यप्रयुक्तया समाख्यया नूनं कश्चिदस्ति संबन्ध इति प्रतिपादितेऽन्यथानुपपत्त्या शेषशेषिभावः पश्चाद्विज्ञायते। तस्माद्यौगिक्यैव समाख्यया विनियोग इति सिद्धम्॥ १३॥
§ 5919

इति समाख्याविनियोगाधिकरणम्॥ ६॥

## ०.०.११५ बलाबलाधिकरणम्

इदानीं षण्णामपि श्रुत्यादीनां बलाबलं विचार्यते। तच्च भिन्नविष- 822
याणां न संभवतीति समवाय एकार्थोपनिपातो विषयत्वेनोदाहृतः। तत्र केचिदाहुर्विरोधग्रहणं कर्तव्यमिति। कुतः। § 5921

क्रीणात्यरुणयेत्यत्र समवाये हि सत्यपि।
विरोधाभावतो नैव चिन्तयन्ति बलाबलम्॥ § 5923

एक एव ह्यरुणादिः शेषः श्रुत्या सामान्यक्रियासंबन्धी, वाक्येन तद्विशेषस्य क्रयस्य, प्रकरणेन ज्यौतिष्टोमिकस्य। सत्यपि वाचनिकप्रकरणसमवाये परस्परानुग्रहनिमित्तत्वादविरोध इति बलाबलविचारो न भवति। निर्विशेषसामान्यानुपपत्तेः। क्रयस्वरूपमात्रप्रयुक्तत्वे चानर्थकत्वादपेक्षिते हि श्रुतिवाक्याभ्यां वाक्यप्रकरणे। तस्मात्कर्तव्यं विरोधग्रहणमिति। न वा कर्तव्यम्। कुतः। § 5924

समानविषयत्वं हि समवायोऽभिधीयते।
न चैकार्थ्ये प्रमाणानां शेषाणामवगम्यते॥ § 5926

अरुणादौ तावन्नैव प्रमाणसमवायोऽस्ति। न ह्येकत्र संभवमात्रं समवायः। किं तर्हि विषयैकत्वम्। इह चारुणस्य क्रियासंबन्धः श्रुत्या। तस्य तु

१ र्मान्निरा] ( अ० १० पा० ४ अ० २३ ) इत्यत्रेति शेषः

श्रुतिकल्पितक्रियाकारकसंबन्धस्य भूयोऽप्यपेक्षावशेन क्रयविषयत्वम्। तावता च प्रयोजनानवाप्तेरपेक्षान्तरे सत्यपूर्वसंबन्धवतः क्रयस्य ज्योतिष्टोमार्थत्वमिति विषयनानात्वम्। अतश्च सर्वेषां विनियोजकत्वमविरुद्धम्। न चात्र विप्रकृष्टग्रहणे संनिकृष्टस्य बाधो दृश्यते। न हि क्रयं गृह्णन्नरुणायाः क्रियासंबन्धं बाधते। नापि ज्योतिष्टोमे कुर्वन् क्रयसंबन्धम्। यत्र त्वेकः शेषस्तावानेव च संबन्धान्तरविरोधिनैकेन प्रमाणेनान्यशेष्यर्थो विज्ञायते। परेण तदबाधानुपपत्तिना शेष्यन्तरार्थः। एकसंबन्धे च कृतार्थ- स्याऽऽकाङ्क्षाभावात्पुनर्विनियोगान्तरानुपपत्तिः। तत्र प्रमाणयोः परस्परापहार्यसमानविषयत्वलक्षणः समवायः। तथा यत्र शेषभेदेऽप्येकस्मिन्नेव शेषिणि तुल्योपकारनिबन्धन एकेन प्रमाणेनान्यः शेषः साधनत्वेन प्रतीयते। अन्येनापरः। न चैकसाधितोपकारः शेषी शेषान्तरमपेक्षते। तत्राप्येकविषयापहारित्वात्समवायः। स च विरोध एव सति भवतीति समवायग्रहणेनैव सिद्धो विरोधः। यत्र पुनः स्पष्ट एव शेषभेदो यथा ‘समिधो यजति’ इत्यादिषु। यत्र वा तस्यैव किंचिदाधिक्यं भवति यथाऽरुणायां व्याख्यातम्। तथा यत्र शेषिभेदो यथाऽऽग्नेयादिष्वष्टाकपालादीनाम्। यत्र वा तद्गतमाधिक्यं यथा दर्शपूर्ण-
823 मासाङ्गानामेवोपकारभेदस्तत्रापि विषयान्यत्वादसमवाय इति। यच्च श्रुत्या विनियुज्यते, यच्च समाख्यया, तत्सर्वं तुल्यम्। यस्तु सर्वाङ्गजन्य एकः प्रधानोपकारः, तत्रैषामपर्यायविधानादेकमेव प्रमाणं शेषत्वं चेति व्यापारभेदादसमवायः। तथा यत्र स एव शेषस्तस्मिन्नेव शेषिणि संनिकृष्टेन विप्रकृष्टेन च प्रमाणेन विनियुज्यते तत्राप्येकस्यैव प्रमाणत्वेनेतरस्य प्रयोजनान्तरार्थत्वादसमवाय इति। तस्माद्विरोधविषयमेव समवायग्रहणम्। तत्र षण्णामप्येकत्रैव बलाबले कथयितव्ये क्रमवर्तित्वाद्वाचो युगपदशक्तेरेकैकस्य संप्रधारणा। यत्तु द्वितीयोपादानं तत्प्रतियोगिना विना बलाबलकथनाशक्तेस्तेनोच्यते—**द्वयोर्द्वयोरिति। एकार्थवर्तित्वाद्वाच** इत्यस्यापरा व्याख्या येयं बलाबलवागेषा प्रत्येकं श्रुत्यादिषु समवैति न समुदाये। तानि हि शेषविनियोगेनार्थवन्ति न बलाबलम्। अतस्तस्याः प्रतिप्रधानवृत्तित्वादयौगपद्येनैकैकस्य संप्रधारणायां कर्तव्यायां द्वितीयोपादानं विरोधबलाबलबाधानां प्रतियोगिन्यनुपपत्तिं दर्शयितुमसंभवात्—**द्वयोर्द्वयोः संप्रधारणेत्युक्तम्**। तत्रैकैकस्य पञ्चभिः पञ्चभिः सह विचारे कर्तव्ये यदेकैकेन सह क्रियते तद्बाधितबाध्यस्य बाधकबाधकेन बाधस्य सुज्ञानत्वात्। यानि हि श्रुतिबाध्यैर्लिङ्गादिभिर्बाध्यन्ते तानि श्रुत्या बाध्यन्तेतरामिति न तया सह संप्रधारयिष्यन्ते। तत्र प्रथमं तावत्क्रमप्राप्तं श्रुतिलङ्गयोः संप्रधारणमिति। **किमिहोदाहरणमिति**—केवलपदप्रयोगाभावात्सर्वत्र वाक्यत्वे सति न श्रुतिलिङ्गयोः स्वसामर्थ्यातिरेको लक्ष्यत इति मन्यमानस्य प्रश्नः। वक्ष्यमाणविवेकाभिप्रायेणाऽऽह—**ऐन्द्र्या गार्हपत्य-**

२५ ता] तानि हि—इत्यस्य ग्रन्थस्यायमाशयः। बलाबलं प्रति श्रुत्यादीनां प्राधान्यात्प्रतिप्रधानं गुणावृत्तिन्यायेन बलाबलोक्तिरावर्तनीयेति।

**मुपतिष्ठत** इति। किमिन्द्रस्यैवोपस्थानं कर्तव्यमुतेन्द्रस्य गार्हपत्यस्य वाऽथवा 824 समुच्चितयोरथवा गार्हपत्यस्यैवेति। यदि लिङ्गं बलीयस्तत इन्द्रोपस्थानम्। अथ तुल्यबलत्वं विरोधश्च ततो विकल्पः। अथ तुल्यबलत्वेऽप्यविरोधस्ततः समुच्चयः। अथ विरोधः श्रुतिबलीयस्त्वं च ततो गार्हपत्यस्यैवोपस्थानमिति। यत्तु सिद्धवद्गार्हपत्यार्थत्वाङ्गीकरणेन 'वचनात्त्वयथार्थमैन्द्री स्यात्' इत्युक्तं तदिह स्थापयिष्यमाणश्रुतिबलीयस्त्वाभिप्रायेण। तेनैव सर्ववाक्यत्वाभिप्रायेण श्रुतिलिङ्गेऽर्थे वाक्यत्वभ्रान्त्या पुनः पृच्छति—**का पुनरत्र श्रुतिः किं लिङ्गमिति**। तत्रोत्तरं **गार्हपत्यशब्दश्रवणं** मन्त्रसामर्थ्यं चेति। परः पुनराह—यद्येवंविधपदसमूहात्मके श्रुतिलिङ्गे हन्त तर्हि वाक्यं नाम न किंचिदप्यस्ति। तदुच्यताम्, **अथ वाक्यं नाम किमिति**। सिद्धान्तवादी तु तथैव शक्यविवेकज्ञानत्वं मन्यमान आह—**संहत्यार्थमभिदधति पदानि वाक्यमिति**। यद्यपि च न संहतानां कश्चिदेकोऽभिधेयस्तथाऽपि गम्यमानाभिप्रायेणोक्तम्। अथवैकलक्ष्यमाणार्थप्रयुक्ततया संघातत्वमापादितानि यदा स्वार्थमभिदधति तदा तद्भूतान्येव सन्ति वाक्यत्वं प्रतिपद्यन्त इति। यद्येवं तत उभयोरप्युदाहृतयोर्मन्त्रब्राह्मणयोर्वाक्यलक्षणयोगाद्वाक्ययोरियं संप्रधारणा **न श्रुतिलिङ्गयो-** रिति। **यदि वा**ऽवश्यं श्रुतिलिङ्गयोर्विरोधः समर्थनीयस्ततः श्रुतिलिङ्गवाक्यानि लक्षणतो विवेक्तव्यानीदं नाम तेषां परस्परमन्तरमिति। **तदभिधीयते** । § 5927

यच्छब्दस्योक्तिसामर्थ्यं तल्लिङ्गं त्रिविधा श्रुतिः।
विध्युक्तिविनियोगाख्या वाक्यं तु प्राङ्निदर्शितम्॥ § 5929

ननु सामर्थ्यपूर्वकत्वादुक्तिविधिविनियोगानाम्। 'ऐन्द्र्या गार्हपत्यम्' इत्य- 825 त्रापि शब्दसामर्थ्यमस्ति। 'कदाचन स्तरीरसि' इत्यत्रापि चेन्द्राभिधानमित्यविशेष एव श्रुतिलिङ्गयोः प्राप्नोति। तथा हि। § 5930

विध्युक्तिविनियोगा हि न विना शब्दशक्तिभिः।
न चेन्द्रशब्दसामर्थ्यमभिधाश्रुतिवर्जितम्॥ § 5932

सत्यमुभयत्रोभयमप्यस्ति। § 5933

किं त्वैन्द्र्या गार्हपत्यस्य नोक्तिः शक्त्याऽवगम्यते।
इन्द्राङ्गत्वमतिश्वास्या नाक्षरश्रुतिकारिता।§ 5935

या हि 'ऐन्द्र्या गार्हपत्यम्' इत्येषा शक्तिस्तयैतान्येव पदानि प्रत्यर्थं लोके विनियुक्तानि न मन्त्र ऐन्द्रो गार्हपत्याङ्गम्। अन्यत्र गतया शक्त्याऽन्यस्याविनियोगात्। स्वसामर्थ्यप्रवृत्तौस्तु ब्राह्मणपदैः शक्त्या शक्त्यनपेक्षमङ्गत्वमभिधीयते। न चात्र सामर्थ्यं प्रथमं गृह्यते। निवृत्ताभिधानान्यथानुपपत्त्यैव

१ किमि] 'अत्र चिन्त्यते' इतिभाष्ये न्यूनतां परिहरिष्यन्वक्ष्यमाणभाष्यालोचनया च द्विकोटिकसंशयपरतया भासमानमपि चातुष्कोटिकसंशयोपलक्षणतया व्याकरोति—किमिन्द्रस्यैवेत्यादिना।

तस्य गम्यमानत्वात्। तेन ज्ञाते विनियोगे शक्तिः कल्प्यत इति नासौ विनियोगकारणम्। यद्यपि वस्तुतः प्रथमं विद्यते तथाऽपि प्रमाणतः पश्चाद्गृह्यत इति कारकहेतुत्वे सत्यपि ज्ञापकत्वेनाकारणमित्युच्यते। यदि तु पौरुषेयमिदं भवेत्तथा सति वक्तुरभिधानशक्तिज्ञानं विनियोगाभिधानात्प्रथमतरं भवेत्। न त्वेवमस्ति। वेदस्यापौरुषेयत्वात्। तस्मात्सर्वपुरुषाणां प्रतिपत्तृत्वात्पश्चात्तनं शक्तिज्ञानमित्यक्षरश्रवणकृत एवायं गार्हपत्याङ्गत्वप्रत्ययः। ‘कदाचन स्तरीरसि’ इत्यत्र पुनर्यद्यपीन्द्रशब्देनेन्द्रोऽभिधीयते तथाऽपि विनियोगो नाभिधीयत इति श्रुतेरव्यापारः। न ह्यत्र कस्यचिच्छब्दस्य श्रवणादिन्द्रस्य शेषित्वं मन्त्रस्य शेषत्वं प्रतीयते। यथेतरत्र द्वितीयाश्रवणाद्गार्हपत्यस्येप्सिततमत्वमैन्द्र्याश्च तृतीयाश्रुत्या करणत्वम्। केवलं तु मन्त्रस्याभिधानसामर्थ्याद्विनियोगयोग्यता दृश्यते। न च तावता विनियोगोऽभिहितो भवति। न च विहितः। मन्त्रस्याविधायकत्वात्। ब्राह्मणवाक्ये त्वविधानं विधानं चोभयमपि निष्पन्नम्। ननु मन्त्रस्याप्यभिधानपूर्वकमेव सामर्थ्यकल्पनम्। सत्यमेवम्। न तु तद्विनियोगस्याभिधानम्। किं तर्हि। अर्थस्वरूपमात्रस्य। अन्यैव च तेन प्रथमं तदभिधानशक्तिः कल्प्यते। अन्या च तद्बलेन विनियोगशक्तिः। कथम्। § 5936

826 यो हि यस्याभिधानाय शक्त इत्यवगम्यते।
विनियोगेऽप्यसौ शक्तो न ह्यशक्तो नियुज्यते॥§ 5938

ततश्च द्वितीयसामर्थ्याद्विनियोगः कल्पयिष्यते। न प्रथमात्। प्रथमेन हि विनियोगनिरपेक्षमिन्द्राभिधानमात्रं कृतम्। अत इहेदृशो विवेकः प्रतिपत्तव्यः। § 5939

एकत्रासति सामर्थ्ये मन्त्रः शेषोऽभिधीयते।
अन्यत्रानुक्तशेषत्वं सामर्थ्यं संप्रतीयते॥§ 5941

अविद्यमानमेवैन्द्र्या गार्हपत्याभिधानसामर्थ्यमभिहितविनियोगविधानात्कल्पनीयम्। विनियोगस्तु प्रथममेव क्लृप्तः। इन्द्रं प्रति तु सामर्थ्यं क्लृप्तमालोच्य विनियोगोऽभिहितो विहितो वेत्येतत्कल्पनीयम्। वाक्ये पुनः— § 5942

अर्थं प्रति न सामर्थ्यं न च शेषत्वमुच्यते।
केवलः पदसंघातः प्रत्यक्षमुपलभ्यते॥§ 5944

कथंभावदेशसामान्ययौगिकरूपाणां तु प्रकरणक्रमसमाख्यानां विवेकः सुज्ञान एवेति न पृष्टो न निरूपितः। **तदेतत्सर्वेष्वेव वाक्येषु समवेतं विविक्तं च दृश्यत इति**। न हि किंचिदपि वाक्यं शब्दसामर्थ्येनार्थाभिधानेन पदान्तरसंनिधानेन ना विना विद्यते। विवेकश्च पुरोदितः। क्वचित्कस्यचित्पूर्वतरप्र-

---

१८ श] असौ शक्तो न ह्यशक्त इतिपदाभ्यां कर्मोत्पन्ननिष्ठान्ताभ्यां शक्याशक्यावभिधीयेते।

तीतेः। तद्दर्शयति—**इह तावत्कदाचन स्तरीरसी**ति। न विनियोगोऽभिधीयते न पदान्तरसंनिधेर्वा गम्यते। किं तर्हि। एतस्यामृचीन्द्रशब्द इन्द्राभिधानसमर्थो विद्यते, शेषाणि च पदानि तेनैकवाक्यतां गतानीति समस्तो मन्त्र इन्द्राभिधानसमर्थो गम्यते। सोऽपि चेन्द्रः कर्माङ्गत्वादभिधानार्ह इत्यसत्यपि वचने भवत्यभिधीयतामित्युत्प्रेक्षा। गार्हपत्ये पुनर्विनैव मन्त्रसामर्थ्येन 827
विनियोगं ब्राह्मणमभिधत्ते इति बलाबलं चिन्तयितव्यम्। अत्र केचिदाहुः। **एवं तर्हि लिङ्गवाक्ये** इत्येतस्मात्प्रागयं ग्रन्थो योजयितव्यः। 'अथवा नात्रैकवाक्यत्वादिन्द्रप्राधान्यम्' इत्यादिः। कुतः। § 5945

लिङ्गत्वमभ्युपेतं चेदिन्द्रोपस्थानकल्पने।
उभयत्रापि वाक्यत्वं कथं भूयोऽवकल्पते॥§ 5947

यत्र वाक्यद्वयमेतदित्युपन्यस्तं तत्रैवैतद्युज्यते वक्तुम् 'अथवा नात्रैकवाक्यत्वादिन्द्रप्राधान्यं गार्हपत्यप्राधान्यं वोपस्थानस्य' इति यथा ह्युभयत्राप्येकवाक्यत्वव्यापारनिराकरणमवकल्पते। अन्यथा तु मन्त्रस्य लिङ्गविनियोज्यत्वे पूर्वपक्षवादिनैवाभ्युपगते पुनस्तदनपेक्षमिन्द्रोपस्थानमप्येकवाक्यत्वकृतमेवेत्याशङ्क्य निराकरणमसंबद्धमेव स्यात्। तस्मात्प्रमादादुत्कृष्टस्य ग्रन्थस्यापकृष्य व्याख्यानं कर्तव्यम्। न त्ववश्यमेतदादर्तव्यम्। भवत्येव हि बह्वीनां परिचोदनानां मध्ये परिचोदनापरिहारकालेऽपि पूर्वपरिचोदनापरिहारः। अपि च। यदा 'अथवा नात्रैकवाक्यत्वात्' इत्येतत्प्रथममुक्तं तदाऽपि पुनः। 'एवं तर्हि लिङ्गवाक्ये' इत्यत्र वाक्यग्रहणमसंबद्धमेव स्यात्। ततो यथान्यासमवस्थितेऽभ्युपेत्यवादमात्रेण पूर्वपक्षवादिनैकत्र लिङ्गत्वमुक्तमतोऽस्य वाक्यत्वानुशयशेषमपनयामीत्येवमाह—'अथ वा नात्रैकवाक्यत्वात्' इति। यद्वा ब्राह्मणगतमेवैकवाक्यत्वमकारणं विवक्षन्प्रसङ्गान्मन्त्रेऽप्युक्तवानिति व्याख्येयम्। तत्र **वाक्यं ह्येतदैन्द्र्या गार्हपत्यमुपतिष्ठत** इत्यस्याभिप्रायः—यदैन्द्र्यास्तृतीयाश्रुत्या शेषत्वमात्रमनवगतशेषिविशेषं प्रतीयते। यत्तु गार्हपत्यमिति द्वितीयया किमपि प्रति शेषित्वमात्रं न तस्य लिङ्गेन सह कश्चिद्विरोधः। पदान्तरसंबन्धे ह्यसति यथार्थमेवैन्द्र्याः करणत्वं स्यात्। गार्हपत्यस्य वा यां कांचिदाग्नेयीं प्रति शेषित्वं भवेत्। परस्परसंनिधानं तूभयोरिन्द्रोपस्थानं बाधते तच्च वाक्यमिति। **नैतदेवमिति**-गार्हपत्याभिधानश्रुतिं तावदुपन्यस्यति। परस्परसंनिधानमपि हि श्रुतिं पीडयित्वा शक्यमविरोधेन ने- 828
तुम्। यदि तु गार्हपत्यशब्दो गृहपेतरयमित्येव मिन्द्रमभिवदेत्, यज्ञसाधनत्वेन वा लक्षयेदग्निसमीपं वा ततो लिङ्गाविरोधेनैव तत्सं निधिरुपपद्यते। यतस्त्वयं

५ व] भवत्यभिधीयतामितिस्थाने भजत्यभिधीयतामिति पाठो युक्तः।
११ न्य] उपंन्यस्तमिति—'यद्येवभिदमपि वाक्यम्' इत्यादिना भाष्येणेत्यर्थः।
१४ वादिनैवाभ्युप] अभ्युपगत इति—'एवं तर्हि लिङ्गवाक्ये विरुध्यमाने' इतिपूर्वग्रन्थेनेत्यर्थः।
१५ ङ्क्य] आशङ्क्य निराकरणमिति—'अथवा नात्रैकवाक्यत्वादिन्द्रप्राधान्यम्' इत्याद्युपरितनग्रन्थेनेत्यर्थः।

समुदायाप्रसिद्धाभिधेयापरित्यागेन वर्तते ततो विरुध्यत इति श्रुतिविरोधः। **अथवा नात्रैकवाक्यत्वादिति**—विभक्तिश्रुतिविरोधोपन्यासः। यदि हि सप्तम्यर्थं वा तृतीयार्थं वा द्वितीया वदेत्ततोऽपि नैव विरोधः स्यात्। यतस्त्वीप्सिततमत्व-माह तेन विरुध्यते। लिङ्गविरोधस्तु प्रागुक्त एवैकवाक्यत्वव्यापारनिराकरण-मात्रार्थमुपन्यस्यते। कथं पुनर्यथोक्तेन न्यायेनोभयथा विरोधसंभवे श्रुतिलिङ्ग-विरोध एव परिगृह्यते न वाक्यविरोधः। उच्यते। § 5948

यथा शीघ्रप्रवृत्तित्वाल्लिङ्गादेर्बाधिका श्रुतिः।
तथैव विनियोगेऽपि सैव पूर्वं प्रवर्तते॥ § 5950

यच्च शीघ्रतरं विनियुङ्क्ते तस्यैव प्रतियोगिना सह विरोधो लक्ष्यते। ननु च श्रुतिमात्रं च विरुध्यत इत्युक्तम्। कथं न विरुध्यते, यदा प्रतिनियतावेतौ श्रुतिवाक्यसंबन्धावेकः शेषशेषिरूपोऽन्यो विशेषणविशेष्यात्मकः। तत्र च श्रुतिरेवं वदति वाक्यलभ्यस्य विशेषस्यैवंविधं शेषशेषित्वमिति। लिङ्गं तु शेषशेषिसंबन्धेनैव सह विरुध्यते न वाक्यगम्येन विशेषणविशेष्यभावेन। अतश्च निष्प्रतिद्वंद्विना वाक्येन यदा विशेषणविशेष्यभावः कृतः, तदा श्रुत्या सह लिङ्गविरोध उपलभ्यमानो विचारयितव्यः। अथवा यदैवैन्द्र्येत्युक्तं तदैव तदर्थशास्त्रन्यायेनेन्द्रव्यतिरिक्तः कोऽप्युपस्थातव्यः स च लिङ्गम्येन्द्र-विरोधीत्येतत्प्रतीयते। **तस्माच्छ्रुतिलिङ्गयोरेवैष विरोध** इत्युपपन्नो विचारः। किं तावत्प्राप्तम्। सर्वप्रमाणानि तुल्यबलानीत्यवगन्तव्यम्। कुतः। § 5951

क्वचिद्यस्य प्रमाणत्वं स्वशक्तेरवधारितम्।
न ह्यन्यापेक्षया तस्य सा शक्तिरपगच्छति॥ § 5953

829 सर्वत्र प्रत्यक्षादावपि द्वय्येव गतिः प्रमाणस्वरूपं प्रमाणाभासं च। न तत्र यत्प्रमाणं तत्कदाचिदपि प्रमाणाभासो भवति। योऽपि तदाभासः सोऽपि नैव प्रमाणं भवति। नित्यं च प्रमाणाभासबाधो न प्रमाणस्यैव। न च तत्र बाध्यस्य प्रामाण्यमभ्युपगतम्। बाधनाक्षमत्वा त्प्रमाणस्य। श्रुत्यादिषट्कस्य च समस्तस्य स्वविषये प्रामाण्यं स्थापितम्। न चैषां विषयान्तरसंचारोऽस्ति यत्र दौर्बल्यमाशङ्क्यते न चैतदुपस्थापितं ज्ञानमनुत्पन्नं शक्यं च वेदितुम्। न चोत्पन्नस्य स्वरसभङ्गुरत्वादुत्तरेण विनाशः। न च संस्कारापनयनम्। स्मृतिहेतोः संस्कारस्य सर्वत्रानुच्छेदात्। नाप्यनुष्ठानाख्यात्फलाद्विनियोगः शक्यते कर्तुम्। अनुष्ठानप्रत्ययस्य दृढत्वात्। तस्मात्सर्वत्र तुल्यबलत्वाद्विकल्पः। § 5954

बाधस्तु यदि कल्प्येत विपरीतः प्रसज्यते।
न हि पूर्वमबाधित्वा परेषां जन्म लभ्यते॥ § 5956

---

१६ न्या] ( अ॰ १ पा॰ २ अ॰ ४ स॰ ३१ ) इत्यत्रोक्तेन न्यायेनेत्यर्थः

श्रुत्यादीनां हि पूर्वं पूर्वं शीघ्रतरं प्रवर्तते। तेन पश्चात्तनस्य तदुपमर्देनैवाऽऽत्मलाभेन भवितव्यम्। अतश्च विपरीतबाधप्रसङ्गः। किं च। § 5957

श्रुत्यादिना समर्थस्य विनियोगोऽवकल्पते।
न सामर्थ्यादिरूपं स्यादेकवाक्यादिभिर्विना॥§ 5959

उत्पत्तिकाले यस्यान्यविषयसामर्थ्यमवधृतं न तस्य तद्विनियोगकाले परावर्तयितुं शक्यते। विनियोगस्तु सामर्थ्यानुसारीति युक्तमध्यवसातुम्। एवं यस्य येन सह संबन्ध एकवाक्यतया न विद्यते न तस्य तद्विषया शक्तिः कल्प्यते। संबन्धे सति तदन्यथानुपपत्त्यैव शक्तिसिद्धिरिति वाक्यस्य बलीयस्त्वम्। तथा सर्वत्रैकवाक्यत्वमाकाङ्क्षामूलम्। अतस्तस्यामुपलभ्यमानायां तदेकान्तेन प्रतीयते। तदभावे तु नैतदस्तीति पूर्वतरभावित्वादाकाङ्क्षात्मकं प्रकरणमेव ज्यायः। तद्विरोधिनी तु याऽन्येन सहैकवाक्यतावगतिः सा भ्रान्तिः। तथा सर्वाकाङ्क्षाः संनिहितावलम्बिन्यो भवन्ति। न ह्यसंनिहितमपेक्षितुं संबन्धुं वा शक्यमतो यत्र संनिधिस्तत्र सर्वमिति बलीयस्त्वम्। समाख्या पुनः 830
प्रत्यक्षमेव संबन्धं वदति। तस्माद्विपरीतं बलाबलम्। अथवा विरोधे सत्येतच्चिन्त्यते। न चेह विरोधः। उभयत्रापि विनियोगोपपत्तेः। अतः समवायेऽपि सर्वेषां प्रामाण्यमिति प्राप्तेऽभिधीयते। श्रुत्यर्थविप्रकर्षात्परं परमेषां बाध्यत इति। कुतः। § 5960

विनियोक्त्री श्रुतिस्तावत्सर्वेष्वेतेषु संमता।
धीस्तस्याः संनिकर्षेण विप्रकर्षेण च स्थिता॥§ 5962

यदि श्रुतिवल्लिङ्गादीनामपि स्वतन्त्राणां प्रामाण्यमभविष्यत्तत एतदुपापत्स्यत तेषां तु स्मृतिविच्छ्रुत्यनुमानद्वारं प्रामाण्यम्। श्रुतिरेव ह्यत्रैकं प्रमाणम्। सा तु ग्रहणोपायषट्कानुरोधेन षोढाऽवतिष्ठते। कथं पुनरेषां स्वातन्त्र्येण प्रामाण्यं न भवति। उच्यते। 'चोदनालक्षणोऽर्थो धर्म' इति स्थापितम्। तथा चोक्तम् 'अशब्दमनपेक्षं स्यात्' इति। तत्र प्रत्यक्षगृहीतानि यान्यक्षराणि विनियुञ्जते सा श्रोत्रवृत्तित्वात् श्रुतिरित्युच्यते। यत्र त्वविनियोजकान्यक्षराणि प्रत्यक्षेण गृहीत्वा विनियोजकान्यर्था पत्त्या कल्प्यन्ते तत्र लिङ्गादीनि भवन्ति। ततश्चैवमर्थविप्रकर्षो भवति। ऐन्द्रीविनियोगं हि प्रति श्रुतिलिङ्गयोः सह प्रस्थितयोर्यदा श्रुतेर्विनियोजकान्यक्षराणि दृश्यन्ते तदा लिङ्गे स्मरणसमर्थानि ततो, यावत्तेषां प्रकरणाम्नानान्यथानुपपत्त्या विनियोजकानि कल्पयितुमारभ्यन्ते तावदितरैः प्रत्यक्षैर्विनियोगः प्रत्यायितः। तस्मिंश्च प्रतीते मन्त्रोऽपि

३ विनियोगो] विनियोगोऽपि कल्पते इति व्याख्यानानुसारी पाठः। अस्मिंस्तु पाठे यद्यपि श्रुत्या विनियोगः प्रतीयते, तथाऽप्यशक्तस्य विनियोगो नावकल्प्यत इति, अपिशब्दस्वारस्ये ज्ञेयम्।
२३ चोद] ( अ० १ पा० १ सू० २ )
२४ चोक्त] ( अ० १ पा० २ अ० १ सू० १ ) इत्यत्रेति शेषः
२८ स्थि] प्रस्थितयोः—प्रवृत्तयोर्मध्य इत्यर्थः।

प्रकरणिनं प्रति निराकाङ्क्षीभूतः। प्रकरण्यपि मन्त्रं प्रति। तथा सति प्रकरणाम्नानस्यान्यथाऽप्युपपद्यमानत्वान्नेन्द्राभिधानश्रुतिकल्पनायामर्थापत्तिः प्रभवति। न च श्रुतिमन्तरेण विनियोगः सिध्यति। बहुधा वर्णितं चैतत्पुरस्तात्, यथा साकाङ्क्षे वेदार्थे यत्कल्प्यते तद्वैदिकं नेतरदिति। तस्माच्छ्रुतिर्बलीयसी। न हि तस्याः किंचिदन्यदपेक्षणीयमस्ति यथा लिङ्गस्य श्रुतिरेवम्। आह च।
§ 5963

नापेक्षा यस्य यत्रास्ति स तस्माद्बलवान्भवेत्।
यः पराधीनवृत्तिः स तद्बाधं कथमाचरेत्॥ १ § 5965

श्रुत्यादीनां हि पूर्वं पूर्वमुत्तरोत्तरनिरपेक्षं प्रवर्तमानं बलवद्भवति परं परं तु पूर्वाधीनप्रामाण्यं न शक्नोति तस्यैव बाधं कर्तुम्। न हि श्रुतिमननुमाय लिङ्गादेः प्रामाण्यमध्यवसीयत इत्युक्तम्। नन्वेतदप्युक्तं नासमर्थं विनियुज्यत इति। सत्यमुक्तम्। अयुक्तं तूक्तम्। कुतः। § 5966

न श्रुतेर्विनियोक्तृत्वं लिङ्गाधीनं प्रतीयते।
विज्ञाते विनियोगे तु तद्वशाच्छक्तिनिर्णयः॥ § 5968

831 विनियोगोत्तरकालं हि कथमेतत्साधयिष्यतीत्यपेक्षिते यथा शक्नोतीत्यवधारणा भवति। तत्र यद्यपि स्वरूपेण तद्विषया शक्तिर्न दृश्यते तथाऽपि विनियोगदर्शनादेवानुमीयते। तदुक्तम् 'वचनात्त्वयथार्थमैन्द्री स्यात्' इत्यत्र। ननु च प्रागविद्यमानसामर्थ्यस्य विनियोगो न संभवतीति पूर्वतरं सामर्थ्यमनुमातव्यम्। ततश्च प्रत्यक्षाल्लिङ्गाद्दुर्बलत्वापत्तिः। सत्यम्। पूर्वभावित्वेन तत्कल्प्यते न तु पूर्वमेव गम्यते। न ह्यविनियुक्ताया ऐन्द्रया गार्हपत्याभिधानसामर्थ्यप्रतिपत्तिकारणमस्ति। निर्वृत्तविनियोगान्यथानुपपत्त्या पूर्वमपि विद्यमानं पश्चादेवानुमीयते। नन्वेवमपि तुल्योऽर्थविप्रकर्षः। तथा हि। § 5969

विक्षेपो यावता लिङ्गे स्याच्छ्रुतेरनुमापके।
लिङ्गानुमानभूतायां तावतैव श्रुतावपि॥ § 5971

सर्वथा ह्यदृश्यमानानुमानेन प्रत्ययविप्रकर्षो भवति। तच्चोभयत्रापि समानम्। सत्यमेतावत्समानं न तु तद्बलाबलं प्रत्युपयुज्यते। कुतः। § 5972

विनियोगाभिधानस्य दूरत्वाद्दूर्बलत्वधीः।
तच्च पूर्वानुमायां स्यान्नोत्तरत्र कथंचन॥ § 5974

लिङ्गे हि प्राग्भाविना श्रुत्यनुमानेन विना विनियोगाभिधानाभावाद्दूरत्वं भवति। श्रुतौ पुनरवगते विनियोगाभिधाने यस्मादेतदेवं तस्मान्नूनं किमपि

३ त्पुर] पुरस्तादिति—अनुषङ्गाधिकरणवार्तिक इत्यर्थः।

१७ व] ( अ० ३ पा० २ अ० २ सू० ३)

सामर्थ्यमस्तीति पश्चात्प्रवर्तमानमनुमानं न विनियोगप्रत्ययविक्षेपं करोति। सहप्रस्थितयोर्हि प्रमाणयोर्येन विनियोगदेशश्चिरेण प्राप्तो भवति स विक्षेपो दौर्बल्यकारो भवति। अवधारिते तु विनियोगे यद्यपि पश्चादनुमानसहस्रं भवति न तथाऽपि कश्चिद्विप्रकर्षः। एतेन लिङ्गवाक्यादियुगलानि व्याख्येयानि। सर्वत्र हि परस्य पूर्वमननुमाय विनियोगानुपपत्तिः। पूर्वेण तु कृते विनियोगे परस्य नान्तरीयकं सद्भावमात्रकल्पनमिति प्रतिपत्तिः। आह। श्रुतेस्तावत्प्रत्यक्षत्वेन लिङ्गाद्बलीयस्त्वं युक्तम्। अथ लिङ्गवाक्यादीनामनुमीयमानश्रुतित्वादविशेषे सति किंकृतं बलाबलमिति। तदुच्यते। § 5975

एकद्वित्रिचतुःपञ्चवस्त्वन्तरणकारितम्।
श्रुत्यर्थं प्रति वैषम्यं लिङ्गादीनामपीष्यते॥ § 5977

श्रुतिमात्रानुमानान्तरितो हि लिङ्गस्य श्रुत्यर्थः। वाक्यस्य पुनर्लिङ्गश्रुत्यनुमानव्यवहितः। कथम्। § 5978

वाचकेनैकवाक्यत्वादिहातद्वाचिनां सताम्।
कल्पयित्वाऽभिधाशक्तिं श्रुतिः पश्चात्प्रकल्प्यते॥ § 5980 832

सर्वत्र हि मन्त्रे किंचिदेव पदं कर्मसमवेतमर्थं वदति। यथा 'अग्नये जुष्टं निर्वपामि' इत्यग्निनिर्वपामिपदे। शिष्टानि त्वसमवेतार्थाभिधायित्वादप्रयोगार्हाणि सन्ति दृश्यमानैकवाक्यतान्यथानुपपत्त्याऽनुमितसामर्थ्याभिधानानि सन्ति स्वार्थमुपसर्जनीकृत्य तद्विशिष्टसमवेतार्थप्रकाशनेन प्रयोगार्थत्वं प्रतिपद्यन्ते। ततश्च श्रुतिमनुमाय विनियुज्यन्ते। तद्याविरोधे सति सर्वमभ्यनुज्ञायते। यदा दृश्यमानैकवाक्यत्वयोर्मन्त्रयोः पृथक् पृथक् प्रकाशयितव्यावर्थौ कर्मसमवेतौ दृश्येते तदोभयोरपि भेदेन प्रकाशकापेक्षणात्प्रकाशकयोश्च प्रकाश्यापेक्षणाद्विनियोगाय प्रस्थिते सति यस्य यत्र क्लृप्तं सामर्थ्यं स तत्र शीघ्रतरं प्राप्नुवन्नान्यत्रैकवाक्यतया नेतुं शक्यते। नाप्यन्येभ्यस्तत्राऽऽगच्छद्भ्यः सोऽवकाशं ददाति। कथम्। § 5981

एकवाक्यतया यावत्सामर्थ्यमनुमीयते।
सामर्थ्येन श्रुतिस्तावत्कल्प्यते विनियोजिका॥ § 5983

समुदायो हि विनियुज्यमानो नावयवानविनियुज्य विनियोक्तुं शक्यते। तत्र पूर्वोत्तरयोर्भागयोरेकवाक्यत्वं प्रत्यक्षम्। नैकार्थाभिधानसामर्थ्यम्। भिन्नार्थाभिधानसामर्थ्यं त्वर्थप्रत्ययदर्शनात्सिद्धम्। तत्र समुदायावयवविनियोगाय वाक्यसामर्थ्ययोः सहप्रस्थितयोरसमर्थविनियोगासंभवाद्याव-

१३ वा] वाचकेनेति श्लोकस्यायमर्थः। प्रयोगासमवेतार्थवाचिनां तत्समवेतार्थवाचकेनैकवाक्यत्वात्तेषां समवेतार्थाभिधानशक्तिं कल्पयित्वा पश्चाद्विनियोगाभिधायिनी श्रुतिः कल्प्यत इति।

२२ स्थि] प्रस्थिते सति—प्रस्थाने सतीत्यर्थः।

द्वाक्येन पूर्वो भाग उत्तरार्थाभिधानसमर्थ उत्तरो वा पूर्वसमर्थ इत्यनुमीयते तावत्प्रत्येकभागवर्तिना सामर्थ्येन पूर्वस्यापि स्वार्थे परस्यापि स्वार्थे श्रुतिरनुमिता। ततश्च यावदितरत्र विनियोजकंश्रुत्यनुमानाय प्रयत्यते तावदिह विनियोगे सिद्धे निराकाङ्क्षत्वात्प्रकरणाम्नानस्य न कश्चिदपि हेतुः श्रुत्यनुमान इत्यनुपजातमूलो विनियोगो बाध्यते। मन्त्रस्यापि हि पूर्वस्य पूर्वत्रार्थे शीघ्रं विनियोग उत्तरस्य चिरेण। तथोत्तरोत्तरस्य शीघ्रं पूर्वस्य तत्र चिरेण। शीघ्रविनियुक्तश्च मन्त्रश्चिरविनियोगं नाऽऽद्रियते। तथाऽर्थोऽपि प्रथमावगतमन्त्रावरुद्धो नेतरं गृह्णाति। स्वप्राधान्ये च संभवति न परोपसर्जनत्वं प्रतिपद्यते। तस्माल्लिङ्गं बलीय इति भित्त्वा वाक्यं विनियोग इति। नन्वेवं सति ‘निर्वपामि’ इत्यादेना क्लृप्तसामर्थ्येन शीघ्रतरप्राप्तेनावरुद्धेऽर्थे विप्रकृष्टप्राप्तानां ‘देवस्य त्वा’ इत्यादीनां बाधादविनियोगः प्राप्नोति। न चैषां भिन्नप्रयोजनत्वात्समुच्चयः। तथा सत्येकवाक्यत्वाभावात्। अवश्यं चैतैर्यथाकथंचिन्निर्वाप एव प्रकाशयितव्यो नान्यप्रकाशनं, कर्मानङ्गत्वप्रसङ्गात्। अतः समानविषयत्वात्समवाये सति वाक्यप्राप्यपदान्तरबाधेन भवितव्यमिति। अत्रोच्यते। § 5984

833 पदान्तराणि यत्रार्थं वदेयुः कर्मवर्तिनम्।
तत्रैवमितरेषां तु वाक्यमप्यगतेर्वरम्॥§ 5986

यानि ह्यसमवेतार्थवचनानि तानि यदि स्वतन्त्री क्रियन्ते ततोऽनर्थकानि भवन्ति। तेन क्लृप्तसंबन्धैर्निराकाङ्क्षीकृतोऽप्यर्थ इतरेषां साकाङ्क्षत्वात्पुनस्तत्प्रकाश्यत्वं प्रतिपद्यते। यथा प्रकरणपूरितानामपि क्रमेण पुनस्तद्धर्मप्राप्तिर्भवति। यथा प्रकृतौ निराकाङ्क्षीभूता धर्मा विकृतीर्गमिष्यन्ति। तथा च क्लृप्तौ व्याख्यातम्। तस्मादेवमादीन्यपि संबध्यन्ते। येषां तु प्रकाश्योऽर्थः समवेतो दृश्यते, तेषामनभिधेयेनासंबध्यमानानामप्यर्थवत्ताऽस्तीति नाऽऽनर्थक्यनिमित्तमवकाशं लभन्ते। सर्वेषामेव च श्रुत्यादीनामानर्थक्यप्रतिहतानां दुर्बलैरपि बाध्यत्वमिष्यते। तद्यथः—व्रीह्यादीनां प्रोक्षणादीन्प्रति श्रुत्या शेषित्वं प्राप्नुवदप्यतिलङ्घ्य प्रकरणलभ्यापूर्वसाधनत्वकृतः संबन्धो भविष्यति। तेनावस्थितं वाक्याल्लिङ्गस्य बलीयस्त्वम्। तथा च भक्षानुवाके दर्शितम्। वाक्यप्रकरणयोः प्रकरणमर्थविप्रकर्षाद्दुर्बलम्। तथा हि। § 5987

प्रत्यक्षा संगतिर्वाक्ये न च प्रकरणेऽस्त्यसौ।
आकाङ्क्षातोऽनुमातव्या तावता विप्रकृष्टता॥§ 5989

प्रकरणे हि स्वार्थपरिपूर्णानामङ्गाङ्गिवाक्यानामुपकार्योपकारकत्वाकाङ्क्षामात्रं दृश्यते। वाक्ये तु प्रत्यक्षः संबन्धः। ततश्च सहप्रस्थितयोर्यावत्प्रकरणेनैक-

२२ व्याख्या] अनुषङ्गाधिकरण इति शेषः। इत्यत्रेति शेषः
२७ तेना] ततोऽवस्थितमिति पा०।
२७ र्शित] ( अ० ३ पा० २ अ० ९ )

वाक्यता कल्प्यते तावद्वाक्येनाभिधानसामर्थ्यं, यावदितरत्र वाक्येन सामर्थ्यं तावदिह सामर्थ्येन श्रुतिर्यावदितरत्र सामर्थ्येन श्रुतिस्तावदितरत्र श्रुत्या विनियोगोऽभिहित इति विच्छिन्नायामाकाङ्क्षायां श्रुत्यनुमाने मूलाभावाद्विहते कल्पितमपि शेषत्वं निष्पत्तिमगत्वाऽन्तरेव विलीयते। तस्माद्वाक्यं बलीयः। तथा क्रमप्रकरणयोः क्रमस्यार्थविप्रकर्षः। कथम्। § 5990

आकाङ्क्षातः प्रभृत्येकं श्रुत्यर्थं प्रति गच्छति।
तामपि त्वन्यतो लब्ध्वा श्रुतिरेकस्य कल्प्यते॥§ 5992

क्रमो नाम निरपेक्षाणां सतां पाठानुष्ठानदेशसाम्यमात्रम्। यदि त्वाकाङ्क्षावतः संनिधावाम्नायेत ततः प्रकरणमेव स्यात्। अत्र च प्रायेण महाप्रकरणोपनिपातिन्यो विकृतय उदाहरणम्। तासु हि यत्प्राकृताङ्गमध्यपातित्वेन नोत्पन्नं तत्पुरस्तात्परस्ताद्वाऽवस्थितक्रमभाग्भवति। प्रकरणस्य कॢप्तोपकारैः प्राकृतैर्व्यावर्तितत्वात्। तत्र यन्निवृत्ताकाङ्क्षस्य कस्यचित्समीपे पठ्यतेऽन्यस्य चाऽऽकाङ्क्षा ततस्तदुभाभ्यां गृह्यमाणं यावत्क्रमवतो निवृत्तमसतीमाकाङ्क्षामुपजनयति तावत्प्रकरणवता सहैकवाक्यतां गच्छति, याव- 834 च्चेतरत्रैकवाक्यता भवति तावत्प्रकरणिनं प्रत्युपकारसामर्थ्यकल्पना। यावदितरत्रासौ तावदिह श्रुत्यनुमानं यावदितरत्र श्रुतिरनुमास्यते तावदिह सिद्धे विनियोगेऽनुमानबीजहीनेनाकॢप्तश्रुति सर्वमप्रमाणी भवति। तथा क्रमसमाख्ययोः क्रमे वेदकल्पितमेवाङ्गाङ्गिनोर्देशसामान्यनिमित्तं परस्परपर्युपस्थापनम्। सर्वत्र हि केनचिदभिन्नदेशेन संबन्धोऽवकल्पते। न च समाख्यानवतः किंचिद्देशसामान्यं वेदकॢप्तमुपलभामहे। येन संबन्धाभिमुख्यसंभवः। ननु च समाख्या संबन्धमेवाभिदधाना प्रवर्तत इति श्रुतितुल्या प्राप्नोति। नैतदेवम्। § 5993

अन्य एव हि संबन्धः कल्प्यते यः समाख्यया।
अन्यच्च शेषशेषित्वं यच्छ्रुत्या प्रतिपाद्यते॥§ 5995

अर्थानां प्रथमं केनचित्प्रकारेणानवगतसंबन्धानां समाख्या प्रवर्तते। सा च शेषशेषित्वं तावन्नैव प्रतिपादयति। केनचित्संबन्धेनोपपद्यमानत्वात्संबन्धमात्रमपि नैवाभिधत्ते। न हि यौगिकैः संबन्धोऽभिधीयत इत्युक्तम्। समाख्यान्यथानुपपत्त्याऽनुमीयते। संबन्धमात्रस्य चैतद्रूपं किंचिदभिन्नमेषामस्तीत्यवगमः। ततश्चाऽऽपन्नं क्रमाज्जघन्यत्वम्। न हि किंचित्तत्र सामान्यमनुमातव्यं देशसामान्यस्य प्रत्यक्षत्वात्। इह तु तत्पदस्याप्रत्यक्षत्वादानुमानिकत्वमिति विप्रकर्षः। समाख्या हि यावत्किंचित्सामान्यमस्तीति कल्पयति तावत्क्रमेण नूनमनयोः काचिदपेक्षाऽस्ति येनेत्थं समानदेशौ पठिताविति प्रकरणं कल्प्यते। यावच्च किंचित्सामान्यमपेक्षां कल्प्यति तावदितरत्रैकवाक्यता

४ क] अंकल्पितमपि शेषत्वमिति पा॰।

क्लृप्ता। तथा यावदिहैकवाक्यता भवति तावदितरत्रोपकारसामर्थ्यसिद्धिः। यावच्चेहोपकारसामर्थ्यकल्पना तावदितरेण श्रुतिरुत्पादिता। ततश्च यावदिह श्रुतिमनुमातुमुपक्रमते तावदितरत्र विनियोगे सिद्धे निराकाङ्क्षीभूते प्रकरणपाठे सर्वमेतत्प्रचितमप्यपरिपक्वविच्छेदादामसस्यमिव लूनं निर्बीजं भवति। तस्मादर्थविप्रकर्षात्तु परं परं बाध्यत इति सिद्धम्। आह च। § 5996

निःश्रेण्यारोहणप्राप्यं प्राप्तिमात्रोपपादि च।
एकमेव फलं प्राप्तुमुभावारोहतो यदा॥ § 5998

एकसोपानवर्त्येको भूमिष्ठश्च परस्तयोः।
उभयोश्च जवस्तुल्यः प्रतिबन्धश्च नान्तरा॥ § 6000

विरोधिनोस्तदैको हि तत्फलं प्राप्नुयात्तयोः।
प्रथमेन गृहीतेऽस्मिन्पश्चिमोऽवतरेन्मुधा॥ § 6002

तेन यद्यपि सामर्थ्यं प्रत्येकं सिद्धमन्यदा।
तथाऽपि युगपद्भावे जघन्यस्य निराक्रिया॥ § 6004

835 अन्यथैव हि शून्येषु दुर्बलैरपि चर्यते।
अन्यथा बलवद्ग्रस्तैः सर्वशक्तिक्षये सति॥ § 6006

तस्मान्नैतदालम्बनं युक्तं यत् क्वचिदुत्तरेषां प्रामाण्यमिष्टम्। तस्माद्बलवद्विरोधेऽपि तेन भवितव्यमिति। यत्तु प्रमाणाभासो बाध्यते न प्रमाणमिति। तत्र ब्रूमोऽयमपि प्रमाणाभास एव। कथम्। § 6007

नैवैतेषां प्रमाणत्वमासीदत्र कदाचन।
अन्यत्र दृष्टमेतत्तु समारोपेण कल्पितम्॥ § 6009

नहि यत्र विषये बाधस्तत्रैषां प्रमाणत्वम्। किं तर्हि। प्रदेशान्तरे केवलानामुपलक्षितं सामान्यतो दृष्टरूपेणात्रापि प्रतिभाति। तत्तु बलीयसाऽपहृतविषयत्वात्सीदतीति पश्चाद्भ्रान्तित्वेनाध्यवसीयते। अथवा यस्तत्रास्य व्यापार आसीत्तमिहापि प्रक्रमत एव। स तु जववताऽन्येन विषयेऽपहृते मूलच्छेदाद्यदा तं न गच्छति तत्किं क्रियताम्। तेन मृगतृष्णादिवदेवाप्राप्य प्रमाणमेव बाध्यते। अनुत्पन्नमेव चेह श्रुत्यभावाच्छेषज्ञानं बाध्यते। आन्तरालिकज्ञानमिथ्यात्वकल्पनयेति नोत्पत्तिसामान्येन तुल्यबलत्वम्। अतश्च ज्ञानसंकरोच्छेदनादिरूपो बाधो नैवाऽऽशङ्कितव्यः। योऽपि चोत्पन्नबाधस्तमपि फलवियोगात्मनोपपादयिष्यामः। एवं तावद्द्वयोर्द्वयोर्विरोधे व-

२५ त] तत्किं क्रियतामिति। तत्तदा, बलवता विषयापहारेण दुर्बलं प्रमाणाभासतां यातीत्याशयः।

र्णितम्। अर्थसिद्धत्वात्तु भाष्यकारेणेतरैः सह न प्रदर्शितं व्याख्यातृभिस्त्वेवं प्रपञ्चयितव्यम्। यथा **श्रुतिवाक्ययोर्विरोधे,** अरुणादिवाक्यसामर्थ्यादानन्तर्यसामानाधिकरण्याभ्यामेकहायन्यादिशेषत्वं प्राप्नुवत्तृतीयाश्रुत्या क्रयसंबन्धित्वेन विज्ञायते। द्वितीयसोपानभूगतारोहकयोरिव ह्यत्र यावद्वाक्यं सामर्थ्यं कल्पयति तावच्छ्रुत्या विनियोगः कल्पित इति महदन्तरम्। **श्रुतिप्रकरणयोर्विरोधे** प्रकरणादेकविंशत्याद्यनुवचनानां दर्शपूर्णमासाङ्गत्वे प्राप्ते श्रुत्यैव प्रतिष्ठाकामादिषु पुरुषार्थावधारणात्प्रकरणबाधः। अनुवचनानां च क्रियात्मकत्वादितिकर्तव्यतारूपत्वात्प्रकरणग्राह्यत्वेन तद्विरोधोदाहरणत्वम्। 'तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य' इति तु द्वादशत्वस्याक्रियात्वादनितिकर्तव्यतात्मकत्वे सति कथंभावरूपप्रकरणग्राह्यत्वानुपपत्तेः संनिधिमात्रेण प्रकरणकल्पनापूर्वकसंबन्धाध्यवसानाच्छ्रुतिस्थानविरोधोदाहणत्वं युक्तमित्येके। तत्तु नैवमाश्रितम्। कुतः। § 6010

यदि द्रव्यगता संख्या स्वतन्त्रा वा भवेदियम्। 836
नेत्थंभावेन गृह्येत क्रियारूपेण वर्जनात्॥§ 6012

इतिकर्तव्यतांशस्थां येनोद्दिश्योपसत्क्रियाम्।
द्वादशत्वविधिस्तेन कथंभावेन गृह्यते॥§ 6014

इहापि च कथंभावविनियुक्तोपसद्गता।
यावत्संख्यैकवाक्यत्वसामर्थ्ये कल्पयिष्यति॥§ 6016

तावत्प्रत्यक्षया श्रुत्या षष्ठ्याऽहीनाङ्गतां गता।
नैव ह्यहर्गणादन्यदहान्यहीनमुच्यते॥§ 6018

**श्रुतिक्रमविरोधे** किमुदाहरणमिति। § 6019

उच्यते रशनाधर्मा दर्भमय्यादयः क्रमात्।
अग्नीषोमीयशेषाः स्युः श्रुत्या यूपाङ्गतां गताः॥§ 6021

एतद्यूपपरिव्याणशेषो हि रशना श्रुता।
सह धर्मैर्न सा याति क्रमेण पशुशेषताम्॥§ 6023

---

३ सा] आनन्तर्यसामानाधिकरण्याभ्यामिति—ताभ्यामवगताद्वाक्यसामर्थ्यादित्यन्वयतोऽर्थः।
४ द्वितीय] निःश्रेण्या रोहणप्राप्तं प्राप्तिमात्रोपपादि च। एकमेवफलं प्राप्तुमुभावारोहतो यदा॥ एकसोपानवर्त्येको भूमिष्टश्चापरस्तयोः। इत्यादिना वृद्धश्लोकोपपादितं दृष्टान्तं विषयानुसारेण प्रकृते योजयति—द्वितीयसोपानेत्यादिना।

यावत्प्रकरणादीनि तस्याः कल्पयति क्रमः।
चतुर्भिस्तैर्व्यपेतत्वाच्छ्रुत्या तावत्स जीयते॥§ 6025

आकाङ्क्षामात्रमेवैकं यावत्कल्पयति क्रमः।
दूरेण तावदप्राप्तां रशनां हरति श्रुतिः॥§ 6027

**श्रुतिसमाख्ययोर्विरोधे** किमुदाहरणम्। पौरोडाशिकमिति समाख्याते दर्शपूर्णमासकाण्डे पठितो मन्त्रः साधारणे प्रकरणे वर्तमानः क्रमेण चानुन्मीलितलिङ्गेनाविनियुज्यमानः पुरोडाशस्यैव वा प्राथम्यात्प्राप्नुवन्, श्रुत्या सांनाय्यार्थशाखाङ्गत्वेन विधीयते ‘इषे त्वेति शाखां छिनत्ति’ इति। तत्रापि यावत्समाख्यया किंचित्सामान्यं कल्प्यते तावच्छ्रुत्या विनियुक्तत्वात्प्रकरणवाक्यसामर्थ्यश्रुतिष्वकल्पितास्वेव बाधः। एवं लिङ्गस्य प्रकरणादिविरोध उदाहर्तव्यः। तत्र **प्रकरणविरोधे** तावत्पूषानुमन्त्रणान्युदाहर्तव्यानि। यावच्च प्रकरणेनैकवाक्यत्वं कल्प्यते तावल्लिङ्गेन श्रुतिः। तथा यावदितरत्र प्रकृताग्न्यादिप्रकाशनसामर्थ्यं तावदिह विनियोग इति बाधः। **लिङ्गक्रमयोर्विरोधः** स्तुतशस्त्राधिकरणे दर्शितः ‘अर्थेन त्वपकृष्येत’ इति। स्थितोदाहरणमपि यथाऽभ्यनुज्ञापनाभ्यनुज्ञयोः प्रज्ञातक्रमयोः ‘उपहूत उपह्वयस्व’ इत्येवं मन्त्रावाम्नातौ। तौ देशसामान्यात्तथैवाङ्गतया प्राप्नुतः ‘उपहूत’ इत्यनुज्ञापने
837 ‘उपह्वयस्व’ इत्यनुज्ञायाम्। न तु तथा सामर्थ्यमस्तीति विपरीतं शेषत्वम्। यावद्धि स्थानेन प्रकरणमुत्पाद्यैकवाक्यत्वं कल्प्यते तावल्लिङ्गेन श्रुतिं कल्पयित्वा साधितो विनियोग इत्यकल्पितलिङ्गश्रुतिपदकस्यैव क्रमस्य बाधः। तथा परिव्याणकरणक्रियमाणानुवादिनोः ‘परिवीरसि’ ‘युवा सुवासाः’ इति वाऽग्नीषोमीयपरिव्याणाङ्गत्वे प्राप्ते लिङ्गात्सवनीयांर्थाद्वितीयपरिव्याणाङ्गत्वमपि। कथं न मनोता, अग्नीषोमीयक्रमबाधनसमर्थेन लिङ्गेनाऽऽग्नेयसवनीयपशुयागाङ्गमिति चेत्। न। ‘वचनात्त्वयथार्थमैन्द्री स्यात्’ इतिवद् बलवत्तरश्रुतिकृतविनियोगकल्पितलक्षणाद्वारेणाग्नीषोमीयाङ्गत्वात्। एवं ह्याह ‘यद्यप्यन्यदेवत्यः पशुराग्नेय्येव मनोता कार्या’ इति। अनया हि श्रुत्या लिङ्गेनोत्कृष्यमाणा मनोता वारिता। द्विदेवत्येऽप्येकदेवत्यैव न केवलाग्निदेवत्यत्वेनाग्नीषोमीयादुत्तारणीयेत्यर्थः। यद्वेवकारं स्वस्थानादपनीय यथाक्रमं कार्यैवेत्यत्र संयोजना कार्येत्यवधार्यते। **लिङ्गसमाख्याविरोधे** तु भक्षानुवांके ग्रहणादिवाक्यानि समाख्यानाद्भक्षाङ्गत्वेन संबन्धसामान्यादिकल्पनया भक्षाङ्गत्वविनियोगाय प्रस्थितानि लिङ्गेन ग्रहणावेक्षणसम्यग्जरणेषु विनियुज्यन्त इति स्थितम्। याज्यासमाख्याबाधेन च मनोर्ऋचां पृथुपाजवत्योश्च लिङ्गेन सामिधेनीत्वेन विनियोग इत्युक्तम्। **वाक्यक्रमयोर्विरोधे** परिव्याणकरणक्रिय-

१४ त्व] ( अ॰ २ पा॰ १ अ॰ ५ सू॰ १४ )
२३ ना] ( अ॰ ३ पा २ अ॰ २ सू॰ ३ )
३१ स्थि] ( अ॰ ३ पा॰ २ अ॰ ९ ) इत्यत्रेति शेषः।
३२ विनियोग] ( अ॰ ३ पा॰ २ अ॰ ७ ) इत्यत्रेति शेषपूरणम्

माणानुवादिपरिवीरसिपरिवीतपदव्यतिरिक्तपदानां ‘युवा सुवासा आगात् स उ श्रेयान्’ इत्येवमादीनां लिङ्गविनियुक्तपरिवीतपदैकवाक्यत्वात्सवंनीयपरिव्याणे विनियोगः। **वाक्यसमाख्ययोर्विरोधे** भक्षानुवाक एव संध्यासमित्येवमादिषु ग्रहणादौ विनियुज्यमानेषु तदेकवाक्यगतशेषपदावृत्तिरुदाहर्तव्या। तथाऽऽध्वर्यवादिसमाख्यानाज्ज्योतिष्टोमादिप्रधानेषु तदर्थेष्वेव प्राप्नुवत्सु स्वर्गकामाद्येकवाक्यत्वादर्थिमात्रविषयत्वं विज्ञायते। ननु च श्रुतिरेवैषा भवेत्। नात्र कस्यचिच्छब्दस्य श्रवणादेतद्विज्ञायते। लिङा कर्तुरनभिधानात्। किं तर्हि। पदद्वयसंनिकर्षादेवैतल्लक्षणया सामानाधिकरण्यावदगम्यते। तस्माद्वाक्येनैव समाख्या बाध्यत इति। **प्रकरणसमाख्ययोर्विरोधे** पौरोडाशिकसमाख्यातब्राह्मणाम्नातानां प्रयाजादीनां प्रकरणात्सांनाय्योपांशुयाजार्थत्वमित्युदाहरण- 838
म्। एवं तावदेकस्य शेषस्यानेकं शेषिणं प्रति नीयमानस्य विरोध उदाहृतः। एतयैव तु दिशाऽनेकस्य शेषस्यैकं शेषिणं प्रति नीयमानस्य विरोध इदानीमुदाहर्तव्यः। तद्यथा **श्रुतिलिङ्गयोर्विरोधे** ‘ऐन्द्र्या गार्हपत्यमुपतिष्ठते’ इति मन्त्रकर णकव्यापारविधाने कृते लिङ्गात्कस्मिंश्चिदाग्नेये मन्त्रे शेषत्वेन प्राप्नुवति श्रुत्यैन्द्री विनियुज्यते। तदवरुद्धे चोपस्थाने नेतरस्यावकाशो विद्यते। **श्रुतिवाक्ययोर्विरोधे** यज्ञायज्ञीयप्रगाथैकवाक्यभूतगिरापदप्राप्ताविरापदविधानमुदाहरणम्। तथा विश्वेषां देवानां श्रुत्याऽऽमिक्षैव, शेषो हि तेषां वाक्येन वाजिनं तद्दुर्बलप्रमाणत्वात्तया श्रुत्या निराकृतम्। **श्रुतिप्रकरणयोर्विरोधे** प्रतिष्ठाकामदर्शपूर्णमासप्रयोगे प्रकरणात्पञ्चदशसंख्यसामिधेन्यनुवचनेऽङ्गत्वेन प्राप्ते श्रुत्यैकविंशतिसंख्यानुवचनान्तराङ्गत्वावगमात्प्राकरणिकनित्यानुवचनबाधः। **श्रुतिक्रमाविरोधे—** § 6028

पशुकामप्रयोगे च क्रमेण चमसाङ्गता।
श्रौताद्गोदोहनात्तत्र चमसस्य निराक्रिया॥ § 6030

**श्रुतिसमाख्याविरोधे—** § 6031

वाजपेयः समाख्यानात्प्राप्नोत्यध्वर्युकर्तृकः।
श्रुत्या स्वाराज्यकामस्य तथाऽध्वर्योर्निराक्रिया॥ § 6033

तथा ‘यजमानस्य याज्या’ इत्युदाहरणम्। ऋतुयाजेषु हि हौत्रसमाख्यया होतुः प्राप्ता याज्या यजमानकर्तृकत्वेन कर्तृसंबन्धवाचिन्या षष्ठीश्रुत्या प्रतिपाद्यते। **लिङ्गवाक्यविरोधे—** § 6034

---

३ मा] वाक्यसमाख्ययोर्विरोध इति—भक्षानुवाकगतसध्यासमित्यादेर्लिङ्गाद्ग्रहणादौ विनियोगेऽवगततदेकवाक्यतापन्नशेषपदानां समाख्यया भक्षाङ्गत्वप्रसक्तौ वाक्याद्ग्रहणाद्याङ्गत्वमित्याशयः।

४ प] शेषपदावृत्तिरिति—आङोऽर्वागर्थकत्वाच्छेषपदानां भक्षणादर्वागनुष्ठीयमानेषु ग्रहणादिषु वृत्तिः—विनियोग इत्यर्थः।

६ न] कर्त्रधिकरणे निषेत्स्यमानमाख्यातस्य कर्तुरनभिधानमपर्यालोच्यास्य श्रुतिसमाख्योदाहरणत्वं शङ्कते—नन्वित्यादिना।

२६ स्य] स्वाराज्यकामस्येति—कर्तृतेत्यध्याहारः।

स्योनादेरपि शेषत्वं वाक्येन सदनं प्रति।
सीदेत्यस्यैव लिङ्गेन न तेनायं पूर्वबाधनः॥§ 6036

तथाऽभिधारणे तस्मिन्सीदेत्यस्यापि शेषता।
स्योनादेरेव लिङ्गेन तस्मात्स परबाधनः॥§ 6038

अनेकशेषिशेषत्वात्पूर्वमेतावदाहृतौ।
अनेकशेषसंबन्धात्संप्रत्येकस्य शेषिणः॥§ 6040

पूर्वं स्योनं त इत्यादि सदने साभिधारणे।
वाक्येनाङ्गतया प्राप्तं लिङ्गाच्छुद्धेऽभिधारणे॥§ 6042

तस्मिन्सीदेत्ययं वाक्यात्प्राप्तः शेषोऽभिधारणे।
लिङ्गात्तु सदनस्यैव तत्रैवातः प्रयुज्यते॥§ 6044

एकैकस्मिंस्तु शेषत्वं वाक्यात्प्राप्तं द्वयोर्द्वयोः।
एकैकस्य तु लिङ्गेन तच्च संप्रति गृह्यते॥§ 6046

839 एकस्मिन्नेव मार्गे तु यत्संकीर्णचतुष्टयम्।
अभाणि भाष्यकारेण विवेक्तव्यं तदात्मना॥§ 6048

**लिङ्गस्य प्रकरणक्रमसमाख्याविरोधे** निर्वापादिषु लिङ्गेन देवस्य त्वेत्यादिना प्रकरणप्राप्तमन्त्रान्तरबाधः। प्रथमस्य काम्यस्यैन्द्राग्नस्य क्रमात्सामिधेनीकार्यप्राप्तस्य याज्यानुवाक्यायुगलस्य लिङ्गेन बाधः। समाख्यया मनोर्ऋचां सोमारौद्रियेषु याज्यानुवाक्यात्वेन प्राप्तानां सोमरुद्रलिङ्गाभिर्याज्यानुवाक्याभिर्बाध इत्युदाहरणानि। **वाक्यप्रकरणयोर्विरोधे** ‘पूर्वेद्युरमावास्यायां वेदिं करोति’ इत्युदाहरणम्। प्रकरणेन हि हविरभिवासनोत्तरकालं यद्विधानं तस्य ग्रहणं प्राप्नोति। अभावास्यासमभिव्याहारेण तु पूर्वेद्युः। न चात्र श्रुतित्वम्। न हि सप्तमी शेषशेषिसंबन्धं वदति। यत्त्वधिकरणत्वमभिधत्ते तत्तत्कर्मणोऽनुपपन्नमेव। तस्मात्पदसंनिधानेनैष संबन्धः। स च शीघ्रतरं भवतीत्युक्तम्। **वाक्यक्रमयोर्विरोधे** किमुदाहरणम्। ज्योतिष्टोमे काम्यनैमित्तिकेषु प्रतिपत्कल्पेषु प्रतीकग्रहणात्पादमात्रं श्रुत्या विनियुज्यते। तत्र द्वितीयपादात्प्रभृति यथासंख्यक्रमेण नित्यानामेवर्चां प्रसङ्गः। तद्यथा ‘वृषा पवस्व धारयेति राजन्याय प्रतिपदं कुर्यात्’ इत्यत्र ‘पवमानायेन्दवे। अभि देवां इयक्षते ’इत्येतावेव द्वितीयतृतीयपादौ प्राप्नुतः। वाक्याच्च

१५ लि] लिङ्गेनेति—लिङ्गप्रमाणप्रापितेनेत्यर्थः।

'मरुत्वते च मत्सरः। विश्वा दधान ओजसा' इति। ननु विभक्तिभेदादत्र लिङ्गविरोधः स्यात्। नैष दोषः। सर्वेषां सोमलिङ्गत्वाद्विभक्तिभेदेन त्वेकवाक्यत्वमेव नोपपद्यते। तद्यावदाकाङ्क्षापूर्वकमेकवाक्यत्वादि कल्प्यते तावदितरेणाऽऽनन्तर्यात्समानविषयत्वाच्च सामर्थ्यादि कल्पयित्वा विनियोगः कृत इति बलीयस्त्वम्। **वाक्यसमाख्ययोर्विरोधे** 'तस्मान्मैत्रावरुणः' प्रेष्यति चानु चाऽऽह' इति हौत्रसमाख्याते प्रवचने प्रैषानुवचनमाम्नातम्। तस्य कर्तृविशेषाकाङ्क्षिणः समाख्यया होता प्राप्नोति। वाक्येन मैत्रावरुणः। एकेन च कृतार्थस्य न कर्त्रन्तरापेक्षा भवति। तत्र शीघ्रतरप्राप्ते मैत्रावरुणे प्रकरणकल्पनां यावत्पाप्ता समाख्या बाध्यते। न चायं श्रुतिविरोधः। आख्यातपदेन कर्तुरनभिधानान्मैत्रावरुणपदे च कारकविभक्ति प्रयोगाभावात्। **प्रकरणक्रमयोर्विरोधे** गिरापदेरापदे एव स्तोत्रापेक्षयोदाहरणम्। अग्निष्टोमसाम्नः क्रमेण गिरापदं प्राप्नोति प्रकरणादिरापदम्। तच्च बलीयः। पूर्वं तु सामापेक्षयोदाहृतमासीदित्यसंकीर्णविषयत्वम्। **प्रक्रियासमाख्ययोर्विरोधे** 'तस्मान्मैत्रावरुणः प्रेष्यति चानु चाऽऽह' इत्येतदेव ज्योतिष्टोमं प्रत्युदाहरणम्। 840 तस्य हि समाख्यया होतृकर्तृकं प्रैषानुवचनं प्राप्नोति। प्रकरणात्तु मैत्रावरुणकर्तृकं निर्णीयते। प्रैषानुवचनस्वरूपापेक्षं च पूर्वत्रोदाहरणमिति भेदः। **क्रमसमाख्ययोर्विरोधे** किमुदाहरणम्। काम्ययाज्याकाण्डाधीतयोरैन्द्राग्नयुगलयोरुभयोरपि विकल्पेन कर्मद्वयेऽपि प्रयोगः समाख्यानुरोधेन प्राप्नोति। क्रमबलीयस्त्वात्तु प्रथमस्य प्रथमं द्वितीयस्य द्वितीयमेवेति व्यवस्था। लिङ्गं तु पक्षद्वयेऽपि तुल्यार्थामिति क्रमसमाख्ययोरेव विरोधः। एवं शेषैकत्वे शेष्येकत्वे च श्रुत्यादिसमवायश्चिन्तितः। यथा चैषामर्थविप्रकर्षाद्विजातीयैः सह बलाबलमेवं सजातीयैरपि यत्र हेतुसामान्यं तत्र दर्शयितव्यम्। तद्यथा श्रुतेरेव तावत्सामान्यविशेषादिभावेन शेषविषयः समवायः। 'पुरोडाशं चतुर्धा' करोति' इत्यविशेषश्रवणादग्नीषोमीयादावपि प्राप्नुवत् 'आग्नेयं चतुर्धा' इति तु विशेषश्रवणेन विशेषे चतुर्धाकरणमुपसंह्रियते। तथा शेषिसमवाये 'यदाहवनीये जुहोति' इति सप्तमीश्रुत्या जुहोतिसामानाधिकरण्येनावभृथेऽप्याहवनीयः प्राप्यमाणो विशेषसंयुक्तया 'अप्स्ववभृथेन' इत्यनया बाध्यते। संदिग्धासंदिग्धत्वेन च बलाबलविशेषो भविष्यति। एवं पौर्वापर्यविरोधाङ्गगुणविरोधादिष्वपि श्रुतिद्वयमुदाहर्तव्यम्। § 6049

तथा पश्वङ्गमेकत्वं पदश्रुत्या प्रतीयते।
समानप्रत्ययश्रुत्या बलीयस्या क्रियाङ्गता॥ § 6051

तथा धात्वर्थकर्मत्वे पदश्रुत्योपपादिते।

१२ सा] अग्निष्टोमसाम्न इति—अग्निष्टोमस्तोत्रस्येयर्थः।

१३ प्र] प्रक्रियेति—प्रकरणमित्यर्थः।

भावनाया विधिश्रुत्या पुरुषार्थस्य साध्यता॥ § 6053

तथा **लिङ्गद्वयविरोधे** ‘स्योनं ते सदनं कृणोमि’ इत्येवोदाहरणम्। द्वे हि तत्र लिङ्गे। परस्परैकवाक्यतागमनसामर्थ्यात्मकमेकमर्थाभिधानशक्तिरूपमपरम्। एतच्च श्रुत्यनुमानस्य प्रत्यासन्नम्। विप्रकृष्टमितरद्वाक्यादपि जघन्यत्वादित्युक्तं भाष्ये। **वाक्ययोर्विरोधे** ‘पञ्चदश सामिधेनीरनुब्रूयात्’ ‘सप्तदश वैश्यस्य’ इत्येतदुदाहरणम्। उभयत्रापि हि समानाधिकरण्यादेकवाक्यत्वे कृते विनियोगे सति निमित्तविशेषसंयोगात्साप्तदश्यं बलीयो भवति। **प्रकरणयोर्विरोधे** ‘अभिक्रामं जुहोति’ इत्युदाहरणम्। महाप्रकरणेन ह्यस्य दर्शपूर्णमासार्थता। अवान्तरप्रकरणेन तु प्रयाजार्थता। तच्च बलीयः। तत्र हि प्रत्यासत्तेरननुभूते महाप्रकरणसंस्पर्शे पूर्वतरं वाक्यस्थानीयः संबन्धोऽवकल्पते। **क्रमयोर्विरोधे** काम्य एव याज्याकाण्डे पौर्वापर्यप्रत्यासत्तिक्रमेण
841 तयोरैवैन्द्राग्नीययो र्युगलयोरनियमेनोष्टिद्वयेऽप्यनियमेन प्राप्नुवतोर्यथाख्यक्रमेणात्यन्तदेशसाम्येन प्रत्यासन्नत्वाद्विनियोगो भवति। **समाख्ययोस्तु विरोधे** सामान्यविशेषसमाख्ययोः सूत्रबद्ध एव बाधो भविष्यति ‘तस्योपदेशसमाख्यानेन निर्देशः’ इति। शेषशेषिसमवायश्च प्रत्येकं विविच्योदाहर्तव्यः। एवं तावत्प्रत्यक्षेषु श्रुत्यादिषु विचारितम्। एतयैव दिशाऽनुमानादिगम्येष्वपि सजातीयविजातीयसमवाये विचारयितव्यम्। तत्र च प्रत्यक्षगम्यानामानुमानिकैरानुमानिकानां चाऽऽनुमानिकैः सह पूर्वोक्तेनैव मार्गेण सजातीयविजातीयबलाबलं व्याख्येयम्। तद्यथाऽतिदेशप्राप्ताः श्रुत्यादयः प्रत्यक्षैर्विकृतिषु बाधिष्यन्ते। विपरीतोऽपि चेह बाधो भवति। पूर्वं पूर्वमपि ह्यानुमानिकं परेण परेणापि प्रत्यक्षेण बाध्यते। यथा कृष्णलेषु सामर्थ्येनावघातः। सर्ववस्तुविषयं च सामर्थ्यं, लिङ्गं केवलं मन्त्रगतमेवावगन्तव्यम्। तथा च यान्यप्यन्यार्थदर्शनान्यनन्यगतीनि तेषामपि लिङ्गत्वमभिधास्यते। का पुनरत्र लिङ्गस्य प्राप्तिरनन्यथासंभव इत्यादि। यत्र पुनः श्रुतिरानुमानिकी लिङ्गं च प्रत्यक्षं तत्र कथम्। यथा स्मृतिवैदिकलिङ्गविरोधे। तत्र स्मृतेर्मूलान्तरमपि संभाव्यते न तु लिङ्गस्येति तदेव बलवदित्यनुसर्तव्यम्। सर्वत्र दुर्बलस्यापि प्रमाणस्य बाधे यदि किंचिदनर्थकी भवति ततो विपरीतो बाधो योजयितव्यः। तदुक्तं ‘व्रीहीन्प्रोक्षति’ इत्यत्र श्रुतिमुत्सृज्यापूर्वसाधनत्वग्रहणमिति। तथा— § 6054

दुर्बलस्य प्रमाणस्य बलवानाश्रयो यदा।
तदाऽपि विपरीतत्वं शिष्टाकोपे यथोदितम्॥ § 6056

५ त्वादि ] इत्युक्तमिति—लिङ्गवाक्ययोर्विरोधोदाहरणप्रदर्शनावसरे भाष्ये ‘तदेषोऽर्थविप्रकर्षः, यत् ‘स्योनं ते’ इत्यस्य प्रत्यक्षं सदनकर्मणोऽभिधानसामर्थ्यं तन्मुख्यम्’ इत्यादिनोक्तमित्यर्थः।
१४ स्योप ] ( अ० ३ पा० ७ अ० २१ सू० ४१ )
१७ विचार ] विजातीयसमवायो विचारयितव्य इति पा०।
३१ शिष्टा ] ( अ० १ पा० ३ अ० ३ )

सर्वप्रमाणानामेवार्थद्वारः परस्परविरोधो न स्वरूपनिमित्तः। तत्र यदा पदार्थतद्धर्मविषये प्रमाणे विरुध्येते तत्र यद्यपि प्रमाणतोऽन्यादृशं बलाबलं तथाऽपि प्रमेयानुरोधेन तदाश्रयणात्स्वरूपदुर्बलेनापि बलवद्बाध्यमानं तदानुगुण्यं प्रतिपद्यते। तदुक्तमाचमनादयः पदार्थास्तेषां गुणः क्रम इति। तथा च लोके— § 6057

अत्यन्तबलवन्तोऽपि पौरजानपदा जनाः।
दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैः॥§ 6059

एवं सूत्रं श्रुतिलिङ्गविरोधोपपादनान्तं च भाष्यं व्याख्यातम्। इदानीं साध्यशेषमनुक्रमिष्यामः। § 6060

तत्र तुल्यबलत्वोक्तिः स्वतः प्रामाण्यविभ्रमात्।
प्रदेशान्तरदृष्टं च रूपं तुल्यं द्वयोरपि॥§ 6062

स्वत एव मन्त्ररूपं दृष्ट्वा श्रुत्यनुमानमन्तरेणैव विनियोगबुद्धिर्भवतीति 842
श्रुतितुल्यत्वम्। **नहि विज्ञानस्य विज्ञानस्य च विशेष उपलभ्यत** इति—मन्त्राम्नानवेलायामिन्द्रार्थत्वं ज्ञातं श्रुत्युच्चारणकालेऽपि गार्हपत्यार्थत्वमित्युभयोर्लब्धात्मनोरविशिष्टत्वम्। न ह्यविज्ञातरूपो मन्त्रः श्रुत्या शक्यो विनियोक्तुमिति श्रुत्या प्रथमं रूपनिरूपणं कर्तव्यम्। अतश्च तदवधारणवेलायामिन्द्रोपस्थानप्रत्ययो जातो न शक्यो निवर्तयितुमिति मन्यते। **ननु लिङ्गस्य भङ्गुरस्येव रूपं सिविचिकित्सो हीति—श्रुतौ** दृश्यमानायामनुमानासंभवाद्भङ्गुरत्वम्। सविचिकित्सो हि त्वयं विक्षेपजन्मत्वात्। न ह्यस्य स्वतः प्रामाण्यमित्यभिप्रायः। परः पुनः प्रत्ययोत्पादनमैकान्तिकं गृहीत्वा सविचिकित्सत्वं संदेहविपर्ययानध्यवसायानामन्यतमं मन्यमान आह—**नैतद्युक्तं यतो लिङ्गात्सविचिकित्सः प्रत्ययः। तस्य श्रुतेश्च नैव संप्रधारणाऽस्तीति**। किमियमैन्द्री भवति न भवतीत्यनिश्चयः। तस्य श्रुत्यविरोधेऽप्यप्रमाणत्वान्नैव तया सह बलाबलचिन्ता। यतस्तु निर्विचिकित्सु एकान्तेनैतद्देवत्योऽयं मन्त्र इति प्रत्ययः स श्रुत्या सह तुल्यबलत्वाद्विकल्पितुमर्हति। **ननु नैव कदाचिदिति**—पूर्ववदेव कदाचिन्निर्विक्षेप इति मन्यते। इतरस्तु स्वाभिप्रेतमेव सविचिकित्सत्वं गृहीत्वाऽऽह— **एवं हि सति नैव लिङ्गं नाम किंचित्प्रमाणमभविष्यादिति**। सिद्धान्तवादी तु वदति—यदि सविक्षेपप्रत्ययोत्पादनमात्रेण कुपितं लिङ्गं प्रामाण्यमेव मुञ्चति **कामं मा भूत्प्रमाणं भवति तु संशयो लिङ्गपरिज्ञातेष्वर्थेष्विति**। कथं पुनः सविक्षेपत्वं परित्यज्य संशय एव सविचिकित्सतामुदाहियते। कथं वा लिङ्गपरिज्ञातत्वं सिद्धवदभिधीयते। नैष दोषः। लिङ्गपरिज्ञातत्वं तावदविरोधवेलाभिप्रायम्। संदिग्धत्वं विरोधवेलायाम्। एतदुक्तं भवति। यदाविरोधकाले लिङ्गस्यावगतं विनियोजकत्वं तन्न तथैव सर्वत्रैवाव- 843
तिष्ठते। किं तर्हि। संदिह्यते। अन्यत्राविरोधाद्विनियोगोऽङ्गीकृतः स इह किं

तथैव भवत्यथ केनचिद्वावार्तिष्यत इति। **यदि वा विस्पष्टमेवाप्रामाण्यमिति**—तावदेव संदेहो भवति यावत्प्रत्यक्षा श्रुतेर्नोपलभ्यते। तस्यां तु सत्यामितरकल्पनानुपपत्तेरप्रामाण्यम्। लिङ्गे हि सामर्थ्यमात्रं प्रत्यक्षम। न च तावता विनियोग उक्तो भवति। न चानुक्तस्य क्रियायां प्रामाण्यमस्ति। यथा—सत्यपि सामर्थ्ये विप्रराजन्यौ न वैश्यस्तोमं कुरुतः। तस्मान्न लिङ्गं विनियोजकमिति। परस्तु विरोधविषयमप्रामाण्याभिधानमज्ञात्वा सार्वत्रिकमेवेदमुक्तमिति भीतः प्रामाण्यमार्गं दर्शयति—**प्रकरणवतोऽर्थस्य संनिधाने यमर्थमामनन्तीति**। तदेतत् ‘अपि वा प्रयोगसामर्थ्यान्मन्त्रोऽभिधानवाची स्यात्’ इत्यत्र ‘अविशिष्टस्तु वाक्यार्थः’ इत्यत्र च वर्णितम्। अथवा सिद्धान्तवादिनाऽपि विरोधे सुखतरमप्रमाणत्वं वक्ष्यामीति मन्यमानेन प्रथमं स्वतन्त्रमेव तावदप्रामाण्यं दर्शितम्। तथाकृते स्वयमेवैतस्य श्रुत्यनुमानद्वारप्रामाण्यकल्पनमापत्स्यते। ततश्च मम सुजयो भविष्यति। तत्रेतरेण विरोधविषयमनादृत्य प्रामाण्यं तावदस्तीति निरूप्य तुल्यबलत्वममिहितम्। अभ्युपगम्यापि बलाबल**मविरोधाद**बाधः। तद्यथोपदेशातिदेशाभ्यां प्रयाजाद्युपकारस्य प्रकृतिविकृत्यर्थत्वादविरोधः। सकृच्चोदितस्यासकृत्करणेऽपि 844 प्रधानानुरोधेन गुणानुवृत्तेः सर्वत्रेष्टत्वात्। इन्द्रशब्दस्य गार्हपत्ये गौणत्वादवयवप्रसिद्धेर्वेन्द्रे मुख्यत्वात्समुदायप्रसिद्धेर्विरोध इति चेत्। न। प्रयोगभेदेन परिहारात्। युगपदुपादिश्यमानं ह्येतत्संभवासंभवाश्रयणाद्विरुध्यते। प्रयोगभेदे तु सति गार्हपत्याभिधानवेलायां यज्ञसाधनत्वं वा गुणनिन्दतिक्रियाख्यैश्वर्ययोगं वाऽङ्गीकृत्य प्रवर्त्स्यते। इन्द्राभिधानकाले तु मुख्य इत्यविरोधः। तस्मान्नास्ति बाध इत्येवं प्राप्ते ब्रूमः। श्रुतिर्लिङ्गाद्बलीयसी। कुतः। § 6063

मन्त्रोऽयं गार्हपत्याङ्गं शब्देनैवाभिधीयते।
इन्द्राङ्गत्वं तु सामर्थ्यादशब्दमनुमीयते॥ § 6065

यत्तु प्रकरणात्सामार्थ्याद्याङ्गत्वानुमानमुक्तं तच्छब्देनासंस्पृष्टमीदृशेष्वर्थेष्वप्रमाणमित्युक्तम्। परस्तु सार्वत्रिकमेव लिङ्गस्याशाब्दत्वमुक्तमिति म- 845 न्यमानो न तर्हि विरोधाद्बाधः। किं तर्हि। अप्रमाणत्वादेवेति विवक्ष**न्यदेवमित्याह**। सिद्धान्तवादी तु यथा प्रथमं पूर्वपक्षवादिना लिङ्गस्य प्रामाण्यमुक्तमासीत्तथेदानीं स्वयं प्रतिपादयति। भवति हि प्रकरणादेषोऽर्थो यथा शक्नुयात्तथा यागस्यानेनोपकुर्यादिति। न च स्वार्थाभिधानादन्यथा शक्नोत्यसावुपकर्तुमिति तत्र विनियोगश्चोदितो भवति। परस्तु मदीयमेवायं पूर्वोक्तं मार्गमायातः क्वेदानीं गमिष्यतीत्युत्साहेनाऽऽह—**यदि श्रुतिमूलो न श्रुत्यन्त-**

१ य] वस्तुतस्तु श्रुतिविरोधे लिङ्गस्याप्रामाण्यमेव न तु प्रामाण्यसंशय इत्येवमभिधानार्थं ‘यदि वेति भाष्यं व्याचष्टे—यदि वा विस्पष्टमित्यादिना।
८ प्र] ( अ॰ २ पा॰ १ अ॰ ६ सू॰ ३१ )
९ अविशि] ( अ॰ १ पा॰ २ अ॰ ४ सू॰ ३२ )
१४ अभ्यु] ‘अविरोधात्खल्वीप’ इतीदं भाष्यं व्याचष्टे—अभ्युपगम्यापीत्यादिना।

**रेण बाधितुं शक्यः**। तेन यदि तावदशाब्दोऽयमर्थस्ततो नैव प्रमाणम्। अथ शाब्दस्ततस्तुल्यबल इति। सिद्धान्तवादी तु द्वयमपि परिहरति—**नापीति**। आनु मानिक्याः श्रुतेरविरोधे सत्यात्मलाभाद्विरोधे चानुत्पादात्। यत्र हि प्रत्यक्षया श्रुत्या मन्त्रो न विनियोगं प्रति निराकाङ्क्षीकृतस्तत्रास्य विनियोगसिद्ध्यर्थं यावत्कल्प्यते तत्सर्वमाम्नानान्यथानुपपत्तिमुद्रामुद्रितत्वाद्वैदिकं भवति। यत्र विस्पष्टमेवावगतमनेन गार्हपत्य उपस्थेय इति तत्राऽऽम्नानप्रयोजनेन साध्ये प्रयोगोपकारे विज्ञाते नैतावत्कल्प्यमानं वेदः सहतेऽनेनेन्द्रोपस्थानं कर्तव्यमिति। तस्माद्दुर्बलं लिङ्गम्। किंच— § 6066

सर्वत्रैव विकल्पानामन्याय्यत्वमवस्थितम्। 846
पक्षे हि सदसद्भावावेकत्रार्थे दुराश्रयौ॥ § 6068

स्वतन्त्रया श्रुत्या नित्यमेव गार्हपत्योपस्थानं चोदितं, लिङ्गेन स्वतन्त्रेणेन्द्रोपस्थानम्। तत्रान्यतराश्रयणे सतीतरच्चोदितं सन्न क्रियते तदपेक्षया चेतरदचोदितं सत्कृतम्। तदकरणमप्यचोदितम्। श्रुतहान्यश्रुतकल्पनयोश्च तुल्यो दोषः। प्रसिद्धिबाधात्। चोदितस्य कर्तव्यताप्रसिद्धिरितरस्याकर्तव्यत्वं तदुभयमतिक्रम्येत। तस्मात्तावन्न विकल्पः। यस्तु विरोधपरिहारार्थं समुच्चयोऽभिहितस्तत्र ब्रूमोऽस्त्येव विरोधः। कथम्। § 6069

श्रुत्या ह्यत्र निराकाङ्क्षे मन्त्रप्रकरणे कृते।
लिङ्गं साकाङ्क्षसाध्यार्थे तयैकान्ताद्विरुध्यते॥ § 6071

एकोऽयं मन्त्र एकं च प्रकरणम्। सकृच्चाऽऽम्नातस्यैकरूप्येण भवितव्यम्। तत्र श्रुतिविनियोगवेलायां मन्त्रप्रकरणिनोर्निराकाङ्क्षत्वं भवेद्वा न वा। तद्यदि तावन्नास्ति ततो विनियोग एवासिद्धः। न हि विनियुक्तस्याऽऽकाङ्क्षा युज्यते। अथ त्वस्ति ततश्चाऽऽकाङ्क्षाधीनसिद्धित्वाल्लैङ्गिविनियोगानुपपत्तिः। युगपद्भावाश्रयणे ह्यस्त्याकाङ्क्षा नास्ति वेति विप्रतिषिद्धं स्यात्। एवं सत्यपि तु यदि प्रमाणयोस्तुल्यप्रवृत्तित्वं भवेत्ततो विशेषाग्रहणान्न ज्ञायेत केन प्रथम- 847
तरं निराकाङ्क्ष इति। युगपदेवोभाभ्यानिराकाङ्क्षीक्रियमाण उभयार्थो भवेत्। अस्ति तु प्रमाणयोर्विशेषः। श्रुतेः शीघ्रतरप्रवृत्तित्वात्। अतस्तया विनियुक्ते मन्त्रे न लिङ्गस्यावकाशोऽस्तीति श्रुतिबलीयस्त्वसिद्धिः। § 6072

---

१४ प्र] श्रुतहान्यश्रुतपरिकल्पनयोस्तुल्यदोषत्वोपपादनार्थं 'उभयत्र हि' इति भाष्यं व्याचष्टे-प्रसिद्धिबाधादिति। तदेवोपपादयति—चोदितस्येति। श्रुतहाने चोदितस्य कर्तव्यताप्रसिद्धिरतिक्रमणीया। अश्रुतपरिकल्पनायामचोदितस्याकर्तव्यताप्रसिद्धिरतिक्रमणीयेत्याशयः।
१८ साका] साकाङ्क्षसाध्यार्थमिति—साकाङ्क्षाभ्यां मन्त्रप्रकरणाभ्यां साध्यो विनियोगरूपोऽर्थो यस्येति विग्रहः।
२२ सिद्धित्वाल्ले] लौकिकेति पा॰।
२४ वृत्तित्वं] कृतसामर्थ्ययोर्वाक्यप्रकरणयोरिति—मन्त्रवाक्यस्य कृतयागोपकाराख्यप्रयोजनत्वं प्रकरणस्य च कृतयागाङ्गत्वबोधाख्यप्रयोजनत्वमित्यर्थः।
२५ निरा] निराकाङ्क्षीकृत इति पा॰।

सूत्रेण परदौर्बल्ये सूत्रिते सति भाष्यकृत्।
आर्थं पूर्वबलीयस्त्वं व्याचष्टे तदनादरात्॥ § 6074

**लिङ्गवाक्ययोर्विरोधे** एकं तावदिदमुदाहरणम्। ज्योतिष्टोमे हौत्रप्रवचनाधीताः प्रैषा वाक्येन मैत्रावरुणस्य विधीयन्ते ‘तस्मान्मैत्रावरुणः प्रेष्यति चानु चाऽऽह’ इति। तेषां मध्ये कश्चित्प्रैष एवं पठ्यते ‘प्रशास्तर्यज’ इति। सोऽयं स्वसा मर्थ्येन मैत्रारुवणं नियुङ्क्ते। तत्र यदि वाक्यं बलीयस्ततो मैत्रावरुणः प्रेष्येत्। आत्मनि च प्रैषासंभवाद्धोता यजेत्। अथ तु लिङ्गं बलीयस्ततो मन्त्रेण मैत्रावरुणो नियोक्तव्यः। न चाऽऽत्मनैवाऽऽत्मानं नियोक्तुमर्हतीति परेण विनियोक्तव्यः। स च ‘तेषा यतो विशेषः स्यात्’ इत्येवं विज्ञायते। सामान्यसमाख्यया पूर्वमयं होतुरेव प्रापितः सन्वाक्येन बाधित आसीत्। तद्यदा वाक्यं लिङ्गेन बाध्यते तदा समाख्ययैव प्रतिप्रसूतया होतृकर्तृकत्वं विज्ञायते। प्रैषार्थकारी तु मैत्रावरुणो विज्ञायत एव। यद्यपि ‘तस्मान्मैत्रावरुणः’ इत्येतद्ब्राह्मणं तथाऽपि पदसंनिधिमात्रात्म-
848 कत्वेनाश्रुतित्वात्प्रत्यासन्नतरश्रुतिकल्पनेन लिङ्गेन बाध्यते। यदि हि मैत्रावरुणः प्रेष्येत्ततः प्रशास्तृशब्दो होतर्यनर्थकः स्यात्। ननु च मैत्रावरुणोऽपि प्रेष्यमाणो ‘होता यक्षत्’ इत्यादिरेवार्थशून्यः स्यात्। गौण इति चेन्न। प्रशास्तृशब्देऽप्येवं प्रसङ्गात्। अपि च पश्चात्तनत्वादुपजातविरोधः प्रशास्तृशब्द एव वरं गौणो न प्रथमोच्चारितो विनैव विरोधेन होतृशब्दः। तस्माल्लिङ्गयोरेवैष विरोधो न लिङ्गवाक्ययोरिति। अत्र ब्रूमः। सर्वथा तावदनयोरन्यतरस्य विरोधे गौणत्वं कल्पनीयम्। तत्र प्रशास्तृशब्दस्य होतर्यत्यन्तमनिमित्तः प्रयोगः। होतृशब्दस्य तु होतृकार्यापन्नमैत्रावरुणेऽस्ति निमित्तम्। सर्व एव प्रधानर्त्विग्वचनास्तत्पुरुषेषु प्रयुज्यमान दृष्टा न तु विपर्ययः। तस्मात्प्रशास्तृलिङ्गत्वान्मन्त्रस्तमेव विनियुञ्जीत। न चैतद्वाक्यमत्यन्तमनर्थकमेव भवति। प्रैषान्तरेषु चरितार्थत्वात्। अतोऽस्मिन्विषये बाध्येतेति। ‘स्योनं ते सदनं कृणोमि’ इत्यत्रोदाहरणे चोद्यते। § 6075

भिन्ने एते यतो वाक्ये पुरस्तात्प्रतिपादिते।
तस्मान्न समुदायोऽयं वाक्येन विनियुज्यते॥ § 6077

सत्यपि विभज्यमानसाकाङ्क्षत्वेऽर्थभेदाद्भिन्नवाक्यत्वेनैते पुरस्तात्प्रतिपादिते। तस्मान्न समुदायस्यैव सदनाभिघारणे पुरोडाशप्रतिष्ठापने च समुच्चयेन विकल्पेन वा विनियोग आशङ्कितव्यः। तत्र केचिदाहुः। नैवात्र सकलेन वाक्येन सह विचारः किं तर्हि अंशेनैव सह। अथवा। § 6078

९ तेषा] ( अ० ३ पा० ८ अ० १० सू० २१ )
२४ स्यो] एवंतावल्लिङ्गवाक्ययोर्विरोधे स्वाभिमतमुदाहरणं प्रदर्श्य, अधुना भाष्योक्तमुदाहरणं दूषयितुमुपक्रमते—स्योनं त इत्यादिना।
२८ पु] ( अ० २ पा० १ अ० १४) इत्यत्रेति शेषः
२८ तिपा] प्रत्युदाहृत इति पा०।

साकाङ्क्षावयवत्वेन प्रायेणेष्टैकवाक्यता।
सिद्धा लिङ्गबलीयस्त्वात्प्रत्युक्ता भिन्नवाक्यता॥§ 6080

'तस्मिन्सीद' इत्येतत्कृतं साकाङ्क्षत्वमाश्रित्यैकवाक्यत्वेनोदाहृतमिदमेव प्रधानकारणम्। शक्यते हि तद्वशेन यथेष्टं विशेषणविशेष्यभावं कल्पयित्वैकार्थत्वेनैकवाक्यत्वम्। यद्यथा—पूर्वस्य तावदुत्तरेण सह यदहं घृतस्य धारया सुमुखं तव सदनं कल्पयामि तस्मिन्नेवमितिकर्तव्यताके प्रतितिष्ठ त्वमितीतिकर्तव्यताविशिष्टपुरोडाशप्रतिष्ठापनमेकं प्रयोजनम्। अथवा पुरोडाशप्रतिष्ठापनफलं सदनाभिधारणं करोमीत्येवं विशिष्टफलसदनकरणं प्रकाशनं प्रयोजनमिति शक्यमेकवाक्यत्वम्। यत्तु पुरस्तादर्थनानात्वान्नानावाक्यत्वमुक्तं तदिह स्थितं लिङ्गबलीयस्त्वेन। यदि हि लिङ्गं बलीयस्ततः संभवदन्यतरविशेषणत्वेनैकवाक्यत्वं परित्यज्योभयोः प्रत्येकं स्वप्राधान्यं लिङ्गावगतमाश्रित्यविशेषणबुद्धितिरस्कारेण प्रयोजनभेदाद्वाक्यभेदो 849
भवति। तेनायं विनियोगद्वारेण वाक्यात्मलाभस्य लिङ्गप्राधान्यस्यात्र बलाबलविचारः। तत्रापि प्रतीतेर्लब्धात्मके वाक्ये सति बाधकप्रत्ययसदसद्भावविचार इति द्रष्टव्यम्। किं प्राप्तम्। **तुल्यबले** इति। तदा चेदृशं कर्म, कदाचिद्विभज्य मन्त्रौ प्रयोक्तव्यौ,। कदाचित्समुदायोऽन्यतरत्र, कदाचित्स एवोभयत्रेति। कथं पुनरयमित्थमनवस्थितः शास्त्रार्थो भवति। सर्वथा यदि प्रमाणत एवमवगम्यते किं नो बाध्यते। लिङ्गवाक्यतुल्यबलत्वालोचने सर्वमेतत्प्रतिभाति। यदा तु श्रुतिवल्लिङ्गात्प्रमाणान्तरत्वाद्वाक्यमेव बाधकमित्यवधार्यते। तदा नियत एव समुदायप्रयोग इत्येवं प्राप्ते ब्रूमः। § 6081

स्योनादिः कल्पयाम्यन्तः स्वसामर्थ्येन शक्यते।
निराकाङ्क्षः स्वकार्याय साकाङ्क्षत्वं पराश्रयम्॥§ 6083

सर्वस्तावदादित आरभ्य विनियोगं निरीक्षते। तदिह कल्पयाम्यन्तोऽस्य न कदाचित्परत्रापेक्षा दृश्यत इति तावति पर्यवसानं निश्चित्य प्रयोजनाकाङ्क्षानिवृत्तेरभिधारणाङ्गत्वेनाऽऽश्रीयते। तेनैष तावत्प्रतिष्ठापनं यावन्न कदाचिन्नीयते। न च परस्यैतेन विनाऽनर्थकत्वापत्तिः। यतस्तद्द्वयेन नीयते। सोऽपि हि प्रतिष्ठापनाङ्गत्वेनार्थवान् भविष्यति। यद्यपि च तच्छब्दः पूर्वापेक्षस्तथाऽपि प्रकाशितं निर्वृत्तं च पूर्ववाक्यार्थमालोच्य भिन्नस्यापि प्रवर्तमानस्य न कश्चिद्विरोधः। तद्यथा 'तप्ते पयसि दध्यानयति' इति संस्कारविधाने पर्यवसिते 'सा वैश्वदेव्यामिक्षा' इति वाक्यान्तरेणैव द्रव्यदेवतासंबन्धः क्रिय-

---

१४ प्र]
प्रतीतेरिति—साकाङ्क्षावयवत्वेनाऽऽपततो वाक्यात्मलाभप्रतीतेरित्यर्थः।
१५ दा] तुल्यबलत्वपूर्वपक्षेऽनुष्ठाने विशेषं दर्शयति-तदा चेत्यादिना लैङ्गिकविनियोगपक्षे विभज्य प्रयोगः। वाक्यीयविनियोगपक्षे विकल्पेनोपस्तरणसादनयोर्मध्येऽन्यतरत्र समुच्चयेन वोभयत्र समुदायः प्रयोक्तव्य इत्यर्थः।

ते। तस्माद्भेदेन विनियोगस्य प्रत्यासन्नतरश्रुतित्वान्नेतरेतरविषयसंक्रान्तिर्विद्य-
ते। एवमुपस्तरणे 'तस्मिन्सीद' इत्यस्य नास्ति सामर्थ्यमिति पूर्वेणैव ग-
तार्थप्रायं सन्निरूपणदार्ढ्यार्थं पुनः परामृश्यते। यच्चैकत्रोक्तं तस्येतरत्राभावं
850 दर्शयित्वा पुनरात्मधर्ममुपनीयेतरधर्मानिराकरणमिति ग्रन्थो निराकुलीकर्त-
व्यः। पूर्वः प्रस्तावः प्रमाणसदसद्भावाभ्यां, मध्यमः शक्त्यशक्तिभ्यामन्त्यश्च
851 दृष्टार्थत्वादृष्टार्थत्वाभ्यामिति विवेकः। तस्माद्वाक्याल्लिङ्गं बलीय इति सिद्ध-
म्। **किं पुनः प्रकरणं नामेति**। सर्वत्र सिद्धवत्प्रकरणेन व्यवहारो न
चैतत्क्वचिन्निरूपितपूर्वं तदिहापि तावदस्य स्वरूपं निरूप्यताम्। निर्ज्ञातस्व-
रूपस्य हि बलाबलं सुज्ञायत इति। अथ वा नैवास्य वाक्यक्रमाभ्यां
भेदः। साकाङ्क्षपदसंनिधिमात्रं हि वाक्यमित्युच्यते। तच्च प्रकरणेऽप्यविशिष्ट-
म्। न च वाक्यस्य पदेयत्तायां प्रमाणमस्ति। विभज्यमानसाकाङ्क्षसंह-
न्यमानैकप्रयोजनमात्रोपलक्षणत्वात्। तेन वाक्यमेवैकमल्पपदमपरं बहुपद-
म्। अवान्तरार्थवशीकृतानां महाप्रयोजनवशेन महासंघातापत्तेः। वक्ष्यति
हि वाक्यं ह्येकं दर्शपूर्णमासाभ्यां सहधर्माणामिति। अथवा संनिध्यात्मकः
क्रम इत्युच्यते। स च प्रकरणेऽप्यवश्यंभावी संनिधिः। अतः क्रमादप्य-
भिन्नं प्रकरणमिति मन्यते। तदिदानीं तत्त्वभेदपर्यायैर्निरूपयति। तत्र तत्त्वं
तावदुच्यते—**कर्तव्यस्येतिकर्तव्यताकाङ्क्षस्य वचनं प्रकरण**मिति। कर्तव्यमिति
साध्यभूतमपूर्वमथवा विधेयत्वानुष्ठेयत्वाभ्यां भाव एव प्रत्ययवाच्योऽभिधीय-
ते। साध्यांशोपनिपातात्स्वर्गादिफलं कर्तव्यमिति चेन्न। तस्य कालान्तर-
भावित्वेन प्रयोगासमवायित्वे सति तत्सिद्ध्यर्थापूर्वस्यैव कर्तव्यत्वावधारणात्।
तेनापूर्वं कृत्वा नान्यथेति। तथा 'यज्ञकर्म प्रधानं तद्धि चोदनाभूतम्' इति
तस्यैव प्रयोजकत्वं वक्ष्यते। 'फलदेवतयोश्च' इत्युपन्यस्य निराकरिष्यते।
852 तत्र कथमित्यनुग्रहोपायाकाङ्क्षणमाकाङ्क्षेति घञन्तं व्याख्यायते। यद्वेतिकर्त-
व्यतामाकाङ्क्षतीतिकर्तव्यताकाङ्क्षं भावापूर्वयोरेवैकं, तस्य यद्वचनमिति स-
मानाधिकरणे षष्ठ्यन्ते। **वचन**- मिति—शब्देन प्रत्यायनम्। एतदुक्तं भवति
वस्तुरूपेण विद्यमानाऽप्याकाङ्क्षा न प्रकरणमित्यभिधीयते। किं तर्हि। प्र-
तीयमाना। साऽपि च कर्तव्यतार्थोपसर्जनत्वेन गृह्यमाणा, न स्वातन्त्र्येण।
तेनाऽऽकाङ्क्षाऽभिधीयमाना प्रकरणमाकाङ्क्षावती वा भावनेति द्रष्टव्यम्।
इदानीमवयवव्युत्पत्त्यात्मकेन भेदेन कथयति। तत्र प्रशब्दस्तावत्प्रारम्भमाह।
करणशब्दः क्रियां प्रकरणं प्रक्रियेत्यर्थः। का पुनरिह क्रिया गृह्यते तामाह—

---

१६ त] तत्त्वेति—यथासंख्यं कर्तव्यस्येत्यादिभाष्यत्रयेणेति शेषः। तत्र चाऽऽद्यं भाष्यं लक्षणोक्त्यर्थम्। द्वितीयं च लक्षणोपपादनायावयवव्युत्पत्त्यर्थम्। तृतीयं रूढित्वशङ्कानिरासाय यौगिकत्वमुपपादयितुं पर्यायोक्त्यर्थं च वेदितव्यमित्याशयः।

२१ तेना] अपूर्वस्य कर्तव्यत्वं भावार्थाधिकरणभाष्यसंमत्या द्रढयति—तेनापूर्वमित्यादिना।

२१ य] ( अ° ९ पा° १ अ° १ सू° १ )

२२ फ] ( अ° ९ पा° १ अ° ३ सू° ४ )

**वचनक्रियाया** अर्थाभिधानक्रियाया इति यावत्। भावनाभिधानक्रियाया हि प्रयोगवाक्यप्रवृत्तिरारम्भः। फलकरणांशपूरणं पदद्वयमात्रसाध्यमितिकर्तव्यतालाभस्त्वनेकवाक्यान्तरायत्तसिद्धिः। अतस्तत्समस्तालोचनापेक्षया कथंभावः प्रकरणमभिधानविधानक्रिययोरारम्भ इत्युच्यते। करणशब्दश्च क्रियामात्रवाच्यपि सन्नागमविषयः प्रयुज्यमानोऽभिधानाक्रियायां वर्तते। **स एष विध्यादिरिति** पर्यायकथनम्। आद्यन्तयोः संबन्धिशब्दत्वात्किमपेक्ष्याऽऽदित्वमित्यत आह—**विध्यन्तापेक्ष** इति। विध्यन्तो नामेत्थंभावरूपमितिकर्तव्यतावधारणम्। तस्य चानेकाङ्गवाक्यतदर्थतत्प्रयोजनालोचनमध्यस्य कथंभाव आदिरित्याचार्याणां विध्यादित्वेन प्रसिद्धिः। तत्र च स्वपदगणेन कियत्यपि प्रयोजनेऽवसितानामेव वाक्यानां पुनः कार्यान्तरापेक्षावशेन संबन्ध इति वाक्याद्विशेषः। तत्राऽदितः क्वचिदपि प्रयोजनलेशे विभज्यमानानां वृत्तिर्नास्ति संबन्धेनैवार्थलाभः। क्रमेण तु सह वैलक्षण्यमनन्तरमेव वक्ष्यामः। तस्मात्प्रमाणान्तरं प्रकरणम्। **किमिहोदाहरणमिति**। तेनैकवाक्यतानयनाभिप्रायेण पृच्छति। सिद्धान्तवादी तु विधायकस्मारकत्वेन भिन्नवृत्तित्वान्मन्त्रब्राह्मणयोर्न कथंचिदेकवाक्यता घटत इति सूक्तवाकमुदाहरति। लिङ्गाद्देवतापदेषु निष्कृष्टेषु तच्छेषाः किमुत्कृष्यन्तामथ तद्रहिता अपि प्रयुज्यन्तामिति। प्रकरणेन तावत्सर्वशेषा उभयत्र प्राप्नुवन्ति। लिङ्गमपि साधारणम्। द्विवचनैकवचनयोरुभयत्र विद्यमानार्थत्वात्। ननु चाऽऽत्मीयेनैव शेषेणवरुद्धेषु देवतापदेषु शेषान्तरमनवकाशमेव स्यात्। सत्यम्। एवमपि तु वाक्यप्रकरणयोर्विरोधो नैवापैति। प्रकरणेन ह्यपनीतदेवताकोऽपि शेषः प्रयोज्यः प्राप्नोति वाक्येनेतर इति वाक्यबलीयस्त्वादेव तदाश्रयणम्। असकृद्वा 853, 854 प्रकरणेन तावत्प्रयोगः प्राप्नोति। वाक्येन तु यथादेवतापदानुसारात्सकृदिति विरोधः। क्लृप्तसंबन्धत्वाच्च वाक्यं बलीयः। कथंभावेन हि, इत्थं यजेतेति प्रकरणिना सह संबन्धमनुमाय यावदाम्नानं शेषप्रयोगः। तथा क्लृप्तप्रयोगशेषैरात्मीयैर्देवतापदैः सह पुनः संबन्धकल्पनमिति विप्रकर्षः। तस्माद्बाधः। ततश्च देवताशेषाणां नित्यमेवापकर्षो न पाक्षिकः। सर्वदा वा विनियोग इति सिद्धम्। **अथ क्रमप्रकरणयोर्विरोधे किमुदाहरणमिति**। यथासंख्यलक्षणक्रमविरोधोदाहरणासंभवात्पुरस्तात्परस्ताद्वाऽऽम्नातस्य संनिधिलक्षणेनावान्तरप्रकरणेन प्राप्तेर्नैव किंचिदुदाहरणमिति विपर्ययदृढत्वेनाज्ञानसंशयावतिक्रम्यापि प्रश्नः। शक्यं त्विहावान्तरप्रकरणत्वप्रसङ्गनिराकरणमित्यभिप्रेत्योदाहरणोपन्यासः। राजसूयप्रकरणेऽभिषेचनीयस्योपरि 'शौनःशेपमाख्यापयति' 'राजन्यं जिनाति' 'पष्ठौहीं दीव्यति' 'अभिषिच्यत' इत्येवमादीन्याम्नायन्ते। तेषां चाङ्गत्वे नैव कस्यचित्संदेहो विप्रतिपत्तिर्वेति शेषिशेषसंबन्धनिश्चयार्थमिदं विचार्यते, किं समस्तराजसूयस्यैतान्यङ्गानि, उताभिषेचनीयस्यैव अथ विक-

६ न्त] दृष्टान्ततयाऽन्तशब्दोपादानम्।

३३ नैव] नैव कस्यचिदिति—चतुर्थाध्यायचतुर्थपादाद्याधिकरणन्यायेनैवाङ्गत्वस्य निर्णीतत्वादिति शेषः।

३३ तिप] विप्रतिपत्तिः—विपर्ययः।

ल्पः समुच्चयपक्षासंभवादिति। प्रकरणस्य क्रमस्य च बलाबलादेतद्विज्ञातव्यम्। ननु चाभिषेचनीयस्यावान्तरप्रकरणात्प्राप्तिरिति महाप्रकरणं बाध्येत। नैष दोषः। यद्यनिराकाङ्क्षीकृतेऽभिषेचनीये तेषां पाठः स्यात्ततोऽवान्तरप्रकरणमवगम्येत। स तु प्रागेव विदेवनादिभ्यः प्राकृतैर्धर्मैर्निराकाङ्क्षीकृतः। सत्यामपि प्रत्यासत्तावक्लृप्तोपकारानेतानुपकारापेक्षः क्रतुरुल्लङ्घ्य प्रकृतिमपेक्षते। तया च योग्योपकारप्रदानेन पूरिते कथंभावे निवृत्तं प्रकरणम्। समीपाम्नातधर्मानर्थक्यापत्तिभयादेव पुनरुत्पाद्येत ततश्च क्रमत्वं भवति। निराकाङ्क्षस्य
855 हि सत आकाङ्क्षा यावदभिषेचनीयस्योत्पाद्यते तावद्राजसूयकथंभावेन प्रत्यक्षेण सिद्धो विनियोगः। तदीयो हि कथंभावः पवित्रादारभ्य क्षत्त्रस्य धृतिं यावदनुसृतः शक्नोति विदेवनादीनि संस्प्रष्टुम्। अतो नास्त्यत्रावान्तरप्रकरणमभिषेचनीयस्य। यस्यां तु विकृतौ प्राकृतं किंचिदङ्गं संकीर्त्य तस्य पुरस्तात्परस्ताद्वा वैकृतमङ्गमाम्नायते तत्र कथंभावगृहीताङ्गमध्यवर्तित्वात्प्रकरणपाठो विज्ञायते। न चेह तदस्तीति क्रमस्यैव व्यापारः। **संनिधावाम्नातेन परिपूर्णेनापीति**—वाक्यार्थपूर्णत्वाभिप्रायम्। **अनेकस्याऽऽम्नायमानस्य संनिधिविशेषाम्नानमात्रं हि क्रम** इति—केनचित्संनिधानस्य नान्तरीयकत्वं दर्शयति। यो हि बहूनामर्थेनाऽऽम्नायते तस्य सर्वप्रधानप्रत्यासन्नप्रदेशासंभवादवश्यंभाविनी केनचित्सह प्रत्यासत्तिः। न तु प्रकरणपाठस्यैवं नान्तरीयकत्वम्। अतः सह प्रवृत्तयोः क्रमप्रकरणयोः प्रकरणस्य शीघ्रतरं श्रुत्यर्थप्राप्तिरिति बलीयस्त्वम्। **क्रमसमाख्ययोर्विरोधे किमुदाहरणमिति**। अत्राप्यज्ञानसंशयकृतप्रश्नानन्तरं यौगिकत्वात्समाख्यायाः श्रुतिवच्छाब्दं संबन्धहेतुत्वमिति बलीयस्त्वं मन्यमानस्य विपर्यस्तमतेः प्रश्नः। पौरोडाशिकमिति समस्तमेव दर्शपूर्णमासकाण्डमभिधीयते। तत्र सांनाय्यपात्रशुन्धनक्रमे शुन्धध्वमिति मन्त्रः पठितः। स च प्रकरणाल्लिङ्गाच्च दार्शपौर्णमासिकपात्रशुन्धनार्थ
856 इति सामान्येनावधारिते तद्विशेषे जिज्ञासायां संदिह्यते। किं समाख्यया पुरोडाशपात्रार्थो भवत्यथ क्रमेण सांनाय्यपात्रार्थ इति। यतरद्बलीयस्तेन विनियोक्ष्यते। तुल्यबलत्वाद्विकल्पो विरोधाभावाद्वा समुच्चयः। क्रमस्य च दृष्टबाधस्य संबन्धानभिधायिनश्चादृष्टबाधया संबन्धाभिधायिन्याच समाख्यया बाध इति प्राप्ते। अर्थविप्रकर्षात्समाख्या बाध्यत इति ब्रूमः। तथा हि।
§ 6084

वैदिकं देशसामान्यं प्रत्यक्षं दृश्यते क्रमे।
समाख्यायां तु सामान्यं कल्प्यत्वाद्विप्रकृष्यते॥§ 6086

९ वित्रा ] पवित्रादिति—राजसूये पवित्राख्य आदिमः सोमयागः। अन्तिमस्तु क्षत्त्रस्य धृतिरिति।
२७ बा ] दृष्टबाधस्येति—श्रुत्यर्थं प्रति विप्रकृष्टस्येत्यर्थः।
२७ बाध ] अदृष्टबाधयेतिश्रुत्यर्थं प्रति संनिकृष्टयेत्यर्थः।

**कः पुनरत्रार्थविप्रकर्ष** इति—समाख्यायामन्तर्णीतसंबन्धसंबन्ध्यभिधायित्वान्न संभवतीति मन्यते। **निर्ज्ञाते प्रकरणेन केनापि सहैकवाक्यत्वे** इति—प्रकरणावि रोधिनं क्रमविनियोगं केवलसमाख्याप्रतियोगित्वेन च दर्शयति। कथं पुनः प्रकरणं न विरुध्यते। यदा तेन सर्वार्थत्वं ज्ञायमानमित्सृज्य क्रमवशेन केवलसांनाय्यार्थत्वं विज्ञायते। नैषं दोषः। यदि ह्यप्रकृते वयं क्रमविनियोगमभ्युमगच्छेम तत एवं स्यात्। इह तु प्रकरणेन दर्शपूर्णमासान्यतरार्थत्वेऽवधारिते तद्विशेषाकाङ्क्षायां केवल एव क्रमो व्याप्रियत इत्यविरोधः। ननु सर्वार्थत्वेनावधारणाद्यतः कुतश्चिदपि निवृत्तौ प्रकरणं बाध्यते। न चावश्यं सर्वार्थत्वं प्रकरणेनावधार्यते। मन्त्रस्यैकेनापि संबध्य कृतार्थत्वात्। प्रकरणिनां च मन्त्रान्तरैप्यर्थसिद्धेः। सामान्यविनियोगश्रुतिमात्रमेव चेह क्रमात्पूर्वतरं निष्पद्यते। तत्र तावद्विशेषश्रुतिमेकैकं प्रति कल्पयति तावत्क्रमेणापि कल्पितैवेति प्राकरणिकी विशेषश्रुतिरुपसंह्रियते। समाख्या पुनः क्रमविपरीतार्थत्वाद्विरुध्यते। विप्रकर्षाच्च दुर्बला। सर्वो हि संबन्धः केनचिदवान्तरसामान्येन भवति। न च मन्त्रपुरोडाशयोस्तद्वदक्लृप्तं किंचिदस्ति। यथा सांनाय्येन सह देशसामान्यम्। **लौकिकस्तु शब्दः समाख्येति**—मक्षानुवाके परिहृतमपि सद्वैदिकसंबन्धविप्रकर्षार्थमुपन्यस्यते। 857
परस्तु लिङ्गानिराकरणोक्तेनैव मार्गेण मूलोत्कर्तनेनैव समाख्यां निराकृतां मन्यमान आह **यद्येवमित्यादि**। सिद्धान्तवादि तु भक्षानुवाकोक्तमेवोत्तरं दर्शयति। § 6087

यदि ह्यङ्गाङ्गिभावोऽत्र पुरुषप्रत्ययाद्भवेत्।
ततः स्यादप्रमाणत्वं स तु वैदिक एव नः॥ § 6089

पौरोडाशिकशब्दो मन्त्रब्राह्मणयोरपठितत्वादवैदिको नाङ्गाङ्गिभावः। स च शब्दः स्यावैदिकत्वेऽप्यनादिसंबन्धत्वाद्विद्यमानस्मृतिमूलत्वाच्च प्रमाणम्। पौरोडाशिकशब्दोऽस्य वाचक इति नैतदतीन्द्रियम्। शब्दार्थव्यवहारिणां वृक्षादिष्विव प्रत्यक्षत्वात्। संभवति हि सर्वेषामन्यत उपलभ्य प्रयोगः। त द्दर्शयति—**भवति चास्मिन्नर्थे पुरुषः प्रमाणम्। यथा सांनाय्यक्रम आम्नातं प्रकरणमेकवाक्यत्वं वेदशब्दश्चायमिति**। सर्वत्र हि पुरुषान्तरस्थदर्शनपूर्विका पुरुषान्तराणां प्रवृत्तिः। समानदेशाम्नानं प्रकरणपाठं पदानां परस्परसंनिधिं 858
संबन्धं वा न वेदो वदति। किं तर्हि। पुरुषेष्वामनत्सु तथा दृश्यते। तैरप्येवमन्येभ्यो दृष्टमित्यनादित्वेऽपि सर्वेषां दर्शनसंभवात्। अन्धपरम्परान्याये निवृत्ते भवति प्रामाण्यम्। अन्यथा हि वेदावेदप्रकरणाप्रकरणादीन्यप्रमाणकान्येव भवेयुः। अनेकपुरुषस्थत्वाच्च नात्र कस्यचित्स्वातन्त्र्यं यद्दोषेण दोषाश-

१६ स्य] उपन्यस्यते इति-न त्वस्याः समाख्याया अवैदिकत्वेन वैदिकेऽर्थे प्रामाण्यायोगोक्त्यर्थमित्याशयः।
३१ अन्य] अन्यथा हीति—अतीन्द्रियत्व इत्यर्थः। अनेन च ये त्वनिन्द्रियविषया इत्येतद्भाष्यं विपरातापादनेनैन्द्रियकत्वदृढीकरणार्थतया व्याख्यातं विज्ञेयम्।

ङ्का स्यात्। तस्माद्भवत्येवान्यत्र प्रामाण्येऽर्थविप्रकर्षादत्र बाधः। स चोक्तः सूत्रव्याख्यायाम्। एवमेतेषां यथाभाष्यमवस्थितानां श्रुत्यादीनाम्। § 6090

बाधिकैव श्रुतिर्नित्यं समाख्या बाध्यते सदा।
मध्यमानां तु बाध्यत्वं बाधकत्वमपेक्षया॥§ 6092

इदानीं बाधस्य स्वरूपमाक्षेपद्वारेण कथयति—**अथ यत्तत्र तत्रोच्यते** द्वयोर्द्वयोर्विरोध **इदमनेन बाध्यत इदमनेने**ति। श्रुत्या लिङ्गं लिङ्गेन वाक्यमित्यादि। तद्बाधकविषयं प्राप्तं बाध्येताप्राप्तं वा। तद्यदि तावदप्राप्तं ततः समवाय एव नास्तीति किं बाध्येत। समवायसिद्ध्यर्थं त्वथ प्राप्तं बाध्यते तत उभयोरपि प्राप्तप्रमेयत्वात्तुल्यबलत्वमिति न बाधस्य प्रामाण्यम्। तत्रोत्तरम्। § 6093

सामान्यकारणात्प्राप्तं पूर्वं बाधकगोचरम्।
बाधकेन बलीयस्त्वान्मृषैतदिति कल्प्यते॥§ 6095

यथैव मृगतृष्णादिज्ञानान्युत्पन्नानि मिथ्यात्वकल्पनया बाध्यन्ते हानोपा-
859 दानादिफलवियोगाच्च बाध्यव्यपदेशं लभन्ते तथा लिङ्गादिना ज्ञानमप्युत्पन्नं सच्छ्रुत्यादिज्ञानेनानुष्ठानरूपात्फलाद्वियुज्यमानं बाधिष्यते। न त्वेतदप्युपपद्यते। कुत— § 6096

बाधस्योक्तप्रकारत्वात्प्रश्नस्तावन्न युज्यते।
स्थिते चाप्राप्तबाधत्वे प्राप्तबाधोऽपि नोत्तरम्॥§ 6098

तत्र नाम प्रश्नो भवति यत्प्रथमं नोक्तम्। एतानि तु लिङ्गादीन्यर्थविप्रकर्षादननु मितश्रुतीनि बाध्यन्त इति ज्ञानत्वान्नैव प्रश्नमर्हन्ति। यद्यपि च पृच्छ्यते तथाऽप्यपसिद्धान्तेनोत्तरं न दातव्यम्। अननुमितश्रुतिबाधेन ह्यप्राप्तबाध स्थितः। स इदानीं प्राप्तबाधोपवर्णनेन प्रत्युद्ध्रियेत विनोपपत्त्या। यदुच्यते **सामान्यस्य कारणस्य विद्यमानत्वादिति**। तल्लिङ्गादीनां साक्षादप्रमाणत्वात्प्रमाणभूतायाश्च श्रुतेरविद्यमानत्वादनुपपन्नम्। अथ तु तामनुमाय प्राप्तिरिष्यते ततो लब्धात्मकत्वादानुमानिक्याः श्रुतेः प्रत्यक्षायाश्च न कश्चिद्विशेष इति तुल्यबलत्वमेव प्राप्नोति। यदि वा मिथ्यात्वकल्पनरूपबाधाभ्युपगमाद्विरोधे सति तत्कल्पनाद्विपरीतबाधप्रसङ्गः। कथम्— § 6099

पूर्वं परमजातत्वादबाधित्वैव जायते।
परस्यानन्यथोत्पादान्न त्वबाधेन संभवः॥§ 6101

---

२ एव] तदेतेषामित्यधिकरणार्थोपसंहारभाष्यं प्रत्यक्षानुमानादिबाधप्रकारान्तरप्रातिपादनपरात, अथ यत्तत्रेत्यादिभाष्यात्प्रागपकृष्य व्याख्यास्यतिएवमेतेषामित्यादिना।
५ इदा] 'अथ यत्तत्र' इत्यारभ्य 'न तन्मिथ्या' इत्यन्तस्य भाष्यस्याऽऽक्षेपपूर्वमेतदधिकरणोक्तश्रुतिलिङ्गादिबाधप्रकारोक्त्यर्थतया पराभिमतां व्याख्यां दूषयितुमारभते—इदानीमित्यादिना।

श्रुत्यादौ शीघ्रतरत्वात्प्रथमं प्रवृत्ते लिङ्गादीनि प्रवर्तन्ते। तत्र यदि प्राप्तबाधसिद्ध्यर्थं पश्चात्प्रवर्तमानमपि लिङ्गं श्रुतिमनुमापयति ततः सा तुल्यविषयसंनिविष्टां पूर्वामबाधित्वा नाऽऽत्मानं लभत इति मृगतृष्णादिष्विव मिथ्यात्वं कल्पयन्त्येव जायमाना बाधिका स्यात्। तस्मान्नैष श्रुत्यादिषु ग्रन्थो घटत इति। यद्यप्यधिकरणान्तोपसंहारात्तद्विषयः प्रतिभाति तथाऽपि सामर्थ्यात्पूषाद्यनुमन्त्रणवदुत्कृष्यते। विज्ञातप्रकारत्वान्नैवायमथ यत्तत्र तत्रेति श्रुत्यादिषु बाधः संबध्यते। किं तर्हि। बाधाधिकारादिहाऽऽचार्यस्य यावन्तः शास्त्रोपनिबद्धा बाधभेदास्ते सर्वे हृदयमनुप्राप्ताः। तेषां च न श्रुत्यादिसदृशो बाध उपपद्यते। सर्वत्र चैकरूपेण बाधमार्गेण भवितव्यम्। अतो यदि वा तदीयः प्रकारः श्रुत्यादिष्वस्तु श्रुत्यादिप्रकारो वा तेषु। तत्र श्रुत्यादिगतस्तावत्संप्रत्येव कथित इति किं तेन पृष्टेन। ये त्वेतद्व्यतिरिक्तास्तेषु कथमिति मन्यमानो वदति। **अथ यत्तत्र तत्रोच्यत इदमनेन बाध्यते**—प्रत्यक्षेणानुमानं, मृगतृष्णादिप्रत्ययाश्च, यथास्वं षड्भिरपि प्रमाणैः प्रमाणाभासः, 860
श्रुत्या स्मृतिः, आप्ताविगीतस्मृत्याऽनाप्तविगीतस्मृतिः, अदृष्टार्थया दृष्टार्था, श्रुतिप्रभवया लिङ्गादिप्रभवाऽर्थवादप्रभवा च, स्मृत्याऽप्याचारः, सोऽप्यभियुक्ततराचारेण, संदिग्धमसंदिग्धेन, दुर्बलाश्रयं बलवदाश्रयेण, उपसंहारस्थमुपक्रमस्थेन, अत्यन्तादृष्टार्थं नियमादृष्टार्थेन, आरादुपकारकत्वं सामवायिकत्वेन, अनेकार्थविधानमेकार्थविधानेन, अनेकशब्दार्थत्वमेकशब्दार्थत्वेन, बहुबाधोऽल्पबाधेन, वेदान्तरोत्पन्नं वेदान्तरविहितत्वेन, परशाखाविहितं स्वशाखाविहितेन, नित्यं नैमित्तिकेन, द्विप्रकारमप्येतत्क्रत्वर्थं पुरुषार्थेन, अनारभ्याधीतं प्रकरणाधीतेन, पौर्वापर्येण विरोधे पूर्वं परेण प्राकृतं वैकृतेन, प्रयोगवचनाश्रितं चोदकाश्रयेण निष्प्रयोजनं सप्रयोजनेन, ब्राह्मणक्रमो मन्त्रक्रमेण, देवताश्रयं द्रव्याश्रयेण, पश्चादाम्नातं पूर्वाम्नातेन, अल्पं भूयसा, गौणं मुख्येन, सामान्यविहितं विशेषविहितेन, सावकाशं निरवकाशेन, अङ्गं प्रधानेन, अङ्गधर्मः प्रधानधर्मेण, तत्सर्वमेव किं प्राप्तं बाध्यते, अथ श्रुत्यादिवदेवाप्राप्तमिति। तद्यदि तावच्छ्रुत्यादिवत्सामान्यविशेषातिदेशोपदेशिकादिष्वप्यप्राप्तबाधस्ततोऽवश्यं लिङ्गादाविव श्रुतेर्विनियोजकस्य शास्त्रस्याभावोऽभ्युपगन्तव्यः। तथा सति तस्यैकत्वाद्विरोधविषयवदितरत्राप्यभाव इति सार्वत्रिकबाधप्रसङ्गः। अथाविरोधापेक्षया सद्भावोऽभ्युपगम्येत तत इतरत्रापि सद्भाव एवेति तुल्यबलत्वापत्तिः। विशेषशास्त्राद्यनुपमर्देन चाऽऽत्मलाभाभावात्तदभ्युपगमे विपरीतबाधप्रसङ्गः। न ह्येकस्यैव शास्त्रस्य किंचित्प्रति सद्भावः किंचित्प्रत्यसत्त्वमिति युज्यते। तेन दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय, प्रकृतिवत्कुर्याच्छरमयं बर्हिरित्यादौ प्रतिब्राह्मणं प्रत्यङ्गं च शास्त्राभावादेकं शास्त्रम्। तद्यदि शरतक्रालोचनेन कुशकौण्डिन्ययोर्नास्तीत्यवधार्यते

---

५ प्य] अधिकरणान्तोपसंहारादिति—बलाबलाधिकरणस्य बाधग्रन्थान्त उपसंहारादित्यर्थः।

ततः प्रयाजादिमाठरादिष्वप्यप्रवृत्तिः। अथ तेष्वस्ति ततः कुशकौण्डिन्ययोरपि भवितव्यम्। अथ तौ प्रति नास्तीतरान्प्रत्यस्तीत्येतदप्येकवस्तुनि विप्रतिषेधान्निष्प्रमाणकम्। न चात्र प्रतिपत्तृभेदो विद्यते। येन संबन्धग्रहणाग्रहणवदविरोधः स्यात्। न च सकृद्गृह्यमाणत्वाच्छास्त्रभेदोऽवगम्यते। येनान्यस्यैव सत्त्वमन्यस्य चासत्त्वमित्यभिधीयेत। व्यक्तिपक्षे च कदाचिदेतद्भवेत्। आकृतिपक्षे तु यागगतव्यापारातिदेशपक्षे च विषयैकत्वाद्युगपदेकमेव शास्त्रं प्रवर्तते। एतेनैवोत्कालनबाधनं प्रत्युक्तम्। ब्राह्मणप्रकृतिवच्छब्दयोस्तुल्यहेतुत्वेन किंचिद्वर्जनासंभवात्। तथा च 'तद्वर्जं तु वचनप्राप्ते' इत्युक्त्वा 'न
861 चोदनार्थकात्स्न्यात्।' इत्युत्तरं दास्यति। पौरुषेयेऽपि तावद्वाक्ये हृदयार्थतया, विना शब्दव्यापारेणैव तद्वर्जं मया प्रयुक्तमित्येवमीश्वराज्ञानुरूपेण भवेन्न त्वेतद्वेदेऽवकल्पते। न चेह सामान्यशास्त्रात्परतो विशेषशास्त्राणि कल्प्यन्ते। येन सामान्यशास्त्रस्य तत्प्रकृतित्वमात्रमाश्रित्य विशेषशास्त्रापेक्षया सदसद्भावविरोधः परिहियेत। तस्मादवश्यंभाविन्यैकरूप्ये नाभिप्रेतबाधोऽवकल्पते। अथ कथंचित्प्राप्तबाधमेव मिथ्यात्वकल्पनयाऽऽश्रित्यैवमादिष्वविरोध इत्युच्यते तत एवं श्रुत्यादीनामपि प्राप्तबाधोऽङ्गीकर्तव्यः। तत्र चोक्तम्। अतो न बाधमार्गैकरूप्यं घटत इति। तदुच्यते। § 6102

न बाधस्यैकरूपत्वमेषितव्यं नियोगतः।
न किंचिद्विरुणद्धीह नानारूप्यं प्रमाणवत्।§ 6104

यथैवैते पुरस्ताद्बाधगोचरा भेदा वर्णिता नैतेष्वैकरूप्यमङ्गीकृतं तथाऽत्र न बाधप्रकारनानात्वेऽपि गम्यमाने कश्चिद्विरोधः। तत्र श्रुत्यादिषु तावद्यथोक्त एवाप्राप्तबाधः। न च तत्र किंचिद्विरुध्यते। तद्विषयप्राप्त्यन्तरानभ्युपगमात्। येऽप्येतच्छायानुपातिनोऽर्थविप्रकर्षादेव स्मृत्यादिबाधा भवन्ति तेऽपि हेतुसामर्थ्यकथनाच्छ्रुत्यादिबाधेनैव व्याख्याताः। ये तु प्रमाणतदाभासनित्यनैमित्तिकक्रत्वर्थपुरुषार्थपौर्वापर्यप्राकृतवैकृतसामान्यविशेषनिष्प्रयोजनसप्रयोजनाल्पभूयस्त्वसावकाशानवकाशाङ्गप्रधानतद्धर्मबाधास्तेष्विदमुक्तं प्राप्तं बाध्यत इति। **कथमिति**। श्रुत्यादिवैलक्षण्यविस्मितस्य प्रश्नः। उत्तरमाह—**सामान्यस्य कारणस्य विद्यमानत्वादिति**। दर्शितमेतद्ब्राह्मणप्रकृतिवच्छब्दयोः। यत्तु प्राप्तस्य ज्ञानस्यानुत्पादोच्छेदसंस्कारविच्छेदानामश-

---

३ संब] संबन्धग्रहणादविरोध इति पा°
४ व] संबन्धग्रहणाग्रहणवदविरोध इति—ज्ञानं हि पुरुषाधारं तद्भेदान्न विरोत्स्यते। पुरुषान्तरसंस्थं च नाज्ञानं तेन बाध्यते॥ इत्यादिसंबन्धाक्षेपपरिहारस्थश्लोकवार्तिकोक्तन्यायेनेत्यर्थः।
८ तु] ( अ° ३ पा°। ६ अ° १ सू° ३ )
९ चोद] ( अ° ३ पा° ६ अ° १ सू° ८ )
९ या] हृदयार्थतयेति—वक्तृहृदये विद्यमानतया वर्जनरूपोऽर्थो भवेदित्यर्थः।
१३ स्मा] यद्यप्राप्तमिति भाष्यार्थमुपसंहरति—तस्मादिति।
१६ बा] न बाधमार्गैकरूप्यमिति—अनेन च यद्यपि सर्वत्र बाधैकरूप्यमुचितं तस्य चासंभवान्न क्वचिद्भेदे बाधो घटत इत्येवं प्रश्नभाष्याशयो दर्शितः।

क्यत्वान्नास्ति बाधनमिति। तत्राऽऽह—**नैव निवर्तते। किं तर्हि। मिथ्याज्ञान-
मेतदिति प्रत्ययान्तरं भवतीति**। शास्त्रान्तरं ह्यनन्यगति दृष्ट्वा मृगतृष्णादिव-
देव सामान्यापहृतबुद्धेर्ममेयं भ्रान्तिः पूर्वमेतद्विषयपरिकल्पनया जातेत्यध्य-
वस्यति। तस्मात्प्रयाजादिमाठरादिप्राप्तिवेलायामुपजाताऽपि कुशकौण्डिन्य-
बुद्धिर्भ्रान्तिरिति निश्चित्य फलविमुक्तत्वानुबद्धमर्थं शास्त्रं वा बाधितुं मन्यते।
**किं नु खल्वमिथ्याज्ञानस्य रूपमिति**—यद्युत्पन्ना अपि प्रत्ययाः प्रत्ययान्त- 862
रैरित्थं निराक्रियन्ते ततोऽन्यत्रापि क आश्वास इति मन्यते। तत्कथयति।
यस्यान्वेषणेऽपि कृते बाधकप्रत्ययान्तरं नोत्पद्यत इति। यत्तु कारणदोषज्ञानं
द्वितीयमुपलक्षणं तल्लोकविषयत्वान्न वेदे संभवतीति नोपन्यस्तम्। प्रासङ्गिक-
मुक्त्वेदानीमधिकरणमुपसंहृत्याधिकरणान्तरमारभ्यते॥ १४॥ § 6105

इति बलाबलाधिकरणम्॥ ७॥

## ०.०.११६ अहीनाधिकरणम्

नन्वध्यायादौ यावानर्थः प्रतिज्ञातः स सर्वः पर्यवसितः। किमिदानीमव-
शिष्यते, येन चतुर्थलक्षणं नाऽऽरभ्यते। तदुच्यते। § 6107

बलाबलविविक्तानां श्रुत्यादीनामतः परम्।
विरोधः क्वास्ति नास्तीति विषयः परिशोध्यते॥ § 6109

तत्र प्रकरणस्य तावच्छ्रुतिलिङ्गवाक्यैः सह विरोधाविरोधौ संप्रधार्येति।
ज्योतिष्टोमे श्रूयते 'तिस्र एव साह्नस्योपसदः कार्या द्वादशाहीनस्य' इति।
तत्र साह्नशब्देन तावदह्ना समाप्यमानत्वात् 'सहैवाह्ना संस्थापयन्ति' इत्येवं
ज्योतिष्टोमो गृह्यत इति त्र्युपसत्त्वं तस्य। द्वादशाहीनस्येति तु द्वादशोप-
सत्त्वं किं ज्योतिष्टोमस्याथाहीनस्य द्वादशाहादेरिति संदिह्यते। यद्यहीन-
शब्दः कथंचिज्ज्योतिष्टोमेऽप्युपपद्यते ततः प्रकरणस्याविरोधात्तस्मिन्नेव नि-
वेशः। अथाहीन इत्यहर्गणनामधेयं ततः श्रुत्या संयुक्तत्वादसंयुक्तग्रहणस्व-
भावेन प्रकरणेनाग्रहणम्। अस्ति हि तदानीं श्रुतिप्रकरणयोर्विरोधः। किं 863
प्राप्तम्। सिद्धान्तेनोपक्रमं वाशब्देन व्यावर्त्य प्रकरणाज्ज्योतिष्टोमार्थत्वमिति
प्रतिजानीमहे। न च श्रुतिविरोधः। प्रकरणादेवाहीनशब्दस्यापि ज्योतिष्टोम-
गामित्वात्। अस्ति च नञ्समासान्वाख्यानेन तदभिधानसामर्थ्यम्। अतो य-
द्यपि 'अह्नः खः क्रतुसमूहे' इत्येवं व्युत्पाद्यमानोऽहर्गणवाच्यहीनशब्दो भवति

---

१० मु] अधिकरणमुपसंहृत्येति—अनेन 'तदेतेपामिति' भाष्यस्याध्यायार्थोपसंहारपरताभ्रान्तिर्निरस्ता वेदितव्या।

५ धा] (अ॰ ३ पा॰ ६ अ॰ ७) इत्यतः प्राचीनेष्वधिकरणेष्विति शेषः

तथाऽपि विरोधपरिहारार्थमहीनगुणयोगादेव ज्योतिष्टोमार्थः समर्थनीयः। स हि कृत्स्नविधानात्सर्वप्रकृतित्वाच्च न कुतश्चिद्धीयते। न चैनं केचिदपि क्रतवः प्रकृतित्वेन जहति। यत्तु भाष्यकारेणोक्तं **दक्षिणया क्रतुकरणैर्वा न हीयत** इति। तदसंबद्धम्। दक्षिणाक्रतुकरणप्रतिपत्तिनिमित्तानुपादानाद्यथारुचि विकल्पनायां वाऽनवस्थितसमासार्थप्रसङ्गात्। सहस्रदक्षिणादिक्रतुभ्यश्च दक्षिणाभिर्हीनत्वात्क्रतुकरणैरपि विकारभूतोक्थ्यादिसंस्थाभ्योऽग्निष्टोमसंस्थस्य न्यूनत्वात्। तस्माद्विध्यन्तदानेनायं न कंचिज्जहाति, केनचिद्वा न हीयत इत्यहीनः। प्रकरणसामर्थ्यादनेन गुणयोगेनोच्यत इति गौणो न गौणवृत्त्याश्रवणात्॥ १५॥ § 6110

मुख्यः प्रथमकार्यत्वाज्ज्योतिष्टोमोऽभिधीयते।
अहीनशब्दसंयोगो न तु तस्य कथंचन॥§ 6112

असंयोगाच्च तेनास्य या संख्या तेन संगता।
न सा प्रकरणात्तस्य तेनास्मादपकृष्यते॥§ 6114

द्वादशत्वमहीनेन षष्ठीश्रुत्यैव संगतम्।
अहीनोऽहःसमूहश्च ज्योतिष्टोभे हि साह्नता॥§ 6116

यत्तु गुणात्तत्र प्रवर्त्स्यतीति तद्विकल्प्य निराकरोति। यदि तावद्गौण इत्युपचारात्प्रवृत्तोऽभिधीयते ततो न प्रकरणानुरोधेन श्रुत्यर्थपरित्यागो यु-
864 क्तः। न चेदमर्थवादार्थं येनैकाहोऽपि प्रशंसितुमहर्गणवदुपचर्यते। न चास्य शब्दान्तरं नास्ति येन सिंहगुणसमूह इवेत्थं क्लेशेन प्रतिपाद्यते। तस्मादौपचारिकत्वं तावदयुक्तम्। न च नञ्समासेनावयवव्युत्पत्तिः। समुदायप्रसिद्ध्या तन्निराकरणात्। न च नञ्समासस्य लक्षणमस्ति। नञ्समासे हि सत्ययव्ययपूर्वपदप्रकृतिस्वरसत्त्वादाद्युदात्तत्वं स्यात्। मध्योदात्तस्त्वयं पठ्यते। तेन खप्रत्ययान्तताध्यवसानम्। तथा हि सति 'आयन्नादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थम्' इत्येवमीनादेश आश्रीयमाणे प्रत्ययाद्युदात्तत्वेनेकारे स्वरः सिध्यति। तस्मादहर्गणनामधेयमेतत्। अपि च— § 6117

साह्नशब्देनैवद्वादशत्वसंबन्धेऽप्यवकल्प्यमानेऽहीनपदोपादानादस्य शास्त्रस्यार्थान्तरवाचित्वं विज्ञायते। प्रकरणाद्वा त्रित्वद्वादशत्वयोः संबन्धे लब्धे द्वावपि साह्नाहीनशब्दावनर्थकौ स्याताम्। अर्थान्तरत्वे त्वहीनस्य स तावदवश्योपादतव्यः। ततश्चाऽऽनन्तर्यात्त्रित्वस्यापि तत्संबन्ध एव प्रसज्यत इति व्यवस्थार्थं साह्नग्रहणमप्यर्थवत्। तस्मादपकर्ष इति। न तु किलैतद्युक्तम्। परप्रकरणेऽन्यधर्मविधेरन्याय्यत्वात्तेन वाऽसंबन्धपदव्यवायविच्छिन्नस्य प्रकर-

६ तुक] क्रतुकरणैरिति—आग्नेयादिक्रतुपशुभिरित्यर्थः।
३० तु] एवं यथाभाष्यं तावदधिकरणं व्याख्याय तत्र स्वाभिप्रायं वक्तुमारभते—न त्वित्यादिना।

णस्य पुनरनुसंधानक्लेशाद् 'द्वादशोपसदः' इति च द्वादशाहप्रकरणे विहितत्वात्तत्प्रकृतित्वेन सर्वाहीनेषु तत्प्राप्तेः। अतस्त्रित्वमेवास्मिन्वाक्ये सर्वदोषरहित्वाद्विधीयते द्वादशत्वं त्वहीनसंबन्धिवाक्यान्तरादेव प्राप्तमौचित्यरूपेणास्य स्तुत्यर्थं निवीतादिवदनूद्यत इति। कथं तर्ह्यधिकरणं नेतव्यम्। तदुच्यते। § 6118

ज्योतिषो यद्यहीनत्वं ततो विधिरयं भवेत्।
अहर्गणे तु तस्येदं प्राप्तं स्तुत्यर्थमुच्यते॥§ 6120

एतदुक्तं भवति। किं ज्योतिष्टोमोऽहीनस्तस्य तेदं प्रकरणादङ्गं विधीयते। अथाहर्गणस्तस्य च प्राप्तमेवान्यार्थमनूद्यत इति। नन्वेवं सत्यहर्गणसंबद्धमप्येतज्ज्योतिष्टोमस्यैव स्तुत्यर्थमुपयुक्तमिति प्रकरणविरोधविचाराभावः प्राप्नोति। नैष दोषः। पूर्वपक्षे हि द्वादशत्वस्य विधीयमानस्य प्रकरणं ग्राहकं भवतीत्यनुगृह्यते। सिद्धान्ते त्वहर्गणसंयुक्तस्य प्रकरणं नेष्टमिति बाध्येत। 865
अन्यत्त्वेतत्, यत्तथा सत्यपि प्रकारान्तरेण प्रकण एवोपयुक्तमिति। यदा तु द्वित्वबहुत्वन्यायेनोत्कर्षोऽपि कथंचिदाश्रीयते, शाखान्तरविधौ च सत्यपि शाखान्तरीयस्य प्रयोजनान्तररहितस्य विधित्वमुपपद्यते तदा यथाभाष्यमेव शक्यं समर्थयितुम्। सर्वथा 'द्वादशाहीनस्य' इत्येतत्तावदहर्गणविषयतवात्प्रकरणादुत्कृष्यत इति सिद्धम्॥ १६॥ § 6121

इति अहीनाधिकरणम्॥ ८॥

## ०.०.११७ नैमित्तिकप्रतिपदोरुत्कर्षाधिकरणम्

पूर्ववदेव विचारः। एतावत्तु भिद्यते। पूर्वत्र प्रधानान्तरेण प्रकृतासमर्थशब्दाभिधेयेन सह संबन्ध आसीदिह तु गुणेन यजमानद्वित्वादिना कथंचिदाशङ्कितप्रकृतसंबन्धेन। तत्र पूर्वन्यायेनैव सिद्धान्तोपक्रमं सूत्रम्। न तावदिह यजमानद्वित्वबहुत्वे विधीयेते। सिद्धानुवादेन निमित्तीकृत्य प्रवृत्तेः प्रतिपद्विधिपरत्वात्। अनेकविधौ च वाक्यभेदात्। अविहितत्वाच्च न ज्योतिष्टोमे यजमानद्वित्वबहुत्वे विद्येते। कुलायादिषु त्वेकाहेष्वहीनेषु च प्रत्यक्षविहिते विद्येते। 'राजपुरोहितौ यजेयाताम्' 'एतेनैव द्वौ याजयेत्' 'एतेनैव त्रीन्याजयेत्' 'एको द्वौ बहवो वाऽहीनैर्यजेरन्' इति। तस्मादुत्कर्षः॥ १७॥ § 6123

१३ कारा] प्रकारान्तरेणेति—प्रकरणस्याविनियोजकत्वेऽपिद्वादशत्वस्य प्रकृतज्योतिष्टोमसंबन्धित्रित्वस्तुत्यर्थत्वेनेत्यर्थः। अयमाशयः। उक्तरूपेण 'द्वादशाहीनस्य' इत्यस्य व क्यान्तरप्राप्ताहीनसंबन्धिद्वादशत्वानुवादकस्य प्रकरणपाठार्थवत्त्वेऽपि प्रकरणस्य विनियोग एव प्रामाण्याद्विनियोगाभावे प्रकरणबाधो भवत्येवेति।

१४ न्या] द्वित्वबहुत्वन्यायेनेति—अनन्तराधिकरणवक्ष्यमाणन्यायेनेत्यर्थः।

866 प्रकरणाज्ज्योतिष्टोमे निवेशः। न चाहीनवदप्रकृतयज्ञसंबन्धोऽस्ति। यज-
मानद्वित्वादिसंबन्धस्तु निमित्तमात्रोपयिकत्वान्नाङ्गाङ्गिभावाय प्रभवति। न च
तद्द्वारेण क्रतुसंबन्धो घटते। लक्षणाप्रसङ्गात्। न हि श्रुत्योपयुक्तानां ल-
क्षणयोपयोगान्तरं युज्यते। द्वित्वादिस्वरूपसंबन्धे तु विधिरेवानर्थको भवेत्।
फलकल्पनायाश्च प्रकरणसंबन्धकल्पना ज्यायसी। यत्तु निमित्तं प्रकरणे
नास्तीति। तदुच्यतेऽर्थाद्भविष्यति। न हि विहितमेवैकं निमित्तं भवति। अर्थ-
प्राप्तस्याप्युपपद्यमानत्वात्। अस्ति चैकाशक्तिपक्षे द्वित्रादियजमानप्राप्तिः। न
चाद्यापि यजमानैकत्वविवक्षामवधारयामः। सत्यामपि च विवक्षायाम् ‘अपि
वाऽप्येकदेशे स्यात्’ इत्यनेन यथैवाशक्तेरन्यत्किंचिदङ्गं हाप्यते तथैव यज-
मानैकत्वमपि कदाचित्परिहाप्य द्वौ बहवो वा यजेरंस्ततश्चास्ति निमित्तम्।
अथवैतदेव प्रतिपद्विधानं दृष्ट्वाऽर्थाद् द्विबहुयजमानकर्तृश्रुतिं कल्पयिष्यामः।
सा चैतस्मिन्नेव पक्षे भवति न प्रतिपदन्तरपक्षेष्विति नैकत्वचोदना विरोत्स्य-
ते॥ १८॥ § 6124

प्रकृतिग्रहणं प्रकृतप्रतिपत्त्यर्थम्। औपदेशिकत्वाद्वाऽत्यन्तानतिक्रमार्थम्।
आतिदेशिकं ह्यर्थवशेन बाध्येतापि। प्रत्यक्षविहितं त्वेतत्काम्ये नित्ये च। य-
जेतेत्येकवचनश्रवणात्। न चास्याविवक्षायां कारणमस्ति। यथा च विवक्षा
867 तथा षष्ठे प्रतिपादयिष्यते। यदप्यशक्तिकृतं हापनं तदप्येको यथा श-
क्नुयादित्युपबन्धादन्याङ्गविषयं विज्ञायते। शक्नोति हि दक्षिणापरिमाणं प-
रित्यज्यैकोऽपि निर्वर्तयितुम्। उत्पत्तिप्रयोगचोदनास्थत्वाच्च संख्यानुग्रह एव
युक्तः। तस्मादेकयजमानकत्वान्न प्रकृतौ निमित्तमस्तीत्युत्कृष्ये। यत्त्विदमेव
वचनं सामर्थ्यादाक्षेप्स्यतीति। तन्न। अन्यथाऽप्युपपद्यमानत्वात्। यदि ह्येत-
न्निमित्तमनाक्षिपदनर्थकीभवेत्तत आक्षिपेत्। कथं चैतदनर्थकं भवेद्यदि प्र-
कृताविवान्यत्रापि द्वित्वबहुत्वे न स्याताम्। ननु ते अन्यत्र न स्तः। कु-
लायादौ विद्यमानत्वात्। इह च सिद्धवन्निमित्तत्वेनोपादानाद्वाक्यभेदप्रसङ्गाच्च
नार्था दाक्षेपमर्हतः। पत्न्यभिप्राये तु द्वित्वे नित्यत्वान्निमित्तोपादानानर्थक्यम्।
बहुभ्य इति च विरूपैकशेषः, स्वरसतः पुंबहुत्वप्रतीतौ सत्यां विधिर्निष्प्र-
माणः कल्प्येत। ‘क्षौमे वसानौ’ इत्यत्र त्वगत्या पत्न्यां द्वितीयशब्द इष्टः।
न हि द्वियज्ञवद्द्विपुरुषकमाधानं क्वचिद्विहितम्। एकद्विपत्नीकप्रयोगावरोधाच्च
नित्ययाः प्रतिपद आनर्थक्यं भवेत्। विषमशिष्टविकल्पो वाऽभ्युपगम्येत त-
स्मादप्युत्कृष्यते। यत्तु क्रतुसंबन्धो नाभिहित इति नैष दोषः। प्रतिप-
च्छब्दादेव क्रतुगामित्वप्रतीतौ सत्यां द्वित्वादिना विशेषप्रतिपत्तिसिद्धेः। य-
जमानशब्दो वाऽन्यथानुपपत्त्या यज्ञमुपस्थापयिष्यति। तस्माद्व्यतिरिक्तसंयोगे
सत्यस्ति प्रकरणविरोधस्तत्र च श्रुतेर्बलीयस्त्वम्॥ १९॥ § 6125

इति नैमित्तिकप्रतिपदोरुत्कर्षाधिकरणम्॥ ९॥

८ अपि] (अ° ६ पा° ३ अ° १ सू° २) इत्यत्रेति शेषः
४ तिपाद] ( अ° ६ पा° २ अ° २ )

## ०.०.११८ जाघन्यधिकरणम्

उत्कर्षबुद्धेरपवादः प्रस्तूयते। ‘जाघन्या पत्नीः संयाजयन्ति’ इति गुणप्र- 868
धानत्ववचनव्यक्तिद्वयात्संदेहः। यदि जाघनीं संस्कार्यत्वेनोदिश्य पत्नीसंयाजाः संस्कारका विधीयन्ते ततः संस्कार्यस्य प्राधान्यात्स्वस्थानापरित्यागे सति यत्र जाघनी तत्र पत्नीसंयाजा न यत्र ते तत्रासौ। सा च लोकस्था निष्प्रयोजनत्वान्न संस्क्रियत इत्यग्नीषोमीयगता कृतार्थत्वात्संस्कर्तव्या। यदि तु पत्नीसंयाजोद्देशेन जाघनी विधीयते ततः प्रकृतानुवादबुद्ध्यनपायाद्दर्शपूर्णमासयोरेव जाघनीविधानम्। किं प्राप्तम्। आरादुपकारकत्वात्सामवायिकत्वस्याभ्यर्हितत्वादन्यत्र धात्वर्थविधानाद्विधिप्रत्यासत्तेरेकदेशद्रव्याणां चाप्रयोजकत्वात्तथा सति च परप्रयुक्तकृतार्थग्रहणेन प्रतिपत्तिलक्षणापत्तेरग्नीषोमीयजाघनीसंस्कारविधानादुत्कर्ष इति। **सा तत्संबद्धा कर्तव्येत्युच्यत** इति च्छेदः। परं च कर्मकथनम**एवं सती**त्यादि। यदि पुनः, **उच्यते एवं सती**ति योज्यते ततः परिचोदनाच्छायापत्तेः। न च तद्युक्तम्, उत्तरानभिधानात्। तस्मादात्मवचनत्वेनैव योज्यम्। नन्वेवं सति प्रतिपदादिवदेवोत्कर्षात्प्रकृतौ पत्नीसंयाजानामकरणं प्राप्नोति। प्राप्नुयादेवम्। यदि पशौ पत्नीसंयाजा न स्युः। ते त्वतिदेशप्राप्तास्तत्र विद्यमाना एव केवलं जाघनीसंबन्धित्वेन विधीयन्ते। नैव तर्ह्युत्कर्ष इति वक्तव्यम्। सत्यम्। न कस्यचित्पदार्थस्योत्कर्ष इदमेव तु वाक्यं विकृतौ कार्यं कुर्वदुत्कृष्यत इत्युच्यते॥ २०॥ § 6127

न वाऽस्य विधेरुत्कर्ष इति। कुतः। § 6128 869

जाघन्युद्दिश्यमाना स्यात्संस्कार्योत्कर्षकारणम्।
इहोपादीयतेऽङ्गत्वाद्यागेष्वाज्यवदेव सा॥ § 6130

सर्वत्रैवंविधे वाक्ये गुणे विधिशक्तिः संचरतीत्युक्तम्। पत्नीसंयाजाश्चानन्तरविहिता मनसि वर्तन्त इति न विधातुं शक्यन्ते। न चेह स्थितेन पशुगतपत्नीसंयाजानुवादो युक्तः। तद्बुद्ध्यभावात्। न च जाघन्याः कालादिवदनुपादेयत्वं, येनेमं विधिमाकर्षेत्। संस्कार्यत्वादिति चेत्। न। तृतीयावगतगुणत्वातिक्रमप्रमाणाभावात्। यदि च कृतार्थां जाघनीं प्रस्तुत्यायं विधिः प्रवर्तेत तथाऽपि तावत्कदाचित्प्रयाजशेषवद्द्वितीयार्थे तृतीयेति व्याख्यायेत। सा त्वपूर्वा विधीयते। तस्मान्नोत्कर्षमर्हति। न च प्रकरणबद्धत्वादेते पत्नीसंयाजा उत्कर्षं सहन्ते। वाक्यबलीयस्त्वादिति चेन्न। वाक्यस्याप्येवमादेरधिकृतापेक्षित्वेन प्रकरणाद्दुर्बलतरत्वात्। यदि ह्येतदेव पत्नीसंयाजानामुत्पत्तिवाक्यं भवेत्ततः प्रकरणादाच्छिन्द्यात्। एते तु वाक्यान्तरोत्पत्तित्वात्संविधिवशेन यावता कालेनैतेन वाक्येन संगृह्यन्ते तावता दर्शपूर्णमासाभ्यामपि शक्या ग्रहीतुम्। न च जाघन्याः फलवत्त्वं विज्ञातं, येनैषां प्रयोजनाकाङ्क्षामपनयेत्। अतो

११ क] कर्मकथनमिति—कर्म-अनुष्ठानं कथ्यतेऽनेनेति व्युत्पत्या, एवं सतीतिभाष्यमनुष्ठानविशेषप्रदर्शनार्थमित्यर्थः।

870 यावदसौ किमर्थेत्यालोच्यते तावत्फलवद्दर्शपूर्णमासप्रसूतेन कथंभावेनाङ्गत्वमापादितम्। न चेहापूर्वयागविधानं, यजिमात्रत्वेनाश्रवणात्। पत्नीसंबद्धयागश्रवणं ह्येतत्। तत्र यदि जाघन्युद्देशेन च कर्म विधीयते पत्न्यश्चास्य विधीयन्ते ततोऽनेकार्थविधानात् 'ऐकशब्द्ये परार्थवत्' इति वैरूप्यलक्षणो वाक्यभेदः स्यात्। अल्पार्थविधिसंभवाच्च न विशिष्टविधानेन परिहारो घटते। तस्माद्विशिष्टं यागमुद्दिश्य द्रव्यं विधीयते। नन्वेवमपि विशिष्टानुवादात्सुतरां वाक्यं भिद्येत। नैष दोषः। प्रकरणप्राप्तेः पत्नीशब्दस्यातन्त्रत्वात्। यथैव 'अभिक्रामं जुहोति' इति सामान्यशब्दोऽप्यधिकारात्प्रयाजविषयो भवति तथैव यत्संयाजयन्तीत्येतावतैवाधिकृताः पत्नीसंयाजा; प्रत्येष्यन्ते। तस्मादनुत्कर्षः॥ २१॥ § 6131

यदुक्तम् 'एकदेशद्रव्यश्चोत्पत्तौ विद्यमानसंयोगात्' अप्रयोजक इति। तत्रोच्यते॥ २२॥ § 6132

स नामाप्रयोजको भवति यस्य प्रकृतग्रहणाद्विनाऽर्थो न ज्ञायते। यथा 'उत्तरार्धात्स्विष्टकृते समवद्यति' इति। जाघनीशब्दस्तु हृदयदिशब्दवदाकृतिवचनः। सा चान्तरेणापि पशूपादानं परप्रयुक्तपशूपजीवनं वा शक्योपादातुम्। 'रूपं वाऽशेषभूतत्वात्' इति यथाकथंचिदुत्पन्ना येन केनचिदुपादाय शक्याऽनुष्ठातुम्। न चेयमवयवभूता लोके न प्रचरति। मांस-
871 विक्रयिणो हि प्रत्यङ्गविभक्तानेव पशून्विक्रीणते। तत्र शक्या जाघनी क्रयादिनोपादातुम्। न चावश्यमियं छागादेव ग्रहीतव्या। जघनावयवमात्रत्वेन श्रवणात्। अग्नीषोमीयेऽपि हृदयादीनां संभवत्येव लोकादुपादानम्। तथा सत्यपि तु तेषां भेदेनैव जातिविशेष उत्पत्तिप्रकारश्च संज्ञपनादिर्नियत इति क्रयाद्यनाश्रयणम्। न त्विह तथा शास्त्रकृता निष्पत्तिः। प्रकृतिग्रहणं च दर्शपूर्णमासप्रतिपत्त्यर्थम्। तस्माद्दार्शपौर्णमासिकपत्नीसंयाजाङ्गभूतेनाऽऽज्येन सह विकल्प्यमाना जाघनीति सिद्धम्॥ २३॥ § 6133

इति जाघन्यधिकरणम्॥ १०॥

## ०.०.११९ संतर्दनाधिकरणम्

इह वाक्यप्रकरणयोर्विरोधाविरोधचिन्ता। ज्योतिष्टोमे सोमाभिषवाधारत्वेन फलकद्वयमाम्नातम्। तत्प्रकृत्य श्रूयते 'दीर्घसोमे संतृद्याद्धृत्यै' इति। भित्त्वा संघातयेदित्यर्थः। तत्र दीर्घसोमशब्दः किं प्रकृतावेव कथंचिदुपपद्य-

४ ऐक] ( अ॰ १ पा॰ ४ अ॰ ५ सू॰ ८ )
१ देश] (अ॰ ४ पा॰ १ अ॰ १३ सू॰ २८)
४ वा] (अ॰ ७ पा॰ ३ अ॰ ११ सू॰ २९)

३ भित्त्वा] भित्वेति—द्वयोः समीभूतयोः फलकयोः संश्लेषार्थं भेदनेन संश्लेषप्रदेशं तनूकृत्यैकस्योपर्यपरं स्थापयित्वा कीलादिना संश्लेषयेदिति यावत्।

ते ततश्चाविरोधः प्रकरणस्य, अथ दीर्घकालसत्राहीनग्राहित्वादनुपपद्यमान उत्कर्षेदिति संशयः। एते चात्र पक्षा भविष्यन्ति। किं शुद्ध एव ज्योतिष्टोमे निवेशो दीर्घयजमानके वाऽथवोक्थ्यादिसंस्थास्वेवाथवा सत्राहीनयोरेवाथवाऽग्निष्टोमान्यमात्र इति। किं प्राप्तं, दीर्घसोमशब्दस्येष्टिपशुदर्विहोमापेक्षया प्रकृतावेवोपपत्तेः, संतर्दनप्रयोजनस्य च दार्ढ्यस्य संभवात्, असंतर्दनविधिना च सह व्रीहियववद्विकल्पसिद्धेः प्रकरणानुग्रहायानुत्कर्ष इति। क्रयणवद्विकल्प इत्युपरिष्टात्समुच्चयस्थापनात्पूर्वपक्षेण दृष्टान्त इति व्याख्येयम्। न चावश्यं सर्वत्र सिद्धान्त एव दृष्टान्तो भवति। यस्य कस्यचिन्निदर्शनस्य प्रतिपत्तिकारणत्वसिद्धेः। असंतर्दनवाक्यमनुपन्यस्यैव वाऽनर्थलोपदृष्टान्तः क्रयवदिति समर्थनीयः। तत्रैवं योजना भवति। नन्वल्पकालत्वात्सोमस्य प्रकृतौ 872
मन्दफलं संतर्दनम्। नैष दोषः। क्रयणवदर्थत्वात्। यथाऽल्पमूल्यत्वात्सोमस्य वासःप्रभृतीनामेकेन केनचित्क्रये सिद्धे शेषाणि वचनसामर्थ्याद्दीयमानानि तस्यैवाऽऽनतस्य सुतरामानतिं कुर्वन्तीति न लुप्तार्थानि भवन्ति। स्वानतात्क्रीतः सोमोऽभ्युदयकारी भवतीति च शास्त्रार्थो विज्ञायते। तथाऽत्र सत्यप्यसंतृण्णयोरपि प्रकृताभिषवक्षमत्वे वचनसामर्थ्याद्दृढतरकृतोऽभिषवः श्रेयस्कर इत्यवगमादलुप्तार्थत्वम्। तस्मादनुत्कर्ष इति॥ २४॥ § 6135

वाक्यकृताद्वा दीर्घसोमसंयोगादुत्कर्षः। कुतः। § 6136

दृष्ट्वा ह्रस्वं सजातीयं दीर्घबुद्धिः प्रवर्तते।
तस्मात्सोमस्य दीर्घत्वं भवेत्सोमान्तरेक्षया॥ § 6138

न हीष्टिपशुदर्विहोमापेक्षया सोमस्य दीर्घत्वं युक्तं विजातीयत्वादनुपात्तत्वाच्च। सर्वत्र प्रतियोगिन्युपाते दीर्घह्रस्वादिविभागो भवति। न चात्रेष्टयादय उपात्ता यानालोच्य ज्योतिष्टोमो दीर्घ इत्युच्येत। ननु सोमयागभेदोऽप्यनुपात्त एव। यद्यप्यनुपात्तस्तथाऽपि तुल्यजातीयत्वं तावदस्त्यपेक्षाकारणम्। विशेषणविशेष्यभावाच्च सोमत्वे सति दीर्घत्वमुपादीयमानं सोमान्तरस्य व्यवच्छेदार्थमेव विज्ञायते। तेषां कः पुनर्दीर्घः कुतो वा दीर्घ इत्यपेक्षिते ज्योतिष्टोमस्तावन्न कुतश्चिद्दीर्घ इति ततोऽन्ये गृह्यन्ते। तेषां च प्राथम्यात्स एवापेक्षाकारणं भवति॥ २५॥ § 6139

यथाकथंचिद्दीर्घसोमशब्देऽवकल्प्यमाने न युक्तः प्रकरणबाधः। स च कर्तृद्वारेणोपपत्स्यते। न च स्वरगतः कश्चित्समासे विशेषोऽस्ति। उभयथाऽप्यन्तोदात्तत्वात्। अतः षष्ठीसमास इति॥ २६॥ § 6140

क्रतुत एव दैर्घ्यं समानाधिकरणसमास इत्यर्थः। किं कारणम्। एवमुभ- 873
योः स्वार्थ एव वादो भविष्यति। अन्यथैकस्य परविशेषणत्वात्स्वप्रधानभूतार्थवादानुपपत्तिर्भवेत्। एवं च बहुसोमाभिषवाद्दृढत्वाकाङ्क्षायां सत्यां दृष्टार्थोऽयं वादो भविष्यति। अन्यथा मन्दत्वाद्दृढत्वाकाङ्क्षायास्तदनुपपत्तिः स्यात्। तथा

७ रिष्टा] ( अ° १२ पा° ४ अ° ३ ) इत्यत्रेति शेषः

‘धृत्यै’ इत्यर्थवादोऽसुमेवार्थं द्योतयति। तस्माद्यत्र फलकयोर्दारणशङ्का तत्रैवैताद्विधानम्। इतरथा दीर्घेण कर्त्रा विशेषणमत्यन्तादृष्टार्थं भवेत्। दीर्घे ह्रस्वे च कर्तरि कर्मणस्तुल्यरूपत्वात्। बाह्यं चैतत्कर्त्रा विशेषणम्। स्वतो विशेषणं त्वन्तरङ्गम्। तस्मादुत्कर्षः॥ २७॥ § 6141

परिचोदनापदोत्तरभूतमेतत्सूत्रम्। मा नामाग्निष्टोमसंस्थायां निवेशोऽभूदुक्थ्यादिषु त्वग्निष्टोमापेक्षया दीर्घसोमशब्द उपपत्स्यते प्रकरणं चानुग्रहीष्यते। तस्मात्तिसृष्वपि संस्थासु निवेश इति। प्रकरणाविशेषः संस्थाधिकरणेनाद्यापि न निराकृत इत्येव युक्तम्। अथवाऽस्त्येव संस्थानां प्रकरणम्। तत्र येषां धर्माणामग्निष्टोमार्थता संभवति तेषु नित्यानित्यसंयोगविरोधाद्यावर्तते। संतर्दनस्य पुनर्नित्येनाग्रहणात्केवलानित्यविषयत्वं न विरुध्यते। तस्मात्संस्थासु निवेश इत्युक्तेऽभिधीयते। § 6142

संस्थास्वपि तु तावत्त्वात्सोमस्याभिषवः समः।
कर्तृपक्षवदेवातो धृत्या इति वृथा स्तुतिः॥ § 6144

874 सत्यप्यत्र कर्मकालयोर्दीर्घत्वे तावानेवातिदेशप्राप्तो दशमुष्टिः सोमोऽभिषूयते। धारणस्य तु तुल्यत्वाद्दृष्टार्थत्वार्थवादयोरनुपपत्तिः स्यात्। प्रदानविवृद्ध्या न्यूनपात्राग्रहणाच्च सोमवृद्धिर्भविष्यतीति चेन्न। दशमुष्टित्रिपर्वपरिमाणयोः शाब्दत्वात्प्रदान विवृद्धिस्तोयादिवृद्ध्या संपादनीया। तस्मादविशिष्टं धारणमित्युत्कर्षः॥ २८॥ ॥ २९॥ ३०॥ § 6145

स्याद्वा तेनैव हेतुना संस्थासु निवेशः। प्रदानविवृद्ध्या च प्रदेयविवृद्धौ सत्यामर्थवाद उपपत्स्यते। तोयेन विवृद्धिरिति चेन्न। सोमसाधनकत्वे स-
875 ति वचनाद्विना द्रव्यान्तरप्रक्षेपानुपपत्तेः। तस्मात्सोम एव वर्धनीयः। स च स्थौल्यबहुपर्वत्वयोरसंभवाद्दीर्घपर्वा ग्रहीष्यते। तथा सति प्रदानविवृद्धिर्यथोक्तं च परिमाणं संभावितं भविष्यति। प्रकरणदीर्घसोमशब्दौ चोपपत्स्येते। शक्यं चेदानीं लतादैर्घ्येणापि सोमो दीर्घ इति वक्तुम्। अनित्यत्वादिति—नियतपरिमाणत्वस्यानियतत्वादिति मन्यते। शक्यं ह्युपायान्तरेण पूर्वपरिमाणमतिक्रमितुमित्यर्थः। न त्वेतद्युक्तम्। सत्राहीनेष्वसंभवात्। अतः ‘अवशिष्टानंशूनभ्यूहेत्’ इत्यभ्यूहो योऽनियतपरिमाणस्तदभिप्रायं ‘स्यादनित्यत्वात्’ इत्येतद्व्याख्येयम्। संस्थाधिकरणन्यायेनैव वा प्रकरणविरोधं ब्रुवाणस्य नित्येनाग्रहणादित्यनित्यत्वमुत्तरमभिधीयते। **तृतीयसवनेंऽशुरेको** गृह्यत इत्यत्र विवदन्ते। तस्यापि तत एव सोमादुपादानादतोऽत्रापि विप्रकृष्टपर्वत्वमात्रमेव कारणं

---

३ बा] बाह्यं चेति—दीर्घस्य यजमानस्य सोम इति तत्पुरुषपक्षे कर्तुर्यागासमवायित्वाद्बहिरङ्गत्वमित्यर्थः।
३ स्व] स्वतो विशेषणमिति—कर्मधारयपक्षे दैर्घ्यस्य यागसमवायित्वादन्तरङ्गत्वमित्यर्थः।
११ प्र] उक्थ्यादिषु वाऽर्थस्य विद्यमानत्वादिति सूत्रस्थभाष्यतात्पर्यार्थमाह—प्रदानेत्यादिना।
१२ मु] अविशेषात्स्तुतिर्व्यर्थेति चेदितिसूत्रस्थभाष्याभिप्रायं विवृणोति—दशमुष्टीत्यादिना।

वक्तव्यम्। तस्मादपि संस्थासु निवेश इति। न त्वत्र संस्थास्वेवेत्यवधारयितव्यम्। कुतः। § 6146

अग्निष्टोमान्यमात्रे हि दीर्घशब्दोऽवकल्पते।
अथान्येनेतिवत्तस्मात्संस्थाक्रत्वन्तरग्रहः॥§ 6148

यथैव 'य एतेनानिष्ट्वाऽन्येन यजेत' इत्येतन्न संस्थास्वेव स्थास्यति। किं तर्हि। अग्निष्टोमव्यतिरेकमात्रे। तथा दीर्घत्वमप्यग्निष्टोमातिरिक्तमात्रावलम्बनमशक्यं प्रकरणेन संस्थास्वेव स्थापयितुम्। प्रकृतिवच्छब्दपूर्णत्वाच्च न तासां प्रकरणमस्ति। न ह्येतद् गृहीतं प्राकृतं किंचिदङ्गं पुनरुच्चार्य विधीयते। प्रथमोपदिश्यमानज्योतिष्टोमधर्ममध्यपातित्वात्। इतश्च न संस्थानां प्रकरणमस्ति। कथम्। § 6149

असंबद्धव्यवाये हि सति तद्विनिवर्तते।
तेनाऽऽसां ज्योतिषेर्धर्मैर्विच्छिन्ने नानुषङ्गधीः॥§ 6151

यदि हि संतर्दनमुक्थ्यादीन्विधायावान्तरप्रकरणे श्रूयेत ततः स्यादपि प्रकरणग्रहणम्। इदं तु संस्थाधिकरणन्यायेन तदग्राह्यैर्ज्योतिष्टोमधर्मैरन्तरितत्वान्न संस्थाकथंभावानुषङ्गेण संस्पृश्यते। तस्मान्न प्रकरणं संस्थानं वा संस्थासु विनियोजकम्। किं तर्हि। वाक्यमेव। तच्च दीर्घसोमत्वाविशेषात्सत्राहीनेष्वपि तुल्यमिति सर्वधर्मता॥ ३१॥ § 6152

इति संतर्दनाधिकरणम्॥ ११॥

## ०.०.१२० प्रवर्ग्याधिकरणम्

प्रवर्ग्योऽनारभ्य कंचित्क्रतुविशेषमाम्नायते। 'यत्प्रवर्ग्यं प्रवृञ्जन्ति' इति। 876
स च वाक्यसंयोगेन क्रतुसंबन्धं प्रतिपद्यते 'पुरस्तादुपसदां प्रवर्ग्येण चरन्ति' इति। स च 'प्रकृतौ वा द्विरुक्तत्वात्' इत्येवं ज्योतिष्टोमं गच्छति। तत्र ह्युपसदः प्रत्यक्षविहिताः सन्ति। विकृतौ तु यावदनुमानेन ता गमिष्यन्ति तावत्प्रवर्ग्योऽपि यास्यत्येवेति नार्थ उपदेशेन। तेनाऽऽह—**ज्योतिष्टोमे प्रवर्ग्यं प्रकृत्य** श्रूयत इति। यद्वा कौषीतकिब्राह्मणे ज्योतिष्टोमप्रकरण एव

१४ सं] ( अ० ३ पा० ६ अ० १६ )
१ प्र] तप्तघृते पयःप्रक्षेपः प्रवृञ्जनम्। तच्च यस्मिन्कर्मणि वर्तते स प्रवर्ग्यः। तस्य च बह्वीषु शाखास्वनारभ्याधीतत्वाज्ज्योतिष्टोमे प्रवर्ग्यं प्रकृत्येति भाष्यमयुक्तमाशङ्क्याव्यभिचरितक्रतुसंबन्धसहकृतद्विरुक्तत्वन्यायेन ज्योतिष्टोमे संभवन्तं प्रवर्ग्यमित्येवमर्थपरतया परमनेन भाष्यमवतारयति—प्रवर्ग्योऽनारभ्येत्यादिना।
३ प्र] ( अ० ३ पा० ६ अ० १ सू० २ )
४ नु] अनुमानेन—अतिदेशेनेत्यर्थः।

स्वक्रमस्थस्य प्रवर्ग्यस्योत्पत्तिस्तदा तद्विषयः श्रवणोपन्यासो यथाश्रुत एव भवति। तं प्रवर्ग्यं प्रकृत्य श्रूयते ‘न प्रथमे यज्ञे प्रवृञ्ज्यात्’ इति। तत्र संदेहः। किं प्रथमयज्ञग्रहणेन सर्वसंस्थः सर्वप्रयोगावस्थश्च ज्योतिष्टोमो गृह्यत उत प्रथमप्रयोगमात्रमिति। तत्र किं प्राप्तम्। यज्ञशब्दसामानाधिकरण्यात् ‘एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः’ इति च प्रयोगात्प्रथमशब्दस्य ज्योतिष्टोमपर्यायत्वं विज्ञायते। ‘य एतेनानिष्ट्वा’ इति च सर्वयज्ञेभ्यः प्रथमं प्रयुज्यमानत्वेन विधा नोदतस्यैव ग्रहणम्। तथा च प्रकरणमनुगृह्यते। ननु च तदीयप्रथमप्रयोगेऽपि प्रकरणानपकर्षादस्त्येवानुग्रहः। कथमनुग्रहो यदा दीक्षितमहोदानपाकादिप्रतिषेधवदयं सर्वप्रयोगविषयः प्राप्नुवन्वाक्येनैकप्रयोगनिबन्धनः क्रियते। न हि तदा प्रकरणेन किंचन व्याप्रियते। ज्यौतिष्टोमिकप्रयोगाश्रयणस्यापि वाक्यकृतत्वात्। यदीहान्यः क- 877 श्चित्प्रथमप्रयोगार्हः स्यान्नैवैष प्रतिषेधो ज्योतिष्टोम एवावतिष्ठेत। तदभावात्तु यदि परिशेषादिदं वाक्यं संयुक्तप्राथम्यानुरोधेन ज्योतिष्टोमगामि भवेत्ततः प्रकरणस्य किमित्यवधारणाद्बाधः प्रसज्येतैव। तस्मात्प्रकरणानुग्रहार्थमपि प्रथमशब्दोपात्तादिसंख्यायुक्तमिदं ज्योतिष्टोमे स्यादिति॥ ३२॥ § 6154

यदि प्रथमशब्दोऽयं नाम स्याज्ज्योतिषः स्वतः।
तत एवं भवेदेष प्रयोगस्य तु वाचकः॥ § 6156

प्रथमशब्देन हि यत्कर्तुरप्रवृत्तपूर्वस्याऽऽद्यं प्रवर्तनं तदभिधीयते। न कर्म किंचित्। तद्योगात्तु कर्मणि प्रतीतिः स्यात्। साऽपि च तत्प्रयोगगतस्यैव। न हि द्वितीयादीन्प्रयुञ्जानः कश्चित्प्रथमं यजत इत्युच्यते। न चैवमयजमानस्य प्रथमयज्ञो नाम भवति। ततश्च पूर्वाभिहितप्राथम्यगुणलक्षणया तद्वति गृह्यमाणेऽर्थविप्रकर्ष आपद्यते। तत्र च स आश्रीयते यत्र तेन विनैकवाक्यत्वं नावकल्पते। यथा ‘एष वाव प्रथमो यज्ञानाम्’ इत्यत्र। न त्विह प्राथम्यस्य प्रतिषेधनिमित्तता न संभवति। येन पूर्वप्रतीतं सत्तदुल्लङ्घ्य तत्प्रयोगस्थोऽपि तावत्क्रतुर्गृह्येत। प्रयोगान्तरस्थस्तु दूरविप्रकृष्ट एव। नन्वेवं सति यस्य कस्यचित्प्रथमप्रयोगो निमित्तं प्राप्नोति। प्राप्नुयाद्यदि विधिरेष स्यात्। अयं तु प्रतिषेधत्वात्प्राप्तिमपेक्षमाणो लौकिकव्यापारेभ्यो वैदिकेभ्यश्चाध्ययनाधानाग्निहोत्रदर्शपूर्णमासादिभ्यः प्रवर्ग्यप्राप्त्यभावान्निवर्तमानः सामर्थ्येन सोमं गच्छति। तत्राप्यनारभ्यवादन्यायेन ज्योतिष्टोमं, प्रथमशब्दाच्च तस्याऽऽद्यं प्रयोगम्। एवं च सजातीयत्वेन प्रत्यासत्तेश्च तस्यैव द्वितीयादिप्रयोगापेक्षणं युक्ततरं भविष्यति। इतरथा तु दूरस्थयज्ञान्तरापेक्षायां सत्यां विप्रकृष्टतरत्वं भवेत्। तस्मात्प्रकरणं बाधित्वा वाक्येन प्रथमप्रयोगविषयता सिद्धा। तत्र तु केषांचित्तैत्तिरीयादीनाम् ‘अग्निष्टोमे प्रवृणक्ति’ इति पुनर्विधानमस्ति। तद्यदि तावद् द्वितीयादिप्रयोगविषयं कल्प्यते ततः प्रतिषेधाभावात्पूर्ववचनेनैव सिद्धेर्विधानानर्थक्यम्। 878 तस्मादाद्यप्रयोगविषयमेवैतत्। ततश्च प्रतिषेधो बाध्यमानः क्रत्वन्तरप्रथम-

प्रयोगं सावकाशत्वाद् गच्छतीति केचित्। तत्तु न युक्तम्। अग्निष्टोमस्यापि संस्थारूपस्यान्यत्र विद्यमानत्वात्। न च प्राथम्यं सावकाशम्। ‘य एतेनानिष्ट्वा’ इति केवलज्योतिष्टोमविषयत्वात्। प्रथमं हि यजनं प्रथमं यज्ञो न चैतदन्यस्य क्रतोरस्ति। तस्माज्ज्योतिष्टोमस्यैवातिरात्रसंस्थस्य प्रथमाहारे प्रतिषेधोऽग्निष्टोमे विधिरित्यपरे। विहितश्चातिरात्रस्यापि पाक्षिकः प्रथमाहारः ‘तस्मात्प्रथमं यजमानोऽतिरात्रेण यजेत’ इति। सोऽयं सामान्येनोभयोः संस्थयोः प्रतिषेधोऽग्निष्टोमे तु विशेषविधिः स बलीयान्। एतदपि न युक्तम्। अग्निष्टोमस्यापि बहुप्रयोगान्तरक्रत्वन्तरगामित्वेन सुतरां सामान्यरूपत्वात्। अतोऽतिरात्रप्रथमाहारे नित्यं प्रतिषेधोऽग्निष्टोमे तु विहितप्रतिषिद्धत्वाद्विकल्प इति केचित्। अत्र पुनश्चोदयन्ति। यद्येष प्रतिषेधस्तत एवं स्यात्। पर्युदासास्त्वेवंविधा इति दशमे वक्ष्यते ‘अपि तु वाक्यशेषः स्यात्’ इति। न चासावग्निष्टोमवाक्यशेषो भवति। यदि ह्यप्रथमयज्ञेऽग्निष्टोमे प्रवृणक्तीति कल्प्येत ततस्तस्मादेव सामान्यशास्त्रात्प्राप्तत्वादग्निष्टोमयुक्तविध्यानर्थक्यमापद्यते। तेन सामान्यविधेरेवैष शेषो यत्प्रवर्ग्यं कुर्वन्ति तदप्रथमयज्ञ इति। ततश्चातिरात्रविषयत्वमेव फलतो भवति। न चैक एव शेष उभयोर्वाक्ययोः संभवति। एकसंबन्धेनैव कृतार्थत्वात्। तस्मादग्निष्टोमविधेर्निरपवादत्वान्नित्यमेव तत्र भवितव्यमिति। उच्यते। स्यादेतदेवं यद्ययं पर्युदासो भवेन्न त्वयं पर्युदासः। वाक्यशेषत्वानुपपत्तेः। तत्राग्निष्टोमवाक्ये तावद्भवतैव प्रति पादितम्। अतिरात्रवाक्येऽपि यदि तदीयकथंभावपूरणवेलायामेतदुच्येत ततः शेषो भवेत्। न तु तथोक्तम्। संस्थानामसमानविधानत्वादवान्तरप्रकरणे च प्रतिषेधाश्रवणात्। न ह्यनेकज्यौतिष्टोमिकवाक्यान्तरव्यवहितातिरात्रप्रकृतिवच्छब्दस्यैष शेषोऽवकल्पते। तस्मात् ‘न तौ पशौ’ इतिवत्प्रतिषेध एवायं विज्ञायते। ननु प्रतिषेधोऽपि सन्प्रकृतिविषय एव प्राप्नोति। प्राप्नुयाद्यदि विकृतावपि नोपपद्येत। स तु प्राप्तिमात्रापेक्षित्वादुपदेशमतिदेशं वाऽनादृत्योभयत्रापि प्रवर्तते। शक्यं त्विह वक्तुं ‘प्रकृतौ वा द्विरुक्तत्वात्’ इति। ननु च तुल्यार्थत्व एतदेवं युक्तम्। अस्ति चेहार्थभेदः। 879
प्रकृतौ वैकल्पिकत्वादतिरात्रे च चोदकप्राप्तस्य नित्यप्रतिषेधात्। नैतदस्ति। वक्ष्यति ह्येतत् ‘प्रतिषेधः प्रदेशेऽनारभ्य विधाने च प्राप्तप्रतिषिद्धत्वाद्विकल्पः स्यात्’ इति। यस्य शास्त्रादृते प्राप्तिर्नास्ति तस्य प्राप्तिमनभ्यनुज्ञाय प्रतिषेधासंभवादवश्यं प्रतिषेधेनैव तद्विषयोऽपि विधिरङ्गीकर्तव्यः। स चेदङ्गीकृतः शास्त्रत्वाविशेषात्तुल्यबलत्वम्। अतः सर्वथाऽतिरात्रे विकल्पेन भवितव्यम्। तस्माद्द्विरुक्तत्वादुपदेशातिदेशयोश्च प्राप्तिकालवैषम्यात्प्रकृत्यर्थतैव वरमिति। नन्वेवं सति ‘अग्निष्टोमे प्रवृणक्ति’ इत्यनेनैव प्रकृतिविधेः सिद्ध-

५ थ] प्रथमाहारे—प्रथमप्रयोगे।
११ अ] ( अ° १० पा° ८ अ° १ सू° ४ )
२५ कृ] ( अ° ३ पा° ६ अ° १ सू° २ )
२८ तिषेधः] ( अ° १० पा° ८ अ° १ सू° १ )
२९ य] निरुक्तसूत्रार्थं वर्णयति—यस्य शास्त्रादृत इत्यादिना।

त्वादनारभ्यवादोऽनर्थकः प्राप्नोति। नैष दोषः। तेनोत्पत्तिरनेन विनियोग इत्येवं व्यापारभेदात्। अथवाऽनारभ्यवादोऽग्निष्टोमव्यतिरिक्तविषयो भविष्यति। नन्वग्निष्टोमवाक्येनोपसंह्रियते। न शक्यमेतदुपसंहर्तुम्। तन्नाम विशेषवचनेनोपसंह्रियते यत्क्रतुसंयोगायासमर्थं कथंचित्परोक्षवृत्त्या संयुज्यते। यथा साप्तदश्यम्। अयं तु साक्षाद्यज्ञसंबन्धसामर्थ्यान्नोपसंहारमर्हति। अतश्च विकृत्यर्थो भविष्यति। तथा सति च 'न प्रथमयज्ञे' इत्यनारभ्यवादशेष उपपद्यत इत्यतिरात्रप्रथमाहारे नित्यमप्रयोगोऽग्निष्टोमे च केवलविधिसंस्पर्शान्नित्यं प्रयोगः। न हि तद्वाक्यशेषोऽप्ययं भवतीत्युक्तम्। एतावच्चिहावधारयितुं शक्यम्। नायमनारभ्यवादः प्रकृतेरन्यत्र गच्छति। यदि गच्छेत्तत इष्टिपशुबन्धानपि गच्छेत्। न च गन्तुमर्हति। 'पुरस्तादुपसदाम्' इति स्थाननियमस्य तत्रानुपपत्तेः। अतो यत्रोपसदस्तत्र गच्छति। ततश्च प्राप्तिकालवैषम्यात्प्रकृतौ तावत्ताः सन्तीत्यन्तरेणापि वचनं गच्छेत्किमुत यदा विस्पष्टमेव वचनं, स्फुटसामान्यसंबन्धस्यापि चैवमादेरुपसंहार इति व्याख्यातं चतुर्थाधिकरणे। तस्मादुत्पत्तिविनियोगाभ्यामेवापुनरुक्तत्वम्। एवं सति येषां प्रकरण एव प्रवर्ग्यपाठस्तैः सह संगतार्थता भविष्यति। यदि तर्हि द्वयोरप्येकवाक्यत्वेन 'अग्निष्टोमे प्रवृणाक्ति' इत्ययमर्थो निष्पन्नस्ततो 'न प्रथमयज्ञे' इत्येतस्याप्रथमयज्ञेऽग्निष्टोम इत्येवं प्रवर्तमानस्य न कश्चिद्विरोध इति पर्युदासान्नित्यमेवाकरणेन भवितव्यम्। अत एवं वर्णनीयम्। अनारभ्यवादस्य प्रकृत्यर्थतायां सिद्धायाम् 'अग्निष्टोमे प्रवृणक्ति' इत्येतस्यानन्यप्रयोजनत्वात्प्रतिषिद्धप्रतिप्रसवार्थता गम्यते। ननु नैवायं प्रतिषेध इत्युक्तम्। अग्निष्टोमयुक्तवाक्यार्थवत्त्वाय प्रतिषेध इति ब्रूमः। न ह्यनेन सह पर्युदासोऽवकल्पत इति दर्शितम्। न चानारभ्यवादोऽनग्निष्टोमार्थो यतस्तद्विषयः पर्युदासोऽव-
880 कल्पते। तेन द्वयोरप्येतयोरग्निष्टोमविषयत्वम्। अतश्च यद्यप्ययं पर्युदासस्तथाऽप्युभयोः सामर्थ्याद्विकल्पेनैव भवितव्यम्। कुतः। § 6157

नित्यं हि क्रियमाणेऽस्मिन्पर्युदासो वृथा भवेत्।
नित्यमक्रियमाणे वा पुनर्विधिरनर्थकः॥ § 6159

ततश्च यस्माद्विकल्पाद्विभ्यद्भिः पर्युदास आश्रीयते स तस्मिन्सत्यप्यागत इति वरं शब्दस्वरसलभ्यः प्रतिषेध एवाऽऽश्रितः। तेन प्रथमाहारेऽग्निष्टोमे विकल्पः। तत्रापि यदा केषांचिदीदृशं वचनं 'कामं तु योऽनूचानः श्रोत्रियः स्यात्तस्य प्रवृञ्ज्यात्' इति तदा प्रतिप्रसववचनस्य विकल्पकारिणः कर्तृविशेषगामित्वात्तद्विषय एव विकल्पोऽन्येषां नित्यमेवाभावः। कथं पुनरश्रोत्रियस्य कर्मणि प्रवृत्तिर्येन तद्विशेषणत्वेन श्रूयते। सत्यं प्राप्तस्य पुनर्वचनं तावन्मात्रफलमनर्थकमिति सामर्थ्यात्प्रकर्षगतिर्विज्ञास्यते। यथाऽभिरूपाय क-

---

१४ तु] ( अ° ३ पा° १ अ° १५ ) इत्यत्रेति शेषः

२३ द्व] द्वयोरपीति—पर्युदासाग्निष्टोमवाक्ययोर्द्वयोरपीत्यर्थः।

न्या देयेत्यत्राभिरूपतरायेति गम्यते। अनूचानग्रहणं तु ब्राह्मणस्यानुवचनसंबन्धात् क्षत्रियवैश्यनिवृत्त्यर्थं भविष्यति। तदेतदतिरात्रेऽप्येवमेव प्राप्नोति। तत्र न प्रथमयज्ञ इति प्रतिषेधादनग्निष्टोमत्वेन च प्रतिप्रसवाभावान्नित्यमेव न कर्तव्यः। विकृत्यन्तरेषु प्रथमप्रयोगानुपपत्तेर्नित्यमेव करणम्। ननु तत्रापि न प्रथमयज्ञ इत्यतिदेशादग्निष्टोमस्वरूपस्य च प्रतिप्रसवनिमित्तस्याभावत्प्रथमप्रयोगेष्वभाव एव प्राप्नोति। नैतदेवम्। प्रथमशब्दस्याविशेषितस्य सर्वाद्ये प्रवर्तमानस्यान्यत्राप्रवृत्तेः। तस्मात्केवलज्योतिष्टोमप्रथमप्रयोगविषय एव चैष प्रतिषेध इति सिद्धम्॥ ३३॥ § 6160

इति प्रवर्ग्याधिकरणम्॥ १२॥

## ०.०.१२१ पेषणाधिकरणम्

संतर्दनादिन्यायेनैव वाक्यप्रकरणविरोधे सति विकृत्यर्थत्वं सिद्धमुत्तर- 881
विवक्षार्थं प्रारभ्यते॥ ३४॥ § 6162

इति पेषणाधिकरणम्॥ १३॥

## ०.०.१२२ पेषणस्य चरुविनियोगाधिकरणम्

तत्सर्वार्थमविशेषात्॥ ३५॥ § 6164

यदि कश्चिद्वदेल्लौकिकपिष्टोपादानेनापि पुरोडाशसिद्धेर्नैकान्तेनार्थाक्षेप
इति तं प्रत्युच्यते। अर्थो नाम प्राकृत उपकारः। तस्य प्रकृतौ पेषणं
साधनमासीदतस्तेन पूर्वतरप्राप्तेनोक्तं पुरोडाशे पेषणम्। पशौ च प्रधान-
वैगुण्यं स्यात्। तद्धि हृदयाद्याकृतिकेन ततश्चावत्तेन साधयितव्यम्। न च पिष्टे
तदाकृतिकादवदीयेत। पुनस्तदाकारकरणेऽपि मृद्भवयादिवद्द्रोणादवदीयमाने
वैगुण्यमेव। 'उत्सादनदेशादवद्यति' इति च श्रूयते। न च हृदयादेः पिष्टस्य
ज्ञायेत कतरेण प्रदेशेनेदं पशोरुत्कृत्तमिति। तस्माच्चरावप्रतिषिद्धमनर्थप्राप्तं 882
च पेषणमिति तत्रैव विधीयते। ननु 'अदन्तको हि' इति हेत्वविशेषात्प-
शुपुरोडाशयोरपि प्राप्तेर्द्व्यवदानानि तच्छेषाश्च पिष्ट्वा दास्यन्ते। न च प्राप्तिविप्र-

१ त] एतत्सूत्रस्थभाष्यस्य स्पष्टार्थत्वादव्याख्याय पूर्वपक्षसूत्रमात्रं पठितं वेदितव्यम्।

३ पू] पूर्वतरप्राप्तेनेति—चरावतिदेशेन पिष्टसिद्ध्याख्योपकारप्राप्तिमन्तरा पेवणोपदेशायोगात्तदर्थं पूर्वतरप्रवृत्तेनातिदेशेनैव पेषणस्यापि प्राप्तिसिद्धेरुपदेशवैयर्थ्यमिति भावः।

तिषेधौ भविष्यतः। उच्यते। द्व्यवदानस्य प्रदानप्रक्रमत्वान्नान्तरा पेषणेन व्यवधानं युक्तम्। हेतुवन्निगदस्य च स्तुतिमात्रार्थत्वं वक्ष्यते। तेन स्वक्रमस्थस्यैव षेषणस्य विधिः। उपनीतमात्रमेव च पेषणं पुरोडाशेऽनुवादबुध्द्या गृह्यते चरौ च निवर्तमानं प्रतिप्रसवत्वेन। पशौ पुनरत्यन्ताप्राप्तविधित्वेन। न चैतान्येकस्यैव वाक्यस्यैतावन्ति रूपाणि विज्ञायन्ते। तत्रावश्यमैकरूप्येऽभ्युपगन्तव्ये लाघवादर्थवत्त्वाच्च प्रतिप्रसवत्वमेवावधारणीयम्। एवं सिद्धं केवलचरुविषयत्वम्॥ ३६॥ § 6165

चरावपीति चेत्॥ ३७॥ § 6166

न चरावर्थविप्रतिषेधः। कथम्। § 6167

गतिः सर्वपदार्थानां लौकिकव्यवहारतः।
तत्र पाकविशेषश्च चरुत्वेनावधार्यते॥ § 6169

औदनपिष्टकचरुप्रयुक्तस्य चरुशब्दस्यानेकार्थत्वमन्याय्यमित्युभयसामान्य-
वचनत्वं विज्ञायते। तयोश्च सामान्यमनवस्रावितान्तरूष्मपक्वत्वम्। तस्माद-
883 विप्रतिषेधः। **पक्षोक्तं प्रयोजनमिति**। मन्दं फलमुक्तम्। एतावान्समाधिः।
अविशेषेऽपि न पुरोडाशार्थत्वं प्रयोजनम्। किं तर्हि। पश्वर्थत्वमिति॥ ३८॥
§ 6170

इति पेषणस्य चरुविनियोगाधिकरणम्॥ १४॥

इदानीं किमन्यसहिते पूषणि देवतायामैन्द्रापौष्णे चरौ पेषणं भवत्युतैकस्मिन्नेवेति संदेहे चतुर्थाकरणेन्द्रपीतन्यायात्सिद्धान्तेनैव तावदुपक्रमते। पूषेत्येकसंयोगश्रवणात्तथाभूत एवार्थे स्यादिति॥ ३९॥ § 6172

इतश्चैकदेवत्ये। कुतः। § 6173

पिष्यादर्धं समस्तं वा द्विदेवत्ये चरौ भवान्।
पूर्वस्मिन्पाकवैषम्यं परस्मिन्भागसंकरः॥ § 6175

अर्धपेषणे हि पिष्टोंऽशः शीघ्रतरं सिध्यतीतरश्चिरेण। तत्र पिष्टपाकानन्त-
रमुद्वासने सतीतरस्याऽऽमत्वं भवेत्। तत्पाकप्रतीक्षणेऽपि वा पिष्टस्य विल-
यनादचरुत्वं स्यात्। पाकवैशद्येन हि पिष्टकचरुरपि चरुर्भवति। न चैतद-
884 स्मिन्पक्षे भवति। अथ तण्डुलान्पूर्वं प्रक्षिप्य पश्चात्पिष्टं निक्षिपेत्ततो यौगपद्यं

१ च] एतत्सूत्रस्थं भाष्यं सुस्पष्टं मत्वा शङ्कासूत्रस्य पाठमात्रं कृतं वेदितव्यम्।
७ अ]
अविशेषेऽपीति—एतदधिकरणचिन्तायाः पशुपुरोडाशयोरविशेषेऽपि पुरोडाशे पेषणस्य पक्षद्वयेऽपि सत्त्वेन पेषणस्य पुरोडाशार्थत्वनिवृत्तिर्न चिन्तायाः प्रयोजनं, किं तु पश्वर्थत्वनिवृत्तिरिति समुदितार्थः।
२ तु] ( अ० ३ पा० १ अ० १५)
२ णेन्द्र] ( अ० ३ पा० २ अ० १७ )
७ योग]
यौगपद्यमिति—पिष्टतण्डुलभागयोर्द्वयोरप्येकयागसाधनत्वेनैकहविष्ट्वात्कृत्स्नस्यापि हविषः श्रपणयौगपद्यविधानात्तदर्थस्य निक्षेपस्यापि यौगपद्यमतिदेशेनेह प्राप्यमाणं बाध्येतेत्याशयः।

गम्यमानं बाध्येत। पूषानुरोधेन त्वैन्द्रेऽपि भागे पिष्यमाणे भागसंकरादन्यदीये भागेऽन्यस्मै दीयमाने वैगुण्यं प्राप्नोति। ननु चैतत्सर्वं द्विदेवत्येषु भवतोऽपि समानम्। तथा हि। § 6176

चरौ पशौ पुरोडाशे दीयमाने द्विदैवते।
पूर्वं हविष एकत्वाज्जायते भागसंकरः॥§ 6178

स चाङ्गीकृतो मिश्रस्य हविषो मिश्रदेवतोद्देशेन युगपद्दाने विरोधाभावात्। उच्यते। § 6179

यागापूर्वप्रयुक्तेषु धर्मष्वेवं भवेदिदम्।
भवतः पेषणं त्वेतद्देवताधर्मसंमतम्॥§ 6181

अस्मत्पक्षे पुनः पूषदेवत्ययागापूर्वप्रयुक्तं पेषणम्। न च तद्द्विदेवत्ये तथावस्थितमित्यप्रवृत्तिरेव। हविरन्तरेष्वपि च द्विदेवत्येष्वेवंप्रकारत्वमेवेति देवता गुणभूता। न च गुणानुरोधेन प्रधानमावर्तनीयमिति सकृद्दानाभ्युपगमात्सर्वस्मिन्सह क्रियमाणे संकरदोषानाश्रयणम्। भवता पुनरस्मदभ्युपगमेन द्विदेवत्ये पेषणं वक्तुमशक्नुवताऽवश्यं देवतानिमित्तत्वमभ्युपगन्तव्यम्। ततश्च देवतयोः प्राधान्यादेकैका स्वभागमसंकीर्णं प्रार्थयत इति तथैव दानमनुष्ठेयम्। आदितश्चैक एव भागः पेषणार्ह इत्यवधारितम्। ततश्च पक्तिदोषः स्यात्। अथ तण्डुलात्मकोऽपि भागः पाकसाम्यार्थं पिष्यते। तत्र ब्रूमः। यावदनुत्पन्नभागविवेकं हविस्तावत्कियान्कस्य भाग इत्यनवधारणात्संकरदोषो न जायते। कल्पिते तु विवेके वचनादृते पुनरेकीकरणानुपपत्तेरसंकीर्णदानं प्राप्नोति। तत्रान्यस्य भागादन्यस्मा अवदीयमाने वैगुण्यं भवति। पात्रभेदेन पक्ष्यतीति चेन्न। चरुमिति यागं प्रत्युपादीयमानत्वेन विवक्षितैकसंख्यस्य पात्रकृतभेदाश्रयणे शास्त्रबाधप्रसङ्गात्। अतो न कथंचिदपि प्रतिषिद्धधर्मकं द्विदेवत्ये पेषणं भवतीति न कर्तव्यम्॥ ४०॥ § 6182

सद्वितीयेऽपि वा पूषणि स्यादेव पेषणम्। कुतः। § 6183 885

हंविषो यदि पौष्णस्य तद्यागाङ्गस्य वा भवेत्।
अनुक्तत्वाद् द्विदेवत्ये न भवेत्पेषणं ततः॥§ 6185

पूषसद्भावनिमित्तमेतत्पेषणम्। न च तद्विशेषितवस्तुनिमित्तम्। व्यासङ्गित्वाच्च देवतात्वस्य द्विदेवत्ये पूषविशिष्टता न स्यात्। न तु पूषा तद्भागो वा नास्तीति। यथा मनोतायां वक्ष्यति ‘तत्राग्निरदेवता न त्वसमवेतः’ इति। तेनासत्यप्यत्र पूष्णो देवतात्वे समवायमात्रेणोपलक्षणत्वाद् द्वयोद्देशेनापि च त्यज्यमानस्य ‘समं स्यादश्रुतत्वात्’ इत्यनेन न्यायेनार्धं पूष्णो भाग इति गम्यते। तस्य पेषणे क्रियमाणे यदि तावत्कांस्यभोजिन्यायेनामुख्येऽपीत्येव-

६ क्ष्य] ( अ° १० पा° ४ अ° २२ सू° ४२ ) इत्यत्र भाष्यकार इति शेषः
८ स] ( अ° १० पा° ३ अ° १३ सू° ५३ )
९ त्कांस्य] कांस्यभोजिवदिति पा°।

मितरभागपेषणमपि क्रियते तथाऽपि न किंचिद् दुष्यति। अथापि किमेतेनाश्रुतेन कृतेनेत्येवमर्धमात्रपेषणमेवाध्यवसीयते तथाऽपि केनचित्कौशलेन पाकसंपादनाद्युगपन्निक्षेपपात्रैकत्वयोर्वा गुणत्वाद्वरं बाध इति निरूप्य कार्यमेव पेषणमिति। अथ यदुक्तं चतुर्धाकरणेन्द्रपीतवदिति। तत्राभिधीयते। § 6186

समासतद्धितोत्पत्तिर्नासमर्थपदाश्रया।
असमर्थत्वमेकस्य द्विदेवत्येषु चेष्यते॥ § 6188

तेनाऽऽग्नेयेन्द्रपीतशब्दाभ्यां समर्थाग्नीन्द्रग्राहिभ्यां द्विदेवत्याग्रहणं युक्तमिह पुनः पूषपदस्यासमासभाक्त्वात्प्रपिष्टभागशब्दयोश्च सापेक्षेऽपि पूषणि सामर्थ्याविधातान्नकिंचिद् दुष्यतीत्युपलक्षणता॥ ४१॥ § 6189

886 ‘अदन्तको हि’ इति हेतुर्देवताधर्मत्वं दर्शयति। न च सद्वितीयस्य पूष्णो दन्ता जायन्त इति हेतुसाम्याद्युक्तं पेषणम्। तथा च सोमापौष्णे नेमपिष्टतानुवादोऽन्यत्र च द्विदेवत्ये ‘अर्धं पिष्टमर्धमपिष्टं द्विदेवतत्वाय’ इति देवताधर्मत्वदर्शनमवकल्पिष्यते॥ ४२॥ § 6190

विधित्वान्नेमपिष्टत्वमलिङ्गं विपर्ययसाधनं चेत्यत आह—**यद्येतद्वचनं** भवेत्ततोऽनेकार्थविध्यसंभवान्नेमपिष्टत्वं विधीयमानं चरुं वोद्दिश्य विधीयेत, सोमापौष्णं वा। तत्र य एवोद्दिष्टस्तस्यैवेतरेण विशेष्टुमशक्यत्वात्सार्वत्रिकत्वप्रतीतेः सर्वपेषणं प्राप्नोति। ततश्चान्यतरपदानर्थक्यप्रसङ्गः। तद्यदि तावद्यश्चरुः स नेमपिष्ट इति विधीयते ततः सर्वचरुविषयावधारणे सति सोमापौष्णशब्द एकदेशानुवादोऽनर्थकः स्यात्। अथ सोमापौष्णमात्रमुद्दिश्यते ततोऽपि सर्वपेषणमेव तद्देवत्यंहविर्मात्रप्रतीत्या पशुपुरोडाशयोरपि ग्रहणात्। ततश्च पूर्ववच्चरुशब्दानर्थक्यप्रसङ्गः। **तं प्रति—हि सोमापौष्णमविशेषितं** प्रति षेपणस्य शास्त्रवत्त्वं विशेषणार्थाभावात्। एतस्मिन्पक्षे चरावपेषणं भवति। नन्वर्थप्राप्तत्वात्पुरोडाशस्यावक्तव्यं पशोश्चार्थविप्रतिषेधादित्युक्तमितिचेन्न। अत्र तयोरुभयोरप्यप्रसङ्गात्। सर्वपेषणे हि प्राप्ते पुरोडाशस्यार्धपेषणं विधीयते। ताव-
887 ताऽपि च कथंचित्पुरोडाशो निष्पद्यते। हृदयादीनामप्युत्साददेशैकदेशवर्जं पिष्यमाणानां नार्थविप्रतिषेधो भवति। न चात्यन्ताकृतिर्नश्येत्। न चोत्साददेशमोहः स्यात्। इतरोत्साददेशस्य स्पष्टत्वेन च पिष्टोऽपि सन् पूषभाग उपलक्ष्यते न सर्वपेषणवन्मुह्येत। अथवाऽस्मिन्पक्षे वाचनिकत्वाददृष्टार्थे पेषणे सत्यपिष्टादेवावदीयेत। न हि तदैतद्देवतानिमित्तं पेषणं स्यात्। तस्मात्सार्वत्रिकत्वप्रसङ्गान्न परिशेषसिद्धं चरोः पेषणमिति तच्छ्रुतिरनर्थिका प्राप्नोत्येवेति चरुदेवतासंबन्धविधिपरे वाक्ये नेमपिष्टत्वमनूद्यत इत्यवश्यमभ्युपगन्तव्यम्। अतश्च लिङ्गत्वसिद्धिः॥ ४३॥ § 6191

३ निरू] निरूप्येति—पाके दोषाभावमुपपाद्येत्यर्थः।
४ तु] ( अ॰ ३ पा॰ १ अ॰ १५)
४ णेन्द्र] ( अ॰ ३ पा॰ २ अ॰ १७ )
१० तिषेधादि] ( अ॰ ३ पा॰ ३ अ॰ १४ सू॰ ३६ ) इत्यत्रेति शेषः

एकस्मिन्नेव पूषणि देवतायामेतत्पेषणं भवेन्न सद्वितीये। § 6192

न ह्येष देवताधर्मो न तद्भागस्य गम्यते।
पूषदेवत्ययागार्थं धर्मस्त्वेष प्रतीयते॥§ 6194

न तावद्देवताया भागोऽस्ति यस्यैष धर्मः कल्प्येत। न हि तदुद्देशत्यागमात्रेण भागो भवति। किं तर्हि। परिग्रहेण। कर्मसाधनो हि भागशब्दः। भज्यत इति भागः। सेव्यत इत्यर्थः। तेन यं यो भजते स तस्य भागः। न च हविरंशं देवता भजते। भोक्तृत्वस्य नवमे निषेधात्। अथापि भजेत्तथाऽपि तस्याः प्रयोजकत्वं तत्रैव निवारयिष्यते। तेन देवतावद्भागधर्मत्वानुपपत्तेर्यागद्वाराऽपूर्वधर्म एवायं नवमाद्यन्यायेन देवताधिकरणन्यायेन च विज्ञायते। भाष्यकारेण तु देवताधर्मत्वनिराकरणपरेण यागधर्मत्वमभिहित- 888
मिति द्रष्टव्यम्। **कथं तर्हि प्रकरणान्तरे समाम्नातो यागधर्मो भविष्यतीति।** वाक्यसंयोगस्य देवताविषयत्वात्प्रकरणेन च विनाऽपूर्वसाधनत्वलक्षणामुपपत्तेर्न कथंचिद्यागेनापूर्वेण वा संबन्ध इति मन्यमानस्य प्रश्नः। तत्र **वाक्यसंयोगा-** दित्युक्ते परेण स्वाभिप्राये विवृते भागशब्देनैव मुख्यार्थासंभवाद्यागोपादानमिति दर्शयति। परस्वस्वीकरणात्मकस्य भागरूपस्याविद्यमानत्वाद्यस्तदुद्देशेन त्यज्यमानत्वनामांऽशो विद्यते तेन यागो लक्ष्यते। स चैकदेवत्ये पूषविशिष्टो भवतीति तद्भागव्यपदेशो घटते। द्विदेवत्ये पुनर्व्यासङ्गी मिश्रः संकल्पोऽन्यतरेण व्यपदेष्टुमशक्य इति। यथैवैन्द्राग्नस्य पुरोडाशस्य ग्रहस्य चाऽऽग्नेयेन्द्रपीतशब्दाभ्यामग्रहणं तथैन्द्रापौष्णादेः पूषभागत्वेन। यद्यपि चैवंविधशब्दोच्चारणादिह समासोपालम्भो नास्ति तथाऽप्यर्थ एव भागशब्दग्राह्यो न विद्यत इत्यप्रवृत्तिः। यद्यपि च द्वयोरर्थयोर्देवतात्वं प्रतिपद्यमानयोः समुदायप्रसिद्ध्यर्थत्वेनावयवावुपयुज्येते तथाऽपि संकल्पस्यान्यतरेणाव्यपदेशादनुपलक्षणत्वं सिद्धम्॥ ४४॥ § 6195

यत्तु 'अदन्तको हि' इति हेतुनिदर्शनाद्देवताधर्मत्वमिति। तत्रोच्य- 889
ते। हेतुवन्निगदार्थवादत्वादस्य यागधर्मप्रशंसार्थत्वमप्यविरुद्धमित्यकारणता॥ ४५॥ § 6196

नेमपिष्टादिषु प्राप्त्यभावाद्वचनं भविष्यति। विशिष्टविधानाच्च वाक्यभेदाभावः। अरुणैकहायनीवच्च परस्परनियमादसर्वविषयत्वम्। अविशिष्टविधिं चापेक्ष्य विशिष्टविधिर्दुर्बलो भवति न त्वत्रासावस्ति। तस्मादलिङ्गमित्येकदेवताविषयत्वमिति॥ ४६॥ § 6197

इति श्रीभट्टकुमारिलविरचिते मीमांसाभाष्यव्याख्याने तन्त्रवार्तिके
तृतीयाध्यायस्य तृतीयः पादः समाप्तः॥

---
१ मा] ( अ० ९ पा० १ अ० १ )
१ ता] ( अ० ९ पा० १ अ० ४)

## ०.०.१२३ निवीताधिकरणम्

स एव श्रुत्यादित्रितयस्य प्रकरणेन सह विरोधाविरोधविचारः। तत्र
890 ‘निवीतं मनुष्याणाम्’ इत्यत्रैते पक्षा भवन्ति, किमयं शुद्धमनुष्यधर्मः कर्मयुक्तमनुष्यधर्मो वाऽथ शुद्धकर्मधर्मः। अथवा प्रकरणे यन्मनुष्यप्रधानं कर्मान्वाहार्यपचनादि, तस्य धर्म उताप्रकरणे या मनुष्यपूजाऽऽतिथ्यात्मिका तस्यां निवेश इति। यौ तु विध्यर्थवादपक्षौ तौ शेषलक्षणेऽनौपयिकौ प्रमाणलक्षणविषयत्वाद्विधिवान्निगदार्थवादमध्ये च निर्णीतत्वादिह नैवोपन्यसनीयौ। यस्तु भाष्यकारेणोपन्यासः कुतः स कृत्वाचिन्तान्यायेनेति द्रष्टव्यम्। न हि विधित्वमनभ्युपेत्य मनुष्यधर्मादिपक्ष उपपद्यत इति। विधिरिति कृत्वा प्रथमं प्रस्तुत्य पश्चाल्लक्षणानुरूपं विचार्यान्ते पूर्वावस्थितमेवार्थवादत्वमुपसंहरिष्यति। परेष्वप्यधिकरणेष्वेतद्यथासंभवं योजयितव्यम्। तत्र ‘विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम्’ इत्यनेनैव तावद्विधिः। अहीनाद्यधिकरणन्यायेन च षष्ठीश्रुत्या मनुष्यधर्मः। तेषां स्वत्वेन तत्प्रतीयते न मनुष्यास्तदङ्गत्वेन। गुणविभक्तिनिर्देशाभावात्। अर्थादेव च तत्प्राप्तौ सत्यां नैव मनुष्यग्रहणं क्रियते। कृतं चैतत्। अतोऽपि मनुष्यधर्म इत्यवगच्छामः॥ १॥ § 6199

891 निवीतं केचिद्गलवेणिकाबन्धं स्मरन्ति। केचित्पुनः परिकरबन्धम्। तत्र गलवेणिकाबन्धो युद्धादन्यत्र न प्राप्नोति। परिकरबन्धस्तु सर्वकर्मस्वव्यग्रताकरत्वात्प्राप्त इति तदाश्रयणेनानुवादमाह। स तु किंप्रयोजन इत्युत्तरत्र वक्ष्यते॥ २॥ § 6200

विधिरेवायम्। कुतः। पूर्ववत्त्वाद्ध्यनुवादो भवेदत्यन्तप्राप्तावित्यर्थः। न चायमत्यन्तप्राप्तः। तेन विनाऽप्यव्यग्रतायाः शक्यत्वात्। कण्ठबन्धः पुनः प्रायेणाप्राप्त एवेत्यस्ति नियमविधेरवकाशः॥ ३॥ § 6201

सति विधित्वे कर्मधर्मप्रायप्रदेशाम्नानात्कथंभावसंस्पर्शात्कर्मधर्मः॥ ४॥ § 6202

द्वेधा संभवे तादृशी प्रमाणगतिराश्रयणीया या प्रमाणान्तरं न बाधते। यजुर्वेदाम्नानाच्च निवीतादेराध्वर्यवसमाख्योपबद्धं वाक्यम्। तत्र यदि कर्मधर्मोऽयं ततः कर्तृविशेषापेक्षायां सत्यां समाख्ययाऽध्वर्युनियमात्समाख्याऽर्थवती भविष्यति। मनुष्यधर्माणां तु न समाख्या नियामिकेति वक्ष्यामः। तत्रासौ बाध्येत। इतरथाऽनुग्रहीष्यते। तस्मादपि कर्मधर्मः॥ ५॥ § 6203

892 प्रथमं तावन्मनुष्यधर्मबलीयस्त्वेन कर्मधर्मत्वं निराकरोति। तथा हि सुखं सूचितः पक्षः परिग्रहीष्यते। श्रुत्या हि प्रकरणसमाख्ये बाधित्वा मनुष्यध-

---

२ नुष्या] निवीतं मनुष्याणामित्यत्रेति—उपवीतप्राचीनावीतवाक्ययोर्वक्ष्यमाणसर्वपक्षासंभवान्निवीतवाक्यमात्रे विचारः क्रियत इति ध्येयम्।

५ प्र] प्रमाणलक्षणविषयत्वात्—प्रथमाध्यायविषयत्वादित्यर्थः।

१० विधि] ( अ॰ १ पा॰ २ अ॰ २ सू॰ १९ )

३ इ] ‘अर्थवादो वा प्रकरणात्’ इत्यस्मिन्सूत्र उपवीतस्तुत्यर्थ इति वक्ष्यत इत्यर्थः।

र्म एव प्राप्नोति। तदुच्यते। सर्वानुग्रहार्थमयं पक्षोऽस्तु। मनुष्याणामिति तत्प्रधानकर्मव्यतिरेकजनिता षष्ठी न निवीतं गृह्णाति। तदपि च प्रकरणादन्वाहार्यदानादि प्रतीयते नान्यत्। अत एष वाक्यार्थो यदिह मनुष्याणां कर्म तत्र निव्यातव्यमिति॥ ६॥ § 6204

प्रकरणरहितमनुष्यप्रधानो वा स्यात्। कुतः। § 6205

तुल्यवद्धि प्रसंख्यानं दृश्यतेऽस्मिन्विधित्रये।
तस्मान्नरप्रधाने स्यात्पितृदेवप्रधानवत्॥§ 6207

यथैव 'उपवीतं देवानाम्' 'प्राचीनावीतं पितॄणाम्' इति च परस्पर-
निरपेक्षदेवपितृप्रधानकर्मण्येष विधिरेवं तद्बुद्ध्यनुवृत्तेर्मनुष्याणामित्यपि तत्प्र-
धानकर्म प्रत्येष्यामः। **कथं गम्यत** इति—पृष्टे **मनुष्याणामिति षष्ठ्यन्तेन**
**संबन्धात्**— इत्येतावत्युत्तरे दत्ते **मनुष्याणामेव प्राप्नोतीति** पुनश्चोदयति।
अथवा समस्त एव चोकः प्रश्नः। सत्यमेवं प्राप्नोति। फलकल्पनाप्रस- 893
ङ्गगौरवात्तु परित्यज्यते। तस्मात्तदीयकर्मव्यतिरेकादेव षष्ठी। तत्संबद्धस्य
निवीतस्य नासंबद्धफलकल्पना भविष्यति। मनुष्यग्रहणं च तत्प्रधानकर्म-
प्रतिपत्त्यर्थमिति नानुपात्तसंबन्धापत्तिः। न च तस्मिन्सति प्रकृतैकवाक्यता
घटते॥ ७॥ § 6208

सर्वथा नात्रैकोऽपि पक्षो निर्दोषः। प्रकरणसंबन्धे वाक्यसंबन्धबाधादन्वाहार्यादिसंबन्धे वाक्यभेदात्प्रकरणस्य च विशेषकत्वानुपपत्तेरातिथ्यादिसंबन्धोऽत्यन्तनिर्मूल एव। षड्भिरपि श्रुत्यादिभिरसंस्पर्शान्मनुष्यसंबन्धेन तदनुमीयते। तच्च न युक्तम्। तस्या अपि षष्ठ्या निवीतपदसंबन्धिव्यतिरेकजनितत्वप्रतीतेः। न ह्यनुपात्तसंबन्धिव्यतिरेकैर्विभक्तय उत्पद्यन्ते। तस्मान्मनुष्यार्थतैव प्राप्नोति। तत्रापि च प्रकरणसमाख्यावाधफलकल्पनाप्रसङ्ग। सति च गत्यन्तरे न युक्तं तदाश्रयणम्। अस्ति चौदुम्बराधिकरणसिद्धमर्थवादत्वं गतिः॥ ८॥ § 6209

'उपव्ययते' इत्यनेन च विधिनैकवाक्यत्वं निवीतप्राचीनावीतयोर्दृश्यते। 894
तच्चानुवादद्वारेण स्तुतौ सत्यामवकल्पते न विधौ। न ह्यङ्गाङ्गित्वरहितयोरुभ-
योः स्वतन्त्रयोः परस्परासंबद्धयोर्विधीयमानयोरेकवाक्यता भवति। वचनव्य-
क्तिभेदात्। अन्या हि प्रधानविधेस्तावन्मात्रोपसंहारिणी वचनव्यक्तिरन्या च
स्तुतेः पराङ्गभावानुगतरूपा। न चात्र विधायको दृश्यते। स यदि वाऽध्याह-
र्तव्योऽथवाऽऽतिथ्यादिगतस्याप्यङ्गत्वाय परिकल्प्येत। न च तत्कल्पनं युक्त-
म्, अविहितस्यानङ्गत्वादनङ्गस्य च प्रयोगवचनेनाग्रहणात्। वक्ष्यति हि न
चाविहितमङ्गं भवतीति। तत्राङ्गत्वाद्विधिर्विधेश्चाङ्गत्वं कल्प्यत इतीतरेतराश्रयत्वं

---

८ म] समस्त एव चेति—'कथं गम्यत इत्यादिना—न मनुष्यप्रधाने 'इत्येवमन्त इत्यर्थः।

५ ह्य] अनुपात्ताः संबन्धिनो येषां संबन्धाख्यानां व्यतिरेकाणां तैरिति विग्रहः।

७ चौदु] ( अ॰ १ पा॰ २ अ॰ २ )

७ व] ( अ॰ ३ पा॰ ४ अ॰ ४ सू॰ १३ ) इत्यत्र भाष्यकार इति शेषः

प्राप्नोतीति। प्रत्यक्षेण च विधिना यथाकथंचिदेकवाक्यतायां संभवन्त्यां न परोक्षैकवाक्यता युक्ता। तथा सति चानेकादृष्टकल्पना स्यात्। तस्मादौचित्येन स्तुतिः। यथा निवीतप्राचीनावीते मनुष्याणां पितॄणां च प्रशस्ते तथोपवीतं देवानामिति। लोकेऽपि चैवं दृश्यते। यथा वसिष्ठस्यारुन्धती, यथा शशाङ्कस्य
895 रोहिणी यथा नलस्य दमयन्ती, तथा देवदत्तस्य यज्ञदत्तेति। विपर्ययेण वा स्तुतिरिति। तयोः पितृमनुष्यविषयत्वेन देवान्प्रत्ययोग्यत्वादुपवीतमेव देवानां प्रशस्तम्। अतश्च देवकर्मणि दर्शपूर्णमासाख्ये तदेव कर्तव्यमिति॥ ९॥
§ 6210

इति निवीताधिकरणम्॥ १॥

## ०.०.१२४ वार्तिककारीयषट्सूत्रीव्याख्या

उपवीतं लिङ्गदर्शनात्सर्वधर्मः स्यात्॥ १॥ पू॰

अतः परं षट्सूत्राणि भाष्यकारेण न लिखितानि। तत्र व्याख्यातारो विवदन्ते। केचिदाहुर्विस्मृतानि। लिखितो ग्रन्थः प्रलीन इत्यपरे। फल्गुत्वादुपेक्षितानीत्यन्ये। अनार्षेयत्वादित्यपरे। तथा च 'दिग्विभागश्च तद्वत्' इति निवीताधिकरणातिदेशस्तदानन्तर्यादुपपद्यत इति। वृत्त्यन्तरकारैस्तु सर्वैर्व्याख्यातानि। सन्ति च जैमिनेरेवं प्रकाराण्यप्यनत्यन्तसारभूतानि सूत्राणि। व्यवहितातिदेशाश्च 'पानव्यापच्च तद्वत्' इत्यादिष्वाश्रिताः। तस्मात्सूत्रमात्रं व्याख्येयम्। तत्र कैश्चित्त्रीण्यधिकरणानि कल्पितानि। अपरैश्चत्वारि। प्रथमं तावदिदं चिन्त्यते। यदेतत्पूर्वाधिकरणे दर्शपूर्णमासयोर्विधीयमानत्वेनोपवीतमुदाहृतं तत्र संदेहः। किं तद्दर्शपूर्णमासयोरेवावतिष्ठतेऽथवा सर्वकर्मार्थमिति। ये त्वधिकरणत्रयं समर्थयन्ते। तेषामेवं संदेहः। किं दर्शपूर्णमासयोरवस्थानं विधिश्चाथ सर्वकर्मार्थत्वमनुवादश्चेति। किं प्राप्तं सर्वधर्मः स्यात्। कुतः। § 6212

कर्मान्तरेऽनुवादोऽस्य सिद्धवद्यः प्रतीयते।
सोऽन्यथानुपपत्त्यैतां लिङ्गत्वात्प्रक्रियां जयेत्।§ 6214

मृताग्निहोत्रे हि पितृदेवत्ये श्रूयते 'प्राचीनावीती दोहयेत्। यज्ञोपवीती हि देवेभ्यो दोहयति' इति। तद्यदि सर्वार्थमुपवीतं ततोऽयं पित्र्येऽग्निहोत्रसंबन्धी नित्यवद्यज्ञोपवीतानुवादोऽवकल्पते। न चायं दर्शपूर्णमासस्थस्यैवानुवादः। विप्रकृष्टत्वात्। हेतुवन्निगदार्थवादानर्थक्याच्च। यदि हि तस्मिन्नेव कर्मण्यन्याव-

---

५ वैर्व्याख्या] अनेन च प्रक्षिप्तत्वाख्यमनार्षेयत्वमुपेक्षाबीजं पराभिमतं निरस्तं वेदितव्यम्।

६ च] (अ॰ ३ पा॰ ४ अ॰ १२ सू॰ ३२ )

स्थायां धर्मो भवति ततश्च तदवस्थापरिजिहीर्षया हेतुवन्निगदोऽवकल्पते। न तु क्रत्वन्तरस्थं परिहर्तव्यमत्यन्तविप्रकर्षेणैवाप्रसक्तत्वात्। न च देवेभ्य इति बहुवचनं दर्शपूर्णमासयोरवकल्पते। वैकल्पिकेन्द्रमहेन्द्रैकदेवत्यत्वात्सांनाय्यस्य। अग्निहोत्रे तु सायंप्रातर्देवतालोचनेनोपपन्नं बहुत्वम्। तस्मादग्निहोत्रस्थोपवीतानुवादान्यथानुपपत्तेः सर्वधर्मत्वमिति॥ १॥ § 6215

[896]न वा प्रकरणात्तस्य दर्शनम्॥ २॥ सि°

न वा सर्वधर्मः। कुतः। प्रकरणाद्दर्शपौर्णमासार्थत्वप्रतीतेः। अथ यदुक्तं लिङ्गदर्शनादिति। परिहृतं तत्। तस्यैवैतद्दर्शनं दर्शपूर्णमासस्थस्येति। संनिकृष्टानुवादासंभवे च विप्रकृष्टानुवादोऽप्याश्रीयते। यथाप्राप्त्यपेक्षोऽहि स भवति। बहुवचनं चाविवक्षितम्। अथवा प्रकृतिविकृतिदेवतालोचनेनोपपत्स्यते। ततश्चायमर्थो भवति। यस्माद्देवयुक्तकर्मान्तरधर्मोऽयमतः पित्र्येऽग्निहोत्रे न कर्तव्य इति॥ २॥ § 6216

विधिर्वा स्यादपूर्वत्वात्॥ ३॥ सि°

तदेवोदाहरणम् 'उपव्ययते देवलक्ष्ममेव तत्कुरुते' इति। तत्र विधिरनुवाद इति संदेहः। कथं पुनरनवधारिते विधित्वे सर्वार्थत्वदर्शपूर्णमासार्थत्वविचारो वृत्तः। सिद्धेन व्यवहारादिदमर्थतोऽधिकरणं पूर्वं द्रष्टव्यम्। किं प्राप्तमनुवाद इति। कुतः। § 6217

स्मृतिभिः पुरुषो नित्यं कृतो यज्ञोपवीतवान्।
वर्तमानापदेशश्च न विधावुपपद्यते॥§ 6219

'नित्योदकी' 'नित्ययज्ञोपवीती' इति हि सर्वदा यज्ञोपवीतं प्राप्तं क्रतावप्यस्ति। न चैष विधिसरूपः शब्दः। तस्मादनुवाद इति। एवं च निवीतप्राचीनावीताभ्यामवैलक्षण्यं भविष्यतीत्येवं प्राप्ते ब्रूमः। § 6220

विधिरेष भवेदेवमपूर्वोऽर्थो विधास्यते।
सर्वानुवादो व्यर्थो हि स्तुतेश्च विधिकल्पना॥§ 6222

न हि समस्तानुवादवाक्यस्य किंचित्फलमस्ति। निवीतप्राचीनावीतसंकीर्तनमपि च विधीयमानोपवीतस्तुत्यर्थत्वेनैवार्थवद्भविष्यति। वर्तमानापदेशानामपि च तदाभासत्वात्प्रयोगवचनार्थवादपञ्चमलकारेभ्यो विधिशक्तिर्व्याख्याता। तस्माद्विधिः। यत्तु स्मृतेरेव प्राप्तमिति। तत्राप्यपूर्वत्वादिदमेवोत्तरम्। अन्य एव ह्यसौ पुरुषधर्मं प्राप्तोऽन्यश्चायमपूर्वः क्रतुधर्मो विधीयते। तस्मान्नानुवादः। अस्य च प्रयोजनं कर्त्रधिकरणे वक्ष्यामः। एवं वा। यत्तु मृताग्निहोत्रे श्रूयते 'प्राचीनावीती दोहयेत्। यज्ञोपवीती हि देवेभ्यो दोहयति'

---

१७ धिक] (अ° ३ पा° ४ अ° ४)
१७ ए] 'विधिर्वा स्यादपूर्वत्वात्' इति सूत्रं षड्सूत्रीमधिकरणचतुष्टयेन व्याख्यातृमतरीत्या सिद्धान्तपरतया व्याख्यायाधुना व्यधिकरणवादिमतरीत्येदमेवसूत्रमुदाहरणान्तरे पूर्वपक्षपरतया व्याख्यातुमारभते—एवं वेत्यादिना।

इति। तत्रैवं विचार्यते किमिदम्हीनस्थितमिव द्वादशत्वं दर्शपूर्णमासगतमेव स्तुत्यर्थमुक्तम्। उत जीवदग्निहोत्रे विधानार्थमिति। किं प्राप्तं ततः पूर्ववदेव
897 सूत्रं व्याख्यातव्यम्। एवं च सति प्रकरणबहुवचनयोरनुग्रहो भविष्यति। तस्मात्सत्यप्यनुवादसरूपत्वेऽर्थवत्त्वाय प्रयोगवचनादिभ्यो विधित्वं कल्पनीयम्। एतस्मिंश्च व्याख्याने स्थितं तावदपर्यवसितमित्येवमुत्तरमधिकरणमारब्धव्यम्॥ ३॥ § 6223

उदक्त्वं चापूर्वत्वात्॥ ४॥ पू॰

तस्मिन्नेव मृताग्निहोत्रे श्रूयते। 'ये पुरोदञ्चो दर्भांस्तान्दक्षिणाग्रांस्तृणीयात्' इति। केचित्तु महापितृयज्ञे श्रूयत इत्युदाहरन्ति। तत्र 'ये पुरोदञ्चः' इत्यत्र संदेहः। किं विधिरनुवाद इति। किं प्राप्तम्। ततश्चशब्देनान्वादिश्यतेऽयमपि विधिरपूर्वत्वादिति। प्राप्तिपूर्वको ह्यनुवादो भवति। न चास्य पुरुषार्थतयाऽपि प्राप्तिरस्ति। न चास्य स्तुत्यर्थताऽपि युज्यते। हिशब्दाद्यप्रयोगात्। तस्मात्सिद्धवदुक्तान्यथानुपपत्त्यैवास्यापि विधित्वमिति॥ ४॥ § 6224

सतो वा लिङ्गदर्शनम्॥ ५॥ सि॰

आचारप्राप्तस्योदगग्रत्वस्य द्योतकमात्रं लिङ्गदर्शनमेतन्न विधिः। कुतः। § 6225

लिङादिरहिते वाक्ये तदा विधिरुपेयते।
न कथंचिद्यदा युक्त्या प्राप्तिलेशोऽपि गम्यते॥ § 6227

यच्छब्दयोगादाख्याततद्विशेषरहितत्वाच्च स्फुटमिहानुवादत्वमवधारितम्। तद्यथाकथंचिदपि प्राप्तौ सत्यां नातिक्रमितव्यम्। अस्ति चात्र प्राप्तिः 'अग्रवन्ति प्रागग्राण्युदगग्राणि वाऽपवर्गवन्ति प्रागपवर्गाण्युदगपवर्गाणि वा' इति स्मृतेः। तस्मात्तत्समानार्थ एवायं सिद्धवदनुवादः। तथैव च स्तुत्यर्थः। पुरा ह्येतदुक्तं न तु सांप्रतं मृतावस्था यामिति। स्थितादप्येतदेवोत्तरम्। हिशब्दवदाख्यातेन यतः कुतश्चित्प्राप्तेरपेक्षितत्वात्। प्रकरणे च तदभावात्किमनवगम्यमानमेव विधित्वं कल्पितमुत यत्रतत्रस्था प्राप्तिराश्रीयतामिति। तत्र प्राप्त्याश्रयणमपेक्षितं न तु विधित्वमिति। तदेव ज्यायः प्रकरणबहुवचनयोश्चोक्तम्। अस्त्येव चान्योऽत्र विधिरिति नाऽऽनर्थक्यम्। तस्मादनुवाद इति नित्येऽग्निहोत्रे दोहे विनाऽप्युपवीतेनावैगुण्यम्॥ ५॥ § 6228

विधिस्तु धारणेऽपूर्वत्वात्॥ ६॥ सि॰

इदानीमेवंविधशब्दाभावेऽनुवादत्वस्यातिप्रसक्तस्यापवाद आरभ्यते। तत्रैव दिष्टगताग्निहोत्रे महापितृयज्ञे वा श्रूयते 'अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयति' इति। तत्र 'उपरि हि देवेभ्यः' इत्यत्र पूर्ववदेव विध्यनुवादत्वसंदेहे हिशब्दयोगाद्वर्तमानापदेशाद्विध्यन्तरेण चैकवाक्यत्वादाचारतश्च
898 प्राप्तेरनुवाद इति प्राप्नोति। कथमाचारतः प्राप्तिरिति चेत्। उच्यते। § 6229

सर्वमभ्यर्हितं द्रव्यं प्रच्छादनमपेक्षते।

यत्र क्वचन च प्राप्ते समित्तत्र नियम्यते॥§ 6231

देवार्थस्य स्रुचि प्रक्षिप्तस्य हविष आहवनीयदेशं नीयमानस्याव-श्यमेव हस्तो वाऽन्यद्वा किंचिद्द्रव्यमाचारादुपरि दातव्यम्। तत्र प्र-त्यासत्तेः समिन्नियम्यते।'स्रुग्दण्डे समिधमुपगृह्यानुद्रवति' इति चास्यापि विधेराचारापेक्षितार्थविधानादेतदेव फलं विज्ञायते। तस्मादुपरि धारयतीति प्राप्तस्योपवीतादेरिवानुवादः। सतो वा लिङ्गदर्शनमिति प्राप्तेऽभिधीयते। § 6232

धारणे विधिरेव स्यान्न हि प्राप्तिः कुतश्चन।
समित्प्रच्छादनाशक्तेर्नाऽऽचारादुपरिस्थता॥§ 6234

सत्यमाचारात्प्रच्छादनं कर्तव्यं न तु तत्र समित्पक्षेऽपि प्राप्नोति या संनिधेर्नियम्येत। हस्तादेव हि तत्र योग्यत्वात्प्राप्नुयान्न समित्। ननु च सोम-चमसादीनां वचनसामर्थ्याद्या काचिदानत्यर्थता भवत्येवमत्रापि या काचित्प्र-च्छित्तिर्भविष्यतीति। भवेदेवं यदि तदीयदक्षिणासंयोगवदिहापि प्रच्छादन-संयोगः श्रूयेत। न तु श्रूयते। उपसंग्रहमात्रविधानात्। यदि सोमचम-सेऽपि दक्षिणासंयोगरहितं दानमात्रमश्रोष्यत ततो नैवाऽऽनत्यर्थत्वमाश्रयिष्य-त। स्रुग्दण्ड इति च देशनियमात्सुतरां हविषः प्रागसौ धारयितव्या। तेनोपरि 899
धारणमप्राप्तम्। न चाप्राप्तं हेतुवन्निगदेन वर्तमानापदेशेन वाऽनुवदितुं श-क्यम्। अतोऽस्य व्यवधारणकल्पनयाऽनुवादसरूपत्वं भक्त्वा वाक्यं भित्त्वा विधित्वमाश्रीयते। पित्र्ये होमेऽधस्तात् स्रुग्दण्डस्य समिद्धारयितव्या। दैवे च पुनरुपरिष्टादिति। विधित्वे चैवमादीनामुक्तः कल्पनाप्रकारः। तस्माद्विधिरिति॥ ६॥ § 6235

इति वार्तिककारीयषड्सूत्रीव्याख्या।

## ०.०.१२५ दिग्विभागाधिकरणम्। परुषिदिताधिकरणं च

दिग्विभागपरुषिदितघृतादीनां निवीताधिकरणवत्सर्वे प्रकारा अवगम-यितव्याः। का पुनरत्रातुल्यांऽऽशङ्कायां व्यावर्तयितुमतिदेशः क्रियते। किमर्थं वाऽधिकरणद्वयमारभ्यते। तदुच्यते। § 6237

पुराकल्पस्वरूपेण भजत्यर्थानुषङ्गिणा।
दिग्विभागस्य संबन्धान्निवीतातुल्यतामतिः॥§ 6239

इतरेषां तु षष्ठ्यन्तसंबन्धेऽपि फलोदयः।
पुरुषं प्रति विस्पष्टस्तत्क्रियान्तर्गतात्मनाम्॥§ 6241

१५ सौ] (तै॰ सं॰ ६-१-१)

स्वाभाविकं दिगादीनां सर्वक्रियाङ्गत्वं न निवीतवदपूर्वं विधातव्यम्। तत्र
मनुष्य संबन्धेऽपि नियमफलमात्रकल्पनमेव न क्रियाफलकल्पना। त-
दपि च लौकिकीनामेव क्रियाणामविघ्नसमापनमपेक्षावशात्कल्प्यते नान्य-
त्स्वर्गादि। तेनैवमाभाति। यावत्किं चिन्मनुष्याः स्वार्थं कर्मानुतिष्ठन्ति तत्र
प्रतीच्युदीची चाङ्गं भवति। यावच्च दर्भलवनं तदन्तरा कर्तव्यम्। यावन्मीयते
तत्पूर्णेन मातव्यम्। यावच्च स्नेहकार्यं तत्सर्वं विलीननवनीतेन निष्पक्वायुतश-
ब्दवाच्येन कर्तव्यम्। नैर्ऋतरौद्रयोश्च विदग्धत्वाश्रृतत्वे कर्तव्ये इति। तेनात्रापि
पूर्वतुल्यत्वं साधयितव्यमित्यारम्भः। तत्र 'मनुष्यधर्मः शब्दस्य तत्प्रधानत्वात्'
इति विनाऽपि षष्ठीनिर्देशादभजन्तेति मनुष्यसंबन्धात्तादर्थ्यम्। इतरेषु ष-
ष्ठ्येव। तथा 'अपदेशो वा' इति सौकर्यात्प्राप्तिरभिधीयते। पूर्वाह्ते हि पृष्ठत
आदित्यं कृत्वा सुखं व्याप्रियन्त इति प्रतीचीप्राप्तिः। तथाऽन्तरालवनपूर्णयोर-
प्रयत्नसाध्यत्वात्प्राप्तिः। तथा विदग्धे कृष्णत्वादेकवर्णनिर्ऋत्याख्यपृथिवीसंबन्ध-
900 प्राप्तिः। अश्रृते चरोगदत्वाद्रौद्रता। नियोगतस्त्वप्राप्तेः सर्वत्र नियमविधिः। प्रक-
रणसमाख्याभ्यां च कर्मधर्मः सर्वप्रमाणानुग्रहार्थं प्रकरणे मनुष्यप्रधाने नि-
वेशः। वाक्येन प्रकरणसमाख्ययोर्बाधात्फलकल्पनाभयाच्चाऽऽतिथ्यादौ नि-
वेशः। तेनापि सह संबन्धप्रमाणाभावात्प्रकरणे संभाविनश्चानुत्कर्षात्प्राचीन-
विधिशेषत्वाच्चार्थवाद इति सिद्धान्तः। सम्यक्श्रुतयथाविदितविषयान्यविषय-
स्तुतिविवेकसिद्धिः॥ १०॥ ११॥ § 6242

इति दिग्विभागाधिकरणम्। परुषिदिताधिकरणं च॥ २॥ ३॥।

## ०.०.१२६ कर्त्रधिकरणम्

तेनैव श्रुत्यादित्रयस्य प्रकरणेन सह विरोधाविरोधविचारप्रस्तावेन द-
र्शपूर्णमासादिप्रकरणगताः पूर्वमनवधारितक्रत्वर्थपुरुषार्थपदार्थविषया 'नानृतं
वदेत्' इत्येवमादयः प्रतिषेधाः सामर्थ्याप्राप्तानृतवदनादीनि प्रतिषेधन्त उदाह-
901 रणम्। तेषु संदेहः। किं क्रत्वर्थाः पुरुषार्था इति। ततः सर्वप्रतिषेधानां प्र-
वृत्तिविषयत्वात्तदवधारणाधीनो निर्णय इति सैव प्रथमं विचारयितव्या किमर्था
सती प्रतिषिध्यत इति। यदर्था चासौ निर्धारयिष्यते तदर्थप्रतिषेधो विज्ञास्य-
ते। न ह्यन्यार्थायाः प्रतिषेधोऽन्यार्थो भवति। अनाकाङ्क्षितत्वात्। सर्व एव
यो यदर्थप्रवृत्तः सन्निवार्यते स तदर्थमेव प्रतिषिद्धो भवतीत्यवधार्यते। त-
स्मात्प्रवृत्तिकैमर्थ्यचिन्ता। प्रवृत्तीनामप्यभिधायकाख्यातवशेनैदमर्थ्यं निरूप्यत
इत्याख्यातशब्दाश्चिन्तयितव्याः, किमर्थाः पुनः प्रवृत्तीरुपादातुं शक्नुवन्तीति।

६ विलीन] अनेन श्रुतिवाक्यस्थनिष्पक्वशब्दो भाष्यस्थायुतशब्दश्च व्याख्यातो विज्ञेयः।

तावच्च प्रतिषेधैरुदासितव्यं, यावदाख्यातनिर्णयो व जातः। तेनैतदुक्तं भवति। ये पुरुषार्थपदान्तरेणासंबद्धाः प्रकरणगता विधयस्ते किमर्थां भावनामभिदधतीति। ततश्चैतस्मिन्नेव काले 'समिधो यजति' 'तनूनपातं यजति' इत्येवमादयोऽपि सर्व उदाहरणम्। किं क्रत्वर्थं 'समिधो यजति' उत पुरुषार्थमिति। तथा किं क्रत्वर्थं वदेदुत पुरुषार्थमिति। यदर्थं च वदनं तदर्थस्यैवानृतपदं विशेषणम्। प्रतिषेधवेलायां च तत्परो विधिरिति शेषमवधारितैदमर्थ्यमनुवदितव्यम्। ततश्चैकत्रैवं वचनं व्यज्यते यत्पुरुषार्थमनृतवदनं तन्न कुर्यात्। अपरत्र त्वेवं यत्क्रत्वर्थमनृतं वदेत्तन्नेति। ततश्चैतस्य सर्वस्याऽऽख्यातनिरूपणायत्तत्वात्तद्गतोऽयं विचारो भविष्यति। किमाख्यातेन कर्ताऽभिधीयते नेति। तत्र यद्यभिधीयते ततः श्रौतत्वात्प्रयोजनाकाङ्क्षिणी भावना प्रकरणगम्यक्रत्वर्थत्वबाधनेन पुरुषार्था भवति। अथ नाभिधीयते ततः श्रुतिविरोधाभावात्प्रकरणेन क्रत्वर्थता। ननु सत्यपि कर्तुरभिधाने भावनाप्रधानत्वादाख्यातेन तां प्रत्युपादीयमानस्य श्रौतोऽपि संबन्धः प्रकरणानुगुणत्वादविरुद्धो नैव क्रत्वर्थतां बाधते। विरोधिनौ हि तुल्यकक्षौ संबन्धौ परस्परं बाधेयातां न गुणप्रधानभूतौ। तद्यथा 'दशापवित्रेण ग्रहं संमार्ष्टि' इत्यत्र दशापवित्रोपसर्जनस्य संमार्गस्य ग्रहं प्रत्युपादीयमानस्य नैवमाशङ्का भवति किं दशापवित्रेण संबध्यतामुत ग्रहेणेति। तथाऽत्रापि गुणभूतकर्तृकायाः क्रियायाः क्रतुं प्रत्युपादीयमानाया न कश्चिद्विरोधः। यदि त्वाख्यातेन कर्तुः प्राधान्यमुच्येत ततः प्रकरणगम्येन क्रतुप्राधान्येन विरोधः स्यात्। यदि वा कर्तुरिव क्रतोरपि गुणत्वं स्यात्तत उभयोः शेषयोः शेषिसमवायविरोधो लक्ष्यते। न तु तदुभयमप्यस्ति। अतः श्रुत्या कर्तुर्गुणभावात्प्रकरणेन च क्रतोः प्राधान्यान्नानाविषयत्वेनासमवायादविरोधः। तदभावादबाधः स्यादिति। नैतदेवम्। § 6244

यद्यप्यादौ गुणत्वेन कर्ता कर्मणि गम्यते।
तथाऽप्यस्य प्रधानत्वं न पश्चात्प्रतिषिध्यते॥ § 6246

यद्यपि प्रथमं साधकमपेक्षमाणा क्रिया कर्तारं गुणत्वेन गृह्णाति त- 902
थाऽपि तस्याः प्रयोजनाकाङ्क्षावेलायामपि कर्त्रैव संनिहितस्तां निर्वर्तयितुं समर्थः। सोऽपि च साधकत्वं प्रतिपद्यमानः किमयं ममोपकरिष्यतीत्येवमपेक्षते। तयोश्चैकशब्दोपात्तयोः परस्परसंबन्धे निर्वर्तमाने विप्रकर्षाद्यागसंबन्धो न गृह्यते। न च सामवायिकत्वे संभवत्यारादुपकारकल्पना युक्ता। तद्यथा 'अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशमनुनिर्वपति' इत्यत्र सत्यपि तद्धितेन देवतोपसर्जनत्वोपादाने यागस्य प्रयोजनाकाङ्क्षायां सत्याम-

७ श्लेक] एकत्रेति—विधायकलिङो निषेधपरत्व इत्यर्थः।
८ अ] अपरत्रत्विति—अविधायकनओ निषेधपरत्व इत्यर्थः।

३० सा] सामवायिकत्वे—संनिपत्योपकारकत्व इत्यर्थः।

ग्नीषोमयोरेव संनिहितयोः संस्कार्यत्वं विज्ञायत इति न पशोरारादुपकारकत्वेन कल्प्यते। न हि पूर्वं गुणत्वमुत्तरेण प्राधान्येन विरुध्यते। अवश्यंभाविन्यां प्रयोजनकल्पनायां कस्यचित्प्राधान्यमेवमत्रापीति। अथवाऽऽख्यातेन कर्ता केवलमभिधीयते गुणप्रधानभावस्त्वर्थाद्यथेष्टं यथायोग्यं भविष्यतीति। तेनोभयोः क्रियाकर्त्रोरपेक्षासंनिधियोग्यत्वैरन्योन्यं गुणप्रधानभावावुपपत्स्येते। § 6247

यद्वैतदविशेषेण स्थितं क्रमवशादुभौ।
प्रत्ययार्थं सह ब्रूतः प्रकृतिप्रत्ययाविति॥§ 6249

तेनाऽऽख्यातेऽपि कर्तैव प्रकृत्यर्थोपसर्जनः।
प्राधान्येनाभिधीयेत द्वाभ्यामपि कृदन्तवत्॥§ 6251

न ह्यस्यौत्सर्गिकस्य न्यायस्य स्मरणस्य वाऽपवादभूतं न्यायान्तरं स्मरणान्तरं चोपलभ्यते। तेन कृत्तद्धितान्तवदेव प्रत्ययार्थप्राधान्यं प्राप्नोति। ततश्च शब्देनैव धात्वर्थस्य शेषत्वमुक्तं नातिक्रमितुं शक्यते। ननु सामान्यमुत्सृष्टं प्रतीतिविशेषेणापोद्येत। तथा हि। § 6252

धात्वर्थस्य प्रधानत्वमाख्यातेषु प्रतीयते।
कर्तोपसर्जनं तस्य प्रधानत्वे ह्यसंगतिः॥§ 6254

द्वयोस्तावत्प्रधानयोर्गुणयोर्वा सर्वत्रैव संबन्धो नावकल्पते। तत्रावश्यं कल्पनीये गुणप्रधानत्वे यथाप्रतीति व्यवस्थाऽवधार्यते। तत्प्रतीतिश्च यथाऽन्यत्र प्रकृत्यर्थोपसर्जनप्रत्ययार्थविषयत्वेनोपलभ्यते तथाऽत्र प्रत्ययार्थोपसर्जनप्रकृत्यर्थविषया सर्वस्य स्वसंवेद्या। न च ततोऽन्यद्बलवत्कारणमस्ति। तस्मादप्रसङ्गः कर्तुः प्रधानत्वस्येति। उच्यते। § 6255

धात्वर्थस्य प्रधानत्वं न तावदिह जन्मनि।
औत्सर्गिको न च न्यायो मत्पक्षे हि निवर्त्स्यति॥§ 6257

903 भावप्रधानत्वादाख्यातेषु न कदाचिद्धात्वर्थस्य नित्यं करणभूतस्य प्राधान्यमिति स्थितम्। न च धात्वर्थ एव भाव इत्युक्तम्। ननु प्रतीतिवशात्कर्तृप्राधान्यं तावन्निवृत्तम्। सत्यं निवृत्तं न तु भवत्पक्षे। किं तर्हि, अस्मत्पक्षे। यो हि भावमेव प्रत्ययार्थं वदति तस्य प्रकृतिप्रत्ययार्थप्राधान्यन्यायो लौकिकी प्रतीतिरुभयमपि न विरुध्यते। यस्य तु कर्तैव शुद्धः प्रत्ययार्थस्तस्य नैव केनचिद्भावोपादानमिति तत्प्राधान्यानुगमलक्षणं न स्यात्। लक्षणत एव कर्तुः प्राधान्यं प्राप्नोति। तच्च प्रतीतिविरुद्धम्। तत्र यदि प्रतीतिरनुगन्तव्या ततस्त-

---

१ प] न पशोरिति—पशुपुरोडाशयागस्य पशुयागीयदेवतासंस्कारकत्वेन संनिपत्योपकारकत्वे संभवत्यदृष्टान्तरकल्पनागौरवापादकत्वेनाऽऽरादुपकारकत्वकल्पनमन्याय्यमिति भावः। पशोः पशुयागस्य। कल्प्यत इति-पशुपुरोडाशयाग इति पूर्वं शेषः।
२४ म] भावार्थाधिकरण इति शेषः

दनुसार्येव प्रत्ययार्थलक्षणं प्रणेतव्यम्। तच्च भावप्रत्ययार्थवादिभिरेव प्रणीतं नेतरैः। अतस्तैरतिक्रान्तायां लौकिकप्रसिद्धावभिधेयत्ववत्कर्तुः प्राधान्यमभ्युपगन्तव्यमिति क्रियायास्तादर्थ्यप्रसङ्गः। आह। तत्रैतत्प्रसज्यते तत्र तादर्थ्यसंबन्धमेव श्रुतिरुपादत्ते। प्रकृतिप्रत्ययार्थयोः पुनरपेततादर्थ्यविशेषणविशेष्यभावमात्रं प्रतीयते। तत्र यद्यपि विशेषणत्वेन धात्वर्थस्योपसर्जनता तथाऽपि राजपुरुष इत्यादिष्विव कदाचिदङ्गाङ्गिभावो विपरीतः स्यात्। तथा हि। § 6258

विशेषणतया राजा पुरुषस्योपसर्जनम्।
अर्थयोः शेषशेषित्वे तस्यैवेष्टा प्रधानता।§ 6260

अपि च। § 6261

निःसंदिग्धप्रधानत्वं पाचकादिषु कारकम्।
तथाऽपि तु न तादर्थ्यं क्रियाणामवधार्यते॥§ 6263

तथा च पश्वेकत्वपुंस्त्वादिषु समानपदोपादानलक्षणश्रुतिसंबन्धेषु वाक्येन क्रियार्थत्वेनावधार्यमाणेषु वक्ष्यते 'न श्रुतिर्ब्रूते वाक्यार्थो नेति'। तेनात्रापि शक्यं वक्तुं न श्रुतिर्ब्रूते प्रकरणार्थो नेति। अपि च। § 6264

प्राधान्येनेह कर्तृत्वं यदि नामाभिधीयते।
ततस्तात्पर्यतो वाच्यं गुणत्वमवधारितम्॥§ 6266

प्राधान्येनाभिधानं तात्पर्येणाभिधानं न शेषित्वेन। तदिह यदि कर्तृत्वपरमाख्यातं ततः सुतरां गुणत्वमभिहितं भवति। न ह्यकुर्वन्कर्तेत्युच्यते। यश्च यत्करोति स तस्यैकान्तेन गुणभूतः। तेनास्यानुपपन्नं शेषित्वेन प्राधान्यम्। एतदौदासीन्याभिधानपक्षेऽपि वक्तव्यम्। यत्तूक्तमभिधीयते केवलं प्रत्ययेन कर्ता गुणप्रधानभावस्त्वर्थाद्भविष्यतीति। तत्रापि यदि वस्तुमात्रत्वेन कर्ताऽभिधीयते, तत औदासीन्यावस्थानाद्यथेष्टमङ्गाङ्गिभावं प्रतिपद्येत। स 904 तु कर्तृरूपत्वेन गुणात्मनैवाभिधीयत इति नास्त्यौदासीन्यावस्थानम्। यदप्युक्तं गुणत्वेनाभिहितोऽपि द्वितीययाऽऽकाङ्क्षया पुनः प्राधान्यं प्रतिपत्स्यत इति। तदपि श्रुतिविरोधादयुक्तम्। आख्यातेन हि श्रुत्यैव गुणपर्यायात्मना कर्तृत्वमभिहितं तत्पश्चाद्व्यावर्तयतः श्रुतिविरोध आपद्येत। न च तत्कल्पनामन्तरेणाऽऽनर्थक्यप्रसक्तिः, यत एवं कल्प्येत। प्रकरणेन प्रयोजनसंबन्धसिद्धेः। यथैव चानभिहिते कर्तरि निष्प्रतिद्वंद्वं प्रकरणं विनियोगाय पर्याप्तं भवति तथैवंरूपेणाभिहितेऽप्यविरोधः। न चैक एव प्रत्ययः सकृदुच्चरितः शक्नोति गुणप्रधानत्वे युगपदभिधातुम्। तत्रैकस्मिन्नाश्रीयमाणे यदि प्राधान्यमाश्रीयते ततः क्रियागुणत्वलक्षणं कर्तृत्वमुत्सृज्य तयाऽऽप्यमानत्वेन कर्मत्वप्रसङ्गात्त-

१४ व] ( अ० ४ पा० १ अ० ५ सू०   १५ ) इत्यत्र भाष्यकृतेत्यर्थः

त्रैव लकारोत्पत्तेर्यगात्मनेपदादिकरणादन्यरूप एव शब्दः स्यात्। अथोच्येत सर्वः कर्ता किंचित्प्रयोजनमनुद्दिश्य क्रियायां न प्रवर्तते। ततश्च द्वयात्मकमेव कर्तृत्वं साधकरूपं क्रियाफलस्वामिरूपं चेति। उभयरूपेणाभिहिते सत्याकाङ्क्षाद्वयं प्रसृतं क्रियातो निर्वर्तयिष्यत इति। तदयुक्तम्। कुतः। § 6267

कर्तृत्वं साधकत्वेन सिद्धं तच्चाभिधीयते।
स्वामित्वं तु ततः पश्चात्प्रमाणान्तरगोचरः॥ § 6269

यद्यपि स्वामित्वेन विना कर्तृत्वं नोपपद्यते तथाऽपि प्रमाणान्तरलभ्ये तस्मिन्नाख्यातैरनुष्ठातृत्वांशमात्रमभिधीयते। तथा च स्वामित्वप्रतिपादनार्थास्तत्र तत्र स्वर्गकामादिशब्दाः प्रयुक्ताः। तस्माद्गुणत्वमेव केवलं कर्तृत्वम्। अतश्चैतदेवम्। तथा हि। § 6270

अचेतनेऽपि काष्ठादौ कर्तृत्वमभिधीयते।
न च तत्र फलोद्देशस्तस्मान्नैषाऽवधारणा॥ § 6272

व्यापि हि कर्तृलक्षणमङ्गीकर्तव्यम्। न च फलोद्देशस्य व्यापित्वम्, अचेतनेष्वभावात्। साधकत्वं तु व्यापि। तेन तदेवाऽऽश्रयितव्यम्। तस्मान्नैव पुरुषार्थता युक्तेति। तस्मान्नाऽऽरब्धव्यम्। अत्राभिधीयते। यद्यपि श्रुत्या शेषत्वं नाभिहितम्। तथाऽपि यदेव तद्विशेषणत्वेनोपसर्जनत्वं तदेव शेषत्वमप्यापादयति। तेन ह्येकं तावत्तादर्थ्यमभिधानात्मकमुपात्तमेव। केवलमनुष्ठानेऽपि तदेवाङ्गीकर्तव्यम्। राजपुरुषादिष्वपि शब्दार्थवृत्त्या राजादीनां गुणत्वमेव प्राप्तं प्रमाणान्तरवशेन तु विपरीतं कल्प्यते। तच्च सत्त्वधिकरणे दर्शितम्। न चैतावता शब्दार्थत्वं भवतीत्युक्तमेव। यश्च वस्तुतोऽपि तत्र राज्ञो गुणत्वांशस्तमेवोपादाय शब्दः प्रवर्तते। अस्ति चासौ। कथम्। § 6273

905 बिभ्राणः पुरुषं राजा गुणत्वं तावदृच्छति।
स्वामित्वं भजते पश्चाद्विवक्षा तु यथारुचि॥ § 6275

तत्र यदा राजविशिष्टः पुरुषो विवक्षितस्तदा शब्दार्थानुगुण्यादेकान्तेन वस्तुगतमप्युपकारकत्वं विवक्षितव्यम्। यदा पुनरुपकार्यत्वं विवक्ष्यते तदा तस्य विशेष्यलक्षणापत्ते राजाज्ञाकरत्वेनोपकारकभूताः पुरुषा विशेषणं भवन्तीति पुरुषराजशब्द एव प्रयोक्तव्यः। प्रयोगद्वयस्य विद्यमानस्य तावद्व्यवस्थाहेतावर्थद्वये संभवति किमिति वक्ष्यमाणक्रियोपयोगापेक्षया विवक्षाभेदमात्रेण क्लिष्टां व्यवस्थामाश्रयिष्यामहे। तेन भूतं निमित्तमालोच्य शब्दे प्रयुज्यमाने राजपुरुष इत्यत्रोपकारांशकृतं शेषत्वमेव विवक्षितमिति गम्यते। यत्रापि गोगर्भदासादिस्वामिन्यत्यन्ताविद्यमानमेव शेषत्वं तत्राप्युपकारकत्व-

१० अ] अतश्चेति—इतोऽपीत्यर्थः।
२० त्त्व] ( अ० २ पा० १ अ० ४ सू० १२ )

संभवादुपचरितमिति द्रष्टव्यम्। अथाप्येवमादीनां मुख्यत्वसिद्ध्यर्थमुपकारकत्वमेवोपसर्जनत्वं न शेषत्वम्। तथाऽपि शेषस्यैवं फलवत्त्वादेतत्प्रत्यासन्नतरं न शेषिण इति शेषत्वप्रतिपत्त्यर्थत्वमेव विज्ञायते। पाचकादावपि सर्वत्र तत्कृतवृत्तिलाभादुपकारकत्वसद्भावात्क्रियाणामुपसर्जनत्वं न निर्वर्त्यत्वेनावस्थानात्प्राधान्यम्। § 6276

नन्वेवं सति 'प्रोक्षिताभ्यामुलूखलमुसलाभ्याम्' इत्यत्रापि प्रोक्षणस्य द्रव्यार्थत्वं प्राप्नोति। कस्य वैतदनिष्टम्। नन्वेवं सति हन्तिपिषिप्रयुक्तत्वापूर्वप्रयुक्तत्वविचारो विरुध्यते। कथं नाम विरुध्यते। यदाऽन्यदेवतत्प्रयुक्तत्वमन्यच्च तादर्थ्यम्। अवस्थिते हि द्रव्यार्थत्वे कार्यप्रयुक्तो हि धर्मः किमनन्तरकार्येण हन्तिना पिषिणा च प्रयुज्यतामुत व्यवहितेनापूर्वेणेति। योऽपि च तादर्थ्यविचारस्तत्र सोऽप्येवमेवोलूखलमुसलापरित्यागेनैव द्रष्टव्यः। किं यत्तयोर्हन्तिपिषिसाधनत्वं तदर्थमेतत्प्रोक्षणमुत यदपूर्वसाधनत्वं तदर्थमिति। § 6277

तिरोहितं च कर्मत्वं न गृह्णीयादपि क्रियाम्।
आविर्भूतं तु कर्तृत्वमाख्यातस्थं ग्रहीष्यति॥§ 6279

कृदन्ताभिहितानि कारकाणि तिरोहितत्वान्न शक्नुयुरपि नामार्थत्वेन क्रियां ग्रहीतुम्। सुप्तिङन्तस्थानि त्वाविर्भूतत्वाच्छक्नुवन्ति। यत्तु पश्वेकत्वादिवदपेततादर्थ्यसंबन्धो न क्रत्वर्थत्वेन विरोत्स्यत इति। तत्रोच्यते। § 6280

कारकेण गृहीतत्वादेकत्वादेः क्रियार्थता।
कारकश्रुतिगम्यत्वाद्बाधते द्रव्यशेषताम्॥§ 6282

कारकोपसर्जनीभूतस्य द्रव्यस्य प्रत्यासत्तिमात्रेण संख्यादयः शेषाः संभवेयुः। ते त्वत्यन्तप्रत्यासन्नप्रधानभूतेन कारकेणापहृत्य क्रियायै नीयन्ते। न त्वेवं धात्वर्थानां केनचिद्बलवत्तरेण प्रमाणेन क्रत्वर्थत्वमवगम्यते, येन कर्तृत्व- 906
शेषता बाध्येत। यत्तु कर्तृत्वस्य गुणात्मकत्वात्प्राधान्याभिधाने सति सुतरां गुणत्वं प्राप्नोतीति। तदसत्। कुतः। § 6283

कर्तॄणां शास्त्रगम्येऽर्थे चेतनानामधिक्रिया।
विधिश्च न भवेत्तेषां फलसंकल्पनादृते॥§ 6285

यद्यप्यनुष्ठातृमात्रात्मकं कर्तृत्वं तथाऽपि तद्बुद्धिविपूर्वकारिणां फलसंकल्पनमिश्रम्। तादृशानामेव वैदिकेषु कर्मस्वधिकारो नाचेतनानाम्। विधियुक्ताश्चैताः सर्वाः क्रियाः। प्रतिषेधानामपि विधिप्रत्ययसंबन्धाधीनत्वात्। न च पुरुषार्थकर्तव्यतामन्तरेण विधिः संभवति। तेनावश्यमनुष्ठातृत्वेनोच्यमानः पुरुषः किमपि ममैषा क्रिया साक्षात्पारम्पर्येण वोपकरिष्यतीत्यध्यवस्यति। साक्षादुपकारके च संभवति न पारम्पर्योपकारकल्पना लभ्यते। न च संस्कारानर्हः कर्ता। क्रतुफलाधारत्वेन सप्रयोजनत्वात्। कस्तस्योपकार इति चेत्। सर्वथा तावत्सामान्येनोपकारमात्रमवधारितम्। तावता च क्रत्वर्थत्वं

व्यावर्तितम्। तद्विशेषावधारणं च यथेष्टं कल्पयिष्यते। न तदत्रोपयुज्यते। तस्मान्न क्रत्वर्थता। यद्यपि च प्राधान्यांशः कर्तृत्ववचनेनानभिहितस्तत्र चानन्तर्गतस्तथाऽपि तदन्यथानुपपत्त्यैव प्रत्यायितत्वात्संबध्यते। यथा स्वर्गकामादिशब्देन पुरुषविशेषवचनेनानुक्तमपि स्वर्गस्य साध्यत्वं कल्पयिष्यते। तथा स्वामित्वमपि बुद्धिपूर्वकारिणः पुरुषस्य फललिप्सयैव कर्तृत्वप्रतीत्या प्रतिपत्स्यते। तत्र यथैव देवतायाः कर्मणाऽभिप्रेयमाणायाः प्राधान्यं यागसाधनत्वप्रतिपत्त्यर्थमेव ज्ञायते न प्राधान्यस्वरूपपर्यवसायित्वेन, तथेह गुणत्वं प्राधान्यसिद्ध्यर्थमेव द्रष्टव्यम्। § 6286

गुणभावो हि कर्तॄणां न धात्वर्थान्प्रतीष्यते।
भावनायां तु शेषस्य धात्वर्थः किं न ते गुणः॥§ 6288

यस्यापि कर्ता प्रत्ययार्थस्तेनाप्यवश्यं प्रतीतिवशाद्भावनाऽभ्युपगन्तव्या। ततश्चैकप्रत्ययोपादानात्प्राधान्याच्च सैव कर्तारमङ्गी करोतीति न धात्वर्थाङ्गता भवतीति। स तु भावनायां व्यापृतस्तामन्यथा कर्तुमशक्नुवन्धात्वर्थमेवाङ्गी करोति। न चोभयात्मकत्वं विप्रतिषिद्धं, विषयान्यत्वादेव। यदि धात्वर्थमेव प्रति गुणत्वमेव कल्प्येत ततः सकृदुपादाने विप्रतिषिद्धमिव स्यात्। इह तु भावनां प्रति गुणत्वं धात्वर्थेषु प्राधान्यमित्यविरोधः। स्वभावश्चोभयात्मकं वस्तु, यदि तथैव शब्द उपादत्ते किं तत्र विप्रतिषिद्धम्। अथवैकं शब्दादेकं सामर्थ्यादित्यविरोधः। सर्वथाऽस्ति तावत्कर्तुः प्राधान्यप्रसक्तिरिति पुरुषार्थो धात्वर्थः प्राप्नोति। अथं चापरो विशेषः। § 6289

907 क्रियान्तरेण संबन्धः पाचकादेः प्रतीयते।
तत्र शब्दार्थमात्रेण भवेद्धातुर्विशेषणम्॥§ 6291

शब्दार्थवस्त्वर्थात्मनोभयप्रकारस्योपसर्जनत्वस्यायं विवेकः। पाचकं राजपुरुषं वाऽऽनयेत्यत्र पुरुषस्याऽऽनयनसंबन्धिनः पाचको राजा वा शब्दार्थमात्रतयोपसर्जनत्वं प्रतिपन्न इति शेषत्वं यावन्न गच्छेदपि। वदेदित्येवमादिषु तु कर्तुः कार्यान्तरसंबन्धानुपादानान्न शब्दार्थोपसर्जनत्वमाकाङ्क्षितमिति परिशेषाद्वस्त्वर्थोपसर्जनत्वमेव शेषत्वमवधार्यते। तस्मादस्त्यभिधानपक्षे धात्वर्थानां पुरुषार्थत्वे प्रमाणमिति। नन्वेवं सत्यनभिधीयमानोऽपि समानपदोपात्तभावनालक्षितः प्रकरणात्स एव प्रत्यासन्नतरः शक्नोति धात्वर्थस्य प्रयोजनाकाङ्क्षां निर्वर्तयितुमित्यभिधीयमानपक्षतुल्यत्वं प्राप्नोति। नैष दोषः। § 6292

स शब्दो लक्षणां याति यः श्रुत्या नोपयुज्यते।
श्रुत्यर्थेनोपयुक्ते तु लक्षणा नान्तरीयकी॥§ 6294

अभिधीयमानो ह्यगम्यमानविशेषया श्रुत्या तन्त्रेणोपात्तो यद्यत्कार्यमुपतिष्ठते तत्तत्सर्वं निराकाङ्क्षीकर्तुं समर्थ इति न क्वचिच्छास्त्रार्थत्वाद्धीयते।

लक्ष्यमाणः पुनरादित एव नैष शास्त्रेणोक्त इत्येवं तावत्प्रतीयते। न च तेनानुक्त आदर्तव्यो भवति। तद्यदि लक्षणाबीजं शास्त्रं तत्रोपसंहरिष्यते। ततः शास्त्रार्थत्वमध्यवसाय प्रमाणी करिष्यते। सर्वमेव शास्त्रं यदा श्रुत्यर्थः कर्मणि नोपयुज्यते तदा लक्षणार्थमात्मानं प्रापयति। श्रुत्यर्थ एव चेह भावनोपयुज्यते। न च युगपच्छ्रुतिलक्षणावृत्त्युपयोगित्वमवकल्पते। तस्माद्यथैव पूर्वो धावतीत्युक्ते संबन्धित्वादपरो गम्यमानोऽपि न कार्येण संबध्यते तथेहान्यपरेऽपि शब्दबलात्संबन्धी कर्ता गम्यत एव केवलमित्यवधारणान्नोपयोगित्वेन गृह्यते। या चासौ प्रतीतिः सा गुणत्वेनाप्युपयुक्तेति न पुनः प्राधान्यकल्पनामपि करोति। तदा च भावना कर्तारमात्मसिद्ध्यर्थमनन्यथासंभवमात्रेणोपसर्जनीकृतमेव गमयति न प्रधानभूतमिति निष्प्रमाणिकैव प्राधान्यप्रतिपत्तिर्भवेत्। न हि तं प्रधानभूतं भावना गमयितुं समर्था। तेन यदैव कर्ता प्रधानत्वं प्रतिपत्तुमारभते तदैव किमेतस्य प्रमाणमित्यन्विष्यमाणे 908 शब्दो भावना चोभयमप्युदासीनम्। न च ततोऽन्यत्प्रमाणमस्ति। तस्मादर्थवानभिधानानभिधानविचारः। किं प्राप्तम्। प्रायेण वाचोऽनृतवादिनीत्वाद्यत्पुरुषस्याऽऽत्मार्थे वदनेऽनृतं प्रसक्तं तस्यैष प्रतिषेधः पुरुषाणां प्रत्यवायपरिहारार्थो विधीयत इति। कुतः। § 6295

वदेदिति श्रुतेरत्र पुरुषः संप्रतीयते।
विधिरप्यर्थवानेवं क्रत्वर्थेऽनर्थको भवेत्॥§ 6297

समानपदोपात्तेन हि कर्त्रा संबन्धः श्रौतत्वात्प्रकरणं बाधते। योऽपि विधिव्यापारः सोऽपि पुरुषार्थधर्मपक्षेऽत्यन्ताप्राप्तो विधीयमानोऽर्थवान्। क्रत्वर्थपक्षे तु प्रयोगवचनेनैवोपनीतमात्रधात्वर्थविधानात्प्राप्त्यात्मिको विधिरनर्थकः स्यात्। तद्दर्शयति—**इतरथा वदनं भवतीत्येतावत्यर्थे** सकर्तृकं साविधिकं च पदं **वदनमनुतिष्ठेदि**त्येवंरूपमनर्थकं स्यात्। तस्माद्विधयस्तावत्पुरुषार्थाः। ततश्च प्रतिषेधानामपि तदनुसारित्वात्पुरुषार्थत्वसिद्धिः। तत आत्मोपकाराय पुरुषो नानृतं वदेदिति शास्त्रार्थोऽवधार्यते। सूत्रमिदानीं योजयति। स चायमर्थः पुरुषस्य प्रागेव दर्शपूर्णमासाधिकारादुपनयनसमकालमेव स्मृतितः प्राप्तस्तेन पुरुषस्य संयोगात्क्रतुसंयुक्तवदनं नित्यानुवादः। कथं पुनः पुरुषार्थतायां क्रतुसंयुक्तग्रहणम्। उच्यते। § 6298

सिद्धान्ते क्रतुसंयुक्तं समाम्नायेन वोच्यते।
यद्वा प्रकरणप्राप्त्या संयुक्तं बाधगोचरः॥§ 6300

यदेतत्तत्क्रतुसंयुक्तमभिप्रेतं, क्रतुसंयुक्तं वा समाम्नातं, प्रकरणाद्वा यत्क्रतुसंयुक्तं प्राप्तं तत्पुरुषार्थभूतत्वान्नित्यानुवादः स्यादिति। **नन्वेषा श्रुतिस्तस्याः स्मृतेर्मूलमिति।** § 6301

सर्वा तावत्स्मृतिर्नित्यं श्रुतिमूलप्रमाणिका।

तेन स्मृत्यर्थवाचित्वान्नानुवादो भवेदसौ॥§ 6303

यदि तु स्मृतेः स्वातन्त्र्येण प्रामाण्यं भवेत्ततस्तद्वशेन श्रुतिर्नित्यानुवादो भ-
909 वेदपि। तस्यास्तु मूलभूता श्रुतिरवश्यं कल्पनीया। तत्किमन्यां कांचित्कल्पयित्वेयमनुवादी क्रियतामुतेयमेव मूलं भवत्वित्यस्यां प्रत्यक्षेणोपलभ्यमानायां नान्यस्याः कल्पनायां प्रमाणमस्ति। द्वयं हि तथा निष्प्रमाणकमाश्रीयेत। श्रुतपरित्यागाश्रुतकल्पनाभ्युपगमात्। तस्मान्नित्यानुवादो नेति। यत्त्वत्रोत्तरं **दर्शपौर्णमासयोरिति हि स्मर्येत। उपनयनकाल एव चास्योपदेष्टारो भवन्ति। अपि च पुरुषधर्म इत्युपदिशन्ति। तस्मान्नैषा स्मृतिरतः श्रुतेरिति।** नैवैतत्पौर्वापर्येण संबद्धं दृश्यते। तथा हि। § 6304

यदि प्रकरणं त्यक्त्वा पुरुषार्थेयमिष्यते।
ततः स्मृतिसमानार्था नेष्टा मूलं कथं श्रुतिः॥§ 6306

यदि हि क्रत्वर्था सती श्रुतिर्मूलत्वेनाभ्युपगम्यते तत उभयोर्मूलमूलिनोरैकरूप्यस्वाभाव्यादस्याश्चातद्रूपत्वान्मूलत्वं न स्यात्। इयं तु यतः प्रकरणं बाधित्वा पुरुषार्थधर्मत्वेन स्थापिता तेनोपनयनसमकालमेव प्राप्नुवती किमिति श्रुतिः स्मृतेर्मूलं न भविष्यति। किमिति वा दर्शपूर्णमासयोरिति स्मर्यते। का चोपनयनकालपुरुषार्थत्वोपदेशयोर्विरुद्धता। तेनायुक्तं मूलत्वनिराकरणमिति। नैष दोषः। कथम्। § 6307

पूर्वपक्षास्त्रयो ह्यत्र भाष्यकारस्य संमताः।
पूर्वस्मिन्मूलमूलित्वं परयोस्त्वनुवादता॥§ 6309

यद्यत्र केवलपुरुषधर्मत्वमेव पूर्वपक्षः स्यात्ततोऽयमसंबद्धो ग्रन्थो भवेत्। इह त्वेतद्ग्रन्थान्यथानुपपत्त्यैव त्रयः पक्षाः क्रमवन्तो हृदये वृत्तिकारस्य विपरिवर्तमाना गम्यन्ते। तत्र प्रथमं तावत्सूत्रनिरपेक्षः केवलपुरुषार्थत्वपक्षः। तस्मिंश्च नैव स्मृतिरुपन्यस्यते। यदि त्ववश्यमुपन्यसितव्या ततो मूलमूलिभावाभ्युपगमेनैव नेतव्या। तस्मिंस्तु विध्यनुवादविकल्परहिते परिगृहीते सूत्रपदागमितं पश्यन्ननुवादत्वसमर्थनार्थं क्रतुयुक्तपुरुषधर्मपक्षं हृदि कृत्वा 'स चायमर्थ उपनयनकाल एव प्रतिषिद्धः' इति ब्रवीति। तत्र परस्तमेव केवलपुरुषार्थत्वपक्षमङ्गीकृत्य मूलत्वप्रतिपत्त्याऽनुवादत्वमाक्षिपति। सिद्धान्तवादी तु 'नैषा तस्या मूलम्' इति ब्रुवन्निमं पक्षं परिगृह्णाति। नैव केवलपुरुषार्थत्वं
910 मयाऽङ्गीकृतं, किं तर्हि, 'प्रकरणविशेषाद्वा तद्युक्तस्य संस्कारो द्रव्यवत्' इत्यनेन क्रतुयुक्तपुरुषधर्मोऽभिक्रमणवद्विज्ञायते न सार्वत्रिवकः। एवं श्रुतिः प्रकरणं चोभयमप्यनुग्रहीष्यते। ततश्च स्मृतिरविशेषेण प्रवृत्ता नं विशेष-

१७ नैष] भाष्यकाराभिप्रायाविज्ञानविलसितमाक्षेपं समाधातुमारभते—नैष दोष इत्यादिना।

२९ र] ( अ० ३ पा० ४ अ० ५ सू० १५ )

स्थया श्रुत्या मूलतो निराकाङ्क्षीकर्तुं शक्यत इत्यवश्यमात्मानुरूपश्रुत्यन्तरं मूलं कल्पयति। तस्मिंश्च कल्पिते तदर्थैकदेशान्तर्गतत्वाद्दर्शपूर्णमासयजिस्थः प्रतिषेधोऽनुवादी भवति। यो ह्युपनयनादारभ्यानृतं वर्जयति वर्जयतितरामसौ दर्शपूर्णमासस्थः। तस्मादुपनयनमरणान्तरालवर्तित्वाद्दर्शपूर्णमासयोर्नित्यप्राप्त एव पुरुषस्यानृतवदनप्रतिषेधोऽनूद्यते न मूलत्वम्। ‘अपि च पुरुषधर्म इत्युपदिशन्ति’ इत्येतदपि केवलपुरुषधर्मोपदेशित्वेन स्मृतेः पूर्वेणैव योजयितव्यम्। अथवाऽनेनैव पक्षान्तरं परिगृह्यते। नैवात्र क्रत्वर्थपुरुषार्थोपन्यासः क्रियते। किं तर्हि। दर्शपूर्णमासयोरनृतवदनप्रतिषेधः श्रूयते। स किमप्राप्तविधिरुत प्राप्तानुवाद इति। किं प्राप्तं, स्मृतिकृतात्संयोगान्नित्यानुवाद इति। ननु चान्य एव स्मार्तः संयोगः पुरुषार्थोऽन्यश्चैष क्रत्वर्थ इति। सत्यमेवम्। तथाऽपि नित्यानुवादः। कुतः। § 6310

पुरुषं हि परित्यज्य नानृतं प्राप्यते क्रतौ।
पुरुषे तन्निषिद्धं चेन्निषिद्धं तत्क्रतावपि॥ § 6312

यद्यपि पुरुषार्थात्प्रतिषेधात्क्रत्वर्थः प्रतिषेधो विषयान्तरं भवति तथाऽपि प्रसङ्गोपनतार्थत्वान्न विधित्वं प्रतिपद्यते। न हि पुरुषः स्वार्थं चानृतं वर्जयिष्यति क्रत्वर्थं च वक्ष्यतीति संभवति। तस्मात्पुरुषार्थप्रतिषेधान्तरालपातित्वात्क्रतोरप्यस्त्येव प्रतिषेध इति नित्यानुवादता। न चैतस्मिन्पक्षे मूलमूलिभावाशङ्का। स्मृतौ पुरुषधर्मत्वोपदेशात्। अथवाऽऽदित एवाऽऽरभ्य दर्शपूर्णमासयोरिति हि स्मर्येतेत्यादि समस्तमेवोत्तरम्। अतो मूलान्तरप्रभवस्मृत्यर्थानुवादमात्रमेव क्रतुप्रशंसार्थम्। अन्यार्थप्रसक्तेरप्येवमादिभिः क्रतुर्युज्यमानो बह्वङ्गत्वेन प्रशस्तः प्रतिभातीत्यर्थवादता॥ १२॥ § 6313

केवलपुरुषार्थत्वपक्षे तावद्भाष्यकारः संयोगान्तरं वर्णयति। स्मृतौ हि 911
‘सत्यं ब्रूयात्’ इति। धर्माय सत्यनियमः श्रूयते। ‘नानृतं वदेत्’ इति त्वनृतप्रतिषेधः। भिन्नौ चैतावर्थौ। न चान्यच्छ्रूयमाणमन्यस्य श्रूयमाणस्यानुवादो भवति। तस्माद्विधिः। ननु द्वय्येव पुरुषस्य वाक्यप्रवृत्तिः, सत्यवचनमनृतवदनं च। तत्र यदा सत्यं नियतं तदाऽर्थादेवानृतं प्रतिषिद्धं भवतीत्यनुवाद-

६ पू] क्रतुयुक्तपुरुषधर्मत्वपक्षेणैवेत्यर्थः।
७ क्षान्त] पक्षान्तरमिति—शुद्धपुरुषधर्मक्रतुयुक्तपुरुषधर्मपक्षाभ्यां पक्षान्तरमित्यर्थः।
१८ अथ] अथवाऽऽदित एवेति—अयमाशयः। ‘स चायमर्थः’ इत्यनेन भाष्येण क्रतुयुक्तपुरुषधर्मत्वाशयत्वेनानुवादत्वेऽभिहिते तदाशयमविज्ञाय पुरुषधर्मत्वाशयेन ‘नन्वेषा श्रुतिः’ इत्यनेन कृतायाः शङ्कायाः क्रतुयुक्तपुरुषधर्मत्वाशयत्वेन ‘नैषा तस्या मूलम्’ इत्यनेन परिहारमभिधाय अपि चेत्यादिग्रन्थमपि क्रतुयुक्तपुरुषधर्मत्वपक्ष एव ‘सत्यं ब्रूयात्प्रियं’ ब्रूयान्न ब्रूयात्सत्यमप्रियम्। प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः’॥ इति स्मृतौ। शुद्धपुरुषधर्मत्वोपदेशादित्येवं परतया संयोज्य ‘अपि च’ इत्यादिग्रन्थस्य क्रत्वर्थत्वानुवादरूपपक्षान्तरपरिग्रहार्थतया व्याख्यानपक्षेऽपि क्रत्वर्थत्वानुवादायोगाशङ्कापरिहारार्थत्वेन ‘नैषा तस्याः’ इत्यादित एव भाष्यं योजयतीति।

त्वं प्राप्नोत्येव। नैतदेवम्। कुतः। संयोगान्तरादेव। स नामानुवादो भवति योऽत्यन्तसमाना र्थत्वेनावधार्यते। अस्ति च विधिप्रतिषेधयोः फलभेदादर्थभेदः। कथम्। § 6314

विधिः प्रवर्तमानो हि श्रेयःसिद्ध्यै प्रवर्तते।
प्रतिषेधः पुनः पापान्निवर्तयति भेदतः॥§ 6316

'सत्यं ब्रूयात्' इत्यस्यां हि भावनायां प्रयोजनाकाङ्क्षा सर्वविधीनां पुरुषार्थफलत्वात्स्वर्गादिना निवर्त्यते। तेनैषोऽर्थः, सति वचनद्वयेन व्यवहारे सत्यवचनेन व्यहरन्नभ्युदयेन संबध्यत इति। तत्र सत्यं ब्रुवाणस्य स्वर्गो भवति। अनृतवादिनस्तु न गुणो न दोषः। तथा 'नानृतं वदेत्' इत्यनेनापि प्रतिषेधेनानृतवदनान्नरकप्राप्तिर्भवति। सत्यवदनात्तु न दोषो न गुणः। तस्मादर्थभेदादुभयोरप्यपुनरुक्ततया विधित्वम्। आह। भवेदेतत्संयोगान्तरम्। यदि स्मृतौ सत्यं ब्रूयादित्येतावन्मात्रमेवोच्येत। तस्यां तु सत्यवचनाविधिवदनृतप्रतिषेधोऽपि भेदेन स्मर्यते। तस्मान्न संयोगान्तरमिति। उच्यते। § 6317

प्रजापतिव्रतस्थत्वात्तत्रानीक्षणयुक्तितः।
पर्युदासेन सत्यस्य विधिरित्यवगम्यते॥§ 6319

अननृतं हि वदेदित्येवं हि तत्रापि नियम्यते। ततश्चास्त्येव संयोगान्तरम्। न हि दार्शपूर्णमासिके कश्चित्पर्युदासहेतुरस्ति व्रतशब्दप्रयोगो विकल्पप्रसक्तिर्वा।
912 शास्त्रप्राप्तप्रतिषेधेषु हि विकल्पो नार्थप्राप्तिपूर्वकेष्विति वक्ष्यति। तस्माद्विधिरिति। यदा त्वेवं प्रत्यवस्थीयते यथा प्रजापतिव्रतव्यतिरेकेणाप्येवमादय प्रतिषेधाः स्मृतिषु सन्तीति तदेवं संयोगान्तरं व्याख्यातव्यम्। § 6320

स्मार्तः पुरुषमात्रस्य संयोगः स्वार्थसिद्धये।
अयं तु क्रतुसंयुक्तपुरुषार्थः फलान्तरे॥§ 6322

१४ प्र] प्रजापतिव्रतस्थत्वादिति—यथव 'नेक्षेतोद्यन्तमादित्यम्' इत्यादेः प्रजापतिव्रतान्तगर्तत्वादुपक्रमस्थव्रतशब्दानुरोधाद्वेक्षणाभावसंकल्पविधिपरत्वं तथैवात्रापि 'सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम्। प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः'। इत्यस्यां स्मृतावुपसंहारेऽनुष्ठेयक्रियाबाचिधर्मशब्दानुरोधेन 'नानृतं वदेत्' इत्यनेन निषेधायोगात्पर्युदासस्यैव विधिराश्रयणीय इति श्लोकतात्पर्यार्थः।

१८ क्ष्य] (अ॰ १० पा॰ ८ अ॰ १) इत्यत्रेति शेषः।

१९ य] एतावता यथाभाष्यं केवलपुरुषार्थत्वपक्षे संयोगान्तरत्वं व्याख्यायाधुना यदि तावद्व्रतशब्दव्यतिरेकेण धर्मशब्दव्यतिरेकेणापि च 'न संशयं प्रपद्येन नाकस्मादप्रियं वदेत्'। नाहितं नानृतं चैव 'इत्यादिस्मार्तनिषेधसद्भावेन शुद्धपरुषार्थत्वपक्षे न संयोगान्तरमिति कश्चन प्रत्यवतिष्ठत्तदा क्रतुयुक्तपुरुषार्थत्वपक्षे संयोगान्तरं व्याख्येयमित्यवेमभिप्रायेणाऽऽह—यदा त्वेवमित्यादिना।

२० संयोगा] संयोगान्तरमिति—संयुज्यते—विनियुज्यतेऽनेनेति व्युत्पत्त्या फलसंबन्धबोधकविध्यन्तरं निषेधस्येत्यर्थः।

नन्वेतेनैव हेतुना सामान्यप्राप्त्यपेक्षया विशेषस्यानुवादत्वं युक्तम्। नैतदस्ति। पूर्ववदेव फलभेदात्। यो हि स्मार्तोऽनृतप्रतिषेधस्तेनैतावदवगतम्। आत्मदोषपरिहाराय पुरुषेण नानृतं वदितव्यमिति। तत्र यदा दर्शपूर्णमासस्थोऽपि तदतिक्रमं करोति तदा बाह्यातिक्रमवदस्य स्वयं प्रत्यवायमात्रं स्यान्न कर्मफलप्रतिबन्धः। न हि शुद्धपुरुषधर्मातिक्रमैः क्रतवः प्रत्यवयन्ति। तथा हि। § 6323

यो नाम क्रतुमध्यस्थः कलञ्जादीनि भक्षयेत्।
न क्रतोस्तत्र वैगुण्यं यथाचोदितसिद्धितः॥§ 6325

क्रतवो हि स्वसंबन्धिनौ विधिप्रतिषेधावपेक्षमाणास्तदतिक्रमे सति विगुणा भवन्ति। ये पुरुषगता विधिप्रतिषेधास्ते क्रत्वन्तरगता इवास्य सदसद्भावयोरविशिष्टाः। न हि तेषु गुणबुद्धिरुत्पन्ना, येनातिक्रमे वैगुण्यबुद्धिः स्यात्। तेन दर्शपूर्णमासयोरनृतं वदन्, नरकं च प्राप्नुयात्, दर्शपूर्णमासफलं चाविकलमेवाऽऽप्नुयादिति च स्मृत्यर्थः। श्रौतः पुनः प्रकरणयुक्तपुरुषधर्म इत्यत्रैषोऽर्थो विज्ञायते। वर्जितानृतवचनकेन पुरुषेण कृतौ दर्शपूर्णमासौ फलं साधयत इति। प्रकरणसामर्थ्याद्धि पुरुषगतमपूर्वसाधनत्वं लक्षयित्वाऽनृतं प्रतिषिद्धम्। अतस्तदतिक्रमे दर्शपूर्णमासापूर्वमेव वैगुण्यान्न स्यात्। न तु पुरुषस्यैव कश्चित्प्रत्यवायः। न हि तदानीं प्रत्यवायः कल्प्यमानः स्वतन्त्रपुरुषसंबन्धित्वेन कल्पयितुं शक्यते। तस्मादस्ति संयोगान्तरमिति विधिः। एवं शुद्धक्रतुधर्मपक्षेऽपि क्रतुपुरुषप्रत्यवायविशेषात्संयोगान्तरं व्याख्येयम्। तेन नित्यानुवादस्तावन्न भवति। यस्तु क्रतुधर्मत्वतद्गतपुरुषधर्मत्वयोर्विशेषस्तमुपरिष्टाद्वक्ष्यामः। उभयथाऽपि विधिसिद्धेरिदानीं नोपयुज्यत इति नोच्यते। परस्त्वाह। गृह्णीम 913
एतद्विधिरिति। पूर्वोक्तेनैव कारणेन पुरुषधर्म इति वदामः। उभाविदानीं पूर्वपक्षावासाते। यश्च पुरुषमात्रधर्म एव सत्यविधेः संयोगान्तरत्वेन यश्च क्रतुयुक्तपुरुषधर्म इति। तत्राप्युत्तरम्। § 6326

सर्वाख्यातेषु कर्तॄणामिष्टा नैवाभिधेयता।
या तु तेभ्यः प्रतीतिः सा संयोगान्तरतो भवेत्॥§ 6328

सर्वत्रैव तावच्छब्दादुच्चरितादनेकोऽर्थो गम्यते। न च तावता सर्व एवाभिधेयो भवति। तद्भावभावित्वान्यथानुपपत्त्यधीनत्वाद्वाचकशक्तिकल्पनायाः। स नामार्थोऽभिधीयते यत्र शब्दस्य वाचकशक्तिः कल्प्यते। क्व चासवदृष्टा सती कल्प्यते यत्र तत्कल्पनामन्तरेण प्रतीतिप्रयोगौ नावकल्पेते। यत्र त्वन्यविषययैव शक्त्याऽकल्पितया तयाऽन्यत्रापि तौ सिध्यतस्तत्रानुपलब्ध्या शक्त्यभावः प्रतीयते। यथाऽऽकृतिशब्दानां व्यक्तौ सिंहादिशब्दानां च माणव-

१३ पुरुष] पुरुषधर्म इति—कृत्वेति शेषः। अत्र—श्रौते निषेध इत्यर्थः। एषोऽर्थः—वक्ष्यमाण इत्यर्थः।

२० योर्विशेष] विशेषः—प्रयोजनविशेष इत्यर्थः।

कादौ तदिह पचत्यादिशब्दोच्चारणादियन्तोऽर्था गम्यन्ते, भावनाधात्वर्थकर्तृतत्संख्यापुरुषोपग्रहकालविशेषाः। तेषां तु कः शाब्दः कोऽर्थादिति विभागो न ज्ञायते। लक्षणं चैतावद्योऽर्थान्न गम्यते स शब्दार्थ इति। भावनायास्तावन्न शब्दव्यतिरिक्तं प्रत्यायकं पश्यामः। तत्र कालादीनां व्यभिचारि त्वात्। संभवन्ति हि विनाऽपि भावनया कालसंख्यादयः। कर्तृधात्वर्थाभ्यामव्यभिचाराद्गम्यत इति चेन्न। कृदन्तवदप्राधान्यप्रतीतिप्रसङ्गात्। यदि कर्त्रा धात्वर्थेन च भावना गम्येत ततः पाचकादिशब्देष्विव तिरोहितस्वरूपा गम्येत। प्राधान्यप्रत्ययात्तु शब्दार्थत्वाध्यवसानम्। न च तया कालादयः प्रतिपद्यन्ते। कालान्तरसंख्यान्तरधात्वर्थान्तरपुरुषोपग्रहान्तरेष्वपि दृष्टत्वात्। एवं कालसंख्यादीनां
914 परस्परव्यभिचारादेवागमकत्वं वाच्यम्। यादृशश्च गुणभूतः कर्ताऽत्रावगम्यते न तादृशेन विना भावनो पपद्यत इत्यर्थापत्त्याऽनुमानेन वा शक्ता गमयितुम्। कारकान्तरेऽपि संबन्धेन व्यभिचारादशक्तेति चेत्। न। अन्यसंबन्धमात्रात्मकव्यभिचारानभ्युपगमात्। द्विधा ह्येकः संबन्ध्यनेकेन संबध्यते। कश्चित्संबन्ध्यन्तरं परित्यजन्, कश्चित्पूर्वापरित्यागेन। तत्र यः परित्यज्यान्यत्रान्यत्र वर्तते स व्यभिचारादगमको भवति। यथोर्ध्वत्वं स्थाणुपुरुषयोः। न च तत्रान्यसंबन्धः कारणं व्यभिचारस्य। किं तर्हि। तेन विनाऽपि प्रवृत्तिः। यस्त्वन्यत्रापि वर्तमान पूर्वावगतसंबन्ध्यपरित्यागेनैव वर्तते यथा शिंशपात्वं वृक्षत्वपार्थिवत्वद्रव्यत्वसत्त्वेषु। न तस्यानैकान्तिकत्वं, सर्वेषु प्रत्यायनशक्त्यविधातात्। भावना च कारकेषु वर्तमाना न विकल्परूपेण वर्तते। किं तर्हि। सर्वेषु युगपत्। न चेदृशं व्यभिचारित्वमुच्यते। अन्यत्रापि वृत्तौ पूर्वापरित्यागात्। अतः सर्वकारकाण्यसंशयं गम्यन्ते। यत्रापि नामाकर्मकत्वात्संप्रदानापादानयोस्तु बाह्यतरत्वादप्रतीत्या व्यभिचार आशङ्क्यते, तत्रापि तेषामेव न तु कर्तुः कदाचित्। न हि क्वचित्कर्तृरहिता काचित्क्रिया विद्यते। तन्मूलत्वात्क्रियाप्रवृत्तेः। तदव्यभिचारेण वेह सुतरां प्रयोजनम्। यावदितराणि व्यभिचरन्ति तावत्केवलकर्तृप्रत्यायनसामर्थ्यमस्याः स्फुटतरं व्यज्यते। समर्थनीयं एवं चेषोऽर्थः संख्यासंबन्धे कर्तुरसाधारणतासिद्ध्यर्थम्। आसितिष्ठत्यादिषु करणानपेक्षणाच्चलनपतनादिषु चाऽऽधारानाश्रयणादकर्मकेषु कर्माभावात्, आसनस्थानवचनादिषु संप्रदानापादानाभावात्कर्त्रैव सर्वभावनास्वेकान्तसंनिहित इत्यसाधारणत्वेन तिङ्वाच्यया संख्यया संभन्त्स्यते। कर्तृविशिष्टा चेह संख्या गम्यते न कारकान्तरगतेति सर्वेषां प्रत्यक्षम्। तत्र यदि कश्चिद्वदेत्समाने सर्वकारकाणां गम्यमानत्वे कस्मात्कर्त्रैव संख्यासंबन्धो न करणादिभिरपीति। स वक्तव्यो यथैव भवत इति। स चेद् ब्रूयान्मम कर्ता

२ त्संख्यापु] पुरुषः—प्रथममध्यमोत्तमपुरुषसंज्ञकाख्यातवाच्योऽर्थः।
२ ग्र] उपग्रहः-क्रियाफलस्याऽऽत्मपरगामित्वविभागाख्यः। परस्मैपदात्मनेपदरूप इति यावत्।
२६ चे] एषोऽर्थः—भावानायाःकारकान्तरव्यभिचाररूपोऽर्थः।
२६ संख्या] संख्यासंबन्ध इति—घटनीये इति शेषः।

संख्या चैकेन शब्देनोपात्तौ परस्परं नियम्येते इति तेनानभिधेयेभ्यो बाह्येभ्यो निवृत्ता संख्या कर्तर्येव वर्तिष्यत इति। तत्रैवं प्रत्यवस्थेयम्। अथ समाने कारकत्वे किं कारणं भवतः कर्तैवाभिधीयते न कारकान्तराणीति। तत्रावश्यं फलावगम्या शब्दशक्तिरेव शरणं प्रतिपत्तव्या यतस्तद्विषया बुद्धिरुत्पद्यत इति। सा चास्मत्पक्षेऽप्यविशिष्टा। § 6329

यतः कर्तृगतां संख्यां प्रतीमः केवलामतः।
तस्मादेतावती शक्तिस्तिङां कार्यात्प्रतीयते॥ § 6331

समाने भावनया कारकोपस्थाने कः शक्तिनियमे हेतुरिति चेत्। उक्तं 915 यस्तव समाने कारकत्वे कर्त्रभिधाने शक्तिनियमहेतुरिति। न च शक्तयः पर्यनुयुज्यन्ते यथाकार्यं व्यवस्थयाऽनुगन्तव्या इत्युक्तम्। अपि च। भवता कर्त्रभिधाने शक्तिं कल्पयित्वा भूयस्तद्गतसंख्याभिधाने शक्तिः कल्पयितव्या। नन्वेकप्रत्ययोपादानादेव तत्सिद्धेर्न कल्पनान्तरमाश्रयिष्यते। कुतः स्वल्वनेकशक्तिकल्पनया विना नियमः सिध्यति। अवश्यं ह्येतदपि कल्पनीयं यत्समाने संख्याभाक्त्वेऽभिहितस्यैव संख्यामाह नानभिहितस्य। शक्त्या हि विनैतदेव विपरीतमप्युच्येत यतश्चाभिधीयते कर्ता तत एवास्य न वक्तव्या संख्या वरमनभिहितानामेतावता संविभागः कृत इति। न चाभिहितत्वं केवलं व्यवस्थाकारणं भवति। तेनैव प्रत्ययेनाभिहितानामपि भावनाकालोपग्रहपुरुषविशेषाणां संख्यासंबन्धाभावात्। प्राधान्यप्रतीता भावनैव सुतरां संबध्येत। यदि त्वयोग्यत्वात्तदसंबन्धोऽभिधीयते तद्गम्यमानेषु कारकान्तरेष्वप्यविशिष्टम्। अथोच्येत। अस्ति तेषां संख्यासंबन्धयोग्यत्वं येन शब्दान्तराभिहितया संबध्यत इति, तद्भावनादिष्वपि भावनादिशब्दाविहितेषु समानम्। अथेह तेषामसत्त्वभूतत्वादयोग्यत्वमिति। तदयुक्तम्। असत्त्वभावस्यैव पर्यनुयुक्तत्वात्। न हि संख्यादिसंबन्धायोग्यत्वादन्यदसत्त्वभूतत्वम्। तत्रैतदेवाभ्युपगन्तव्यम्। तादृशेन शब्देनाभिहिता संख्या भावनादयो वा न परस्परं संबन्धुं शक्नुवन्तीति। तच्च तुल्यम्। एतदभिहितायाः कारकान्तरसंबन्धायोग्यत्वात्। कथमयोग्यत्वमिति चेत्। शब्दशक्तिवशेन भावादिष्विवेत्युक्तम्। ननु चाऽऽख्याताभिहितसंख्यायोग्यत्वं कर्मणो दृष्टमिति तस्य संबन्धः प्राप्नोति। यथा पच्यत ओदन इति। नैतदस्ति। कुतः। § 6332

यथैव क्वचिदुक्ताऽपि कर्मान्यत्र न वक्ष्यति।
तथैवैतस्य संख्याऽपि शब्दशक्तेर्व्यवस्थिता॥ § 6334

यो हि मन्यते कर्मणः क्वचित्तिङभिहितसंख्यार्हत्वं दृष्टमतोऽन्यत्रापि तेन भवितव्यमिति, तस्य क्वचित्तिङन्ताभिधेयत्वदर्शनात्सर्वत्राभिधेयत्वमपि स्यात्। अथ तत्कथं चिद्व्यवतिष्ठते ततः संख्याऽपि तथैव व्यवस्थास्यत इत्यचोद्य-

१० इत्यु] (अ° २ पा°१ अ° १) इत्यत्र—शक्तयः सर्वभावानां नानुयोज्याः स्वभावतः तेन नाना वदन्त्यर्थान्प्रकृतिप्रत्ययादयः॥ इत्यादिनेत्यर्थः

मेतत्। तत्रैतत्स्यात्। कर्तृविशिष्टा संख्याऽभिधीयमाना न शक्या कर्तारमनभिधाय वक्तुमिति। उच्यते। § 6335

विशिष्टग्रहणं नेष्टमगृहीतविशेषणम्।
अभिधानभिधाने तु न केन चिदिहाऽऽश्रिते॥§ 6337

916 अगृहीतविशेषणे तदनुरक्ता विशेष्यबुद्धिर्नोपजायत इति तद्ग्रहणमाद-
र्तव्यम्। न त्वनभिहितविशेषणत्वेन किंचिद्दुष्यति। यदि नामानभिहितमपि
विशेषणं केनचिदन्येन प्रत्याय्यमानं विशिष्टप्रत्ययोत्पादनाय पर्याप्तं भवति
किं तत्राभिधानानुरोधेन। अस्ति चेह भावनयैव प्रत्यायितस्य कर्तुर्विशेष-
णत्वशक्तिरिति नाभिधानमपेक्षते। सर्वत्र विशिष्टप्रत्ययेषु चैतदवस्थितम्। न
चेदन्येन शिष्टा इति। तत्र विशिष्टप्रत्यये जाते विशेषणविशेष्ययोः किं श-
ब्देनोपात्तं किमन्येनेति परीक्षायां यत्र यत्र विशेष्यमन्यतः सिध्यति तत्र
विशेषणे शब्दव्यापारो यत्र विशेषणमन्यतो लभ्यचे तत्र विशेष्ये। सर्वत्र
च विशिष्टप्रत्ययादेवार्थापत्त्यैकस्य द्वयोर्वाऽवयवयोर्विशेषणविशोष्ययोर्व्यापारः
शब्दे कल्प्यते। सा चान्यथानुपपत्तिरूपत्वादनन्यलभ्ये विषये भवति। तदिह
विशेषणभूतं विशेष्यभूतं वैकत्वं तावन्नान्यतो लभ्यते येनानभिधेयं कल्प्येत।
यदि हि कर्ता तत्प्रतिपादयितुं शक्नुयात्तत आकृतिन्यायेन स एवाभिधेयः।
इतरत्तु व्यक्तिवद्गम्यमानमित्याश्रीयते। तस्य तु व्यभिचारेणाशक्तत्वादेकत्व-
मप्यभिधेयमेवाऽऽश्रयणीयम्। ततश्च तव संचरितायामभिधानशक्तौ गम्य-
मानलक्षणापन्नः कर्ता सत्यपि विशेषणत्वे नाभिधेयः संपद्यते। यदा त्वेक-
त्वमेव विशेषणं तदाऽप्यवश्यं तदेव प्रथमतरमभिधातव्यम्। तच्चेदभिहितं
क्षीणशक्तिः शब्दः कर्तारमन्यतः सिध्यन्तमपेक्षते। सिध्यति चासौ भावनात
इति नाभिधानशक्तिकल्पनाहेतुर्भवति। यत्त्वन्यान्यपि कारकाणि प्रतीयन्ते,
न तैः प्रतीतैरप्रतीतैर्वा कश्चिदुपकारोऽनुपकारो वा भवति। सर्वथा तावद्यः
प्रार्थितः कर्ता स प्रतीतः। यदि त्वन्यदपि प्रतीयते किं नो बाध्यते। तेन
ह्यप्रतीतेन वयं बाध्येमहि, नाभ्यधिकप्रत्ययेन। प्रतीतान्यपि तु करणादीनि
शब्दशक्तिवशात्कर्त्रभिलाषिण्या संख्यया न ग्रहीष्यन्ते। न हि तया यद्य-
त्प्रतीतं तत्तद् ग्रहीतव्यम्। सर्वत्र हि प्रतीत्यपेक्षायोग्यत्वादि ग्रहणे कारणं
भवति। तदत्रोभयसिद्धेन संख्यायाः कर्तृगामित्वेन कारकान्तराण्यनपोक्षित-
त्वादयोग्यत्वाच्च संनिहितान्यपि न संबन्धित्वं प्रतिपद्यन्ते। न च तेषामपि
तिङभिहितसंख्याभिलाषो विद्यते। सर्वत्र सुबभिहितसंख्यापरिच्छेद्यत्वात्।
न चैषा संख्या सामान्यरूपेण प्रतीता सती संबध्यन्तरम्पेक्षते। कथितो
917 हि पदवाक्ययोर्विशेषः पौर्वापर्यनियमात्। तद्यावदेवेह धात्वर्थः प्रतीतस्ताव-

---

३१ थि] कथितो हीति—दृष्टा यथा हि
साकाङ्क्षाः पदार्थाः केवलाः क्वचित्।
स्वातन्त्र्येण गृहीतश्च विशिष्टार्थावबोधकाः।
प्रकृतिप्रत्ययौ नैवं कदाचिदपि लक्षितौ।
प्रकृत्यर्थानुरक्तो हि प्रत्ययार्थः सदेष्यते॥
(अ° १ पा° १ अ° ७ सू° २५)
अत्रत्यश्लोकवार्तिकस्थाभ्यां ३५६—३५७
श्लोकाः भ्यामिति शेषपूरणम्।

देव काऽपि भावना कर्ता च कश्चिद्भविष्यतीत्यवधार्यते। ततश्च पूर्वतरप्रतीते कर्तरि संख्या केवलैवाभिधीयमाना विशेषणत्वं विशेष्यत्वं वा प्रतीपत्स्यते। § 6338

यद्वा भावनया कर्ता प्रथमं प्रतिपद्यते।
न संख्यासंगतेश्चास्ति तदतिक्रमकारणम्॥§ 6340

सत्यपि कारकसंबन्धाविशेषे भावना पूर्वं तावत्कर्तारमपेक्षते गृह्णाति च। तदधीनत्वाधितरकारकसमवधानस्य। कर्तृव्यापारसामान्यरूपैव चासौ तमेव विशिषतः पर्युपस्थापयति। कारकान्तराणि तु धात्वर्थसंबन्धित्वात्सर्वजघन्येतिकर्तव्यतात्मकव्यापारनिबन्धनत्वाद्वा बहिरङ्गतराणि भवन्ति। न च किंचित्कारणमस्ति, येन प्राथम्यप्राधान्योपस्थितकर्त्रतिक्रमेण कारकान्तराणि संख्या गच्छेत्। अपि च। यस्य कारकस्यावान्तरव्यापारं धातुः प्राधान्येनाऽऽह—स कर्तेति। व्याकरणेऽपि कारकान्तराणि कर्तारमेवाऽऽविर्भूतरूपं ज्ञापयन्ति। तेन स एव संख्यया संबध्यते। अभिहितवच्च विशेषरूपेण प्रतीयते। कारकान्तरेषु तादृगर्थाभावादनादरेण सदपि गम्यमानत्वमसगिव प्रतिभाति। परमार्थनिरीक्षणवेलायां त्वविनाभावात्तान्यपि भावनया तुल्यवदुपस्थाप्यन्त इति नात्यन्तमनादृतानि। नन्वेवं सति 'ओदनः पच्यतां त्वया' इत्यादिषु कर्मसंख्याभिधानं न प्राप्नोति ति। कुतः। § 6341

प्राधान्येनात्र नोपात्ता धातुना ह्योदनक्रिया।
मा भूतस्यैव कर्तृत्वमभिधेयं न भावना॥§ 6343

मात्रौदनव्यापारो धातुना प्राधान्येनोपादीयते यतः कर्मणो विशेषप्रतीतस्य संख्योच्येत। मा भूत्तस्यैव कर्तृलक्षणापन्नत्वात्कर्मत्वमुत्सृज्य कर्तृत्वम्। अकर्तृत्वादेव च न तद्व्यापारो भावना। तेन तथाऽपि न विशेषरूपेण कर्मणः पर्युपस्थानम्। अवश्यं च पुरुषव्यापार एव प्राधान्येन वक्तव्यः। अन्यथा हि परव्यापारेऽस्य नियोग एव न भवेत्। आख्यातपदेन चाकल्पितं कर्तृत्वं पदान्तरोपात्तस्यापि नाऽऽविर्भवेत्। ततश्च त्वयेत्यपि तृतीया न स्यात्। तद्व्यापारेण वाऽनभिभूतव्यापारं कर्म तेनानाप्यमानत्वात्कर्मत्वं हित्वाऽऽविर्भूतव्यापारतया कर्तृत्वेन प्रतिपद्येतेति स्वसंबन्धत्यागेन कर्तृसंख्ययैव संबध्येत। तेन पचतिशब्दवदेव पच्यत इत्येवमाद्यभिहिताऽपि संख्याऽनभिभूतत्वात्कर्तुरिव प्राप्नोति न कर्मण इति। उच्यते। § 6344

यस्यापि कारकं वाच्यं तस्याप्येतत्प्रसज्यते।

---

१६ न] एवं सति—पूर्वतरप्रतीतिप्राधान्याभ्यां कर्तुस्तिङुपात्तसंख्यान्वयेऽङ्गीक्रियमाणा इत्यर्थः।

918 न चोभयाश्रय दोषमेकश्चोद्यो विचारयन्॥§ 6346
सर्वथा। § 6347

यल्लक्षणो हि भवतः कर्ता सन्नभिधीयते।
कर्म वा तादृशस्यैव यत्र संख्याऽभिधीयते॥§ 6349

तद्यदि मम कर्मोत्पन्नलकारेष्वपि कर्तुरेव संख्या प्राप्नोति तवापि तर्हि तत्र कर्त्रभिधानेन भवितव्यम। अथ तत्र तव कथंचित्कर्तुरनभिधानं तद्वन्ममापि तत्संख्यानभिधानमित्यदोषः। तदेतदव श्यमावाभ्यामेवं परिहर्तव्यम्। सवत्रैव तावदीप्सिततमन्वाद्वस्तुलक्षणं कारकान्तरेभ्यः कर्मण प्राधान्यं भाव्यांशेन च तद्व्यापारस्य भावनान्तर्ग तत्वम्। तत्र यदा तत्प्राधान्यमाख्यातेनैव दर्शयामीति विवक्ष्यते तदा सत्यपि कर्तुः शब्दार्थरूपेण लिङ्गातुभ्यामभिधीयमानप्रधानभूतसामान्यविशेषरूपव्यापारत्वे तावता च कर्तृत्वलाभेऽपरस्य वस्तुलक्षणस्य प्राधान्यस्य विवक्षितत्वात्कर्मणि तत्संख्यायां वा लकारोत्पत्तिः। यदा तु खलु तद्विद्यमानमप्यविवक्षितत्वाद्धातुविशेषवशेन वा नैव तदस्तीत्यवगम्यते शब्दार्थरूपप्राधान्यमात्रे विवक्षा भवति, तदा सुपा कर्मप्राधान्याभिव्यक्तिमङ्गीकृत्य कर्तारि तत्संख्यायां वा लकार उत्पद्यते। करणादीनां तु न वस्तुलक्षणा नापि शब्दलक्षणा प्राधान्यविवक्षाऽस्तीति नित्यमेव बाह्यशब्दोपादेयत्वम्। केचित्पुनराहुः। यदेवंविधं शब्दसामार्थ्यमवगम्यते यथाऽयं कर्तुरेव संख्यां शक्नोति वक्तुमयं कर्मण एवेति तदाऽन्तरेणापि भावनोपस्थापनं सैव संख्याऽनन्यविषयत्वेनाभिहितत्वात्कर्तारमुपादास्यते। तद्यथा शोणशब्दोऽन्येनानुपात्तेऽप्यश्वे तद्गतं गुणं वदन्नात्मनैवाश्वत्वमपि गमयति। तथा च सत्यनेनैव न्यायेन सर्वे गवादयोऽप्यनभिधेयाः प्राप्नुवन्ति। कथम्। § 6350

कश्चित्तद्गत एवेह लिङ्गसंख्यादिरुच्यताम्।
स एवाभिहितः पश्चाद्गवादीञ्ज्ञापयिष्यति॥§ 6352

एतावती चेच्छब्दशक्तिः कल्पिता तद्गतमेवैषा गुणं ब्रवीति। किं ततः परं शक्त्यन्तरकल्पनया। पूर्वयैव व्यवहारोपपत्तेः। अयं त्वेवमादिष्वेकशब्दोपात्तत्वेन संबन्धनियमो न शब्दशक्तिवशेन। ततः कर्तृसंख्यादिष्वपि तदेवाभ्युपगन्तव्यमित्यनभिधेयत्वहानिः। तत्रापरे मन्यन्ते। § 6353

919 शोणेऽपि नैव वाजित्वमनुक्त्वा तद्गतेऽभिधा।
दृष्टा हि न क्वचिद्बुद्धिरगृहीतविशेषणा॥§ 6355

१ विचा] विचारयन्निति—अनेन च द्वयश्रितमपि दोषमेको भ्रामयितुं पर्यनुयुज्येत। मीमांसकस्तु पुनर्विचारकुशलत्वादभ्रामयितुमशक्य इति सूचितं विज्ञेयम्।

२७ त] तदेवेति—यदेव गवादिशब्दे सुपा केवलसंख्याभिधानमभ्युपगतं तदेवेत्यर्थः।

कथं ह्यश्वत्वेऽनुच्यमाने तदवच्छिन्नरक्तत्वप्रत्ययो जायेत। रक्तत्वाविशिष्टो ह्यसौ गुणो गमयिष्यतीति चेन्न। गवादिषु व्यभिचारात्। ऐकान्तिकं हि गमकं भवति। न च रक्तत्वमश्वत्वाव्यभिचारि। द्रव्यमात्रं त्वैकान्तिकत्वाद्गमयेन्न तद्विशेषम्। तस्मादुभयोरप्यश्वत्वरक्तत्वयोरन्योन्यव्यभिचारित्वेनागमकत्वाद्वस्त्वन्तरोपस्थापितान्यतरग्रहणासंभवाच्च शोणशब्दाभिधेयत्वमभ्युपगन्तव्यम्। न हि तत्र वस्त्वन्तरसाधारण्येनाश्वत्वमेवैकान्तिकं केनचिद्गमितम्। कर्तुः पुनरैकान्तिकं भावनयोपादानं विशेषरूपेण चेत्युक्तम्। अथवाऽस्तु शोणशब्देनाश्वत्वैकार्थसमवायिगुणमात्राभिधानम्। कथमनवगतविशेषणा विशेष्ये बुद्धिरिति चेत्। उच्यते। § 6356

अश्वत्वं नैव शोणस्य विशेषणतयेष्यते।
गुणजात्यन्तरं त्वेतद्दैवात्तत्संगतिं गतम्॥ § 6358

यदि हि रक्तत्वमात्रमयं ब्रूयात्ततोऽश्वत्वेन विशेषणमाकाङ्क्षेच्छक्त्यन्तरं वा, येन तदेकार्थसमवाय्येव रक्तत्वं वदेत्। एष तु यथैव सत्तागुणत्वयोरवाचकस्तथा रक्तत्वमतिक्रम्य शोणत्वं नाम रक्तावान्तरजातिं वदति। सा चाश्वेष्वेव विद्यते न गवादिष्वित्यश्वत्वं प्रतीयते न रक्तत्वादिवत्संशयो भवति। कीदृशं पुनस्तद्गवादिरक्तत्वातिरेकेण शोणत्वं यदश्वेषु समवेतमन्यत्र चासमवेतमिति। उच्यते। § 6359

सर्वपुंसां स्वसंवेद्यं प्रतिजाति गुणान्तरम्।
क्वचित्तस्य विशेषेण क्वचित्सामान्यतोऽभिधा।§ 6361

सर्वजातिषु तावत्स्वव्यक्तिमात्रानुसारिणः कृष्णशुक्लरक्तत्वादयो विलक्षणः प्रत्यक्षमुपलभ्यन्ते। तत्र क्वचित्सतो विशेषस्य वाचकः शब्दो नास्तीति प्रमाणान्तरगम्यविशेषमङ्गीकृत्य सामान्यमात्रेणाभिधेयत्वम्। क्वचित्पुनः शोणादिविशेषशब्दासद्भावाद्विशेषरूपेणाभिधानम्। तथा क्वचिदपभ्रंशेन कश्चिद्विशेषः प्रतिदेशमभिधीयते। यथा रौहिणिका गौरिति। न कदाचिदश्वायां शाट्यां वा रक्तगुणायामेवमभिधानं भवति। तस्माज्जात्यन्तराण्येव शोणत्व- 920
कर्कत्वगौरत्वादीन्यश्वमनुष्यादिसबन्धीन्यभिधीयमानानि तेष्वपि प्रत्ययमादधति यथा गोत्वं सास्नादिमत्स्विति न वाच्यत्वमाशङ्क्यम्। एतेनैव कुमारकरभक-

२ म] गमयिष्यतीति—गुणिनमश्वमिति शेषः।

८ मात्रा] अभिधानामिति—तथाऽपि संख्यायाः कर्त्रैकान्तिकत्वाभावेन न शोणदृष्टान्तेन कर्तृगमकता युक्तेति शेषपूरणं ज्ञेयम्।

२६ क] अश्वत्वैकार्थसमवायिशुक्लावान्तरजातिः कर्कत्वम्।

२६ गौर] मनुष्यत्वैकार्थसमवायिशुक्लावान्तरजातिर्गौरत्वम्।

२७ कुमा] मनुष्यत्वैकार्थसमवायिनी बाल्यावान्तरजातिः कुमारत्वम्। उष्ट्रत्वैकार्थसमवायिनी च सा करभत्वम्। हस्तित्वैकार्थसमवायिनी च सा कलभत्वम्। अश्वत्वैकार्थसमवायिनी च किशोरत्वम्। गोत्वैकार्थसमवायिनी च वत्सत्वम्। महिषत्वैकार्थसमवायिनी च बाल्याबान्तरजातिर्बर्करत्वम्।

लभकिशोरवत्सबर्करादयो विशिष्टजातिसंबद्धवयोविशेषवचनत्वेन मनुष्योष्ट्र-हम्त्यश्वादीनां ग्रहणे सत्यप्यवाचका इति व्याख्यातम्। तथा हि। § 6362

बालत्वादौ समानेऽपि तद्गतैश्चेष्टितादिभिः।
वयोभेदाः प्रसिध्यन्ति प्रतिजाति व्यवस्थिताः॥ § 6364

अथ यदुक्तं गवादिष्वपि तद्गतसंख्यादिमात्राभिधानादेव जातिविशेष-सिद्धेरनभिधेयत्वं प्रसज्यत इति। तत्र ब्रूमः। § 6365

न शोणत्वादिवन्संख्या जातिभेदेऽपि भिद्यते।
उभयोरभिधेयत्वं नात्र शब्देन तावता॥ § 6367

यदि हि शोणत्वादिवद्गवाश्वगतानामेकत्वादीनामपि प्रत्यक्षेण वि-शेषो लक्ष्येत तत एवं कल्प्येत। यदि च यथा शोणप्रातिपदिकम-विभक्तावयवं गुणाश्वत्वयोर्वाचकमापद्य मानमनेकशक्तिकल्पनाभयादन्यतर-वाचित्वेनाध्यवसीयमानमश्वत्वस्य व्यभिचारित्वेनागमकत्वादव्यभिचारिगुणवच-नत्वेनावधारितमेवं गोत्वसंख्ययोरपि समानशब्दाभिधानभाजोरन्यतरस्याव्य-भिचारितया वाचकत्वमवधार्येत। न तु तदस्ति। संख्यायास्तावत्सर्वत्र प-रिच्छेदात्मकत्वान्न कश्चिद्भेदो दृश्यते। न च तावानेव शब्द उभयोर्वाचक-त्वेन संभाव्यते। अन्वयव्यतिरेकाभ्यां प्रातिपदिकेन जात्यभिधानाद्विभक्त्या च संख्याभिधानात्। न चानेकशब्दस्यानेकार्थकल्पनादोषः। यदि तत्रानेकस्य शब्दस्य शक्त्यनेकत्वं न कल्प्येत ततोऽन्यतरस्यानर्थकत्वमेव भवेत्। न च संख्यासंख्येययोरव्यभिचारित्वं, येनान्यतरदुच्यमानमितरस्य गमकं स्यात्। तथा हि। § 6368

परिच्छेदो गवादीनां न कयाचिन्न संख्यया।
न क्वचिच्च न संख्येये संख्या सैव प्रवर्तते॥ § 6370

ननु च लिङ्गं प्रातिपदिकेनैवोच्यमानं प्रतिजातं विलक्षणमव्यभिचारिरूपेण प्रवर्तमानं शोणत्वादितुल्यं स्यात्। नैतदेवम्। § 6371

अचेतनेषु यत्तावद्गम्यते न विलक्षणम्।
तेन वृक्षादिजातीनां वाच्यत्वं न निषेधति॥ § 6373

921 तथा यत्रापि टाबादिसंबन्धात्स्त्री प्रतीयते।
तत्रापि प्राक् ततो जातेर्वाच्यत्वमवधार्यते।§ 6375

यद्यपि टाबादयः स्त्रीलिङ्गस्य द्योतकत्वान्न भेदेन वाचका भवन्ति। पूर्व-स्यैव च शक्त्यन्तरमाविर्भावयन्ति तथाऽपि प्राक् टाबादिभ्यो यच्छब्दरूपं तस्याप्रतीतावस्थे लिङ्गे जातिं प्रति शक्तिः कल्पिता न पश्चादपनेतुं श-क्या। तथा यत्र विभक्तिसंबन्धात् पुंस्त्वं नपुंसकत्वं चाभिव्यज्यते तत्राप्येव-मेव जात्यभिधानं योज्यम्। यत्र तु प्रागेव विभक्तेस्तन्निवृत्तौ वा सत्यां

शुद्धादेव प्रातिपदिकादन्यतरलिङ्गप्रत्ययो भवति यथा हस्ती ना देवदत्तः श्रीः सरित् तोयं वारीति, तत्र तथात्वाभ्युपगमेऽपि न किंचिद्विरुद्धम्। अथवा विनाऽपि शब्दविभागेनार्थप्रतीतावुत्पाद्यमानायां सर्वस्वसंवेद्येन विभागेन प्रथमतरं जातिं प्रतिपद्यते। किंच। § 6376

व्यक्तिधर्मश्च पुंस्त्वादिः प्राक्तो न प्रतीयते।
न च जातावबुद्धायां व्यक्तिः कैश्चित्प्रतीयते॥§ 6378

तेन कामं लिङ्गमेव जातिगम्यं भवेन्न जातिर्लिङ्गगम्या। नित्यं चोपसर्जनीभूतमैवेतद्गम्यमानं नार्हति प्राधान्येन प्रतीयमानाया जातेरभिधेयत्वं वारयितुम्। न च गोपश्वादिशब्देष्वन्यतरलिङ्गाभिव्यक्तिर्जातिवदस्ति। तस्माज्जातिस्तावदभिधेया। सा यत्र लिङ्गं न व्यभिचरिष्यति तत्र गमिष्यत्यपि। यत्रापि व्यभिचारे सत्यन्यतः प्रतीयते तत्र तदेव गमकं तदनुगृहीता वा जातिः प्रातिपदिकं वेति यथेष्टं कल्प्यते। तस्मान्न शोणादितुल्यता। पचत्यादिशब्देष्वपि यदि संख्या सर्वकारकान्तरव्यावृत्तरूपा कर्तृमात्रानुसारिणी शोणत्ववदुपलभ्येत ततस्तया नाम कर्ता गम्यतां, तावताऽप्यनभिधेयो भवत्येव। यदा तु पूर्वोक्तेन न्यायेन संख्याभेदो न लभ्यते, प्रतिवस्तु चानन्तान्येकत्वादिजात्यन्तराणि न शक्यन्ते कल्पयितुं तदा भावनाधात्वर्थाभ्यामेवोपादानमादर्तव्यम्। किंच। § 6379

शोणादीनां न चान्येन जातिर्बुद्धौ निधीयते।
क्लेशस्तेनाऽऽश्रितस्तत्र न त्वत्राप्येवमिष्यते॥§ 6381

यदि शोणस्यापि कश्चिदन्योऽश्वमुपनयेन्नैवासौ स्वयं क्लिश्येत्। संख्यायाश्च भावनाधात्वर्थावुपनेताराविति न स्वयमायस्यति। भावनोपस्थाने चोक्तो विशेषः। तस्मादनभिधेयस्यैव कर्तुर्विशेष्यत्वविशेषणत्वोपपत्तेरप्रमाणमभिधानशक्तिकल्पनमित्यवगच्छामः। एवं न्यायेनावधारिते कश्चिदागमविरोधं दर्श- 922
यन्नाह—**प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इत्याचार्योपदेशात्कर्ता शब्दार्थः कर्म चेत्यवगम्यत इति**। § 6382

लः कर्मणीति सूत्रेण चशब्दात्कर्त्तरीति च।
आदेशस्थानिवत्त्वाच्च लिङर्थौ कर्तृकर्मणी॥§ 6384

ननु सूत्रार्थेनैवाऽऽगमविरोधे दर्शिते प्रकृतिप्रत्ययौ प्रत्ययार्थमित्येतसंबद्धम्। कथमसंबद्धम्। यदा पूर्वेण न्यायेन कर्तुः प्राधान्यमपि पूर्वपक्षवादिना दर्शयितव्यं तदेतदभिधानं प्राधान्यं चोभयमपि स्मृतिसिद्धं दर्शयति। यस्मात्प्रकृतिप्रत्ययौ सह ब्रूतः प्रत्ययार्थश्च कर्ता कर्म च स्मर्यते, तस्मात्क्रियाविशिष्टयोस्तयोरभिधानादस्त्येव श्रुतिप्रकरण विरोध इति। तत्र 'लः कर्मणि च'

२६ क] लः कर्मणि च भावे चाकर्मकेभ्य इति। पा॰ सू॰ ( ३—४—६९ )।

इत्यत्र तावदेकान्तेनाभिधेयत्वेन कर्तृकर्मणोरुपादानम्। 'कर्तरि शप्' इत्यत्र पुनरेकमभिधेयत्वदर्शनम्। अन्यत्तु कर्तरीति परसप्तमी। न च शब्दसंनिवेशे कर्ता परत्रावस्थितः संभवत्यतः 'आनर्थक्यात्तदङ्गेषु' इति शब्दे कार्यं विज्ञायते। तत्रैषोऽर्थः—कर्तृवाचिनि सार्वधातुके प्रत्यये परत्रावस्थित इति। सर्वथा तावत्प्रत्ययार्थः कर्तेत्युक्तमाचार्यैः। तस्मादयुक्तमनभिधेयत्वानुमानमिति। तदुच्यते। § 6385

वाच्यवाचकसंबन्धो नाऽऽचार्यैरुपदिश्यते।
अन्यथाऽनुपपत्त्या हि व्यवहारात्स गम्यते॥§ 6387

तत्र नामाऽऽगमविरोधो युक्त उद्भावयितुं यत्र न्यायागमौ समानविषयौ भवतः। इह तु न्यायस्यान्य एव विषयः किं वाच्यं किं गम्यमानमिति। अन्य एव व्याकरणस्मृतेरेकार्थप्रयुक्तानां कः साधुः कोऽपभ्रंश इति। न चान्यविषयेणान्यविषयस्य दुर्बलस्यापि बाधो युक्तः। किमुत वाच्यगम्यमानविषयत्वेन प्रत्यक्षमेव सर्वस्वसंवेद्यस्य। तेन यद्यपि कर्ता शब्दार्थ इत्येवमाचार्या वदेयुस्तथाऽपि स्वविषयादन्यत्र वदन्तो नाऽऽदर्तव्या भवेयुः। ते तु नैव तथा वदन्ति। ननु प्रत्यक्षमेव सूत्रमुदाहृतम्। सत्यं न तु शास्त्रस्वरूपमालोच्य। किं तर्हि। एकदेशालोचनेन। न च तावन्मात्रेण शास्त्रविरोधोद्भावनं शक्यम्। कुतः। § 6388

सर्वाण्येव हि शास्त्राणि स्वप्रदेशान्तरैः सह।
एकवाक्यतया युक्तमुपदेशं प्रतन्वते॥§ 6390

यदि शास्त्रैकदेशालोचनेन तद्विरुद्धत्वमभ्युपगच्छता शास्त्रविरोध उद्भाव्यते ततः 'सुरा न पातव्या' इत्यस्याप्येकदेशेन पानं हि विहितमकुर्वन् शास्त्रविरुद्धं कुर्यात्।
923 तथा भिन्नवाक्येषु 'यावज्जीवमग्नीहोत्रं जुहोति' इत्यादिमात्रापेक्षया दीक्षितोऽप्यजुह्वन् प्रत्यवेयात्। व्याकरणेऽपि 'मिदेर्गुणः' इत्येतावन्मात्रे दृश्यमाने भिन्न इत्यत्र गुणाकरणं शास्त्रविरुद्धं स्यात्। तस्मान्नैकदेशेन विरोध उद्भावनीयः। आह च— § 6391

अन्य एवैकदेशेन शास्त्रस्यार्थः प्रतीयते।
अन्यश्च परिपूर्णेन समस्ताङ्गोपसंहृतौ॥§ 6393

विशेषेण तु व्याकरणे। तत्र ह्येकैकस्मिन्पदे प्रायेणाष्टाध्यायी व्याप्रियते। तेन 'लः कर्मणि च' इत्यस्यैकदेशान्तरपरिपूर्णस्य योऽर्थस्तेन सह

१ क] पा॰ सू॰ ( ३—१— ६८ )।
३ आ] ( अ॰ ३ पा॰ १ अ॰ ९ सू॰ १८ )
२३ इत्यादिमात्रा] मात्रापेक्षयेति—'दीक्षितो न जुहोति न पचति' इत्याद्यपवादैरेकवाक्यत्वसत्त्वेपीत्यर्थः।
२३ मिदे] पा॰ सू॰ ( ७—३—८२ )।
२४ न्मा] एतन्मात्र इति—पा॰ सू॰ ( १—१—५ ) 'क्ङिति च' इति सूत्रान्तरैकवाक्यत्वापर्यालोचन इत्यर्थः।

विरोधः परिहर्तव्यः। इह चैतावता प्रत्ययविधिः परिपूर्यते। *प्रत्ययः। *परश्च। *आद्युदात्तश्च। *अनुदात्तौ सुप्पितौ। *धातोः। *तत्रोपपदं सप्तमीस्थम्। *कृदतिङ्। *वाऽसरूपोऽस्त्रियाम्। *वर्तमाने लट्। *कर्तरि कृत्। *लः कर्मणि च भावे चाकर्मकेभ्यः। *लस्य। तिबादयः। *अनुदात्तङित आत्मनेपदम्। *शेषात्कर्तरि परस्मैपदम्। युष्मदस्मदुपपदादिषु मध्यमादयः। *तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः। *तान्येकवचनद्विवचनबहुवचनान्येकशः। *बहुषु बहुवचनम्। द्व्येकयोर्द्विवचनैकवचने इति। पराणि च संज्ञापरिभाषादिरूपेण लोपागमवर्णविकारादिशास्त्राणि सर्वाण्येकं वाक्यम्। एकवाक्यता च सति विशेषणविशेष्यभावे भवति नान्यथा। सोऽपि च सामानाधिकरण्येन वा भवति समानविभक्त्यन्तानां, वैयधिकरण्येन वा। क्रियाकारकरूपः शेषशेषिरूपश्च। तदिहानौपयिकत्वादवयवान्तराण्युपेक्ष्य ला- 924
देशाः कर्तरि कर्मणि च भवन्ति। **एकस्मिन्नेकवचनम्। द्वयोर्द्विवचनम्। बहुषु बहुवचन**मित्येतेषां विशेषणविशेष्यभावः सामानाधिकरण्यवैयधिकरण्यप्रवृत्तिश्च चिन्त्यते। तत्र तावद्बहुद्व्येकशब्दाः संख्यावचनास्तामनभिधाय संख्येये वृत्त्यसंभवादित्याकृत्यधिकरणे स्थापितम्। पातञ्जलेऽपि च केषु बहुष्विति प्रश्नपूर्वकमुपक्रम्य तत्र दोषानभिधाय संख्यावचनत्वमेवावधारितम्। बहुत्वे द्वित्वैकत्वयोरिति विवरणात्। कथमन्तरेण भावप्रत्ययं भावप्रधानो भवति निर्देश इति पृष्टे भवति यदा प्रथम एव गुणः स्वप्राधान्येन विवक्ष्यत इति व्याकृतम्। तथा हि। § 6394

पूर्वमेव गुणः कश्चित्स्वातन्त्र्येण विधीयते।
कश्चिद द्रव्याङ्गभावेन ततो निष्कृष्य चापरः॥§ 6396

यत्र गुणः प्रथममेव स्वप्रधानो विवक्षितस्तत्रानुत्पाद्यैव भावप्रत्ययं विना च सामानाधिकरण्यं संबद्धो भवति पटस्य शुक्ल इति। यत्र तु द्रव्योपसर्जनत्वेन च न निष्कर्षो विवक्ष्यते तत्र सामानाधिकरण्यं भवति शुक्लः पट इति। यत्र पुनरुपसर्जनत्वेन विवक्षित्वा पश्चान्निष्कर्षविवक्षा भवति तत्र यस्य गुणस्य हि भावात् द्रव्ये शब्दनिवेशस्तदभिधाने ‘त्वतलौ’ इति भावप्रत्ययोत्पत्तिः।

---

१ इह] कियद्भिरेकदेशान्तरैः ‘लः कर्मणि’ इति प्रत्ययविधिः परिपूर्णो भवतीति विशेषापेक्षायामाह—इह चेत्यादिना।
१ *] पा° सू° ( ३—१—१ )।
१ *] ( ३—१—२ )
२ *] ( ३—१—३ )
२ *] ( ३—१—४ )
२ *] ( ३-१-९१ )
२ *] ( ३—१—९२ )
३ *] ( ३—१—९३ )
३ *] ( ३—१—९४ )
३ *] ( ३—२—१२३ )
३ *] ( ३—४—६७ )
४ *] ( ३—४—६९ )
४ *] ( ३—४—७७ )
४ *] ( १—३—१२ )
५ *] ( १—३—७७ )
६ *] ( १—४—१०१ )
६ *] ( १—४—१०२ )
७ *] ( १—४—२१ )
७ योर्द्वि] ( १—४—२२ )
१५ धिक] ( अ° १ पा° ३ अ° ९ )
२६ त] पा° सू° ( ५—१—११९ )।

त्वप्राधान्यविवक्षायां त्वसावनङ्गत्वाद् गुण एव न भवति न तद्द्वारेण द्रव्ये शब्दनिवेशः। तेन नासौ तदा तस्य द्रव्यस्य शब्दप्रयोगं भावयतीति भावप्रत्ययेन नाभिधीयते। पूर्वमेव निष्कृष्टत्वान्निष्कर्षकारिणः प्रत्ययस्य निष्फलत्वं स्यात्। तदा तर्हि नित्यं संख्येये षष्ठ्यैव भवितव्यम्। सत्यमेष उत्सर्गः। कदाचित्तु यथैव गुणवचनः शब्दो गुणोपसर्जनद्रव्यप्रतिपिपादयिषया तच्छब्दसमानाधिकरणो भवत्येवमेव गुण्युपसर्जनगुणविवक्षायां गुणशब्दानुरोधेन सामानाधिकरण्यं भवति। तुल्यो हि हेतुरभेदोपचारलक्षणयोः। तथाऽपि त्वेष प्रयोगो न प्रचुर इति न शीघ्रमितरवत्प्रतिभाति। यदा तु नाम कथंचिदापतति तदैतेन न्यायेनानुसर्तव्य इति कथ्यते। तस्मादस्त्यन्तरेणापि भावप्रत्ययं प्रत्यययोग्यवस्तुप्रधानो निर्देशः। एवं च सति ‘द्व्येकयोः’ इति द्विवचनं समर्थितं भविष्यति। अन्यथा हि। § 6397

द्व्येकसंख्येयसंघाते बहुत्वमुपजायते।
द्व्येकेष्विति भवेत्तत्र यदि संख्येयतन्त्रता॥ § 6399

संख्येयप्रधाने हि निर्देशे द्वौ चैकश्चेति कृते बहुवचनमेव प्राप्नोति। संख्याप्राधान्ये ति द्वित्वैकत्वयोः प्राधान्यादात्मीयसंख्यानिर्देशो भवति द्व्येक-
925 योरिति प्रयोगः। कस्मात्पुनर्विशिष्टमेव भावप्रत्ययेन न निर्दिश्यते। वक्तृविवक्षाया बहुपकारत्वात्। अथवा यदि बहुत्वे बहुवचनमिति क्रियेत ततो यथा वैपुल्यं महत्त्वं वा शब्दस्यार्थः, बहुः समुद्रो बहुरोदन इति। यच्च त्रिप्रभृतीनां द्वित्वातिरेकसामान्यं तयोरुभयोरप्यविशेषेण बहुवचनं प्राप्नोति। तत्र बहुष्वित्युच्यते। कथं नाम भेदनिबन्धनसंख्यावाच्येव बहुवचनं स्यात्। अतश्च बहुरोदन इत्येकवचनं सिद्धम्। यस्तु संख्याप्राधान्यपक्षे तदेके मन्यन्त इत्येकत्वप्राधान्यादेकवचनप्रसङ्गश्चोदितः सोऽन्यत्ववाच्यत्वेन परिहृतः। तस्माद्बहुत्वादिषु बहुवचनादीनीति सिद्धम्। एवं च सति तिङ्विधाने लादेशत्वात्कर्तरि तिबित्येकं वचनम्। एकवचनसंज्ञत्वनाच्चैकत्वे तिबित्यपरम्। तत्र यदि वाऽनयोः परस्परमसंबध्य तिपैव केवलेन संबन्धः स्यात् कर्तरि तिबेकत्वे वेति। अथवैकस्मिन्कर्तरीति प्रतिपन्नविशेषणाविशेष्यत्वयोस्तिब्विषयत्वम्। तत्र न तावदविशेषितयोस्तिपा संबन्धः। कुतः। § 6400

अनेकस्मिन्नपि प्राप्तिः कर्तरि स्यात्तिपस्तथा।
सर्वकारकसंस्थे च सैकत्वे च प्रसज्यते॥ § 6402

यदि हि स्वतन्त्रमेव कर्तर्येकत्वे चान्योन्यनिरपेक्षवाक्यभेदेन तिब्विधानमिष्यते ततः प्रयोगकाले तद्वदेव नैरपेक्ष्यमिति द्विबहुष्वपि कर्तृषु प्राप्नोति। कारकान्तरगतेऽपि वैकत्वे। तस्मादवश्यं प्रथमं विशेषणविशेष्यसंबन्धोऽभ्युप-

---

१७ अ] एवं नु सूत्रकारस्य पाणिनेः शून्यहृदयतापत्तेः स्वमतेन महाभाष्यसूचितमेव प्रयोजनं प्रदर्शयति—अथवेत्यादिना।

२७ त] तत्र न तावदित्यादिना ‘तत्र नैवं भवति’ इत्यादि भाष्यं व्याकृतं विज्ञेयम्।

गन्तव्यः। स चैकविभक्त्यन्तत्वत्सामानाधिकरण्येन। तत्रापि श्रौतत्वाभावादेक-
स्य लक्षणावृत्तिर्विभक्तिविपरिणामेन वा वैयधिकरण्यसंबन्धः। सामानाधिक-
रण्ये तावदवस्थितसंख्याप्राधान्यानुरोधेन कर्तृशब्दो लक्षणामभेदोपचारं वा
भजते नैकशब्दः,। संख्येयप्रधान्यप्रसङ्गात्। ततश्च सामानाधिकरण्यसंबन्ध-
मर्थं मुख्यया वृत्त्या दर्शयितुमुपसर्जने षष्ठी प्रयुक्ता **कर्तुरेकत्व इत्यर्थ इ**ति।
अथवा भिन्नार्थविषये सामानाधिकरण्यं न भवति। न च व्यधिकरणयोरेक-
विभक्त्यन्तयोः षष्ठ्या विनैवंजातीयकः संबन्धोऽवकल्पते। न च संबन्धमन्तरे
णाभिप्रेतोऽर्थः सिध्यति। तदाऽवश्यं कर्तव्येऽन्यतरविभक्तिविपरिणामे तेनैव 926
न्यायेन संख्याप्राधान्यान्नित्यं च विशेषणे षष्ठीप्रयोगादेवं विपरिणामेन कथ्यते
**कर्तुरेकत्व** इति। दूरापगतश्चात्रैकत्वस्य विभक्तिविपरिणामः। अर्थान्तरबुद्धिप्र-
सङ्गात्। यदि चैकत्वस्य कर्तरि कर्मणि चेत्युच्यते ततोऽन्य एवार्थ आपद्येत।
एकत्वं यः करोति यच्च तस्य कर्मेति। तस्मात्**कर्तुरेकत्व** इत्येवमादिना द-
र्शिते कर्तृकर्मविशिष्टा एकत्वादयः प्रत्ययवाच्याः शास्त्रानुगता इत्यविरोधः।
एवं च व्याख्यायमाने यल्लौकिकेन न्यायेन भावनातः प्राप्तत्वात्कारकान-
भिधानमवगतं तदप्यनुगतं सूत्रैर्भविष्यति। सूत्राक्षराणि च 'द्व्येकयोः' इत्येव-
मादीत्येतदपेक्ष्य नियम्यमानानि विशेषणविशेष्यत्वादिन्यायानुगतानि भविष्य-
न्ति। **लौकिकन्यायानुगतश्च सूत्रार्थ** इत्यस्यापरोऽप्यभिप्रायो यथा लोके क-
र्तृकर्मविशिष्टसंख्याप्रतिपत्तिरियमेवं व्याख्यायमानेऽनुगता भवति। अन्यथा
हि स्वातन्त्र्येणेतरनिरपेक्षलक्षणव्याख्याने लोकप्रसिद्धिविपरीतपरस्परासंबद्ध-
संख्याकारकमात्रवाचित्वग्राही सूत्रार्थः स्यात्। न केवलमेतावन्मात्रम्। किं
तर्हि। स्वगोत्रेणापि सूत्राक्षराणि न्यायापेतानि स्युः। विशेषणविशेष्यतया तु
व्याख्याने सर्वं न्याय्यं भविष्यति। तत्रैतत्स्यात्। त्वया मीमांसकेन वचनव्य-
क्तिकुशलेन भूत्वा स्वमनीषिकयैवमुच्यते। न तु व्याकरणसंप्रदाय एवमव-
स्थित इत्यत आह—**आगमोऽपि चायमेव यदा एकत्वादयो विभक्त्यर्थास्त-
दा कर्मादयो विशेषणत्वेनेति**। द्वाभ्यामपि वाक्यकारभाष्यकाराभ्यां बहुव-
चनवार्तिकेऽनभिहितवार्तिके च द्वावपि कर्मत्वाद्येकत्वादिवाच्यत्वपक्षौ दूरम-
नुसृत्यान्ते निर्दोषतयाऽवधारितम्। कर्मादिविशिष्टा एकत्वादयो विभक्त्यर्थाः।
इतरथा येषु केषुचिद्बहुवचनं प्राप्नोति। अनभिहिताधिकारश्च न कर्तव्यः
स्यात्। अन्यत्राप्यभिहितेऽभिधानाभावात्तिङ्कृत्तद्धितसमासाभिहितेषु कर्मादिषु
कः प्रसङ्गो द्वितीयादीनां येनानभिहिताधिकारः क्रियेत। अनभिहितानां तु
कर्मादीनामेकत्वादिषु द्वितीयादय इति नैतदनुक्तं गम्यते। न हि न्यायेन
तेषामभिहितानामनभिहितानां च कश्चिद्विशेषो दृश्यते। तदेतद्वार्तिकोपसंहारे 927
स्पष्टं भाष्यकारेणोक्तम् 'एकत्वादिषु विभक्त्यर्थेषु कर्तव्योऽनभिहिताधिकारः

४ सामाना] सामानाधिकरण्यसंबन्धमर्थ-मिति—सामानाधिकरण्योक्त्या विवक्षितं कर्तृसंबन्धरूपमर्थमित्यर्थः।

२१ स्व] स्वगोत्रेणेति—व्याकरणगोत्रेणानुसृतो योऽयं न्यायो व्याख्याप्रकारस्तेनापि वर्जितानि सूत्राक्षराणि भवन्तीत्यर्थः।

३३ का] पतञ्जलिनेत्यर्थः।

कर्मादिषु त्वनर्थः' इति। **नन्वेतदप्यस्ति। यदा कर्मादयो विभक्त्यर्थास्तदैकत्वादयो विशेषणत्वेने**त्येतत्पूर्वपक्षवचनत्वादनुपन्यसनीयं सदभ्युपेत्यवादेनोपन्यस्तम्। एतदुक्तं भवति। यदाऽपि कर्मादयो विशेष्यभूताः प्राधान्येन विभक्त्यर्थाश्चिन्त्यन्ते तदाऽप्येकत्वादय एव विशेषणत्वेनावस्थिताः सन्तोऽभिधीयन्ते। अनभिहितानां विशेषणत्वानुपपत्तेर्विशेषस्य चान्यत एव सिद्धेः। भवति हीदृश्यामवस्थायामुपसर्जनपरत्वं विधेर्यथा लोहितोष्णीषादिषु। अथवाऽर्थशब्देन प्रयोजनमभिधीयते। यदाऽपि ते प्रयोजनम्—तादर्थ्येन विभक्तिः प्रयुज्यत इत्यर्थः। यद्वोभयोर्वचनयोरुत्सृष्टयोर्यथासंभवं निवेशादेकं तिङ्विषयं यत्पूर्वमुदाहृतम्। अपरं तु सुब्विषयं भविष्यति। तत्र कर्मादीनां विभक्त्यर्थत्वाभ्युपगमात्। ननु च समानत्वाद्बहुवचनादिशास्त्रस्यैकरूप्ये सति यथैव तिङा कर्मादिविशिष्टसंख्याभिधानान्न कारकाभिधानं जातं तथैव सुपामपि प्राप्नोति। ततश्च 'यत्करणाभिधायिन्या विभक्त्या संयुज्य निर्दिशति'। 'तदागमे हि तद्दृश्यते तस्य ज्ञानम्' इत्यादिव्यवहारविरोधः स्यात्। तत्र केचिदाहुः। एकमपि शास्त्रं प्रयोजनवशात्संबन्धिभेदेन भिद्यमानमन्यथा च विशेषणविशेष्यभावप्रतिपत्तेस्तिङ्क्षु विशेष्यत्वेन संख्यां च वक्ष्यति। सुप्सु विशेषणत्वेनेति। अथैतेनापरितोषः, ततोऽन्यथोच्यते। § 6403

शास्त्रे यद्यपि नैतेषामभिधेयत्वमाश्रितम्।
तथाऽप्याश्रितसिद्ध्यर्थमभिधेयत्वमिष्यते॥ § 6405

928 शास्त्रे हि कार्यवशेनानभिधेयस्याप्यभिधेयत्वं पारिभाषिकमाश्रीयते। न च तावता लोके तथैव प्रसज्यते। न च कर्मादयोनभिधेया एवेत्येतच्छास्त्रेऽभिहितम्। किं तर्हि। एकान्ताभिधेयैकत्वादिविशेषणं तावद्भवन्तीत्येतद्व्याख्यातमेव। तस्माद्विशेषणतामेवैते प्रतिपत्स्यन्ते। तद्यत्र न शास्त्रेण न न्यायेनाभिधेयत्वप्राप्तिस्तत्रानभिधेया विज्ञास्यन्ते। यत्र पुनः शास्त्रोक्तां विशेषणतामनभिधीयमानाः प्रतिपत्तुं न शक्ष्यन्ति तत्र न्यायलभ्यामनन्यगतित्वादभिधेयतामपि प्रतिपत्स्यन्ते। अर्थापत्त्या वा शास्त्रेणाप्यभिधेयतयोक्ता भविष्यन्ति। तत्र तिङ्क्षु भावनोपस्थानाद्विशेषणत्वसिद्धेर्नावश्यमभिधेयत्वमङ्गीकर्तव्यम्।

सुप्सु पुनः प्रातिपदिकार्थानामेकत्वादीनां चाकारकेषु कारकान्तरेषु च व्यभिचारादन्यतरप्रतिपादनशक्तौ विहतायामन्यस्य च भावनाधात्वर्थादेर्गमकस्यानभिधानान्न किंचिदुपस्थापकमस्तीति स्वयं कारकमनभिधाय तद्विशिष्टसंख्याभिधानानुपपत्तेः कारकमप्यभिधेयं भवति। ननु च केवलकारकपदप्रयोगाभावादवश्यंभाव्याख्यातपदाभिहितभावनोपनीतानामेव कारकाणां ति-

---

६ ही] ईदृश्यामिति—विशेषणस्यान्यतोऽसिद्धिः, विशेष्यस्य चान्यतः सिद्धिरितीदृश्यामित्यर्थः।
८ योरुत्सृष्ट] उन्सृष्टयोरिति—अनिर्दिष्टविषयविशेषयोरित्यर्थ।
१२ त्क] (अ॰ ३ पा॰ १ अ॰ ६) अत्रत्यं भाष्यम्
१३ दाग] ( अ॰ ४ पा॰ १ अ॰ ५ सू॰ १५ )।

ह्येव संख्यासंबन्धोऽवकल्पिष्यते। कथमवकल्पते। यदा वाक्ये स्वनियतपदक्रमेषु कदाचिदाख्यातशब्दात्प्रथमप्रयुक्तेन सुबन्तेन वृक्षमिति कारकप्रत्ययो जन्यमानो नाभिधानमन्तरेण सिध्यति। ननु तत्रापि क्रियासंबन्धात्प्राक्कारकत्वानुपपत्तेस्तावत्कारकविभक्त्या नोत्पत्तव्यं यावत्क्रियासंबन्धो नोपदर्शितः। ततश्च क्रियापूर्वकत्वं संप्रतिपद्यत इति। सत्यम्। वक्तुरेवं, श्रोता पुनर्थः प्रथममेव वृक्षमिति शृणोति न तेन क्रिया तत्संबन्धो वाऽन्यतः पूर्वमवधारितः। किं तर्हि। शब्दमात्रात्कारकं प्रतिपद्यानुमानेनार्थापत्त्या वा वक्त्रा पूर्वतरसंकल्पितां क्रियां प्रतिपद्यते। अन्यथा हीतरेतराश्रयत्वं स्यात्। कुतः। § 6406

क्रियया कारकं गम्यं कारकेण क्रिया तथा।
एकस्याप्यनपेक्षत्वे न मूलमवधारितम्॥§ 6408

द्वयोः संबन्धिनोरवश्यमेकस्येतरनिरपेक्षं प्रतीतिमूलमभ्युपगन्तव्यम्। तदिह यदि क्रियागम्यं कारकं ततः क्रिया केन प्रत्याय्यत इति वक्तव्यम्। न च तावद्वृक्षप्रातिपदिकं क्रियाया वाचकं, शाखादिमज्जातिमात्रवचनत्वात्। नापि प्रादिपदिकार्थो गमको, विनाऽपि क्रिययोपपत्तेः। अथोच्येत। न जातुचित्कश्चिन्निष्क्रियः संभवत्यतोऽस्तितिष्ठत्यादिका काचिदेकान्तेनाऽऽक्षिप्ता क्रिया भविष्यति। अथवा 'अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति गम्यते' इत्येवं सक्रियत्वात्कारकाक्षेपः सेत्स्यतीति। तदनुपपन्नम्। कुतः। § 6409

तिष्ठत्यादावुपात्तेऽपि क्रियामात्रे ह्यकर्मके। 929
कर्तृमात्रमुपात्तं स्यान्न कर्मादि नियोगतः॥§ 6411

सामान्येन ह्यत्रास्त्यादिक्रिया काचित्प्रातिपदिकार्थेनाऽक्षिप्येत। न चासौ सर्वकारकाक्षेपे समर्थेति कर्मादीनामन्यत्प्रापकं मृग्यम्। न च विभक्तिः क्रियां ब्रवीति यया कर्माऽऽक्षिप्येत। न च संख्या क्रियाकारकविशेषाक्षेपसमर्थेत्युक्तम्। अतो न कारकप्रतीतिं मुक्त्वाऽन्यत्क्रियायाः प्रत्यायकमस्ति। तत्र यदि कारकस्यापि क्रिया प्रत्यायिकेष्यते ततः स्फुटतरमितरेतराश्रयेणोभयोरपि निर्मूलत्वमापद्यते। तस्मादिहानन्यगतिकत्वात्कारकं विभक्तिवाच्यं तत्संबन्धाच्च तदनुरूपक्रियाक्षेप इति वक्तव्यम्। यदा तर्हि क्रियापदपूर्वकं कारकपदे प्रयुज्यते तदा तत्संबन्धयोग्यायाः क्रियायाः पूर्वतरप्रतीतत्वेन कारकप्रत्यायनसामर्थ्याद्विभक्तिभिः, संख्यामात्रमभिधीयेत। सत्यमेवमपि प्राप्स्यद्यदि नित्यमाख्यातोपक्रमाण्येव वाक्यानि प्रायोक्ष्यन्त तेषां त्वनियमेनैव प्रयोगः सर्वदा स्थितः। गां पश्य पश्य गां चेति। तस्मान्नानभिधेयता। नन्वेवमप्यभिधानशक्तेरप्यनियमेन भवितव्यम्। न शक्यमेवं भ-

१८ क्रिय] सक्रियत्वादिति—सर्वस्य प्रातिपदिकार्थस्य सक्रियत्वात्क्रियाक्षेपद्वारा कारकाक्षेपसिद्धेर्न पूर्वोक्तेतरेतराश्रयापत्तिरिति शङ्काभिप्रायः।

वितुं यदा हि सुबन्तपूर्वप्रयोगापेक्षया कल्पिता वाचकशक्तिस्तदा किमसौ प्रयोगान्तरेऽपनेतुं शक्यते। न ह्यनित्यः शब्दार्थसंबन्धः, शक्तिद्वयनियमश्च संबन्ध इत्युक्तम्। अथोच्येत। आख्यातपूर्वप्रयोगापेक्षया विभक्तेः शक्त्यभावेऽवधारितेऽवश्यंभाविनि चैकरूप्येऽत्यन्तमशक्तिरेव भवत्विति। तदयुक्तम्। कुतः। § 6412

सत्यप्यव्यापृता शक्तिः कृतार्थत्वान्न दुष्यति।
असत्यास्तु फलं तस्याः प्रार्थितं दुर्लभं भवेत्॥§ 6414

सर्वत्रैव यस्य कस्यचित्कार्यस्य सदसद्भावदर्शनाद्विरुद्धसदसद्भावात्मकत्वानभ्युपगमे सत्यैकरूप्यं परिगृह्यते। तत्सद्भावः परिग्रहीतव्यः। सतामपि प्रतिबन्धात्कारणान्तराभावादन्यतो वा सिद्धेः कार्यानारम्भाविरोधात्। असतश्च कार्यवेलायां देवैरप्यप्राप्तेरनिमित्तकार्योत्पादप्रसङ्गादित्युक्तं संबन्धनित्यत्वे। तस्मात्कल्पिता वाचकशक्तिर्नामपूर्वं तावत्प्रयोगे व्यापरिष्यते। विपर्यये पुनरुदासिष्यते। लब्धात्मकत्वाद्वा श्रौतत्वे सति अनुमानप्रत्ययं निराकुर्वन्ती 930 कार्यमारप्स्यते। अतश्च सिद्धाः सुपां कर्मादयोऽप्यर्थाः। तिङां तु नियतपौर्वापर्यवशादेकान्तेन धात्वर्थभावनाभ्यामुपस्थापितयोः कर्तृकर्मणोः पश्चात्संख्याऽवगम्यत इति न कदाचिदपि कारके विशेषमे वाचकशक्तिकल्पनावसरः। ततश्च नित्यानुमेये कर्तृकर्मणी इति सिद्धम्। § 6415

अथात्र कश्चिदनुमानकुशल आह—**ननु कर्तृद्वित्वाद्विवचनं कर्तुरेकत्वादेकवचनं कर्तृबहुत्वाद्बहुवचनम्। तेन नूनं कर्ता शब्दार्थ** इति। कोऽभिप्रायः। कर्तृविशेषप्रत्यायनार्थं यः शब्द उच्यते देवदत्तादिस्तेन सह पचत्यादीनां प्रयुज्यमानानां तदनुवर्तनं सर्वप्रकारं दृश्यते। तत्तु सामानाधिकरण्याद्भवति। सामानाधिकरण्यं च द्वयोरप्येकविषयत्वे कल्प्येत। तेन यदि हि देवदत्तादयः सामान्यतः पचतिशब्देनाभिहितास्ततस्तैः सामानाधिकरण्यं लभ्यते। लक्षणयाऽऽकृत्यरुणाधिकरणोक्तन्यायेन भविष्यतीति चेत्। न। तण्डुलस्थेन पाकेन लक्षयितुमशक्यत्वात्। तत्समवेतमेव ह्येकत्वादि लक्षयितुं शक्यते नान्यसमवायि। तत्रैतत्स्यात्। अधिश्रयणादयोऽपि देवदत्तसमवेतास्तस्य पाकत्वेनोच्यन्त इति। सत्यमुच्यन्ते न तु तद्द्वारं सामानाधिकरण्यं भवति। गोत्वारुणत्वादीनि हि विशेष्ये स्वात्मानुरूपप्रत्ययोत्पादनान्मतुब्लोपाभेदोपचार-

---

३ इत्यु ] प्रतिपत्तावुपादानात्साहित्ये च विवक्षिते। नियम्यते यदेकस्यां संबन्धः सोऽर्थशब्दयोः ॥ १३॥ इत्यादिना श्लोकवार्तिके संबन्धाक्षेपवाद उक्तमित्यर्थः।
११ संब ] विद्यमानस्य चार्थस्य दृष्टमग्रहणं क्वचित्। न त्वत्यन्तासतोऽस्तित्वं कंचित्प्रत्युपपद्यते॥ ३३॥ इत्यादिना श्लोकवार्तिके संबन्धाक्षेपपरिहार उक्तमित्यर्थः।
१२ विप ] विपर्यये—पश्य गामित्याद्याख्यातपूर्वप्रयोग इत्यर्थः।
२४ याऽऽकृ ] ( अ॰ १ पा॰ ३ अ॰ ९ )
२४ रु ] ( अ॰ ३ पा॰ १ अ॰ ६ )
२५ क्य ] विक्लेदनधात्वर्थवादिमते तावत्तण्डुलसमवेतस्य पाकस्य देवदत्तनिष्ठेन कर्तृत्वेनैकार्थसमवायाभावाल्लक्षणाशक्तिं वदति— अशक्यत्वादिति।

निमित्ततां प्रतिपद्य शब्दं प्रवर्तयन्ति सामानाधिकरण्यं कारयन्ति नत्वेवम-धिश्रयणादिरूपापन्नो देवदत्तो गम्यते येनाभेदोपचारमनुब्रूपौ स्याताम्। अतो यथा दण्डादिशब्दा देवदत्तादिसामानाधिकरण्यं न प्रतिपद्यन्ते दण्डो देवदत्त इति, यथा वाऽधिश्रयणादयः पाको वा देवदत्त इति प्रयोगो न भवति तथा पचति देवदत्त इत्यपि न स्यात्। § 6416

तस्मात्पचतिशब्दादिर्वाचकः कर्तृकर्मणोः।
तत्पदाभेदवर्तित्वात्पक्तपक्वादिशब्दवत्॥ § 6418

अभेदवर्तित्वं हि तत्पदसामानाधिकरण्यमसंदिग्धवाचकेषु कृदन्तेषु पक्ता देवदत्तः पक्व ओदन इत्यादिषु दृष्टम्। यत्र च कर्तृकर्मवचनत्वं नास्ति तत्र सामानाधिकरण्यमदृष्टं यथा पाकादिशब्दे। किं च। § 6419 931

तच्छब्दोपात्ततद्भूतसंख्याभेदानुवर्तनात्।
तथैव वाचकत्वं स्याद्दृष्टान्तौ ताविहापि च॥ § 6421

पचति देवदत्तः पचतो देवदत्तयज्ञदत्तौ पचन्ति देवदत्तयज्ञदत्तविष्णुमित्राद-य इति यैव कर्तृवाचिनि देवदत्तादिशब्दे संख्या सैवाऽऽख्यातेऽपि दृश्यते। यत्र चासौ दृश्यते स वाचको दृष्टो यथा पक्ता देवदत्तः—पक्तारावित्यादि। तथा कर्मण्यपि पच्यत ओदनः पच्येते ओदनशाकौ पक्व ओदनः पक्वौ शाकौदनावित्यादीनि पक्षदृष्टान्तोदाहरणानि वक्तव्यानीति। किं च। § 6422

तयोरभिहितत्वेन विभक्तिप्रतिबन्धनात्।
साधर्म्यं पूर्वमेवान्यद्देवदत्तेन पच्यते॥ § 6424

इतश्च वाचको येनानभिहिताधिकारविहितकारकविभक्तिप्रतिबन्धो दृश्यते पचति देवदत्तः पच्यत ओदन इति। यदि हि वाचकत्वं न स्यात्ततः ‘अन-भिहिते’ ‘कर्मणि द्वितीया’ ‘कर्तृकरणयोस्तृतीया’ इति च विभक्तिप्राप्तिर्न केनचित्प्रतिबध्येत। यथा पच्यते देवदत्तेन पचत्योदनमिति। यतस्तु खलु प्रतिबन्धस्तेनावगम्यते पक्तृपक्वसाधर्म्येणैव वाचकत्वम्, साधर्म्यादन्यद्वैधर्म्यं तदेवं दर्शयितव्यम्। यत्र च वाचकत्वं नास्ति तत्र कारकविभक्तिप्रतिब-न्धोऽपि नास्ति, यथा पच्यते देवदत्तेन पचत्योदनमिति। § 6425

---

७ क्वा] पक्वादिशब्दवदिति। अनेन च ‘कर्तुरेकत्वादेकवचनम्’ इत्यादिभाष्योक्तमनुमानमेवं विवृतं विज्ञेयम्, पचतिशब्दः कर्तृवाची, देवदत्तादिकर्तृपदाभेदवर्तित्वात्’ पक्तृशब्दवत्। पच्येतशब्दः, कर्मवाची, ओदनादिकर्मपदाभेदवर्तित्वात्, पक्वशब्दवत्, इति।

१० च] ‘ननु कर्तुरेकत्वादेकवचम्’ इत्यादिभाष्योक्तेन साक्षाद्धेतुनाऽनुमानप्रयोगान्तरं दर्शयति—किं चेत्यादिना—पचतिशब्दः, कर्तृवचनः, कर्तृगतसंख्याविशेषानुवर्तनात्, पक्ता देवदत्त इति वाक्यस्थपक्तृशब्दवत्। पच्यतेशब्दः, कर्मवचनः, कर्मगतसंख्याविशेषानुवर्तनात, पक्व ओदन इति वाक्यस्थपक्वशब्दवदिति चानुमानप्रयोगो द्रष्टव्यः।

२१ अ] पा° सू° (२—३—१)

२२ क] पा° सू° (२—३—२)

२२ तृक] पा° सू° (२—३—१८)

इतश्च बोधकः शब्दस्तद्विशेषावबोधनात्।
यथा श्रोत्रमकारस्य बोधकं शब्दबोधकम्॥§ 6427

यदि पचतिशब्दादिभिः कर्तृकर्मणी नोच्येयातां कथं तद्विशेषः संख्याऽभिधीयते। तन्नाभिधत्ते तद्विशेषमभिधत्त इति हि विप्रतीषिद्धमेत-
932 त्। न हि श्रोत्रं शब्दसामान्यमगयत्तद्विशेषमकारं गमयति। न च शब्दस्याभिधातृत्वादन्यादृशं बोधकत्वं भवति। भावनया हि गम्यमानत्वेऽर्थ एव बोधकः स्यान्न शब्दस्तस्मादपि वाचकत्वम्। किं च। § 6428

विशेषणैश्च संबन्धादुच्यते कर्तृकर्मणी।
न ह्यनुक्तस्य संबन्धः स्वगुणैरवकल्पते॥§ 6430

इतश्चाभिधीयेते विशेषणैः संबध्यमानत्वादिह शोभनः पचति शोभनः पच्यते। यत्रानयोर्विशेषणसंबन्धस्तत्राभिधेयत्वमपि दृष्टं यथा शोभनः पक्ता रमणीयः पक्व इति। यत्र त्वभिधेयत्वं नास्ति तत्र विशेषणसंबन्धोऽपि न दृष्टो यथा शोभोनमास्यत इति। न च गम्यमानस्य विशेषणसबन्धो यथा धूमशब्दादग्नेरवगतस्य न ज्वलनादिभिः संबन्ध इति। तदेतत्सर्वं ‘ननु कर्तुरेकत्वादेकवचनम्’ इत्यादिनैव दर्शितत्वाद्भाष्यकारेण न प्रपञ्चितम्। तद्गतसंख्यायोग्यत्वं सामानाधिकरण्यादिभिर्विना नोपपद्यते। तस्मादभिधानपक्ष एव न्याय्य इति। § 6431

अत्राभिधीयते। यत्तावदुक्तं वाचकः पचत्यादिशब्दः कर्तृकर्मणोः सामानाधिकरण्यादिति। तत्र यदि वाचकशक्त्याऽस्तित्वमनुमीयेत ततः पूर्वोक्तेनार्थापत्तिभङ्गेन सर्वप्रमाणानुपपत्तेरनुपलब्धिविरोधः। सर्वशक्तीनां चार्थापत्तिरेवैकं प्रमाणम्। सा चेहान्यथाऽप्युपपत्तेर्निराकृता। अनुमानविरोधश्च। नाभिधाता कर्तृकर्मणोः पचत्यादिशब्दस्तदत्यन्ता विनाभूतार्थाभिधायित्वात्। यो यदत्यन्ताविनाभूतार्थाभिधायी स तस्य न वाचकः, यथा शिंशपाशब्दो वृक्षत्वनियतशिंशपात्वस्य। तथा कर्तृकर्मणी नाभिधेये तिङा,

१ श्च] ‘ननु कर्तुः’ इत्यादिभाष्यं प्रयोगान्तरपरतया व्याचष्टे—इतश्चेत्यादिना। अयं च श्लोकतात्पर्यार्थः। पचतिपच्यतेशब्दौ, कर्तृकर्मबोधकौ, कर्तृकर्मविशेषबोधकत्वात्, यत् यद्विशेषबोधकं तत् तद्बोधकम्, यथा शब्दविशेषाकारबोधकं श्रोत्रं शब्दबोधकमिति।

२२ त्य] तदत्यन्तेति—कर्तृकर्मभ्यामत्यन्तमविनाभूतो यो भावनारूपः प्रत्ययार्थस्तदभिधायित्वादित्यर्थः।

२४ पा] शिंशपात्वस्येति—वाचको न वृक्षत्वस्येति शेषपूरणम्।

२४ था] कर्तृकर्मणोनरभिधेयत्वे प्रयोगमाह—तथेत्यादिना। कर्तकर्मणी तिङा नाभिधीयेते, तिङ्वाच्यया भावनया कदाऽप्यत्यज्यमानत्वात्, यत् तिङ्वाच्येन न त्यज्यते तन्न तेनाभिधीयते, यथा कर्तृकर्मत्वाश्रयभूतदेवदत्तौदनादिद्रव्यमिति। तथा कर्तृकर्मणी तिङा नाभिधीयेते, तिङः कर्तृकर्मविषकव्यापाराभावेऽप्यभिधेयभावनाविनाभावेन प्रतीयमानत्वात्,यद्व्यापाराद्विनाऽपि च प्रतीयते, तन्न तेनाभिधीयते। यथा शिंशपाशब्दव्यापाराद्विनाऽपि प्रतीयमानं वृक्षत्वमिति च तात्पर्यार्थः।

तदभिधेयापरित्यागात्। तद्व्यापाराद्विनाऽपि च प्रतीयमानत्वाद्द्रव्यत्ववत्। त-
स्मिन्नेव शिंशपाशब्दे वृक्षत्ववत्। कारकत्वादाख्यातानभिधानं करणादिव-
त्। तिङ्शब्दस्यावाचकत्वमाख्यातत्वादास्यत इत्यादिवदित्येवमपि शक्यं व-
क्तुम्। नन्वचन्द्रः शशीतिवदेतल्लौकिककविरुद्धमनुमानम्। नैष दोषः। य-
दि वयं प्रत्याय्यत्वं प्रत्यायकत्वं वा निह्नुमहि ततो लोकविरुद्धं ब्रूयाम्।
वाच्यवाचकशक्तिप्रतिषेधस्त्वयं क्रियते। न च तेन लोकप्रसिद्धिविरोधः। प्र-
त्ययोत्पादमात्रेण कृतार्थस्य लोकस्याभिधेयगम्यमानद्योत्यविषयरूपार्थचतुष्ट- 933
यविवेकानादरात्। यदि तु लोकप्रसिद्धं प्रत्याय्यप्रत्यायकत्वमात्रं साध्येत
ततः प्रागुक्तेन भावनाद्वारप्रतीत्यभ्युपगमात्सिद्धसाधनम्। लोकविरोधोऽपि
तवैवाऽऽपद्येत। कुतः। § 6432

लोको यदन्यतः सिद्धं नाभिधेयं तदिच्छति।
यथा श्रोत्रगृहीतत्वात्स्वरूपं नाभिधीयते॥ § 6434

शेषा अपि प्रतिज्ञादोषाः पूर्वोक्तेन मार्गेण वर्णस्फोटजात्यादिशब्दविकल्पनया शक्तिद्रव्यकारकविकल्पेन व्यतिरेकाव्यतिरेकप्रश्नेन च वैयाकरणं प्रति योजयितव्याः। तथा सामानाधिकरण्यं श्रौतं लाक्षणिकं वा हेतुरुच्यते। श्रौतं तावदुभयोरप्यसिद्धम्। कस्मात्। अस्माकं भावनामात्राभिधानात्। तव शक्तिमात्रकारकत्वाभ्युपगमात्। देवदत्तादिशब्दो हि द्रव्यवचनो न शक्तिं ब्रवीति। कारकं चाभिदधत्प्रत्ययः शक्तिमात्ररूपेणाभिदध्यान्न द्रव्यरूपेण तस्माकारकत्वात्। यस्यापि हि द्रव्यं कारकं तेनापि शक्तिर्विशेषणत्वेनावश्यमभ्युपगन्तव्या। तद्रहितद्रव्यव्यापारासंभवात्। ततश्चाऽऽकृत्यधिकरणाच्छक्तेरेवाभिधानमिति द्रव्यशब्देन सह सामानाधिकरण्यानुपपत्तिः। शक्तिवचनस्तु नैवाऽऽख्यातसमभिव्याहृतः कश्चिच्छब्दोऽस्ति येन सह श्रौतं सामानाधिकरण्यं स्यात्। स हि कारकविभक्त्यन्तो भवेत्। न चेदानीं कारकविभक्तिः प्रयुज्यते। यस्य तु द्रव्यं कारकं तस्य यद् द्रव्यं केनचित्कारकात्मनाऽवधारितं तस्य जातिवत् तत्त्वापायात् यावत्सद्भावं कारकान्तराविवक्षा प्राप्नोति। शक्तिपक्षेऽप्यविशिष्टमिति चेत्। न। एकद्रव्याश्रितानां तासामाविर्भावतिरोभावविवक्षावशेन तथा तथाऽभिधानात्। द्रव्यस्य त्वेकात्मकत्वादपेक्षाकारणरहितस्य न विवक्षान्तरं प्राप्नोति। § 6435

---

७ स्याभिधेय] अभिधेयेति—गवादिब्दानां गोत्वादिजातिरभिधेयोऽर्थः। गम्यमानोऽर्थो व्यक्तिः, प्रादीनामुपसर्गाणां द्योत्योऽर्थः—गमनादिस्तिष्ठतीत्यादिधात्वर्थः’ योगरूढानां पङ्कजादिशब्दानां विषयः पद्मत्वादिरित्यर्थः।
१३ पू] पूर्वोक्तेनेति—वक्तव्यश्चैष कः शब्दो नाशित्वेन प्रसाध्यते॥ ३१८॥ त्रिगुणः पौद्गलोवाऽयमाकाशस्याथवा गुणः। वर्णादन्योऽथ नादात्मा वायुरूपोऽर्थवाचकः॥ ३१९॥ पदवाक्यात्मकःस्फोटः सारूप्यान्यनिवर्तने। इत्यादिना शब्दनित्यत्वाधिकरणे श्लोकवार्तिकोक्तेन मार्गेणेत्यर्थः।
२० द्र] तद्रहितेति—निर्व्यापारस्य द्रव्यस्य कारकात्वायोगाच्छक्तिव्यतिरिक्तस्य च व्यापारस्यासंभवादित्यर्थः।
२० श्चाऽऽकृत्य] (अ॰ १ पा॰ ३ अ॰ ९)
२४ स्य] यस्य तु शक्त्यनभ्युपगन्तुवैशेषिकस्येत्यर्थः।

यदि च द्रव्यवाचित्वं सुप्तिङन्तेष्वपीष्यते।
ततो लिङ्गादियोगः स्यात्सत्त्वभावात् कृदन्तवत्॥§ 6437

यथैव पाचकादिशब्देषु द्रव्यप्राधान्यात्सत्त्वरूपप्रत्ययो भवत्येवं सुप्तिङन्तेष्वपि स्यात्। ततश्च यथैतेष्वेव पाचकं ब्रूहि पाचकेन कृतं पाचकाय देहीति
934 कारकान्तरयोगो भवत्येवं पचत्योदनमित्यादिष्वपि प्राप्नोति। तस्माच्छक्तिमद्द्रव्यकारकपक्षेऽप्यवश्यं निष्कृष्य शक्तिमात्रं सुप्तिङ्भ्यामभिधेयमेष्टव्यम्। तथा सति हि। § 6438

आविर्भूतैकया शक्त्या द्रव्यमात्मवशीकृतम्।
न शक्त्यन्तरयोगित्वं तदेव प्रतिपत्स्यते॥§ 6440

तेन कारकान्तरायोगो लिङ्गसंख्यारहितत्वं च द्रव्यप्रधानकृतवैलक्षण्येन सिद्धम्। ततश्चावस्थितं श्रुतिसामानाधिकरण्येस्योभयोरसिद्धत्वम्। अथ लक्षणया सामानाधिकरण्यमविशेषितं वा हेतुस्ततः सिंहो माणवक इत्यदिष्वन्तरेणापि वाच्यवाचकभावं सामानाधिकरण्यं दृष्टमित्यनैकान्तिकता। यच्च श्रौतं सामानाधिकरण्यं तस्य कोऽर्थः। समानमधिकरणमिति समानं वाच्यमित्यर्थः। न ह्यन्यथा शब्दस्यार्थोऽधिकरणं भवति। सर्वशब्दानामनधिकरणत्वादाकाशाधिकरणत्वाद्वा। वाच्यस्य तु विषयत्वप्रतिपत्त्याऽधिकरणत्वमुच्यते। तदपि च लक्षणादिनिवृत्त्यर्थं मुख्यत्वेन विशेष्यते। ततश्च मुख्यया वृत्त्या समानाधिकरणं—समानो विषयः, समानामभिधेयमिति यावत्। ततश्चैवं साधनं भवति। वाचकः पचतिशब्दो देवदत्तस्य, तच्छब्दसमानार्थत्वाद्देवदत्तवचनत्वादित्यर्थः। ततश्चानित्यः शब्दोऽनित्यत्वादितिवत्प्रतिज्ञातार्थैकदेशो हेतुः स्यात्। तद्भूताधिकरणोक्तेन च न्यायेन षष्ठान्तवक्ष्यमाणेन च शब्दयो स्तद्बुद्ध्योरर्थयोरर्थबुद्ध्योरित्यादिभिर्व्यवहारकाले सामानाधिकरण्यं विकल्प सर्वप्रकारमसिद्धत्वं गवाश्वादिशब्दाविशेषाद्वाऽनैकान्तिकत्वमुद्भावनीयम्। अनुमानविरोधोक्तैरेव हेतुभिर्मुख्यसामानाधिकरण्यनिराकरणादसिद्धता निर्णेतव्या। सप्रतिसाधनता च वक्तव्या। दृष्टान्तोऽपि यदि तावच्छक्त्यभिधानत्वेन ततः साध्यविकलता। न हि पाचकादिशब्दाः शक्तिपराः। किं तर्हि। शक्त्यन्तरायोगित्वाच्छक्तिमत्परा इत्युक्तम्। सति च शक्तिपरत्वे तथैव मुख्यसामानाधिकरण्यात्मकमेव हेतुविकलत्वम्। पाचकादिश-

१६ धिक]
अनधिकरणत्वादिति—भीमांसकमते शब्दस्य द्रव्यत्वाभ्युपगमाद्द्रव्यस्य चानाश्रयत्वादित्यर्थः।
१६ र]
वैयाकरणमतेनाऽऽह—आकाशेति।
२१ द्भू] (अ॰ १ पा॰ १ अ॰ ७) इत्यत्र पदानि तावद्वर्णा वा स्वरूपैनं कदाचन॥ १०॥ इत्यारभ्य, न च वस्त्वन्तरारम्भः पदार्थैस्तदनुग्रहात्॥ ४६॥ इत्यन्तेन ग्रन्थेन श्लोकवार्तिकेऽभिहितेन न्यायेनेत्यर्थः
२१ ष्ठा] (अ॰ ६ पा॰ ८ अ॰ १० सू॰ ३६)। अत्रत्यभाष्योक्तेन च न्यायेनेत्यर्थः
२२ हार]
व्यवहारकाले—अनुमानव्यवहारकाल इत्यर्थः।

ब्दवदेव प्रधानभूतशक्त्यनभिधानप्रसङ्गात्सिषाधयिषितधर्मविशेषविपरीतसाधनता। अथवा यदा मुख्यं सामानाधिकरण्यमसिद्धं तदेतरदवाचकेष्वेव दृष्टमिति विरुद्धता। न च लक्षणायां गौणत्वे वा वाचकत्वमस्तीति तत्सिद्धिसूत्रे 935 'अर्थाभिधानसंयोगात्' इत्यत्र च साधितम्। तेन विपक्ष एव नास्तीत्येवं शक्यं वक्तुम्। एवं परेष्वपि साधनेषु यथासंभवं योजयितव्यम्। तद्गतसंख्योपादानमपि शक्तिगतत्वेन तावदसिद्धम्। न हि शक्त्यात्मककारकाश्रयाः संख्याः केनचिदिष्यन्ते। द्रव्याश्रितत्वात्तासाम्। अथ तु यद्गतामसौ संख्यामुपादत्ते तस्यैव प्रतिद्रव्यस्य वाचक इति प्रतिज्ञायते। ततः पूर्वाभ्युपगमविरोधः। न हि कश्चिद्वैयाकरण आख्यातस्य द्रव्यवचनत्वमिच्छति। यदि तु वाच्यलक्षितगतसंख्याभेदोपादानमभेदोपचाराद्वा गौणमेवैतद्धेतुस्ततः सिंहो देवदत्तः सिंहौ देवदत्तयज्ञदत्तौ सिंहा देवदत्तयज्ञदत्तविष्णुमित्रा इत्यादिभिरवैकान्तिकम्। पाचकादौ यावति पचतिकर्त्रभिधानं तावति संख्याभेदोपादायित्वं नास्ति विभक्तिवाच्यत्वात्संख्याया इति हेतुविकलता। यत्र तु विभक्तौ तदस्ति तस्यां कर्त्रभिधानाभावात्साध्यविकलता। तेन तृतीयान्तमेव किंचित्पदमुदाहर्तव्यम्। तत्रापि तु सर्वे सामानाधिकरण्यवद्दोषाः संभवन्तीत्यसाधनत्वम्। इदमपरमनैकान्तिकत्वम्। गोशब्दो न ब्रवीति द्रव्यम्। अथ तु तद्गतसंख्याभेदमुपादत्ते। नैवैष विपक्ष इति यदि वेददाकृत्यधिकरणमस्मै व्याख्यातव्यम्। **कतरदत्रानुमानं बाधितुमर्हतीति**—सप्रतिसाधनतां यथोक्तां दर्शयित्वा **यथाऽऽकृतिवचने शब्द** इति परकीयस्यानैकान्तिकतामुद्भाव्याऽऽत्मीयेन निर्णयः कृतः। यदपि च कारकविभक्तेः प्रतिबन्धनं तदपि यदि तावत्सर्वस्यास्ततोऽसिद्धम्। प्रथमाया अप्यभिहितकारकविभक्तित्वात्। अथ यस्याः कस्याश्चित्ततोऽनभिधायकेष्वप्यपवादेषु तदस्तीत्यनैकान्तिकता। 'उभयप्राप्तौ कर्मणि' इति परिसंख्यानात्कर्मगता षष्ठी न तावत्कर्तारमभिधत्ते। अथ च कृदन्ताभिहिताक्रियासंबन्धिकर्तृविभक्तिः षष्ठीं प्रतिबध्नाति। यत्त्वनभिहिताधिकारोक्ते द्वितीयातृतीये प्राप्नुत इति। तदनुपपन्नम्। कुतः। § 6441

संख्यायां कारके वा धीर्विभक्त्या हि प्रवर्तते।
उभयं चात्र तत्सिद्धं भावनातिङ्विभक्तितः॥ § 6443

पचति देवदत्त इत्यत्र कर्तृत्वं तावद्भावनयैव बोधितम्। याऽपि संख्या साऽपि तिङा। किमन्यदवशिष्यते यदर्थं विभक्तिरुत्पद्येत। कथं पुनरनेककारसंनिपाते सति कर्तृत्वमेव भावनया देवदत्तस्यावगमितं न कारकान्तरत्वमिति। योग्यतावशेनेति केचित्। देवदत्तो हि पाकस्य कर्तृत्वयोग्यो न 936 करणत्वादियोग्यः। न चाकारकस्य सत आख्यातेन संबन्धोऽवकल्पते। त-

३ त्सि] (अ° १ पा° ४ अ° १२ सू° २३)
४ अर्थाभिधा] (अ° ३ पा° २ अ° १ सू° १)
१७ दाकृ] (अ° १ पा° ३ अ° ९)
२३ उभ] पा° सू° (२-३-६६)।

स्मात्कर्तृत्वं गृह्णातीति। न त्वेतत्काष्ठानि पचन्तीत्यत्र संभवति। न हि तानि कर्तृत्वयोग्यानि। किं तर्हि। करणत्वार्हाणीति प्रसिद्धमेतत्। अथोच्येत नैवात्र काष्ठानां कर्तृत्वम्। किं तर्हि। करणत्वभेवेदमुक्तेन न्यायेन कर्तृत्ववत्स्वां विभक्तिं नोत्पादयति। एं स्थाली पचतीत्यधिकरणत्वं सप्तमीम्। तण्डुलाः पचन्तीति कर्मत्वं द्वितीयाम्। कुशूलः पचतीत्यपादानत्वं पञ्चमीम्। ब्राह्मणाः पचन्तीति संप्रदानत्वं च चतुर्थीम्। सर्वत्र योग्यत्वस्य निर्णयकारणत्वादिति। तदनुपपन्नम्। कर्तृप्रतीतेः सर्वस्य स्वसंवेद्यत्वात्। आह। नैवेयं कर्तृत्वप्रतीतिर्नानाकारकप्रतीतिरेव तु सती तिङ्वाच्यकर्तृत्वाप्रसिद्धिवासनावशेन तत्सामानाधिकरण्यबुद्ध्या कर्तृप्रत्ययवदाभासते। यस्तु निपुणः पश्यति तस्य भवत्येव तत्र तत्र कारकविवेकः। तथा हि। § 6444

स्थाल्यादेर्योऽपि कर्तृत्वं तदानीमध्यवस्यति।
नाऽऽधारादन्यथाभूतं व्यापारं सोऽपि विन्दति॥ § 6446

यं हि व्यापारं साधयन्ती स्थाल्यधिकरणत्वं प्रतिपन्नवती कर्तृत्वेनाप्यभिधीयमाना तमेव प्रतिपद्यते। तस्माद्वरमधिकरणत्वेनैव स्थाल्युच्यत इति कल्पितम्। लकारवाच्ये तु सति कर्तर्यधिकरणादिषु लकारानुत्पादात्सामानाधिकरण्यानुपपत्तेस्तिङा च संख्यानभिधानात्सप्तम्यादिप्रसक्तौ सत्यां प्रथमासिद्ध्यर्थं तिङभिधानार्हकर्तृत्वमेषामुच्यत इति बलादभ्युपगमनीयं स्यात्। अनभिधाने तु यस्यैव तिङुक्तसंख्यासंबन्धो विवक्षितस्तदेव सिद्धफलत्वात्फलभूतां विभक्तिमनुत्पादयदपि गम्यते शिष्टानि पुनरुत्पादयिष्यन्ति। नन्वेवं सति सर्वेषां भावनया गम्यमानत्वं संख्यासंबन्धयोग्यत्वं चास्तीति सर्वदैव द्वितीयानुत्पादः प्राप्नोति। नैष दोषः। यद्यपि कारकाणि स्वरूपतो गम्यमानत्वात् तदर्थं विभक्तिं न प्रयोजयन्ति तथाऽपि तिङुपात्ता संख्या केन संबध्योपयुज्यत इति शेषसंख्यार्थमवश्यं विभक्त्यन्तराणि प्रयोक्तव्यानि। ननु तिङुपात्तैवागृह्यमाणविशेषत्वात्सर्वैः संबध्यते। कथमेका सती शक्नोति संबन्धुम्। संबध्यमानायां च संख्यान्तरोपजन एव प्राप्नोति। विकल्पः स्यादिति चेत्। इष्ट एवासौ। यथाप्रयोगं तु व्यवस्थितो न प्रयोगान्तरकालं यथेष्टकल्पनया। यदेव प्रथमान्तमादितः प्रयुक्तं तदेव तिङ्वाच्यसख्यायेग्यत्वेन विवक्षितमित्यवगम्य शेषेषु यथास्वं विभक्त्यन्तराणि प्राथ्र्यन्ते। यदा तर्हि बहुवचनप्रयोगस्तदा साधारण्यविभवाच्छेषेषु विभक्त्यन्तरासंभवप्रसङ्गः। इष्ट एवैषोऽपि यदा सर्वाणि तुल्यकल्पत्वेन विवक्ष्यन्ते यथा काष्ठादीनि
937 पचन्तीत्यत्र। यदा तु खलु कर्तृमात्रगतमेव बहुत्वं विवक्ष्यते, कारकान्तराणि च श्रुत्यैव गूणभूतानि दर्शयितव्यानि तदानीं प्राथम्यप्राधान्याभ्यां कर्तर्येवं संभवात्तदतिक्रमकारणाभावाच्च न कारकान्तराणि गच्छतीति कर्तृष्वेव लीयते। कारकान्तराणां च स्वविभक्तिभिरेव संख्याऽभिधीयते। यद्येवं ततः

१ क] कर्तृवदिति पा०।

सर्वदैव तिङभिहितया संख्यया कर्ता नातिक्रमितव्यः। कथ तर्हि स्थाली पचतीति प्रयोगः। उच्यते। किं पुनरत्र युक्तं किं कुतश्चित्कारणात्कर्तारमतिक्रम्याधिकरणं संख्ययाऽऽश्रितम्। अथवा तत्संख्यार्हं कर्तृत्वमेव स्थाल्यां विवक्ष्यत इति। कर्तृत्वविवक्षा युक्तेति मन्यामहे। कुतः। § 6447

न मुख्यातिक्रमे किंचिद् दृश्यते कारणान्तरम्।
मुख्यत्वस्य विवक्षा तु यथेष्टं ननु युज्यते॥ § 6449

सर्वत्रैवार्थद्वये संभवत्यन्यतररूपविवक्षा युक्ता। संभवति च सर्वकारकाणां स्वव्यापारापेक्षया कर्तृत्वमिति पुरस्तात्प्रतिपादितम्। न हि प्रधानक्रियागतं कारकवैचित्र्यं स्वव्यापारविषयात्कर्तृत्वाद्विनोपपद्यते। तस्मात्तदेव विवक्षितमिति न्याय्यं न कारकान्तरसंख्याभिधानमिति। एवं च सति यत्कर्मसंख्याऽपि क्वचिदभिधीयते तत्रोक्तं कारणम्। न च तदन्यत्रास्तीति व्यवस्था। तदा त्वनभिहिताधिकारोऽप्येवं करिष्यते। अनभिहिते कर्मण एकत्वे द्वित्वे बहुत्वे चेत्यादि। कुतः। § 6450

विभक्तयो विधीयन्ते यत्र तस्य विशेषणम्।
युज्यतेऽनभिधानं हि न पुनस्तद्विशेषणे॥ § 6452

न ह्युपसर्जनस्य विशेषणसंबन्धो युज्यते। विशेष्यास्त्वेकत्वादय एव पुनर्विशेषणान्तरसंबन्धं सहन्ते प्रधानत्वम्। तथा च समासाधिकारेऽप्युक्तं 'भवति वै प्रधानस्य सापेक्षस्यापि समासः' इति। तस्मादेकत्वादिष्वनभिहितेष्विति संबन्धः। एतस्मिंस्तु व्याख्याने कृतः कट इति शब्दयोरपि द्वितीया स्यात्। उभयत्रापि कर्मैकत्वस्यानभिहितत्वात्। अथप्रथमयैवाभिहितत्वान्न भविष्यतीत्युच्यते। तदयुक्तम्। प्रागेव प्रथमोत्पत्तेस्तत्प्रसङ्गत्। अपि च कटं करोति भीष्ममुदारं दर्शनीयमित्यत्रापि कटद्वितीययैवाभिहितत्वाद्भीष्मादिष्वभावः प्रसज्यते। ननु कर्मादिविभक्त्यर्थवादिनोऽप्यविशिष्टमेतत्। न। तस्य तिङ्कृत्तद्धितसमासैरनभिहितेष्विति परिसंख्यानात्। न च कटद्वितीया तिङदिष्वन्त- 938
र्भूता यतस्तयोक्तानां पर्युदासो भवेत्। ननु ममापि परिसंख्या भविष्यति। भवेत्। यदि कृदादीनामपि संख्या वाच्या स्यात्। न त्वेते संख्यायां स्मर्यन्ते। नापि वदन्तो दृश्यन्ते। तेन तिङः केवलस्य ग्रहणमुपपद्यते नेतरेषाम्। कर्मादयस्तु सर्वेषामर्था इति वैषम्यम्। अतः कृतपाचकादिशब्देभ्यः प्राप्नुवन्त्येव द्वितीयादय इत्यन्यः परिहारो वक्तव्यः। स चैवं संभवति। यर्हि कर्मादिविशेषणमनभिहिताधिकारः। तथा हि। § 6453

---

६ न] नन्विति—यस्मादित्यर्थः। यस्मात्कर्तृत्वस्य विवक्षा यथेष्टं युज्यते तस्मान्मुख्यातिक्रमे— कर्त्रतिक्रमे न किंचित्कारणं दृश्यत इति श्लोकार्थः

८ पु] स्वव्यापारे च काष्ठादेः करणत्वाद्यसंभवः॥ ६६॥ इत्यादिना श्लोकवार्तिके वाक्याधिकरण इत्यर्थः।

२३ त्त्य] विभक्त्यर्थस्य विशेषणमनभिहितत्वामिति वादिन इत्यर्थः।

कृतः कट इतीहापि कर्मत्वं निष्ठयोच्यते।
तस्मिन्नभिहिते संख्या न द्वितीयां ग्रहीष्यति॥§ 6455

यस्य च कर्मादयो वाच्या यस्य च तद्विशिष्टा एकत्वादयस्तयोरुभयोरप्यनभिहितत्वं कर्मादिविशेषणम्। अनभिहिते कर्मणि द्वितीयाऽनभिहिते वा कर्मणि ये एकत्वादयो वर्तन्ते तेषु द्वितीयेत्। यद्यपि चोपसर्जनं कर्मादयस्तथाऽपि विशेषणेन संबध्यन्ते। समासस्थं ह्युपसर्जनं विशेषणैर्न संबध्यते। वाक्यस्थं तु ‘ऋद्धस्य राज्ञः पुरुषः’ इतिवत् संबध्यमानं दृष्टमेवमादि। एवं च वृत्तिवाक्ययोर्विशेषो भविष्यति। वाक्यस्थाश्च कर्मादयः। अतः सत्यप्युपसर्जनत्वे शक्नुवन्ति समानविभक्तिकानभिहिताधिकारवेशेष्यतां प्रतिपत्तुम्। ततश्च पचति देवदत्त इति तिङादिभिरनभिहितस्य कर्तुः संख्यामभिधातुं तृतीया प्राप्नोत्येव। गतार्थत्वादप्राप्तिरिति चेन्न। भीष्मादभिरनेकान्तात्। उक्तं ह्येतत्कटद्वितीययोक्तेऽपि कर्मणि भीष्मादिभ्यस्तदुत्पत्तिरिति। यदि च तृतीया गतार्थत्वान्नोत्पद्यते ततः प्रथमावाच्याऽपि संख्या गतैवेति कामं सा नोत्पद्यते। केवलप्रातिपदिकप्रयोगासंभवात्तदुत्पत्तिरिति चेत्। न। एवं सति यथाविहिततृतीयाप्रसङ्गात्। न चैष न्यायेन प्रसङ्ग आपादितः। किं तर्हि। आगमेन। न चाऽऽगमविरोधे न्यायः कार्यक्षमो भवति। तस्मादनभिहितशब्द एव लक्षणया विशेषात्मनाऽनवगतत्वे वर्तते। पचतिपच्यतेशब्दाभ्यां च संख्यासंबन्धादराद्विशेषरूपेण कर्तृकर्मणी गम्येते। तस्मात्तद्विभक्तिर्नोत्पत्स्यते। कारकान्तराणि न कदाचिदेवं विशेषरूपेण प्रतीयन्त इति स्वविभ-
939 क्तीरुत्पादयन्ति। कारकत्वाविशेषेऽपि च यथा कर्तृकर्मणोरेव विशेषप्रतीतिः संख्यासंबन्धश्च भवतीति तथोक्तम्। यत्तु भावोत्पन्नलकारपक्षेण व्यभिचारो नेह पच्यते नेह भुज्यत इत्यादिषु पचिमात्रविवक्षायां कर्तृकर्मणोरनाश्रयणाद्धात्वर्थभावनयोराशङ्क्यते ततश्चागमकत्वमिति। तत्रोच्यते। § 6456

तुल्योऽभिधानपक्षेऽपि स दोषः शब्दगोचरः।
बाचकस्याप्यनेकान्तो गमकस्येव नेष्यते॥§ 6458

यथैवात्र क्रियाया अनैकान्तिकत्वादन्यत्रागमकत्वमापाद्यते तथैव शब्दस्यापि कर्मानभिधानात्, ओदनः पच्यत इत्यत्राप्यनभिधातृत्वप्रसङ्गः। अथ व्यभिचार्यप्यसौ केनचिदनुगृहीतः सन्नभिधास्यति तथा ममापि तदर्थो गमयिष्यतीत्यविशेषः। तच्च सर्वत्र सकर्मकाकर्मकश्यन्बिकरणेतरविकरणोपप-

१० त] लब्धावकाशः पूर्वपक्षी पुनः शङ्कते—ततश्चेत्यादिना।
११ त्वा] संख्यायां कारके वा धीर्बिभवत्या हि प्रवर्तते। इत्यादिवार्तिकेन दत्तोत्तरत्वान्न तृतीयाप्राप्तिरित्यर्थः।
१६ स्मा] सिद्धान्ती शङ्कां समादधाति—तस्मादित्यादिना।
२१ थोक्त] यल्लक्षणो हि भवतः कर्ता सन्नभिश्रीयते। इत्यारभ्य—करणादीनां तु न वस्तुलक्षणा। नापि शब्दलक्षणा प्राधान्यविवक्षाऽस्तीति नित्यमेव बाह्यशब्दोपादेयत्वमित्यन्तेन ग्रन्थेन प्रागुक्तमित्यर्थः।

दविशेषज्ञानादनभिधातृत्ववद्रमकत्वं विविच्यत इत्यनुपालम्भः। इतरथा तेश-
ब्दस्य भावकर्तृकर्मसु त्रिष्वपि दर्शनं यतेशब्दस्य श्यन्विकरणात्मनेपदीय-
यक्यङ्क्यङ्प्रत्ययेषु चाविशेष इत्यत्यन्तसंशयहेतुत्वमेवाभिधानपक्षेऽपि स्यात्।
तस्मात्तद्भूताधिकरणोक्तेनैवान्वयव्यतिरेकभङ्गपरिहारेण पक्षद्वयमपि समर्थ-
नीयम्। ततश्च विशेषहेतुभिः शक्यो गमकत्वपक्षो निर्णेतुम्। अथवा मु-
ख्य एवानभिहितशब्दः। कथं तर्हि पचति देवदत्त इति तृतीया नोत्प-
द्यते। पर्युदस्तत्वात्। कथं पर्युदस्तत्वम्। तिङाऽभिहितत्वात्। किमर्थं तर्हि
पुरस्तादनभिधानक्लेशः कृतः। लोकवेदार्थं न व्याकरणार्थम्। किं लोक-
वेदव्यतिरेकेणापि व्याकरणव्यवहाराः सन्ति। बाढम्। न हि वृद्धिगुणशब्दौ
लोकवेदयोरादैजदेङां वाचकौ दृष्टौ। भवतु संज्ञापरिभाषाणामलौकिकत्वम्।
प्रकृतिप्रत्ययार्थास्तु न लोकवेदव्यतिरिक्ताः प्रयुज्यन्ते। कथं न प्रयुज्यन्ते
यदा 'लः कर्मणि च' इति वेदलोकयोरत्यन्तमसन्नेव लकारः कर्तृक-
र्माभिधायित्वेन कथ्यते। ननु लादेशानामत्र लकारग्रहणेन ग्रहणं युक्तम्।
स्थानिनि वाऽर्थादेशनमादेशार्थम्। नैतद्युक्तम्। कुतः। § 6459

लकारे लक्षणा तावदादेशार्थे प्रसज्यते।
स्थानिद्वाराऽपरोक्षा च वृत्तिरादेशभाग्भवेत्॥§ 6461

लकारं श्रूयमाणमुत्सृज्याऽऽदेशा गृह्यन्त इति श्रुतिबाधः। अथापि
लकारस्यैव वाच्याः कर्मादयोऽप्युच्यन्ते तथाऽपि तेनानभिधीयमानाः स-
न्तः प्रागादेशोत्पत्तेर्न शक्यास्तथाऽध्यवसातुम्। अन्ते च न्यायविरोधः स्थित
एव। अतश्च कस्मिंश्चिदसमञ्जसेऽवश्यकल्पनीये वरमभिधेयत्वमेव पारिभा- 940
षिकं कल्पितमेकान्तस्याऽऽश्रयणीयत्वात्। न हि कथंचिदपि लावस्थायाम-
पारिभाषिकमभिधेयत्वं संभवति। तेन 'लः कर्मणि च' इत्यादेशद्वारेण
लोकवेदार्थमर्थादेशनमुत स्वशास्त्रे व्यवहारार्थमिति परीक्षायां यदि लोकवेद-
योस्तिङ्च्यत्वं युक्त्याऽवकल्पयिष्यते ततस्तादर्थ्यपरिकल्पनं युक्तम्। अथान-
वक्लृप्तिस्ततः स्वशास्त्रार्थत्वमिति। तत्र तु लोकवेदार्थत्वस्य पूर्वं निराकृत-
त्वात्। परिशेषतः स्वशास्त्रार्थता। तेनैतदुक्तं भवति। पाणिनेर्मम कर्तृकर्मणी
लकाराभिहिते द्रष्टव्ये इति। किं पुनरस्य प्रयोजनं यदा न लोकवेद-
योस्ते तथोपलभ्येते। यद्यपि च तत्र नास्ति प्रयोजनं स्वशास्त्रे त्वस्ति।
कथं नामानमिहिताधिकारेण लकारप्रयोगे तयोरमिहितत्वाश्रयणात्पर्युदासः
स्यादिति। तस्माद्यद्यपि परमार्थतो नाभिधीयेते तथाऽपि शास्त्रेऽभिहितव-
दाश्रयणादभिहिताधिकाराविहिते विभक्ती न लक्ष्येते इति परिहृतः कारक-
विभक्तिप्रसङ्गः। यत्तु तद्विशेषाभिधानादिति। तच्छिंशपादशब्दैरनैकान्तिकम्।
शिंशपाशब्दो हि न तावद्वृक्षत्वपार्थिवत्वद्रव्यत्वसत्ताप्रमेयत्वज्ञेयत्वानामभिधाय-
कोऽथ च तद्विशेषमेव शिंशपामभिधत्ते। तेन यथाऽस्य सामान्यमनभिधाय

१ न] अभिधातृत्ववद्रमकत्वं न विरुध्यत इति पा।

४ द्भूता] (अ० १ पा० १ अ० ७)

विशेषाभिधानशक्तिर्न विरुध्यते यथा च चक्षुषः सामान्यमनित्यत्वमगृह्णतोऽपि रूपग्रहणशक्तिर्न विरुध्यते। यथा च भवतोऽपि द्रव्यमनभिधायैव तिङा तद्विशेषः कर्तृत्वमुच्यते तथा मम कर्त्रभिधानादृते तद्विशेषसंख्याभिधानं द्रष्टव्यम्। यद्यपि गम्यमानस्य विशेषणसंबन्धो नास्त्यतस्तत्संबन्धदर्शनादाभिधानमिति। तदप्याकृत्यरुणाधिकरणयोरुभयथाऽपि दर्शनान्निराकृतम्। अपि च मधुरो रसः स्निग्धः शीतो गुरुश्चेत्यनेनानैकान्तिकत्वम्। अत्र हि मधुररसस्य गुणत्वाद गुणान्तरैः शीतादिभिः संबन्धो नावकल्पत इत्येतत्प्रतिपादितं द्रव्यं संबध्यते। न च कथंचिदपि रसशब्दस्य द्रव्यवचनत्वम्। तथाऽश्वसहस्रेण नगरं मुषितमिति गम्यमानानामेव (सादिनां) मोषक्रियासंबन्धः। यत्तु क्वचिद्धूमादौ रूपादौ वा न दृश्यते न तावता सर्वत्र स्थितिः कल्पयितुं शक्यते। तस्मान्नाभिधेयः कर्ता। ततश्च श्रौतत्वाभावान्न प्रकरणं बाध्यते। यत्तु कर्मधर्मपक्षे दर्शपूर्णमासविधिनैव विहितत्वात् प्रात्यात्मिको विधिरनर्थकः स्यात्। तस्मात्पुरुषार्थतेति। तत्र ब्रूमः। § 6462

यावन्न विधिसंस्पर्शस्तावन्नास्य प्रयोजनम्।
विना च तेन धात्वर्थो न क्रत्वङ्गं प्रतीयते॥§ 6464

विधिरहितो हि धात्वर्थः स्वयमेव साध्यतां प्रतिपद्यमानोऽनपेक्षितप्रयोज-
941 नत्वान्न शक्यते दर्शपूर्णमासकथंभावेन ग्रहीतुम्। न च तेनागृहीतः प्रयोगवचनेन विधातुं शक्यते। तस्मादवश्यं प्रात्यात्मिकेन विधिना साक्षात्पारम्पर्येण वा पुरुषोपकारित्वं बोधयित्वा धात्वर्थं करणीकृत्य तदतिरित्त प्रयोजनसाध्यापेक्षायां सत्यां संनिहितदर्शपूर्णमासोपकारसंबन्धे तयाऽङ्गत्वं कल्पयितव्यम्। अन्यथा चेतरेतराश्रयं स्यात्। अङ्गत्वाद्विधिर्विधेश्चाङ्गत्वमिति। तस्मादर्थवानङ्गविधिः। अतश्च वदेदित्यनेनैतावदवगतं दर्शपूर्णमासोपकारं वदनेन साधयेदिति। ततोऽनृतपदसामर्थ्यादेवं भवति यद्वदनेन कुर्यात्तदनृतेनेति। पुनश्च नञ्संबन्धाद्यदनृतवदनेनोपकुर्यात्तन्नेति वचनं व्यज्यते। तस्माद्दर्शपूर्णमासोपकाराय वदतो यदनृतं प्रसज्यते तत्प्रतिषेधो विधीयते। ततश्च यावत्कर्मार्थः संवादस्तत्र सर्वत्रानृतं वर्जनीयम्। तेन यवमयः पुरोडाशः कर्तव्य इत्येवमादावध्वर्युमुक्त्वा सक्त्वर्थं मे यवा भविष्यन्ति। तस्माद्व्रीहिमयः क्रियतामित्येवं न विसंवदितव्यम्। **संकल्पस्येति**—च तत्पूर्वत्वाद्वदनमेव प्रतिलक्षयति। अथवा स्वेन बचनेनाध्वर्युमेव संकल्पं कारयित्वेति द्विणिजन्तस्य रूपं द्रष्टव्यम्। आह। यदा स्मृतिप्राप्तनित्यानुवादे, संयोगान्तराच्च विधौ, नानृतं वदितव्यमित्ययमंशस्तुल्यः किं तदा चिन्तायाः प्रयोजनमिति तदुच्यते। § 6465

स्मृतिप्राप्तानुवादे हि स्मार्तं नैमित्तिकं भवेत्।
विधिपक्षे यजुर्वेदविधेस्तद्भेषजक्रिया॥§ 6467

५ प्याकृ] (अ॰ १ पा॰ ३अ॰ ९)
५ रु] (अ॰ ३ पा॰ १अ॰ ६)

स्मृतौ च यदनृतवदननिमित्तं प्रायश्चित्तं तदेव कर्तव्यं यद्यनुवादः।
विधौ पुनरस्य याजुर्वेदिकत्वाद् भ्रेषस्य यजुर्वेदतो यज्ञो विनष्ट इत्य-
न्वाहार्यपचने भुवः स्वाहेति होतव्यम्। स्मृतेस्त्वन्यतरमूलत्वानवधारणान्न
वेदभ्रेषनिमित्तप्रायश्चित्तावधारणं स्यात्। एवं मूलमूलिभावाभ्युपगमेऽपि
स्मृत्यैव तदर्थस्तदतिक्रमश्चानुसृत इति तदीयमेव प्रायश्चित्तम्। ननु त- 942
वापि याजुर्वेदिकत्वज्ञानात्तद्वेदप्रायश्चित्तमेव भवेत्। नैतदस्ति। एतद्ध्याहव-
नीयादिविषयत्वादाहिताग्न्यधिकारमवलम्बते। अनृतप्रतिषेधश्च पुरुषमात्रधर्म-
त्वादनाहिताग्नेरप्यवस्थितः। तेनास्य तावदश्यं स्मार्तं प्रायश्चित्तमपेक्षणीयम्।
तच्चेदपेक्षि तमेकत्वान्निमित्तस्याऽऽहिताग्नेरपि तदेव युक्तमिति वैदिकप्राय-
श्चित्ताभावः। किं च। § 6468

यज्ञेऽन्यतमवेदाङ्गे भ्रष्टे नैमित्तिकं श्रुतम्।
अयज्ञाङ्गविनाशे तु न तस्यावसरो भवेत्॥§ 6470

'यद्युक्तो यज्ञ आर्त्तिमियात्' इति हि सर्वे भ्रेषा यज्ञसंबन्धिनो निमित्तत्वेन श्रूयन्ते। ज्योतिष्टोमसंबन्धिनश्च प्रकरणादासन्। तत्र 'वेदसंयोगान्न प्रकरणेन बाध्येत' इत्यनेन न्यायेन वाक्यबलीयस्त्वात्प्रकरणं तावदतिक्रम्येत। न तु यज्ञसंबन्धपरित्यागे हेतुरस्ति। तस्मादवगतवेदविशेषमूलेष्वपि पुरुषधर्मेषु न तन्निमित्तं प्रायश्चित्तं कर्तव्यम्। यदा तु फलकल्पनाभयात् प्रकरणाच्च क्रतुयुक्तपुरुषधर्मा भवन्त्येवंजातीयका इति पूर्वः पक्षः। शुद्धक्रतुधर्मत्वं च सिद्धान्तस्तदोभयत्रापि याजुर्वेदिकयजभ्रेषनिमित्तमेव प्रायश्चित्तमिति प्रयोजनान्तरं वक्तव्यम्। तदुच्यते। § 6471

विधयोऽपि हि पूर्वस्मिन्पक्षे संस्कारतां गताः।
ते सर्वे याजमानाः स्युर्दीक्षासंस्कारवर्गवत्॥§ 6473

सर्वे हि समिदादयः क्रत्वन्तरगताः स्तोत्रशस्त्रजपादयश्च पूर्वपक्षवादिनः पुरुषसंस्काराः। ते च 'याजमानास्तत्प्रधानत्वात्कर्मवत्' इत्यनेनाधिकरणेन याजमानाः स्युः। तत्र समिदादीनां यागात्मकत्वाद् द्रव्यत्यागव्यापारेण दीक्षणीयादिवदुभयथाऽपि याजमानत्वात्। तद्वदेव च यजमानविवृद्धावपि तन्त्रेण प्रयोग इति न कश्चिद्विशेषो दृश्यते। ये तु स्तोत्रशस्त्रजपादयस्ते गुणभूतकर्तृकर्मनियमसमर्थो प्रधाननियमानधिकृतां प्रधानौद्गात्रादिस-

---

५ स्मृ] स्मृत्यैव तदर्थ इति'—नानृतं ब्रूयात्' इत्यनया स्मृत्या निषेधार्थो विधेयतयाऽनुमृत इत्यर्थः।

५ तिक्र] तदतिक्रमश्चानुसृत इति—'गायत्रीमनृते जपेत्' इत्यनया च निषेधातिक्रमश्च प्रायश्चित्तनिमित्ततयाऽनुसृत इत्यर्थः।

६ द्वेद] तद्वेदप्रायश्चित्तमिति—'यदि यजुष्टो भुवः स्वाहेत्यन्वाहार्यपचने होतव्यम्' इत्यनेन बिहितमित्यर्थः।

१४ वेद] ( अ॰ ३ पा॰ ३ अ॰ १ सू॰ ८ )

२४ याज] ( अ॰ ३ पा॰ ८ अ॰ २ सू॰ ४ )

माख्यां बाधित्वा दन्तधावनादिवद्यजमानकर्तृका भवेयुः। यजमानविवृद्धौ
च साधारणद्रव्यत्यागन्यायेन तन्त्रत्वं न संभवतीति प्रतियजमानं भिद्येर-
न्। प्रतिषेधेष्वपि च यदा विध्यंश एवमवधारितः क्रतुयुक्तपुरुषोपकार्यनृत-
वदनमिति तदाऽस्यैवानृतविशिष्टप्रतिषेधादयमर्थो भवति यजमानेनाऽऽत्म-
संस्कारार्थमाशीःप्रयोगादिषु यदुच्यते तत्र वैकल्पिकावधारणे स्वरूपोच्चारणे
वा मृषात्वं न कर्तव्यमन्यत्र त्वन्येषां च यथेष्टवादित्वमिति। शुद्धक्रतुधर्मप्र-
943 तिषेधे तु यावत्क्रतौ किंचिद्वदनं यजमानस्यर्त्विजां वाऽनृतं प्रसज्यते त-
त्सर्वं न कर्तव्यं क्रतुसंबन्धित्वाविशेषात्। अतश्च यथैव यजमानेन व्रीहिमयं
संकल्प्य न यवमयो दातव्यस्तथैवाध्वर्य्वादिभिरप्यन्यतरं पक्षं करिष्याम
इत्युक्त्वा न लाघवादिवशेन पुनर्विसंवदितव्यम्। यदपि च पुनः संस्कारार्थं
किंचित्तदपि क्रत्वर्थांशेनैव वर्जयितव्यम्। ननु च प्रतिषेधार्थे गुणभूतः पुरुष-
स्तत आध्वर्यवसमाख्या नियामिकेति प्रणीताप्रणयनादिवदध्वर्युरेकोऽनृत-
प्रतिषेधमवलम्बते। सत्यमवलम्बेत यदि प्रतिषेधार्थोऽनुष्ठेयो भवेत्। अयं
त्वनुष्ठानाभावात्मकत्वान्न कर्तृविशेषमपेक्षते। श्रुत्यैव च प्रतिषेधः प्राप्त्या संब-
द्धः। स यत्र प्राप्तस्तत्र स्वसामर्थ्येन गच्छन्न शक्यते समाख्यया वारयितुम्।
ननु वदेदित्येतावद्विध्यंशमात्रमालोच्यमानं समाख्या नियंस्यति। ततश्च प्र-
तिषेधोऽपि तदनुसारित्वान्नियतो भविष्यति। नैतदेवम्। पर्यवसिते हि शास्त्रार्थे
तत्कर्तुरपेक्षायां सत्यां समाख्याऽवतरति। न च वदेदित्येतावतः शास्त्रार्थ-
त्वं विज्ञायते। प्रतिषेधसंबन्धाद्धि तदनुवादत्वेन स्थितम्। न चानूद्यमानस्य
श्रुतमपि विशेषणं भवतीति ग्रहाधिकरणे साधितम्। *किमुत समाख्यया
विधीयमानपदार्थकर्तृविशेषसंबन्धमात्र एव व्याप्रियते। § 6474

> तस्मादनूद्यमानत्वाद्वदनं न विशेष्यते।
> प्रतिषेधोऽपि तद्गामी विशेष्टुं नैव शक्यते॥ § 6476

तस्मादस्ति सर्वत्र प्रयोजनमतः सम्यग्विचारितमिति सिद्धम्॥ १३॥

§ 6477

## इति कर्त्रधिकरणम्॥ ४॥

---

९ प] अन्यतरं पक्षमिति—षोडशिग्रहणत-दभावादिरूपवैकल्पिकानां प्रयोगारम्भेऽध्वर्य्वादिभिरन्यतरपक्षावधारणं कृत्वा पुनः पक्षान्तरग्रहणेन न वितंवदितव्यमित्यर्थः।

१४ श्रु] श्रुत्येति—निषेध्यपदसाहचर्यलक्षणयेत्यर्थः।

१४ प्राप्त्या] प्राप्त्या—निषेध्यप्राप्त्येत्यर्थः।

१५ स] सः—निषेध्योऽर्थ इत्यर्थः।

२० हा] ( अ॰ ३ पा॰ १ अ॰ ७ )

२० *] किमुत समाख्ययेति—यदातदापदाध्याहारेण योजना अयमाशयः। निषेध्यमात्रे शास्त्रार्थापर्यवसानात्कर्त्रपेक्षानुपप-त्तेर्निषेधान्वये चानुवादत्वान्निषेध्यस्य, ग्रहैकत्वाधिकरणन्यायेन श्रुतनोपि कर्त्रा विशेष्यत्वायोगे किमु वक्तव्यं समाख्यानिकेन कर्त्रा विशेष्यतायामिति।

## ०.०.१२७ जञ्भ्यमानाधिकरणम्

पूर्वत्र श्रुत्या सह प्रकरणं विरुध्यते न विरुध्यत इति विचारितम्। इदानीं 944
लिङ्गवाक्याभ्यां सह विचार्यते। तत्र ज्योतिष्टोमप्रकरणविहितस्य तीर्थस्नानस्य दर्शपूर्णमासप्रकरणविहितस्य जृम्भिकानिमित्तस्य मन्त्रोच्चारणस्य किमर्थत्वं पुनः स्यादिति निवीताधिकरणवदेव पक्षा रचयितव्याः। तेषामपि सारवत्तरत्वादनन्तराधिकरणे त्रय उपन्यस्ताः पुरुषमात्रधर्मः प्रकरणयुक्तपुरुषधर्मः क्रतुधर्म इति। त एवात्राप्यनुवर्तन्ते। तत्र पूर्वाधिकरणेनैव प्रकरणात् क्रत्वर्थत्वे प्राप्ते पूर्वपक्षः परिगृह्यते। § 6479

यथा प्रकरणं हित्वा द्वादशत्वं वशीकृतम्।
अहीनेन तथा पुंसा धर्मावेतौ वशीकृतौ॥§ 6481

स्नानं तावद्योग्यतयैव मलापकर्षण र्थत्वात्पुरुषार्थं गम्यते। तीर्थविशेषणं च सुखावतरत्वाद् दुःखावतरह्रदादि व्यावर्तयत् पुरुषस्योपकरोति न क्रतोः। यदपि च स्मरणं भोजनादिपूर्वभाविनियमरूपेण तदपि तदर्थस्यैव नियमादृष्टं पुरुषगाम्येव करोति। तेनावधारितप्रयोजनेन संबध्यमानस्तीर्थनियमोऽपि पुरुषार्थो विज्ञायते। तत्राप्येकं तावद्दृष्टमेव प्रयोजनमवतरणसुखम्।
अथाप्युद्धृतोदकादिनिवृत्तिरूपो नियमो न दृष्टं साधयतीत्यदृष्टं कल्प्यते त- 945
थाऽप्यस्त्येव फलं 'तीर्थमेव हि सजातानां भवति' इति। न चैवं वाक्यात् पुरुषसंयुक्तस्य प्रकरणमीश्वरम् 'असंयुक्तं प्रकरणात्' इति स्थितत्वात्। तथा यद्यपि ब्रूयादित्यनेन कर्ता नोपात्तस्तथाऽपि जञ्भ्यमानशब्दः कृदन्तत्वात् 'कर्तरि कृत्' इति चानन्यपरस्मरणात्कर्तृविशेषणं पुरुषमुपादत्ते। तेन स्ववाक्योपात्तेन संयुक्तं मन्त्राभिधानं प्रकरणग्राह्यत्वं न प्रतिपद्यते। पुरुषसंयोगो चास्त्येव तत्फलम्। प्राणापानयोरात्मनि धारणाच्चिरजीवित्वम्। तस्मात्पुरुषमात्रधर्मा एवंजातीयका इति॥ १४॥ § 6482

पुरुषधर्म इत्येतावद्ब्रूमः। यत्तु पुरुषमात्रधर्मस्ततश्चोत्कर्ष इत्येतदसह्यम्। कुतः। § 6483

अविरोधात्समावेशे लभ्यमाने प्रमाणयोः।
बाधो न युज्यते कर्तुं न च दूरात्फलश्रुतिः॥§ 6485

---

६ त्र] 'किं तावत्प्राप्तम्' इति भाष्यं किं तावादित्येतावता किं तावद्युक्तमिति पृष्टे प्राप्तमित्यनेन—यत्पूर्वाधिकरणेन प्राप्तं तद्युक्तमित्येवं शुद्धक्रतुधर्मपक्षोक्त्यर्थतया व्याख्याय सूत्रोपान्यः पूर्वपक्षः परिगृह्यत इत्येवंपरतया व्यचष्टे-तत्रेत्या, विना।
१२ स्म] स्मरणमिति-'अस्नाताशी मलं भुङ्क्ते' इत्येवंरूपमित्यर्थः।
१७ असंयु] ( अ० ३ पा० ३ अ० ४ सू० ११ )
१९ र्त] पा० सू० ( ३—४—६७ )।
४ च] न च दूरेतिसंनिहितस्य क्रतूपकाराख्यस्य फलस्य संभवे विप्रकृष्टस्य स्वर्गाख्यफलस्य कल्पनां न च युक्तेत्यर्थः।

पुरुषमात्रसंयोगो हि विना कारणेन प्रकरणं बाध्येत। नन्वितरत्रापि लिङ्गवाक्ये बाध्येयाताम्। सत्यं बाध्येयातां यद्यपुरुषेण संबन्धोऽभ्युपगम्येत। वयं तु प्रकरणगतपुरुषधर्मं ब्रुवाणा न किंचिदपि बाधिष्यामहे। न प्राकरणिके जञ्भ्यमाने स्नातरि च सकलशब्दार्थो योग्यत्वं वा नास्ति। नन्वविशेषबुद्धिर्बलवत्प्रमाणप्रभूता दुर्बलप्रमाणमूलया विशेषबुद्ध्या न युक्ता निवर्तयितुम्। एषा तावदवश्यमेव निवर्तनीया। न ह्यविदुषोऽसमर्थस्य वाऽधिकारः संभवति। नन्वेवं प्रकरणं विशेषकमभ्युपगतं भवति। नैतदेवम्। ग्राहक-
946 मेवात्रापि प्रकरणं, येनोद्दिश्यमानजञ्भ्यमानविशेषणत्वं प्रतिपद्यते। न हि तस्यैष व्यापारोऽवकल्पते। कथंभावस्येत्थंभावादन्येनासंबन्धात्। योऽपि प्रकरणगृहीतपुरुषमपेक्षमाणः प्रकरणाद्विशेषलाभं मन्यते तस्यापि व्यावृत्ते प्रकरणव्यापारे तद्गृहीतत्वापेक्षा भवतीति नैव तद्विशेषणमवकल्पते। कथं तर्हि प्रकृतपुरुषप्रत्ययः। उच्यते। विनैव विशेषणत्वेनात्र प्रकरणस्थपुरुषग्रहणसिद्धिः। तथाहि। § 6486

व्रीहीणां प्रोक्षणं यद्वल्लौकिकानामनर्थकम्।
तद्वदेतदपीत्येवं फलाय प्रकृतं गतम्॥§ 6488

यथा हि व्रीह्यादि प्रोक्षणादिभिः संबध्यमानं न च तावत्प्रकरणेन विशेष्यते। अथ चाऽऽनर्थक्यभयाद्विप्रकृष्टफलकल्पनाप्रमाणाभावाच्च क्रतुसाधनत्वेन प्रयोजनवत्त्वाच्च प्रकृतं गृह्यते तथाऽत्र फलकल्पनाभयात्प्रत्यासत्त्यनुरोधेन प्राकरणिकजञ्भ्यमानग्रहणं क्रियते। न हि तत्संभवेऽन्यफलकल्पनाप्रमाणं लभ्यते। ननु च क्लृप्तमेवानयोः फलमित्युक्तम्। सत्यमुक्तं न त्वीदृशेन शब्देन फलमुच्यते। कामशब्दोपबन्धाभावात्। एतदेव च **नात्र विधायकं शब्दमुपलभामह** इत्याह। फलविधानं हीदृशेन शब्देन न क्रियत इति वक्ष्यामः। इतरथा पुनर्ब्रूयादित्यत्राप्यस्त्येव विधिविभक्तिरित्ययुक्तमेव विधायकाभाववचनम्। न हि धत्त इत्येतस्याविधायकत्वादुपालम्भो भवति। सर्वत्रैव फलांशस्याविधेयत्वात्। तस्माद्यथोक्तमेव योजनीयम्। ‘द्रव्यसंस्कारकर्मसु’ इत्यनेन चार्थवादत्वं वक्ष्यते। ‘फलं तु तत्प्रधानायाम्’
947 इति च कामपदोपबद्धायां तदर्थत्वम्। आह। पुरुषस्य संस्कारकमिति गृह्णीम इति संस्कारशब्दोच्चारणात्क्रतुयुक्तपुरुषधर्मत्वमभ्युपगच्छति। न हि

९ क] कथंभावस्येत्यंभावादन्येनासंबन्धादिति—कथमिति प्रकाराकाङ्क्षारूपस्य प्रकरणस्य इत्थमित्युपायेतिकर्तव्यताद्यपरपयार्थप्रकाररूपादन्येन विशेष्यादिनाऽनन्वयादित्यर्थः।
११ भ] भवतीति—इतिर्निपातत्वाद्यद्यपितथाऽपिशब्दार्थका। तथा च यद्यपि प्रकरणगृहीतत्वापेक्षा भवति तथाऽपि व्यावृतेबाधिते, प्रकरणव्यापारे नैव प्रकरणं विशेषकं भवतीत्येवं योजनयाऽर्थो ज्ञेयः।
१५ लाय] अमेन च ‘किं तु फलं तत्र कल्पनीयम् इति भाष्यं व्याख्यातं ज्ञेयम्।
२३ क्ष्या] ( अ॰ ४ पा॰ ३ अ॰ १ ) इत्यत्रेत्यर्थः
२६ सं] ( अ ४ पा॰ ३ अ॰ ५ सू॰ १ )
२६ फ] ( अ॰ ४ पा॰ ३ अ॰ १ सू॰ ३ )।

स्वतन्त्रः फलवत्त्वात्संस्कार इत्यभिधीयते। **दर्शपूर्णमासावेव कुर्वत इत्येतन्नेति—कोऽभिप्रायः**। सर्वथा तावज्जञ्जभ्यमानधर्मत्वेनैष गम्यमान आनर्थक्येन लौकिकान्निवर्त्येत। यस्तु ज्योतिष्टोमादौ जञ्जभ्यमानः स दार्शपूर्णमासिकवदेव, सप्रयोजन इत्यशक्यो वर्जयितुमिति। अतः क्रतुमात्रयुक्तपुरुषधर्मो भवति। अस्योत्तरं गूढाभिप्रायम्। **संस्कृतेन तु तेन प्रयोजनं नास्तीति**। कुतः। § 6489

न संबन्धो निवीतस्य यथैवाऽऽतिथ्यकर्मणा।
श्रुत्यादिभिरसंयोगात्तथैवास्य क्रियान्तरैः॥§ 6491

यदि सर्वत्र विहितः सन्ननर्थकत्वेन लौकिकान्निवर्त्येत तत एतदेवं स्यात्। न त्वसावेवं निवर्तयितुं शक्यते। न हि प्रवृत्तानि शास्त्राणि केन चिन्निवर्त्यन्ते। किं तर्हि। आदित एवैषां प्रवृत्तिप्रतिबन्धोऽवधार्यते। सा चैवं प्रतिबध्यते। यदि ‘द्रव्यसंख्याहेतुसमुदायं वा’ इत्यधिकरणन्यायेन स्वरूपसंगतावनर्थकत्वाज्जञ्जभ्यमानशब्देनापूर्वसाधनत्वं लक्ष्यते। तल्लक्षणां च न प्रकरणादृते लभ्यते। न च दर्शपूर्णमासापूर्वं मुक्त्वाऽन्यस्य प्रकरणमस्ति। तस्मात्तदपूर्वसाधनं यो जञ्जभ्यमानस्तस्यैवैष संस्कारः। एवं तीर्थस्नानमपि वक्तव्यम्। एतौ च परिचोदनापरिहारौ सूत्रकार एव वक्ष्यति। ‘आरादपीति चेत्’ ‘न तद्वाक्यं हि तदर्थत्वात्’ इति। यत्तु प्रयोगवचनेन सिद्धेर्विध्यानर्थक्यमिति। तत्राऽऽह। वरं तस्यानुवादत्वं न च निष्फलपुरुषमात्रधर्मविधानमिति। इह भाष्यकारेण 948
निरन्तरयोर्द्वयोरधिकरणयोरेकस्याः परिचोदनायाः परस्परविरुद्धपरिहारद्वयमुक्तम्। ‘अङ्गं सत्प्रयोगवचनेन गृह्यते। न चाविहितमङ्गं भवति’ इत्येकः। **एवं सत्यनुवादो भविष्यति**, इत्यपरः। तत्र कस्य सत्यत्वं कस्यानृतत्वमिति विवेक्तव्यम्। यथा तावत्पूर्वत्र व्याख्यातं तथा विधित्वमेव सत्यम्। अनुवादाभिधानं त्वभ्युपेत्यवादमात्रमिति गम्यते। शक्यं त्वनुवादत्वं समर्थयितुम। कुतः। § 6492

अपर्यायविधायित्वादेकोऽङ्गानां विधिर्यतः।
प्रात्यात्मिकानुवादत्वं शक्यते भाषितुं ततः॥§ 6494

‘विधेस्त्वेकश्रुतित्वादपर्यायविधानात्’ इत्यत्र सर्वेषामेवाङ्गानामेकप्रयोजनकल्पनयैकं विधिं वक्ष्यति। स च प्रयोगवचनेन विधीयमानानां भविष्यति। प्रात्यात्मिकविधीनां पर्यायप्रवृत्तेः। पुरुषश्च येन प्रवर्त्यते स विधिः। अङ्ग-

---

१४ साध] अनेन च ‘संस्कृतेन तु तेन नास्ति प्रयोजनम्’ इति भाष्यं संकृस्तेन तु पुरुषेण साध्यं प्रयोज कीभूतमपूर्वगन्यत्र नास्तीति व्याख्यातं विज्ञेयम्।
१७ द] २( अ० ३ पा० ७ अ० १ सू० ४ )।
२३ ग] इति केचिदिति शेषः।
२३ क्यं] एतदधिकरणोक्तस्यैव परिहारस्य सत्यत्वमिति वदतां परेषां मतमनुसृत्याऽऽह—शक्यमित्यादिना।
२७ विधे] ( अ० ११ पा० १ अ० ३ सू० १६ )

प्रधानवत्यां च भावनायां युगपत्पुरुषनियोगः। तस्मात् प्रात्यात्मिकानामनुवादत्वम्। अत्राभिधीयते। द्वावप्येतौ ग्रन्थौ साधू। कथम्। पूर्वस्तावत् 'न चाविहितमङ्गं भवति' इत्यनया चोपपत्त्या न विरुद्धः। उक्तं ह्येतद्विधावनाश्रीयमाणे धात्वर्थमात्रस्य साध्यत्वान्निष्प्रयोजनत्वे सति न शक्यमङ्गत्वं कल्पयितुं तेन तावद्विधिः। अथ चानुवादः कथम्। पूर्वेण विधिनाऽङ्गत्वं प्रकल्प्य प्रयोगवचनं यावन्नीयते तावन्तं च कालमसौ विधिरूपे णावतिष्ठते। प्रयोगवचनग्रहणे तु सति तद्गतविधिसंस्पर्शादेव पुरुषप्रवृत्तिसिद्धेरनुवादत्वम्। अतः प्राक् प्रयोगवचनसमर्पणाद्विधित्वेन विना न व्यवहारः सिध्यतीति विधिः। उत्तरकाले तु तत एव प्रवृत्तिसिद्धेरनुवाद इत्युभयमपि साधूक्तम्॥ १५॥ § 6495

949 प्रकरणेऽहीनस्यात्यन्तमविद्यमानत्वाद्वाक्यसंयुक्तद्वादशोपसत्त्वं प्रकरणेनानुगृह्यमाणमुत्कृष्यत इत्यदृष्टान्तः॥ १६॥ § 6496

इति जञ्जभ्यमानाधिकरणम्॥ ५॥

## ०.०.१२८ सर्वपरिदानाधिकरणम्

शंयाविति ब्राह्मणावगोरणादिप्रतिषेधवाक्योपलक्षणम्। तत्र पूर्ववदेव पक्षाः। तेषामपि प्राकरणिकं संबन्धद्वयमप्येकीकृत्य निर्दिष्टौ क्रतुधर्मः शुद्धपुरुषधर्मश्चेति द्वावेव पक्षौ। समस्तेन चानृतवदनप्रतिषेधन्यायेन क्रत्वर्थस्यावगोरणस्य प्रसज्यमानस्य प्रतिषेधः। का च तत्र प्रसक्तिः। चतुर्ब्राह्मणसाध्यत्वाद्दर्शपूर्णमासयोस्तदानत्यर्थं सामदानभेददण्डेषु प्रसज्य-
950 मानेष्वन्वाहार्यदानेनाऽऽनमयेदिति गम्यते। यदा तन्मात्रेण नाऽऽनमन्मि तदा पुनर्यथा दानादानतिर्भवति तथा प्रयत्यमाने लौकिकोपायप्रसक्तौ सत्यामयं दण्डप्रकारोऽवगोरणादिः पक्षे प्राप्नोति स प्रतिषिध्यते। न कर्तव्यं, तेन, तद्व्यतिरेकोपायान्तराश्रयणं कार्यमित्युक्तं भवति। तथा प्राप्तेऽभिधीयते। § 6498

वाक्येन सर्वसंयोगात्सर्वेभ्यो वरदानतः।

२ अत्रा] स्वाभिप्रायमाहअत्राभिधीयत इत्यादिना।
५ पू] प्रत्यात्मिबवाक्यार्थालोचनवेलायां विधित्वं प्रकरणकल्पिताङ्गवाक्यैकवाक्यतापन्नप्रधानवाक्यार्थत्र्यंशभावनाविधिवेलायां प्रयोगविधिसिद्धपुरुषप्रवृत्त्यनुवात्वमित्येवं विरोधपरिहाराशयं वदति—पूर्वेणेत्यादिना।

५ तु] चतुर्ब्राह्मणेति—ब्रह्माध्वर्युहोत्राग्नीध्राख्याश्चत्वार ऋत्विजो दर्शपूर्णमासयोरित्यर्थ। भहापिठरपरिमितस्याप्यन्वाहार्यस्याऽऽनतिजननासामर्थ्यद्योतनाय चतुःशब्दः प्रयुक्तः।
६ येदिति] इति नियम इति पा०।

फलस्याकल्पितत्वाच्च नेष्टः प्रकरणग्रहः॥§ 6500

यच्छब्दस्तावच्छ्रुत्यैव पुरुषमुपादत्ते। न च प्रकरणयुक्तपुरुषधर्मः। न ह्येष कश्चित्संस्कारः। किं तर्हि। नरकपरिहारार्थोऽयं प्रतिषेधः। स च पुरुषगत एव। नरकपातः संकीर्तितो न तु क्रतुगतः। यस्य च प्रत्यवायस्तचस्य तत्परिहारार्थः प्रतिषेधः। 'शतेन यातयात् सहस्रेण यातयात्' इति शतगुणं सहस्रगुणमनुभवेदित्यर्थः। अथ वा संख्येयान्तरानुपादानादुपरि संवत्सरग्रहणादिहापि संवत्सरशतेन यातनां निस्तरेत्सहस्रेणेत्येवं संबध्यते। निषेधफलं च प्रदर्शनमात्रेणैव संबध्यते न विधिफलवत्कामपदोपबन्धमपेक्षते। न हि कश्चित्संत्यक्तव्यमर्थं कामयते। न चान्यः कश्चित्तस्योपादानप्रकारोऽस्ति। तेनानुभवेदित्येतावतैवोपादानं विज्ञायते। तच्चेहाविकलमस्ति। यत्तु भाष्यकारेण लिङ्गदर्शनं कृतं तत्फलस्याविधेयत्वादसंबद्धम्। यदपि तावदिष्टं तदपि न विधीयते यत्त्वनिष्टं तत्र पुरुषप्रवृत्त्यसंभवादत्यन्तविपरीत एव विध्युपन्यासः। तस्मादनिष्टफलोपादानमात्रेणैव तद्विषयनिषेधसिद्धेरनिष्टफलस्य च पुरुषगामित्वात्पुरुषधर्मता। तथा च 'सोऽब्रवीत्किं मे प्रजाया इति' प्रजामात्रानुग्रह एव शंयुना प्रार्थितः। देवैश्च यत्कामयस इत्युक्ते शंयुना ब्राह्मणमात्रमेव तेभ्यः परीत्तं परिपालनायोपक्षिप्तम्। तैश्च ब्राह्मणमात्रमेवोद्दिश्यानुग्रहः प्रत्त इति वाक्यशेषः समर्थितो भविष्यतीति॥ १७॥
§ 6501

इति सर्वपरिदानाधिकरणम्॥ ६।

## ०.०.१२९ संवादाधिकरणम्

'नास्या अन्नमद्यात्' इति वाक्यान्तरमपि सदन्यार्थदर्शनोपयिकत्वात्स- 951
होदाहृतम्। मलवद्वासाः—ऋतुमती स्त्री। तत्संवादप्रतिषेधेऽपि त एव पक्षाः। तत्र यच्छब्दजञ्भ्यमानशब्दतुल्योपादानशब्दाभावात्संवादस्य च क्रतौ पुरुषो चाविशेषप्रसक्तेरभिहितेनानृतवदनप्रतिषेधन्यायेन 'पत्नि पत्न्येष ते लोकः' इत्यादेः क्रत्वर्थस्य संवादस्य प्रतिषेध इति प्राप्तेऽन्यथा प्रत्यवस्थीयते।
§ 6503

निषेधः प्राप्तिपूर्वोऽयं प्राप्तिश्च पुरुषे स्थिता।
न हि प्रागपरुद्धायाः प्राप्तिरस्ति क्रतुं प्रति॥§ 6505

'तामपरुध्य यजेत' इति हि सामान्यतः सर्वस्मादेव क्रत्वनुष्ठानादसौ निवर्तिता कथं संवादे प्रसज्येत। पुरुषस्य तु स्वातन्त्र्यत्सर्वकालसंवादे

१ ताम] 'यस्य व्रत्येऽहन्पत्न्यनालम्भुका स्यात्' इति पूर्व शेषः। तै० ब्रा (३—७—१)।

प्राप्ते निषेधम्यार्थवता। यदि च स्मृतिरेवमर्था विद्यते ततो मूलमूलिभाव एवाभ्युपगन्तव्यः। न हि केनचिन्नि त्यानुवादत्वमुक्तम्॥ १८॥ § 6506

इतश्च पुरुषमात्रधर्मः। कुतः। § 6507

प्रायोवचननिर्णेयं संदिग्धं वस्तु वर्णितम्।
असंदिग्धश्च पुंधर्मो नास्या अन्नमिति स्मृतेः॥§ 6509

952 ‘नास्या अन्नमद्यात्’ इति ‘अभ्यञ्जन वै स्त्रिया अन्नम्’ इति वाक्यशेषादुपगमनप्रतिषेधः। तथा हि। लाटानामप्यभ्यञ्जनपर्यायान्तरवाच्यलक्षणमुपगनं प्रसिद्धम्। तच्च न कदाचिच्छब्दादर्थाद्वा क्रत्वर्थ प्रसक्तम्। पुरुषार्थं तु सर्वप्राणिप्रसिद्धम्। यदर्था च प्राप्तिस्तदर्थः प्रतिषेधं इत्युक्तम। ब्रह्मचर्यविधानाच्च न ऋतुकाले पुरुषार्थस्यापि सतस्तत्प्रसक्तिर्येन स्वकाले निषिध्यते। तस्मादुल्लङ्घ्य तावत्प्रकरणमेव तावत्पुरुषधर्मो भवति। ततश्च तत्सामान्यादितरेषु तथात्वमिति संवादतादर्थ्यसिद्धिः॥ १९॥ § 6510

इति संवादाधिकरणम्॥ ७॥

## ०.०.१३० हिरण्यधारणाधिकरणम्

इदानीमप्रकरणाधीतानि श्रुतिलिङ्गवाक्यानि प्रकरणसमवायं गच्छन्ति नेति विचार्यते। ‘तस्मात्सुवर्ण हिरण्यं भार्यं दुर्वणोऽस्यं भ्रातृव्यो भवति’ इत्येवमादिषु संदेहः। किं कर्मसु हिरण्यधारणमनूद्य सुवर्णता विधीयते। वासःपरिधाने च शोभनत्वमुत विशिष्टविधानरूपेण नित्यः पुरुषधर्मो विधीयत इति। तत्रानेकार्थविधिभयात्कर्मस्थाहिरण्यवासोनुवादेन सुवर्णशोभनत्वविधिप्राप्तावुच्यते पुरुषधर्म इति। कुतः। § 6512

हिरण्यवाससो धर्मो भवंस्तावदनर्थकः।
कर्णणा सह संबन्धे प्रमाणं तु न विद्यते॥§ 6514

प्रकरणाम्नानस्य ह्येतदेव प्रयोजनं कथं नाम तदङ्गत्वं विज्ञायेतेति। यद्यप्रकरणाधीतस्यापि कर्माङ्गतैव स्यात्ततः प्रकरणाम्नानमनर्थकं भवेत्। यतस्तु वेदेनैव प्रकरणाप्रकरणाम्नानविवेकः कृतस्ततोऽवगम्यते नूनं प्रकाणाधीतानां पुरुषधर्मत्वमिति॥ २०॥ § 6515

953 यद्यपि तावद्विशिष्टविधानं तथाऽपि कर्मशेष एव स्यात्। अन्यथा हि फलं कल्प्येत। ननु ऋतुसंबन्धोऽपि कल्पयितव्य एव। सत्यं प्रमाणवती हि तत्कल्पना। कर्मणश्च सामान्येन प्रयोजनाकाङ्क्षायां कर्मैवोपतिष्ठते। तेन तत्संब-

---

२ र्णित] (अ॰ २ पा॰ ३ अ॰ ६)    इत्यत्रेति शेषः

न्धः प्रमाणवान्, न स्वर्गसंबन्धः। एवं च मन्यते। यथा यागदानहोमान्मुक्त्वा नान्यत्प्रधानकर्मत्वं प्रतिपद्यते। न चेह यागादित्वमस्ति संप्रदानाद्यभावात्। अत औत्पत्तिकेनाङ्गत्वेन कर्मशेषत्वम्। अथवा धारणमेतच्छ्रूयते। तच्चोत्पत्त्यैव धार्यमाणशेषभूतम्। न च लौकिकस्य निष्प्रयोजनत्वात्संस्कारार्हत्वम्। अतः कर्माङ्गभूतयोर्वासोहिरण्ययोर्विधिः। अथवा तत एवानेकार्थविधिदोषात्सति च संभवे बलाद्गुणे विधिशक्तिसंचारणाद्धिरण्यधारणं 'हि रण्यं हस्तेन भवति' अथ गृह्णाति' 'हिरण्यं हस्ते संप्रदाय षोडशिना स्तुवते' इत्येवमादिवाक्यविहितमनूद्य सुवर्णता विधीयते। 'वासः परिधत्ते' इति चैतद्विहिते वाससि शोभनत्वम्। एवं च सूत्रकाराणां 'हिरण्यमिति जातरूपं प्रतीयात्' इत्यादिपरिभाषणस्यैतदेव मूलम्। अन्यथा रजतजातरूपसाधारणे सति हिरण्यशब्देऽन्यतरावधा रणमूलमन्यत्कल्प्यं स्यात्। 'अद्रव्यत्वात्' इति च नात्र द्रव्यं विधीयते। किं तर्हि। तद्विशेषमात्रविधानमेतत्। अतश्च यत्र द्रव्यं तत्रानेन गन्तव्यमिति। § 6516

यत्त्वत्र भाष्यकारेण देवताग्रहणं कृतम्।
तदुत्सूत्रमयुक्तं च प्रधानं हि जपाद्यपि॥ § 6518

अयागानामपि प्राधान्यदर्शनान्न किंचिद्देवताग्रहणेनेति॥ २१॥ § 6519

कर्माङ्गत्वे चास्याः क्रियाया आध्वर्यवसमाख्या विनियोक्त्री भविष्यति। पुरुषधर्मत्वे बाध्येत। यदाऽपि हिरण्यानुवादेन सुवर्णता विधीयते तदाऽपि तद्विधिवशवर्तित्वादक्रियात्मकत्वाच्च नैव समाख्या व्याप्रियत इति वैदिकत्वसामान्यं वेदसंयोगस्यार्थः। तेन यो नाम वदेल्लोकतोऽप्यस्त्येव वासोहिर- 954
ण्यधारणप्राप्तिरतस्तदनुवादेनापि शक्यं गुणविधानमिति सोऽपि व्यावर्तितो भवति॥ २२॥ § 6520

पूर्वं धारणस्य स्वाभाविकमेव संस्कारत्वमित्युपन्यस्तम्। इदानीं तत्रैवोपचयहेतुरुच्यते कर्मत्वनिर्देशादिति। तत्र हिरण्यमित्यमन्तत्वदर्शनाद् **द्वितीयार्थसंयोगा**दिति च भाष्यद्व्रीहीनितिवत् द्वितीयेयमिति भ्रान्तिर्भविष्यति कृत्यप्रत्ययेन त्वभिहितत्वान्नात्र कर्मणि द्वितीयोत्पन्ना प्रथमैवेयम्। द्वितीयार्थस्तु भार्यमिति ण्यत्प्रत्ययेनोक्त इति द्रव्यपरत्वाभिधानम्। अत एव भाष्यकारेणापि **द्वितीयार्थसंयोगा**दित्युक्तम्। अन्यथा द्वितीयासंयोगादित्येवावक्ष्यम्। तस्मात्संस्कारत्वात्कर्मशेषत्वं धारणस्य॥ २३॥ § 6521

कर्मसंबन्धस्तावन्न केनचित्क्रियते। सर्वो ह्यनारभ्यवादो वाक्यसंयोगेनाङ्गं विधत्ते, लिङ्गेन वा केनचिदव्यभिचारिणा। तदिह वाक्यसंयोगस्तावन्नास्त्येव हिरण्यधारणमपि व्यभिचारादलिङ्गम्। तदेव कर्तव्यातावचनेन विशेष्यते। यदि कर्तव्यतावचनं विशेषणं ततश्च तद्व्यापारोपक्षयादविधायकत्वप्रसङ्गः। तेन द्रव्यस्वरूपसंबन्धमात्रमेव प्रमाणवत्। तत्र चाऽऽनर्थक्यमिति न संस्कारता। न चेहापूर्वसाधनताकारितः संबन्धोऽवकल्पते। प्रकरणलभ्यत्वादपूर्वसाधनलक्षणायाः। तस्माद्भूतभव्यसमुच्चारणन्यायेनैव हिरण्यसाधनकं वासःसाधनकं

च धारणं परिधानं च कर्तव्यम्। किं प्रयोजनमित्यर्थाक्षिप्तेनापि तावत्क-
र्त्रा संबन्ध इति पुरुषोपकारकल्पना। सुवाससेति बहुव्रीहेरन्यपदार्थप्रधान-
त्वाद्विस्पष्टमेव पुरुषप्राधान्यम्। नन्वेवं सति फलं कल्प्यम्। नैष दोषः।
सामान्यतः पुरुषार्थत्वेऽवधारिते तस्य सुकल्प्यत्वात्। स्वर्गाद्युत्पत्तेश्च क्रियात्म-
कत्वादन्यत्र वेदमूलत्वादुभयमपि साधारणं पर्युपस्थापकमिति कर्मोपस्थापन-
955 निवृत्तिः। अपि च स्ववाक्यगतमेव भ्रातृव्यदुर्वर्णताकरणं रूपधारणं फलमुभ-
यत्रापि श्रूयते। सत्यपि चार्थवादसरूपत्वे पारार्थ्यानवधारणादेवंजातीयकेषु
फलविधित्वं वक्ष्यति 'फलमात्रेयो निर्देशात्' इति। तत्र हि क्लृप्तसंबन्धस्यैव
कामत्वमात्रं परिकल्प्य क्रियायास्तादर्थ्यमध्यवसातव्यम्। अन्यत्र क्रतुसंब-
न्धात्प्रभृति सर्वं कल्पनीयम्। तस्मात्सर्वकामादिपदसंयोगवदिहापि फलेन
संबन्धाद्विशिष्टविधानाच्च कर्मोपदिश्यते। तथा च स्मृतिः—'न जीर्णमलव-
द्वासाः स्यात्। धारयेद्वैणवं दण्डं शुभे रौक्मे च कुण्डल' इत्यादि सूपप-
त्स्यते॥ २४॥ § 6522

इति हिरण्यधारणाधिकरणम्॥ ८॥

## ०.०.१३१ जयादीनां वैदिककर्माङ्गताधिकरणम्

इह वाक्यावधारितकर्मशेषत्वानां तद्विशेषसंबन्धश्चिन्त्यते। पूर्वपक्ष-
वादी तत्र पश्यन्नप्याहवनीयसंयोगं होमानां प्राधान्यात्तद्वशेनाऽऽहवनीय-
प्रवृत्तेः कृषिसेवादीनामपि ऋद्धिसाधनकर्मत्वाविशेषाच्छक्यते येन कर्मणा
ऋद्धिमिच्छेदित्येवमुपलक्षणं कर्तुमिति मन्यमान आह—सर्वकर्मणां शेषो
जयादिरिति। तेन सेवादिनाऽपि ऋद्धिमिच्छन्नाहवनीये जयादीञ्जुहुयात्। न
चाऽऽहवनीयस्यैते न प्रयोजकाः। होममात्रोद्देशेनाऽऽहवनीयविधानात्। ते-
नानाहिताग्नेर्मा नाम भूवन्। आहिताग्निना तु वर्णानुरूपं लौकिकमपि क-
र्मानुतिष्ठता कर्तव्याः। एवं चानारभ्यवादस्वरसो न भग्नो भविष्यति। न
956 चैवमादयः साक्षात्कर्मसंबन्धिनः प्रकृत्यर्थाः स्थारयन्ति। कामं वा पुनरुक्त-
भयाद्विकृतिं वर्जयेयुः। कृष्यादिषु तु न काचित्पुनरुक्तताशङ्केत्यवर्जनमेव
युक्तम्॥ २५॥ § 6524

व्यवतिष्ठेरन्नेते होमा वैदिकेष्वेव न सर्वत्र भवेयुः। कुतः। § 6525

समानदेशता नित्यमिष्यतेऽङ्गप्रधानयोः।
न च कृष्यादिभिः साकमेषां स्यात्तुल्यदेशता॥ § 6527

---

८ ति] (अ° ४ पा° ३ अ° ८ सू° १८)
१२ कुण्ड] न जीर्णबलवद्वासा भवेच्च विभवे सति॥ इति स्नातकव्रकप्रकरणाश्नातस्य श्लोकस्योत्तरार्धो ज्ञेयः।

कर्षणं हि भूमौ क्रियते राजकुले च सेवा। जयादयश्च होमत्वाद्विहिताधिकरणान्तरा एकान्तेनाऽऽहवनीये कर्तव्याः। तत्र विना वचनेनाङ्गप्रधानवैदेश्यमापद्यमानं वैगुण्यं जनयेत्। अस्ति चैषामन्यो विषयो यत्राविगुणा भवन्ति। तस्मिंश्च सति नार्थापत्त्या वैदेश्यमभ्यनुज्ञास्यते। न च शास्त्रेणानभ्यनुज्ञातं कृतं फलं ददाति। अतः सगुणसंपादनायैवानाहिताग्नीनामविदुषाममनुष्याणां चैते न भवन्त। तथा कर्मान्तराणामपि। ननु क्षेत्रमेवाऽऽहवनीयं नीत्वा होष्यते। न। तथाऽपि विलेखनहोमयोर्देशभेदापरिहारात्। सामीप्यमात्रं हि तत्रानुगृह्येत न तु समानदेशत्वम्। न ह्येकैकस्मिन्विदारण आहवनीयं निक्षिप्य होतुं शक्यते। न च तावताऽपि समानदेशत्वं भवति। होमास्त्विति च हेतुव्यपदेशः। यतोऽमी होमास्तस्माद्व्यवतिष्ठेरन्॥ २६॥ § 6528

इतश्च वैदिकानामेव जयादिः शेषो यतः समाख्यानुग्रहो भवति। दर्शपूर्णमासादिष्वध्वर्युर्विद्यते। तदङ्गभूताः सन्त एते तत्कर्तृकतां प्रतिपद्यन्ते। कृष्यादीनां तु ऋत्विगभावाद्भेदेन च जयादीनां वरणादीनामनाम्नानादपूर्व- 957
त्वाच्चोदकेन प्राप्तिर्नास्ति। यदि च तदर्थमेवाध्वर्युर्व्रियते ततः कर्तृभेदोऽप्यापद्यते। न हि कृषिमध्वर्युः करोति। तेन समाख्यानाद्यो वाक्यशेषोऽध्वर्युणा कर्तव्यमध्वर्युर्वा यः कर्तृत्वेन शेषभूतः स एवमनुगृहीतो भवतीति व्यवस्थासिद्धिः॥ २७॥ § 6529

इति जयादीनां वैदिककर्माङ्गताधिकरणम्॥ ९॥

## ०.०.१३२ वारुणेष्टेर्वैदिकाश्वदाननिमित्तताधिकरणम्

वैदिकलौकिकप्रधानसंबन्धविचारप्रसङ्गाद्यत्र निमित्तानां लौकिकवैदिकत्वाशङ्का तानि विचार्यन्ते। तत्र यावतोऽश्वान्प्रतिगृह्णीयादिति यावच्छब्दोपबन्धादश्वप्रतिग्रहाणां निमित्तत्वम्। तत्र संदिह्यते किमश्वप्रतिग्रहमात्रस्याथ लौकिकस्यैवाथ वैदिकस्यैवेति। **कः पुनर्लौकिकोऽश्वप्रतिग्रहः को वा वैदिक** इति—लोके प्रतिषेधाद्वेदे च प्रतिग्रहीतव्यमित्येवमविधानादुभयत्राप्यश्वप्रतिग्रहो नास्तीति मन्यमानस्य प्रश्नः। इतरो विधिप्रतिषेधनिरपेक्षस्वरूपमात्रं दर्शयति, अकर्माङ्गभूतदानाश्रयपुरुषार्थत्वाभिमतो लौकिकः कर्माङ्गभूत-

३ णादीना] आदिपदेन दक्षिणादानमधुपर्कयो परिग्रहः; नातो बहुवचनानुपपत्तिः।
४ त्वा] अपूर्वत्वादिति—जयादीनां दर्विहोमत्वाद्दर्विहोमाना चाऽऽष्टमिकन्यायेन प्रकृतिराहित्याख्यापूर्वत्वान्नातिदेशेनापि वरणादीनां प्राप्तिरस्तीत्यर्थः।
५ तेन] आध्वर्यवमिति समाख्यानाद्योऽध्वर्युः स जयादि कुर्यात्, इति जयादिविधिवाक्यस्य शेषोऽवगतः सोऽपि निरुक्तव्यवस्थायामनुगृह्येत। समाख्यानाद्योऽध्वर्युर्जयादीनां शेषोऽवगतः सोऽपीत्येवं द्वेध सूत्रार्थं दर्शयति—तेनेत्यादिना।

दानाश्रयस्तु वैदिक इति। किं प्राप्तम्। अविशेषाभिधानादुद्दिश्यमानविशेष-
णासंभवाच्चाश्वप्रतिग्रहमात्रं निमित्तमिति। तथा प्राप्ते लौकिकपक्षपरिग्रहः।
भाष्यकारेण त्वविशेषपक्षमनाभाष्य तुशब्दार्थवत्त्वाय सिद्धान्तोपक्रमः कृतः।
**वैदिकत्वसामान्यात्**फलकल्पनाभयाच्च वैदिक इति। नैमित्तिकं हि विधीय-
958 मानं निमित्तमपि वैदिकमेव बुद्धौ संनिधापयति। तेनैव निराकाङ्क्षीभूतत्वान्न
लौकिकेन संबध्यते। फलं च तत्र कल्पनीयम्। इतरत्र तु संबद्धस्य क्र-
तोरुपकारः सुखेनैव कल्पिष्यत इति प्राप्तेऽभिधीयते। **लौकिके स्यादिति**।
कुतः। § 6531

श्रूयते दोषसंयुक्तः स च दोषोऽस्ति लौकिके।
वैदिके विधिगम्यत्वान्न हि दोषः प्रतीयते॥ § 6533

वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णातीति पापेन ग्रहणं यस्मिन्नश्व-प्रतिग्रहे स निमित्तं प्रतीयते। तदपि च पापग्रहणं प्राप्तमनूद्यते। यदि हि विधीयते ततः कदाचिदेतद्वाक्यसामर्थ्यादेव वैदिकेऽपि स्यात्। न तु विधीय-ते, सर्वफलानामविधेयत्वात्। न च तत्र कर्मविधानं, विधेयस्य कर्मणः वापफलत्वासंभवात्। न चेहाश्वप्रतिग्रहः प्रतिषिध्यते, तदश्रवणात्। निमित्त-संबन्धमात्रोपयोगाच्च। तस्मादत्यन्तसंबन्धाद्यत्र प्रतिषेधस्तत्र दोषः। स च लौकिकस्य प्रतिषेधो ‘न केसरिणो ददाति नोभयतोदतः प्रतिगृह्णाति’ इति। नन्वयमपि प्रतिषेधः सामान्येनैव श्रूयते। सत्यं तेनैव तु लौकिकस्येति ब्रूमः। इतरस्य विशेषविधिसंस्पृष्टस्य प्रतिषेधविषयत्वासंभवात्। अतश्च दोष-समभिव्याहृतत्वादिष्टिरपि लौकिकविषया स्यात्। ननु च निमित्तभावादुद्दिश्य-मानोऽश्वप्रतिग्रहो न दोषेण विशेष्टुं शक्यत इति विधीयमानेष्टेस्तुतिमात्रपरे दोषसंकीर्तन वैदिकोऽपि निमित्तं भवेत्। उच्यते। § 6534

विशेषणतया नैव दोषोऽयं कल्प्यते मया।
दोषनिर्घातकार्येष्टिसामर्थ्याल्लौकिकाङ्गता॥ § 6536

नह्येवं क्रियते दोषावान्योऽश्वप्रतिग्रहः। किं तर्हि। निमित्तवेलायां ताव-
त्सामान्यमात्रमेव गृह्यते। यदा त्विष्टिभावनायाः प्रयोजनाकाङ्क्षा भवति त-
दाऽन्यस्य स्वर्गादेः कर्मोपकारकस्य वा संनिध्यपेक्षयोरभावादस्य च दोषस्य
समानवाक्योपात्तत्वेन प्रत्यासत्तेस्स्वरूपेण कर्मानपेक्षितत्वेन फलत्वप्रतिपत्त्य-
959 संभवात्पुरुषोपयिकं विधिसंबन्धार्हं निर्घातमपेक्षमाणस्यापनीयमानतया क-
र्मणा संबन्धः। एकेन च नैराकाङ्क्ष्ये संभवति न प्रयोजनान्तरं कल्पयितुं

१६ न्त] अत्वन्तसंबन्धादिति—दोषप्रतिषेध-योरविनाभावाख्यसंबन्धदित्यर्थः।
२१ विशे] न विशेष्टु शक्यत इति—विशिष्टाव्युत्पन्ननिबन्धनवाक्यभेदापत्तेरिति शेषः।
२४ दोष] दोषनिर्घातः कार्यं यस्या इष्टेरिति चतुर्बाह्यार्थो ज्ञेयः।
२५ तिग्र] तन्निमित्त, इयमिष्टिरिति शेषपूरणम्।

शक्यम्। अतश्च यत्र दोषनिर्घातात्मकं फलं तत्रेयमिष्टिः। यत्र च दोषस्तत्र निर्घातोऽपि प्रतिषेधानुसारी। स च प्रतिषेधो लौकिकस्येत्यन्तरेणापि विशेषणमर्थवशात्तस्यैव निमित्तत्वम्। एतद्दर्शयति—**वरुणप्रमोचनं त्विदं कर्म तल्लौकिके भवितुमर्हति**। यत्तु भाष्यकारेण दोषं प्रदर्शयतोक्तं **स च लौकिकेऽश्वप्रतिग्रहे शूद्रादन्यस्माद्वा पापकर्मणः क्रियमाणे भवतीति**। पुनश्च वैदिकेऽप्येतत्समानमिति मन्यमानेन **ननु वैदिकेऽप्यप्रतिग्राह्यात्प्रतिगृह्णतः** पापग्रहणमस्तीति चोदयित्वा परिहार उक्तः। भवेदेतदेवं यदि प्रतिग्रहीतुरिष्टिः स्यात्सा खलु दातुरिति। स लौकिकेऽप्यविशिष्टः। तथा हि। § 6537

लौकिकेऽपि तु यो दाता शूद्रादिर्न स दोषवान्।
प्रतिग्रहीतृदोषस्तु पुनरप्युभयोः समः॥§ 6539

यदि वैदिके दातुरिष्टिरिति कृत्वा सत्यप्यप्रतिग्राह्यायाज्ययाजननिमित्ते प्रतिग्रहीतॄणां पापे दोषरहितनिमित्तमुच्यते। ततो लौकिकेऽपि शूद्रादिभ्य उपादाने दुष्यत्यपि प्रतिग्रहीतरि दातुस्तद्द्वारेणादुष्टत्वाद्दोषरहितमेव निमित्तम्। अथेह प्रतिग्रहीतृव्यापारो निमित्तं स च दुष्ट इति गृह्यते तत्तुल्यं वैदिकेऽपि। अथ वैदिके दातुर्लौकिके प्रतिग्रहीतुरिष्टिरिति कल्प्यते तत्राप्युपपत्तिविशेषो वक्तव्यः। किं च। § 6540

योऽश्वप्रतिग्रहादेव दोषः सोऽत्र प्रतीयते।
दातृदोषस्तु सर्वत्र तुल्योऽश्वैर्न विशेष्यते॥§ 6542

न ह्यप्रतिग्राह्यान्प्रतिगृह्णन्नेवं विशेष्टुं शक्यते। योऽश्वं प्रतिगृह्णातीति। सर्वद्रव्यप्रतिग्रहाणां दातृदोषेण दुष्टत्वात्। तेनैष ग्रन्थः पूर्वं प्रतिग्रहीतृव्यापारोपन्यासात्पश्चाच्च दातृव्यापाराश्रयणादसंबद्धः। तत्र केचिदाहुः। अनपेक्ष्योत्तराधिकरणसिद्धान्तं प्रतिग्रहीतुरेवेष्टिरित्यत्र विचारितम्। लोकेऽश्वनां प्रतिग्रह एव तावत् 'नोभयतोदतः प्रतिगृह्णाति' इति प्रतिषिद्धः। किमुत शूद्रादिभ्य उपादानम्। यज्ञे त्वसावृत्विजां पुनः प्रसूतः। तत्रैतत्स्यात्। दानमात्रं यज्ञे विहितं न प्रतिग्रह इति। तदयुक्तम्। दानविधानेनैव प्राक् परस्वत्वापादनदपर्यवस्यता तस्याऽऽक्षिप्तत्वात्। अपि चि। सर्वत्र समाप्तिविधानं सिद्धान्तः। 960
तेन दद्यादिति सामर्थ्यगृहीतः स्वत्वपरित्यागं परस्वत्वापादनमेव विधत्त इति प्रतिग्रहविधानम्। अपि च। § 6543

मन्त्रवान्नियमैर्युक्तः कर्ममध्येऽङ्गसंगतः।
क्रियमाणः कथं नाम विधिना नावगम्यचे॥§ 6545

२९ न्त्र] 'क इदं कस्मा अदात्' इत्यादिको मन्त्रः। 'अग्नीधे अग्रे ददाति' इत्यादिविधिविहितक्रमविशेषप्राङ्मुखत्वादिर्नियमश्च ज्ञेयः।

यदि प्रतिग्रहो न विधीयेत कथं तस्येतिकर्तव्यता विधीयेत। किमिति वा तस्मिन्नकृते कर्मवैगुण्यं स्यात्। अत्र वदामः। § 6546

ऋत्विग्भ्यो दक्षिणां दद्यादिति दानं विधीयते।
लोभादेवार्जनाङ्गत्वात्प्राप्तस्तेषां प्रतिग्रहः॥§ 6548

न हि दद्यादित्यस्य प्रतिगृह्णीयादित्ययमर्थो भवति। भवेदपि सामर्थ्यात्, यदि तदाक्षेपमन्तरेण दानविधिर्नोपपद्येत। स तु लोभप्राप्तप्रतिग्रहबलेनोपपद्यमानो न शक्नोत्याक्षेप्तुम्। न हि विधिशतेनापि तथा पुरुषः प्रवर्तते यथा लोभेन। यद्यपि च समाप्तिश्चोद्यते तथाऽपि दातृव्यापार एवासौ परस्वत्वापादनं नाम। द्वौ हि तत्रापि व्यापारावेकः प्रतिग्रहीतुः स्वीकरणमपरो दातुः तत्समर्थाचरणं समर्पणादिरूपम्। तन्मात्रमेव विधास्यते नापरम्। तेन यथा सोमक्रये विधीयमानेऽर्थाल्लोभेन प्राप्तो विक्रयो न विधीयते न च कर्माङ्गं भवत्येवमिह प्रतिग्रहो न विधास्यते नाप्यङ्गं भविष्यति। यदपीतिकर्तव्यताविधानं तदर्थप्राप्तानुवादेनैव भविष्यति। यदा वृत्त्यर्थं दक्षिणां प्रतिगृह्णीयात्तदित्थमित्थं चेति। नन्वेवं सति प्रतिग्रहस्य पुरुषार्थत्वान्मन्त्रादीनामपि पुरुषार्थत्वमेव प्राप्नोति। नैष दोषः। प्रकरणसामर्थ्यादेवमितिकर्तव्यताकप्रतिग्रहावसानं दानं क्रतोरुपकरोतीत्यध्यवसानात्। तेन प्रतिग्रहसंबन्धेऽपि दानस्यैवेतिकर्तव्यता। तच्च विधिलक्षणमिति नेतव्यम्। तत्र चोदितेऽपि प्रतिग्रहे गवादीनां प्रतिषेधोऽपि नास्तीति न कश्चिद्दोषः। अश्वप्रतिग्रहस्य तु प्रतिषिद्धत्वाद्यो नाम प्रतिषेधमतिक्रम्य ग्रहीष्यति तं परीक्रीय यजमान आर्त्विज्यं कारयिष्यति। यथा 'ब्रह्महाऽश्वमेधेन यजेत' इति। यो लोभात्पतितयाजनमङ्गीकृत्य याजयिष्यति तदपेक्षं विधानम्। न तु तद्विधानान्यथानुपपत्त्या याजनमितरेषामपि विहितमिति कल्प्यते। तथेहाश्वप्रतिग्रहस्याविधानमिति द्रष्टव्यम्। अतश्च यथैव लोके दोषस्तथा वेदेऽपीति न तद्द्वारेण विशेषविषयत्वं गम्यते। केचित्पुनराहुः। लौकिकपक्षे प्रतिग्रहीतुरिष्टिर्वैदिकत्वे तु कर्माङ्गत्वाद्दातुः। प्रतिग्रहश्चोभयत्रापि दोषवानविहितत्वात्प्रतिषिद्धत्वाच्च। दानं
961 पुनर्वैदिकं विहितमतो यथाभाष्यमेव परिहारः। अथवोभयत्रापि दातुरिष्टिः। तत्र दानं लौकिकं प्रतिषिद्धम्। तथा च दक्षिणाधिकरणे वक्ष्यति। अश्वा उपकारकतरा भवेयुर्यदि तेषां दानप्रतिग्रहौ न प्रतिषिद्धौ स्यातामिति। विश्वजित्यपि सर्वस्वदाने प्रतिषिद्धत्वादश्वादीनामदानमिति वक्ष्यति। पौण्डरीकेऽश्वसहस्रमिति तु प्रत्यक्षोपदेशाज्ज्योतिष्टोमे चैकस्याश्वस्यावश्यं विधेयत्वात्सामान्यप्राप्तनिषेधबाधान्न दोषो विज्ञायते। तस्माद्य एव लोके भ्रान्त्या मित्रदायादिना वा ददाति तस्यैवेष्टिः, यो वा विक्रीणीते। विक्रयेऽपि हि स्व-

२७ क्ष्य] (अ॰ १० पा॰ ३ अ॰ १२ सू॰ ३७) इत्यत्र भाष्यकार इत्यर्थः
२९ क्ष्य] (अ॰ ६ पा॰ ७ अ॰ सू॰ ४)। इत्यत्र भाष्यकार इति शेषः

३२ मित्र] मित्रदायादिनेति। मित्रस्य दायेन—दानेन आदिः—आदानं स्वीकारस्तेन प्रयोजनेनेत्यर्थः।

त्वपरित्यागपरस्वत्वापादानसद्भावात्सकलो ददात्यर्थो विद्यते। न ह्यदृष्टार्थमेव केवलं दानं विज्ञायते। दानत्वे दृष्टादृष्टफलकल्पनावसरात्। यद्यपि च तस्य विक्रयशब्दाभिधेयत्वं तथाऽपि सामान्यविशेषसंज्ञयोः समावेशादविरोधः। तथा च लोके विक्रीय वक्तारो भवन्ति, अस्माभिर्धान्यं दत्तमिति। क्रीत्वा वदन्त्यस्माभिर्धान्यं गृहीतमिति। तस्मात्सोऽपि ददातिरिति निमित्तम्। ननु च वासोऽश्वा भूमिरिति देयद्रव्यमध्याम्नानान्नाश्वदानं दुष्येत्। यत्र तद्विहितं तत्रनैष दोक्ष्यति। देयद्रव्याणि ह्येतानि स्मर्यन्ते न तु दानमेव विधीयते। तत्र दानविधायिवाक्यापेक्षत्वाद्यत्राश्वो विहितस्तद्गतमेवेदं देयस्मरणम्। यानि तु गवादीनि सामान्यतोऽपि न प्रतिषिद्धानि तानि दानमात्रचोदनायामपि भविष्यन्ति। तस्मान्न लौकिकेऽश्वप्रतिग्रहो निमित्तम्॥ २८॥ § 6549

यद्येषा दोषनिर्घातार्था भवेत्ततो लौकिके कल्प्येत न तु तदर्था। कुतः। § 6550

अन्यतोऽवगते दोषे तन्निर्घातार्थतेष्यते।
यश्चात्र कीर्त्यते दोषो नासावस्तीति गम्यते।§ 6552

कर्मविधानवाक्ये यो दोषः श्रूयते स निर्घात्यत्वेनावधार्यते। यश्चात्र दोष उपात्तो नासौ लौकिकस्य सत्यपि प्रतिषिद्धत्वे कुतश्चित्प्रमाणाद्गम्यते। जलोदरं ह्यत्र वरुणग्रहणरूपेणोपात्तम्। नच कस्याचिद्वैद्यकसंहितायां 962
लौकिकोऽश्वप्रतिग्रहो निदानं श्रूयते। नापि प्रत्यक्षानुमानादिभिर्गम्यते। न च वाक्ये 'न केसरिणो ददाति' 'नोभयतोदतः प्रतिगृह्णाति' इति श्रूयते। नाप्येतस्य वाक्यस्य तत्प्रतिपत्तौ व्यापारो, विद्यमानानुवादेन तत्र निर्घातार्थकर्मविधिमात्रपरत्वात्। यस्तु दोषः प्रतिषेधवाक्यान्नरकपातात्मकः कल्पितः स इह नोपात्तो वरुणो वा एतं गृह्णातीत्यनेनाभिधातुमशक्यत्वात्। अथ पापमात्रं वृणोतीति वरुणस्तद्गृह्णातीच्येवमभिधीयते ततो या तावद्वरुणगृहीतशब्दस्य जलोदरविषया समुदायप्रसिद्धिः सा परित्यक्ता। या त्ववयप्रसिद्धिः सा वैदिकेऽपि, त्यागे दुःखदर्शनात्। प्रतिग्रहे च रक्षणपोषणादिना क्लेशात्किंचिद्वरुणात्मकं विद्यत इत्येवं संभवतीति न शक्यं तद्द्वारेणेष्टेर्लौकिकविषयत्वमवधारयितुम्। **रक्षणपोषणादिना क्लेशेनेति**—प्रतिग्रहीतृव्यापारस्य निमित्तत्वेनानिवारितत्वादेवं ब्रवीति। अथवा दातुरपि प्राक् परस्वत्वापादनादेव क्लेशोऽस्तीति गमयितव्यम्। § 6553

धर्मोऽपि च वृणोत्येव नरं संसारवर्तिनम्।
न हि केवलपापेन देहेनाऽऽच्छाद्यते नरः॥§ 6555

तस्मादुभयथाऽपि लौकिकाश्वप्रतिग्रहणगतोऽयं दोषो न प्रसिध्यतीति मुख्योपपाताभावादर्थवादोऽयं विज्ञायते। तत्र पुरस्तादुपाख्यानोपात्तं प्र-

१५ वैदिके] वैदिकेऽपीति—निमित्त इति शेषः। वैदिके निमित्तेऽङ्गीक्रियमाणेऽपि दाननिमित्तत्वपक्षे द्रव्यत्यागाददुःखदर्शनं, प्रतिग्रहानिमित्तत्वपक्षे च रक्षणादिना दुःखदर्शनमित्यत्वयवार्थः।

जापतिर्वरुणायाश्वमनवत्’ इत्यर्थमिदानीतनेऽपि काले रूपकधर्मेणाध्यारोप्य प्रशंसति। यथैव प्रजापतिर्वरुणेन गृहीत आसीत्तथाऽद्यत्वेऽप्यश्वप्रतिग्रह-श्चेज्ज्ञातः स एव वरुणग्रहणदोषो भवति। यथा च प्रजापतेर्वारुणीष्टिस्त-
963 त उन्मोचन्यासीत्तथाऽद्यत्वेऽप्यसावुन्मोचनी विज्ञायते। तस्माद्वरुणग्रह-व्याधिगृहीतेनेव तेन तद्विमोचनायावश्यं कर्तव्येष्टिरित्येतावानर्थो विव क्षितः। ततश्च वाक्योपात्तफलाभावादध्याहारेण वा स्वर्गः कल्पयितव्यः कर्माङ्ग-भावो वा। तत्र स्वर्गसंनिधिकाराणाभावाद्वैदिकक्रियात्वसामान्येनाश्वप्रतिग्रहेण च संनिधापनात्क्रतुसंबन्धः सुकल्पः। वैदिको ह्यश्वप्रतिग्रहः कर्मान्तः पातीति निमित्तत्वेन प्रतीयमानस्तद्देशवर्तिकथंभावापन्नमङ्गिनमुपनयन्नुभयोः साकाङ्क्ष-त्वादङ्गाङ्गिसंबन्धं कल्पयति। तस्माद्यज्ञे प्रतीयेतेति सिद्धम्॥ २९॥ § 6556

इति वारुणेष्टेर्वैदिकाश्वदाननिमित्तताधिकरणम्॥ १०॥

## ०.०.१३३ अश्वप्रतिग्रहेष्ट्यधिकरणम्

तत्रैवेदानीमिदं विचार्यते किं प्रतिग्रहीतुरिष्टिरुत दातुरिति। कथं पुन-र्योऽश्वं प्रतिगृह्णातीति विस्पष्टे प्रतिग्रहीतृसंबन्धे सति संदेहः। उपक्रमे दातृप्र-सिद्धेः। ‘प्रजापतिर्वरुणायाश्वमनयत्’ इति दर्शयिष्यामः। यदि तर्हि वाक्य-शेषाद्दातुः प्रतीयते ‘*संदिग्धेषु वाक्यशेषात्’ इत्यनेनैव गतार्थत्वादधिकरणं नाऽऽरब्धव्यम्। उच्यते। § 6558

संदिग्धं वाक्यशेषेण निर्णयमवधारितम्।
विध्युद्देशेन निर्णीते किं तु शेषः करिष्यति॥§ 6560

यत्र विध्युद्देशः संदिग्धः, तत्र वाक्यशेषान्निर्णयो न विरुध्यते। यत्र त्व-संदिग्धस्तत्र तद्बलीयस्त्वाद्वाक्यशेषबाधेनैव भवितव्यम्। अत इह यद्यपि ‘प्र-जापतिर्वरुणायश्वमनयत्’ इति प्रजापतिर्दाता संकीर्तितो वरुणः प्रतिग्रहीता। पुनश्च ‘स स्वां देवताम्’ इति प्रजापतिरेव समानविभक्त्यन्तः सामानाधिक-रण्येनोपात्तः। स्वा च तस्य देवता वरुणः, पूर्वं संप्रदानत्वेनोपात्तत्वात्। नाऽऽत्मा, कर्तृत्वसंप्रदानत्वयोर्विरोधिनोरेकत्र कल्पनेऽन्यतरस्य गौणत्वाप-त्तेः। नापि प्रजापतेर्वरुणो दाता, विभक्तिव्यत्ययप्रसङ्गत्। तेन प्रजापतिरश्वं
964 दत्त्वा वरुणं प्राप्त इत्यर्थः। स तथाभूतः परिदीर्णः। उदरमस्य श्वयथुना विदीर्णम्। ‘स एतं वारुणं चतुष्कपालमपश्यत्तं निरवपत्’ इति प्रजापतेरेव तच्छब्देन परामर्शात्। तन्निरवपदिति च कर्तृत्वनिर्देशः,तस्यैवावकल्पते न वरुणस्य। संप्रदानत्वेन स्थितत्वात्। न वरुणस्याऽऽत्मोद्देशेन यागः संभवति।

४ *] (अ° १ पा° ४ अ° १३ सू° २४)

१५ य] श्वयथुनाः—जलवृद्ध्येत्यर्थः।

न ह्यात्मने संकल्प्यमानं त्यक्तं स्यात्। तेन प्रजापतिनाऽश्वं दत्त्वा वरुणाय, वरुणगृहीतेन वारुणेष्ट्या तदुन्मोचनमात्मनः कृतम्। अतोऽन्योऽपि दत्त्वैवं कुर्यादिति दातुरिति विज्ञायते। किं च। § 6561

यज्ञाङ्गत्वाच्च तच्छेषाः प्रधानेनैककर्तृकाः।
प्रधानस्य च यः कर्ता स्वामी दाता स वाजिनाम्॥§ 6563

तथाऽपि विध्युद्देशार्थवादयोर्विप्रतिपन्नार्थत्वात्, संदेहाभावेन 'संदिग्धेषु वाक्यशे षात्' इत्यनेनागच्छदन्यतरबाधेन व्यवधारणकल्पनयाऽन्यतकविषयं वाक्यमुपक्रमोपसंहाराचिन्तया कथमपि क्लेशेन गमयितव्यमित्यारम्भे सति किं तावत्प्राप्तम्। अर्थवादस्य विध्युद्देशाधीनप्रवृत्तेस्तच्छेषत्वाच्च विनाऽऽनर्थक्यप्रसङ्गात्। विध्युद्देशस्य च तेन विनाऽपि स्वार्थसिद्धेः। यच्च विधीयते तस्य स्तुतिर्यस्य स्तुतिर्न तस्य विधानं, विधिनैव स्तुत्यपेक्षायाः कृतत्वात्। तस्मात् 'अङ्गगुणविरोधे च तादर्थ्यात्' इत्यनेनैव न्यायेनार्थवादस्यासमञ्जसत्वं न्याय्यम्। नित्यं चार्थवादानां प्रमाणान्तरावगतार्थविषयत्वमतोऽपि तद्गतमेव लक्षणाश्रयणं युक्तं न विधिगतं, विधीनामन्येनात्यन्ताप्राप्तविषयत्वेन श्रुतान्यथात्वकल्पनस्याप्रमाणकत्वात्। यथा च 'ऊर्गुदुम्बरः' 'आदित्यो यूपः' इत्यादयोऽर्थवादा नीयन्ते तथाऽयं न यास्यतीति को हेतुः। तस्माद्विस्पष्टाऽपि पुरस्तादर्थवादे दातृव्यापारस्तुतिः 'आपो वै शान्ताः' इतिवत्संबन्धिद्वारेण प्रतिग्रहीतृविषयाऽवधारयितव्या। तेन दानप्रतिग्रहकर्मणोर्भेदात्प्रतिग्रहसंबन्धित्वेन श्रुतमेतत्कर्म दातुरचोदितमिति मन्यामहे। तुशब्दस्य स्थाने चशब्दः, किं चेह भवत इतिवद्गमयितव्यः। यजमानं वाऽम्याः कर्तृत्वेनाचादितं विजानीमः। तत्कर्म चेष्टेर्निमित्तत्वेनाचोदितमिति सूत्रार्थः॥ ३०॥ § 6564

सा खल्विष्टिरार्त्विजे स्यात्। यजमाने स्यादित्यर्थः। स ह्यृत्विजामय- 965
मित्येवमार्त्विजोऽभिधीयते। अथवा 'स्वामिसप्तदशाः कर्मसामान्यात्, इति यजमानस्यापि ब्रह्मा दिवदृत्विक्त्वं वक्ष्यति। तेन शक्यं याजमानमपि प्रदानमार्त्विजमित्यभिधातुम्। अथवा स्वामिकर्मार्त्विजयोः कतरस्मिन्स्यादिति संदिग्धे यत्र लिङ्गं सामर्थ्यात्मकमवकल्पते तत्रेति सूत्रार्थः। कथं पुनर्यजमानव्यापारो निमित्तमिति लिङ्गेन गम्यते। तदुच्यते। § 6565

सामर्थ्यं कर्मणस्तावदेकं लिङ्गं विवक्षितम्।
अपरं वाक्यसामर्थ्यं पौर्वापर्यनिरीक्षणात्॥§ 6567

पूर्वाधिकरणेनैवैतत्प्रतिपादितप्रायं यदत्र दातुरिष्टिरिति। यदा ह्यश्वप्रतिग्रहवतः कर्मणोऽङ्गमेवेत्यवधारितं तदाऽङ्गप्रधानानामेकदेशकालकर्तृकन्यायाद्य

---

६ संदिग्धेषु] (अ॰ १ पा॰ ४ अ॰ १३ सू॰ २४)
८ संहारा] उपक्रमोपसंहारचिन्तया—उपक्रमोपसंहारबलाबलचिन्तयेत्यर्थः।
१२ गुण] (अ॰ १२ पा॰ २ सू॰ २७)
२ स्वामिस] (अ॰ ३ पा॰ ७ अ॰ १८ सू॰ ३८)

एव क्रतोः कर्ता तेनैवेयमपि कर्तव्या। यश्च क्रतोः कर्ता स ‘स्वामिकर्मपरिक्रयः’ इत्येवमश्वस्य दाता। तस्मादिसंदिग्धमेव दातुरिष्टया भवितव्यम्।
966 एतद्ध्यङ्गस्य सामर्थ्यं यत्प्रधानेनैककर्तृकं सदुपकारं शक्नोति कर्तुं न भिन्नकर्तृकम्। तेन प्रधानवदेवेतरैस्तस्यामप्यार्त्विज्यं कर्तव्यं न याजमानमिति। एवं सिद्धेऽपि, वाक्योपक्रमोपसंहारविरधकृतभ्रान्तिसंशयव्युदासमात्रार्थमुत्तरमधिकरणमारब्धव्यम्। तस्यापि च वाक्यसंबन्धोपक्रमोपसंहारस्येदृशमेव सामर्थ्यं यद्दातुर्विधत्ते। न ह्येतावदेव वाक्यं ‘यावतोऽश्वान्प्रतिगृह्णीयात्तावतश्चतुष्कपालन्वारुणान्निर्वपेत्’ इति। किं तर्हि। अन्योऽप्युपक्रमः ‘प्रजापतिर्वरुणायाश्वमनयत्’ इत्यादिरस्य विद्यते। स च दातुरिष्टिं प्रतिपादयतीत्युक्तम्। नन्वेतदप्युक्तं विध्युद्देशबलीयस्त्वाद्बाध्यतेऽसाविति। नैतदस्ति। कुतः। § 6568

स्तुतिर्लब्धात्मकत्वेन विध्युगद्देशेन बाध्यते।
प्रतिग्रहीतरि त्वत्र विध्युद्देशो न कल्पितः॥§ 6570

यदि लब्धात्मकोऽत्र प्रतिग्रहीतृविषयो विध्युद्देशो भवेत्ततो विचार एव न क्रियेत न त्वसौ लब्धात्मकः। कुतः। § 6571

परस्तादर्थवादेषु स्वतन्त्रो जायते ह्यसौ।
पुरस्तादर्थवादेषु तत्पूर्वा विधिकल्पना॥§ 6573

सत्यपि प्रधानगुणभावे विध्यर्थवादानां पूर्वापरोच्चारणकृतोऽन्यो विशेषो भवति। सर्वत्रैव तावत् ‘मुख्यं वा पूर्वचोदनाल्लोकवत्’ इति च श्रुतिलिङ्गाधिकरणन्यायेन च पूर्वं विज्ञानमनुपजातप्रतिद्वन्द्वि द्वितीयविज्ञानान्तरानुत्पत्त्यवस्थत्वादाञ्जस्येनाऽऽत्मानं लभते। पश्चात्तनं तु पूर्वविज्ञानावरुद्धज्ञानविषय उपजायमानं सत्यां विरोधावस्थायां तदानुगुण्यातिरिक्तेन रूपेणोत्पत्तुमेव न शक्नोतीति, अन्यथात्वमपि प्रतिप-
967 द्यते। तदिह विध्यर्थवादत्वकृतं विशेषं पूर्वपश्चाद्भावितयाऽनाश्रित्योपक्रसोपसंहारयोर्दातृप्रतिग्रहीतृविषयत्वेन विप्रतिपद्यमानार्थत्वात्तथा सति चैकवाक्यत्वासंभवात्पृथक्त्वे चोभयोरपि परस्परसंनिधिवशेनाकल्पितविध्यन्तरप्ररोचनान्तरशक्त्योः साकाङ्क्षत्वेनापरिपूर्णाथोयोरानर्थक्यप्रसङ्गादवश्यंभाव्येकवाक्यत्ववशेन समानविषयत्वे कल्प्यमानेऽनुपजातविरोधावस्थपूर्वावधारितदातृगामित्वपरित्यागासंभवादुत्तरमलब्धावस्थमेव प्रतिग्रहीतृज्ञानं गौणगृह्णातिकल्पनया दातृविषयत्वेनाध्यवसीयते। किं च। § 6574

भूयसां च सधर्मत्वमस्मिन्पक्षे भविष्यति।
अन्यथा हि भवेत्पूर्वं सर्वमेवासमञ्जसम्॥§ 6576

१ स्वामिक] (अ॰ ३ पा॰ ८ अ॰ १ सू॰ १)

११ र] (अ॰ ३ पा॰ ३ अ॰ ७)

प्रजापतिर्वरुणादश्वं प्रत्यगृह्णात्स्वां देवतामपादानभूतां वरुणमेवेति बहुभमञ्जसं स्यात्। मम तु गृह्णातिरेव कथंचित्प्रयोजकव्यापारे वर्तयितव्यः। यत्तु विधिरर्थवादाद्बलवत्तरं इति। सत्यम्। यो विधिः स बलीयान् भवति। न तु प्रतिग्रहीतुरिष्टिरिति विधिः। सर्वत्र हि वाक्ये यत्पूर्वपदैरनवगतमपेक्षितं च तदुत्तरपदेभ्यः परिगृह्यते, नेतरत्प्रतीयमानमपि। तद्यथा 'सत्रादुदवसाय' इति क्त्वाप्रत्ययेनैवोत्तरस्यां क्रियायामुदवसानवदन्योन्यनिरपेक्षा बहवः कर्तारोऽवधारिताः। उद्दिश्यमानत्वाच्चाविवक्षितसाहित्या इति 'पृष्ठशमनीयेन यजेरन्' इत्यत्र सत्यप्युपादीयमानत्वे संहतबहुकर्तृप्रत्ययः पूर्वेणानपेक्षितत्वादविवक्षितो भविष्यति। एवमिह यावदेव 'प्रजापतिर्वरुणायाश्वमनयत्' इत्यर्थवादेन दातुर्वरुणानिर्मोचने हेतुत्वेनेष्टिः प्रशस्यमानाऽवगता तावदेव तस्य किमपि वक्तव्यमितीयमेवेष्टिर्विधास्यत इत्यवधार्यते। ततश्च पूर्वावधारितविधिविषयः पुरुषो विध्यनुमानाभिमुखस्तन्मात्रमेवोच्यमानं प्रार्थयते नाधिकम्। तुल्या च विषयावबोधने विध्यर्थवादयोः शक्तिः। यत्त्वर्थवादस्य विधिशक्तिर्नास्ति तावन्मात्रं विधायकाद्गृह्यत एव, न तु तावता सर्वमेव तद्गतं विवक्ष्यतेऽनपेक्षितत्वात्। अतो निमित्तार्थं लिङुच्चारणं धातुमन्तरेण न संभवतीति यत्र क्वचन धातौ प्रयोक्तव्ये दातृव्यापारार्थगृहीतो गृह्णातिः प्रयुक्त इति द्रष्टव्यम्। अन्यथा हि यस्मात्पुराकल्पे दातुरेवं वृत्तं तस्मादद्यत्वेऽपि प्रतिग्रहीतृभिरेवं कर्तव्यमित्यसंबद्धमेव वाक्यं स्यात्। तस्माद्विध्युद्देशेनैवेत्थं प्रवृत्तेन दाताऽऽश्रित इत्यविरोधः। तदेतत् 'श्रुतेर्जाताधिकारः स्यात्' इत्यत्र प्रपञ्चितम्। ननु च तेनैव गतत्वादिह नाऽऽरब्धव्यमेतत्। सत्यं, गतप्रायमेतत्। भाष्यान्तरजतिभ्रान्त्यपनयार्थं तु पुनरारम्भः। इतरथा हि शक्यमिदं सूत्रद्वयं 968 पूर्वाधिकरणेऽपि व्याख्यातुम्। यो नामाऽऽलम्भनिर्वापवल्लोकवेदयोकश्वप्रतिग्रहाविशेषादनेकान्ते सति न नियोगतः कर्माङ्गत्वं गम्यत इति मन्यमानो वदेत्, याज्ञेऽप्यचोदितमेतत्कर्मभेदे सति निर्णयकारणाभावादिति, तस्योत्तरं 'सा लिङ्गादार्त्विजे स्यात्' इति। यदृत्विग्भ्योऽश्वदानं तत्र स्यात्, वैदिकत्वयाज्ञियत्वलिङ्गविशेषात्, निमित्तत्वोपयुक्तस्यापि लिङ एव लिङ्गत्वात्। वैदिको हि लिङ्गंबद्धो दृष्टो न लौकिकः। अथवैतदेव चोद्यं विना सूत्रेण कृतत्वात्सूत्रद्वयमप्येकीकृत्य परिहारो वर्णनीयः। यस्मादचोदितं लौकिकं न तत्र निमित्तत्वेन

---

१९ श्रुतेर्जा] (अ° ३ पा° ३ अ° १ सू° १)

२१ भाष्या] भाष्यान्तरजनितभ्रान्त्येति—भाष्यान्तरकारैः सौत्रार्त्विजशब्दस्यर्त्विक्कर्तृकप्रतिग्रहवाचित्वमङ्गीकृत्य प्रतीग्रहीतुरिष्टिसिद्धान्तकरणात्तन्निमित्तभ्रान्तिन्युदसनाय पुनरारम्भ इत्यर्थः।

२१ था] यद्यप्यत्र सूत्रकाराणां भाष्यान्तरजनितभ्रान्त्यपनोदनार्थमारभो नोचितः। परंतु भाष्यकृत एव सूत्रव्याख्यार्थमारम्भो युक्त इत्येवं मत्वा प्रकारान्तरेण पौनरुक्त्यपरिहारं वक्तुमारभते— इतरथेत्यादिना।

२६ वैदिको] वैदिक इति—प्रतिग्रह इति शेषः।

२७ द्धो] लिङ्गंबद्ध इति—लिङा विधातृविधेयभावाख्यसंबन्धेन संबद्ध इत्यर्थः।

बुद्धिरिति पूर्ववदेव योज्यम्। तत्रैतत्स्यादेकमिदं कर्म यथा वैदिकं सन्निमित्तं भवतीति तथा लौकिकमपि संभवतीत्यत आह। नैतत्। कुतः। कर्मभेदात्। अस्ति हि चोदिताचोदितत्वकृतो देशादिभेदकृतकर्मव्यक्तिकृतोऽपि कर्मभेदो येन निमित्तव्यवस्था भविष्यति। प्रतिषिद्धत्वाच्च लौकिकस्याभाव एव वेदसिद्धान्तेन। अतो यस्यासंदिग्धः सद्भावस्तस्यैव निमितत्वम्। न चावश्यमस्य निमित्तार्थं श्रवणं संबन्धमात्रपर्यवसानात्। अतश्चाश्वदानस्यैवेयमितिकर्तव्यतेति प्रयोजनवत्त्वेन वैदिकं गमिष्यति। तस्मान्नाचोदितेन संबन्ध इत्येवं संभवत्यपि व्याख्यानेऽर्थवशेनाधिकरणान्तरकरणम्। गृह्णातिशब्दश्च प्रयोजकक्रियायामदृष्टपूर्वो दृढां भ्रान्तिं कुर्वल्लँक्षणावृत्त्या नेतव्यः। प्रयोजकव्यापारे प्रयोज्यवदुपचारात्। अथवा हेतुकर्तर्यपि कर्तृत्वमस्ति। तत्र यदा हेतुत्वं विवक्ष्यते तदा हेतुमद्व्यापारे विवक्षितेऽपि णिजुत्पद्यते। कर्तृत्वमात्रविवक्षायां विनैव णिचा योऽश्वप्रतिग्रहं यथाकथंचिन्निर्वर्तयति स प्रतिगृह्णातीति शक्यते वक्तुम्। **यथा षड्भिर्हलैः कृषतीति** विलेखनवचनः सन्कृषिः षड्ढलोपादानसामर्थ्याद्विलेखितृविषयासंभवात्तत्प्रयोजकव्यापारे वर्तते। न हि हलषट्केनैकः कर्ता विलेखितुं शक्नोति। तेन षण्णामेव विलेखितॄणां यः संविधानेन प्रयोजकः स तद्व्यापारेण कृषेरपि कर्ता भवतीत्येवमभिधीयते। तद्वदर्थवादवशेन वर्तमानो गृह्णातिः, तत्प्रयोजकव्यापारे वर्तिष्यते। विचित्रशक्तयो हि
969 धातवः प्रयोज्यप्रयोजकोभयव्यापारवचनत्वेन भावार्थाधिकरणे दर्शिताः। तेषां सहकारिकारणसंनिधानात्कदाचित्काचित्प्रसिद्धिव्यतिरेकेणापि शक्तिरभिव्यज्यते। तस्माद्ददात्यर्थे प्रतिगृह्णातिशब्दः प्रयुक्त इति दातुरिष्टिः। एवं स्थिते केचिच्चोदयन्ति। यथा किल मैत्रायणीयानां ‘स एषोऽश्वः प्रतिगृह्यते’ इत्येकरूपोपक्रमोपसंहारविधिना विस्पष्टमेव प्रतिग्रहीतुरिष्टिरिति गम्यते। तत्र च वदन्ति न्यायेन तावद्वयं बलीयांसो यदि तु वचनान्तरेण जीयामहे किं क्रियतामिति। स तु निष्कारणस्त्वाम इति पश्यामः। कथम्। § 6577

प्रतिग्रहीतरि स्पष्टं यदि वाक्यान्तरं ततः।
भवेत्तस्यापि तेनेष्टिर्दातुस्तु न निवार्यते॥§ 6579

यथोदाहृतेन तावत्तैत्तिरीयशाखावाक्येन दातुरिष्टिः सिद्धा। सा न न्यायान्तरेणापनीयते न वचनान्तरेण। यद्यपि प्रतिषेधवचनं स्यात्तथाऽपि विहितप्रतिषिद्धत्वाद्विकल्पो भवेन्न स्वीकृतन्यायव्युदासः। यत्तु प्रतिग्रहीतुर्विधायकं तद्यदि तावत्कर्माङ्गवशेन विनाऽप्युपक्रमविशेषात्पूर्ववाक्यार्थानुसार्थेव भवति ततस्तेनापि दातुरेव। अथ तु स्वातन्त्र्यात्प्रतिगृह्णातिवशात्प्रतिग्रहीतुस्ततः पूर्ववाक्याच्चा दातुरित्युभौ करिष्यतस्तत्प्रतिग्रहीतृगता च कर्माङ्गत्वाभावात्पुरुषार्था सती लौकिकेऽपि स्यात्। यस्तु ‘आर्त्विजे स्यात्’ इत्येतत्सूत्रपरः सन्पूर्ववाक्येनापि प्रतिग्रहीतुरेव वदति तेन तत्कर्तृकायाः कर्माङ्गत्वामवादृत्विजामितरेषां च पुरुषार्थफलकल्पनातुल्यत्वेन

१८ भावा] (अ° २ पा° १ अ° १)

लौकिकेऽपि प्राप्तौ सत्या केन प्रमणेन ‘तस्माद्यज्ञे प्रतीयत’ इत्येतदभिधीयत इति वक्तव्यम्। तस्मादनेन तावद्दातुरिति सिद्धम्॥ ३१॥ § 6580

इति अश्वप्रतिग्रहेष्ट्यधिकरणम्॥ ११॥

## ०.०.१३४ वमनाधिकरणम्

अयमप्यनारभ्यवाद एव। सोमेन्द्रं चरुं निर्वपेद्यः सोमं वमति इति। तत्रापि पूर्ववदेवाधिकरणद्वयमपि विचार्यते। लौकिकसोमपाने रसायनाद्यर्थं कृते वमनेन व्यापन्ने सोमेन्द्रयाग उत वैदिके, उतोभयत्रापि। तत्र तद्वदित्य-नेन सामान्यपक्षो ‘दोषात्त्विष्टिर्लौकिके स्यात्’ इत्ययं चातिदिश्यते। अथ- 970
वाऽधिकरणद्वयमपि सिद्धान्तरूपेणाधिकरणद्वयेऽप्यतिदिश्यते, केनचिद्विशेषेण पूर्वपक्षरचना। तत्रेह तावद्वैदिकेन पानेन द्रव्यप्रतिपादनस्य कृतत्वान्न क-दाचिद् भ्रेषे पुनः प्रतिसमाधानापेक्षाऽस्तीत्यनर्थकमिष्टिविधानम्। लौकिके तु वमनेन व्यापन्ने रसायनगुणाभावादिन्द्रियेण वीर्येण च व्यृद्धिः संभाव्य-ते। न जलोदरवदत्यन्तासंभावना। तत्संयोगे च श्रूयमाणेष्टिस्तत्समाध्यर्थैव विज्ञायते। तस्मात्तत्र स्यादिति॥ ३२॥ § 6582

तैरेव वैदिकत्वसामान्यादिभिर्वैदिके भवतीति कस्मान्नोच्यते। न हि वमने वैदिकत्वं संभवति। अचोदितत्वात्। अतो य एव दोषो लौकिकगामित्वे हेतुः स एवेह वैदिकविषयत्वे स्यात्। तथा हि। § 6583

सम्यग्जरणरूपान्ता प्रतिपत्तिर्विधीयते।
तद्व्यापदि प्रधानस्य न भवेत्पूर्ववत्फलम्॥ § 6585

न च तावल्लौकिकपानव्यापदि दोषोऽस्ति। वमनार्थमेव पानात्। अथापि भवति तथाऽपि वैद्यकेनैव तस्य प्रतिसमाधानमिति न वैदिकोपायापेक्षा। वैदिके तु पाने सम्यग्जरणपाठाज्जरणान्ता प्रतिपत्तिरवधारिता। सा च वम- 971
नेन व्यापद्यते। ततश्च प्रधानफलवैगुण्याशङ्कायां तत्समाधानार्थेष्टिर्विज्ञायते। अथ त्वयं फलार्थवादस्ततः सुतरां फलकल्पनाभयाल्लौकिकान्निवृत्तिर्गम्यते। वैदिके तु वमनेन पानं प्रत्यायितम्। तेन क्रतुस्थस्येष्टिरङ्गमिति सुकरः संबन्धः॥ ३३॥ § 6586

इति वमनाधिकरणम्॥ १२॥

---

१ तैरेव] तैरेवोति—पूर्वाधिकरणासिद्धान्त-साधकहेतुभिरेवेत्यर्थः।
८ ण] हिन्व मे गात्रा इत्यादि मा मे वाङ्नाभिमतिगा इति सम्यग्जरणप्रकाशकमन्त्रपाठादित्यर्थः।
८ णा] सम्यग्जरणरूपान्तेति पाठो व्याख्यानसंभत इति भाति।

## ०.०.१३५ यजमानसोमवमने, इष्टिविधानाधिकरणम्

अश्वप्रतिग्रहेष्टिवदेव कर्माङ्गत्वात्स्वामिकर्तृकत्वे सिद्धेऽपि तस्य किंपात्मीयं वमनं निमित्तमुताऽऽर्त्विजमपीति विचार्यते। किं प्राप्तम्। विशेषानुपादानादुभयत्रापि स्यात्। यथा च स्वामिवमनेन प्रतिपत्तिविनाशस्तथाऽऽर्त्विजेनापि उभयोर्द्रव्यसंस्कारात्मकत्वात्। तस्माद्यदि दोषनिर्घातार्थमेतत्कर्माथाप्यपूर्वोपकारार्थमुभयथा वमनद्वयेऽपि कर्तव्यम्॥ ३४॥ § 6588

यद्यपि तावदारादुपकारकत्वं तथाऽपि स्वामिवमने भवितव्यम्। कुतः। § 6589

पूर्वं यच्छब्दसंबन्धान्निमित्तत्वं न जायते।<br>
तत्संबन्धात्परस्तात्तु कर्तैकः संप्रतीयते॥§ 6591

'यः सोमं वमति स निर्वपेत्' इति यच्छब्दतच्छब्दयोगाद्यागवमनयोरेकः कर्ता गम्यते। तत्र नैमित्तिकं तावत्स्वामिकर्तृकत्वेनासंदिग्धम्। तेनासंदिग्धेन संदिग्धं वमनं निर्णीयते। तदपि स्वामिकर्तृकमेव सन्निमित्तमिति। न च स्वतन्त्रमेव निमित्तं, शुद्धेनाऽऽख्यातेन निमित्तप्रत्ययानुत्पादात्। यच्छब्दोपबद्धं
972 तन्निमित्तं प्रतिपादयति। तेन चेत्संबद्धं पूर्वतरं समानकर्तृकत्वं पश्चान्निमित्तत्वप्रतीतिः। अथर्त्विजो देवतार्थमृत्विक्परिक्रयार्थं च द्रव्यं त्यजन्ति। ततस्तेषां स्वात्मनि परिक्रयविरोधादवश्यं तैरप्यन्येऽध्वर्य्वादयो वरीतव्याः। आधानगतेन त्वात्मनेपदेनाग्नीनामाधातृव्यतिरिक्तपुरुषसंबन्धाभावात्स्वात्मार्थेष्वग्निषु यष्टव्यम्। ततश्च यदि तावद्वान्तसोमकर्मोपकारबुद्ध्या कुर्वन्ति ततो देशकालकर्तृभेदाद्विगुणं न तेन प्रधानेन गृह्यते। न चाऽऽहत्य देशादिभेद आम्नायते। येन तत्सद्भावेऽप्यवैगुण्यमाश्रीयेत। स्वामिवमनेन च कृतार्थत्वान्नानेनैव शास्त्रेण देशान्तरादीनामनुज्ञानम्। कथं वैकमेव शास्त्रं स्वामिवमनपक्षे समानदेशादित्वमाश्रयेदृत्विग्वमने च तद्भेदम्। अथ त्वात्मार्थबुद्ध्यैव ते प्रयुञ्जीरन्। एवमपि क्रत्वर्थेनावधारितस्य पुनः पुरुषार्थत्वाभावात्तादर्थ्येन क्रियामाणस्याऽऽनर्थक्यमेव स्यात्। अथ त्वेतत्सिद्ध्यर्थं पुरुषार्थतैव शास्त्रेणाऽऽश्रीयते तथा सति उपस्थितक्रतुत्यागादसंनिहितस्वर्गादिकल्पनाच्च विप्रकर्षः। सदृशं लौकिकवमनेऽप्येतदिति न याज्ञे स्यात्। तच्च पूर्वमेव निराकृतम्। तस्मात्स्वामिवमने स्यात्। अथ त्वध्वर्य्वादिवमनेऽपि स्वाम्येव द्रव्यं त्यजेत्तथा सति तदेव भिन्नकर्तृकत्वमापद्यते। तत्समर्थने वाऽश्रुतषष्ठ्यर्थकल्पना सामानाधिकरण्यबाधश्च। तथा कल्पनायां च स्वामिवमनस्यानिमित्तत्वप्रसङ्गः। उभयाश्रयणे वा वैरूप्यनिमित्तो वाक्यभेदः स्यात्। यः सोमं वमति यस्य सोममृत्विग्वमतीति चाऽऽश्रयणादन्यतरपरिग्रहे तु स्वामिवमनग्रहणं युक्तम्, शब्दसामञ्जस्यात्। एवं तावदारादुपकारकत्वे यदा तु वाक्यशेषोपनीतयागशेषद्रव्यप्रतिपत्तिनियमभ्रेषोपजनितफललाभायोग्यत्वं तेन प्रतिसमाधीयत इति कल्प्यते, तदा यजमानफलोत्पत्तेरत्यन्तादृष्टत्वात्तदाशङ्केति तेनैव

२९ त्वात्त]

तदाशङ्केति—फललाभायोग्यत्वाशङ्केत्यर्थः।

प्रतिसमाधानेष्टिः कर्तव्यत्यसंदिग्धम्। यत्तु दक्षिणालाभात्मकमृत्विजां फलं तत्सति चासति वमने लभ्यमानं दृश्यत इति निराशङ्कत्वादनपेक्षितप्रतिसमाधानं नेष्टिं गृह्णाति। यदाऽपि प्रकृतकर्मकर्तृनियमांशेन भक्षयितृसंस्कारार्थं भक्षणम्, अतश्च तद्भ्रेषे कर्तुर्वैगुण्यमुपजातं, द्रव्यसंस्कारस्य तदुपयोगात्मकस्य निवृत्तत्वादिति कल्प्यते तदाऽपि तद्भ्रेषकृतयाजमानफलविघ्नप्रसङ्गात्तन्निवृत्यर्थत्वाद्यत्तच्छब्दनिर्देशाच्च यजमानवमन एव भवितव्यम्। एतेनापूर्वसंस्कारार्थत्वमपि व्याख्यातम्। यदाऽपि हि सोमवमनान्न विहिताकरणं नापि प्रतिषिद्धसेवनमापद्यत इति कृत्वा दोषनिर्घातार्थत्वमिष्टेरनाश्रित्य नैमित्तिकं 973 कर्माङ्गं तदाऽपि च यच्छब्देन पुरुषस्योपात्तत्वाज्जघन्यमानन्यायेन प्रकरणगतपुरुषसंस्कारताऽध्यवसीयते, तदाऽपि 'याजमानास्तु' इत्यनेनैव तत्कर्तृकता। वमनसमानविषयत्वाच्च यजमानवमनमेव निमित्तम्। यत्त्वध्वर्य्वादिवमनेऽपि द्रव्यप्रतिपत्तिभ्रेषः, कर्तृसंस्काराद्विनाशो वा समाधिमपेक्षत इति। यद्यप्यपेक्षते तथाऽप्यविधानान्न ग्रहीष्यते। सर्वेषु च क्रत्वर्थपुरुषार्थपक्षेषु चर्त्विग्वमनेऽविधानमित्युक्तम्। अतश्च यदि तद्वमनमदुष्टमेव ततस्तूष्णीमेवाऽऽसितव्यम्। अथ दुष्टं ततः सामान्यविहितं किंचित्कर्तव्यम्। न चात्र क्रत्वर्थाद्यन्यतमपक्षावधारणप्रयोजनमस्तीति नातीवावधारणे यतितव्यम्। अथापि तत्त्वज्ञानं प्रयोजनं ततो जघन्यमानपक्षः परिग्रहीतव्यः। तथा च सूत्रकारः स्वामिनो वा तदर्थत्वादित्याह॥ ३५॥ § 6592

व्यृध्यत इति स वक्तव्यो यस्य सोमपानादृद्धिः प्रार्थ्यते। तद्वैगुण्याच्च व्यृद्धिराशङ्क्यते स्वामिनश्च तदुभयमपीति तस्यैवेष्टिः॥ ३६॥ § 6593

इति यजमानसोमवमने, इष्टिविधानाधिकरणम्॥ १३॥

## ०.०.१३६ सर्वप्रदानाधिकरणम्

अष्टाकपालादिशब्दैः समस्तं द्रव्यं देवतार्थमवगमितमाहवनीयप्रक्षेपेण च हविषो देवतार्थता भवति। 'यदाहवनीये जुह्वति' इति विधेः 'अग्निमुखा वै देवाः' इति चार्थवादात्। एवं च सति ततश्चेत्किंचिदप्यपनीयेत तदाऽन्यच्छ्रुतमन्यत्क्रियेत। तस्मात्सर्वप्रक्षेपः। किं पुनरयं पूर्वपक्षवादी शेषकार्याणां स्विष्टकृदिडाप्राशित्रशंयुवाककालभक्षचतुर्धाकरणानां विधिं न पश्यति। सत्यं 974 न पश्यतीति केचित्। न त्वेतद्युक्तमिव। न ह्येवं क्वचित्पूर्वपक्षो न भवेत्। अतः पश्यन्नेवानेनाभिप्रायेण मन्त्रयत इति वक्तव्यम्। § 6595

९ भ्य] ( अ॰ ३ पा॰ ४ अ॰ ५ ) अत्रत्यन्यायेनेत्यर्थः

१० मा] ( अ॰ ३ पा॰ ८ अ॰ २ सू॰ ४ )

विद्यमानेषु शेषेषु द्रव्याणामप्रयोजकाः।
भवेयुः शेषभाजो हि निःशेषे तु प्रयोजकाः॥ § 6597

यदि हि द्व्यवदानमात्रे हुते पुरोडाशादयः सशेषाः क्रियन्ते तदा ‘उत्तरार्धात्स्विष्टकृते समवद्यति’ इत्येवमादिचोदनावशेन ‘एकदेशद्रव्यं चोत्पत्तौ विद्यमानसंयोगात्’ इत्येवं स्विष्टकृदादीनामप्रयोजकत्वं भवति। यदा तु खलु सर्वप्रदानमवगम्यते तदा विद्यमानसंयोगासंभवाच्चोदितैकदेशानुष्ठानानुपपत्त्या शक्यमेकदेश्युत्पादनमध्यवसातुमिति स्विष्टकृदाद्यर्थं पुरोडाशान्तराण्युत्पाद्येरन्। शेषशब्दः ‘शेषात्स्विकृष्टते समवद्यति’ इत्यादिषु कथमिति चेत्। उच्यते। § 6598

हविरन्तरमालोच्य शेषशब्दो भविष्यति।
आज्येत शेषमितिवत्तच्छेषेणेतिवच्च नः॥ § 6600

यथैव ‘आज्येन शेषं संस्थापयति’ इति पूर्वकर्मणः पर्यवसानादधिके पूर्वसदृशे वा शेषशब्दः प्रयुज्यते। यथा च ‘ततः शेषेण विशिष्टदेशजात्यादिमन्तो जन्म प्रतिपद्यन्ते’ इति स्वर्गफलकर्मणो निःशेषोपयोगादन्यफलस्य चान्यत्र व्यापारासंभवात्ततोऽन्येनेति वक्तव्ये ततः शेषेणेति गौतमाचार्येणोक्तम्। एवमिहापि यत्प्रधानहविर्भ्योऽन्यद्धविस्तेनैवान्यत्वेनाऽऽधिक्येन वा भविष्यति। अथवा गुणत्वेन वा शेषादित्येवमभिधास्यते। शेषशब्दो ह्युपयुक्तेतरद्विद्यमानं ब्रवीति। न च प्रधानहविषां किंचिद्विद्यते। अन्येषां च सर्वमेतद्रूपमस्ति। तस्माद्द्रव्यान्तराणि गृह्येरन्। यथा वक्ष्यति ‘निर्देशात्तरयान्यदर्थादिति चेत्’ इति। अथाप्यत्यन्तं शेषशब्दानुरोधं कृत्वा तेषामेव किंचिच्छेष्यते। तथाऽप्यस्त्येवान्यद्विचारस्य प्रयोजनं नावश्यं पक्षोक्तेनैव प्रयोजनेन भवितव्यम्। इदमपि संभवति। यदा प्रधानवाक्यादशेषप्रदानप्रसक्तौ सत्यां शेषकार्यवशेन शेषाः स्थाप्यन्ते, तदा यथैव प्रधानं तस्य हविषः प्रयोजकमेवं स्विष्टकृदादीन्यपीति। तदर्थावदाननाशदोषापहारेष्वपि प्रधानवदेव हविरन्तरमुत्पाद्येत। यदा पुनः प्रधानचोदनाक्षिप्तस्यैव शेषस्य स्विष्टकृदादीनि ग्राहकाणि
975 भवन्ति तदा तेषां परप्रयुक्तद्रव्योपजीवनादयप्रयोजकत्वे सति नाशदोषापहारेष्वप्यक्रिया सिद्धा भवति। तस्मात्सत्यप्युभयोः पक्षयोरसर्वप्रदानेऽस्ति प्रयोजनमित्यर्थवान्विचारः॥ ३७॥ § 6601

यद्याग्नेयोऽष्टाकपाल इत्येवमाद्येव भवेत्ततः सर्वप्रदानमेवावधार्येत। अत्र पुनस्तस्मात्पुरोडाशादेर्निष्कृष्य किंचिदेव होतव्यं श्रूयते ‘द्विर्हविषोऽवद्यति’ ‘मध्यात्पूर्वार्धाच्च द्विरवद्यति’ ‘अङ्गुष्ठपर्वमात्रमवदानं भवति’ ‘द्व्यवदानं जुहोति’ इत्येवमादिवाक्यालोचनेन हि किंचिदेव होतव्यमवगतमतः शेषयितव्यं किंचित्॥ ३८॥ § 6602

४ एं] ( अ॰ ४ पा॰ १ अ॰ १३ सू॰ २८ )
११ ति] ( अ॰ ४ पा॰ १ अ॰ १३ सू॰ २९ )।

यद्येतानि वाक्यान्युत्पत्तिवाक्यावगतमशेषहोममबाधमानानि न निविशेरन्, यदि चैतानि प्रधानस्य प्रत्यासन्नतराणि भवेयुस्ततो बाधेरन्। एतानि तु संस्कारवाक्यानि अविरोधेनैवोपपद्यन्ते। शक्यते ह्यङ्गुष्ठपर्वमात्रैर्मध्यपूर्वार्धोद्धृतैर्दिशः प्रवृत्तैरवदानैः संस्कृत्य संस्कृत्य निःशेषं हविः प्रदातुम्। अतः सर्ववाक्यवशेनैवं शास्त्रार्थो भवति। यदशेषं हविर्जुहोति तदेवमुपायमिति। तेन न कस्यचिद्धोमः प्रतिषिध्यते। तस्मात्सर्वप्रदानं कर्तव्यम्। यत्तु यथाश्रुतेतिकर्तव्यताको युगपन्न शक्यते कर्तुमद्व्यवदानहोमप्रसङ्गादिति। ज्योतिष्टोमवदभ्यसितव्यो होमः। तदर्थत्वात्। देवतार्थत्वाद्यागार्थत्वादपूर्वार्थत्वाद्वा कृत्स्नस्याष्टाकपालस्य। नैकदेशमात्रहोमेनोत्पत्तिवाक्यार्थसंभावना भवेत्। अथवाऽवदानसंस्कारस्य द्रव्यार्थत्वात्॥ ३९॥ § 6603

नैतदस्ति। पुनःपुनर्द्विरवखण्डनं तद्वांश्च होमोऽभ्यसितव्य इति। कुतः।
§ 6604

खण्डनं गुणभूतत्वादभ्यस्येतेह यद्यपि। 976
होमः प्रधानभावात्तु नाऽऽवृत्तिं प्रतिपद्यते॥§ 6606

'द्विर्हविषोऽवद्यति' इत्येतस्य संस्कारत्वाद्यावत्संस्कार्यं ध्रियते तावदावृत्तिर्भवत्विति शक्यते वक्तुम्। होमस्य फलवत्त्वात् 'यैस्तु द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि' 'द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसंबन्धः' इति च प्राधान्यावगमादेकेन द्व्यवदानेन निवृत्तस्य न द्रव्यमस्तीति न पुनरावृत्तिर्युक्ता। तस्मिंश्चानावर्तमानेऽर्थाभावादवद्यतिरपि नाऽऽवर्तते। कार्ये हि प्रवर्तमानं द्रव्यं संस्कारं गृह्णाति नोदासीनम्। न च द्व्यवदानव्यतिरिक्तस्य हविषः कार्यमस्तीति न संस्कारमपेक्षते। तस्मात्सोऽपि नाऽऽवर्तते। यदि हि द्रव्यार्थो होमो भवेत्ततस्तद्वशेन स्वयमावर्तेताखण्डनं चाऽऽवर्तयेत्। अतदर्थस्य नाऽऽवृत्तिः। न चैष वाक्यार्थो यज्जुहोतीति हूयमानस्य द्विरखण्डनमुपायो विधीयत इति। न हि जुहोतिशब्देन द्रव्यमुपादीयते। न चैष कर्मणि लकारो यतो हूयमानानुवादत्वं प्रतिपद्यते। क्रियायामेव त्विदं द्व्यवदानं विधीयते। योऽपि यज्जुहोतीति यच्छब्दाद्द्रव्यप्रत्ययो भवति सोऽपि यच्छब्दस्यावैदिकत्वात्क्रियाविशेषणभूतस्यानुवादत्वप्रदर्शनार्थं व्याख्यातृभिरुच्चारितस्य परमार्थानालोचनाद्भविष्यतीत्युपेक्षणीयः। यत्तु ज्योतिष्टोमवदुत्पत्तिवाक्यावगतस्य समस्तद्रव्यप्राप्त्यर्थभावर्तिष्यत इति। तदयुक्तम्। कुतः। § 6607

अशेषग्रहणे सिद्धे भवेत्सोमेन तुल्यता।
अपवादात्तदेवेह न तु सिद्धं कथंचन॥§ 6609

---

६ द्र] ( अ॰ २ पा॰ १ अ॰ ३ सू॰ ७ )
७ द्र] ( अ॰ ६ पा॰ १ अ॰ १ सू॰ १ )

आग्नेयचोदनाया ह्यानुमानिको होमसंबन्धः सर्वपुरोडाशावयवसामान्य-
977 प्रवृत्तश्च स यावन्नेव निर्वर्तते तावदस्त्येव 'द्व्यवदानं जुहोति' इत्यनेन निष्कृष्य संबन्ध कल्पितः। तस्मिंश्च सिद्धे नाऽऽनुमानिकोऽवकल्पते। तेन यत्सामान्यप्रवृत्तमाग्नेयत्वं तद्व्यवदानचोदनया साप्तदश्यमिव प्राकरणिकैर्द्व्यवदानविषयमेवोपसंह्रियते। तत्रैषोऽर्थो विज्ञायते द्व्यवदानमाग्नेयं करोति। अतोऽवयवान्तराणामचोदितत्वान्न होमप्रसङ्गः। किं च। § 6610

न चावश्यं प्रदानेन हविराग्नेयमिष्यते।
द्व्यवदाने गृहीते हि सर्वाग्नेयत्वसंभवः॥ § 6612

तद्धितेन हि तादर्थ्यमात्रमुक्तं न प्रदानम्। द्वेधाऽपि च तादर्थ्यं भवति प्रदानेन प्रदानार्थद्रव्यसाधनत्वेन वा। तथा हि। 'व्रीहिभिर्यजेत' इति वचनान्न तावद्व्रीहयः साक्षात्प्रदीयन्तेऽथ च प्रदेयप्रकृतित्वादेवमुपदिश्यते। तस्माद्यद्यपि पुरोडाशः समस्तः साक्षान्न प्रदीयते तथाऽपि द्व्यवदानप्रकृतित्वादाग्नेयो भविष्यति। तेन द्व्यवदानेनैव तावद्दीयमानेन तस्याऽऽग्नेयत्वं कृतं भवति। द्वावेव च तौ व्याख्याप्रकारौ। एको देवतासंबन्धस्य द्व्यवदाने संक्रान्तिरिति। अपरः पुनरिदमेव पुरोडाशस्याऽऽग्नेयत्वं द्व्यवदानं ततो गृह्यत इति। तस्मान्न सर्वहोमः॥ ४०॥ § 6613

एवं च शेषशब्दो मुख्य एवोपयुक्तेतरविद्यमानवचनो भविष्यति। उत्तरार्धादिशब्दश्च नावयविविधिकल्पनार्थापत्तिक्लेशमाश्रयिष्यति। अत्राभिधीयते। यत्तावदुक्तं साप्तदश्यवदाग्नेयत्वं द्व्यवदानमात्र उपसंहृतमिति। तन्न घटते। कथम्। § 6614

सामान्यविधिरस्पष्टः संह्रियेत विशेषतः।
स्पष्टस्य तु विधेर्नान्यैरुपसंहारसंभवः॥ § 6616

978 साप्तदश्यं हि सामिधेनीनामुक्तमनारभ्यवादेन न क्रतूनाम्। तस्य तु क्रतुसंबन्धस्तद्द्वारेणाऽऽनुमानिकाः कल्प्यः। न च प्रत्यक्षसंबन्धे सत्यानुमानिकः कल्प्यत इति युक्त उपसंहारः। न त्वष्टाकपालस्यास्फुटो देवतासंबन्धः। तद्धितश्रुत्याऽभिहितत्वात्। स हि द्व्यवदानस्यैवाऽऽनुमानिकः स्यात्। उत्पत्तिवाक्ये च कर्मणोऽष्टाकपालेन संबन्धः श्रूयते। द्व्यवदानेन पुनरुत्पन्नवाक्ये। तत्रैतत्स्यात्। कर्मसंबन्धोऽष्टाकपालस्याऽऽनुमानिको द्व्यवदानस्य प्रत्यक्षस्तद्भावे वाऽऽनुमानिककल्पनं न संभवतीति। नैतद्युक्तम्। एवं सति 'द्व्यवदानं जुहोति' इत्येतदेवोत्पत्तिवाक्यमभ्युपगतं भवेत्। यदि ह्यष्टाकपालवाक्यं जुहोतिवाक्येनोपसंहृतं ततोऽनेनैव कर्मोत्पत्तिः क्रियेत। ततश्चाऽऽग्नेयवाक्ये 'चोदिते हि तदर्थत्वात्तस्य तस्योपदिश्येत' इत्येवं वाक्यभेदः प्राप्नोति। न

५ सामा] सामान्यविधेरुदाहरणं पुरोडाशं चतुर्धा करोतीति।
७ साप्त] अस्पष्टस्य तु बिधेरुदाहरणं दर्शयति—साप्तदश्यं हीत्यादिना॥
१६ त] ( अ॰ २ पा॰ २ अ॰ ३ सू॰ ६ )

चाननुमाय यागमाग्नेयादिवाक्यानां वाक्यान्तरापेक्षा तत्संबन्धो वाऽवकल्पत इत्युक्तम्। अतो यद्यप्यानुमानिकः संबन्धस्तथाऽपि स्वार्थपर्यवसायित्वान्यथानुपपत्तेः प्रथमतरमनुमित इति सिद्धे संबन्धे न शक्यं प्रत्यक्षश्रुतेनाप्यन्यथात्वं कर्तुम्। न चेह सामान्यविशेषभावः संभवति। अवयवावयविनोः सामान्यविशेषव्यवहाराभावात्। अष्टाकपालचोदनया हि प्रत्यक्षमेव समस्तः पुरोडाश उपदिश्यते। द्व्यवदानचोदनयाऽपि, ततस्तुल्यबलत्वम्। ननु द्व्यवदानव्यतिरिक्तावयवप्राप्तिः सामान्येन पुरोडाशशब्देन क्रियमाणा दुर्बला स्यात्। उच्यते। § 6617

यदि ह्यवयवार्थेन पुरोडाशो विधीयते।
ततः सामान्यवृत्तिः स्यात्स तु साक्षाद्विधीयते॥ § 6619

आकृतिशास्त्राण्याकृतावसंभवन्ति व्यक्तिलक्षणार्थानि भवन्ति। तानि व्यक्तिषु परोक्षत्वाद्दुर्बलानि जायन्ते। न त्ववयविव्यक्तिः कर्म साधयितुं न शक्नोति। यतस्तच्छब्दस्यावयवलक्षणार्थता कल्प्येत। अथ विनैव कारणेन लक्षणाश्रयणम्। ततोऽवयवशास्त्रस्याप्यवयवान्तरलक्षणार्थत्वाद्दौर्बल्यं स्यात्। तस्माद्यथैव द्व्यवदानं स्वावयवनिरपेक्षमात्मनैव केवलेन विधीयते तथैवाष्टाकपालस्य द्व्यवदानमवयवान्तराणि चानपेक्ष्य प्रत्यक्षविधानात्प्राप्तिस्तत्प्राप्तौ च यदाऽवयवान्तराण्यनुषज्यन्ते को वारयति। न तु तानि स्वमहिम्ना संबध्यन्ते तत्परा वा चोदना। न चात्यन्तमवयवावयविनोर्व्यातिरेक इति यदाऽऽलोच्यते तदाऽवयवान्तराण्यपि प्रत्यक्षाण्येव भवन्ति। तेनाष्टाकपालचोदना द्व्यवदानचोदनावशेनैवं कर्म प्राप्नोति द्व्यदानं दत्त्वा पुनः शेषप्र- 979
दानम्। अथवा विकल्पः कदाचित्सकलस्य प्रदानं कदाचिद्द्व्यवदानमात्रस्य। अथवाऽष्टाकपालस्योत्पत्तिवाक्यशिष्टत्वादामिक्षावद्बलीयस्त्वे सति द्व्यवदानं तेन सह बाधविकल्पसमुच्चयान्न प्रतिपद्यत इति 'गुणश्चापूर्वसंयोग' इत्येवं कर्मान्तरं कल्पयेत्। यतः कुतश्चिच्च द्रव्यान्तरादुपादीयेत, अष्टाकपालसंबन्धाभावात्। पूर्वकर्मसंबन्धेऽपि च पुनर्द्रव्यान्तरादेवोत्पन्नस्याष्टाकपालेन सह विकल्पसमुच्चयावुपन्यसितव्यौ। अथवा कृत्स्नपुरोडाशग्रहणेऽवधारिते द्व्यवदानचोदनायाश्च गुणपरत्वात्कर्मान्तरविध्यशक्तेरष्टाकपालविषयत्वावगमात्संस्कारस्य यावत्संस्कार्यमावृत्तेः प्रधानस्य च यथाश्रुतगुणसंपादनाय ज्योतिंष्टोमवदावृत्तेरिष्टत्वात् 'उपायो वा तदर्थत्वात्' इत्ययमेव पक्षः प्राप्नोति निरवदानप्रमाणाभावात्। निरवदानाश्रयणे चात्यन्तदुष्टा परिसंख्या स्यात्। न ह्यत्र नियम उपपद्यते, सर्वपुरोडाशावयवानां नित्यवत्प्राप्तेः। यदि हि कतमोऽवयवः प्रक्षिप्यतामित्येवं नियमापेक्षायां सत्यां मध्यपूर्वार्धद्व्यवदानं विधीयते ततः स्यान्नियमार्थत्वम्। नित्यप्राप्ते त्ववयविनि द्व्यवदानपुनःश्रुतेरव-

२३ श्चा] ( अ० २ पा० २ अ० ९ सू० २३ )
२९ उपा] ( अ० ३ पा० ४ अ० १४ सू० ३९ )

यवान्तरनिवृत्तिपरत्वादस्वार्थग्रहणमित्यादिदोषत्रयमपरिहार्यं स्यात्। तत्र हि तत्परिहर्तुं शक्यते यत्र परिसंख्यायमानप्राप्तिशास्त्रमक्लृप्तमुत्प्रेक्षाभिमुखं वर्तते। न चात्राष्टाकपालशास्त्रमक्लृप्तम्। न च क्लृप्ते सति दोषपरिहारः संभवति। तस्मान्न निरवदानम्। यदि च निरवदानशास्त्रादाग्नेयत्वं यागार्थद्व्यवदानविषयमुपसंह्रियेत ततः शेषावयवानामदेवतार्थत्वान्न स्वत्वमपेतं स्यात्। ततश्च ‘भक्षार्थो वा द्रव्ये समत्वात्’ इत्यादिषु यद्दृत्विग्भिः साम्यादस्वामित्वं यजमानस्य तत्र तत्रोच्यते तत्सर्वं विरुध्यते। तत्रैतत्स्यात्। देवतोद्देशसंबन्धो द्व्यवदानस्यैव त्यागः पुनःसमस्तस्य हविषः। त्यागकृता च स्वत्वनिवृत्तिर्न देवतासंबन्धकृता। तस्मादविरुद्धं तदभिधानमिति। तदसत्। कुतः। § 6620

निर्वपन्नेव जानाति ह्येतावदिह दास्यते।
तत्राधिकपरित्यागः कल्प्यते केन हेतुना॥§ 6622

देवतायै हि दातुं द्रव्यं त्यजन्ति न विभवेन। तत्र यद्देवतार्थादन्यदधिकं तद्गृहावस्थितद्रव्यान्तरवदपरित्यक्तम्। न चात्र त्यागस्य भेदेन विधानमस्ति। देवतासंबन्धकरणविधिनैव ह्यसावर्थापत्त्याऽऽक्षिप्यते। सा चार्थापत्तिर्यावता विना देवतायै दानं न संभवति तावत्येवावस्थिता नान्यत्र। न हि शेषद्रव्यपरित्यागाद्विनाऽनुपपत्तिः। सर्वत्र च समाप्तिविधानमिष्यते तेनापि यावत एव यागसमाप्त्यङ्गत्वं तावत एवाऽऽक्षिप्तस्य यागविधिर्नावयवान्तराणाम्। अतो
980 यथा चतुर्मुष्टयतिरिक्तानामनासि स्थितानां व्रीहियवानां न निर्वापवेलायामत्यागादस्वत्वमेवमिहापि नावयवान्तराणां तत्स्यादिति। अथोच्येत निर्वापवेलायामनुपजातमध्यपूर्वार्धादिविभागं द्रव्यमनभिप्रेतत्यागमपि बलात्परित्यक्तव्यम्। न हि तदानीं विज्ञायते केभ्यो व्रीहिभ्यो द्व्यवदनं निष्पत्स्यते केभ्यो नेति, अगम्यमाने विशेषे यानेव न त्यजेत्तेभ्य एव कदाचिदवदीयेत। तत्र त्यक्तानामदानादत्यक्तानां च दानादयथाश्रुतकरणप्रसङ्गः। तस्मात्सर्वत्याग इति। नैतदेवम्। § 6623

न हि सामान्यशास्त्रेण व्यवहारे कृते सति।
विशेषशास्त्रावसरस्तस्मादादित एव सः॥§ 6625

यदा हि सामान्यशास्त्रं प्रवृत्तव्यवहारं भवति तदा न शक्यं केनापि व्यावर्तयितुम्। तद्यदि समस्ताष्टाकपालनिर्वृत्त्यर्था व्रीहयो देवतोद्देशेन निरुप्तास्ते सर्वे दातव्यत्वेन प्रक्रान्तास्तेषां य एव न दीयेरन्, तत्रैव प्रक्रान्तापरिसमापनदोषो भवेत्। ततश्च सर्वप्रदानमेव प्राप्नोति। यदि तु द्व्यवदानशास्त्रेण विशेष्टुमिष्यते तत आदित एवैवमवधारयितव्यम्, अष्टाकपालनिर्वृत्त्यर्थेषु चतुर्मुष्टिषु ये द्व्यवदाननिर्वृत्त्यर्थास्तानग्नये जुष्टं निर्वपामीति। यद्यपि च विशेषो न गम्यते तथाऽप्येतेषां मध्ये येऽत्र द्व्यवदानं साधयन्ति तावन्तो न ममेति

१ मित्या] आदिपदेन स्वार्थपरित्यागप्राप्तबाधयोः संग्रहः।

६ भ] ( अ० ३ पा० ४ अ० १७ सू० ५० )

शक्यं संकल्पयितुम्। तद्यथा लोके कश्चिद्बहुद्रव्यसमुदायेऽवस्थिते कंचिदभिधत्त इतस्त्वं यावत्तृप्ति गृहाणेति। तत्र न तदवयवविशेषो गम्यतेऽथ च न सर्वत्यागोऽध्यवसीयते तथेहापि द्रष्टव्यम्। यत्तु तावन्मात्रमेव न निरुप्यते तत्र 'चतुरो मुष्टीन्निर्वपति' 'अश्वशफमात्रः पुरोडाशो भवति' इत्यादिवचनसामर्थ्यादीदृक्परिमाणाद्गृहीतं ह्यवदानं देवतार्थातां प्रतिपद्यत इत्यवगम्यते। यत्तदन्यत्तत्तदनुग्रहार्थं नाधिकत्यागार्थमिति द्रष्टव्यम्। अतो यथैव 'अनसोऽधिनिर्वपति' इत्युक्ते निर्वापपरिच्छेदार्थमुपात्तेष्वपि शकटस्थितेषु व्रीहिषु न स्वत्वमपैति तथैव ह्यवदानापादानभूते पुरोडाशेऽपीति स्वत्वे सति शक्याः परिक्रयादयस्तेन कर्तुमिति समत्ववचनविरोधः। एतेन ह्यवदानप्रकृतित्वादेवाष्टाकपाल आग्नेयः कृतो भवतीत्येषोऽपि पक्षः प्रत्युक्तः। तत्रापि शेषपरित्यागानुपपत्तेः। न च व्रीहिवत्पुरोडाशस्य प्रकृतित्वं युक्तम्। व्रीहयो ह्यनदनीया वाक्यान्तरशिष्टाश्च प्रकरणादुत्पत्तिवाक्यशिष्टप्रकृतिद्रव्यापेक्षपुरोडाशावरुद्धयागानुवादेन विधीयमाना न शक्नुवन्ति प्रकृतित्वप्रतिपत्तिमन्तरेण यागसाधनत्वं प्रतिपत्तुम्। अष्टाकपालस्त्वदनीय उत्पत्तिवाक्यशिष्टश्च शक्नोति साक्षाद्यागं साधयितुम्। न च पूर्वतरप्राप्ते प्रकृत्यपेक्षिणि ह्यवदाने चोद्यते। तस्मान्न तत्प्रकृतित्वेन यागं साधयति। कस्तर्हि सर्वप्रदानस्य परिहारः। उच्यते। § 6626

यागहोमावभेदेन यैर्मोहात्परिकल्पितौ। 981
तेषामपरिहार्यत्वं भेदे त्वेषोऽभिधीयते॥ § 6628

यद्याग्नेयादिचोदनयैव हविःप्रक्षेपोऽभिधीयते ततो ह्यवदानचोदनया परिसंख्यातुमशक्यत्वात्सर्वप्रक्षेपः प्राप्नोति। तदा च तयाऽऽग्नेयचोदनयैव प्रक्षेपश्चोद्येन यदा यागहोमयोरभेदः। तयोस्तु भेदः शब्दान्तराधिकरणन्यायसिद्धः। 'तदुक्ते श्रवणाज्जुहोतिरासेचनाधिकः स्यात्' इति सूत्रकारेणोच्यमानं तत्रैव समर्थयिष्यामहे। यथा देवतोद्देशेन स्वत्वत्यागमात्रं यागो देवतोद्दिष्टत्यज्यमानस्वत्वद्रव्यप्रक्षेपो जुहोतिः। तत्र ये दोषा दर्शपूर्णमासज्योतिष्टोमादिष्वहोमत्वादाहवनीयो न भवेदित्यादयस्तानपि तत्रैव परिहरिष्यामः। उभयोश्च भेदे सति 'आग्नेयोऽष्टाकपालः' इत्यनेन तावद्वाक्येन यावता विनाऽष्टाकपालस्याऽऽग्नेयत्वं न भवति तावदेव चोद्यते। तस्य च स्वत्वपरित्यागदेवतोद्देशौ केवलावन्तरेणाऽऽग्नेयत्वं न जायते न प्रक्षेपमपि। तत्र यदि वाक्यान्तरं न स्यात्तत ईदृशं कर्म भवेत्। सुपक्वमविकलमष्टाकपालमाचारतः शुचौ देशे निधाय देवतामुद्दिश्य नायं ममेति संकल्पः कर्तव्यः। तत्परिपालनार्थं च पुनः कदाचिदपि न स्वत्वं द्रव्ये बध्नीयात्। यदि हि बध्नीयात्ततः पूर्वसंकल्पं विनाश-

२३ दु] ( अ° ४ पा° २ अ° १० सू° २८ )

२९ वाक्यान्त] वाक्यान्तरमिति—अवदानप्रक्षेपविधायकमिति शेषः।

३० क] कर्मेति—अनुष्ठानमित्यर्थः।

३० मा] आचरितः श्रुताविति क्वचित्पाठः।

येदनृतं च वदेत्। यो हि प्रथममेव जानाति पुनरप्यहमत्र स्वत्वमाधास्यामीति
तस्य न ममैतद्देवतायै त्वेतदिति संकल्प एव न भवेत्। तेन देवतोद्देश-
त्यागोत्तरकालं यदस्य भवति तद्भवत्वित्यवधार्य न कश्चिद्व्यापारो वोढव्यो
भवेत्। तथा प्राप्ते तु वाक्यान्तराणि भवन्ति ‘उपस्तृणाति’ ‘द्विर्हविषोऽव-
द्यति’ ‘अभिधारयति’ ‘चतुरवत्तं जुहोति’ इत्येवमादीनि। तैस्तावदिदमव-
धार्यते द्व्यवदानं हविषो होतव्यमिति। सर्वाणि चैतानि प्रकृतद्रव्यालम्बित्वात्त-
दुपादाय प्रवर्तन्ते नापूर्वद्रव्यग्राहित्वेन। तथा हि। ‘चतुरवत्तं जुहोति’ इत्यत्र
होमस्याप्राप्तत्वान्न तमुद्दिश्य द्रव्यं विधीयते। चतुरवत्तं च पूर्ववाक्यकल्पितं
प्रयोजनापेक्षमस्ति। तस्मात्तस्यानेन प्रक्षेपमात्रं शक्यं विधातुमिति न च-
तुरवत्तविशिष्टहोमविधानमवकल्पते। होमस्यापि च त्र्यंशस्य समाप्तिपर्यन्त-
त्वात्सर्वान्त्येंऽशे प्रक्षेपे चोद्यमाने त्यागतद्देवतोद्देशयोः किमपूर्वयोरर्थापत्त्या
विधिः कल्प्यतामुत कुतश्चित्प्राप्तयोरेवाऽऽश्रंयणं क्रियतामिति। तत्राऽऽग्नेय्य-
धिकरणन्यायेन लाघवे सति गौरवस्याप्रमाणकत्वादवगतत्यागोद्देशांशद्वयान्य-
982 ष्टाकपालादीन्येन गृह्यन्ते। न च तेषामौत्पत्तिकं यागसाधनत्वं विरुध्यते।
प्रक्षिप्यमाणानामंग्नियागसाधनत्वाविघातकत्वात्। देवतान्तरसंबन्धेन हि याग-
विपरीतक्रियासंबन्धेन वा विरोधः स्यान्न त्वसावस्ति। तेनैषोऽर्थो भवति,
अष्टाकपालेन यत्र क्वचित्प्रदेशे स्थितेन यजेत तदीयं च द्व्यवदानं यत्र
क्वचित्प्रक्षिपेदिति। तत्र ‘वेद्यां हर्वीष्यासादयति’ ‘बर्हिषि’ इति वचनात्त-
त्र स्थितेन पुरोडाशेनेज्यते। ‘यदाहवनीये जुहोति’ इति वचनात्तत्र द्व्यव-
दानं हूयते। स तु होमः किं पूर्वस्माद्यागादर्थान्तरमितिकर्तव्यता भवति,
उत तस्यैव यागस्यांशान्तरविवृध्या रूपान्तरं जातमिति चिन्तनीयम्। तत्रैव
रूपान्तरोपजननमिति ब्रूमः। कर्मान्तरत्वे हि द्रव्यान्तरं देवतान्तरं च नारिष्ठ-
होमादिवत्प्राप्नोति। यथोक्तेन न्यायेन स एव यागः प्रचिततरो जुहोतित्व-
मापद्यते। न चैतावतौत्पत्तिकयजिरूपविघात आशङ्क्यो जुहोतेर्यजिविशेष-
त्वात्। सामान्ये हि कश्चिद्विशेषो भवत्यपि। न तु निःसामान्यः कश्चिद्विशेष
उपपद्यते। ततश्च यथा वृक्षमानयेत्युक्ते शिंशपामित्यविरोधात्पश्चादुच्यमानं
न विरुध्यते तथा यजेतेत्युक्ते जुहोतित्वाविरोधोऽवगन्तव्यः। सोऽयं याग
एव द्व्याकारः समस्तेन पुरोडाशेन क्रियते। द्व्यवदानेन जुहोत्यवस्थानीतः
शेषेण तु सामान्यरूप एकस्मिन्नपि च क्षणे द्व्याकारोऽपि निष्पद्यते। यदैव
हि द्व्यवदानमाहवनीये निक्षिप्यते तदैव याज्यानुवाक्याभ्यां समस्तविषयदेव-
तासंकल्पोत्थापनं क्रियते। तेन नैवं भ्रमितव्यं यस्माज्जुहूस्थं द्व्यवदानमाश्राव-

---

८ वा] पूर्ववाक्यकल्पितमिति—‘उपस्तृणाति’ ‘द्विर्हविषोऽवद्यति’ इत्यादिवाक्यविहितमित्यर्थः।

१३ धिक] ( अ० ३ पा० २ अ० ८ )

१५ माणाना] नामपि तद्यागे, इति पाठान्तरम्।

३१ माश्रा] आश्रावणमिति—देवतायै द्रव्यं दातुमाभिमुख्येन यजमानं श्रावयेत्यर्थकः ‘आश्रावय’ इत्याग्नीध्रं प्रत्यध्वर्युणोच्यमानः प्रैष इत्यर्थः।

णप्रत्याश्रावणाभ्यां त्यागायोद्धृतं च तस्मात्तदेव केवलं देवतायै संकल्पितं नेतरदिति। विद्वद्भ्यामध्वर्युयजमानाभ्यां वेदार्थमनुसृत्य समस्तपरित्यागदेवतोद्देशौ यथार्हं कर्तव्यौ। अध्वर्युणा द्व्यवदानप्रक्षेपोऽतिरिक्तोऽनुष्ठेय इति। न चैतावता यागस्य वैरूप्यमशोभनं मन्तव्यम्। वचनसामर्थ्यादीदृशस्यैव शोभनत्वप्रतीतेः। यथा कस्यचित्पुरुषस्यैकः पादः पुरस्ताद्गत इति न तावता किंचिद्वैलक्षण्यं भवति। तथाऽत्र द्व्यवदानपादेऽधिकमपि प्रक्षेपांशं गते सत्युत्पत्तिवाक्यशिष्टं यागसाधनत्वं समस्तेनाष्टाकपालेन प्रतिपन्नमेवेत्यविरोधः। तस्माद्द्व्याकारमेवैतत्प्रधानं द्रष्टव्यम्। अथवा यस्तत्र यागस्तस्य प्राधान्यं यस्तु प्रक्षेपः सोऽङ्गमेव। तथा हि। § 6629

फलवाक्ये यजेरेव संबन्धः श्रूयते स्फुटः।
तत्संनिधौ समाम्नानाज्जुहोतेरङ्गतेष्यते॥§ 6631

यद्यपि तस्मिन्नेव द्रव्ये होमोऽप्याश्रितस्तथाऽपि प्रोक्षणादिवदस्याङ्गत्वमविरुद्धम्। न हि समानद्रव्याश्रयत्वेन सर्वस्य प्राधान्यं भवति। संस्काराणाम- 983
पि प्रधानद्रव्यवर्तित्वोपपत्तेः। संस्काराश्च केचित्प्रथममेव प्रधानेभ्यः क्रियन्ते केचिदूर्ध्वं केचिद्युगपत्। तत्र केचिदाहुः। परस्तात्संस्कारोऽयं होमः। निर्वापवेलायामेव देवतोद्देशत्यागात्मकतया यागस्य निर्वृत्तत्वात्। तदयुक्तम्। न ह्यनदनीयावस्थैर्व्रीहिभिः पुरोडाशसाधनको यजिः शक्यः साधयितुम्। यदि च निर्वापवेलायामेव यागनिर्वृत्तिर्भवेत्तथा सति तदुत्तरकालं नाशदोषापहारेषु द्रव्यान्तरं नोपादीयेत। तत्र 'निर्देशाद्वाऽन्यदागमयेत्' इत्यादि विरुध्यते। भाष्यकारोऽप्युपाकृते पशावाह 'परकीयोऽसौ रक्ष्यते कालेन देवतया संभन्त्स्यते' इति। तेन निर्वापवेलायामेतस्यै दास्यामीत्येतावन्मात्रं संकल्पत्यागः केवलः क्रियते न यागः। स तु पूर्वनिर्वृत्तत्यागापेक्षया यथाश्रुतेतिकर्तव्यताकदेवतोद्देशरूपः प्रक्षेपवेलायामेव निर्वर्तते। तत्र तस्मिन्नेव क्षणे समस्तेन पुरोडाशेन यागः साध्यते। तस्माधनैकदेशश्च द्व्यवदानं यागस्याङ्गेन प्रक्षेपेण संस्क्रियते। तदुपल क्षितत्वादेव यागनिर्वृत्तेः प्राक्प्रक्षेपादनिर्वृत्तयागावगमान्नाशादिष्वन्यद्रव्यागमनम्। सत्य पि होमस्य संस्कारकत्वे नाप्रयोजकत्वम्। निर्वृत्तयागभावित्वात्तु स्विष्टकृदादीनां स्फुटमेवाप्रयोजकत्वं भविष्यति। यदि वैष प्रक्षेपः प्रधानं भवेत्ततो दर्शपूर्णमासादिषु जुहोतिव्यवहार एव स्यात्। विकृतिषु च प्रधानानामनतिदेशाज्जुहोतावसति अप्रक्षिप्तानामेव सौर्यादीनां दानं स्यात्। अङ्गत्वे तु तेषामप्याहवनीये प्रक्षेपः सेत्स्य ति। ये तु

१ ण] प्रत्याश्रावणमिति—यदाश्रावयितव्यत्वेनाध्वर्युणोक्तं तदाश्रावितमस्त्वित्यर्थकः 'अस्तु श्रौषट्' इत्याग्नीध्रेणोच्यमानो मन्त्र इत्यर्थः।

१३ संस्कारा] संस्काराणामपीति—संस्कारत्वेनाङ्गभूतानामपीत्यर्थः।

१४ व्य] द्रव्यवर्तित्वेन प्रधानत्वापत्तेरिति पाठान्तरम्।

१९ निर्देशाद्वा] ( अ॰ ६ पा॰ ४ अ॰ १ सू॰ १ )

२० शावा] ( अ॰ ९ पा॰ ३ अ॰ १२ सू॰ ३६ ) इत्यत्रेति शेषः

जुहोतिचोदनोत्पत्तयस्तेषु पूर्वार्धभूतोऽपि यजिरात्मा वा भविष्यति। अथवा तेषामपि सोऽङ्गम्। तत्र हि त्यागदेवतोद्देशावपि तेनैवाऽऽक्षिप्येते। यजतिचोदनोत्पत्तिषु पुनः सिद्धयोस्त्यागदेवतोद्देशयोर्जुहोतिः प्रवर्तमानः 'आहवनीये यूपशकला होतव्याः' इतिवत्प्रक्षेपमात्रवचनो विज्ञायते। ततश्च सिद्धमङ्गत्वम्। एवं च सति पुरोडाशो यागे श्रूयते न होमे। सोऽपि द्व्यवदानस्य विहितो न समस्तपुरोडाशस्येति तन्मात्रस्य। समस्तस्य पुरोडाशस्य देवतां प्रत्युत्सृष्टत्वाद्विनाऽपि प्रक्षेपादस्वत्वव्यवहार उपपद्यते। न च परिसंख्यादोषो भविष्यति। निरवदानाच्च शेषसिद्धिः। § 6632

अथवा नैव भिद्येते यागहोमौ परस्परम्।
पूर्वापरौ हि सदृशौ तद्भागौ नरसिंहवत्॥ ४१॥ § 6634

इति सर्वप्रदानाधिकरणम्॥ १४॥

## ०.०.१३७ सर्वेभ्यः शेषकार्यानुष्ठानाधिकरणम्

984 यदाऽऽहवनीये प्रक्षेपेण, अक्षपितो हविःशेषः प्रतिपादितस्तदा शेषकार्याणि स्विष्टकृदादीनि कथं क्रियन्तामिति विचार्यते। तत्रार्थकर्मत्वं मन्यमान **एकस्मा**दित्याह। सत्यप्यर्थकर्मत्वे यदि तदर्थमेवैतानि द्रव्याण्युत्पन्नानि भवेयुस्ततः सर्वेषां संभावनाय पशववदानानामिवैकस्मादपि सिध्यति यागे सर्वेषां संबन्धः क्रियेत। तत्तु नास्ति अप्रयोजकत्वात्। अतस्तुषोपवापकपालवदेकेनैव सिद्धिः॥ ४२॥ § 6636

यश्च प्रधानानामेवादृष्टः संस्कारः स एकद्रव्यनिष्पादितैः शेषकार्यैः सिध्यतीति न द्रव्यान्तरमपेक्षते। **सकृच्छब्दश्च** सकृदवदानाभिप्रायः। इतरथा तु सर्वावदानेऽपि तन्त्रेण प्रयोगात्सकृत्त्वोपपत्तेरवक्तव्यतैव स्यात्। अथवा ततः शेषकार्याणि सर्वेभ्यः क्रियेरन्यदि संस्कारकाणि भवेयुर्न त्वेतानि संस्कारकाणि। कुतः। संस्कारान्तरैरेव संस्कृतत्वात्। अयमप्यविरोधाद्भविष्यतीति चेत्। तत्राप्येष सूत्रार्थः। संस्कारक्रमस्यातिक्रान्तत्वात्। यावद्ध्यकृतप्रयोजनं द्रव्यं भवति तावत्संस्कारमपेक्षते प्रधाननिर्वृत्त्युत्तरकालं तु कृतं संस्कारैरिति संस्काराणामनवसरः॥ ४३॥ § 6637

---

३ त्य] यदि शेषकार्यैरित्यादि भाष्यं व्याचष्टे—सत्यपीत्यादिना।
४ स्मा] नैकस्मादिति पाठो भवितुमुचितः।
४ सिध्य] सिध्यतीति—शेषकार्यमिति शेषः।
५ संस्का] संस्कारान्तरैः-पर्यग्निकरणादिभिरित्यर्थः।
६ संस्कार] संस्कारक्रमस्येति—संस्कारावसरस्येत्यर्थः।

985 ‘येस्तु द्रव्यं चिकीर्ष्यते’ इत्येवं संस्कारकर्माण्येतानि। तत्रापि ‘उत्पत्तौ येन’ संयुक्तम्’ इति प्रतिपत्तयः। ताश्च सर्वैः कृतार्थत्वाविशेषादपेक्षिताः। यद्यापि चैताभिर्द्रव्याणि न प्रयोक्ष्यन्ते तथाऽपि द्रव्यैरेव तासां प्रयुक्तत्वात्सर्वविषयता। निवृत्तेऽपि च प्रधाने तदीयानां सतामेषां का प्रतिपत्तिर्भवत्वित्यपेक्षिते शक्यः प्रतिपत्तिनियमो विधातुम्॥ ४४॥ § 6638

‘सकृत्सकृत्’ इति स्विष्टकृदवदानवीप्सा सर्वेभ्योऽवदाने संस्कारपक्षे वाऽवकल्पते नान्यथा। प्रयोजनसूत्राणि चैतानि। यदि नाम शेषकार्यवशेन पूर्वपक्षेऽप्यसर्वप्रदानं किं भवति तदा विचारस्य प्रयोजनमिति। तत्र यः पूर्वमस्माभिरभिहितोऽर्थस्तत्रैवं सूत्रं योज्यम्। पूर्वपक्षे हवींषि शेषकार्याणामप्रयोजकानीत्येकस्मात्क्रियेरन्। बलाद्यापहारः प्रधानेभ्यः, सकृत्कृते समस्तः कृत इति संस्कृतत्वान्नान्यतोऽपि कर्तव्यः। सिद्धान्ते तु सर्वहविषां प्रयोजकत्वाविशेषात्सर्वेभ्यः। लिङ्गदर्शनं च पौर्णमास्याधिकरणवत्प्रयोजनेऽवस्थितसिद्धान्तं द्योतयति॥ ४५॥ § 6639

इति सर्वेभ्यः शेषकार्यानुष्ठानाधिकरणम्॥ १५॥

## ०.०.१३८ प्रथमोपस्थितेन शेषकार्यानुष्ठानाधिकरणम्

986 याथाकाम्यमित्यस्यैव बुद्धिसामानाधिकरण्येन स्त्रीविवक्षायां ‘षिद्गौरादिभ्यश्च’ इति ङीषि कृते ‘हलस्तद्धितस्य’ इति ष्यञ्यकारे लुप्ते याथाकामी भवति॥ ४६॥ § 6641

शेषनिमित्तकं हि विहितावश्यकर्तव्यतानिमित्तं च शेषकार्थं प्रथमस्य तावत्पाठक्रमानुसारात्पूर्वमापतति। न च तदा कश्चिद्विरोध इति क्रियते। तस्मिंश्च कृते निवृत्तव्यापारा चोदना न निमित्ती भवतीति विरोधादकरणम्॥ ४७॥ § 6642

इति प्रथमोपस्थितेन शेषकार्यानुष्ठानाधिकरणम्॥ १६॥

१ येस्तुं] ( अ° २ पा° १ अ° ३ सू° ८ )
२ येन] ( अ° ४ पा° २ अ° ७ सू° १९ )
२ प्र] एवं तावद्यथाभाष्यमधिकरणान्तरपरतया सूत्राणि व्याख्याय तत्र चैतादृशविषये प्रतिपत्तिकर्मत्वस्य चतुर्थाध्यायद्वितीयपाद एव व्यवस्थापयिष्यमाणतया पौनरुक्त्यापत्तेरपरितोषात्स्वयं तावत्पूर्वाधिकरणप्रयोजनकथनार्थतया सूत्राणि व्याकरोति—प्रयोजनेत्यादिना।
२ षिद्गौरा] पा° सू° ( ४—१—४१)।
२ स्त] पा° सू° (६—४—१५० )।

## ०.०.१३९ चतुर्धाकरणस्य मक्षार्थताधिकरणम्

पुरोडाशस्य चतुर्धाकरणे ‘इदं ब्रह्मणः’ इत्यादिनिर्देशः श्रूयते। कथं च तत्तद्ब्रह्मादिव्यपदेश्यं भवति यदि तेभ्यो न दीयते। तेन दानं विहितम्। तत्तु किमृत्विजां यथेष्टविनियोगार्थं परिक्रयायाऽऽम्नायते, अथ भक्ष्यमाणशेषप्रतिपत्त्यर्थमिति। परिक्रयार्थमित्याह। न ह्यत्र ‘यजमानपञ्चमा इडां प्राश्नन्ति’ इतिवद्द्रव्यप्राधान्यं भक्षणं वा श्रूयते। तस्माद्द्रव्याणां कर्मशेषत्वात्कर्मयुक्तेभ्यश्च दानादन्तरेणापि परिक्रयश्रुतिं दक्षिणादानवत्परिक्रयार्थमिति॥ ४८॥ § 6644

987 ‘एषा वै दर्शपूर्णमासयोर्दक्षिणा’ इति दक्षिणा ह्यृत्विजामुत्साहकारिणी परिक्रयस्य चैतद्रूपम्॥ ४९॥ § 6645

न चैष विभागः परिक्रयार्थः। कुतः। § 6646

> परिक्रयो हि सर्वत्र स्वेन द्रव्येण कल्पते।
> देवतार्थे परित्यक्ते स्वामित्वं न च कस्याचित्॥ § 6648

समस्तस्य पुरोडाशस्य देवतोद्देशेन त्यक्तत्वादस्वामी यजमान इति ब्रह्मादिभिः समः। तत्र यथैव तेषां दातृत्वं न संभवति तथा यजमानस्यापि। तेन हि परिक्रीणानः पुनस्तद् द्रव्यं स्वी कुर्यात्। तत्र पौरस्त्यः संकल्पो विनश्येत्। तस्मात्तावन्न परिक्रयः। कथं खलु भक्षार्थमिति। तदुच्यते। § 6649

> योग्यता लिङ्गमित्युक्तं तच्चेष्टं विनियोजकम्।
> भक्षयोग्यः पुरोडाशः स्वरूपेण च दृश्यते॥ § 6651

**ब्रह्मादिभिर्भागानामुपकुर्वद्भिर्न किंचिद् दृष्टमित्युक्तं** वदति, द्रव्यक्षपणस्यापेक्षितस्य दृष्टत्वात्। **भागैस्तु ब्रह्मादीनामुपकारकै**रित्यनेनापि सुतरां प-
988 रिक्रयआपद्यते। न चावश्यं भक्षणेनैव तेषामुपक्रियते। गृहानयनादिनाऽप्युपकारोपपत्तेः। सर्वत्र च द्रव्यसंस्कारार्थतां भक्षस्य वक्ष्यति। व्रतादिभिर्निवृत्त्यनभिधानात्। पुरुषसंस्कारा हि व्रतैर्निवर्तेरन्। तत एवं वक्तव्यम्। सत्यं भागानां प्रतिपत्तिः, तथाऽपि तु प्रकृतकर्तृनियमस्य प्रयोजनापेक्षावेलायां दृष्टे सति अदृष्टदौर्बल्याद्दृष्ट एव कर्तृणां सामर्थ्यरूपः संस्कारः कल्प्यते। कर्तृसंस्कारश्च सर्वान्तरङ्गो भक्षणं नाम। गृहमपि च नीत्वा यावद्भक्षणं न क्रियते तावत्तदनुपयोगादनुपकारः। तेनावश्यं सूदूरमपि गत्वा भक्षणे पर्यवसितव्यम्। तत्र प्रथमातिक्रमे कारणाभावाद्योग्यतावशेन च व्यादेशद्वारप्रक्रान्तभक्षसमापनस्यावश्यं कर्तव्यत्वाद्ब्रह्मादीनामेव भक्षणेनोपकर्तव्यमिति गम्यते। शेषस्यापि च क्षपणापेक्षस्य भक्षणकृतमेव क्षपणं योग्यतयाऽवधार्यते॥ ५०॥ § 6652

१० दृष्ट] ब्रह्मादिभिरित्यादिभाष्यस्य कर्तृसंस्कारमात्रार्थत्वोक्त्यर्थतया केषांचिद्व्याख्यानगमनिका ‘दृष्टामित्यनेन कर्तृसंस्कारमात्रार्थत्वं न वदति’ इत्यादिरूपा पङ्क्ति प्रलीनेति भाति।
१३ व] ( अ° १२ पा° १ अ° १६ सु° ३° ) इत्यत्रेति शेषः

दक्षिणेति—प्रासङ्गिकोपकारापेक्षया, ब्रह्मण इत्यादिनिर्देशसारूप्याद्वा भविष्यति। तस्माद्भक्षार्थोऽयमुपदेश इति सिद्धम्॥ ५१॥ § 6653

इति चतुर्थाकरणस्य मक्षार्थताधिकरणम्॥ १७॥

इति श्रीभट्टकुमारिलविरचिते मीमांसाभाष्यव्याख्याने तन्त्रवार्तिके
तृतीयस्याध्यायस्य चतुर्थश्चरणः॥
निवीतपादः समाप्तः।

## ०.०.१४० उपांशुयाजाद्यर्थहविर्भ्यः शेषकार्याननुष्ठानाधिकरणम्

*‘सर्वेभ्यो वा कारणाविशेषात्’ इत्यस्यातिप्रसक्तस्यापवादः क्रियते। त- 989
मेव तावत्पूर्वं पक्षं स्मारयति। तथा च ‘सर्वेभ्यो हविर्भ्यः’ इत्यनुवाद उपपद्यते। निःशेषहविर्विषयत्वात्॥ १॥ § 6657

पुराकल्पे च यत्कारणं स्विष्टकृदर्थेऽवदाने संकीर्त्तितं तदाज्येऽप्यविशिष्टम्। यद्देवेभ्यो हविरसौ वहति तस्य तेन भागः प्रार्थितः। आज्यमपि चोपांशुयाजदेवताभ्यस्तेनावश्यं वोढव्यम्। अतश्च ततोऽप्यस्य भागेन भवितव्यम्॥ २॥ § 6658

एकस्मिन्निति—कस्मिंश्चित्कर्मणीत्यर्थः। अथवा युष्मदभिप्रायेण, एकस्मिन्हविषि स्विष्टकृत्यवदीयमाने सति समवत्तशब्दोऽन्यसहितादवदीयमानवचनो नावकल्पेत। मत्पक्षे त्वाज्यमपि तत्रावदीयत इत्यवकल्पिष्यते। क्व पुनरिदं श्रूयते तदभिधीयते ‘आदित्यः प्रयाणीयः पयसि चरुः, इत्येको यागश्चोदितः। पुनस्तत्रैवोक्तम् ‘आज्यस्यैनं चरुमाभिपूर्याऽऽज्यभागाः पथ्यादयश्च-
तस्रो देवता यष्टव्याः’ इति। ते च द्रव्यसामान्यादुपांशुयाजविकाराश्चत्वारोऽपि 990
यागाः। आदित्यश्चरुराग्नेयविकारः। तत्र ‘अग्नये स्विष्टकृते समवद्यति’ इति श्रूयते। तद्यदि चरोरेकस्यातिदेशेन स्विष्टकृत्प्राप्तस्ततोऽवद्यती त्येव स्यात्। यदा तु प्रकृतावाज्यादप्युपांशुयाजद्रव्यांत्स्विष्टकृत्तदाऽत्रापि यष्टव्य इत्युभयोश्चर्वाज्ययोरवदाने समवत्तशब्दः समर्थितो भवति। तस्मादपि सन्त्याज्ये शेषकार्याणीति॥ ३॥ § 6659

‘अवदायावदाय ध्रुवां प्रत्यभिधारयति’ ‘स्विष्टकृतेऽवदाय न प्रत्यभिधारयति’ इति ध्रुवात एवावदायेति प्रतिशब्दादृष्टार्थत्वाचावगम्यते। यदपि स्विष्टकृतेऽवदीयते तदपि ध्रुवात एव, येन तदर्थेऽवत्ते ध्रुवायाः प्रत्यभिधारणं

१ *] ( अ॰ ३ वा॰ ४ अ॰ १५ सू॰ ४४ )

१ स्यातिप्र] अतिप्रसक्तस्येतिक्वचिन्नाति।

प्रतिषिध्यते। ‘न हि ततः परामाहुतिम्’ इति हेतुवचनात्पूर्वाणि प्रत्यभिधारणानि स्विष्टकृदर्थानीति दर्शयति। ततश्च तत्सामान्यादितरेषु तथात्वमिति सर्वैः शेषकार्यैर्भवितव्यम्॥ ४॥ § 6660

सति प्रधानद्रव्यशेषे शेषकार्याणि क्रियन्ते। न चोपांशुयाजहविःशेषो विद्यते, सर्वादानात्। कथं सर्वादानमिति चेत्। तदुत्तरसूत्रेणाऽऽह॥ ५॥ § 6661

ध्रुवायां तावन्नोपांशुयाजस्य शेषो विद्यते। ध्रौवस्यासंयुक्तोत्पत्तेः सर्वाज्य-
991 कार्यार्थमादानात् ‘सर्वस्मै वा एतद्यज्ञाय गृह्यते’ इति वाक्यात्। तैत्तिरीयाणां तु कतिपयोपस्तरणाभिघारणादिकार्यानुक्रमणात्तन्मध्ये चोपांशुयाजस्यापि संकीर्तनात्तावतां साधारणम् ‘उपस्तृणन्नभिघारयन्नाज्यस्य यजन्’ इति वाक्याद्गम्यते। साधारणेषु च परिषद्वनोपहारगोष्ठीभोजनादिष्वियं स्थितिः। यदेकस्य भागेऽपयातिते तावन्मात्रमेव तस्य। अवशिष्टं तु तत्समानभाजामवधार्यमाणं न पूर्वशेष इत्येवमकृतार्थत्वेन प्रतिपत्तिमपेक्षते। यदा तु सर्वैः समानभाग्भिर्यथायोगमुद्धृता भागा भवन्ति तदा तस्य साधारण्यानुगुणैव प्रतिपत्त्यपेक्षा भवति। तदिहोपांशुयाजार्थे भागेऽपनीते न कश्चिदपि तदीयः शेषो विद्यते। शिष्टस्य परस्ताद्भाव्युपस्तरणाभिघारणादिगृहीतत्वेनाकृतार्थत्वात्। कृतार्थप्रतिपत्तयश्च शेषकार्याणि न स्वयमेवाकृतप्रयोजनमपि द्रव्यं प्रयुञ्जते। तस्मान्न ध्रुवायां शेषोऽस्ति। यस्तु समस्तकार्यनिर्वृत्त्युत्तरकालं साधारणः शेषो भविष्यति तस्य तस्य समिष्टयजुराख्यं प्रतिपत्त्यन्तरमाम्नातम्। यदा त्विदमप्युपस्तरणादिवदेवार्थकर्मावधार्यते तदा सुतरां शेषाभावः। शक्यं तु तैत्तिरीयवाक्यापेक्षयोत्पत्तावन्यसंयोगात्समिष्टयजुषश्च जुहोतिचोदितत्वेनायज्ञत्वात्प्रतिपत्तित्वमवधारयितुम्। निःशेषत्वेन चासाववस्थितेति शेषकार्यान्तराणि बाधते। तस्माद्ध्रुवायां तावन्नास्ति शेषः॥ ६॥ § 6662

तत्रैतत्स्यात्, यत्केवलोपांशुयाजार्थे जुह्वामवत्तं तस्यैव ग्रहमचमसेष्विव
992 सोमन्य शेषो भविष्यतीति। तदनुपपन्नम्। कुतः। तस्य समस्तस्य ‘चतुरवत्तं जुहोति’ इति होमसंयोयात्। उक्तं ह्येतदुपधानार्थे चरौ नान्यत्र श्रुतमन्यत्र विनियोक्तव्यमिति तस्मान्न जुह्वां शेष उपपद्यते॥ ७॥ § 6663

अथ यदुक्तं चमसवत्सत्यपि होमसंयोगे शेषो भविष्यतीति। तत्परिहर्तव्यम्॥ ८॥ § 6664

नैतत्सोमेन तुल्यम्। तत्र हि ग्रहचमसेषु, हविःप्रकल्पनमात्रे कृते यथा न सर्वहोमस्तथा ‘सोमेऽवचनाद्भक्षो न विद्यते’ इत्यत्राधिकरणे वक्ष्यामः।

---

१ स्या] असंयुक्तोत्पत्तेरिति—‘चतुर्ध्रुवायां गृह्णाति’ इति वाक्येनेति शेषः।
९ दिहोपां] साधारणेषु चेत्यादिनोपपादितं सार्बत्रिकं न्यायं प्रकृतोदाहरणेऽतिदिशति—तदिहेत्यादिना।
३ उ] ( अ॰ २ पा॰ ३ अ॰ ७ )। ‘इत्यत्र’ ततश्च किंचिदिज्यायां विनियुज्येत। तदन्यत्र श्रुतमन्यत्र कृतं भवेत्’ इत्यादिना भाष्यकारैरित्यर्थः
२ च] ( अ॰ ३ पा॰ ५ अ॰ ५ सू॰ १९ )

तेन चोदनाविरोधं तत्र वक्ष्यमाणं परिहरतां न सर्वहोमो भविष्यति। शेषकार्यान्यार्थदर्शनं च ‘सोमस्याग्ने वीहीत्यनुवषट्करोति’ इत्यादि, ‘सर्वतः परिहारमाश्विनं भक्षयति’ इत्यादिचमससमाख्या च न विरोत्स्यते। अन्यथा तद्विरोधः स्यात्। अथवा न तत्रासमस्तहोमे सति काचिच्चोदना विरुध्यत इत्यविरोधादसर्वहोमः। इह तु विरोधः स्यात्। अयमेव चाविरोधो हेतुरिति सूत्रगमनिका। यथा तु भाष्यकारेण पूर्वं चमसमनुदाहृत्य ‘चमसवदिति चेत्’ इति सूत्रमुपन्यस्तं तथा परिचोदनासूत्रमेव होमसंयोगानैकान्तिकत्वप्रदर्शनार्थं कल्पयित्वा परिहारो वक्तव्यः। तत्र वचनान्तरकृतत्वाच्छेषः स्यादत्र वचनान्तररहितत्वे सतीति विशिष्टस्य हेतोरव्यभिचारात्। अथवाऽवत्तत्वात्तु जुह्वामित्येतदेव तुशब्दस्थाने चशब्दं कृत्वा पूर्वपक्षवादिप्रत्यवस्थानं व्याचक्षाणैश्चमसो दृष्टान्तो दातव्यः। परं चाऽनुभाषणसूत्रं वक्तव्यम्। एतदुक्तं 993
भवति। अवत्तत्वात्तु जुह्वां चमसवच्छेषोऽस्तु। तस्योत्तरं, तस्य च होमसंयोगादिति गतार्थम्॥ ९॥ § 6665

यस्तु सर्वेभ्य इति। प्राप्त्यपेक्षोऽनुवादः। तत्र यादृशं वयमिह सर्वत्वं पश्यामस्तादृशस्यैवानुवाद इति मन्यामहे। सर्वत्रैव च परमसर्वेण व्यवहाराभावादधिकृतापेक्षः सर्वशब्दो गृह्यत इति न विरोधः। तेन येषां शेषसद्भावेन प्रतिपत्तिकार्याधिकारोऽस्ति, ये वा विद्यमानत्वेन प्रकृतशेषाः, तेभ्यः सर्वेभ्य इति गम्यते॥ १०॥ § 6666

पूर्ववदेव समवद्यतेरनुवादत्वाद्यथासंभवमाज्येऽपीति चराववदीयमाने सौक्ष्म्यात्तदवयवस्याचिकीर्षितमप्यवदानं बलाद्भवति। तदेतत्संसृष्टद्रव्यजातिद्वयमपेक्ष्य संशब्दोऽनुवादः॥ ११॥ § 6667

अन्त्यं यत्तु कारणं स्विष्टकृदर्थोऽर्थवाद इत्युक्तं, तदस्मत्पक्षेऽप्युपपद्यत एव। अरेकार्थत्वात्। ‘स्विष्टकृतेऽवदाय’ इति तावद्यतस्तस्यावदानं भवति यादृशं वा संभवति तादृशमिति गम्यते। पुरोडाशादिभ्यश्च तस्यावदानं, ध्रुवातश्चोपस्तरणाभिधारणे। न चतुर्थ्यन्तेन ध्रौवमेवावदानं संबध्यते। 994
सा हि देवतार्थद्रव्यान्तरावदानेऽप्युपस्तरणाभिघारणोपयोगित्वात्प्रत्याभिघारणमपेक्षत एव। तेन प्राक् स्विष्टकृतः परस्तादपि ध्रौवोपयोगोऽस्तीत्यवत्तेऽवत्ते प्रतिपूरयितव्या, ततः परं तु न किंचित्कार्यमिति नार्थः प्रतिपूरणेन। न ह्येतत्प्रतिपूरणं पूर्वस्यावदानस्य संस्कारकमदृष्टार्थत्वप्रसङ्गात्। अरेकस्तूत्तरकार्यार्थः प्रत्यक्षः। तस्मादन्तरेणापि स्विष्टकृदर्थत्वं तदवधिकारेकार्थत्वेनोपपन्नोऽर्थवादः॥ १२॥ § 6668

इति उपांशुयाजाद्यर्थहविर्भ्यः शेषकार्याननुष्ठानाधिकरणम्॥ १॥

१ थासंभ] यथासंभवमर्थोऽपीति, पा०। तदवयवस्यानुस्यूतस्याचिकीर्षीतमिति, पा०।
२ य]

## ०.०.१४१ साकंप्रस्थायीये शेषकार्याननुष्ठानाधिकरणम्

अमावास्यायां नित्यं स्विष्टकृदिडं सांनाय्यादवदीयते। तद्गुणविकारश्च साकंप्रस्थायीयः। अत इहाप्यवदातव्यमित्येतावता विशेषेणातुल्याशङ्कायामतिदेशः क्रियते। तद्वदेवाशेषत्वान्नैवं स्यात्। सर्वदानादशेषतेति। एवं ह्यत्र सर्वदानं, होमार्थे प्रसर्पतः सह कुम्भीभिरिति, अनवत्तस्यैव दोहस्य कुम्भीभ्या सहेति विदधदशेषहोमं विदधाति। अतो न शक्यं किंचिच्छेषयितुम्॥ १३॥
§ 6670

इति साकंप्रस्थायीये शेषकार्याननुष्ठानाधिकरणम्॥ २॥

## ०.०.१४२ सौत्रामण्यां शेषकार्याननुष्ठानाधिकरणम्

तद्वदित्यनुवर्तते। सौत्रामण्यां सुराग्रहाः पयोग्रहाश्चाऽऽश्विनादय आम्ना-
995 ताः। तेषां पृथक् प्रकल्पनमात्रात्मकत्वाच्चमसवत्सर्वहोमप्राप्तिर्नास्तीति विशेषाशङ्कायामतिदेशात्तत्रापि यथागृहीतानां होमार्थेनाऽऽदानेन संबन्धो यथोपात्तानां च होमेन श्रूयते ‘यथागृहीतान् ग्रहानृत्विज उपाददते। उत्तरेऽग्नौ पयोग्रहान् जुह्वति दक्षिणे सुराग्रहान्’ इति॥ १४॥ § 6672

अनन्यशेषभूतश्च प्रतिषेधोऽनुवाद ‘उच्छिनष्टि न सर्वं जुहोति’ इति। उच्छिनष्टीति विधिः। तदनुवादस्तु निषेधः, अशेषहोमप्राप्त्या शेषकार्यनिर्वृत्तिं दर्शयति। वाचनिकस्य च शेषस्य प्रतिपत्त्यन्तरमर्थकर्म वाऽन्यदस्तीति ‘ततोऽपि’ इति स्विष्टकृदिडं न कर्तव्यमिति॥ १५॥ § 6673

इति सौत्रामण्यां शेषकार्याननुष्ठानाधिकरणम्॥ ३॥

## ०.०.१४३ सर्वपृष्ठायां शेषकार्यतन्त्रताधिकरणम्

996 इदानीं सत्सु शेषकार्येषु तद्विशेषाश्चिन्त्यन्ते। तत्र सर्वपृष्ठायामन्योन्यनिरपेक्षचतुर्थ्यन्तपरिकल्पितैः षड्भिर्गुणैर्भिन्नद्रव्यदेवतासंयोगैर्देवतान्तरावरुद्धयागे देवतान्तरासंभवाद्गुणेन भेदकेन षट् कर्माणि। तेषु केषांचिद्भिन्ना-

३ तिदेशा ] अतिदेशादिति—पूर्वाधिकरणन्यायातिदेशादित्यर्थः।
४ त ] ततोऽपीति—अयमाशयः। ‘ब्राह्मणं परिक्रीणीयादुच्छेणस्य पातारम्। यदि न विन्देद्वल्मीकवपायामवनयेत्। ततोऽप्यवशिष्टं शतातृण्णायां विक्षारयन्ति’ इति वाचनिकप्रतिपत्त्यन्तरविधानेनाऽऽतिदेशिकप्रतिपत्त्यन्तरबाधान्न स्वेष्टकृदिडं कर्तव्यमिति। वल्मीकवपा-वल्मीकंच्छिद्रम्। शतातृण्णा—शतच्छिद्रा कुम्भी।

न्येव हवींषि। अन्येषां पुनरेक एव रथचक्रमात्रः पुरोडाश आम्नातः। स यदाऽङ्गीक्रियते तदा विचारः, किं कर्मभेदाच्छेषकार्याणां भेद उत द्रव्यैकत्वात्तन्त्रमिति। ननु चैकादशविचारोऽयं तत्र निर्णेष्यते ‘एकद्रव्ये संस्काराणां व्याख्यातमेककर्मत्वम्’ इत्यत्र। अत इह न विचारणीयम्। उच्यते। § 6675

प्रतिपाद्यमिदं द्रव्यं भेदेन सहते क्रियाम्।
खण्डशश्च प्रधानानामङ्गत्वान्नास्ति तन्त्रता॥ § 6677

यद्यप्ययमेकादशानुगुणो विचारस्तथाऽप्यत्र शेषकार्यप्रसङ्गाच्छेषशेषिविचारात्मकत्वाच्च क्रियते। तत्र चैकद्रव्यत्वात्तन्त्रत्वं सिध्यति यत्र द्रव्यं तदवस्थितमेव सर्वकर्मणामुपकरोति। भेदकरणे च प्रयोजनान्तरं न दृश्यते न च कर्तुं शक्यते। खण्डशस्त्वस्य प्रधानोपयोगित्वं तदुपकारद्वारश्च संस्कारः प्रधानभेदाद्भेदं प्रतिपद्यमानो न द्रव्यैकत्वात्तन्त्रीकर्तुं शक्यते। भवति चैकदेशे प्रतिपादितेऽप्येकदेशान्तरप्रतिपादनम्। अवदानदेशानां भिन्नत्वादुत्तरार्धदक्षिणदेशभेदोऽप्यस्तीत्यावर्तनीयं स्विष्टकृदिडं गम्यते॥ १६॥ § 6678

सकृत्करणम्। कुतः। § 6679

न ह्येष कर्मसंस्कारो हूयमानस्य वेष्यते।
हुतशेषसमानत्वात्तन्त्रत्वं तु प्रतीयते॥ § 6681

कर्मसंस्कारपक्षे हूयमानसंस्कारपक्षे वा तद्भेदाद्भेदो भवेत्। शेषसंस्कारस्त्वयम्। स च शेषः साधारणः। तस्य च दक्षिणोत्तरार्धे गृह्येते। न 997
प्रधानावदानदेशः। तस्य प्रकृतावचोदितत्वात्। ततश्च शक्यमगृह्यमाणविशेषत्वं वक्तुम्। यद्यपि ह्येकप्रधानोद्देशेनोत्तरार्धं गृह्णीयुस्तथाऽपि तथा चोदितार्थसंपत्त्या प्रधानान्तराण्यपि कृतार्थानि भवेयुः। तस्मात्तन्त्रम्। यत्तु प्रतिपाद्यं विभवतीति, प्रतिपत्त्यन्तरे चतुर्धाकरणे तदुपयुज्यते॥ १७॥ § 6682

इति सर्वपृष्ठायां शेषकार्यतन्त्रताधिकरणम्॥ ४॥

## ०.०.१४४ ऐन्द्रवायवस्य भक्षणतन्त्रत्वाभावाधिकरणम्

‘सोमेऽवचनाद्भक्षो न विद्यते’ इति सामान्येन भक्षविचारं कृत्वा विशेषविचारोऽयं कर्तव्य आसीत्। यत्तु प्रथमतरं क्रियते तत्पूर्वाधिकरणापवादत्वेन शीघ्रतरोपस्थानात्। पूर्ववद्धि द्रव्यैकत्वात्सकृद्भक्षिते कृतः शास्त्रार्थ इति न्यायात्प्राप्ते, वचनादद्विर्भक्षणं ‘द्विरैन्द्रवायवस्य भक्षयति’ इति। भवन्ति चेदृशान्यप्यधिकरणानि येषां न्यायेन पूर्वपक्षं कृत्वा वचनेन सिद्धान्तो

३ एक] ( अ॰ ११ पा॰ ४ अ॰ १२ सू॰ १२ )

भवति। न त्वेतद्युक्तम्। संदेहाभावात्। तत्र वैतत्क्रियते यत्र न्यायेन प्रतिपादितो वचनाद्बाधितः, तदभावात्समानन्यायेषूपकरिष्यति। स चेह न्यायः पूर्वाधिकरणेनैव प्रदर्शित इति मन्दफलो विचारः। तस्मान्नैवं वर्णनीयम्। किं तर्हि। सर्वपृष्ठायामेव प्रतिकर्म स्विष्टकृदिडं कर्तव्यं प्रधानभेदात्। तथा
998 हि। सिद्धवत्प्रधानभेदमैन्द्रवायवसंस्कारहेतुमाह 'द्विरैन्द्रवायवस्य भक्षयति। द्विर्ह्येतस्य वषट्करोति' इति। तस्माद्यावद्वषट्कारं शेषसंस्कार इत्युक्तोत्तरे दत्ते दृष्टान्तमनुभाष्य सूत्रेण परिहारो वक्तव्यः। ऐन्द्रवायवे तु सकृद्भक्षणे प्राप्ते वचनाद्द्विर्भक्षो न प्रधानभेदनिमित्तः। हेत्वधिकरणे हेतोर्निराकृतत्वात्। एवं च सति पूर्वाधिकरणशेषेणैव सता सोमभक्षसामान्यविचारस्मारणान्न क्रमकोपो भविष्यतीति॥ १८॥ § 6684

इति ऐन्द्रवायवस्य भक्षणतन्त्रत्वाभावाधिकरणम्॥ ५॥

## ०.०.१४५ सोमे भक्षप्रतिपादनाधिकरणम्

ऐन्द्रवायवे तावद्विशिष्टविधानादपि भक्षो भवेत्। अथेतरग्रहगते चमसस्थे च सोमे संदेहः। किं भक्षोऽस्ति नेति। तत्रापि 'सर्वतः परिहारमाश्विनं भक्षयति' इत्यादिष्वैन्द्रवायवन्याय एव स्यात्। इदं तु सर्वथा तत्रापि विचार्यते किं प्राप्ते भक्षे विशेषणमात्रं वचनेन विधीयत उत विशिष्टविधानमेतदिति। कश्चात्र विशेषः। स यदि वाचनिकस्ततो यावद्वचनमेव कर्तव्योऽथ त्वन्यतः कुतश्चित्तत एकदेशस्थमपि लिङ्गं स्थालीपुलाकन्यायेन समस्तद्योतकं भविष्यति। त्रयश्चेह पक्षाः संभवन्ति। किमन्यार्थदर्शनानां प्राप्त्यपेक्षत्वादविधानाच्च नैव भक्ष उत प्राप्त्यभावादन्यार्थदर्शनान्येव वचनीकृत्य यावद्वचनं भक्ष उत समाख्यावषट्कारहोमाभिषवनिमित्तोऽपि भक्ष इति। किं

---

१ द्यु] एवं तावद्भाष्यमनुसृत्याधिकरणान्तरपरतया सूत्रं व्याख्यायः तत्र चास्वरसोद्भावनपूर्वकं पूर्वाधिकरणशेषतया व्याख्यातुं दूषणं तावदादौ दर्शयति—न त्वेतदित्यादिना।

५ मैन्द्र] ऐन्द्रवायवसंस्कारहेतुमिति-ऐन्द्रवायवस्य संस्कारभूतभक्षणभेदहेतुमित्यर्थः। इदमत्राऽऽक्तम्। यथैव चतुर्गृहीतान्याज्यानि भवन्ति। न ह्यत्रानूयाजान् यक्ष्यन् भवति इत्यत्रानूयाजसामान्याभावरूपहेतुविधिबलेन चतुर्थचतुर्गृहीतनिवृत्तिपर्यवसितेन चतुर्गृहीतबहुत्वरूपसाध्येन, अनुयाजसामान्याभावरूपहेतोर्व्याप्तिः कल्प्यते तद्वदिहापि 'द्विर्ह्येतस्य वषट्करोति' इति हिशब्दश्रुत्या शेषकार्यभेदे प्रधानभेदस्य हेतुत्वेनोपादानात्तदन्यथानुपपत्त्या व्याप्तिकल्पनावश्यंभावादावर्तनीयमेव स्विष्टकृदिडमिति।

८ धिक] ( अ° १ पा° २ अ° ३ )

८ हेतोर्निराकृत] निराकृतत्वादिति—। 'तेन ह्यन्नं क्रियते' इतिवत् 'द्विर्ह्येतस्य वषट्करोति' इत्यत्रापि वर्तमाननिर्देशाद्वर्तमानकालिकस्य च वषट्कारभेदस्य हेतुत्वासंभवाल्लटो भूतकाललक्षणावश्यंभावाल्लक्षणायाश्च 'न विधौ परः शब्दार्थः' इत्यनेन निषिद्धत्वादित्यादि युक्त्या निराकृतत्वादित्यर्थः। 'न ह्यत्रानूयाजान् यक्ष्यन् भवति' इत्यत्र तु लक्षणाकारणाभावाद्धेतुविधिरेवेति वैषम्यम्।

प्राप्तम्। आज्यसाकंप्रस्थायीयसौत्रामणीग्रहणवत्समस्तहोमसंयोगाच्छेष एव नास्ति कुतः पुनर्भक्ष इति। न चात्र प्रकृतितः प्राप्तिर्न च प्रत्यक्षोपदेशः। योऽप्युपदेश इव सोऽप्यन्यपरत्वादसमर्थः। तस्मान्नास्ति भक्ष इति॥ १९॥
§ 6686

यद्यन्यार्थदर्शनानि भवेयुस्ततोऽन्यत्रापि प्राप्तिः स्याद्वचनानि त्वेतानि। त- 999
स्माद्यथोपदेशं भक्षोऽयं नान्यत्रेति॥ २०॥ २१॥ § 6687

इति सोमे भक्षप्रतिपादनाधिकरणम्॥ ६॥

## ०.०.१४६ चमसिनां सोमभक्षप्रतिपादनाधिकरणम्

गृह्णीम एतद्यथोपदेशमिति। स तु समाख्यादिभेदभिन्न उपदेशोऽनुसर्तव्यो न तु श्रुतविशेषमात्रनिष्ठः। तत्र चमसेषु तावद् यद्यपि ब्राह्मणगतः प्रत्यक्षोपदेशो नोपलभ्यते तथाऽपि प्रैषगतया समाख्ययाऽनुमीयते। होतृचमसत्वादिविशिष्टं हि द्रव्यनयन प्रेषणं न कथंचिदुपपद्यते यदि तेषु होत्रादयः सोमं न चमन्ति। कथम्। चमस इति, अदनार्थस्य चमेरौणादिकेऽधिकरणसाधनेऽसन्प्रत्यये कृते प्रैषवेलायां भूतभविष्यद्वर्तमानानां क्वचित्संबन्धेऽपेक्ष्यमाणे भूतवर्तमानयोरदर्शनाद्भविष्यत्त्वमनुमीयते। न ह्यन्यथा होतुश्चमसः प्रैत्वित्येतस्यानुष्ठानं शक्यते। तस्माच्चमितव्यं होत्रादिभिः। सोमशेषवन्तश्चमसाः प्रेषिता इति तस्यैवापेक्षितप्रतिपत्तिविशेषस्य प्रत्यासत्तेर्भक्ष्यत्वं गम्यते। सशेषश्चमसो 1000
हूयते 'अल्पं जुहोति' इति वचनात्। न चान्यदोदनादिद्रव्यं प्रतीयते, यस्यचमनाच्चमसत्वमुपपद्यते। न च तच्चमनस्य कर्माङ्गभावः स्यात्। तत्र प्रकरणं बाध्येत। प्रैषोऽपि चोत्कृष्येत। सोमचमससमाख्यां च बाध्येत। यदि चौदनादि भक्ष्येत तत उच्छिष्टेन पात्रेण पुनर्होमो न क्रियेत। शुद्ध्यर्थं तत्र तक्षणाद्याश्रयणे यस्य होतृचमसत्वाद्यवधारितं तस्य विनाशाद्द्रव्यान्तरं तत्समाख्यं न भवतीति समाख्यातद्रव्यसाधनकहोमविधानबाधः स्यात्। एतेन चमसान्तरोपादानं प्रत्युक्तम्। तदुत्पादने च श्रुतचमससंख्यातिक्रमः स्यात्। न च वचनसामर्थ्यादुच्छिष्टेन होतुं शक्यम्। वचनस्यान्तरेणाप्याचारभङ्गं सोमभक्षे सावकाशत्वात्। सोमभक्षेऽपि सर्वमेतत्तुल्यमिति चेत्। नैतदेवं 'न सोमेनोच्छिष्टा भवन्ति' इति श्रुतेः। तस्माच्चमसिभिर्भक्षयितव्य सोम इति। भाष्यमप्यनेनैव क्रमेण नेतव्यं न यथालिखितम्। उपपत्त्यन्तराणामुपपत्त्यन्तरव्यवधानेन क्लिष्टत्वात्। तस्माच्चाब्राह्मणस्य सोमभक्षणं प्रतिषेधति। यदि च 'प्र यजमानस्य' इति समाख्यया न सोमभक्षः प्राप्यते ततः फलचमसविधौ 'स यदि सोमं बिभक्षयिषेत्' इति न सोमम्' इति च प्रतिषेधनसंकीर्तनं नावकल्पेत। तस्मादस्ति चमसिनां सोमभक्ष इति॥ २२॥ § 6689

इति चमसिनां सोमभक्षप्रतिपादनाधिकरणम्॥ ७॥

## ०.०.१४७ उद्गातृचमसे ससुब्रह्मण्यानां भक्षप्रतिपादनाधिकरणम्

1001 इदानीं वषट्कारहोमाभिषवभक्षाननुक्त्वैव प्रसङ्गात्समाख्याभक्षविशेषानुसरणमेव तावत्करोति। तस्मिन्नेव प्रैषे 'प्रोद्गातॄणाम्' इति श्रूयते। तत्र चतुर्धा संदेहः। किमेक एवोद्गाता भक्षयेदुत सर्वर्त्विज उत स्तोत्रकारिण आहोस्विच्चत्वारोऽपि छन्दोगा इति। केचित्तु द्वितीयचतुर्थयोः पक्षयोरेकत्वमिच्छन्ति। सूत्रद्वयेऽपि सर्वशब्दप्रयोगात्, लक्षणायाश्च प्रत्यासत्तेः केवलच्छन्दोगविषयत्वात्। कुतः संदेहः। § 6691

विसंवादः स्फुटो ह्यत्र प्रकृतिप्रत्ययार्थयोः।
तत्र कस्यानुरोधेन कस्य वृत्तिर्भवेदिति॥§ 6693

तत्र पाशाधिकरणन्यायेन 'गुणे त्वन्याय्यकल्पनैकदेशत्वात्' इति प्रातिपदिकार्थप्राधान्यात् 'उद्गातारं वृणीते' इति चोत्पत्तावेकत्वादेकस्मा एवोद्गात्रे चमसो दातव्यः श्रूयते। तस्मादेको भक्षयेत्। प्रातिपदिकार्थासंभविनो बहुवचनस्याविवक्षितत्वादिति पूर्वः पक्षः॥ २३॥ § 6694

1002 न युक्तोऽत्यन्तं बहुत्वत्यागः। पाशमन्त्रस्य प्रकरणे बहुत्वं न कथंचित्प्रकारेणास्तीत्यविवक्षा युक्ता। अत्र पुनर्लक्षणायामुपपद्यमानायां नाविवक्षोपपद्यते। तस्मात्सर्वर्त्विजामेष चमसः। अथवाऽवान्तरसंबन्धात्सर्वच्छन्दोगग्रहणमिति व्याख्येयम्॥ २४॥ § 6695

यस्माद्बहुवचनस्योद्गातृव्यतिरिक्तैः सह प्रातिपदिकेनानुपात्तत्वात्संबन्धो नावकल्पते। न च निर्निमित्ता लक्षणाऽवकल्पते। न च लक्षणया विनाऽऽनर्थक्यम्। अवयवप्रसिद्ध्या स्तोत्रकारिषूपपद्यमानत्वात्। तस्माद्गीतिसंयोगात्त्रयः स्तोत्रकारिणो भक्षयेयुः॥ २५॥ § 6696

न तावत्समुदायप्रसिद्धौ संभवन्त्यामवयवप्रसिद्धिः प्रातिपदिकस्य युक्ता। न चावयवप्रसिद्धिरप्यत्र स्तोत्रकारिषु विद्यते। गातारौ हि प्रस्तोतृप्रतिहर्तारौ
1003 नोद्गातारौ। तेन बहुवचनमनुपपन्नमेव। **द्वितीयं साम्नः पर्वोत्पूर्वस्य गायतेरभिधेयमिति**— भक्तिरिति वक्तव्ये प्रमादात्पर्वशब्दः प्रयुक्तः। तस्मान्न वरणनिमित्ता उद्गाननिमित्ता वा बहव उद्गातारः संभवन्तीति वेदसंयोगनिमित्ताः कल्प्यन्ते। छन्दोगप्रवचनं ह्यौद्गात्रशब्देनाभिधीयते। तत्प्रवचनस्थं कर्म। त-

१ स] स्मृतस्योपेक्षानर्हत्वं प्रसङ्ग इति कथ्यते।
९ त्व] ( अ॰ ९ पा॰ ३ अ॰ ५ सू॰ १५ ) एतत्सूत्रावयवः

१ क] न कथंचिदिति—एकपाशकत्वादेक्षपशुयागस्येति हेतुपूरणम्।

त्संबन्धाच्च पुरुषाः प्रवक्तृत्वेनानुष्ठातृत्वेन चौदमेघिन्यायेनोद्गातार इत्यनुमातुं शक्यते। ननु चैष न्यायोऽवेष्टयधिकरणे निराकृतः। तथा हि। § 6697

उद्गातृपदमौद्गात्रं प्रसूते तद्धिते कृते।
न त्वौद्गात्रपदादस्य व्युत्पत्तिरुपपद्यते॥ § 6699

स्मरन्ति हि, उद्गातुरिदमित्यण्प्रत्ययं न तु तस्य कर्तेति प्रत्ययलोपम्। तस्मान्नौद्गात्रशब्दादेषोऽनुगन्तव्यः। तथा च वरणनिमित्तमिति वक्ष्यति। तेनायुक्तमिदं व्याख्यानमिति। उच्यते। § 6700

उद्गाता गौण एवात्र मुख्योद्गातुरसंभवात्।
कल्पितोऽयं परावृत्त्या ब्राह्मणादिषु राजवत्॥ § 6702

यथैव तत्र 'योगाल्लोकः प्रयुङ्क्ते' इत्यारभ्यैवं व्याख्यातम्। प्रथमं जातिनिमित्तो राजा। ततस्तत्संबन्धात्पालनं राज्यं, तत्संबन्धादपि ब्राह्मणादिषु स्थानापत्त्या वाऽनुमानेन वा राजशब्दस्तथैवात्रापि वरणादेक एवोद्गाता। ततस्तत्संयोगात्कर्मप्रवचनयोरौद्गात्रशब्दस्तद्योगादपि स्तोत्रकारिषूद्गातृशब्दः। स च शब्दस्यानेकार्थत्वासंभवाद्गौणः। मुख्यासंभवाच्चेह गौणत्वाश्रयणं पूर्वमेवोक्त- 1004
म्। केवलं तु निमित्तं नोक्तम्। भवेदिदानीं प्रवचनं संबन्धात्मकं कथितम्। तस्मादविरोधात्सर्वच्छन्दोगानाभयं भक्ष इति। न त्वेतद्युक्तम्। भक्षणवेलायां हि ये व्याप्रियन्ते तत्संनिहिताश्च प्रैषकाले ते भक्षणेन संबध्यन्ते। न च सुब्रह्मण्यस्य तस्मिन्काले कश्चिद्व्यापारोऽतो नास्य सदस्यन्तर्वेद्यां वा संनिधानमस्ति येन भक्षेऽधिकृतः स्यात्। तत्र यथैव प्रवचनसंयोगे सत्यप्यन्येषामकर्मसंयुक्तानां छन्दोगानां भक्षो न भवति, एवं सुब्रह्मण्यस्यापीति मन्यामहे। कपिञ्जलवच्च त्रिष्वेव बहुत्वश्रुतिरवस्थास्यते। न च भक्षः कर्तृसंस्कारो येन यद्वर्जनभयात्सर्वत्रावधार्यते। द्रव्यसंस्कारोऽयमिति तत्र तत्र स्थापयिष्यामः। तस्मादुपपत्त्यन्तरं तुशब्देन व्यावर्त्य स्तोत्रकारिपक्षपरिग्रह एवायमिति समर्थनीयम्। एतदुक्तं भवति। सर्वे त्वनेन शब्देनाभिधीयन्ते न स्तोत्रकारिण एव केवलास्तथाऽपि तु यथोक्तात्कारणादेकदेशे सुब्रह्मण्यवर्जं प्रवर्तते यथा 'विनिषद्योद्गातारः साम्ना स्तुवन्ति' इत्यत्र। अथवा सर्वे त्वित्यवान्तरपूर्वपक्षं परिगृह्य 'कारणादेकदेशे स्यात्' इति सूत्रान्तरं स्तोत्रकारिपक्षे नियोक्तव्यम्॥ २६॥ § 6703

---

२ य] ( अ॰ २ पा॰ ३ अ॰ २ )
४ स्य] अस्य—उद्गातृपदस्येत्यर्थः।
६ क्ष्य] ( अ॰ ३ पा॰ ७ अ॰ ९ ) इत्यत्रेति शेषः
१० त] तत्र—अवेष्टयधिकरण इत्यर्थः।
१६ न] एवं तावद्यथाभाष्यं ससुब्रह्मण्यानां चतुर्णामुद्गातृचमसे भक्षणं प्रसाध्याधुना सुब्रह्मण्यस्य तावद्भक्षणे तथा प्रमाणं नोपलभ्यत इत्येतदुपपादयितुमारभते—न त्वेतदित्यादिना।
२१ स्था] ( अ॰ ११ पा॰ १ अ॰ ७ सू॰ ४२ ) अत्रत्यन्यायेनेत्यर्थः

इति उद्गातृचमसे ससुब्रह्मण्यानां भक्षप्रतिपादनाधिकरणम्॥ ८॥

## ०.०.१४८ हारियोजने ग्रावस्तुतोऽपि भक्षप्रतिपादनाधिकरणम्

गतः समाख्याभक्षः। इदानीं वाचनिकमेवानुगच्छति। तत्र 'यथाचमसमन्यांश्चमसांश्चमसिनो भक्षयन्ति। अथैतस्य हारियोजनस्य सर्व एव
1005 लिप्सन्ते' इत्येतद्वचनं किं प्रकरणादशेषविषयं सत्, ग्रावस्तुतोऽपि भक्षं प्रापयत्युत स्ववाक्योपात्तचमसिविषयत्वान्नेति संदेहे, तेनैव तावदभिप्रायेण न विद्यत इत्याह॥ २७॥ § 6705

न शक्यं सर्वशब्दो विना कारणेन प्रकृतकर्तृमात्रवचनः सन्नेकदेशे स्थापयितुम्। अतो हारियोजनं ग्रावस्तुदपि भक्षयेत्॥ २८॥ § 6706

पूर्वपक्षाभिप्रायविवरणम्। यथाचमसमन्यानिति पुनःश्रुतेर्न किंचित्प्रयोजनमस्त्यन्यदतः सर्वशब्दविशेषणत्वात्। अथशब्दैवकाराभ्यां सुतरां तेष्वेव प्रत्ययः। ये ह्यन्यत्र प्रत्येकरूपेणोपात्तास्तेष्वेवकारो भवति। तस्मान्न ग्रावस्तुत्प्रत्येतव्यः॥ २९॥ § 6707

न युक्तः सर्वशब्दः पुरुषमात्रगामी सन्नधिकारेण विशेषितः पुनश्चमसिशब्देन प्रयोजनान्तरौपाधिकेन सता विशेष्टुम्। यावद्यावद्धि शब्दोऽल्पविषयी
1006 क्रियते तावत्तावत् श्रुतिर्बाध्यते। तस्माच्चमसिनो न प्रत्येकं चमससंबन्धार्थमुपात्ताः। तेऽपि चाल्पविषयत्वेन प्रतिपाद्यन्ते हारियोजनस्य महाविषयत्वेन प्रशंसां कर्तुम्। अतो हारियोजने सर्व एवेत्येतदेव सिद्धम्॥ ३०॥ § 6708

इति हारियोजने ग्रावस्तुतोऽपि भक्षप्रतिपादनाधिकरणम्॥ ९॥

## ०.०.१४९ वषट्कारनिमित्तकभक्षान्तरप्रतिपादनाधिकरणम्

इदमपरं वचनं 'वषट्कर्तुः प्रथमभक्षः' इति। तत्किं वषट्कारं निमित्तीकृत्य प्राथम्यविशिष्टं भक्षणं विधत्त उत भक्षणमनूद्य प्राथम्यमात्रं विधत्त इति विचारः। किं प्राप्तम्। 'नचेदन्येन शिष्टाः' इति कथंचिदनुवादत्वे संभवति विशिष्टविधानानुपपत्तेः, प्राथम्यस्य चाप्राप्तत्वात्तदनुवादेन भक्षविधानासंभवादेवं वचनं व्यज्यते यो वषट्कर्तुर्भक्षः स प्रथम इति। ननु चाप्राप्तत्वाद्भक्षोऽप्यनुवदितुं न शक्यते। समाख्यया प्राप्तत्वादनुवादो गम्यते। अस्ति हि

३ न्ये] ( अ॰ १ पा॰ ४ अ॰ ६ सू॰ ९
) एतत्सूत्रावयवः

तस्य समाख्यया चमसेषु भक्षः, स शक्योऽनुवदितुम्। तेषां च यो यदा वषट्करोति स तदा प्रथमो भक्षयेत्। तत्रैतत्स्यात्। ग्रहेषु चमसान्तरेषु च प्राप्त्यभावादनुवादो नोपपद्यत इति। नैष दोषः। न ह्यवश्यं यदेव सर्वत्र प्राप्तं तदेवानुवदितव्यम्। सर्वानुवादानां यथासंभवं प्राप्त्यपेक्षत्वात्। न च ग्रहचमसान्तराणां वषट्कर्तृभिरभक्ष्यमाणानां किंचिन्न सिध्यति। प्रतिपत्तिरिति चेत्। वेदविहितप्रतिपत्त्य भावे लौकिकप्रतिपत्तिसिद्धेः। वक्ष्यमाणनिमित्तद्वारेण वा भक्षणोपपत्तिः। अथोच्यते। समाख्यया विप्रकृष्टा प्राप्तिर्न शक्यते शीघ्रप्रव- 1007
र्तिन्या श्रुत्याऽनुवदितुम्। अतः प्राप्त्यभाववेलायां श्रुतिः प्रवर्तमाना यत्र यत्र वषट्कृतं तत्र तत्राविशेषेण विधास्यतीति। तदयुक्तम्। तत्र हि संनिकर्षविप्रकर्षावपेक्ष्येते यत्र विरोधः कश्चित्। इयं तु श्रुतिरनेकार्थविधिक्लेशभयाद्यथाकथंचिदपि प्राप्नुवन्तं भक्षं प्रतीक्षते। यदा केनचिदपि प्रमाणेन नास्ति प्राप्तिरित्यवगम्यते तदा विशिष्टविधानमङ्गी करोति। तथा च प्रकरणादिप्राप्तार्थानुवादेन श्रुतयो गुणानां विधात्र्य इष्टाः। तस्मात्प्राथम्यमात्रानिमित्तत्वान्न वषट्कारो भक्षकारणमिति प्राप्ते। उच्यते। § 6710

समासार्थाद्विनिष्कृष्य नैकांशोऽनूद्यते यतः।
त्र्यङ्गवत्तेन सर्वोऽयमपूर्वोऽर्थो विधीयते॥§ 6712

यथैव 'त्र्यङ्गैः स्विष्टकृतं यजति' इत्यत्र नाङ्गान्यनूद्य त्रित्वं विधीयते। किं तर्हि। पूर्वनिष्पन्नः समासार्थो विधेयो भवति। तथेहापि परिपूर्णस्य पदस्य पदान्तरयोगादेकदेशनिष्कर्षे च सामर्थ्याभावादशक्यमेवानुवदितुं यो वषट्कर्तुर्भक्ष इति। न हि प्राक्समासाद्भक्षस्य वषट्कर्तृसंबन्धो युक्तः। सापेक्षत्वे सति समासानुपपत्तेः। ननु च 'भवति वै प्रधानस्य सापेक्षस्यापि समासः' इति सत्यपि वषट्कर्तृसंबन्धे समासोऽवकल्पिष्यते। भवेदेतदेवं, यदि भक्ष एवैकः सापेक्षः स्यादिह तु प्राथम्यमपि वषट्कर्तृसंबन्धित्वात्सापेक्षम्। न हि प्राथम्यस्य भक्षो निमित्तम्। किं तर्हि। वषट्कर्तृत्वमतो वषट्कर्तुः प्रथम इत्येवं संबन्ध आपद्येत। ततश्च विस्पष्टमसामञ्जस्यं स्यात्, यो वषट्कर्तुर्भक्ष इति चानूद्यमाने विशिष्टानुवाददोषः, भक्षमात्रेण वषट्कर्तुरनाक्षेपात्। वषट्कर्तृत्वस्य च क्रियान्तरेष्वप्यनैकान्त्यात्। अन्यतरानुवादे तु सर्वभक्षाणां प्राथम्यं विधीयेत सर्ववषट्कर्तृव्यापाराणां च। तच्चाशक्यं कर्तुम्। अतो वषट्कर्तृप्राथम्याविशिष्टापूर्वभक्षविधानमेतत्। तयोश्च परस्परनियमादत्यन्तसमानविषयत्वम्। अतो यावति विषये वषट्कारस्तावत्येव प्रथमभक्षः। कथं पुनर्वषट्कारो

१ स्य] तस्य—वषट्कर्तुर्होत्रादेरित्यर्थः।
१ तेषां] तेषां च—चमसिनां मध्य इत्यर्थः।
६ माण] वक्ष्यमाणेति—अनन्तराधिकरणवक्ष्यमाणहोमाभिषवरूप निमित्तद्वारेण ग्रहादिषु भक्षणोपपत्तिरित्यर्थः।
१० वि] विधिक्लेशेति—श्रूयमाणविधिना प्राथम्यविशिष्टभक्षणान्तरविधने विशेषणविधानार्थं विध्यन्तरकल्पनाक्लेश इत्यर्थः।

निमित्तभूतः सन्नुपादीयते कथं चानुपादीयमानस्य नियमोऽवकल्पते। उच्यते। § 6713

नियमः सर्वथा तावदेककर्मनिमित्तकः।
उपादानानुपादाने न विशेषः प्रतीयते॥§ 6715

न च वषट्कर्तृत्वमनुपादेयम्। न ह्यत्र यदिशब्दसप्तम्यादिकृतं निमित्तत्वम्।
किं तर्हि। वषट्कर्तरि क्रियाङ्गत्वेनोपादीयमानेऽर्थान्निमित्तत्वं भवति। तस्माद-
1008 दोषः। ननु च 'तस्मादेकं साम तृचे क्रियते स्तोत्रीयम्' इति समासस्थाम-
प्यृचमनूद्य त्रित्वविधानं दृष्टं तथा प्राथम्यविधानमपि सेत्स्यति। न। तत्रापि
समासार्थस्यैव विधानाभ्युपगमात्। सर्वस्तोत्रसाम्नां हि तृचा एवोपादीयन्ते।
तत्र यदि सकलः समासार्थो न प्राप्तः स्यात्ततः सर्वविधिर्भवेत्। सर्वत्र च-
र्मः सामचोदनयैव पाठक्रमेण च प्राप्ता दृश्यन्ते। तेन 'न चेदन्येन शिष्टाः'
इत्येवं न विधीयन्ते। 'वपट्कर्तुः प्रथमभक्षः' इत्यत्रापि यावद्वषट्कारं समासार्थो
विधीयते। तत्र यद्यृग्वदेव सर्वत्र भक्षः प्राप्तः स्यात्ततो विधिशक्त्या मुच्येत। स
तु नवसु चमसेषु ग्रहेषु चाप्राप्तो निमित्तत्वेन चोपनीतो न हातुमनुवदितुं वा
शक्यते। यदि तु ऋचामपि क्वचिदप्राप्तिर्भवेत्ततः समासे विशेषाभावाद्भवेदेव
विधिः। सर्वस्तोत्रसामसु तु ताः प्राप्ताः। अपि च त्रित्वमृचां विधीयते। ताश्च
प्रधानत्वात्सापेक्षत्वेऽपि समस्यन्ते। नत्विह प्राथम्यं भक्षमात्रसंबन्धीत्युक्तम्।
तस्माद्वषट्कारनिमित्तं भक्षं पूर्वं कृत्वा भूयः समाख्याभक्षः कर्तव्यो न तस्यैव
प्राथम्यमिति सिद्धम्॥ ३१॥ § 6716

इति वषट्कारनिमित्तकभक्षान्तरप्रतिपादनाधिकरणम्॥ १०॥

## ०.०.१५० होमाभिषवनिमित्तकभक्षप्रतिपादनाधिकरणम्

किमेतावद्भिरेव निमित्तैर्भक्षः। नेत्युच्यते। होमाभिषवाभ्यामपरो भक्षः।
कथम्। एवं ह्याह 'हविर्धाने ग्रावभिरभिषुत्याऽऽहवनीये हुत्वा प्रत्यञ्चः प-
रेत्य सदसि भक्षान्भक्षयन्ति' इति। तत्र होमाभिषवौ तावत्सगुणौ प्राप्तौ न
1009 विधीयेते। दीक्षावाक्यवत्क्रमार्था श्रुतिरिति चेत्। तच्च नास्ति। अर्थादेवास्य

---

७ स्मा] तस्मादिति। ऋक् सामोवाच मिथुनीसंभवावेति। सोऽब्रवीन्नवै त्वं ममालं जायात्वे वेदो मम महिमेति। ते द्वे भूत्वोचतुः। सोऽब्रवीन्न वै वां ममालं स्थो जायत्व इति। तास्तिस्रो भूत्वोचतुः। सोऽब्रवीत्संभवामेति' इत्येवमुपक्रमो ज्ञेयः।
११ चेद] ( अ॰ १ पा॰ ४ अ॰ ६ सू॰९ )

४ दीक्षा] दीक्षावाक्यवदिति। 'अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति, तत उद्गातारं ततो होतारं, ततस्तं प्रतिप्रस्थाता दीक्षयित्वाऽर्धिनो दीक्षयति—ब्राह्मणाच्छंसिनं ब्रह्मणः प्रस्तोतारमुद्गातुः, मैत्रावरुणं, होतुः, ततस्तं

क्रमस्य सिद्धत्वात्। न हि हुतस्याभिषवः संभवति, न च भक्षितस्य होमः। आहवनीयदेशाच्च सद आगच्छन्तप्रत्यञ्च एव प्रतिपद्यन्ते। होत्रादीनां च सदसि कर्मप्रवृतेरवश्यं वषट्कारसमाख्यानिमित्तभक्षार्थं सदः सोमा आनेतव्याः। अध्वर्युणा चोपहवो दातव्यः। तेन सदसीत्यनूद्यते। केवलं तु भक्षणमप्राप्तं विधीयते। तत्र हुत्वाऽभिषुत्येत्येतदुपादानस्यैतत्प्रयोजनं कथं नाम तत्समानकर्तृको भक्षः सिध्येदिति। न हि निर्ज्ञातप्रयोजनयोर्होमाभिषवयोर्भक्षणाङ्गत्वं संभवति। भक्षस्य च सोमसंस्कारत्वमवगतमेवेति नाङ्गत्वार्थमितरसंबन्धश्रवणम्। अतश्चार्थाद्धोमाभिषवयोर्निमित्तत्वं ज्ञातम्। अतो होमाभिषवकार्यपि सोमं भक्षयेदिति॥ ३२॥ § 6718

इति होमाभिषवनिमित्तकभक्षप्रतिपादनाधिकरणम्॥ ११॥

## ०.०.१५१ एकपात्रे भक्षसमुच्चयाधिकरणम्

अथ यत्र निमित्तसंपातो भवति तत्र किमन्यनिमित्तको भक्षः समुच्चीयते, अथ विकल्प्यते, अथवा बाध्यत इति। तुल्यार्थत्वाद्विकल्पप्राप्तावभिधीयते। प्रैतु होतुरित्यादिना विशेषसंयोगादविशेषशास्त्रं होमाभिषवसंबद्धं ग्रहेषु चरितार्थं शक्यं बाधितुम्। अतः शेषे तत्स्यादिति॥ ३३॥ § 6720

स्याद्वा प्राप्तिर्निमित्तत्वात्। वषट्करणादिनिमित्ते सति प्रत्यक्षोपदेशेनैव वषट्कारादिसंबन्धेन प्राप्तिः। न च तस्य सामान्येन प्रवृत्तिः। वषट्कृतेषु सोमेषु विशेषरूपेणैव प्रत्यक्षशिष्टत्वात्। कामं वा समाख्या विप्रकृष्टत्वाद्दुर्बला 1010
स्यात्। साऽपि त्वनवकाशत्वादवश्यमङ्गीकर्तव्या। तथा सति च प्राप्तिमात्रेऽसौ व्याप्रियते नान्यन्निवर्तते। संभवति हि सावयवस्य द्रव्यस्यानेकेनापि भक्षणं, विशेषतस्तिक्तकटुकस्य सोमस्य। श्रूयते च ‘अल्पं भक्षयेत्’ इति। न च निःशेषभक्षणेऽल्पत्वमवकल्पते। सशेषे च प्रतिपत्त्यपेक्षिणि भवति भक्षान्तरस्यावकाशः। तस्मात्समावेशः कर्तव्य इति। ॥ ३४॥ ३५॥ § 6721

इति एकपात्रे भक्षसमुच्चयाधिकरणम्॥ १२॥

---

नेष्ठा दीक्षयित्वा तृतीयिनो दीक्षयति—आग्नीध्रं ब्रह्मणः प्रतिहर्तारमुद्गातुरच्छावाकं होतुः, ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति—पोतारं ब्रह्मणः सुब्रह्मण्यमुद्गातुः, ग्रावस्तुतं होतुः, ततस्तमन्यो ब्राह्मणो दीक्षयति ब्रह्मचारी वाऽऽचार्यप्रेषितः’ इत्येवं सत्रात्मकद्वादशाहप्रकरणपठितवाक्यवादित्यर्थः।

६ निर्ज्ञा] निर्ज्ञातेति—होमस्य फलार्थत्वेन, अभिषवस्य सोमसंस्कारार्थत्वेन च निर्ज्ञातप्रयोजनयोरित्यर्थः।

## ०.०.१५२ वषट्कर्तुः प्रथमं भक्षप्रतिपादनाधिकरणम्

एकस्मिन्पात्रेऽनेको भक्षयिता साधितः। इदानीं तद्गताः क्रमादिविशेषाः प्रतिपाद्यन्ते। तत्राध्वर्यो प्रथमं भक्षयति न समर्पणभूयस्त्वेन प्रयोगो विक्षेप्स्यते। अन्यथा पुनरध्वर्युणा समर्पिते पुनरपि तस्मै समर्पणाद्विक्षेपः स्यादिति मत्वा क्रमादध्वर्युः पूर्व इत्याह॥ ३६॥ § 6723

बलवति प्रमाणे विहिते दुर्बलोपन्यासः क्लिष्टो भवतीति मन्त्रवर्णं ताव-
दुपन्यस्यति। तत्र ग्रावस्तुतिपरो मन्त्रो हौत्रकारिणां प्रथमं भक्षं दर्शय-
ति। एते वदन्ति—अभिषवे क्रियमाणे शब्दं कुर्वन्ति, शतवत्सहस्रवद-
भिक्रन्दन्ति—वदनमेवोत्तरेणाभिक्रन्दनेन विशेषितं, हरितोभिरासभिः—सोम-
1011 संपर्कान्नीलाकृतैर्मुखैः। विष्ट्वी—कर्मणि, ग्रावाणः सुकृतः—शोभनकारिणः,
सुकृत्यया—सुकृत्त्वेन, होतुश्चित्—होतुरपि, पूर्वे हविरद्यं—होतुर्यत्प्रथमम-
दनीयं, तदाशत—भुक्तवन्त इति ब्रुवन् वषट्कर्तुः प्रथमभक्ष इति दर्शयति।
एवं 'होतेव नः प्रथमः पाहि' इति। यथा होता प्रथमं पिबतीत्युपमानात्प्र-
सिद्धिर्गम्यते॥ ३७॥ § 6724

'वषट्कर्तुः प्रथमभक्षः' इति विशिष्टविधानं पूर्वमेवोक्तम्। अपूर्वत्वाच्च नानेकविधिदोषः। समासश्चाधिकः समासेनैकपदीभूतैककारकविधानात् 'तस्य तस्योपदिश्येत' इत्येतन्नास्ति॥ ३८॥ § 6725

यथानिमित्तं नैमित्तिकोपनिपातात् 'वषट्कृते जुहोति' इति प्रथमं होतृव्यापारो निमित्तं पश्चादध्वर्योर्होमः। ननु च तस्याप्यभिषवः प्रथमतरमासीत्। सत्यमासीत्, न तु तावतो निमित्तत्वमुभाभ्यां वा। न हि तयोर्धर्मशास्त्रमित्येवं सहितयोर्निमित्तत्वात्। यस्य च नाम 'होतुश्चित्पूर्वे हविरद्यमाशत' इत्येतस्माद्धोतुरेव केवलस्य प्रथमं भक्षभ्रान्तिस्तस्याप्येतेन सूत्रद्वयेन वषट्कर्तृमात्रे होतृशब्द इति प्रतिपादितं भवति॥ ३९॥ § 6726

इति वषट्कर्तुः प्रथमं भक्षप्रतिपादनाधिकरणम्॥ १३॥

## ०.०.१५३ अनुज्ञापूर्वकं भक्षणाधिकरणम्

'तस्मात्सोमो नानुपहूतेन' इत्येतस्यार्थकथनार्थमुत्तरविवक्षार्थं चैतत्सूत्रम्॥ ४०॥ § 6728

---

३ विक्षेप्स्य] विक्षेप्स्यत इति। अध्वर्योर्होमकर्तृत्वेन तद्धस्त एव पात्रसत्त्वेन स्वीयं भक्षणं तेन कृत्वाऽन्यस्मै दानेऽर्पणप्रत्यर्पणादिगौरवं नाऽऽपद्यत इति भावः।

५ विष्ट्वी] विष्ट्वी—यज्ञं प्राप्येति वेदभाष्ये।

३ त] ( अ॰ २ पा॰ २ अ॰ ३ सू॰ ६ )

इति अनुज्ञापूर्वकं भक्षणाधिकरणम्॥ १४॥

## ०.०.१५४ वैदिकमन्त्रेणानुज्ञापनाधिकरणम्

तदुपह्वानं केन कर्तव्यमत आह—'उपहूत उपह्वयस्व' इत्यनेनेति। 1012
उभयोरनुज्ञाप्यानुज्ञापकयोर्व्यापारप्रदर्शनार्थं सकलोच्चारणम्। सर्वथा लौकिकेन तावन्न कर्तव्यमित्यर्थः॥ ४१॥ § 6730

इति वैदिकमन्त्रेणानुज्ञापनाधिकरणम्॥ १५॥

## ०.०.१५५ वैदिकमन्त्रेणानुज्ञादानाधिकरणम्

वदनमिति वा पाठः। समस्तमेव प्रश्नप्रतिवचनयोरेकत्र वा लौकिकः प्रयोग इति प्राप्तावुच्यते। अर्थक्रमेण पाठक्रमं बाधित्वोपहूत इत्येवमभ्यनुज्ञायां प्रयोक्तव्यः॥ ४२॥ § 6732

इति वैदिकमन्त्रेणानुज्ञादानाधिकरणम्॥ १६॥

### ०.०.१५५.१ एकपात्राणामनुज्ञाप्य भक्षणाधिकरणम्

यद्येतदत्यन्ताप्राप्तं विधीयेत ततो यतः कुतश्चित्प्रार्थ्येत। लौकिकमेव त्वेत-
न्नियम्यते। तस्य यादृशे विषये प्राप्तिः सा न निवार्यते। समानपात्राणां तु 1013
'समं स्यादश्रुतत्वात्' इत्यनेन न्यायेन समविभागे सति वैषम्यप्रसक्ताव-
नुज्ञाप्य कार्यम्। सत्यपि सोमेनानुच्छिष्टत्वे तत्कृते चादृष्टदोषाभावे प्रत्यक्षेणैव सहभोजनाद्व्यलीकोत्पत्तेरुपपत्तेरनुज्ञावसरो भवति। तस्मादेकपात्राणामिति॥ ४३॥ § 6734

इति एकपात्राणामनुज्ञाप्य भक्षणाधिकरणम्॥ १७॥

---

३ स] ( अ° १० पा° ३ सू° ५३ )

## ०.०.१५६ यजमानस्य वषट्कारभक्षप्रतिपादनाधिकरणम्

ज्योतिष्टोमे ऋतुग्रहेज्यासु यजमानसप्तमानां याज्याप्रयोगार्थे वरणमाम्नातम्। तेषु यजमानस्य याज्या, तस्याश्च पक्षद्वयं विहितं होत्रे प्रत्यर्पणं स्वयं वोच्चारणम्। तत्र यदा स्वयं यजति तदा किं वषट्कारस्तन्निमित्तश्च भक्षोऽपनीयते नेति संदेहे, नापनयो वचनाभावात्। अन्यापनये च नान्यस्यापनयः। असंबन्धात्। याज्यामात्रस्य ह्यपनयनं श्रूयते न वषट्कारभक्षयोः। तस्माद्यथा याज्याया अपनये सत्यपि होतुर्वरणं नापनीयते तथा
1014 भक्षोऽपीति। ननु च यदा स्वयं यजते तदा नैवापनयो भवति 'यजमानस्य याज्या' इति वचनात्। यदा तु सोऽभिप्रेष्यति तदाऽपनयोऽत एवं विचारयितव्यं किं याज्यापनये यजमानाद्भक्षोऽपनीयते नेति। उच्यते। § 6736

याज्याभक्षवषट्काराः प्राप्ता होतुः समाख्यया।
यजमानस्य याज्येति ततोऽपनयनं श्रुतम्॥ § 6738

हौत्रसमाख्यया हि प्राक् 'यजमानस्य याज्या' इति ह्यतो वचनात्सर्वं होतुः प्रापितम्। तत्र वचनेन याज्यामात्रं यजमानसंबन्धि कृतं, वषट्कारादयस्तु होतुस्तदवस्था एव। यदि पुनर्यजमानादपनय इति व्याख्यायेत ततस्तस्य याज्यामात्रं प्रापितं सदपनीयत इति वषट्कारादिप्राप्त्यभावादपनयाशङ्कैव न स्यात्। तस्मात् 'यजमानस्य याज्या' इत्यनेन याज्यामात्रापनयाद्वषट्कारस्य च याज्यातोऽत्यन्तव्यतिरेकादङ्गाङ्गित्वाभावाच्च यजमानेन प्रयुज्यमानाया उपरि होता वषट्कृत्य भक्षयेत्। वषट्कारनिमित्तो हि भक्षो न याज्यानिमित्त इत्यनपनीतः॥ ४४॥ § 6739

यदि 'यजमानस्य याज्या' इत्येतावन्मात्रमेव श्रूयेत ततः कदाचिन्नाप-
1015 नीयेत भक्षः। इह त्वेवं श्रूयते 'स्वयं निषद्य यजति' इति। वषट्कारेण च र्थः समाप्यते तावन्नावानितव्यम्। एककर्तृकत्वे च याज्यावषट्कारयोरिदमुपपद्यते नान्यथा। तस्माद्यत्र याज्या तत्र वषट्कारभक्षावपीत्यन्तरेणाप्येकत्वमङ्गभावं चापनयो विज्ञायते॥ ४५॥ § 6740

यत्तु प्रवरवदिति। तत्रोच्यते। § 6741

प्रवरो न त्वतिक्रान्तो याज्याकालेऽपनीयते।
भक्षणस्य तु भावित्वाच्छक्याऽपनयकल्पना॥ § 6743

तन्नाम निमित्तापनयादपनीयते यदपनेतुं शक्यते, अन्यत्र च योजयितुम्। न च प्रवरस्य याज्यापनयवेलायां होतुरपनयनं शक्यम्। नापि यजमानेऽतिक्रान्तकालस्य करणात्सगुणं वरणम्। भक्षस्य तु द्वयमपि शक्यं, तस्मादिह दृष्टान्तवैषम्यम्। इदं त्विह वक्तव्यम्। किमिति तत्र प्रवरापनयो

७ इ] एवं तावद्यथाभाष्यं व्याख्यायाधुनाऽन्यथा व्याचिख्यासुरादौ भाष्यं तावदाक्षिपति—इदं त्विहेत्यादिना।

न शक्यते, यदा सर्ववैकल्पिकान्यादित एवान्यतरतोऽवधार्य प्रयोग आरभ्यते। शक्यं हि प्रवरवेलायामेव निश्चेतुं किं यजमानो याज्यां वक्ष्यति, उत होतेति। तथा निश्चिते चान्यतरस्य वरणं करिष्यते। यदि ह्येतद्याज्यावचनमुरुक्रमविष्णुयागवन्नैमित्तिकं भवेत्ततः प्राङ् निमित्तोपजननादनवधृतसद्भावं 1016
सन्न कारयेदपि प्रवरणम्। नित्यं चैतच्छक्नोति प्रथममेव स्वानुसारि वरणं नियन्तुम्। यदपि होतुर्न शक्यमपनेतुम्। कथमेतद्धोतुरपनीयेत, यदा तस्याऽऽत्मीययाज्यार्थमवश्यकर्तव्यमेवेति। न किंचिदेतदर्थं पृथग्वरणं यस्यापनय आशङ्क्येत। शक्यं हि याज्यासहस्रार्थमपि तन्त्रेणैकमेव वरणं कर्तुमदृष्टार्थं च। अतः समस्तज्योतिष्टोमप्रयोगार्थं प्रथममेव वृते सति क्रियत इति, अगृह्यमाणविशेषत्वादपि तन्त्रम्। यदपि यजमानस्य भ्रष्टावसरं क्रियमाणं विगुणं भवतीति तदपि 'गुणलोपे च मुख्यस्य' इत्यनेन विरुद्धम्। न च तत्र प्रकृतिविकृत्योः कश्चित्प्रयोगविशेषो भवति। यदपि यथाश्रुतमेव प्रकृतौ कर्तव्यमिति। तत्सर्वशक्त्यधिकरणेन विरुद्धम्। शक्यमेव यथाकालं संपादयितुमित्युक्तम्। अत एवं सूत्रं नेतव्यं, कारणान्तरेणैतत्प्रसिद्धिमङ्गीकृत्य नान्यस्यापनयेऽन्यस्यापनय इत्येतावता पूर्वमुदाहृतम्। इदानीं तु ब्रवीति 'प्रवृत्तत्वात्प्रवरस्यानपायः' याज्यान्तरार्थं प्रवृत्तत्वादित्यभिप्रायः। तेन यजमावोऽपि यदि वक्ष्यति यदि च प्रेष्यति तथाऽपीतरार्थं भवितव्यमेव प्रवरणेन। एतावता तु वैषम्यं यदसौ न वषट्कारभक्षवदेतद्याज्यानुसारं प्रतिपद्यत इति॥ ४६॥ § 6744

इति यजमानस्य वषट्कारभक्षप्रतिपादनाधिकरणम्॥ १८॥

## ०.०.१५७ फलचमसाधिकरणम्

योऽयं ज्योतिष्टोमे राजन्येन वैश्येन च निमित्तेन नैमित्तिकः फलचमसः श्रूयते, न्यग्रोधस्तिभीः—न्यग्रोधाङ्कुरान् न्यग्रोधफलानि वा, ताः संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेत्, इति। स किं भक्षविकार उतेज्याविकार इति संदेहे, बिभक्षयिषेदिति श्रुतिसंयोगात्तमिति प्रकृतग्राहिश्रुतिसंयोगात्पुन-
रपि भक्षश्रुतिसंयोगादानन्तर्यश्रुतेः समानवाक्योपादानाच्च भक्षो भूत्वा तत्स- 1017
मानस्थानं भक्षगतमेव सोमं विकुर्यान्न यागगतम्। न ह्यन्यत्र श्रुतमन्यविषयस्य बाधने समर्थम्। यागसंबन्धश्चास्य प्रकरणाद्विज्ञायते। तच्च दुर्बलम्।

४ मुरुक्र] उरुक्रमविष्णुयागवदिति—। वैश्वदेवं चरुं निर्वपेद्भ्रातृव्यवान्। तं बर्हिषदं कृत्वा शम्यया स्फ्येन च व्यूहेत्, इदमहममुं चामुं च व्यूहामीति। यं द्विष्यात्तं ध्यायेत्। यदधोऽवमृद्येद्यच्च स्फ्य आश्लिष्येत्, तद्विष्णव उरुक्रमायावद्यति' इति वाक्येन, अधोवमर्दनस्फ्याश्लेषयोर्निमित्ते विधीयमानोरुक्रमविष्णुयागवदित्यर्थः।
११ गुण] ( अ° १० पा° २ सू° ६३ )
१३ त्त्य] ( अ° ६ पा° ३ अ° १ )

एवं चोत्पत्तिवाक्यशिष्टः सोमो यागादर्थकर्मणो न निवर्तिष्यते। प्रतिपत्तिबाधे तु विनाऽपि तावच्छ्रुत्या मन्दोऽपराधः किमुत श्रुतावेव सत्याम्। तस्माद्भक्षविकारः॥ ४७॥ § 6746

लिङ्गदर्शनेन तावद्भाष्यकार उपक्रमते। सति हीज्याविकारत्वे सौमिकभक्षसंबन्धोऽस्य लभ्यते। ततश्च तत्स्थानापत्त्या निराकृतत्वात्। 'न गिरा गिरेति ब्रूयात्' इतिवत् 'न सोमम्' इत्यनुवादः सेत्स्यति। लिङ्गं त्वेतन्नासत्यां यागसंबन्धप्राप्तौ साधकमिति मन्यमान **आह। कथमसति यजिसंबन्धे** तद्विकारत्वमिति। इतरस्तु दर्शयति। 'स यदि राजन्यं वैश्यं वा याजयेत्' न्यग्रोधस्तिभीराहृत्य ताः संपिष्य दधन्युन्मृज्य ताभिर्याजयेदिति संबध्यते। न ह्यवश्यं परत्रैव श्रुतेनाऽऽख्यातेन सह संबन्धो भवति। न च पाठापेक्षया पूर्वकालत्वं क्त्वाशब्देनोच्यते। भवति हि गच्छति भुक्त्वेत्यपि गमनमपेक्ष्य भोजनस्य पूर्वकालत्वम्। अतो वाक्येनैव यजिसंबन्धः। सत्यपि
1018 याजयतिसंबन्धे यजिसंबन्ध एवायं द्रष्टव्यो 'ग्रामकामं याजयेत्' इतिवत्। अङ्गकर्तुः प्राप्तत्वादेव निष्फलत्वेन चानुपदेश्यत्वात्। एवं च सति 'तमस्मै भक्षम्' इति 'न सोमम्' इति चोभयमपि प्राप्तमनुवदिष्यते। न त्वेषा योजनाऽवकल्पते। कथम्। § 6747

> व्यवधानात्तमित्यस्य बाधादविधिशक्तितः।
> निमित्तत्वोपयुक्तस्य पुनश्च विधिकल्पना॥ § 6749

> तृतीयार्थश्च कल्प्यः स्याद् द्वितीयार्थस्य बाधनम्।
> समस्तसोमबाधश्च यजिनिष्कर्षकल्पना॥ § 6751

'स यदि सोमं बिभक्षयिषेत्' इत्येतद्व्यवधाने सति याजयतिसंबन्धः कल्पयितव्यः 'तमस्ते' इति च सर्वनाम्नः श्रुत्यैव प्रकृतग्रहणसामर्थ्यमानन्तर्यं च बाध्येयाताम्। 'स यदि राजन्यं वैश्यं वा याजयेत्' इत्यस्य यदिशब्दसंबन्धादुपहतविधिशक्तिर्न फलचमससंयोगं विधत्ते। निमित्तत्वेन चोपयोगे सति निराकाङ्क्षीभूतस्य सतः पुनरत्यन्तविपरीतं विधित्वं कल्पनीयम्। ताभिर्याजयेदिति चात्यन्ताश्रुततृतीयार्थः कल्प्येत। तमस्मा इति च प्राधान्येन निर्देशोऽवगम्यमानोऽपह्नूयेत। प्रयच्छेदिति चानन्यपरे विस्पष्टे विधौ सति नानुवादत्वाङ्गीकरणं युक्तम्। न च याजयतिशब्दादुपसर्जनीभूतं यजिं निष्कृष्य फलचमससंबन्धो युक्तः। सर्वेण च ज्योतिष्टोमेन संबन्धात्समस्तं सोमं बाधित्वा तेनैव यागः क्रियेत सर्वं विरुद्धं चैतत्। भाष्यकारोऽपि

---

३ इ] इतिवदिति—'ऐरं कृत्वोद्गेयम्' इत्यनेन पाठप्राप्ते मन्त्र हरापदविधाने गिरापदनिवृत्त्या यथा 'न गिरा मिरेति' निषेधो नित्यानुवादस्तथा 'न सोमम्' इत्ययमपत्यिर्थः।

२१ त] उपहता विधिशक्तिर्न फलचमससंयोगे विधत्त इति पा०।
२१ संयो] फलचमससंयोगामिति—फलचमसविशिष्टयागमित्यर्थः।

**याजयितुमिति गम्यत** इत्याह, न याजयेदित्यनेन संबन्धम्। सूत्रकारोऽपि च ‘संस्कारस्य तदर्थत्वात्’। इति हेतुमाह, न याजयतिसंबन्धादिति। तस्मादयुक्तमेतत्। अन्ये तु यागो हि प्रकृतोऽस्तीत्यतो वचनाद्यागसंबन्धानवक्लृप्तिं मन्यमानास्तमस्मै प्रयच्छेत्किमर्थं प्रकरणाद्याजयितुमिति गम्यत इति वर्णयन्ति। तेषामपि तु समस्तसोमविकारत्वं तच्छब्दोपनीतस्ववाक्यावगतभक्षसंबन्धबाधस्तमिति 1019 च पुल्लिङ्गनिर्देशो न घटते। भक्ष्यव्यवहितेन च प्रयच्छेदित्याख्यातेन संबन्धः। तस्माद्भक्षसंयोगापरित्यागेनैव सिद्धान्तोऽपि व्याख्येयः। कथम्। § 6752

अपूर्वो वैष चोद्येत भक्षः प्रकृत एव वा।
संस्कारोऽर्थक्रिया न स्यात्संस्कारो यागसाधनम्॥§ 6754

यदि तावदपूर्व एव भक्षश्चोद्यते ततोऽप्यारादुपकारकत्वं न भवति। अदृष्टकल्पनात्प्रकरणविनियोगविप्रकर्षादसंबद्धोपकारित्वाच्च। तथा तं प्रयच्छेदिति द्वितीयया विस्पष्टं संस्कार्यत्वं गम्यते। अन्यथा हि तेनेति प्राप्नोति। तस्मात्संस्कारः। संस्कारस्य चैष स्वभावो यदुपयुक्तमुपयोक्ष्यमाणं वा द्रव्यमवलम्बते। तत्रापि भक्षितस्य पुनरुपयोगासंभवादुपयुक्तसंस्कारत्वमेव ज्ञायते। तेन फलचमसः संस्कारभूतं भक्षमुपसर्पन्नेव शक्यो नियोक्तुं यदि क्वचिदुपयोगं गच्छसि ततो भक्षणेन संस्क्रियसे नान्यथेति। स चोपयुज्यमानत्वं प्रार्थयमानः प्रकरणाद्यागोपयोगित्वं प्रतिपद्यते। तत्रापि यावत्यनुपयुज्यमानो यजमानभक्षसंस्कार्यत्वं न प्रतिपद्यते तावतैव यज्ञभागेनार्थापत्त्या संबध्यत इत्यवधारणाद्यजमान चमसाभ्यासेनैवैकेन संबध्यते। न हि ग्रहचमसान्तरेष्वनुपयुज्यमानस्यास्य यजमानभक्षत्वमनुपपन्नम्। अतः सोमोऽप्यनुग्रहीष्यते। यद्वा ज्योतिष्टोमप्रकरणेन संबद्धोऽयं भक्षशब्द उच्चार्यमाणः प्रकृतं सोमभक्षमेवावलम्बते। स च यागोपयुक्तद्रव्यशेषसंस्कारत्वेन प्रज्ञात इति फलचमसमपि तादृशमेव संस्कर्तुं शक्नोति। न त्वसाविदानीमन्यप्रयोजनः शक्यः कल्पयितुम्। न च तस्य कर्मान्तरत्वे किंचिच्छब्दान्तरादि कारणमस्ति। अपि च ‘स यदि सोमं बिभक्षयिषेत्’ इति स्ववाक्योपात्तेनैव सोमभक्षणेन संबन्धो विज्ञायते। अन्यथा हि तदुपादानं व्यर्थमेव स्यात्। न च ‘न सोमम्’ इत्यनुवादोऽवकल्पते। यदि भक्षान्तरमेवेदमारादुपकारकं चोद्येत ततः समानकार्यत्वाभावान्नैव सोमं निवर्तयेत्। अनिवर्तिते च तस्मिन्न प्रतिषेधानुवादः स्यात्। न च विधिर्युक्तः। वाक्यभेदानेकादृष्टकल्पनाप्रसङ्गात्। असंबद्धं च वाक्यं भवेत्, यदि सोमं भक्षणेन संस्कर्तुमिच्छेत्ततः फलचमस- 1020 भक्षणमारादुपकारकं कुर्यात्फलचमसं वा संस्कुर्यादिति। यदा त्वयमर्थो

१० क्रि] अर्थक्रियेति—आरादुपकारिकेत्यर्थः।
३० विधिर्यु] विधिरिति—विधित्वं च प्रकृतेऽनुवादप्रतियोगित्वरूपं विधिनिषेधसाधारणं विज्ञेयं, न तु निषेधप्रतियोगित्वरूपम्। तस्य निषेधेऽसंभवादिति।

गृह्यते, येन भक्षणेन यथाभूतं सोमं संस्कर्तुमिच्छेत्तेन तथाभूतमेव फलचमसं संस्कुर्यादिति, तदाऽर्थापत्त्या यजमानचमसयागाभ्यामसंबन्धः कृतो भवति। तस्मादिज्यायामयं सोमविकार इति सिद्धम्। **सैषा व्यवधारणकल्पनेति**। यथैवाश्वप्रतिग्रहेष्टयां 'यावतोऽश्वान्प्रतिगृह्णीयात्, इति श्रुते प्रतिग्राहयेदिति व्यवधार्य कल्पितं तथैवात्र 'भक्षं प्रयच्छेत्' इति श्रुते यागसाधनं प्रयच्छेदिति कल्प्यते। एतेन 'पूतीकानभिषुणुयात्' इत्यादीनि व्याख्यातानि॥ ४८॥ § 6755

होमानुवादेन दर्भतरुणकविधिरिज्याविकारत्वेऽवकल्पते॥ ४९॥ § 6756

संदिग्धयागसाधनोन्नयनैकवाक्यता चैतत्तुल्यत्वेऽवकल्पते नान्यथात्वे॥ ५०॥ § 6757

सोमप्रतिषेधानुवादश्च लिङ्गमिति व्याख्यातम्॥ ५१॥ § 6758

इति फलचमसाधिकरणम्॥ १९॥

## ०.०.१५८ राजन्यचमसे ब्राह्मणानां भक्षप्रतिपादनाधिकरणम्

1021 दशपेये 'शतं ब्राह्मणाः सोमान् भक्षयन्ति। दश दशैकैकं चमसमनुप्रसर्पेयुः' इति। तत्र राजन्यचमसोऽपि किं ब्राह्मणैरेव दशभिर्भक्षयितव्य उत राजन्यैरिति संदेहः। कः पुनः संदेहहेतुः। केचिदाहुः। वचनव्यक्तिभेद इति। यदि हि दश दशैकैकमिति विधिस्ततस्तुल्यजातीयेषु सर्वत्र विहितेषु 'शतं ब्राह्मणाः' इति यथाप्राप्तानुवादो ब्राह्मणग्रामवद्भूम्ना भवतीति राजन्या दश। अथ पुनः 'शतं ब्राह्मणाः' इति विधिः 'दश दशैकैकम्' इत्यनुवादस्ततो विधौ गौणत्वासंभवात्सर्वत्र ब्राह्मणैरेव भक्षयितव्यमिति ब्राह्मणा दश। किं तावत्प्राप्तम्, अनुप्रसर्पेयुरित्यस्य विधिसामर्थ्याद्भक्षयन्तीति चानुवादसामर्थ्याद्दशदशैकैकमिति विधौ सति के दशेत्यपेक्षायां तुल्यजातीयेषु संख्यावृत्तिस्वाभाव्याद्ब्राह्मणचमसेषु ब्राह्मणा राजन्यचमसे राजन्या दशेति गम्यते। सामान्यादिति च-दशसंख्यां चोदयित्वा निवृत्तव्यापारे शास्त्रे तत्पूरणार्थमश्रुतासु व्यक्तिषूपादीयमानासु यासां किंचित्प्रत्यायकमस्ति ता ग्रहीतव्यास्तुल्यजातीयानां च सामान्यं गमकं विद्यते न जात्यन्तरानुगतानाम्। अथवा सामान्यादिति—विषयसामान्यात्, 'अर्थैकत्वे द्रव्यगुणयोः' इति हि फलचमसं प्रत्युपादीयमानयोः क्षत्रियत्वदशत्वयोः परस्परनियमे सति यावति विषये दशत्वं तावति राजन्यत्वमित्यवगम्यत इति बलाद्दश राजन्या

३ धा]
व्यवधारणेति—वाक्यान्यथात्वकरणमित्यर्थः।

१४ व्य] ( अ॰ ३ पा॰ १ अ॰ ६ सू॰ १२ )

विज्ञायन्ते। अथवा सामान्यादिति—तुल्यकार्यं तुल्यजातीयं च तुल्यस्य बाध-
कं भवति। तद्यदि राजसूयचोदनातो राजन्यत्वं प्राप्तं प्रकृतितश्चैकत्वं, तत्र
दशत्वं विधीयमानं सामान्यादातिदेशिकत्वाच्चैकत्वं बाधते न जातिं, भिन्नकार्य-
त्वात्। ततश्चानिवृत्तजातिरेव यजमानचमसो दशत्वेन योजयितव्य इति दश
राजन्या भवन्ति। ननु च दशत्वे विधीयमाने यदेकैकं चमसमनुप्रसर्पन्तीति
विशिष्टानुवादाद्वाक्यं भिद्यते। नैष दोषः। चमसमिति द्वितीयान्तं केवलम- 1022
नूद्यते। तावता तु संस्कार्यत्वं गम्यते। न च चमसानां भक्षणं मुक्त्वाऽन्यः
संस्कारः। तेन स एवानुप्रसर्पणशब्देन लक्ष्यते। तत्र च प्रत्येकमेव भक्षणं
प्राप्तमिति तदप्यनूद्यते। तस्मान्न वाक्यभेदः॥ ५२॥ § 6760

न वा राजन्या भक्षयेयुः। कुतः। § 6761

> शतब्राह्मणसंयुक्तो विधिरत्रावगम्यते।
> अन्यथा तदुपादानं गौणं व्यर्थं च ते भवेत्॥ § 6763

तुल्ये न ब्राह्मणशब्देन सर्वचमसेषु ब्राह्मणाः प्रतिपाद्यन्ते। ते न कुतश्चिद-
पि व्यावर्तयितव्याः। न च गौणत्वकारणं किंचिदस्ति। प्रमाणान्तरेण विस्प-
ष्टराजन्यानुपादानात्। समस्तमेव चैतदनर्थकं पुनःश्रवणं भवेत्। अस्मत्पक्षे
पुनः प्रयोगवचनादिभ्यो विधिशक्तिमनुमाय ब्राह्मणशते विहिते 'दशदशैकैक-
म्' इति विभागार्था पुनःश्रुतिः। अथवा 'समं स्यादश्रुतित्वात्' इति न्यायेन
दश दश प्राप्ता मुख्ययैव वृत्त्याऽनुवदिष्यन्ते। ब्राह्मणशतेन च दश दशकैरव-
स्थितेन दशस्वपि चमसेष्ववरुद्धेषु न कश्चिद्राजन्यानामवकाशो विद्यते। त-
स्माद्ब्राह्मणा दशेति। न त्वियं व्याख्या घटते। यदि हि 'शतं ब्राह्मणाः' इत्येष
विधिः स्यात्ततोऽतिदेशप्राप्तभक्षानुवादाद्विशिष्टविधानासंभवेनान्यतरत्र विधीय-
माने यदि शतं विधीयते ब्राह्मणा इत्यनर्थकं सिद्धान्तहानिश्च। ब्राह्मणविधौ तु
शतमित्यनर्थकम्। अथ यच्छतं भक्षयन्तीत्यनूद्य ब्राह्मणा विधीयन्ते, केन श-
तं प्राप्तमिति वक्तव्यम्। अथ यद्ब्राह्मणा भक्षयन्तीत्यनूद्य शतं विधीयते ततो
राजन्यव्यावृत्त्या ब्राह्मणश्रुतेर्विशेषणत्वाद्विशिष्टानुवादाद्वाक्यभेदः। राजन्यचम-
सेन च किंचित्कृतं स्यात्। तत्रैकैकमित्यस्य राजन्यचमसेऽनुवादासंभवात्त- 1023
त्रान्ये राजन्या दश विधीयेरन्नितरत्र च ब्राह्मणशतं नवसु चमसेषु न विद्मः
केन विभागेन स्यादिति। अथ सोमसंबन्धात्, ब्राह्मणा इति प्राप्तानुवादः क-
ल्प्यते तथाऽपि फलचमसव्यावृत्त्या विशिष्टानुवादो दोषोऽस्त्येव। फलचमसे
च पुनरपि न कश्चिद्व्यापार इति पूर्ववदेव प्रसङ्गः। न च सोमशब्दब्राह्म-
णशब्दयोरर्थान्तरेऽपि फलचमसे राजन्ये वा प्रयोग इति किंचित्प्रमाण-
म्। अविशेषितभक्षानुवादे पशुपुरोडाशादिभक्षेष्वपि शतप्रसङ्गः। न ह्यसौ
प्रधानेन विशेष्यते। 'सर्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वात्' इत्येवमङ्गप्रधानार्थ-

८ स्या] ( अ० १० पा० ३ सू० ५३ )
११ द] दशेति—राजन्यचमसं भक्षयेयुरिति शेषः
२४ र्वेषां] ( अ० ३ पा० ७ अ० १ सू० २ )

त्वप्रतीतेः। सोमशब्दश्चात्यन्तमेवानर्थकः स्यात्। अथ सोमानित्येतावन्मात्रमनूद्य शतं विधीयते ततः क्रयादारभ्य यावान्सोमसंस्कारः स सर्वः शतेन कर्तव्यस्तत्र भक्षयतिरनर्थक एव स्यात्। अथ भक्षयतौ शतब्राह्मणसंबन्धो विधीयते तथा पुरोडाशादिष्वपि प्रसङ्गात्। सोमशब्दानर्थक्यमस्त्येव। सोमे तु ब्राह्मणशतसंबन्धविधानमक्रियाशब्दत्वादेवाशक्यम्। पुनरपि फलचमसे स्तिभीरूपत्वेनासोमे राजन्यप्राप्तिर्नैव वार्यते। तेनैतद्वाक्यमनुपपन्नम्। तथा 'दशदशैकैकम्' इत्यस्याप्यनुपहतविधिशक्तेः स्वतन्त्रविधित्वावधारितस्यानुवादत्वं निष्फलमप्रमाणकं च। कथं हि पूर्वेण वर्तमानापदेशः सन्विधिः स्यादयं चानुवादः। न च निमित्तत्वादिभिर्विनाऽनेकाख्यातैकवाक्यत्वं घटते। न च यदिशब्दादिरहितस्य निमित्तत्वादिप्रतीतिरस्ति। न च 'दश दशैकैकम्' इत्यत्र काचित्स्तुतिः प्रतीयते। येन तदर्थोऽनुवाद एकवाक्यत्वं चोपपद्येत। तस्मात्पृथग्भूतस्य वाक्यस्य समस्तानुवादत्वमयुक्तमिति किंचिद्विधातव्यम्। तत्र यदि तावच्छतस्यानियमप्रसङ्गे दश दशेति विधीयते, ततश्च एकैकमित्यनुपपन्नं, विधाने वाक्यभेदप्रसक्तेः। वषट्कर्तृणां चानेकचमसप्राप्तौ सत्यामनुवादत्वासंभवाद्गृहेष्वपि पूर्वेण प्राप्तत्वाच्चमसशब्दोऽनर्थकः। विशिंषंश्च वाक्यं भिन्द्यात्। न च दश दशैकैकमित्यनुवादः संभवति। शतस्यापि चमससंस्कारार्थमुपादीयमानस्य प्रतिचमसं सामस्त्येन प्राप्तेः। कर्तृसंस्कारार्थे हि सति दक्षिणावद्विभागप्राप्त्या 'समं स्यात्' इति दश दशैकमिति प्राप्नुयात्।
1024 तत्र सत्यपि विधौ परिसंख्यास्यात्। अनेकस्मिन्नपि वा दश दश भक्षयितारः प्राप्नुवन्ति। एकस्मिन्नपि वा चमसे दशानां दशानां प्रसङ्गः, शतस्यैव दशदशकैर्गणैः स्थित्वा चमसे भक्षणं स्यात्। तस्माद्वाक्यद्वयमस्मिन् व्याख्यानेऽनुपपन्नमिति, एवं व्याख्येयम्। द्वे अप्येते वाक्ये विधायके, तत्सरूपत्वात्। तत्रापि 'दश दशैकैकम्' इत्येतदेव पूर्वपक्षवत्प्रथममाश्रीयते। यथोक्तेन न्यायेन क्रमान्तरस्यानुपपत्तेः। अनुप्रसर्पन्तीत्यनेन तावदतिदेशप्राप्तभक्षोपलक्षणसंबन्धाद्यथा फलचमसभक्षेण यागोपलक्षणमुक्तं, तेन यच्चमसमनुप्रसर्पन्तीति, अन्यतरस्य साकाङ्क्षत्वाद्विशेषणविशेष्यभावमङ्गीकृत्यानुवादो, दश दशेति विधिः। चमसप्राधान्याच्च प्रत्येकं दशत्वभेदाद्वीप्सा भवति। ततः पूर्वं शतमितरेण वाक्येनानूद्य यच्छतं सोमान् भक्षयन्ति तद्ब्राह्मणा इति विधिः। न हि विधिसंभवे समस्तवाक्यानुवादत्वं युक्तम्। ब्राह्मणशब्दस्य च गौणत्वम्। शतमात्रसंबन्धेन च कृतार्थत्वादतन्त्रमेव सोमशब्दो भक्षयतिश्चेति न विशिष्टानुवाददोषः। नापि सोमशब्दाद्यागसाधनमात्रलक्षणया फलचमसप्रतिपादनेऽपि दोषः। तेन संख्यापूरणार्थं यावदश्रुतराजन्यकल्पना प्रक्रम्यते

१४ विधा] विधान इति—एकैकमित्यस्यापि विधाने विधेयानेकत्वप्रयुक्तवाक्यभेदापत्तेरित्यर्थः।

१५ नुवाद] अनुवादत्वासंभवादिति—एकैकमित्यस्येति शेषः।

१५ पूर्वेण] पूर्वेण प्राप्तत्वादिति—'शतं ब्राह्मणाः सोमान् भक्षयन्ति' इत्यनेन पूर्वतनवाक्येनाविशेषाद्गृहेष्वपि भक्षणस्य प्राप्तत्वादित्यर्थः।

तावद्ब्राह्मणश्रुत्या संख्यान्तरं विधाय नैराकाङ्क्ष्यं क्रियते। न चैवं सति ग्रहेषु प्रसङ्गः। दश दशेत्यस्य चमसविषयत्वात्। राजन्यचमसेऽपि दशकप्राप्तौ सत्यां ब्राह्मणदशकेनैवावरोध इति द्रव्ये संस्कृते कृतार्थत्वाद्यजमानस्य नैव भक्षणेन भवितव्यम्। तस्माद्ब्राह्मणा दशेति सिद्धम्। § 6764

यत्तु भाष्यकारेण ब्राह्मणराजन्यानां सहभक्षणविप्रतिषेधस्य 'न सोमेनोच्छिष्टा भवन्ति' इत्युत्तरं दत्तं तत्र केचिच्चोदयन्ति। फलचमसे सोमत्वाभावात्कथमनुच्छिष्टत्वं संभवतीति। न त्वेष दोषः। स्थानापत्त्या सोमधर्मलाभात्। वक्ष्यति हि 'नैमित्तिकमतुल्यत्वादसमानविधानं स्यात्' *'धर्मस्यार्थकृतत्वात्' इति च। ननु पुरुषधर्मोऽयमनुच्छिष्टत्वं न युक्तं स्थानापत्त्याऽन्यत्र कल्पयितुम्। न कल्प्येत, यदि पुरुषधर्मोऽयं स्यात्, न त्वयं पुरुषधर्मः, फलकल्पनागौरवप्रसङ्गात्। सोमभक्षविषये चोच्छिष्टत्वप्रसङ्गेऽनुच्छिष्टत्वमभिहितम्। स च कर्मधर्म इति स्थितम्। अतो यथैव सोमः संस्क्रियमाणः कर्तुरुच्छिष्टतां नाऽऽपादयति, एवं तत्कार्यापन्नः फलचमसोऽपि। तस्मात्पूर्वयैवोपपत्त्या ब्राह्मणलाभसिद्धिरिति भावः॥ ५३॥ § 6765

इति राजन्यचमसे ब्राह्मणानां भक्षप्रतिपादनाधिकरणम्॥ २०॥

इति श्रीभट्टकुमारिलविरचिते मीमांसाभाष्यव्याख्याने तन्त्रवार्तिके
तृतीयाध्यायस्य पञ्चमः पादः।

## ०.०.१५९ पर्णतादेः प्रकृत्यर्थताधिकरणम्

इदानीमनारभ्याधीतानां प्रकृतिलिङ्गसंयुक्तानां प्रकरणसंबन्धे सति किं 1025
प्रकृतिप्रकरणसंबन्ध उत सर्वार्थत्वमिति विचारः। तत्र श्रुत्यादिषट्काभावेऽप्यश्वप्रतिग्रहेष्टिवत्क्रतुसंबन्धो योजयितव्यः। स्रुवाद्युद्देशेन हि, अत्र खादिरत्वादीनि विधीयन्ते। ते च स्रुवादयः 'स्रुवेणावद्यति' 'स्रुवेणाऽऽधारमाघारयति' 'स्रुवेण पार्वणौ जुहोति' जुह्वा जुहोति' इत्यादिभिर्वाक्यैः कर्माङ्गत्वेन प्रतिपादिताः। तत्संबन्धित्वेन चोपनीतमात्राण्येव खादिरत्वादीनि स्रुवसंस्पर्शिना क्रतुकथंभावेन गृह्यन्ते। न हि तेषामन्यत्फलमस्तीति चतुर्थे वक्ष्यामः। न च निर्व्यापाराज्जातिविशेषात्फलोत्पत्तिरवकल्पते। न च व्यापारसंबन्धजननार्था काचित्क्रिया प्रस्तुता दृश्यते। नापि वाक्योपात्ता। न चा-

४ णा] दशेति—राजन्यचमसे भक्षयितार इति शेषः।

५ स्य] उत्तरं दत्तमिति—पूर्वपक्षग्रन्थे केचिदाहुरित्यादिना कृतायाः शङ्काया इति शेषः।

८ हि] ( अ° ३ पा° ६ अ° १३ सू° ३६ )।

८ *] ( अ° ९ पा° २ अ° १२ सू° ४० )।

त्र स्रुवादिर्विधीयते, वाक्यभेदप्रसङ्गात्। अतः स्रुवाद्यनुवादेन विधीयमानानां
खादिरत्वादीनां स्रुवादिस्वरूपेऽन्यथाऽप्युपपद्यमानेऽनर्थकं विधानमिति त-
दुपप्लावितकर्मसंबन्धो विज्ञायते। तत्रानारभ्यवादत्वादेव स्रुवादिसंबन्धस्य प्र-
कृतिविकृतिष्वविशेषात्सर्वार्थत्वमिति पूर्वः पक्षः॥ १॥ § 6768

सर्वविधीनामप्राप्तस्वविषयत्वाद्यत्र प्रमाणान्तरेण प्राप्तिर्नास्ति तत्र खादिर-
त्वाद्युपदेशः। प्रकृतौ च न कुतश्चित्प्राप्तिः। विकृतिष्वङ्गान्तरार्थमवश्यकल्प-
1026 नीयेनातिदेशेन खादिरत्वाद्यपि प्राप्नोतीति नोपदेशमपेक्षते। तेन द्विरुक्त-
स्यासंभव इत्याह। तव द्विरुक्तत्वादद्विरुक्तत्वाद्वा ममेति सूत्रम्॥ २॥ § 6769

प्राप्तेरिति वा पाठः। सत्यं द्विरुक्तत्वमन्याय्यं, तत्र कुत एतदतिदेशप्राप्त-
त्वादुपदेशो विहन्यते, न पुनरुपदेशसिद्धमतिदेश एव प्रापयेदिति। युक्तं च
पदार्थविप्रकर्षादतिदेशो न स्यात्। संनिकर्षात्तु पूर्वतरप्रवृत्तोपदेशाश्रयणम्।
अथोच्येत, सामान्यविषयत्वादुपदेशो दुर्बल इति। तदतिदेशेऽपि सर्वाङ्गविष-
यत्वादविशिष्टम्। तस्मात्स र्वार्थोऽनारभ्यवाद इति॥ ३॥ § 6770

स्थितायां प्रतिज्ञायां चोदयति। यद्यतिदेशादुपदेशो बलवानेवं स-
ति तेनैवोपदेशेनावरुद्धत्वादतिदेशो नैव स्यात्। कुतः। शक्नोति हि प्र-
कृतिविकृतिसाधारणं खादिरत्वं प्राकृतोपकारसाधने दृष्टशक्तित्वाद्विकृतिं
निराकाङ्क्षीकर्तुम्। ततश्च प्रयाजादिदर्शनं विरुध्यते। तस्मादतिदेश-
विनिर्मुक्तायां प्रकृतावेव निवेशो युक्त इति॥ ४॥ § 6771

नैतावता शक्यं सर्वार्थत्वं व्यावर्तयितुम्। न ह्येकस्मिन्नंशेऽतिदेशो बाधितः
सर्वत्रैव बाधितो भवति। तद्यथा शरैः कुशेषु निवर्तितेष्वपि न प्रयाजादयो
1027 निवर्त्यन्ते। समानविषयमात्रे हि बाधो विज्ञायते। तेन खादिरत्वादिप्राप्त्यंश-
मात्रादतिदेशो निवर्तते। न च खादिरत्वमक्रियात्मकत्वाच्छक्नोति विकृतिं
निराकाङ्क्षीकर्तुम्। युगपच्च प्रकृतिविकृत्योः प्रवर्तमानमशक्यं क्लृप्तोपकारत्वेन
निरूपयितुम्। साकाङ्क्षं तु तत्, स्रुवप्राप्त्यभावात्। न चातिदेशाभ्यनुज्ञाम-
न्तरेण स्रुवप्राप्तिः संभवति। न चैतद्वाक्यं स्रुवस्यापि विधायकम्। प्रधान
क्रियानुपादाने सति विशिष्टविधानेऽनुपपद्यमाने वाक्यभेदप्रसङ्गात्। तस्माद-
नारभ्यवादविधिप्रापिते स्रुवस्य खादिरत्वे तद्वर्जमतिदेशः कल्पयितव्यः॥ ५॥
§ 6772

अत्र तार्किकः कश्चिदाह प्रकृत्यर्थोऽनारभ्यविधिः संक्षेपविस्ताराभ्यां
विधीयमानत्वात्प्रयाजादिवदिति॥ ६॥ § 6773

न तावदीदृशेऽर्थेऽनुमानस्य गतिरित्युक्तम्। अपि चानुमानमप्येतन्न भ-
1028 वति। अनैकान्तिकत्वात्। विकृतावपि संक्षेपविस्ताराभ्यां विधिरुपलभ्यते।
तत्रैतत्स्यात्। एकेन विहितत्वात्संक्षेपविस्तारयोरन्यतरो नैव विधायक इति।

२ रूपेऽन्य] अन्यथा—काष्टान्तरेणेत्यर्थः।
१ दीदृ] ईदृशेऽर्थे—शब्दैकसमधिगम्येऽर्थ
इत्यर्थः।
१ तिरित्युक्त] उक्तमिति—तर्कपादे
प्रत्यक्षसूत्रे श्लोकवार्तिके।
‘तस्माददृष्टपूर्वत्वात्केनचिद्वस्तुना सह।
धर्मस्य नानुमेयत्वमसाधारणवस्तुवत्॥ ९९॥
इत्यादिनोक्तमित्यर्थः।

तदपि प्रकृतौ तुल्यमिति हेतोरसिद्धता। तेनावश्यं विध्यनुवादनिरपेक्षं संक्षेपविस्ताराभिधानमात्रं हेतुर्वक्तव्यः। स चानैकान्तिक इत्युक्तम्। एवं वा। स्वगोत्रेण सूत्रद्वयं गमयितव्यम्। इति चेत्—तत्सर्वार्थत्वं पश्यसि, तदयुक्तम्। यत्र हि पात्राणां विनियोगोत्पत्तिस्तत्र तदङ्गं जातिर्विधातुं शक्यते। न च विकृतावुत्पत्तिः। अतः पात्रशून्यायां तस्यामशक्या जातिर्विधातुम्। प्राप्तिवैषम्यात्। यदि हि प्रकृतिविकृत्योस्तुल्यवत्पात्राणि प्राप्नुयुस्ततः सर्वावस्थोद्देशेन जातिविधानमवकल्पेत। न त्वेवम्। तस्मात्प्रकृत्यर्थतैक युक्तेति। तत्रोत्तरं 'न तुल्यत्वात्' इति। सर्वथाऽनारम्यवादः प्राप्तिमपेक्षते। तत्र या चोपदेशेन प्राप्तिर्या चातिदेशेन प्राप्तिः सा सर्वाऽपि प्राप्तित्वेन तुल्या। यद्यप्युपदेशातिदेशयोः संनिकर्षविप्रकर्षौ विद्येते तथाऽपि तौ स्वविषय एव बलाबलं कुरुतो नानारम्यवादेन सह। अनारभ्यवादो हि पात्रद्वारेण क्रतुगामित्वाद्विप्रकृष्टतरः। तस्मात्सर्वार्थः। तद्वर्जं चातिदेशः॥ ७॥ § 6774

'प्रकृतौ वा द्विरुक्तत्वात्' इत्येतदेव न्याय्यम्। यत्तु तद्वर्जं यापयिष्यतीति। तदयुक्तम्। कुतः। § 6775

> वर्तेत यदि भेदेन प्रकृत्यङ्गेषु चोदकः।
> तत एवं भवेदेषु युगपत्तु प्रवर्तते॥ § 6777

पदार्थातिदेशपक्षे शास्त्रातिदेशपक्षे वा तद्भेदात्कदाचिद्भेदो भवेत्। यागगतस्तु व्यापारोऽतिदिश्यत इति दशमे वक्ष्यामः। स च निरवयवत्वाद्युगपदतिदिश्यते। अनेन चाऽऽत्मसिद्ध्यर्थं युगपदेव प्रयाजाद्यपूर्वाणि गृह्यन्ते। तैश्च प्रथाजादयः। प्रयाजादिभिरपि स्वशास्त्राणि। तेन प्रकृतिवदित्येवंरूपस्यातिदेशस्यैकत्वात्सर्वाङ्गेष्वविशिष्टस्य सर्वत्र प्रवृत्तिरप्रवृत्तिर्वा, नैकदेशेषु। श- 1029
रैरपि कृशाः प्राप्ता एव बाध्यन्त इत्युक्तं बलाबलाधिकरणे। तद्यदि तावदनारभ्यवादानुरोधेन स्वादिरत्वादिविषयेऽतिदेशः परित्यज्यते तत एवाङ्गान्तरेष्वपीति सर्वनिवृत्तिप्रसङ्गः। तत्र चोक्तम्। अथ केषांचित्प्राकृतानामनुरोधेन तद्विषयोऽतिदेशः प्रमाणं क्रियते, ततः स्वादिरत्वादिप्राप्तिरप्यविशिष्टेति स्फुटं द्विरुक्तत्वं प्राप्नोति। यागगतव्यापारापेक्षित्वाच्च स्वप्रकरणाम्नानमप्यतिक्रम्य विकृतयः प्राकृतं तावदगृह्णन्तीति सर्वत्र स्थापयिष्यामः। तेनाप्यनारभ्यवादादतिदेशप्राप्तेः प्राथम्यम्। अवश्यं च प्रकृतिषु स्रुवादिप्राप्तिरपेक्षितव्या। यावता च यत्र न स्रुवादयः प्राप्नुवन्ति तावता खादिरत्वादयोऽपीति नोपदेशविषयत्वं घटते। न चैषां क्रतुसंबन्धो विस्पष्टः। सोऽप्यन्यथाऽनुपपत्त्या स्रुवादिद्वारेण कल्पयितव्यः। सर्वार्थत्ववादी च प्रकृतिसंबन्धं तावदभ्युपगच्छति। तेन च परिहृत आनर्थक्ये विकृतिसंबन्धो निष्प्रमाणकः। प्रमाणवत्तरो ह्यतिदेशेन क्रतुसंबन्धः। येषां तु क्रतुसंबन्ध एव प्रत्यक्षस्तेऽनारभ्यवादा अपि

१२ चोक्त] उक्तमिति—'न चोदनैकार्थ्यात्' इति सूत्रे 'न च खादिरत्मवक्रियात्मकत्वाच्छक्नोति विकृतिं निराकाङ्क्षीकर्तुम्' इत्यादिनेत्यर्थः।

सर्वार्था एव। यथा ‘एष वै सप्तदशः प्रजापतिर्यज्ञमन्वायत्तः’ इत्येवमादयः। तस्मात्त्वादिरत्वादि प्रकृत्यर्थमिति सिद्धम्॥ ८॥ § 6778

इति पर्णतादेः प्रकृत्यर्थताधिकरणम्॥ १॥

## ०.०.१६० अनारभ्याधीतसाप्तदश्यस्य प्रकृतावनिवेशाधिकरणम्

अपवादाधिकरणमेतत्। तत्र पूर्वाधिकरणेनैव सामिधेनीसाप्तदश्यानार-
1030 भ्यवादस्य प्रकृत्यर्थत्वे, प्रकरणाधीतेन पाञ्चदश्येन सह विकल्प इति विशेषाशङ्कां निवर्तयति। कथं पुनः प्राकरणिकेन विशेषविधिना सहातुल्यबलस्य विकल्पोऽभिधीयते। आह। § 6780

तत्र नाम विशेषेण सामान्यस्य निराक्रिया।
प्रत्यक्षो यत्र संबन्धो विशेषेण प्रतीयते॥ § 6782

तुल्यप्रमाणको हि विशेषो बाधको भवति न दुर्बलप्रमाणकः। न च क्रतुप्रयोगादन्यत्र सामिधेन्यो विद्यन्ते। तस्मात्क्रतुप्रयोगप्राप्तिस्तुल्या। ततश्च किं प्रकरणमधिकं करिष्यति। द्वयोस्तुल्यबलयोः प्रमाणयोर्विरोधे सति बलवत्तरेण निर्णयः कर्तव्यः। न च प्रकरणं वाक्याद्बलवत्तरम्। अतो यावत्प्रकरणव्यापारो नैव भवति तावद्वाक्यद्वयेन तुल्यबलेन विकल्पोऽवधार्यते। तेन न्यूनबलं यद्यपि प्रकरणसहस्रमपि च सहायी भवति तथाऽपि न तदनुरोधः कर्तव्यः। तस्मात्प्रकृत्यर्थं साप्तदश्यमिति प्राप्ते ब्रूमः। § 6783

तुल्यो यद्यपि संबन्धः साभिधेनीः प्रतीष्यते।
तथाऽपि क्रतुसंबन्धवैषम्यान्न विकल्पते॥ § 6785

साभिधेनीस्वरूपप्रयुक्तत्वेऽनर्थिका संख्येत्यवश्यं यागात्पूर्वसाधनत्वकारितः संबन्धोऽभ्युपगन्तव्यः। न च यागापूर्वसाधनत्वं प्रकरणादृते लक्षयितुं शक्यते इति नवमे वक्ष्यामः। तेन प्रकरणानुग्रहविशेषात्पाञ्चदश्यंमपूर्वसंबन्धप्रमाणप्रत्यासत्तेर्बलीयः। विधिरपि हि पूर्वं प्रयोजनवति पुरुषं नियुङ्क्ते। साप्तदश्याच्च पाञ्चदश्यं शीघ्रतरं प्रयोजनवदवधार्यत इति विधिकालवैषम्यादतुल्यबलत्वम्। अपि च, क्रतुमविगुणं कर्तुं पुरुषः प्रवर्तते न सामिधेनीः। क्रत्वङ्गत्वे च साप्तदश्यस्य न किंचिच्छ्रुत्यादि प्रमाणमुपलभामहे, यथा पाञ्चदश्यस्य प्रकरणम्। तस्मादेतत्पाञ्चदश्यं सामिधेनीनां दर्शपूर्णमासयोश्च वाक्य-

१८ व] नवम
इति—नवमाध्यायाद्याधिकरण

ऊहोपोद्घातविचारावसर इति शेषः।

प्रकरणाभ्यामवधार्यते। साप्तदश्यं तु केवलं सामिधेन्यर्थमेव। तस्येदानीमान- 1031
र्थक्यपरिहाराय स्वादिरत्वादिवत्क्रतुसंबन्धः कल्प्यते, यदि त्वसौ प्रतीच्छेत्। न त्वसौ संख्यान्तरावरुद्धः सन्प्रतीच्छति। तत्र सामिधेनीनामुभयथाऽप्यवैगुण्यं भवति। ऋतोः पुनः पाञ्चदश्येन। ततश्च कांस्यभोजिवदमुख्येऽप्यविरोधः स्यात्किमङ्ग पुनर्यत्राङ्गगुणविरोध एव स्पष्टः। तस्मात्क्रत्ववष्टम्भदर्पितेन पाञ्चदश्येनोत्कालितं साप्तदश्यम्। क्लिष्टेन यावदतिदेशेन पाञ्चदश्यं (नैव) विकृतीः प्राप्नोति तावदौपदेशिकेन साप्तदश्येन प्रथमतरावरुद्धत्वात्ताभ्यो निराकृतं केवलप्रकृतिविषयत्वेनैवावधार्यत इति व्यवस्थायामुक्तायामुच्यते—
§ 6786

न साप्तदश्यं बलवद्विकृतिष्वौपदेशिकम्।
अनारभ्यविधेस्तद्धि सामिधेन्यङ्गतां गतम्॥§ 6788

विकृतीनां तु नास्त्येवं प्रमाणं तत्परिग्रहे।
अतिदेशेन हि प्राप्तिः पाञ्चदश्यस्य तास्वपि॥§ 6790

यथा प्रकरणप्राप्तं प्रकृतौ बलवत्तरम्।
तथाऽतिदेशविज्ञातं ऋत्वङ्गं विकृतिष्वपि॥§ 6792

न च सामिधेनीष्वनतिदिष्टासु तद्द्वारेण साप्तदश्यं विकृतीरनुप्रवेष्टुं शक्नोति। यदा तु सामिधेन्योऽतिदेशेन प्राप्स्यन्ते तदा पाञ्चदश्यमपि क्लृप्तोपकारसंबन्धं ताभिरेव सह पूर्वतरमाक्रम्य प्रकृताविव साप्तदश्यबाधकं भविष्यति। तस्माद्यास्वेव पशुमित्रविन्दात्वरकल्पादौ साप्तदश्यं प्रकरणविहितं तास्वेव तदतिदेशप्राप्तपाञ्चदश्यबाधेन निविशते। § 6793

नानारभ्यविधिप्राप्त्या सर्वास्वेव भविष्यति।
पश्वादिव्यतिरिक्तासु पाञ्चदश्येन बाधनात्॥§ 6795

स्वाङ्गेन पाञ्चदश्येन व्याप्तास्ता ह्यतिदेशतः।
विहितं सामिधेन्यङ्गं साप्तदश्यं न गृह्णते॥§ 6797

एवं च दशमेऽप्येतद्विविक्तं स्थापयिष्यते।
तेन नैतद्गृहीतव्यं सर्वत्र बलवत्तरम्॥§ 6799

सूत्रकारोऽपि विकृतौ विरोधीति यदब्रवीत्।

५ स्प] स्पष्ट इति—तदा ‘ अङ्गुणाविरोधे च तादर्थ्यात् ’ (अ° १२ पा° २ अ° ११ सू° २७) इत्यनेनैव निर्णयो भविष्यतीति यावत्।

२५ द] (अ° १० पा° ८ अ° ९) इत्यत्रेति शेषः।

प्रकृतौ नैतदस्तीति तदेतावद्विवक्षया॥§ 6801

सामिधेनीः प्रति प्राप्तिस्तुल्या वाक्येन यद्यपि।
विशेषः पाञ्चदश्यस्य क्रतौ प्रकरणेन तु॥§ 6803

1032 अतो यद्यपि दौर्बल्यं वाक्यात्प्रकरणस्य नः।
तथाऽपि विषयान्यत्वात्क्रतौ तद्विनियोजकम्॥§ 6805

समानविषयत्वे हि वाक्यात्तद्दुर्बलं मतम्।
क्रतौ त्वप्रतिपक्षत्वान्न तद्वाक्येन बाध्यते॥§ 6807

विशेषश्चायमेवास्य यदसाधारणं क्रतोः।
सामिधेनीषु तुल्यत्वे शेषत्वे वाक्यकल्पिते॥§ 6809

क्रतुं प्रत्यसमानत्वात्साप्तदश्यस्य बाधकम्।
न श्रुत्याद्युपदेशेन नातिदेशेन तस्य तु॥§ 6811

एवं च प्रकृतावेतत्पाञ्चदश्यं प्रतिष्ठितम्।
विकृतौ च न यत्रास्ति साप्तदश्यपुनः श्रुतिः॥ ९॥§ 6813

इति अनारभ्याधीतसाप्तदश्यस्य प्रकृतावनिवेशाधिकरणम्॥ २॥

## ०.०.१६१ नैमित्तिकसाप्तदश्यादेः प्रकृत्यर्थताधिकरणम्

यद्वैश्यादिनिमित्तेन साप्तदश्यं विधीयते।
तत्तु स्यात्प्रकृतावेव पाञ्चदश्यस्य बाधकम्॥§ 6816

तस्य प्रकरणं तुल्यं प्रकृतौ विनियोजकम्।
निमित्तेन तु संबन्धान्नित्यात्तद्बलवत्तरम॥§ 6818

पाञ्चदश्यमबाधित्वा ह्यात्मानं न लभेत तत्।
रुद्धेषु तेन सर्वेषु प्रयोगेषु श्रुतं हि तत्॥§ 6820

साप्तदश्यविधानं तु प्रयोगे वैश्यकर्तृके।

५ त्] तदिति—नैमित्तिकं साप्तदश्यनित्यर्थः।

अबाधेनापि तस्याऽऽत्मा पाश्चदश्येन लभ्यते॥§ 6822

प्रयोगाः सन्ति तस्यान्ये विप्रराजन्यकर्तृकाः।
साप्तदश्यमबाधित्वा येष्वात्मा तेन लभ्यते॥§ 6824

अतश्च शक्तिवैषम्ये विकल्पो न मतस्तयोः।
समुच्चयोऽपि नैकार्थ्यात्साभिधेनीषु युज्यते॥§ 6826

नैकत्रैकेन संख्याताः संख्यायन्ते परेण ताः। 1033
नित्यस्य बाधशक्तिर्हि नार्थापत्त्याऽवकल्पते॥§ 6828

पौर्वापर्ये यथा पूर्वनिविष्टस्यैव बाधनम्।
काम्यनैमित्तिकाभ्यां हि तथा नित्यस्य बाधनम्॥§ 6830

असंजातविरोधं हि नित्यं सर्वं विधीयते।
नैमित्तिकं तु तद्व्याप्तविषयत्वाद्विरुध्यते।§ 6832

तेनैकविषयत्वेन विरोधस्यैकबाधनम्।
विरोधायौगपद्यात्तु न विकल्पप्रसञ्जनम्॥§ 6834

किं च प्रयोगसामान्ये नित्यं सर्वं विधीयते।
नैमित्तिकं विशेषे तु तस्मात्तद्बलवत्तरम्॥§ 6836

नित्यमङ्गं च दूरस्थप्रधानापूर्वचोदितम्।
क्रियते तत्प्रमाणं च परं प्रकरणं मतम्॥§ 6838

काम्यनैमित्तिकानां तु वाक्योपात्तं प्रयोजनम्।
अतः शीघ्रं प्रयुक्तत्वान्नित्यात्ते बलवत्तराः॥§ 6840

आसन्नपुरुषार्थत्वाद्विप्रकृष्टफलात्तथा।
बलवच्छीघ्रकारित्वात्काम्यं नैमित्तिकादपि॥§ 6842

श्रुत्यैव पुरुषार्थे हि शीघ्रं कर्ता प्रवर्तते।
नैमित्तिके हि दूरस्थे चिरेणासौ प्रवर्तते॥§ 6844

नैमित्तिके श्रुते यच्च काम्यमेव विचारितम्।

२४ श्रु] श्रुत इति—'नैमित्तिकं तु प्रकृतौ' इत्यधिकरणसूत्र इति शेषः।

२४ म्] विचारितमिति— भाष्यकारैरिति शेषः।

तन्नित्यं प्रति तुल्यत्वादविरोधात्परस्परम्॥§ 6846

पूर्वाधिकरणेनैव पूर्वपक्षोऽत्र सूत्रितः।
नित्यस्यास्ति विशेषो हि काम्यात्प्रकरणे यतः॥§ 6848

चमसः खादिरत्वं न क्रत्वर्थं हि विधीयते।
बैल्वगोदोहनादीनां काम्यत्वात्पुरुषार्थता॥§ 6850

बाध्येत फललोभेन नित्यं काम्येन तत्र चेत्।
पश्यतो मधु दुर्बुद्धेर्विनिपातस्ततो भवेत्॥§ 6852

1034 क्रत्वर्थाङ्गप्रहाणे हि नश्येत्तस्य क्रतोः फलम्।
गुणाच्च न फलं सिध्येद्विगुणं क्रतुमाश्रितात्॥§ 6854

आश्रयस्तादृशो हीष्टो यादृशः प्रकृतः क्रतुः।
खादिरत्वादिभिर्नित्यैर्व्याप्तश्चासौ प्रतीयते॥§ 6856

ततश्चानवरुद्धत्वात्काम्यस्य विकृतिर्गतिः।
अस्ति स्वार्थे विशेषो हि क्रतोः प्रकरणं प्रति॥§ 6858

तेन गृह्णाति हि स्वार्थं न तु काम्यं कथंचन।
इतिकर्तव्यतार्थित्वात्संयुक्तं हि न गृह्यते॥§ 6860

तेन प्रकरणप्राप्तं संयुक्ताद्बलवत्तरम्॥
न हि प्रकरणं तस्य विनियोगक्षमं मतम्॥§ 6862

क्रत्वर्थश्चाऽऽश्रयोऽप्यस्य स्वार्थरुद्धो न लभ्यते।
पूर्वाधिकरणन्यायस्तस्मान्नैमित्तिकेष्वपि॥§ 6864

इति प्राप्त उच्यते— § 6865

नैमित्तिकं तु प्रकृतौ वर्तते नित्यबाधया।
हेतवोऽत्र त्रयः पूर्वा व्याख्याता एव संमताः॥§ 6867

असंयोगादबाधेन संयोगोऽस्य विशिष्यते।
पुनः कर्तृविशिष्टस्य प्रयोगस्य परिग्रहात्॥§ 6869

साक्षाच्च पुरुषार्थत्वादनन्याश्रयगामिनः।
एवं सिद्धे बलीयस्त्वे निवेशः प्रकृतौ स्थितः॥§ 6871

नन्वतुल्यार्थयोर्बाधः क्रत्वर्थपुरुषार्थयोः।
न युक्तो न विरोधोऽस्ति भिन्नगोचरयोस्तयोः॥§ 6873

अतश्च पुरुषार्थत्वात्पृथक् प्रणयनक्रिया।
प्राप्नोति चमसेनैव क्रत्वपूर्वस्य साधनात्॥§ 6875

न साधयति पश्वादीन् क्रत्वर्थश्चमसो यथा।
गोदोहनं तथाऽन्यार्थं न क्रत्वर्थस्य साधनम्॥§ 6877

न चोभयार्थता तस्य वाक्यभेदप्रसञ्जनात्। 1035
विधिर्नास्त्येकवाक्यत्वे फलप्रणयने प्रति॥§ 6879

अन्या हि वचनव्यक्तिः फलोद्देशेन तद्विधौ।
अन्या प्रणयनोद्देशे तस्मान्न द्वयसंभवः॥§ 6881

आसन्नासंभवे चेष्टा विप्रकृष्टेन संगतिः।
युगपत्तेन न स्यातां संभवासंभवावुभौ॥§ 6883

अतः कमिपदाक्षेपान्नास्य प्रणयने विधिः।
अविधानादशेषत्वान्न शेषान्तरबाधनम्॥§ 6885

अबाधाच्चमसोऽवश्यं कर्तव्यश्च क्रतुं प्रति।
न चान्यस्यावकाशोऽस्ति क्रत्वर्थेऽन्येन साधिते॥§ 6887

तेन प्रणयनाभ्यासः कार्यः काम्यगुणं प्रति।
यथेन्द्रवायुदेवत्ये ग्रहे मित्राद्यसंभवात्।§ 6889

भिन्नं मित्रादिदेवत्यं ग्रहाभ्यासान्तरं विधेः।
एवं प्रणयनाभ्यासः पुरुषार्थवशाद्भवेत्॥§ 6891

द्वयोरेवमवैगुण्यं क्रतोश्च स्यात्फलस्य च।
न हि स्वसाधनत्यागादन्यसाधनसाधितैः॥§ 6893

कर्मभिः साध्यते स्वार्थश्चोदनाभिरलक्षितः।

---

१३ क] कमिपदेत—'गोदोहनेन पशुकामस्य' इत्येवं कमिपदसमभिव्याहारात्फलपदवैयर्थ्यपरिहारार्थं पशूद्देशेनैव गोदोहनविधेयत्वावगतेर्नास्य पुनः प्रणयनोद्देशेन विधिः संभवतीत्याशयः।

उच्यते, यो गुणः काम्यः क्रत्वर्थेन न गृह्यते॥§ 6895

क्रत्वर्थं कर्म गृह्णाति स एव स्वार्थसिद्धये॥
निर्व्यापारो गुणः कामं न साधयति कश्चन॥§ 6897

करणत्वं न तस्यास्ति निष्क्रियस्य फलं प्रति।
तेनावश्यं क्रिया काचित् ग्राह्या या सप्रमाणिका॥§ 6899

सा च प्रकरणेनास्मै दत्ता प्रणयनात्मिका।
तस्यां च चमसः पूर्वप्राप्तोऽन्यो विद्यते गुणः॥§ 6901

तदबाधादशक्यश्च विधिर्गोदोहनादिनः।
गोदोहनाद्यबाधित्वा यथाऽसौ विहितस्तथा॥§ 6903

1036 तदबाधेन नैवेह तस्य कश्चिद्विधिः श्रुतः।
काम्येन गृह्यमाणा च क्रिया प्रणयनात्मिका॥§ 6905

विप्रकृष्टफलं शक्ता स्वगुणं नोपजीवितुम्।
क्रियया वा गृहीतस्य गुणस्याकरणे गुणः॥§ 6907

करणे तस्य दोषः स्यान्निषिद्धस्येव संगतौ।§ 6908

भिन्नप्रयोजनोऽपि हि काम्यो गुणोऽवान्तरकार्यैकत्वाद्विरोधिगुणान्तरज्ञान-मिथ्यात्वावधारणसमर्थः। तथा हि— § 6909

प्रासङ्गिकीं क्रतोः सिद्धिं काम्यो हि कुरुते गुणः।
गृह्णन्ति न च सिद्धार्थाः क्रतवः स्वगुणं तदा॥§ 6911

सर्वस्यैव हि कार्यार्थः स्वगुणग्रहणादरः।
अन्यार्थगुणसिद्धे तु कार्येऽस्य स्वगुणेन किम्॥§ 6913

हविःसंयवनार्थानामपां प्रणयनं हि यत्।
तद्गृहीत्वा गुणः काम्यः प्रयुङ्क्ते न क्रियान्तरम्॥§ 6915

ततश्चास्य प्रयोगस्य नैवाङ्गं चमसो मतः।
तदग्रहे कुतोऽर्थेन वैगुण्येन क्रियेत सः॥§ 6917

तेन प्रणयनाभ्यासः क्रत्वर्थोऽपि न विद्यते।
निष्फलत्वादतो बाधः प्रयोगात्कर्मणः सकृत्॥§ 6919

तथा प्रणयनमपि निर्वर्त्यमानमेव गोदोहनस्याऽऽश्रयत्वं प्रतिपद्यते नान्यथेति पशुकामप्रयोगेऽन्यार्थेन सता गोदोहनेन निर्वर्तितत्वान्न चमसमुपसंगृह्णाति। कार्यार्थं हि सर्वत्र साधनग्रहणं न स्वरूपमात्रसंभावनार्थम्। तत्र यथैव प्रसङ्गलक्षणेऽन्यार्थैरेवाङ्गैरुपक्रियमाणाः पशुपुरोडाशादयो न स्वाङ्गान्युपसंगृह्णन्ति। न तद्धान्या किंचिद्वैगुण्यं भवति। तथाऽत्र चमसहान्या नेति द्रष्टव्यम्। उत्पत्तिप्राप्तमपि विध्यनुपसंगृहीतं नैवाङ्गं भवति। न चानङ्गमगृह्णतो दोषः। सुतरां वा न तद्ग्रहणे वैगुण्यप्रसङ्गः। न च सिद्धस्य प्रधानस्य प्रणयनस्य गुणानुरोधेनाऽऽवृत्तिः। न चैकान्तेन चमसः प्रणयनस्याङ्गम्। न 1037
चात्र चमसेन कृते गोदोहनेन पुनः करणमाशङ्क्यते। किं तर्हि। गोदोहनेन कृते चमससंपादनार्था पृथक्करणशङ्का। कथं पुनर्गोदोहनप्राप्तिर्बलीयसी न चमसप्राप्तिरिति। तदुच्यते— § 6920

विशेषविहितं ह्येतत्प्राप्ते चानवकाशकम्।
पुरुषार्थसमीपे च चमसं तेन बाधते॥§ 6922

प्रयोगमात्रे हि चमसो, गोदोहनं विशेषे। पूर्वप्राप्तश्चासौ तदबाधेन लब्धात्मा। नैवं गोदोहनम्। सावकाशश्चासौ नेतरत्, दूरे चासौ पुरुषार्थस्य। गोदोहनं तु संनिकृष्टार्थं, पुरुषार्था च सर्वशास्त्रप्रवृत्तिः। यश्च तादर्थ्यातादर्थ्यकृतो विशेषो नासौ तन्त्रमिति वक्ष्यति, 'अर्थस्याविकृतत्वात्' इति। मन्दो ह्येष विशेषः, क्रत्वर्थेनैव क्रत्वर्थो विशेषादिविहितेन बाधितव्यो नान्यार्थेनेति। तेनोभयोः संनिधिवशात्परस्परशक्तिविलोपान्नियमः। प्रणयनस्याप्यन्यत्र प्रयोगे सिद्धात्मकस्य स्वसाधनोपसंहारशक्तिलोपः। गोदोहनस्यापि प्रणयनान्तरकल्पनाशक्तिविधातः। पशुकामप्रयोगव्यंतिरिक्तेष्वेव चमसस्य शास्त्रीयत्वम्। तस्मात्तद्विकारो गोदोहनम्। यथा तु विकृतौ चमस एव भविष्यति तथाऽष्टमे वक्ष्यति 'निवृत्तिर्वा कर्मभेदात्' इति। तेन प्रकृतावेवैतद्विकारकमिति॥ १०॥ § 6923

इति नैमित्तिकसाप्तदश्यादेः प्रकृत्यर्थताधिकरणम्॥ ३॥

## ०.०.१६२ आधानस्य पवमानेष्ट्यनङ्गताधिकरणम्

४ स] प्रसङ्गेति—अन्यत उपकारलाभप्रयुक्ताङ्गाननुष्ठानं प्रसङ्गः। पशुयागार्थमनुष्ठीयमानैः प्रयानादिभिरङ्गैस्तन्मध्यपातिपशुपुरोडाशादेरुपकारलाभान्न पुनस्तदर्थमनुष्ठानमिति यावत्।
४ शुपुरोडाशाद] आदिपदेन 'अग्नीषोमीयस्य पुरोडाशमनु देवसुवां हवींषि निर्वपति' इति श्रुतिचोदितानां पशुतन्त्रमध्यपातिनामनुनिर्वाप्याणां संग्रहः।
१७ स्या] (अ॰ १२ पा॰ १ अ॰ १ सू॰ ४)
२३ निवृ] (अ॰ ८ पा॰ १ अ॰ १४ सू॰ २४)

अनारभ्यवादप्रस्तावेनाग्न्याधेयस्य प्रथमं तावदनारभ्यवादत्वमेव प्रतिपाद्यते। प्रकरणेन तावत्पवमानेष्ट्यर्थत्वं प्राप्नोति। श्रुत्या तु शुद्धाग्न्यर्थत्वम्। अतः 'प्रकरणविशेषाद्वा तद्युक्तस्य संस्कारो द्रव्यवत्' इतीष्ट्यर्थाग्निसंस्कारत्वाच्छ्रुतिवाक्यप्रकरणैरविरुद्धैरिष्ट्यर्थाग्न्यर्थत्वमवधार्यते। शुद्धाग्न्यर्थत्वे च निष्प्रयोजनत्वात्तद्द्वारेणैवाग्न्याधानग्रहणसामर्थ्यम्। तस्मादिष्ट्यर्थं सामान्याभिधानम्। अपि च प्रकरणादेव पवमानेष्टिविषयं द्रष्टव्यम्॥ ११॥ § 6925

1038 यद्यारादुपकारकमाधानं भवेत्ततः प्रकरणादिष्ट्यर्थमिति गम्येत। वाक्यसंयोगात्तु द्वितीयानिर्दिष्टाग्निसंस्कारार्थमेतत्। एवं च सति यद्यग्नयः पवमानेष्ट्यर्था भवेयुस्ततस्तद्द्वारेणाऽऽधानमपि तदर्थं भवेत्। तास्तु निष्फलत्वादग्न्यर्था इत्युक्तम्। अतश्च 'गुणानां च परार्थत्वात्' इत्यनेनैव परस्परानङ्गत्वम्। न हि द्वितीयाश्रुतिः प्रकरणेन बाध्यते॥ १२॥ § 6926

'तेनैनं पुनर्नवं करोति' इति चाग्निसंस्कारार्थतां दर्शयति॥ १३॥ § 6927

इति आधानस्य पवमानेष्ट्यनङ्गताधिकरणम्॥ ४॥

## ०.०.१६३ आधानस्य प्रकृतिविकृत्यर्थताधिकरणम्

सिद्धेऽनारभ्यवादत्वे स्वादिरत्वादिवदेव प्रकृत्यर्थत्वमग्निद्वारेण प्रकृत्यनुप्रवेशात्॥ १४॥ § 6929

सूत्रात्तावदियं बुद्धिर्भवति, यदि प्रकृतिकाल आधानं क्रियेत ततः प्रकृत्यर्थं भवेत्। स्वकाले तु वसन्तादौ क्रियमाणमगृह्यमाणविशेषत्वात्स-
1039 र्वार्थं विज्ञायते। तथा चानुष्ठानसाधारण्यमस्यैकादशे वक्ष्यति 'द्रव्यस्याकर्मकालनिष्पत्तेः प्रयोगःसर्वार्थः स्यात्' इति। प्रकृत्यर्थत्वे च दर्शपूर्णमासज्योतिष्टोमार्थमेतद्भवेत्। तत्र च प्रधानवशवर्तित्वाद्वसन्ते पौर्णमास्यमावास्ययोश्च क्रियेत। तथा च सति वसन्ते पौर्णमास्याममावास्यायामादधीतेत्येतानि वचनान्यनर्थकानि भवेयुः। तस्मात्सर्वार्थत्वमिति। न त्वेतद्युक्तम्। न ह्याधानस्य प्रकृत्या विकृत्या वा संबन्धे किंचित्प्रमाणमस्ति। प्रकरणे सति यत्पवमानेष्टयर्थं न जातं तद्विनैव श्रुत्यादिषट्केनान्यकर्मार्थं भविष्यतीति कुत एतत्। नन्वेवं सति पूर्वाधिकरणेनैव गतमेतत्। सत्यं गच्छेत्, यदि पवमानेष्टिवद्दर्शपूर्णमासादीन्यापि निष्फलानि भवेयुः। तेषां तु फलवत्त्वात् 'गुणानां च परार्थत्वात्' इत्येष न्यायो नास्तीति शक्यमग्निद्वारेण कर्माङ्गत्वं कल्पयितुम्। निष्फलस्याऽऽधानस्यावश्यकल्पनीये प्रयोजनेऽग्निद्वारेण स्वादिरत्वादिवत्क-

३ र] (अ॰ ३ पा॰ ४ अ॰ ५ सू॰ १५)
४ गुणा] (अ॰ ३ पा॰ १ अ॰ १२ सू॰ २२)
३ स्या] (अ॰ ११ पा॰ ३ अ॰ २ सू॰ २)
११ च] (अ॰ ३ पा॰ १ अ॰ १२ सू॰ २२)

र्मार्थत्वमापद्यते। शक्नुवन्ति हि प्रयोगमध्यस्था वह्नयः कर्माण्युपस्थापयितुम्। यथैव प्रोक्षणादीनां व्रीह्यादिस्वरूपमतिक्रम्य, खादिरत्वादीनां च सूत्रादिस्वरूपं, कर्मापूर्वप्रयुक्तत्वं कल्पितं तथाऽऽधानस्याप्यग्निस्वरूपातिक्रमेण कल्पयितव्यम्। यदि चाग्निस्वरूपमात्रप्रयुक्तमेवाऽऽधानं भवेत्ततः कर्माण्यनाहितेनाप्यग्निना सिध्येयुः। तैश्च पुरुषस्य सगुणैः कार्यं नाग्निभिः। तेनावश्यंभाविनि कर्मसंबन्धे प्रकृत्यर्थत्वमद्भिरुक्तत्वादुपन्यरतम्। यत्तु स्वकालत्वं तदुपदेशातिदेशप्राप्तस्य यूपच्छेदनवत्प्रयोगसाधारण्यार्थमिति न सर्वार्थत्वं गमयति। यदपि वसन्तादिग्रहणं तदप्यप्राप्तविषयमर्थवद्भविष्यति। न हि दर्शपूर्णमासार्थस्याऽऽधानस्य वसन्तकालत्वं प्राप्तं, प्रत्यर्धमासं प्रयोगप्रसक्तेः। नाप्यग्निहोत्रेतरदर्विहोमार्थस्य पौर्णमास्यमावास्याकालप्राप्तिः। न च प्रयोगसाधारण्यं स्वकालवचनादृते सिध्यतीति नानर्थकत्वम्। अत एवं व्याचष्टे। न कस्यचित्कर्मणोऽङ्गमाधानं, किं तर्हि, द्वितीयासंयोगादग्न्यर्थमेव। ते तु 'अग्नयश्च स्वकालत्वात्' इत्यनेन सर्वार्था भविष्यन्तीति तद्द्वारेण सर्वार्थत्वमित्युच्यते। स्वकालत्वादित्यपि स्वातन्त्र्याम्नानादित्यर्थः। यच्चेतरानारभ्यवाद- 1040
वदिति। तत्राभिधीयते— § 6930

सिद्धेऽङ्गत्वे ततस्तेषां किमर्थत्वं विचारितम्।
न तु कर्माङ्गभावे हि प्रमाणं किंचिदस्ति ते॥ § 6932

खादिरत्वादीनि स्रुवादिभिः संयुक्तान्यपि तत्स्वरूपप्रयुक्तत्वं न प्रतिपद्यन्ते। स्रुवादिशब्दानामाकृतिवचनत्वात्। विनाऽपि खादिरत्वादिमिरुपपत्तेश्च। अखादिरोऽपि हि तदाकारयुक्तः स्रुवशब्दवाच्यो भवत्येव। तत्र प्राक्कर्मार्थत्वान्न जातिनियमस्य प्रयोजनमस्तीति युक्तं स्वरूपातिलङ्घनम्। इह त्वाहवनीयादिशब्दानां संस्कारनिमित्तत्वान्नाऽऽधानाद्विना प्रवृत्तिरुपलभ्यत इति शब्दप्रवृत्तिनिमित्तत्वेनैवार्थवत्ता विज्ञायते। यत्तु तेन विनाऽपि कर्माण्यविगुणान्येव भवेयुरिति। नैव तदभावेन तत्कृतं वैगुण्यं भवति। किं तर्हि। आहवनीयाद्यसंभवकृतम्। यदि ह्याधानमकुर्वतस्तावन्मात्रमेव न स्यात्ततो नैव वैगुण्यं भवेत्। तदभावे त्वाहवनीयादयोऽपि न भवन्ति। ते चैकान्तेन कर्मणामङ्गम्। अतस्तत्कृता वैगुण्यप्रसक्तिः। यदि चाग्निमात्रेण कर्माणि संबध्येरंस्ततस्तत्स्वरूपस्यान्तरेणाप्याधानं निष्पत्तेरतत्प्रयुक्तता भवेत्। 'यदाहवनीये जुहोति' इत्येवमादिचोदनार्थः पुनर्न कदाचिदाधानमन्तरेण संभाव्यते। तेन कर्माणि कुर्वता, तदप्यवश्यं कर्तव्यम्। तस्मादग्न्यर्थम्। यत्तु 'द्रव्यस्याकर्मकालनिष्पत्तेः' इति सा कृत्वा चिन्तेति तत्रैव वक्ष्यते। एतेन पवमानेष्टीनामप्यग्न्यर्थत्वं व्याख्यातम्। आशङ्काशेषश्चोत्तरेणाधिकरणेन व्यावर्त्यते॥ १५॥ § 6933

१३ अग्न] (अ० ३ पा० ७ सू० ३१) २)
३१ स्या] (अ० ११ पा० ३ अ० २ सू०

इति आधानस्य प्रकृतिविकृत्यर्थताधिकरणम्॥ ५॥

## ०.०.१६४ पवमानेष्टिषु पवमानेष्ट्यनतिदेशाधिकरणम्

'तस्यां तु स्यात्प्रयाजवत्' इत्येतदधिकरणन्यायेन पवमानह-
विःसंस्कृताग्निसाध्यत्वं तासामस्ति नास्तीति विचारः। तत्र 'इष्टिषु दर्श-
1041 पूर्णमासयोः प्रवृत्तिः स्यात्' इत्येवं पवमानेष्टीनां दर्शपूर्णमासप्रकृतित्वे सिद्धे
यथैव प्रयाजादीन्यतिदिश्यन्ते तथैव पवमानेष्टिसंस्कृताग्निवर्तित्वमपि। ननु
चाऽऽहवनीयादयः सर्वकर्मणां प्रत्यक्षश्रुता एवाङ्गत्वं प्रतिपद्यन्त इति न व-
क्तव्यं प्रकृतित इति। नैष दोषः। यत्रैव प्रत्यक्षेश्रुत्या जुहोतिस्तत्र प्रकृतिस-
मकालमाहवनीयसंबन्धोऽवकल्पते। यत्र पुनर्द्रव्यदेवतासंबन्धाद्यजिमात्रे क-
ल्पिते 'चतुरवत्तं जुहोति' इति प्रकृतितो होमः प्राप्नोति तत्र द्वारस्य प्राकृत-
त्वादाहवनीयेनापि प्रकृतित एव भवितव्यम्। अतः साधूक्तं प्रकृतित इति।
ननु याः संस्कारार्थं क्रियन्ते तासामप्यन्याः प्राप्नुवन्ति, तासामप्यन्या इत्यन-
वस्था प्राप्नोति। नैष दोषः। सर्वानवस्थानां सामर्थ्येन व्यवस्थानात्। यावत्यो
ह्यग्निकालं पौर्णमास्यमावास्यादिकं नातिक्रामन्ति तावत्यः करिष्यन्ते॥ १६॥
§ 6935

यन्नाम प्रयाजादि प्रकृतेरङ्गं भवति तदतिदिश्यते। न तु पवमानेष्टयः
कर्माङ्गमित्वाधानन्यायेन साधितम्। अतो 'रूपं वाऽशेषभूतत्वात्' इत्याह-
वनीयादिस्वरूपमतिदिश्यते नेष्टयः। आरम्भणीया त्वङ्गमिति कृत्वाऽधिकर-
णान्तरमारप्स्यते। तदीयश्चैष न्यायोऽत्रापि भविष्यति। सत्यपि चाङ्गत्वे यावन्न
विधीयन्ते तावन्नेवेष्टयः प्रकृतौ दृश्यन्ते। यावच्च किं केन कथंभावैस्तद्भावना
न पूर्यते तावद्विधिर्न प्रवर्तते। तेन पवमानेष्टिरहितायां प्रकृतौ ताभिरितिक-
र्तव्यता गृह्यमाणा तद्व्यतिरिक्तवाक्यविहितैव केवला ग्रहीतुं शक्यते। अन्य-
था ह्येकस्मिन्वाक्ये विहितवदपेक्षणमविहितवच्च विधानमिति स्वरूपविप्रतिषेधः
स्यात्। तस्माद्यादृगाहवनीयः प्राक्पवमानेष्टिभ्यस्तादृगेव तासां प्राप्त इति
1042 निष्पन्नस्याऽऽहवनीयस्य प्रयोजनमपेक्षमाणस्योपदेशेनातिदेशेन वाऽङ्गत्वं श-
क्यं कल्पयितुम्। एतास्तु तन्निष्पत्त्यर्था एवेति न तत्कृतमुपकारमपेक्षन्ते।
न चानपेक्षितमुपदेष्टुमतिदेष्टुं वा शक्यते। तस्मादाधानमात्रसंस्कृतेनाग्निना
संबद्धव्या इति सिद्धम्॥ १७॥ § 6936

इति पवमानेष्टिषु पवमानेष्ट्यनतिदेशाधिकरणम्॥ ६॥

---

१ त] (अ° १० पा° १ अ° ४ सू° ६)
२ तासा] तासां—पवमानेष्टीनामित्यर्थः।
२ द] (अ° ८ पा° १ अ° ४ सू° ११)
२ वा] (अ° ७ पा° ३ अ° ११ सू° २९)
४ णा] अधिकरणान्तरमिति—दशमाध्यायप्रथमपादे इति शेषः।

## ०.०.१६५ पशुधर्माणामुपाकरणादीनामग्नीषोमीयामात्रार्थताधिकरणम्

इदानीं स्थानस्य प्रकरणेन सह पूर्वैश्च विरोधाविरोधौ चिन्त्येते। ज्योतिष्टोमेऽग्निष्टोमसंस्थे त्रयः पशव आम्नाताः, अग्नीषोमीयः सवनीयोऽनुबन्ध्यश्चेति। ते सर्वे कथंभावैर्धर्मानपेक्षन्ते। तथौपवसथ्येऽहनि, अग्नीषोमप्रणयनोत्तरकालमुपाकरणादयः पशूधर्माः पठ्यन्ते। तेषु चतुर्धा संदेहः। किं त्रयाणामपि पशूनामर्थेनाऽऽम्नायन्तेऽथ सवनीयार्थेनैवाऽथ सवनीयाग्नीषोमीयार्थेनाथ केवलाग्नीषोमीयार्थेनैवेति। किं प्राप्तम्। तत्र 'स्थानाच्च पूर्वस्य' इत्येवमादिसूत्रसंगत्यर्थमसूत्रं तावत्पूर्वपक्षं करोति सर्वार्था इति। यदि त्वयमेव पक्षः सूत्रेण परिगृह्येत तत उत्तरसूत्राण्यसंगतान्येव भवेयुः। यदा पूर्वसूत्रेणैव सर्वार्थत्वं प्रतिज्ञायते तदा किमनेन 'स्थानाच्च पूर्वस्य' इति। प्रकरणाविभागादेव हि पूर्वस्यापि सिद्धिः। 'श्वस्त्वेकेषाम्' इत्यपि प्रकरणाभावकथनेनाप्रतिज्ञातकेवलसवनीयार्थता व्यावर्त्यमाना कथं संबध्येत। एवं तदनुसारित्वादुत्तरसूत्राणामप्यसंगतिः। अथवा सौत्र एव पूर्वपक्षे केवलसवनीयार्थत्वमसूत्रितं द्वितीयं पक्षं कृत्वा 'श्वस्त्वेकेषाम्' इत्यादि संबन्धनीयम्। तत्तु भाष्यकारेण नाऽऽश्रितं, सर्वाद्यः पक्षः सुखमसूत्रः क्रियते। सौत्रपक्षान्तराले तु तत्संगत्यर्थमसूत्रपक्षाश्रयणं सूत्रकारस्य शून्यहृद- 1043
यतामापादयति। तस्मादाद्य ए मुक्तकः पक्षः। तस्योपपत्तिः, पशुधर्मा हि ज्योतिष्टोमप्रकरणे केनिचिदपि पशुविशेषेणासंयुक्ताः श्रूयन्ते। कथम्। § 6938

एतद्देशे ह्यनुष्ठानं वाक्याद्दीक्षस्य यद्यपि।
तथाऽप्युत्पत्तिदेशेऽस्य प्रक्रिया क्रयसंनिधौ॥ § 6940

दीक्षासु हि सोमक्रयसमीपेऽग्नीषोमीयः समाम्नायते। तस्य च यद्यपि वचनसामर्थ्यात्पशुधर्मसमीपेऽनुष्ठानं भविष्यति। तथाऽपि प्रकरणेन नैव व्यापृतं, सर्वकरणानामुत्पत्तिदेशानतिरेकात्। सवनीयानामपि सुत्याकालमुत्पत्तिवाक्यम्। औपवसथ्ये तु गुणार्थैव श्रुतिः। न च तया प्रकरणं भवति। अनुबन्ध्या तु दूरस्थैव। सोमान्ते क्रियमाणत्वात्। तस्मादवान्तरप्रकरणवाक्यसंयोगाभ्यामप्रतिबद्धेन ज्योतिष्टोमप्रकरणेनाग्नीषोमीयस्य स्थानं विप्रकृष्टार्थं बाधित्वा ज्योतिष्टोमार्थास्तावदेव इत्येतत्कल्प्यते। तस्य च सोमद्रव्यकत्वान्न पशुधर्मैः किंचित्प्रयोजनमिति 'आनर्थक्यात्तदङ्गेषु' इत्येवमङ्गेष्वेवावतरन्तोऽङ्गत्वाविशेषात्त्रिष्वप्यवतरन्ति। सत्यपि तदङ्गत्वे योग्यत्वाभावान्न दीक्षणीयादिष्ववतरणम्। सत्यपि च योग्यत्वे सामान्यसंबन्धाभावान्न तदनङ्गप-

---

१४ त्तु] तत्त्विति—अथवेत्यादिनोक्तं केवलसवनीयार्थत्वपूर्वपक्षस्योत्सूत्रत्वाश्रयणेन सूत्रसंगत्युपपादनमित्यर्थः।
२१ न] वचनेति—'स एष द्विदेवत्यः पशुरौपवसथ्येऽहन्यालब्धव्यः' इति वचनसामर्थ्यादित्यर्थः।
२७ क्या] (अ° ३ पा° १ अ° ९ सू° १८)

शूनाम्। तस्मात्त्रयाणां समानं विधानमिति प्राप्तेऽभिधीयते। स्यादेतदेवं, यदि ज्योतिष्टोमद्वारेण प्रकरणाविशेषः स्यात्। अस्ति तु विशेषः सवनीयानामौपवसथ्येऽहन्युत्पत्तेः। 'आग्नेयमजमग्निष्टोम आलभेत' 'ऐन्द्राग्नमुक्थ्ये द्वितीयम्' इत्यादिना हि पशुधर्मसमीपे सवनीया उत्पादिताः। तस्मात्केवलसवनीयार्था एवेति॥ १८॥ § 6941

1044 कथं पुनरिदं श्रुतिलिङ्गाधिकरणविपरीतमभिधीयते। न हि तत्रैवमिष्टं प्रकरणाद्विदेवनादयो राजसूयार्थाः स्थानाच्चाभिषेचनीयार्था इति। तथा श्रुत्यैन्द्री गार्हपत्यार्था लिङ्गेनेन्द्रार्थेति। युक्तं तत्र प्रकरणाम्नानेन बलीयसा प्रमाणेन निराकाङ्क्षीकृते जघन्यप्रमाणानुत्थानात्समुच्चयानाश्रयणम्। न ह्यत्र पुनः कल्पनया विना शेषस्य न किंचित्सिध्यति। नापि शेषिणामिन्द्राग्न्यादीनाम्, उपायान्तरेणापि स्मृतिसिद्धेः। इह पुनः सत्यपि सवनीयसंबन्धाद्धर्माणां नैराकाङ्क्ष्येऽग्नीषोमीयस्य पशुधर्मैर्विना सिद्ध्यभावात्प्राप्त्यन्तरमवश्यं कल्पनीयमुभयोरविप्रतिपत्तेः। न चैतस्य तदा दर्शपूर्णमासप्रकृतित्वं भवेत्। यो हि प्रकृतिभूतः पशूनां स दर्शपूर्णमासविकारो भवति। इतरे तु प्राणिद्रव्यकत्वसामान्यात्तद्विकाराः। तत्र किं सर्वनीयार्थांस्ततः सारूप्यद्वारप्रभवेनाति, देशेनाग्नीषोमीयो गृह्णात्यथोपदेशगन्धेन केनचिदिति, उपदेशान्तर्गतत्वात्क्रमेण विनियोगो युक्तः। षड्विधोपदेशप्रत्यस्तमये ह्यतिदेशः कल्प्यते। तस्माद्यथैवान्यत्रोपदेशातिदेशाभ्यां प्रकृतिविकृत्यर्थत्वं यागगतस्य व्यापारस्य तथैवेह स्थानप्रकरणाभ्यामुभयार्थत्वम्। अनुबन्ध्यायास्तु सर्वोपदेशाभावादतिदेशेनैव प्राप्तिर्भविष्यति। तस्मादनुपालम्भः सूत्रस्य॥ १९॥ § 6942

यदुक्तं स्थानादग्नीषोमीयार्था इति। एतद्गृह्णीमः। यत्तु प्रकरणात्सवनीयार्था इति, एथन्न मृष्यामहे। कुतः। § 6943

गुणार्थौपवसथ्येऽह्नि सवनीयपुनःश्रुतिः।
उत्पत्तिः प्रक्रिया चैषामाश्विनग्रहणोत्तरा॥ § 6945

1045 'आश्विनं ग्रहँ गृहीत्वा त्रिवृता यूपं परिवीयाऽऽग्नेयं सवनीयं पशुमुपाकरोति' इति हि सवनीयानामुत्पत्तिः श्व इति चौपवसथ्येऽहनि स्थितः सुत्यां ब्रवीति। कः पुनर्गुण इति—स्ववाक्ये संयोगाभावात्पृच्छति। तद्दर्शयति। सर्वान्सवनीयाननुक्रम्य निन्दा श्रूयते 'यथा वै मत्स्य' इति। यथा वै किल मत्स्यो जले विचरन्, अनवधारितगतिः प्रेक्षकजनमवधूनुते किमितो गतः किमगत इति, एवमेवैते पशवः क्व क्रियन्तामित्येवमप्रज्ञायमानाः कर्तृजनमवधुन्वते। तेन पशुकीर्तन तावदेवमर्थं न विधानार्थमिति गम्यते। साऽपि निन्दा परतः प्रश्नशेषत्वेन नीता। तदेभिः पशुभिः सवनीयसमाख्यातैः कथं

---

१ श्रुतिलिङ्गाधि] (अ० ३ पा० ३ अ० ७)
१० र्वं] सवनीयार्थानिति—धर्मानिति शेषः।
१० तः] सत इति पा०।
१३ या] याग गतस्येति—यागाङ्गभूतस्येत्यर्थः।
१३ व्या] व्यापारस्येति—इतिकर्तव्यतासमूहस्येत्यर्थः।

सवनानि पशुमन्ति कर्तव्यानीति। सोऽपि प्रतिप्रश्नरूपविध्यन्तरशेषत्वं प्रतिपद्यते 'वपया प्रातःसवने चरन्ति' इति। तस्मादेतद्गुणार्थेयं पुनःश्रुतिः। न च सा प्रकरणबुद्धिं करोतीति। किं पुनस्तच्छ्व आम्नानमिति—आश्विनग्रहणानन्तर्यगुणार्थत्वात्तदपि नोत्पत्तिसमर्थमिति मन्यते। भाष्यकारेण केवलस्याऽऽग्नेयस्य श्व आम्नानं दर्शितं नेतरेषाम्। तत्र केचिदाहुः। प्रदर्शनार्थत्वादस्याऽऽग्नेयग्रहणमविवक्षितत्वात्सर्वार्थमिति मन्यमानेनेति। वाक्यान्तराण्येवंरूपाणि द्रष्टव्यानीत्यपरे। सर्वथा तु केवलाग्नेयप्रदर्शनमेवोपयुज्यते। यद्यपि ह्यैन्द्राग्नादीनामौपवसथ्य एवोत्पत्तिस्तथाऽपि तेषामनित्योत्तरसंस्थार्थत्वान्नैव शक्तिर्नित्यवदाम्नातान्पशुधर्मान् ग्रहीतुमित्यग्नीषोमीयस्थानमेव बलीयः स्यात्। यस्तु नित्यत्वेन ग्रहणसमर्थस्तस्य प्रकरणाभाव उक्त एव। तस्मान्न सवनीयार्था इति॥ २०॥ § 6946

इदानीं कतरत्सवनीयानामुत्पत्तिवाक्यमित्येतत्परिज्ञानाधीनाऽधिकरणसिद्धिः। तत्र पूर्वपक्षवाद्याह, इति चेत्—सवनीयप्रकरणाभावं मन्यसे। तदयुक्तम्। कुतः। § 6947

सवनीयान्पुरोत्पाद्य वपामुत्कृष्य वाक्यतः। 1046
तत्राप्यनियमे प्राप्ते तद्विशेषो विधीयते॥ § 6949

'वपया प्रातःसवने प्रचरन्ति' इत्यनेनैव वचनेनोत्कृष्टे प्रधाने प्रधानदेशत्वादङ्गानामुपाकरणादिष्वप्युत्कृष्टेषु कालानियमे प्राप्ते सति, आश्विनग्रहणानन्तर्यं विधीयते। तेन तदेव गुणार्थं श्रवणम्। इतरथा हि वाक्यं भिद्येत, परिव्याणोपाकरणयोः कालविधानाद्द्रव्यदेवतायुक्तस्य च यागस्य विधेः। ननु चातिदेशप्राप्तमेव परिव्याणं तस्मिन्नेव काले यागे विधीयमानेऽनूद्येत। सत्यमतिदेशेन प्राप्तं न तु तदिदानीं क्रियते। यूपसाधारण्येन 'तत्कालास्तु' इत्येवमग्नीषोमीयकालकृतादेवोपकरसिद्धेः। एवं तर्हि साधारण्यादेव प्राप्तं विद्यमानमनूद्येत। न शक्यं तदनुवदितुमप्रत्यभिज्ञानात्। तन्नामान्वतः प्राप्तमनूद्यते यत्ताद्रूप्येण प्राप्तं प्रत्यभिज्ञायते। न च पूर्वेद्युः कृतस्याऽऽश्विनग्रहणोत्तरकालं वर्तमानत्वेनानुवादो भवति। न हि तदाऽसौ परिव्ययति। न च पूर्वकृतस्य पर्यग्निकृतादिशब्दवदीदृशेन शब्देनानुवादः। पूर्वोत्तरकालकर्मावधिद्वयपरिच्छिन्नत्वात्। एवं तर्ह्यस्माद्वाक्यात्प्राप्तमनूद्यतां 'स आश्विनं ग्रहं गृहीत्वोपनिष्क्रम्य यूपं परिव्ययति' इति। तदपि नास्ति प्रत्यभिज्ञानाभावादेव। यदेतदप्राकृतं सवनीयपरिव्याणम्, एतस्य शुद्धस्य श्रवणाद्दर्शनायाश्च प्राकृतपरिव्याणनिबन्धनत्वाद्येन केनचिद्वासःप्रभृतिना करणो

---

७ व्यानीत्य] अपर इति—आपस्तम्बानुयायिन इत्यर्थः। आपस्तम्बसूत्रे तावदुक्थ्यसंस्थायां सुत्यादिन एव सर्वेषां क्रतुपशूनामाम्नानात्तन्मूलतया वाक्यान्तरकल्पनावश्यंभावादिति यावत्।

८ नित्यो] अनित्योत्तरसंस्थेति—काम्या अत एवानित्यास्तिस्र उक्थ्यषोडश्यतिरत्रसंज्ञकाः संस्था इत्यर्थः।

२२ त्का] (अ॰ ११ पा॰ ३ अ॰ ४ सू॰ ६)

सति त्रिवृत्त्वानुवादो न प्राप्नोति। तत्रानेकार्थविधानाद्वाक्यभेदः। तदा चैवं भाष्यग्रन्थः। इतरथा हि परिव्याणस्य कालो विधीयेत—यत्संबन्धित्वेनोपात्तं त्रिवृद्द्रव्यं कालो विधीयेत। उपाकरणस्य चेति—उपाकरणकालो द्रव्यदेवताविशिष्टं च कर्म विधीयेतेत्यर्थः। तस्मादस्य गुणार्थत्वादस्ति पूर्वेद्युः सवनीयानां प्रकरणमिति॥ २१॥ § 6950

1047 यदा हि पूर्वेद्युः साङ्गानां सवनीयानामाम्नानं तदा तत्रैव सर्वानुष्ठाने प्राप्ते वचनाद्वपाप्रचारादिमात्रमुत्कृष्येत नोपाकरणादीनि। 'तदादि वाऽभिसंबन्धात्' इति ये वपाहोमोत्तरकालाः पदार्थास्तत्संनिपातिनो वा तन्मात्रस्योत्कर्षो भवेन्न प्राग्भाविनामुपाकरणादीनाम्। यानि चाज्ञातकालान्यङ्गानि तेषां प्रधानकालत्वं वक्ष्यते। पश्वङ्गानि त्ववधारितपूर्वेद्युःकालत्वान्न प्रधानकालं गच्छन्ति। तस्माद्वपाप्रचारेणानुत्कृष्टस्यानेनैव वाक्येनोत्कर्षः कर्तव्यः। ततश्च गुणवाक्ये सति अनेकार्थविधानाद्वाक्यं भिद्येत। उत्पत्तिवाक्ये न दोषः। तस्मादेतदुत्पत्त्यर्थमिति। न त्विह भाष्यकारेण विधेयानेकार्थत्वं दर्शितम्। एवमेव तु गुणार्थ एतस्मिन्वाक्यं भिद्येतेत्य- मिहितम्। शक्यस्त्विह पूर्वेद्युः प्राप्तोपाकरणोत्कर्षमात्रविधानाद्वाक्यभेदः परिहर्तुम्। तत्र केचिदेवं समर्थयन्ते। यथा किल 'आग्नेय्याऽऽग्नीध्रम्' इति ज्योतिष्टोमसंबन्धे तद्विशेषे च विधीयमानेऽनेकार्थत्वमुक्तमेवमिह वपाप्रचारेणानुत्कृष्टस्योपाकरणस्योत्कर्षश्च कर्तव्यः, तद्विशेषश्चेत्यनेकार्थत्वमिति। न त्विदमाग्नेयीवाक्यसदृशम्। तत्र हि संबन्धविशेषपरे विधौ सामान्यसंबन्धप्राप्तिमन्यतोऽपेक्षमाणे कासुचिदाग्नेयीषु तत्सद्भावादितरविषयसामान्यसंबन्धं प्रत्यन्यथानुपपत्तिः क्षीयते। अतस्तु वेदेनानभ्युपेतं तद्विधिं कल्पयतो वाक्यभेदो भवति न त्विह तादृक्प्रतिपक्षोऽस्ति। यतः सामान्येनोत्कर्षप्राप्तिं दृष्टवा विशेषपरस्यार्थापत्तिकोपः कल्प्येत। तत्रापि चेत्तदर्थापत्तिर्बाधिनी प्रतिपक्षभूता सामान्यप्राप्तिर्नाभविष्यन्नाऽऽग्नेयीमात्रप्रमाणं निराकरिष्यत। प्राप्तेऽपि कर्मण्येकपदोपात्तानेकार्थविधिः शोणाद्युदाहरणैस्तत्र तत्र प्रतिपादितः। तेन यद्यपि 'आश्विनं ग्रहं गृहीत्वा' इत्यनेन द्वयमपि प्रातःसवनमाश्विनग्रहोत्तरकालत्वं च विधीयेत तथाऽपि विधायकस्यैकपदानुसारात् 'तस्य तस्योपदिश्येत' इत्येतदापत्तिर्नास्ति किमुतात्रैकविधानेऽर्थादेवेतरसिद्धेः। अत एव भाष्यकारेणानेकविधिदूषणेऽभिहितं न चानेकोऽर्थः परस्परासंबन्धे सति शक्यो विधातुमिति। जानाति ह्यसौ यथा संबद्धानामर्थानामेकस्मिन्विहितेऽन्ये विनैवाऽऽयासेन प्राप्नुवन्ति। तेन यद्येकस्मिन्विहितेऽर्थादर्थसहस्रमपरमापद्य ते न कश्चिद्विरोधो विधेरायासो वा दृश्यत इत्याश्रीयते। तस्य त्वन्यथाऽप्युपद्यमान त्वमेवैवौ निराकरणोपायः। न चेहास्ति स पक्षो यत्रैष विधिः सुत्याप्रातःसवनसंबन्धाव-
1048 कृत्वाऽऽश्विनग्रहणानन्तर्यं विदध्यात्। तस्माददोषः। न चैव त्वेष दोषः, य-

२ दा] (अ० ५ पा० १ अ० १२ सू० २४)
५ क्ष्य] (अ० ११ पा० ३ अ० १ सू०

१) इत्यत्रेति शेषः
२२ त] (अ० २ पा० २ अ० ३ सू० ६)

स्यानेकद्रव्यदेवताविशिष्टकर्मविधानम्। अपि च ज्योतिष्टोमसुत्याप्रातःसवनविशेषकालसंयोगोऽपरः कल्पनीयः। सर्वेषु चोत्कर्षापकर्षेषु सामान्यविशेषरूपोऽनेकविधिदोषोऽस्तीति प्राप्तकर्मगुणविध्यसंभवात्कर्मान्तरविधित्वप्रसङ्गः। तद्यथा ‘माहेन्द्रस्य स्तोत्रं प्रत्यभिषिच्यते’ इत्यत्राभिषेचनीयस्य माध्यंदिनसवनमाहेन्द्रस्तोत्रकालविधेरनेकार्थत्वमेवं ‘तिष्ठन्तं पशुं प्रयजति’ इत्यादिष्वपि योजनीयम्। अपि चैकस्मिन्पदार्थेऽनुष्ठीयमाने विधीयमाने चार्थान्तरं द्वेधाऽऽपद्यते। किंचित्प्रयत्नान्तरसाध्यं किंचित्तदनुनिष्पाद्यम्। यथा भक्षविधौ ग्रहणादयस्तृप्तिश्च। तत्र यत्प्रयत्नान्तरसाध्यं, न च तस्मिन्नकृते विहितकरणं शक्यमित्यवधार्यते तत्रार्थापत्तिलभ्यं विधिशक्त्यन्तरं कल्प्यते। या च यावती च शास्त्रीया साऽवगतिर्भवति। यत्त्वनुनिष्पादि बह्वपि पुरुषस्य शास्त्रस्य च व्यापारान्तरमन्तरेणैव सिध्यति न तेन कश्चिदायासो भवति। न चेहाऽऽश्विनग्रहणानन्तर्ये विधीयमानेऽनुष्ठीयमाने वा सुत्याप्रातःसवनादिसंबन्धे भेदेन व्यापारितव्यम्। तेन नात्र कश्चिदुष्कर्षसामान्यं विधत्ते। श्रुतमात्राश्विनग्रहणार्थमात्रे विहिते यदि तदन्तर्गतत्वात्सुत्याप्रातःसवनाहर्भागविशेषमुहूर्तनाडिकाक्षणलवनिमेषकालत्वद्रव्यसत्त्वादयः प्रसज्यन्ते किं क्रियताम्। अपि च शिंशपामानयेत्यत्रापि वृक्षत्वद्रव्यत्वसत्ताद्याक्षेपाद्वाक्यभेदः स्यात्। अतः पूर्वेद्युः प्राप्तस्योपाकरणस्य कालान्तरमात्रमाश्विनग्रहणानन्तर्थे विधीयत इत्यदोषः। अन्ये तु द्वयोः परिव्याणोपाकरणयोरुत्कर्षाद्वाक्यभेदं समर्थयन्ते। तदपि तु सुपरिहरं, केवलपरिव्याणोत्कर्षादेव ‘तदादि वाऽभिसंबन्धात्’ इत्येवमुपाकरणोत्कर्षसिद्धेः। तत्रैतत्स्यात्। प्रकृतिप्राप्तो धर्म उत्कृष्यमाणस्तदाद्युत्कर्षं करोति नापूर्व इति। तदयुक्तम्। ‘कृतदेशात्तु पूर्वेषाम्’ इत्यत्राप्राकृतानामपि विदेवनादीनामपकर्षवर्णनेन ‘तथाऽपूर्वम्’ इत्यस्य विशिष्टविषयत्वव्याख्यानात्। अथवा ‘स आश्विनं ग्रहम्’ इत्येतद्वाक्यप्राप्तपरिव्याणान्तरानुवादादवाक्यभेद इति। अथोच्येत। अविशेषितसाधनकत्वात्तत्र त्रिवृत्त्वानुवादो न संभवतीति। तदयुक्तम्। एवं हि सिद्धान्तवाद्यपि पूर्वपक्षवादिना चोदितः स्वयं परिहारं वक्ष्यति सोऽस्यापि भविष्यतीति। ननु च तस्यापूर्वकविधानादनेकार्थविधिरुपपद्यते नास्येति। नैष विशेषः। यत्र ह्येकक्रियाविशेषणमनेकमुपादीयते तत्र तद्द्वारेण तद्विधिः सुलभ इति विशिष्टविधानन्यायः। यत्र पुनः स्वविशेषणाविशिष्टाक्रिया विधीयते, वाक्यान्त- 1049
रकप्राप्तस्य क्रियान्तरस्य विशेषणं, तत्रावश्यावर्तनीयो विधिप्रत्ययः। देवतादिविशिष्टो हि यागो विधीयमानः स्वविशेषणमेवाऽऽक्षेप्तुं समर्थो नाविधीयमानपरिव्याणविशेषणम्। तेनापूर्वकर्मविधिष्वप्येतद्विवेक्तव्यं, कतरत्तद्विशेषणं

५ ज] प्रयजन्ति, इति क्वचित्पाठः।
१९ दा] (अ° ५ पा °१ अ° १२ सू° २४)
२१ कृत] (अ° ५ पा° २ अ° १० सू° २१)
२२ था] (अ° ५ पा° १ अ° १६ सू° २९)
२६ क्ष्य] रशनासाधारण्याधिकरण इति शेषः।

कतरदन्यविशेषणमिति। तस्मादयमुभयपक्ष भाक्त्वान्नैकस्य चोदयितव्यः। तत्रावश्यं सिद्धान्तवादिनोभयोः परिव्याणयोः साधारणी रशनेति परिहारो वक्तव्यः। वक्ष्यति हि ‘रशना च लिङ्गदर्शनात्’ इति। यद्यदेतस्य यूपस्य परिव्याणं तस्य तस्यैषा वाक्येन विज्ञायते। तथाप्राप्तानुवादान्न वाक्यभेदः। अथवा यत्त्रिवृता यूपं परिवीयोपाकरोतीति पूर्वेद्युः प्राप्तमुपाकरणस्य परिव्याणानन्तर्यमनूद्याऽऽश्विनग्रहणानन्तर्यं विधीयते। वरं च वाक्यभेदाद्व्यवहितकल्पनाश्रयणम्। तस्मादेवं वर्ण्यते। अवश्यं तावत्सवनीयानामेकेनोत्पत्तिरेकेन च गुणो विधातव्यः। तत्र पूर्वेद्युस्तनस्य तावन्न कश्चिदुत्पत्तिवाक्यत्वे हेतुरस्ति। नन्वितरस्यापि नास्ति। यद्यप्येवं तथाऽपि विकल्पसमुच्चयासंभवात्केनचिद्विशेषेणान्यतरस्मिन्नाश्रयितव्ये विशेषोऽभिधीयते। पुरस्तादेतदेव स्थितं यथोपादेयो गुणस्तिरोहितकर्मानुवादेन शक्यो विधातुं नानुपादेयः। स हि कुण्डपायिनामयने होमस्येव बलात्कर्मान्तरत्वमापादयति। तदिह वपाप्रचार उपादेयः सुत्याकालस्थसवनीयानुवादेन शक्यो विधातुं, किं पुनः प्रातःसवनश्रुत्या तद्देशसवनीयप्रत्यभिज्ञाने सति। श्वस्तने पुनराम्नाने निर्ज्ञातप्रयोजनत्वादाश्विनग्रहणेन सहाङ्गाङ्गिसंबन्धाभावात्कालार्थे संयोगे तस्यानुपादेयत्वात्कर्मोद्देशेन विध्यनुपपत्तेरवश्यं कालोद्देशेन कर्म विधेयम्। अथाप्याश्विनं प्रत्यङ्गत्वेन विधिस्तथाऽप्यङ्गिनोऽनुपादेयत्वादेषैव वचनव्यक्तिः। अतश्च गुणविध्यनुपपत्तेरवश्यं प्रकरणान्तरन्यायेनोत्पत्तिविधेरन्येनानन्तरेणाप्रतिबन्धादुत्पत्ताववधार्यमाणायां कर्मान्तरं स्यात्। तेनास्य तावत्कालापेक्षयोत्पादकत्वं सिद्धम्। अतश्चेतरस्य परिशेषसिद्धं गुणविधित्वम्। न हि तस्य किंचिद्भेदकारणम्। अत एव वपाप्रचारेणोत्कर्षोऽस्ति नास्तीति विचारितम्। सति हि वपाप्रचारेणोत्कर्षे पूर्वस्यैव प्रातः सवने विपरिवृत्तेः कालं प्रत्युपादानं प्रत्य- 1050 भिज्ञानात्कल्प्येत। ‘यथोक्तं संनिधौ त्वविभागात्’ इति। काले च कर्मणि विधीयमाने प्रत्ययस्य, संनिकृष्टेऽर्थे व्यापारो भविष्यति। वपाप्रचारकालस्य पुनः सवनीयोत्पत्तिक्रियातः क्रियान्तरविशेषणत्वाद्दुष्प्रतिपादो विशिष्टविधिरिति वाक्यभेदः स्यात्। अस्मत्पक्षे पुनर्यथैकवाक्यत्वं भवति तथोक्तम्। एवं च परिव्याणस्यापि प्रकरणलभ्योऽङ्गभाव इहानुवदिष्यते। अन्यथा पुनर्विप्रकृष्टतरेण क्रमेण प्राप्तिमपेक्ष्यानूद्येत। तस्मादयमेवोत्पत्तिविधिः। कथं पुनरस्मिन्पक्षे भाष्यकारस्य वाक्यभेदोपन्यासः। उच्यते। § 6951

कर्मणो भेद एवायं वाक्यभेदोऽभिधीयते।

---

३ श] (अ॰ ३ पा॰ ६ अ॰ १० सू॰ ३१)

९ विक] विकल्पसमुच्चयासंभवादिति—कदाचिदेकस्योत्पत्तिविधित्वं कदाचिदन्यस्येत्येवं विकल्पस्याष्टदोषदुष्टत्वाच्छाख्यान्तरन्यायाभावाच्चोभयत्रोत्पत्तिरित्येवं समुच्चयस्य चासंभवादित्यर्थः।

१० स्ता] पुरस्तादिति—प्रकरणान्तराधिकरण इति शेषः।

२३ त्व] (अ॰ २ पा॰ ३ अ॰ १३ सू॰ २३)

संबन्धे ह्येकवाक्यत्वमर्थान्यत्वेऽपि गम्यते॥ § 6953

वाक्यं भिद्येतेति। 'न तेनैकवाक्यतामियात्' यथा 'कर्तृगुणे तु कर्मासमवायाद्वाक्यभेदः स्यात्' इत्यत्रासत्यपि लक्षणतो वाक्यभेदे परस्परासंबन्धाभिप्रायेणोक्तं 'साकाङ्क्षं त्वेकवाक्यम्' इत्यत्र च संबन्धमात्राभिप्रायं तथेहोत्पत्त्यर्थत्वे सति तदेकवाक्यतां याति न गुणार्थ इत्युच्यते॥ २२॥ २३॥ २४॥ § 6954

सर्वं सवनीयप्रकरणं निराकृत्य पूर्वोक्तनैव हेतुना सिद्धान्तं निगम- 1051
यति। यद्वाऽवान्तरप्रकरणेनाबाध्यमानं स्थानबाधेनैव महाप्रकरणं सर्वार्थ-
त्वप्रतिपादनयाऽवस्थितं तन्निवृत्त्यर्थस्तुशब्दः। यद्यपि प्रकरणं स्थानाद्बलव-
त्तथाऽप्युपांशुयाजानुमन्त्रणन्यायेन लिङ्गानुगृहीतक्रम एवात्र बलीयान्विज्ञाय-
ते। योग्यतया हि पशुधर्माः पशुयागमपेक्षन्ते न सोमयागम्। न चानपेक्षिताः प्रकरणेन ग्रहीतुं शक्यन्ते। तदङ्गावतरणेन चात्र विप्रकृष्टतरः श्रुतोऽर्थः। न च षष्ठीप्रतिपाद्यात्संबन्धाद्विनाऽऽनर्थक्यतदङ्गन्यायोऽस्तीत्युक्तम्। ननु चाविहितधर्मान्तरः साकाङ्क्ष एवाग्नीषोमीयः प्रदेशान्तरादिहाऽऽनीयमानः संनिहितान्धर्मान्प्रकरणेनैव गृह्णातीति न वक्तव्यं स्थानाच्चेति। नैष दोषः। यत्र हि प्राकृतैरङ्गैः पूर्यमाणायां विकृतौ तन्मध्येऽप्यपूर्वाणि कानिचित्प्रक्षिप्यन्ते तत्र विकृतौ प्रकरणग्रहणं भवति। अत्र प्रदेशान्तर उत्पन्नोऽग्नीषोमीयः प्राकृतैस्तावन्निष्प्रतिद्वन्द्वैः क्लृप्तोपकारैश्च निराकाङ्क्षीकृतः। तत इहाऽऽनीतः सन्ननन्यप्रयोजनान्धर्मान्साकाङ्क्षान्पश्यन्ननुमितकथंभावः संबध्यते। स्थानस्य चैतदेव लक्षणं यदुत धर्माणां साकाङ्क्षत्वेन प्रधानस्योत्पाद्य कथंभावं, संबन्धः। तस्मात्सूक्तं स्थानाच्चेति॥ २५॥ § 6955

सर्वेषां द्वयोर्वा समानविधानत्वे सवनीये पशुपुरोडाशदर्शनं नोपपद्यते। पुरोडाशयागस्य हि देवतासंस्कारार्थत्वं वक्ष्यति। स च लिङ्गादग्नीषोमावेव संस्कर्तुं शक्नोति नाग्निम्। न च समानविधानत्वेनोहः सिद्धान्तवत्संभवति। तस्मात्पुरोडाशदर्शनादातिदेशिकाः सवनीयस्य धर्मा इति॥ २६॥ § 6956

सत्यं देवतासंस्कारार्थः सन्न प्राप्नोति, न त्वयं केवलस्तदर्थः। किं त- 1052
र्हि। 'सुषिरो वा एतर्हि पशुः' इत्युपक्रम्य च्छिद्रापिधानार्थोऽपि। अत-
श्च विनाऽपि देवतां सवनीयस्य च्छिद्रं पिधातुं पुरोडाशः करिष्यते। तेन
समानविधानत्वेऽप्यदोष इत्युक्ते सूत्रेणोत्तरमाह—न च्छिद्रापिधानार्थेनास्य
चोदना। विधिवन्निगदानां हेतुवन्निगदानां चैवंजातीयानामर्थवादत्वेनोक्तत्वात्। न हि च्छिद्रापिधानं क्रतुनाऽपेक्षितं, नापि पुरोडाशयागे कृते दृश्यते। तस्मान्नैतत्प्रयोजनमिति यथोक्तमेव लिङ्गदर्शनं सिद्धम्॥ २७॥ § 6957

२ क] (अ॰ ३ पा॰ १ अ॰ १० सू॰ १९)
४ साका] (अ॰ ३ पा॰ १ अ॰ १० सू॰ २०)
५ इत्युच्य] 'अर्थेनेति चेत्' 'न श्रुतिविप्रतिषेधात्' इति सूत्रद्वयस्थं भाष्यं सुस्पष्टमिति न व्याख्यातं वार्तिककृद्भिः।
७ क्य] आनर्थक्यतदङ्गन्याय इति (अ॰ ३ पा॰ १ अ॰ ९) अत्रत्यन्यायो द्रष्टव्यः।
१७ क्ष्य] (अ॰ १० पा॰ १ अ॰ ९ सू॰ २०) इत्यत्रेति शेषः

इति पशुधर्माणामुपाकरणादीनामग्नीषोमीयामात्रार्थताधकरणम्॥ ७॥

## ०.०.१६६ शाखाहरणादीनामुभयदोहार्थताधिकरणम्

एवं क्रमस्याविरोधं दर्शयित्वेदानीं विरोधं दर्शयति। शाखाहरणादीनामौपवसथ्ये देशसामान्यदवान्तरप्रकरणाद्वा दध्यर्थत्वं प्राप्नोति॥ २८॥ § 6959

प्रधानं धर्मदेशे क्रियमाणं क्रमं प्रतिपद्यते। पठ्यमानं चावान्तरप्रकरणम्। दधियागस्त्वमावास्यायां पठ्यते क्रियते च। तस्मात्तुल्यं पयसा। दधित्व-
1053 सिद्ध्यर्थास्तु केचित्तस्य धर्माः पूर्वेद्युः क्रियन्ते। न च ते शाखाहरणादीनां ग्राहकाः 'गुणानां च परार्थत्वादसंबन्धः' इति स्थित्वात्। तस्मादुभयसंयुक्तस्य शाखाहरणादेर्वचनात्पूर्वेद्युः करणं न दध्यर्थत्वादित्यदोषः॥ २९॥ § 6960

इति शाखाहरणादीनामुभयदोहार्थताधिकरणम्॥ ८॥

## ०.०.१६७ ग्रहधर्माणां सवनत्रयसंबन्धिग्रहार्थताधिकरणम्

ग्रहधर्माणां प्रातःसवनस्य च समानदेशे समाम्नानमनुष्ठानं चेत्यनेनातुल्याशङ्कायां तुल्यत्वमापाद्यते। प्रकरणं तावत्सवनत्रयोपेतस्य ज्योतिष्टोमस्य समानम्। न च प्रातःसवनस्य निष्फलस्यावान्तरप्रकरणम्। न च प्रकरणविरोधि स्थानं विनियोजकं भवति। तस्मात्सवनान्तरग्रहाणामपि धर्माः स्युरिति। एतेनाऽऽग्नेयाग्नीषोमीयादिपुरोडाशधर्मसाधारण्यमुक्तम्॥ ३०॥ § 6962

इति ग्रहधर्माणां सवनत्रयसंबन्धिग्रहार्थताधिकरणम्॥ ९॥

## ०.०.१६८ रशनाधर्मसाधारण्याधिकरणम्

1054 *अग्नीषोमीये यूपपरिव्याणमाम्नाय पुनः सवनीये 'स आश्विनं ग्रहं गृहीत्वा' इत्याम्नातं, तच्च निर्गुणपुनःश्रवणात्कर्मान्तरम्। उभयोश्च केनचिद्द्रव्येण भवितव्यम्। यच्च परिव्याणद्रव्यं सा रशना लोके वेदे च प्रसिद्धा। तेनोभयत्र तादर्थ्यादेव राशना प्राप्ता। सा च किंमयी किंधर्मा चेत्यपेक्षितेऽग्नीषोमीयस्य स्थानानुमिते प्रकरणे त्रिवृद्दर्भमयीप्रपिष्टानां कर्त-

४ च] (अ० ३ पा० १ अ० १२ सू० २२)

१ *] अग्नीषोमीय इति—पशाविति शेषः।

व्येत्याम्नानाद्विशेषः प्रतीयते न सवनीयपरिव्याणस्य। तस्मादितरपशुधर्मवदेव रशनेतिकर्तव्यताऽग्नीषोमीयार्थैवेति। तथा प्राप्ते लिङ्गदर्शनात्साधारणीत्याह। न हि सवनीयोत्पत्तिवाक्ये त्रिवृत्त्वानुवादो रशनाधर्मसाधारण्याद्विनोपपद्यते। का प्राप्तिरिति चेत्तामाह—वाक्यसंयोगाद्रशनामात्रस्य, स्थानादग्नीषोमीयस्य। वाक्यं च तस्माद्बलवत्तरमिति। ननु 'न तद्वाक्यं हि तदर्थत्वात्' इत्युत्तरं वक्ष्यति। तेनाग्नीषोमीयापूर्वप्रयुक्तत्वाद्व्यवस्था स्यादिति। नैतदेवम्। न ह्येषा साक्षात्पशुसंबन्धिनी। किं तर्हि। 'यूपाङ्गं वा तत्संस्कारात्' इति वक्ष्यति। तेनेदृशमेकवाक्यत्वमेतत्। यूपपरिव्याणसाधारणसाधनस्यैते धर्मा इति। तथा चाग्नीषोमीयस्थमेतद्यूपपरिव्याणमेव च यूपैकत्वात्सवनीयस्थं यूपपरिव्याणम्। 1055 द्वयमपि चापूर्वसाधनमिह प्रतीयते, न तु दर्शपूर्णमासवर्हिरिव पिण्डपितृयज्ञे भविष्यति। तस्माद्बर्हिर्धर्मवैषम्यात्साधारणा रशनाधर्माः॥ ३१॥ § 6964

इति रशनाधर्मसाधारण्याधिकरणम्॥ १०॥

## ०.०.१६९ ग्रहधर्माणामनारभ्याधीताश्वदाभ्यग्रहार्थताधिकरणम्

प्रसङ्गाद्वाक्यप्रकरणविरोधाविरोधौ विचार्येते। तत्र स्थानं बाधित्वा प्राकरणिकग्रहार्था ग्रहधर्मा इति प्रतीतेरनारभ्याधीतार्थत्वमशक्यं प्रत्येतुं, तेनासंयुक्तमित्याह॥ ३२॥ § 6966

प्रकरणस्याविशेषकत्वाज्ज्योतिष्टोमापूर्वसाधनस्यैवैत इत्येवं सुराग्रहादिभ्यो निवर्तमानाः प्रकरणे व्यवतिष्ठन्ते। येषां त्वप्रकरणाधीतानामपि तदस्ति ते पूर्वेणैव न्यायेन वाक्यसंयोगाद्धर्मवन्तो भवितुमर्हन्ति। अंश्वदाभ्यादीनामपि धर्मवत्ता॥ ३३॥ § 6967

मैत्रावरुणादिश्रयणादीनां प्राकरणिकसर्वार्थत्वबाधेन वाक्याद्व्यवस्था। अत्र 1056
तु प्राकरणिकव्यवस्थाबाधेन वाक्यात्सर्वार्थत्वमित्यदृष्टान्तैः॥ ३४॥ ३५॥ § 6968

इति ग्रहधर्माणामनारभ्याधीताश्वदाभ्यग्रहार्थताधिकरणम्॥ ११॥ १२॥

---

५ द्वा] (अ॰ ३ पा॰ ७ अ॰ १ सू॰ ४)
७ यूपा] (अ॰ ४ पा॰ ४ अ॰ ९ सू॰ २३)
१ सुराग्र] सुराग्रहादिभ्य

इति—सौत्रामणीनामकपशुयागे समाम्नाता ये सुराग्रहाः पयोग्रहाश्च तेभ्य इत्यर्थः।

## ०.०.१७० नित्यनैमित्तिकयोरसामानविध्याधिकरणम्

अधिकरणद्वयेन कार्यप्रयुक्तत्वाद्धर्माणां साधारण्यमुक्तम्। फलचमसोऽपि चेष्टयविकारत्वात्सोमकार्ये वर्तते। तस्मात्तस्यापि सोमधर्मविधिः
1057 साधारणो यथा ‘व्रीहीन्प्रोक्षति’ इत्येवमादिर्यवानामिति प्राप्तेऽभिधीयते। युक्तं यद्व्रीहिधर्माः यवेषु क्रियन्ते। द्वयोरपि वैकल्पिकत्वेनानित्ययोस्तुल्यरूपत्वात्। सोमधर्माः पुनःनित्यवज्ज्योतिष्टोमापूर्वेण गृहीताः। ते नित्यमेव द्वारमाश्रयितुमर्हन्ति। सोमश्च नित्यो न फलचमसः। ब्राह्मणपक्षे विधानाभावात्। यदि सर्वसोमोपमर्देन फलचमसो भवेत्ततो राजन्यवैश्यपक्षयोरभावात्सोमोऽप्यनित्य इति तुल्यता स्यात्। स तु यजमानचमसमात्रान्निराकृतोऽपि ग्रहचमसान्तरेषु संभवान्नित्यः। तेन धर्मास्तं न व्यभिचरन्ति। तत्प्रयुक्ताः फलचमसस्येदानीं कथं भविष्यन्तीति। कार्यापत्त्येति ब्रूमः। आह। किं कार्यापत्तिरुपदेशातिदेशाभ्यामन्या, एतयोरेवान्तर्गता वा। अतिरिक्तेति केचिन्मन्यन्ते। न तु तथा सति प्रमाणत्वाध्यवसानम्। अतोऽतिदेशान्तर्गतिरेव वक्तव्या। कथं पुनः प्रकृतावेवातिदेशः कल्प्यत इति चेत्। सत्यं नावकल्पते यत्र कर्मधर्मातिदेशो भवति। न ह्येकस्य कर्मणः स्वत एव प्रकृतिविकारभाव उपपद्यते। द्रव्यधर्मातिदेशस्त्वयम्। समानेऽपि च कर्मणि द्रव्यभेदः प्रत्यक्षः। यथा च कर्म साकाङ्क्षं कर्मान्तराद्धर्मान्गृह्णाति तथा द्रव्यमपि। तस्मात्फलचमसेनेज्यां भावयेत्कथमनन्तरंविपरिवृत्तेर्द्रव्यसारूप्यात्सोमवदित्यवगतेरतिदेशसिद्धिः। किं भवति प्रयोजनं यदोभयोरपि पक्षयोः सोमधर्माः क्रियन्ते। सत्यप्युभयत्र करणे यथैवान्यत्रौपदेशिकातिदेशिकयोः गुणकामप्रवृत्त्यप्रवृत्ता प्रयोजनं भवतस्तथेहापि द्रष्टव्यम्। निवृत्तिवद्द्रव्यभेदादित्यपि हि शक्यं वक्तुम्। ये हि सोमस्याभिषवमानादिष्वाश्रिताः फलसाधनत्वेनावगतास्ते कथं फलचमसस्थाः साधयिष्यन्ति। क्रतुसाधनत्वेन फलचमसः प्रवर्तमानो य एव तदङ्गपातिनः क्रत्वर्थेन क्रियन्ते तानेव शक्नोति ग्रहीतुं न फलार्थान्।
1058 अतः सिद्धा तन्निवृत्तिः। अनेनैवोहोऽपि कर्तव्य इत्युक्तं भवति। समानेऽपि हि कर्मप्रकरणे द्रव्यसामानविध्यभावात्कार्यापत्तिपुरःसरं प्राप्नुवतः सोमपदस्याशक्तेर्विक्रिया विज्ञायते॥ ३६॥ § 6970

इति नित्यनैमित्तिकयोरसामानविध्याधिकरणम्॥ १३॥

२२ साध] साधयिष्यन्तीति—गुणजन्यं फलमिति शेषः।
२४ अ] ऊहोपीति—‘इन्द्राय त्वा वसुमते सोमं गृह्णामि’ इत्यादि सोमपदघटितमन्त्रे सोमपदस्थाने फलचमसपदप्रक्षेपः वर्तव्यो भवति यद्यस मानविधानमिति सिद्धान्तः। यदि सामानविध्यमिति पूर्वः पक्षस्तदा ‘व्रीहीणां मेध’ इत्यस्येव यवप्रयोगे सोमपदघटितमन्त्रस्य लोपो भवतीत्यर्थः।

## ०.०.१७१ मुख्यप्रतिनिध्योः सामानविध्याधिकरणम्

प्रतिनिधावप्ययमेव न्यायः प्राप्नोति॥ ३७॥ § 6972

यदि नीवाराः स्वेनैव महिम्ना कर्मसाधनं भवेयुस्ततः कार्यापत्त्या धर्मैः संबध्येरन्। न तु तेषां साधनत्वे किंचित्प्रमाणमस्ति। ये हि तावद्व्रीहिधर्माः कतिपया दृश्यन्ते तदुपादित्सया पुरुषः प्रवर्तमानो नान्तरीयकत्वान्नीवारत्वमुपादत्ते न कर्माङ्गतया। व्रीहि धर्माः पुनर्व्रीहिशब्देन प्रत्यक्षेणैव चोदिता इति समानविधानाः। न हि नीवारेभ्यो व्रीहिबुद्धिर्व्यावर्तत इति वक्ष्यति 'समान्यं तच्चिकीर्षा हि' इति। तेनाऽऽह तद्वदेवासौ प्रवर्तत इति॥ ३८॥ § 6973

अशास्त्रचोदितश्च प्रतिनिधिरर्थात्क्रियते। तस्मादपि निष्प्रमाणकम- 1059
स्य कार्यापन्नत्वमिति केचित्। न तु प्रतिनिधिरशास्त्रलक्षणः। प्रधानसमाप्तिचोदितत्वात्। यदि वाऽशास्त्रलक्षणः स्यान्नैव क्रियेत। न च तदकरणात्कश्चिद्दोषः स्यात्। अत एवं वर्णयितव्यं सूत्रम्। अशास्त्रलक्षणत्वान्नीवारत्वस्य कार्यापत्तिर्नास्ति। ये तु व्रीहिधर्माः प्रधानचोदनया सकलधर्मासंभवाच्च व्रीहिचोदनया विकला आश्रितास्तेऽर्थान्तरत्वाभावान्न कार्यापन्नाः॥ ३९॥ § 6974

इति मुख्यप्रतिनिध्योः सामानविध्याधिकरणम्॥ १४॥

## ०.०.१७२ मुख्यमन्दसदृशप्रतिनिध्योः सामानविध्याधिकरणम्

यद्यशास्त्रलक्षणत्वान्नीवाराणां कार्यापत्तिर्नास्ति। पूतीकानां तर्हि शास्त्रलक्षणत्वादनित्यत्वाच्च फलचमसवत्कार्यापत्तिप्रसङ्ग इति प्राप्तेऽभिधीयते। § 6976

यागसाधनतां कुर्यात्पूतीकानां यदि श्रुतिः।
ततः स्यात्कार्यवर्तित्वं न त्वेवं सा प्रवर्तते॥§ 6978

सोमनाशे हि प्रतिनिध्यपेक्षायां सत्यां पूतीका विधीयन्ते नं यागसाधनापेक्षायाम्। अतोऽयं प्रतिनिधिनियम एव भवति, यत्सकलसोमधर्मासंभवे विकलान्सोमधर्मानुत्पादयेत्तत्पूतीकगतानिति। वक्ष्यति हि 'नियमार्थः क्वचिद्विधिः' 'तन्नित्यं तच्चिकीर्षा हि' इति च। अतश्च नैवात्र पूतीकत्वं कर्माङ्गं, किं तर्हि, सोमधर्मोपलक्षणार्थम्। तेन श्रुतिलक्षणस्यापि पूर्वेणाविशिष्टत्वमिति।
तेनेहापि तदेव चिन्तायाः प्रयोजनम्। अतश्च तदाश्रयस्य तद्बुद्ध्यनपायाद्गुण- 1060

५ मा] (अ° ६ पा° ३ अ° ११ सू° २७)
७ निय] (अ° ६ पा° ३ अ° ४ सू° १६)
८ न्नि] (अ° ६ पा° ३ अ° ४ सू १७)

कामैः प्रवर्तितव्यम्। अन्ये त्वाहुः। सकलव्यक्त्याश्रयिणो हि गुणकामा वैकल्यादिह न प्रवर्तन्ते। नित्यस्य हि कर्मणोऽवश्यं प्रक्रमात्प्रक्रान्तस्य च सर्वस्यावश्यसमापनीयत्वात्किंचिद्धर्मवैकल्येऽप्यवैगुण्याभ्यनुज्ञा युज्यते। यथा तु काम्यानां प्रतिनिधिभिः प्रक्रमो नास्ति तथा गुणकामैर्न प्रवर्तितव्यम्। यदि तु प्रक्रान्ते कस्मिंश्चिद्गुणकामकल्पे द्रव्यनाशे सति प्रतिनिधीयते ततस्तस्यावश्यसमापनीयत्वाद्विकारेण प्रतिनिधिना वा तुल्यं समापनमित्यूहानूहावेव प्रयोजनम्॥ ४०॥ § 6979

इति मुख्यमन्दसदृशप्रतिनिध्योः सामानविध्याधिकरणम्॥ १५॥

## ०.०.१७३ गुणकामानामाश्रयेण सह सामानविध्याभावाधिकरणम्

अनेकग्रहचमसयागाभ्यासात्मकश्चतुःसंस्थो ज्योतिष्टोमोऽवधारितः। सर्वसंस्थासु तु ज्योतिष्टोमरूपमनुस्यूतम्। यथैव देवदत्तस्य रथानोपवेशनगमनशयनाद्यवस्थाभेदेऽपि देवदत्तत्वं नापैति तथा ज्योतिष्टोमात्मनः संस्थान्तरोपजनापाये तत्त्वं नापैति। संस्थानां च विरोधादन्योन्यं समावेशो नास्ति। ज्योतिष्टोमरूपं तु सर्वत्राविरुद्धमनुवर्तते। स च ज्योतिष्टोमः फलाय चोदितः 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति। तथोक्थ्यादिसंस्थानामपि 'पशुकाम उक्थ्यं गृह्णीयात्' इत्यादि फले विधानम्। तमेवंविधं ज्योतिष्टोमं प्रकृत्य दीक्षणीयादयो धर्माः समाम्नाताः। ते संदिह्यन्ते, किं सर्वसंस्थज्योतिष्टोमोद्देशेनाऽऽम्नाता उत केवलाग्निष्टोमसंस्थोद्देशेनेति। न त्वयमुपन्यासो युक्तः। न हि धर्मसंबन्धवेलायामुद्दिश्यमानस्य ज्योतिष्टोमस्य काचित्संस्था विशेषणत्वेन श्रूयते। यद्यपि कथंचिच्छ्रूयेत तथाऽप्युद्दिश्यमानविशेषणत्वान्न विवक्ष्येत। न चोक्थ्यादिग्रहणांशेन ज्योतिष्टोमस्य ग्राहकत्वं, फलसाधनभावाद्धि तत्रोक्थ्यादय एवेतिकर्तव्यतावन्तो भवन्ति। ज्योतिष्टोम-
1061 स्तत्राऽऽश्रयत्वेनोपसर्जनभावान्न धर्मग्रहणयोग्यो विज्ञायते। 'ज्योतिष्टोमेन स्वर्गकामः' इति चैतद्वाक्यगतस्य ज्योतिष्टोमस्य धर्मसंबन्धः सर्वसंस्थास्वविशिष्ट इत्यग्निष्टोमसंस्थमेवेत्ययुक्तम्। अत एवं वक्तव्यम्। किं ज्योतिष्टोमस्यैवैतद्धर्माम्नानमुतोक्थ्यादीनामपि संस्थानामिति। तच्चैवं समर्थनीयमेतदेव ग्रन्थेनोक्तमिति। यद्यपि संस्थाभिर्धर्मा गृह्यन्ते तथाऽपि तासां स्वयमक्रियात्मकत्वाज्ज्योतिष्टोम एवाऽऽश्रयत्वाद्द्वारं भवतीति किं सर्वसंस्थं प्रकृत्येत्याह। किं द्वारभूतं फलवन्तं च प्रकृत्योत फलवन्तमेवेत्यर्थः। यदा च केवलज्योतिष्टोमार्थत्वं तदा तदसाधारणत्वात्परिशेषाद्वाऽग्निष्टोमसंस्थस्यैव जायत

३ नीय] समापनीयत्वादिति—(अ° ६ पा° २ अ° ३) अत्रत्यन्यायेनोति शेषः।

इति तत्संस्थस्य व्यपदेशः। उक्थ्यादिषु हि यद्यपि ज्योतिष्टोमस्यापि ग्राहकत्वमस्ति तथाऽपि तन्न व्यज्यते किमुवथ्यादिगृहीता धर्मा एतस्य द्वारत्वाद्भवन्त्युताऽऽत्मीयफलसाधनत्वादिति। अग्निष्टोमसंस्था चास्य निजमङ्गम्। अतस्तत्संस्थो गृह्णन्नयं गृह्णातीति शक्यते वक्तुम्। तस्मात्सम्यगुपन्यस्तम्। धर्मसाधारण्यं चोपदेशातिदेशाभ्यां पक्षद्वयेऽप्यभ्युपगम्यत एवेति विधानग्रहणम्। किं प्राप्तम्। ज्योतिष्टोमेन सह समानं संस्थानां धर्मविधानम्। कुतः। प्रकरणाविशेषात्। ज्योतिष्टोमो हि फलवत्त्वादुपजातकथंभावस्तदनुवृत्तिसंनिधौ समाम्नातान्धर्मान् गृह्णाति न ज्योतिष्टोमत्वेन। तच्चोक्थ्यादीनामेतेष्वेव धर्मेषु सर्वमविशिष्टम्। उपदेशासंभवे चातिदेशो भवति। तस्मादुपदेश एव साधारण इति॥ ४१॥ § 6981

आज्यशेषस्य प्रतिपत्तिं विदधत्तुल्यवत्संस्थाक्रतुप्रकरणसंबन्धित्वेन कीर्तयति। यद्यग्निष्टोमो जुहोति यद्युक्थ्यस्तेनैव शेषेण परिधिमनक्ति। यद्यतिरात्रः, एतदेव होमयजुः, यमग्ने पृत्सु मर्त्यमिति जपन्हविर्धानं प्रतिपद्येतेति। अतो विज्ञायते सर्वोऽङ्गविधिः साधारण इति। सामान्यतो दृष्टमिवायुक्तमुक्तम्। यदि हि वाक्यवशेन किंचित्प्रकरणाम्नातं संस्थाभिः संबध्यते ततः किमसंयुक्तसंबन्धेनापि युक्तं भवितुम्। न हि 'द्वादशाहीनस्य' इत्यादिषु शेषधर्माणामप्यहीनार्थत्वमाशङ्कितम्। यावद्वचनं क्षयित्वाद्वचनानामित्येवं व्याचष्टे। 1062 यदि हि सामान्यविहितमग्निष्टोमसंस्थस्यैव स्याद्विनाऽपि तदुपादानेन तदङ्गत्वसिद्धेर्नात्राग्निष्टोमं संकीर्तयेत्। यतस्तु संकीर्तयत्यतो मन्यामहे नूनमविशेषितमग्निष्टोमस्य न लभ्यते। तच्चैवं न लभ्यते यदि संस्थानामपि साधारण प्रकरणम्। केवलज्योतिष्टोमप्रकरणपक्षे तु पुनःश्रुतिरनर्थिका स्यात्। तथोक्थ्यादीनामपि यदि प्रकरणमस्ति ततोऽन्यतरनिर्धारणार्थं यदिशब्दोपबद्धं ग्रहणं युक्तम्। अप्रकृतत्वे तु 'द्वादशाहीनस्य इतिवद्विनैव यदिशब्देन संबन्धः स्यात्। न हि ज्योतिष्टोमप्रकरणे स्थितस्यैवं वादो युज्यते। यदि ज्योतिष्टोमस्तत एतत्। यदि द्वादशाहस्ततोऽमुकमिति। अनेकसंनिहितापेक्षं ह्येतद्वचनं भवति। अतोऽपि समानं प्रकरणम्। अपरं लिङ्गम्। 'आग्नेयमजमग्निष्टोम आलभेत' 'ऐन्द्राग्नमुक्थ्ये द्वितीयम्।' 'ऐन्द्रं वृष्णिं षोडशिनि तृतीयम्' इति। समानविधानत्वे पूर्वपूर्वो ह्युत्तरोत्तरत्र प्रत्यक्षश्रुतत्वात्क्रियत इति द्वितीयतृतीयदर्शनमुपपद्यते। विकारपक्षे तु प्रत्यक्षश्रुतैरैन्द्राग्नादिभिराग्नेये बाधिते सर्वत्रैक एव स्यात्। ननु च प्रत्यक्षश्रुतत्वेऽपि संस्थान्तरे संस्थान्तरासंभवान्निर्निमित्तः पूर्वः पूर्वो न प्राप्नोति। यो ह्यग्निष्टोमस्तोत्रे समाप्यते सोऽग्निष्टोमो न तद्वन्मात्रम्। यश्चोवथ्यादिषु समाप्यते नासौ पूर्वत्र समाप्तो भवति। तेन द्वितीयदर्शनाद्यप्रसङ्गः पक्षद्वयेऽपि तुल्यः। सत्यं संस्थानिमित्तत्वे तुल्यः। स्तोत्रनिमित्तत्वे तु समुच्चयः। तथा च भाष्यकार आह—द्वे

२२ न्मात्र] मात्रशब्दः कार्त्स्न्यवाची। तेनोक्थ्यादिसंस्थायामग्निष्टोमस्तोत्रसत्वेऽपि नाग्निष्टोमस्तोत्रेण क्रतुप्रयोगोपरम इति नोक्थ्यादीनामग्निष्टोमसंस्थात्वमिति ज्ञेयम्।

हि तत्र निमित्ते अग्निष्टोमस्तोत्रमुक्थ्यस्तोत्रं चेति सिद्धवदेतद्ब्रवीति। क-
थं पुनः संस्थास्तोत्रसाधारणाग्निष्टोमादिसमभिव्याहारे तुल्ये स्तोत्रनिमित्त-
त्वमेवाङ्गी क्रियते न संस्थानिमित्तत्वम्। तासां हि फलवत्त्वेन प्रयोजन-
वत्त्वादक्लेशेनैव निमित्तत्वमापद्यते। तत्र केचिदाहुः। सत्यपि शब्दसाधारण्ये
शास्त्रस्य महाविषयत्वानुग्रहार्थं स्तोत्रनिमित्तत्वाश्रयणमिति। अथवा स्तोत्र-
विशेषिताया एव संस्थाया एवंशब्दकत्वात्पूर्वतरप्रतीतविशेषणनिमित्तत्वसंभवे
1063 जघन्यविशेष्यनिमित्तत्वकल्पना न युक्ता। यद्वाऽऽकृत्यधिकरणन्यायेनैव स्तो-
त्रेषु मुख्यः शब्दः संस्थायां लाक्षणिकः। श्रुत्यसंभवे च लक्षणाऽऽश्रयितव्या।
शक्नोति च स्तोत्रमपि सप्तमीनिर्देशान्निमित्तत्वं प्रतिपत्तुम्। निष्फलानामपि च
भेदनादीनां वचनसामर्थ्यान्निमित्तत्वमिष्टम्। अथवा 'संदिग्धेषु वाक्यशेषात्'
इत्येवं स्तोत्राश्रयणम्। सत्यपि वा संस्थानां मुख्यत्वे व्यवधारणकल्पनया
वाक्यशेषेण स्तोत्रपरिग्रहः। एवं हि श्रूयते 'आग्नेयमजमग्निष्टोम आलभेत'
'आग्नेयो ह्यग्निष्टोमः' इति। कतरस्मिन्नग्निष्टोमे, य आग्नेयः। स्तोत्रस्य च
स्तुतिभागग्निर्देवता विद्यते न संस्थायाः। सा हि व्यापारपरित्यागात्मकत्वाद-
भावभूता। न चाभावस्य देवतया कार्यमस्ति। यागाभ्यासेऽपि हि या देवता
सा तस्यैवाऽऽग्नेयत्वं करोति न संस्थायाः। न च स एव संस्था। त-
दुत्तरकालौदासीन्यवचनत्वात्संपूर्वस्य तिष्ठतेः। न चान्यगतया देवतयाऽन्यस्य
व्यपदेशो भवति। तथोक्थ्यषोडशिनोरपि दर्शयितव्यम्। अपि च 'ऐन्द्राग्ना-
न्युक्थ्यानि' इति स्फुटमेव स्तोत्रग्रहणम्। न हि संस्था, उक्थ्यानीत्यनेन
शब्देनोच्यते। तस्मात्सति स्तोत्रनिमित्तत्वे युक्तः समुच्चय इति। ननु विकारप-
क्षेऽप्यदृष्टार्थत्वात्पशुयागानामन्योन्यकार्यापत्त्यसंभवादुपपद्यत एव समुच्चयः।
तथा हि। § 6982

नाऽऽनुमानिकमात्रं यत्तत्प्रत्यक्षेण बाध्यते।
विरोधे सति बाधो हि विरोधश्चैकगोचरः॥§ 6984

यदि हि प्रत्यक्षश्रुतत्वमेव केवलं विरोधनिरपेक्षं बाधकारणं स्यात्ततो
न किंचिन्न बाध्यते क्रत्वन्तरगतं दृष्टार्थमदृष्टार्थं वा तुल्यकल्पमतुल्यकल्पं
वा। न चैतदिष्टम्। अत उभयोः पक्षयोः समुच्चयदर्शनमुपपन्नम्। तथा
च वक्ष्यति 'प्रकृतिलिङ्गासंयोगात्' इति। तथा 'प्राजापत्येषु चाऽऽम्ना-
नात्' इत्यादावेवंजातीयकानां तत्र तत्राविरोधात्समुच्चयं वक्ष्यति। तत्रैवं स-
माधिमाहुः। अस्त्येवात्र प्रकृतिलिङ्गसंयोगः सवनीयसमाख्यानिमित्तः। सर्वे
ह्येते सवनीयशब्देनोक्ताः। तस्मात्समाख्यानात्तुल्यकार्यत्वे सति, अस्ति वि-

---

७ द्वाऽऽकृत्य] ( अ॰ १ पा॰ ३ अ॰ ९ )।
१० वा] अ॰ १ पा॰ ४ अ॰ १३ सू॰ २४ )।
१९ उक्थ्या] उक्थ्यानीत्यनेनैति—उक्थ्यसंस्थाया एकत्वादुहुवचनविरोधापत्तेरिति शेषः।
२८ प्र] ( अ॰ १० पा॰ ४ अ॰ १ सू॰ १ )।
२८ प्रा] ( अ॰ १० पा॰ ४ अ॰ ४ सू॰ ६ )।

रोध इति प्राप्नोति बाधः। यद्येवं, ततः समानविधानत्वेऽपि सामान्यविशेषलक्षणबाधप्रसङ्गः। पूर्वपूर्वो हि पशुर्महाविषयत्वात्सामान्यविहितो भवति। उत्तर उत्तरोऽल्पावकाशत्वाद्विशेषविहितः। बाध्यते च सामान्यं सावकाशं वा विशेषेण निरवकाशेन वा। केचित्त्वाहुः। सर्वान्त्यस्य केवलस्य निरवकाशत्वादत्यन्तविशेषस्थत्वाद्बाधकत्वं भवेन्न मध्यमयोः। सत्यपि बह्वल्पविषयत्वे 1064 प्रमाणगतिस्तुल्या। यथैवाऽऽग्नेयः संस्थाचतुष्टयविषयत्वात्साधारणो भवत्येवमैन्द्राग्नोऽपि संस्थात्रयसाधारणः। यावता च यत्नेनासौ प्राप्नोति तावता च पूर्वोऽपि। मेष्यास्तु संस्थानिमित्तत्वेऽप्यदोषः। न हि तदधिका ज्योतिष्टोमे संस्थाऽस्ति। तस्मादबाध इति। उच्यते। यद्यपि न बाधस्तथाऽपि विकल्पस्तावत्प्राप्नोति। न हि तुल्यार्थानां क्वचित्समुच्चयो दृष्टः। सेयमुभयतःपाशा रज्जुः। यदि तावत्किंचिदपि कार्यान्यत्वं समुच्चयसिद्ध्यर्थमभ्युपगम्यते ततो विकारपक्षेऽपि समुच्चयः। अथ तत्र बाधं समर्थयितुं कार्यैकत्वं कल्प्यते ततः सामानविध्येऽपि व्रीहियवादिवदसमुच्चय इति। न चैतत्पूर्वपक्षवचनमात्रं सिद्धान्तेऽपि दर्शनमेवागत्या वचनीकृत्य समुच्चयं वक्ष्यति 'वचनात्तु समुच्चयः' इति। तदवश्यं वक्तव्यो विशेषः। स उच्यते। § 6985

समानविधिपक्षे हि सर्वे सर्वाङ्गभाविनः।
तान्निमित्तवशप्राप्तान्न समाख्या निवर्तयेत्॥ § 6987

सर्वे हि पशवः सर्वत्र प्राप्नुवन्तो यत्पूर्वसंस्थासु परे न भवन्ति तन्निमित्ताभावात्। प्रत्यक्षेण तु निमित्तेन पूर्वः पूर्वः परत्र वाक्यात्प्राप्नोति। तत्र किं समाख्ययैककार्यत्वं कल्पयित्वा बाधविकल्पयोरन्यतर आश्रीयतामुत वाक्यप्राप्तसमुच्चयानुरोधेन कार्यान्यत्वं कल्प्यतामिति वाक्यबलीयस्त्वात्समुच्चयेन भवितव्यम्। यथा प्रयाजानुयाजादीनां सत्यपि समाख्यैकत्वे वाक्यसामर्थ्यात्कार्यान्यत्वं समुच्चयश्च। अतिदेशे पुनः, समाख्यया कार्यैकत्वम्, अतिदेशेन कार्यान्यत्वं ( तेनापि समुच्चयः )। तस्माच्चोपदेशान्तर्गता समाख्यैव बलीयसीति तत्कृतं कार्यैकत्वमाश्रित्य विरोधाद्बाधः परिगृह्येत। विकारे च प्रकृतिलिङ्गसंयोगापेक्षा विद्यत इति कार्यापत्तिर्विज्ञायते। न तु समानविधिपक्षे प्रकृतिलिङ्गसंयोगः कश्चित्, येन कार्यापत्तिरवधार्येत। केचित्त्वाहुः। समानविधित्वे परस्परानपेक्षैर्द्रव्यदेवतासंयोगैः कर्मभेदोऽवसीयते। विकारे पुनरतिदेशप्राप्तयागानुवादेन गुणमात्रं विधीयते। ततश्चैक एव यागः स्यान्न द्वितीयादय इति। स त्वयं गुणविधिरैन्द्राग्ने संभवेन्नेन्द्रसरस्वत्योः। अनेकद्रव्यदेवताविधानेन वाक्यभेदप्रसङ्गादेकान्तेन कर्मान्तरता। तेनैवं समर्थनीयं, कर्मान्तरमेवेदं विधीयमानं किमपूर्वान्तरसाधनत्वं प्रतिपद्यतामुत प्राकृतस-

---

१३ सामा]
सामानविध्येऽपीति—सामानविध्यामिति पूर्वपक्षेऽपीत्यर्थः।
१४ ना] ( अ० ३ पा० ६ अ० १६ सू० १५ )।
२४ स्मा]
तस्माच्चेति—कल्पितादिदेशापेक्षत्वेत्यर्थः।

वनीयापूर्वमेव साधयत्विति। पूर्वक्लृप्तापूर्वविनियोगमात्रे संभवति नापूर्वान्तरं
कल्पयित्वा तत्साधनत्वाध्यवसानं युक्तम्। तथाऽत्तिदेशप्राप्तसवनीयापूर्वमपि
साधनापेक्षावेलायां प्रत्यक्षश्रुतसवनीयपरित्यागेन न सवनीयान्तरं गृह्णाति।
1065 सर्वापेक्षासु प्रकृतासंभवेनाप्रकृतग्रहणाद्यागगतोऽपि व्यापारः प्राकृतेनैवापू-
र्वेण क्लृप्तसंबन्धो न शक्नोत्यपूर्वान्तरसंबन्धं प्रतिपत्तुम्। कथम क्लृप्तसाम-
र्थ्यं सबनीयान्तरं प्राकृतमपूर्वं साधयतीति चेत्। यथेतरस्मिन्पक्षेऽपूर्वान्त-
रं यागगतं व्यापारमित्यदोषः। कस्तर्ह्यनयोर्विशेषः। उच्यते। यदा याग-
गतव्यापारेणापूर्वाण्यपेक्ष्यन्ते न तदा वैकृतसवनीयापूर्वं क्लृप्तं, यत्तस्मिन्नंशे
निपतेत्। यदा पुनरपूर्वेण कर्मापेक्ष्यते तदा सवनीयत्वप्रकृतिलिङ्गसंयुक्तं
कर्मान्तरं विद्यमानमवबुध्य प्राकृतं निराकरोति। प्रकृतौ चापूर्वकल्पनाव-
सराद्विधीयमानसवनीयचतुष्टयानुनिष्पाद्यपूर्वचतुष्टयं कल्प्यते। न हि तत्र
ज्ञायते कतरत्पूर्वतरं क्लृप्तं यस्य साधनान्तरसंबन्धः स्यात्। कर्मालोचन-
वेलायां हि कर्मरूपाण्येव दृश्यन्ते। अपूर्वकल्पनाऽपि युगपद्भवतीति न
ज्ञायते विशेषः। विकारपक्षे तु ज्ञायते प्राकृतस्य पूर्वतरं क्लृप्तिरित्यवश्याव-
हेयेऽन्यतरस्मिन्कर्मणि विप्रकृष्टं प्राकृतं हातव्यं भवतीति बाधप्रसङ्गः। ननु
च विकारपक्षेऽग्निष्टोमसंस्थाया एव विकारभूताः पराः संस्था भवन्ति न
परस्परेणेति केवलस्याऽऽग्नेयस्य प्राप्तस्य परैर्बाधात्सर्वत्र द्वितीयस्य दर्शनं
न स्यादित्येतावन्मात्रं वक्तव्यं किमुच्यते तृतीयस्य दर्शनं न प्राप्नोतीति।
नैष दोषः। यदि त्वयमैन्द्राग्नादीनां परत्र प्राप्तानां बाधाददर्शनं ब्रूयात्ततो
निष्प्रमाणकं वदेत्। अयं त्वदर्शनमात्रं वदति। तद्याऽऽग्नेयस्य बाधान्मध्यम-
योश्चाप्राप्तेतवपन्नमेव। तेनैव चाऽऽग्नेयो बाध्येतेत्याह—न पूर्वः पूर्वः परेणेति।
तस्मात्समानविधानाः॥ ४२॥ § 6988

उक्थादयः समाप्तिविशेषाः फलसाधनत्वेन चोद्यमानाः समाप्तिमन्तमाश्र-
यमपेक्षमाणाः प्रकृतं ज्योतिष्टोमं समाश्रयन्तस्तस्य निजामग्निष्टोमसंस्थां वि-
कृत्य निविशन्त इति विकारशब्देनोच्यन्ते। ननु चोक्थ्यादीनां समाप्तित्वे
सिद्धे समाप्तिमदपेक्षा भवति। न चैषां प्राग् ज्योतिष्टोमसंबन्धात्समाप्तित्व-
सिद्धिः, आरम्भमध्यापेक्षत्वात्समाप्तिशब्दप्रवृत्तेः। अथ प्रथमं तत्संबन्धस्ततः
1066 प्रथमं क्रत्वर्थत्वेऽवधारिते फलसंबन्धाभावात् 'स नित्यस्य समत्वात्' इत्येव-
मविकारत्वप्रसङ्गः। किंच। § 6989

ग्रहणादौ च विस्पष्टे चोद्यमाने फलं प्रति।
संस्थानां फलसंबन्धः कथमध्यवसीयते॥ § 6991

तत्र कैचिदाहुः। ग्रहणादीनामपि फलसंबन्धेऽधिकरणं गच्छत्येव किं ज्योतिष्टोमार्थो धर्मविधिरुत ग्रहणाद्यर्थोऽपीति। संस्थाशब्दः कथमिति चेत्।

१ क्लृ] पूर्वक्लृप्तेति—प्रकृतिक्लृप्तमित्यर्थः।
१० न्धेऽधिक] अधिकरणं गच्छत्येवेति—अधिकरणविचारः संगच्छत एवेत्यर्थः।
११ संस्था] एवमपि 'संस्थास्तु समानविधानाः' इति सूत्रस्थसंस्थाशब्दानुपपत्तिं शङ्कते—संस्थाशब्द इत्यादिना।

तेषां ग्रहणादीनामन्ते विधानात्समाप्तिसंबन्धोऽस्तीति तच्छब्दलाभः। 'पशुकाम उक्थ्यं गृह्णीयात्' षोडशिना वीर्यकामः स्तुवीत' इति पूर्वसमाप्त्युत्तरकालं चोद्यमानानां समाप्त्यन्तरव्यपदेशभाक्त्वं भवति। अन्ये त्वाहुः। ग्रहणादयोऽप्यत्र फलवत्समाप्त्यङ्गत्वेन प्राप्ता एव साध्यसाधनसंबन्धविधिपरे वाक्ये निर्वपत्यासभतिवदनूद्यन्त इति। कुतः। § 6992

संक्रान्तविधिसामर्थ्ये प्रत्यये धातुरुच्यते।
तस्मान्नाम्नः फलं ह्येतद्भवेदिन्द्रियकामवत्॥§ 6994

ननु च 'उक्थ्यं गृह्णीयात्' इति सामानाधिकरण्यप्रयोगान्नामापि ग्रहणादीनामेव स्यात्। नैतदेवम्। उक्थ्यस्तोत्रसंबन्धाद्धि समाप्तिरेवोक्थ्यशब्देनोच्यते, तत्संबन्धाद्ग्रहण उपचर्यते। न च मुख्यसंभवे गौणः परिगृह्यते। नित्यं तु यज्ञसामानाधिकरण्येनोक्थ्यादीनां प्रयोगो दृश्यते, 'उक्थ्येन यजेतोक्थ्यो यज्ञः' इति। तथा 'षोडशिना यजते षोडशी यज्ञः'। स वै षोडशी नाम यज्ञोऽस्तीति। स चात्यन्ताव्यतिरिक्तसमाप्तिवचनत्वेऽवकल्पते न ग्रहस्तोत्रवचनत्वे। षोडशीति च पुंलिङ्गः समाप्तिवचन एवोपपद्यते। नपुंसकलिङ्गस्य स्तोत्रवचनत्वात्। यस्तु पुंलिङ्गप्रयोगः स्तोत्रे क्वचिद्दृश्यते यथा 'एकविंशः षोडशी' इति, स गौण इति प्रतिपत्तव्यम्। इह वाक्यशेषे पुंलिङ्गः षोडशी प्रतीयत इति संस्थावचनः। 'अतिरात्रेण प्रज्ञाकामम्' इति विस्पष्टमेव संस्थावचनत्वम्। न हि तत्र क्रियान्तरमुपात्तम्। यजिरपि च ण्यर्थोपसर्जनत्वेन श्रुतः क्लेशेन प्रधानीकर्तव्यः। तस्माद्रात्रिमतीत्य या समाप्तिः सा फलेन संबध्यते। यदि च ग्रहणस्तोत्रयोः फलसंबन्धः स्यात्ततस्तयोः क्रियात्वादाश्रयापेक्षा नास्तीति स्वतन्त्रयोरेव प्रयोगः प्राप्नोति। तत्र च प्रकरणाम्नानप्रयोजनमुक्थ्यादिशब्दप्रयोगश्च न ज्ञायेत। तस्मादपि समाप्तयः फलवत्यः। कथं तु प्राक् क्रतुसंबन्धात्समाप्तित्वमिति। केचित्तावदाहुः। 'सप्त सोमसंस्था अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडश्यतिरात्रो वाजपेयोऽप्तोर्यामः इति स्मरणात्सोममात्रसमाप्तिवचनत्वे सिद्धे कर्मान्तराण्यनादृत्य सोमयागमात्रेऽपेक्षिते 1067
प्रकरणाज्ज्योतिष्टोमस्याऽऽश्रयत्वसिद्धिरिति। अन्ये तु मन्यन्ते। ज्योतिष्टोमस्य क्वचिदभ्यासविशेषे समाप्त्यन्तरं विज्ञायते यदुत्पद्यमानमेवोक्थ्यादिव्यपदेशं लभते फलसंबन्धं च तत्र श्रुतिबलीयस्त्वात्प्रकरणलभ्यं क्रत्वर्थत्वं बाध्यते। यस्त्वाश्रयाश्रयिसंबन्धः सोऽनुगुणत्वादाश्रीयते। § 6995

अपरं दर्शनम्। उक्थ्यादिशब्दवाच्यं किमपि प्रथममेव फलेन संबध्यते। किं पुनस्तदित्यपेक्षायां वचनान्तरेण ज्योतिष्टोमस्य समाप्त्यन्तरं विज्ञायते। यद्वाऽभ्यासविशेष एवायं वचनान्तराज्ज्योतिष्टोमस्यान्ते निविशमानः फलाय चोद्यते। तेन वा तस्मिन्वा क्रतुः संतिष्ठत इति संस्थाशब्देनाभिधीयते। केचित्पुनर्मन्यन्ते। संस्था नामान्ययागाभ्यासानन्तरं या क्रियोपरतिः

१२ स] नवे, नैवेति च क्वचिदुपलभ्यते।
२३ केचि] प्रथमं तावद्याज्ञिकमतमाह—केचितावदित्यादिना।

साऽभिधियते। न चाक्रियात्मकत्वात्तस्याः फलसाधनत्वं युक्तमतस्तदुपलक्षितोऽभ्यासश्चोद्यत इति। अन्ये त्वाहुः। वचनस्यातिभाराभावादभावोऽपि चोद्यमानः फलसाधत्वेन नैव विरुध्यत इति। यथा ‘अकुर्वन्विहितं कर्म’ इत्यत्राकरणस्यासतः प्रत्यवायहेतुत्वम्। अथवाऽस्त्येवात्रौदासीन्यप्रतिपत्तिरूपः संकल्प इत्यविरोधः। इह च यथा गुणात्फलं भवति यथा च काम्यो गुणो नित्यमर्थं विकरोति तदिन्द्रियकामाधिकरणगोदोहनाधिकरणाभ्यामुपसंहर्तव्यम्। तद्दर्शयति—गुणादेवंजातीयके फलनिष्पत्तिः। एवं हि श्रूयते ‘पशुकाम उक्थ्यं गृह्णीयात्'। न ज्योतिष्टोमकाम उक्थ्यग्रहणकामो वा, इत्यनेन क्रत्वर्थत्वं निराकरोति। क्रत्वर्थत्वे हि सति, अन्तरेणापि कामपदोपबन्धं तदुपकारकमेवैतत्कर्तव्यमिति विज्ञायते। यदि चोक्थ्यग्रहणस्वरूपमात्रं चिकीर्षेत ततोऽर्थादुक्थ्यग्रहणकामस्यैष विधिर्भवेद्यस्यैवं प्रार्थनमुक्थ्यग्रहणस्वरूपमात्रं कथं निर्वर्ततामिति। तत्तु द्वयमपि पशुकामोपादानादनवक्लृप्तम्। अतः काम्यत्वादस्ति गोदोहनन्यायेन विकारत्वम्। तत्र कथमिति—इतिकर्तव्यताकाङ्क्षायां ज्योतिष्टोमगृहीतेतिकर्तव्यताऽतिदिश्यते। कः पुनरिह प्रकारो येनेतिकर्तव्यता गृह्यते। यदि तावत्संनिधानं ततः समानविधानमेवाभ्युपगतं भवति। न ह्यतिदेशस्य संनिधिः कारणं, सारूप्यप्रभवत्वेन वक्ष्यमाण-
1068 त्वात्। अथ कार्यापत्त्या, तत्रापि कारणान्तरत्वं निराकृतम्। न च दीक्षणीयादयः संस्थाधर्माः। यतः कार्यापन्ने संस्थान्तरे भवेयुः। न ज्योतिष्टोमस्योक्थ्यादयः कार्ये वर्तन्ते। यतस्तद्धर्मान्प्रतिपद्यन्ते। एतेनातिदेशपक्षः प्रत्युक्तः। यो हि मन्यतेऽतिद्रेशेन धर्मा भविष्यन्तीति, तस्याप्यतिदेशकारणं सारूप्यं नास्तीति। यद्यप्यग्निष्टोमस्य संस्थया सामान्यमस्ति। ज्योतिष्टोमस्य तु न किंचिदुक्थ्यादिसारूप्यमित्यप्रकृतित्वम्। अत एव च भाष्यकारोऽपि संनिधानादित्येतावन्मात्रमुक्त्वा तूष्णींभूतः। तेन वक्तव्यमेतत्। उच्यते। § 6996

अतिदेशोऽयमित्येतत्पुरस्तादेव साधितम्।
न च सारूप्यमेवैकमतिदेशस्य कारणम्॥§ 6998

यथा ‘दध्नेन्द्रियकामस्य’ इत्यत्र व्याख्यातं, विनाऽपि सारूप्येणान्यथा तत्फलाप्राप्तेरतिदेशो भवति। सारूप्यं हि प्रकृत्युपस्थापनद्वारेणोपयुज्यते नादृष्टोपकारनिर्वृत्त्या। तदिहान्तरेणापि सारूप्यमाश्रयत्वप्रतिपत्तिः संनिधानादस्त्येव। भाष्यकारोऽप्येतदेव संनिधानमाह, न दीक्षणीयादिसामीप्यम्। आश्रयत्वेन हि गृहीतो ज्योतिष्टोमः शक्नोति दीक्षणीयाद्यपूर्वजानितं स्वगतं व्यापारं बोधयितुमिति सिद्धोऽतिदेशः। आह। कथं पुन-

---

२ अ ] तत्र स्वमतमाह—अन्ये त्वाहुरित्यादिना।
६ कामा ] ( अ॰ २ पा॰ २ अ॰ ११ )।
६ नाधिक ] ( अ॰ ३ पा॰ ६ अ॰ ३ )।
१७ त्वा ] वक्ष्यमाणत्वादिति-सप्तमाध्याय इति शेषः।
१७ निराकृत ] निराकृतमिति—‘नैमित्तिकमतुल्यत्वात्’ इति सूत्रे, किं कार्यापत्तिरुपदेशातिदेशाभ्यामन्या, एतयोरेवान्तर्गता वा’ इत्यादिना ग्रन्थेनास्माभिरिति शेषः।

र्येयमितिकर्तव्यता सा नित्यस्य, न पुनरस्यैव काम्यस्य, साधारणी वेति। § 6999

तत्र साधारणीत्येष न्याय्यः पक्षोऽस्य संमतः।
काम्यस्यैवेति सोल्लुण्ठं पूर्वोक्ताक्षमयोदितम्॥§ 7001

यदि युक्त्या विनैवेयं नित्यस्येत्यभिधीयते।
काम्यस्यैवेति किं नैतदयुक्ततरमुच्यते॥§ 7003

अथ त्वयुक्तियुक्तत्वान्नैवमभ्युपगम्यते।
हन्त साधारणीत्येतत्सयुक्तिकमिहोच्यताम्॥§ 7005

यदि विनैव प्रमाणेन केवलनित्यार्थत्वं त्वमिच्छसि हन्त मदिच्छयाऽपि केवलकाम्यार्थत्वमेवास्तु। अथ पुनरिदमप्रमाणकमिति नाऽऽश्रीयते ततः प्रमाणवत्साधारण्यमिष्यतामिति। तत्रातिशयोक्तिमसहमानो भाष्यकारः साधारणपक्षे चोपकरिष्यतीति निष्प्रमाणकमपि केवलकाम्यपक्षमेव ताव- 1069
न्न्यायेन निराकरोति—यत्र यत्र गुणे कामस्तत्र तत्र क्रियायां साध्यमानायां नान्यथेति। यदि नाम गुणः स्वातन्त्र्येणेतिकर्तव्यतां ग्रहीतुं शक्नुयात्तत एवं स्यात्। स च कथं शक्नुयात्, यदि करणैरेवेतिकर्तव्यता संबध्येत। यदि च गुणानां स्वत एव भावनाविशेषणत्वं भवेत्। न तावत्करणैरितिकर्तव्यता संबध्यत इत्युक्तम्। सप्तमनवमाद्ययोश्च वक्ष्यति भावयेत्कथमित्यपेक्ष्य भवति न करणेन कथमिति। यस्यां तु भावनायां धात्वर्थाः करणं भवन्ति तस्यां ते वस्त्वन्तरनिरपेक्षाः पश्चात्तनमरुणैकहायनीन्यायलभ्यमितिकर्तव्यतासंबन्धं लभन्ते। यस्यां पुनर्गुणानां करणत्वं तस्यां धात्वर्थविशेषाद्विना करणत्वानुपपत्तेः साध्यभूतो धात्वर्थोऽपरोऽपेक्षितव्यः। न हि व्यापारसामान्यस्य गुणैरुत्पत्तिः शक्या। न च क्रियाविशेषसाधयन् गुणः सामान्यसाधनत्वं भजते। तेन यस्यां भावनायामवस्थितो गुण इतिकर्तव्यतां गृह्णाति तस्यां प्रथमतरसंनिविष्टो धात्वर्थो दृश्यते। ततश्च तेन तावत्सह प्रथमतरमरुणैकहायनीव न्नियमः। यदि हीतिकर्तव्यताग्रहणयोग्यः स न भवेत्ततो न गृह्णीयात्। स तु फलवत्त्वादितिकर्तव्यताद्वारभूतभावनाविशेषणत्वाच्च न कथंचिन्न गृह्णाति। तत्र चतुष्टयमप्यत्र प्रथमतरं ग्रहणं प्रयुङ्क्ते। भावना तावन्न धात्वर्थविशेषाद्विनेतिकर्तव्यतां शक्नोति ग्रहीतुम्। गुणोऽपि च न धात्वर्थमनुपनीय स्वतन्त्रः शक्नोति तन्निरपेक्षभावनारहितत्वान्निर्विशेषस्य च करोत्यर्थमात्रस्याननुष्ठेयत्वादव्यापारत्वाच्च ग्रहीतुमित्याश्रयति। तथा, इतिकर्तव्यता गुणाभिमुखं गच्छन्ती न धात्वर्थ-

१४ गुणः] गुण इति—काम्यो गुण इत्यर्थः।
१७ इत्युक्त] उक्तमिति—इन्द्रियकामाधिकरण इति शेषः।

३० ग्र] ग्रहीतुमिति—इतिकर्तव्यतामित्यर्थः।
३० य] आश्रयति—धात्वर्थमिति शेषः।

मुल्लङ्घ्य शक्नोति गन्तुमिति तन्मुखे तावत्पतति। धात्वर्थोऽपि स्वयमितिकर्तव्य-
ताकाङ्क्षः सन् गुणार्थमपि प्रस्थितामेतां ग्रहणसमर्थः सन्किमिति परित्यजेत्।
अतोऽत्र फलाय चोदितानामुक्थ्यादीनां ज्योतिष्टोमाश्रयत्वेनावगतानामितिक-
र्तव्यतामाकाङ्क्षतां प्रकरणेन दीक्षणीयादय उपनीयमाना मार्गान्तराभावाद-
वश्यं तावज्ज्योतिष्टोममुखे पतन्ति। न ह्युक्थ्यादयः समाप्तिरूपास्तत्परिहारेण
ग्रहीतुं समर्थाः। स्वमुखपतितांश्च न कथंचिज्ज्योतिष्टोमस्तानुपेक्षते। तद्दर्श-
यति—नासौ साध्यस्याभवन्ती साधनेन संबध्यते। स हीतिकर्तव्यताविशेष
एवं चोद्यते, अनेन फलस्य साधनमुक्थ्यादि साधकं कुर्यादिति। यथाऽसौ
साधको भवति तथा कुर्यादित्यर्थः। ततश्च करोतिसंस्पर्शाद्भावनयैव संब-
न्धः। एवं च सति नास्ति स प्रकारो येन धात्वर्थं परिहृत्यानयेतिकर्तव्य-
तयोक्थ्यादयः साधकाः क्रियेरन्। क्रियायामसाध्यमानायाम्—अननुगृह्य-
1070 माणायामित्यर्थः। ये तु तेनासाध्यमानायामिति—उक्थ्यादिनेति सबन्धय-
न्ति तेषां पूर्वप्रस्तुतेतिकर्तव्यताविशेषपरित्यागादसंबद्धत्वम्। तत्र तत्क्रियायां
साध्यमानायामित्यनेन च पुनरुक्तत्वं स्यात्। तेन साधकस्यापि— गुणस्य,
इतिकर्तव्यतामिच्छता साध्यस्यासौ—धात्वर्थस्य, इत्येतदभ्युपगन्तव्यम्। एवं
सामान्यलक्षणमुक्त्वा संप्रति प्रस्तुते विशेषे योजयति साध्यश्च ज्योतिष्टोम
इति। तस्मान्न तावत्केवलकाम्यार्थत्वम्। अथ कस्मान्न साधारणत्वमिति—
बलवत्त्वेन द्वितीयपक्षोपन्यासः। सिद्धान्तवाद्याह। नित्यवदाम्नानादिति। स-
र्वत्र ह्येकरूप्ये सति तन्त्रसंबन्धो घटते। न च धर्मान्प्रति ज्योतिष्टोमस्य
संस्थानां चैकरूप्यमस्ति। धर्मा हि कामनिमित्तसंयोगाभावान्नित्यवदाम्नाय-
न्ते, यदैव ज्योतिष्टोमस्तदैव दीक्षणीयादयः प्रयोक्तव्या इति। सत्यपि च
ज्योतिष्टोमे विना पशुकामादिनोक्थ्यादयो न संभवन्ति। न त्वेतासु ज्यो-
तिष्टोमः कदाचिन्नास्ति। सर्वत्र समस्तात्मना प्रत्येकं जातिवत्समवेतत्वात्।
अत एते यथाम्नाता ज्योतिष्टोमेन सह संबध्यन्ते, नानित्याभिः संस्था-
भिः। ननु सत्यप्यासामनित्यत्वे ज्योतिष्टोमस्यैकस्य नित्यत्वान्नित्यवद्धर्माम्नानं
नित्यार्थत्वे न विरोत्स्यते। नित्याम्नानं तावत्तं प्रति कृतार्थं भविष्यति। य-
दि तु तस्मिन्सत्येवानित्योऽप्यपरः संबन्धः कल्प्यते किं नो बाध्यते। यो
ह्यनित्यार्थमेव नित्यवदाम्नायते स विरुध्यते नैवजातीयक इति। नैतदेव-
म्। एवं सति तन्त्रं तावत्परित्यक्तम्, अप्रयोजकलक्षणापन्नत्वात्। यदा हि
नित्यवदाम्नानं नित्यार्थत्वेन तावद्विना न भवति क्लृप्ते च तादर्थ्ये निराका-
ङ्क्षीभूते पाठे प्रसङ्गादितरसंबन्ध इति न सामानविध्यम्। इतरथा ह्येवं
धर्मविधिः स्यात्, नित्यमेतान् ज्योतिष्टोमे धर्मान्कुर्यात्कदाचिच्च यदा प-
1071 शुकामादयो भवन्तीति, तच्च विप्रतिषिद्धमेकस्य विधानस्य। ननु द्वावेतौ प्र-
करणाम्नानानुमितौ विधी। तयोरेको नित्यवद्विधास्यति, अपरश्चानित्यवदिति।
सत्यं प्रयोगवचनयोर्भेदादविप्रतिषेधः। प्रयोज्यवचनानि तु नित्यानित्यप्रयोग-

२४ ए] एते—दीक्षणीयादयो धर्मा इत्यर्थः।

वचनानुविधानाद्विप्रतिषिध्यन्ते। तेनैषां नित्यत्वाविघातमिच्छताऽवश्यं ग्राहकमपि तद्रूपमेवाभ्युपगन्तव्यम्। अतश्चाव्यभिचाराज्ज्योतिष्टोमार्थत्वमेव युक्तमिति। नन्वग्निष्टोमसंस्थाऽपि काम्येति—यदा सर्वसंस्थानामनित्यत्वं, न च तद्व्यतिरिक्तं नित्यं किंचिज्ज्योतिष्टोमरूपमस्ति तदा ज्योतिष्टोमेन नित्यवद्ग्रहणात्तद्द्वारभूतेन तुल्यकल्पमेव सर्वासा धर्मोपनयनमिति क्व नित्यः प्रयोग इत्यनवधारणात्केवलानित्यार्थं बलाद्वैकल्पिकन्यायेन भविष्यतीत्यत आह—स नित्यस्य समत्वादिति। समौ हि क्रत्वर्थपुरुषार्थौ विधी। तौ हि द्वावालोच्य ‘एकस्य तूभयत्वे संयोगपृथक्त्वम्’ इत्येवमग्निष्टोमान्तस्य नित्यस्यैव कामसंयोग इति। इतरस्य तु केवलकामसंयोगादनित्यत्वमिति विशेषः। तेन यद्यपि प्रयोगेणेयमनित्या तथाऽपि ज्योतिष्टोमस्य नित्यत्वादेतस्याश्च तं प्रति प्राप्तिरूपेण नित्यत्वात्तद्गृहीतधर्मपरभागलाभाद्याग्निष्टोमस्येत्येवं धर्माणां व्यपदेशः। अथ वोक्थ्यादिष्वपि प्राप्तिद्वये सति ज्योतिष्टोमांशेन या प्राप्तिः सोपदेशेन, योक्थ्यांशेन साऽतिदेशात्मिकेति विवेकः॥ ४३॥ ४४॥ § 7006

विशिष्टविधानस्य नातिभारः॥ ४५॥ § 7007 1072

क्रतुकरणेषु चोत्तरविधौ यत्पूर्वाभावमनुवदति स विकारपक्षेऽवकल्पते। चोदकप्रातस्य चोत्तरेण पूर्वस्य बाधितत्वात्। सामानविध्ये हि प्रत्यक्षनिमित्तसंनिधानात्प्राप्ते निमित्ते नैमित्तिकमवश्यं कर्तव्यमिति समुच्चयः स्यात्। तत्र प्रतिषेधः पृथग्विधेरुपगम्यमानो वाक्यं भिन्द्यात्। न ह्यत्र द्वितीयतृतीयादिवद्विशिष्टविधिरवकल्पते। विधिप्रतिषेधयोर्विप्रतिषेधात्, पर्युदासासंभवाच्च। सर्वश्चेह सवनीयपशुविषयः पूर्वपक्षवाद्युक्तो न्यायः सिद्धान्तत्वेनानुसंघातव्यः। संस्थानिमित्तत्वे हि सामानविध्येऽपि निमित्ताभावादभावदर्शनमुपपद्येतैव। सिद्धान्तेऽपि चादृष्टार्थत्वात्समुच्चयप्रसङ्गे सति क्रतुकरणसमाख्या प्रकृतिलिङ्गमिति योज्यम्। केचित्पुनराहुः। प्रचरणीहोमशेषप्रतिपत्तिवद्धोमस्य परिध्यञ्जनेन प्रतिपादिते सामानविध्येऽप्यभावः। सिध्यतीति। तत्र तु वाक्येन स्वतन्त्रे विधीयमाने कथमप्रस्तुतं प्रतिपत्तित्वमवगम्यत इति वक्तव्यम्। सत्यपि च होमेन प्रतिपादने यावता परिध्यञ्जनशब्दार्थो निर्वर्तते किंचिच्च श्रुत्योच्यते तावत्पुनः संभवत्येव। तस्माद्यथोक्तेन न्यायेन दर्शनमेवेदमभावसंकीर्तनम्॥ ४६॥ § 7008

यत्त्वप्रकृतस्य यदिशब्दोपबन्धो द्वादशाहादिवन्नावकल्पत इति। नोक्थ्यादीनामन्यैरप्रकृतैस्तुल्यता। यद्यपि ह्येषां नित्यानित्यसंयोगविरोधात्प्रकरणमग्राहकमितिकर्तव्यतायास्तथाऽपि संनिहितत्वाद्यदिशब्दव्यपदेशं लभन्ते। प्रस्तुतगुणिद्वारेण वाऽप्रस्तुतानामपि गुणानां प्रस्तुतव्यवहारः संभवति। प्रकरणप्राप्तं त्वग्निष्टोमग्रहणं नित्यानुवादः। अथवा स्तोत्रनिमित्तत्वप्रतिपादनपरत्वादर्थवदेवेत्यदोषः। किं भवति प्रयोजनम्। फलचमसवदे देवेति केचित्। इदं 1073
तु वक्तव्यम्। सत्यमेतत्प्रयोजनं न तु सर्वधर्मेषु। यावन्तो हि सदोमानादिषु गुणकामास्ते सत्यप्यतिदेशे स एवौपदेशिक आश्रयोऽस्तीति न विकृत्य-

८ ए] (अ० ४ पा० ३ अ० ३ सू० ५)

न्तरवद्विहन्यन्ते। विकृत्यन्तरेषु हि ज्योतिष्टोमस्याऽऽश्रयस्याभावाद्गुणकामा यथाश्रुता न भवन्तीति न सिध्यन्ति। संस्थासु तु यद्यप्यङ्गफलं नातिदिश्यते तथाऽपि स्वयमर्थित्वात्पुरुषस्य चिकीर्षमाणस्य गुणोपादित्सायां यथाश्रुताश्रय-संभवे नानुपपत्तिर्गुणकामानाम्। अतो यन्मात्रमुक्थ्यादिसंस्थानिमित्तमुक्थ्य-ग्रहणस्तोत्रशस्त्राद्यप्राकृतं तत्र यदितरग्रहस्तोत्रशस्त्रधर्मातिदेशेन किंचिद्गुण-कामगतं प्राप्नोति तन्न भवतीति प्रयोजनम्। तथेदमपरं, यदि समानविधानं तत ‘अव्यक्तासु तु सोमस्य’ इत्यनेन न्यायेन ये ज्योतिष्टोमविकारा विज्ञाय-न्ते तेषु सर्वाः संस्था विल्कपेन, सिद्धान्ते त्वग्निष्टोमसंस्थैवैका प्रवर्तते। य-त्र चोक्थ्यादिविशेषचोदना तत्रैव केवलं तद्धर्मप्राप्तिरिति प्रयोजनं सिद्धम्॥ ४७॥ § 7009

इति गुणकामानामाश्रयेण सह सामानविध्याभावाधिकरणम्॥ १६॥

इति श्रीभट्टकुमारिलविरचिते मीमांसाभाष्यव्याख्याने तन्त्रवार्तिके
तृतीयाध्यायस्य षष्ठः पादः।

## ०.०.१७४ बर्हिरादीनामङ्गप्रधानसाधारण्याधिकरणम्

समानासमानविधानाधिकारेणैवैतदपि प्रस्तूयते वाक्यप्रकरणविरोधाविरोध-द्वारेण। दर्शपूर्णमासप्रकरणस्था वेदिः तद्धर्माश्च खननादयस्तथा बर्हिस्त-द्धर्माश्च लवनादयः किमर्था इति। यद्यपि ‘वेद्यां हवींषि’ ‘बर्हिषि ह-वींषि’ ‘बर्हिर्लुनाति’ ‘वेदिं खनति’ इति चाविशेषितेन वाक्येनाङ्गप्रधानार्थत्व-
1074 बुद्धिर्भवति। तथाऽपि स्वातन्त्र्ये सति लौकिकेष्वपि गृहाच्छादनार्थेषु बर्हिःषु धर्मप्रसक्तावानर्थक्यादवश्यमपूर्वसाधनताकारितः संबन्धोऽभ्युपगन्तव्यः। सा चापूर्वसाधनता न वाक्यसामर्थ्येन प्रतीयत इति प्रकरणाल्लब्धव्या। ततश्च प्र-धानमात्रस्य तत्प्रकरणमित्यनेन विशेषेण प्रधानस्यैव धर्मा गम्यन्ते। सत्यपि च प्रकरणस्याविशेषकत्वे ग्राहकत्वेनैव विशेषरूपेण विनियोजकत्वाद्विशेष-स्थापनहेतुत्वमित्युक्तम्। असंयुक्तमिति च सत्यपि वाक्येन हविर्बर्हिःसंयोगे प्रकरणविरोध्यर्थासंयोगाभिप्रायम्। शक्यौ हि हविर्बर्हिःशब्दौ प्रकरणेन स-मावेशयितुं नाहीनवदसंबद्धाविति मन्यते॥ १॥ § 7012

सर्वेषां वाक्यसंयोगाविशेषादित्युक्तमेव। यत्तु प्रकरणं विशेषेण विनियोजकमिति, तत्राऽऽह—अतत्प्रयुक्तत्वात्। न प्रकरणमिह विशेषकं

७ अ] (अ॰ ८ पा॰ १ अ॰ ९ सू॰ १६)
८ पेन] प्रवर्तन्त इति शेषः। धर्मप्रदेशका भवन्तीति यावत्।
८ त्र] तत्प्रकरणमिति—दर्शपूर्णमासप्रकर-णमित्यर्थः।
१० मित्युक्त] (अ॰ ३ पा॰ ४ अ॰ ५) अश्रूयमाणाधिकरणे भाष्यकृद्भिरिति शेषः

भवतीत्यर्थः। कथं पुनः स्थितं प्रकरणस्य विनियोजकत्वं निवर्तते, कथं वा तादर्थ्यलक्षणव्यतिरिक्तं च बहुदोषमुपकारलक्षणं शेषत्वं प्रतिज्ञायते। उच्यते। नैव प्रकरणस्यैवंजातीयकेषु विनियोजकत्वं स्थितम्। 'असंयुक्तं प्रकरणात्' इति ह्युक्तम्। यत्तु विरोधो नास्तीति। कथं नास्ति, यदा बर्हिषां प्राधान्यात्प्रत्येकं धर्मसंबन्धे सति अङ्गार्थत्वमपि ज्ञायमानं प्रकरणानुरोधेन व्यावर्त्यते। परस्तु येन कारणेन वाक्यस्यातिप्रसरे बाधिते निर्विरोधं प्रकरणमवगतवानिदानीं तदुपन्यस्यति लौकिकेऽपि प्राप्नोति ततश्चाऽऽनर्थक्यमिति। तस्योत्तरमेतदेव वक्तव्यम्। स्वरसप्रवृत्तं वाक्यं यावत्येव विस्पष्टमानर्थक्यं तावन्मात्रादेव निवर्तताम्। न चाङ्गबर्हिषां लौकिकवदानर्थक्यम्। अतस्तत्र भविष्यति। न चातिप्रसज्यत इति। अनेनैव चाभिप्रायेण, उपकारलक्ष- 1075 णं हि तदिति तादर्थ्यमेव फलेन व्यपदिष्टम्। यदर्थं हि कल्प्यमानं प्रयोजनवद्विज्ञातुमाकाङ्क्षितोपकारनिष्पत्त्या शक्यते तदर्थं कल्पनीयम्। यत्तु भाष्यकारेणातिप्रसङ्गनिवृत्त्यर्थं प्रकरणादित्युक्तं तदुत्तरपरिचोदनानवतारप्रसङ्गादतित्वरितोक्तमित्युपेक्षणीयं तावत्॥ २॥ § 7013

यदि ह्यानर्थक्याल्लौकिकाद्बर्हिषो धर्मनिवृत्तिस्ततो यत्र तदानर्थक्यं नास्ति कर्मान्तरार्थे बर्हिषि, तत्र प्रवृत्तिः प्राप्नोति। यदि तु कश्चित्तन्निवृत्त्यर्थो हेतुः सोऽङ्गेष्वप्यविशिष्टः। तत्र सौर्यादिष्वितरथाऽप्यतिदेशेन सन्त्येव धर्मा इत्युपदेशातिदेशप्राप्तिरहितत्वात्पिण्डपितृयज्ञ उदाहरणम्। अपूर्वो ह्ययमनङ्गं चेति स्थास्यति। तेनात्यन्तानिष्टप्रसङ्ग इति॥ ३॥ § 7014

भवेदेतद्यदीदं वाक्यं स्वतन्त्रं स्यात्। बर्हिर्वेदितद्धर्माणां तु यद्वाक्यं तद्दर्शपूर्णमासाभ्यां सहैकम्। तेन वाक्येन सहैकवाक्यतां गतमित्यर्थः। तेन 1076 यत्तदेकवाक्यान्तर्गतं बर्हिस्तस्यैवैतद्धर्मप्राप्तिर्न भिन्नवाक्यगतस्य। न त पिण्डपितृयज्ञबर्हिर्दर्शपूर्णमासवाक्यान्तर्गतम्। अतो न संभन्त्स्यत इति। ननु यदि दर्शपूर्णमासाभ्यां सहैकवाक्यत्वमिष्यते ततस्तत्प्रकरणं मुक्त्वा नान्येन लभ्यते। तच्च प्रकरणं प्रधानमात्रस्यैवेत्यङ्गानामसंबन्धः प्राप्नोति। नैष दोषः। सर्वथा लवनखननादयस्तावन्न साक्षादङ्गेन प्रधानेन ना संबन्धुं शक्नुवन्ति। यत्र वेदिबर्हिषी तत्र गमिष्यन्ति। वेदिबर्हिषोरपि हविरासादनेन संबन्धः।

---

२ हुदोष] बहुदोषमुपकारलक्षणं शेषत्वमिति। अयमाशयः। यद्युपकारकत्वं शेषत्वं तदा कृष्णदीनामपि परम्परया यागाद्युपकारकत्वाद्यागाङ्गतापत्तिः। यदि विहितत्वघटितं तद्विवक्ष्यते तदाऽपि 'गोदोहनेन पशुकामस्य प्रणयेत्' इति वाक्येन पश्वङ्गतया विहितस्य गोदोहनस्य प्रणयनोपकारकत्वात्तदङ्गत्वापत्तिः। अथान्यानुपकारकत्वघटितं तदा गोदोहनस्य प्रणयनान्यपशूपकारकत्वान्नातिप्रसङ्ग इति चेत्। गोदोहनस्य पश्वङ्गत्वमेव न स्यादित्यादिबहुदोषग्रस्तत्वादवश्यं परोद्देशप्रवृत्तकृतिकारकत्वेन विहितत्वरूपमेव शेषत्वं निर्वाच्यमिति।

३ असंयु] (अ॰ ३ पा॰ ३ अ॰ ४ सू॰ ११)

१३ र] उत्तरपरिचोदनेति—'आरादपीति चेत्' इत्यनेन क्रियमाणपरिचोदनेत्यर्थः। अत इदं भाष्यं 'न तद्वाक्यं हि तदर्थत्वात्' इत्यत्रोत्कृष्य व्याख्येयमित्याशयः।

५ स्था] (अ॰ ४ पा॰ ३ अ॰ ८ सू॰ २९) इत्यत्रेति शेषः

तच्च दर्शपूर्णमासप्रयोगवचनगृहीतमासादनं संबध्यते। एवमङ्गहविरासादनमपि तत्रान्तर्गतं, साङ्गस्य प्रधानस्यैकप्रयोगत्वात्। ननु च यथा प्रयाजादय एकप्रयोगवचनगृहीतत्वेऽपि 'गुणानां च परार्थत्वात्' इत्येवं परस्पराङ्गत्वं न प्रतिपद्यन्ते तथाऽङ्गहविःसंबन्धं बर्हिर्न प्रतिपद्यते। नैतदेवम्। यथैव हि प्रधानहविरासादनमङ्गतया संबध्यते तथाऽङ्गहविरासादनमप्यङ्गाङ्गतया संभन्त्स्यते। यदि चि यद्दर्शपूर्णमासार्थं हविस्थद्बर्हिष्यासादयतीत्येवं कल्प्येत ततस्तन्मात्रस्यैव स्यान्न त्वेवम्। अस्याऽऽनर्थक्यभयात्तु स्वरूपेऽतिक्रम्यमाणे किमेवमतिक्रमोऽस्तु यद्दर्शपूर्णमासार्थमुत यद्दर्शपूर्णमासोपकारीति। यदि तादर्थ्यं गृह्यते वाक्यस्यातिदूरं संकोचः क्रियेत। तदुपकारित्वग्रहणे तु बहुतरविषयत्वं भवति। यथा च तद्भवति तदनुग्रहीतव्यम्। अङ्गाङ्गमपि विनाऽपि तादर्थ्येन तदुपकारीति विज्ञायते। तावन्मात्रमेव न तद्द्वारं युक्तं न तादर्थ्यम्। अनुपकारिणि हि स्थितं नोपकरोति नातदर्थे। तथा च 'परार्थे त्वर्थसामान्यम्' इति वक्ष्यति, विनाऽपि तादर्थ्येनाभ्युदितेष्ट्यां दधिपयसोस्तदुपकारमात्रदर्शनात्प्रणीताधर्मप्राप्तिर्भवतीति। तस्मादेवं प्रकरणादेकवाक्यत्वं कल्प्यते यस्मिन्नक्रियमाणे दर्शपूर्णमासापूर्वं न सिध्यति तत्र तत्र कर्तव्या इति। अङ्गहविर्भिरपि च विगुणैः प्रधानापूर्वं न निष्पद्यते। तस्मात्प्रधानापूर्वप्रयुक्तानामेवाङ्गेष्वपि क्रिया युक्तेति॥ ४॥ § 7015

1077 यदि चैवंजातीयकमङ्गप्रधानार्थं ततः 'प्रयाजशेषेण हवींष्यभिधारयति' इत्येतदङ्गप्रधानार्थम्। तत्र च क्रमवाक्येष्वयं क्रमो न्यायप्राप्तः सिद्धवदुच्यमानो हेतुवन्निगदोऽर्थवत्त्वादुपपद्यते 'स वै ध्रुवामेवाग्रेऽभिधारयति'। कुतः। 'ततो हि प्रथमावाज्यभागौ यक्ष्यन्भवति' इति। यद्याज्याभागहविरप्यभिधारणीयं तत एवं वक्तव्यम्। अन्यथा हि ध्रुवायामुपांशुयाजार्थेन केवलमभिधारणं स्यात्। तत्र न चाग्रेऽभिधारणं स्यात्। न च 'ततो हि प्रथमावाज्यभागौ' इति हेतुः समर्थ्येत। तस्मात्सर्वार्थत्वमिति॥ ५॥ § 7016

इति बर्हिरादीनामङ्गप्रधानसाधारण्याधिकरणम्॥ १॥

## ०.०.१७५ यजमानसंस्काराणां प्रधानमात्रार्थताधिकरणम्

३ गुणानां] (अ° ३ पा° १ अ° १२ सू° २२)
१२ रा] (अ° ९ पा° २ अ° १४ सू° ४४)
१३ क्ष्य] इति वक्ष्यति—इति सूत्रेण पूर्वपक्षयित्वा 'क्रियेरन् वाऽर्थनिवृत्तेः' इति सिद्धान्तसूत्रेण वक्ष्यतीत्यर्थः।
१३ र्थ्येनाभ्यु] अभ्युदितेष्टामिति—'यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदियात्, स त्रेधा तण्डुलान्विभजेत्। ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत्। ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं, येऽणिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुम्' इति वाक्येन दर्शपूर्णमासयोरकालोपक्रमनिमित्तदोषपरिहारार्थतया विहितायामभ्युदितेष्टाक्तियर्थः।

‘याजमानास्तु तत्प्रधानत्वात्कर्मवत्’ इत्यनेनाधिकरणेन येषां याजमानत्वं सिद्धं ते किं यजमानस्य कर्तृत्वांशेनाङ्गप्रधानार्था उत भोक्तृत्वांशेन केवलप्रधानार्था इति। किं प्राप्तं। पूर्वेणाधिकरणेन सर्वार्थत्वम्। सर्वार्थे हि यजमानेऽवस्थिताः शक्नुवन्ति सर्वेषामुपकर्तुम्। न च व्यावृत्तिकारणमस्तीति प्राप्तेऽभिधीयते। § 7018

येनैव हेतुनैतेषां स्वाभिगामित्वनिश्चयः।
तेनैव तु प्रधानार्थप्रतिपत्तिरपि स्फुटा॥ § 7020

यदि ह्येते कर्तृत्वांशपातिनो भवेयुस्ततः सर्वार्थत्वं प्रतिपद्येरन्। भोक्तृत्वांशस्थास्त्वेति। स हि तैर्विना नोपपद्यते। कर्तृत्वं तु तदभावेऽपि यथा भवति तथा सर्वलोकप्रत्यक्षम्। ऋत्विजामपि त तत्संभवान्नैव तेभ्यो निवृत्तिः स्यात्। 1078
अभीष्टे चार्थे योग्यताधानमाकाङ्क्षति। यत्र च योग्यत्वमनुपजातम्। न तु यजमानस्य कर्तृत्वस्वरूपमभीष्टम्। न च प्रागेभ्यो न निष्पन्नम्। योग्यतां चाऽऽदधानाः क्रियाः संस्कारा इत्युच्यन्ते। तस्माद्भोक्तृत्वांशं भजन्ते। यस्य च वर्मणः फलं यजमानेन भुज्यते तद्देशस्थास्तस्यैवोपकर्तुं शक्नुवन्ति नान्यस्य। प्रधानस्य फलं पुरुषैर्भुज्यते नाङ्गानां, क्रत्वर्थत्वात्। तस्मात्प्रधानस्यैवंजातीयकाः। आह। यदि क्रतोर्निर्वर्तकांशे न पतन्ति तत्, फलस्यैवाङ्गं प्राप्नुवन्ति। नैष दोषः। एष एव हि प्रधानस्योपकारो यदस्य फलग्रहणाय योग्यः कर्ता क्रियते। ततश्च यथैवान्यान्यदृष्टार्थान्यङ्गानि फलयोग्यतामपि कुर्वन्ति नाङ्गत्वात्प्रच्यवन्ते तथैवैतेऽपि द्रष्टव्याः। प्रयोजनमग्नीषोमीयादिविकारेषु गमनं वपनादीनामगमनं सिद्धान्ते॥ ६॥ § 7021

इति यजमानसंस्काराणां प्रधानमात्रार्थताधिकरणम्॥ २॥

## ०.०.१७६ सौमिकवेदेरङ्गप्रधानार्थताधिकरणम्

पूर्वेणैव न्यायेन सौमिकी वेदिः केवलप्रधानार्था विज्ञायते। इयति श- 1079
क्ष्यामहेऽस्यां कर्तुमिति यच्चिकीर्षितं तदुद्देशेनैवमभिधीयते। फलवच्चिकीर्षितं नाङ्गानि। अचिकीर्षितत्वे सति चिकीर्षितसिद्ध्यर्थत्वेन करणात्। एवमपर्यवसिते चिन्तान्तरं तावत्प्रस्तौति॥ ७॥ § 7023

१ याज] (अ° ३ पा° ८ अ° २ सू° ४)
९ नोप] नोपपद्यत इति—भोक्तृत्वांशस्याদृष्टरूपत्वेनानिर्ज्ञातप्रकारत्वादिति शेषः।
१६ त] तत्—तदेत्यर्थः।
१८ थैवान्या] अन्यान्यदृष्टार्थानीति—आरादुपकारकाण्यङ्गानीत्यर्थः।
१९ थैवैतेऽ] एतेऽपीति—याजमानाः संस्कारा अपीत्यर्थः।

संयोगादिति वर्तते। पौर्णमास्यमावास्याशब्दयोः प्रधानमात्रवचनत्वात् ‘आनर्थक्यात्तदङ्गेषु’ इत्येवमवतरतोः प्रधानवद्धविःष्वेव केवलेषु प्रवृत्तिः। तस्माच्चतुर्होत्रामन्त्रेण पञ्चहोत्रा न प्रधानहविर्मात्रमभिम्रष्टव्यम्॥ ८॥ § 7024

वेदेर्देशविशेषात्मकत्वाद्देशकालयोश्च साङ्गप्रधानप्रयोगविषयत्वावधारणात्सर्वार्थत्वम्। योऽपि चिकीर्षासंयोगः सोऽपि फलप्राप्तेः प्रयोगाधीनत्वात्तद्विषय एव ज्ञायते। तस्मात्साङ्गप्रधानार्थेयमित्यवधारणादङ्गार्थाऽपि स्यात्। एवं च सति अग्नीषोमीयादिविकारेषु निरूढपश्वादिषु कर्तव्या॥ ९॥ § 7025

इति सौमिकवेदेरङ्गप्रधानार्थताधिकरणम्॥ ३॥

## ०.०.१७७ अभिमर्शनादेरङ्गप्रधानसाधारणहविर्मात्रार्थताधिकरणम्

द्वितीयया यस्माद्गुणभूतमभिमर्शनं विज्ञायते तस्मात्सर्वार्थमित्यसंबद्धम्। स्थित एव गुणत्वे तद्विशेषचिन्तेयं प्रस्तुता। सुतरां च प्रातिपदिकार्थानुसारिणा द्वितीयार्थेन प्रधानहविर्मात्रगुणत्वं प्राप्नोति। तस्मादनुपपत्तिरेव। यच्च पौर्णमास्यर्थममावास्यार्थमिति चोक्तं तदपि पूर्वपक्षमेव साधयति। तेनैवं वक्तव्यम्। ‘पौर्णमासीमभिमृशेत्’ इत्यत्र कालकर्मतत्समुदायानामनभिम्रष्टव्यत्वात्पौर्णमासीमिति गौणेन भवितव्यम्। तत्र प्रकृतिप्रत्ययार्थयोर्यद्यपि प्रत्यार्थस्य प्राधान्यात्प्रातिपदिकं गौणमित्यापद्यते तथाऽप्यत्र तावताऽप्यभिम्रष्टव्यविशेषानवगमात्समस्तस्रुवादिविषयसंशयोपप्लवे सति विशेषोऽन्यत एव लब्धव्य इति साकाङ्क्षत्वादसंदिग्धार्थपरिग्रहार्थं प्रथमप्रतीतत्वेन च प्रातिपदिकार्थं मुख्यमाश्रित्य विभक्तिः सप्तम्यर्थेऽवकल्पते पौर्णमास्यामिति। तदेव चात्राऽऽकाङ्क्षितम्। आसन्नहविरधिकारविधिनाऽभिम्रष्टव्यविशेषस्यावधारितत्वात्। अतः कालद्वारेण प्रयोगद्वारेण वा व्यवस्थार्थमेवेदं श्रवणमिति हविर्मात्राभिमर्शनम्। अद्यापि पौर्णमास्यादिशब्देन हविर्लक्ष्यते तथाऽपि तदुपकारमात्रलक्षणात्सर्वार्थत्व सिद्धिः॥ १०॥ § 7027

इति अभिमर्शनादेरङ्गप्रधानसाधारणहविर्मात्रार्थताधिकरणम्॥ ४॥

२ क्यात्त] (अ॰ ३ पा॰ १ अ॰ ९ सू॰ १८)

३ च] सिद्धान्ते प्रयोजनमाह—एवं च सतीत्यादिना। पूर्वपक्षे च व्यतिरेकेण प्रयोजनं सुज्ञेयमित्याशयः।

## ०.०.१७८ दीक्षादक्षिणयोः प्रधानमात्रार्थताधिकरणम्

‘फलसंयोगात्तु स्वामियुक्तं प्रधानस्य’ इत्यनेनैव गतार्थत्वाद्दीक्षाणाम- 1081
नुदाहरणत्वम्। अन्ये तु समर्थयन्ते। सर्वेषु सोमक्रयादिषु दीक्षितशब्देन विनियोगो दृश्यते। दीक्षाश्च दीक्षितत्वसिद्ध्यर्थाः। तच्च दीक्षितत्वमुपादीयमानत्वात्तत्र तत्र गुणत्वेन विवक्षितम्। अतोऽङ्गप्रधानार्थत्वप्रसक्तिः। दक्षिणानामृत्विगानमनार्थत्वादानमनस्य च साहाय्योपादित्सया प्रयोगार्थता। तस्माच्चिकीर्षान्यायेन साङ्गप्रधानप्रयोगविषयत्वमिति सर्वार्थत्वप्रसक्तिः। अपि च प्रत्यक्षमेवैतद्दृश्यते दक्षिणोपात्ता ऋत्विजोऽङ्गान्यपि कुर्वन्ति। इतरथा हि प्रधानमात्रमेव तत्परिक्रीताः कुर्युः। न च तावन्मात्रार्थं यजमानस्यैतैः परिक्रीतैः प्रयोजनम्। अतो यद्यत्परिक्रीताः करिष्यन्तीत्यवधार्यते तस्मै दक्षिणा। एवं च कर्तृतन्त्रत्वाभिधानमेकादशे योक्ष्यते। तस्मात्सर्वार्थत्वमिति प्राप्तेऽभिधीयते। ‘दीक्षाः सोमस्य’ ‘दक्षिणाः सोमस्य’ इति वचनात्प्रधानार्थता। यस्तु दीक्षितविनियोगोऽङ्गेषु स पुरोडाशकपालादिवदप्रयोजकलक्षणापत्तेः प्रधानप्रयुक्तस्यैवेति ज्ञायते। दक्षिणाश्च प्रधानार्थाः सत्यः प्रसङ्गादङ्गानामुपकुर्वन्तीति वक्ष्यामः॥ ११॥ § 7029

निरूढपशौ च षड्ढोतृहोमेन दीक्षानुग्रहं वदन्नप्राप्तिं दर्शयति। सर्वार्थत्वे
च स्यादेव दीक्षेति नान्येनानुगृह्येत। ननु चानङ्गत्वेऽप्यनुग्रहवचनमनाकाङ्क्षित- 1082
त्वाद्व्यर्थमेव। नैष दोषः। प्रकृतौ परप्रयुक्तोपजीवनात्तत्कृत उपकार आसीदिति, अप्रयोजकत्वात्तदभावे सति वैगुण्यमिवाऽऽशङ्क्यते, तत्रानुग्रहवचनमुपपत्स्यते॥ १२॥ § 7030

इति दीक्षादक्षिणयोः प्रधानमात्रार्थताधिकरणम्॥ ५॥

## ०.०.१७९ अन्तर्वेदिबहिर्वेदिपदलक्षितदेशविशेषस्य यूपमानाङ्गताधिकरणम्

‘अर्धमन्तर्वेदि मिनोत्यर्धं बहिर्वेदि’ इति किमन्तर्वेद्येकदेशो यूपाङ्गत्वेन विधीयते, अथ बहिर्वेदिदेशमिश्रसंधिदेशमात्रं लक्षयतीति। ननु च पुर-

---

१ ल] ( अ॰ ३ पा॰ ७ अ॰ २ सू॰ ६ )।
२ क्र] सोमक्रयादिष्विति—‘दीक्षितः सोमं क्रीणाति’ यो दीक्षितो यदग्नीषोमीयं पशुमालभते’ इत्यादिष्वित्यर्थः।
६ स्माच्चिकीर्षा] ( अ॰ ३ पा॰ ७ अ॰ ३ ) अत्रत्यन्यायेनेत्यर्थः।
१० मेका] ( अ॰ ११ पा॰ २ अ॰ १ सू॰ ८ )।
१४ व] ( अ॰ १२ पा॰ १ सू॰ ३१ ) इत्यत्रेति शेषः।
१ ङ्] षड्ढोतृहोमेनेति—‘सूर्ये ते चक्षुषी, वातं प्राणं, द्यां पृष्ठं, अन्तरिक्षमात्मा, अङ्गैर्यज्ञं, पृथिवीं शरीरैः’ इति षड्ढोतृमन्त्रकेण होमेनेत्यर्थः।

स्तात्सर्वार्थत्वमवस्थाप्येदानीमयुक्तो विचारः। स्थित एतस्मिन्नधिकरणे तदद्र-ष्टव्यम्। यदि हि वाक्यसंयोगाद्यूपार्थता भवेत्कुतस्तदा कैमर्थ्यविचारावसरः। स्थिते पुनर्देशलक्षणार्थत्वे तदर्थत्वातदर्थत्वे युज्येते। किं प्राप्तं, प्रकरणं बाधित्वा यूपस्य वाक्यसंयोगाद्भवितुमर्हति। लक्षणा हीतरथा स्यात्। न चान्तर्वेदिशब्द-
1083 स्य श्रौतोऽर्थो न समवैति यतो लक्षणां प्रतिपद्यते। तस्मात् 'इयति शक्ष्याम-हे' इत्यपि सामान्यशास्त्रं यूपविषयमेवोपसंहृत्य वेदेर्यूपार्थत्वं प्रतिपत्तव्यम्। अथवा पूर्वेणाधिकरणेन स्थिते साङ्गज्योतिष्टोमार्थत्वे किं यूपार्थत्वमप्यस्ति नास्तीति विचार्यते। ननु सर्वार्थत्वादेव सिद्धं यूपार्थत्वमिति न विचारणीय-म्। न तेन सिद्धं, यूपस्य पश्वङ्गत्वात्। ज्योतिष्टोमस्य हि साङ्गस्य वेदिर्न पशोः। ननु च पशुरपि स्वाङ्गभूतामङ्गेभ्यो दास्यति। दद्याद्यदि तस्य स्वम-हिम्ना वेदिर्भवेत्। प्रधानद्वारेण त्ववतरन्ती तत्स्वरूपमात्र एवावतिष्ठते। प्राप्ते च वेदिकार्येऽतिदेशेन प्राप्नुवन्तीं दार्शपौर्णमासिकीं वेदिं निराकृत्य पश्वादिषु सौमिकी निविशते। सा प्राकृतेष्वेव वेदिकार्येषु विनियोक्तव्या। न चेदं यूप-मानं प्राकृतं यतो वेदिं लभेत। तस्मादप्राप्तेर्यूपस्य लौकिक्यैव देशबुद्ध्याऽन्त-र्बहिर्वा माने प्राप्तेऽनेन वचनेनार्धस्यान्तर्वेदिर्नियम्यत इति प्राप्तेऽभिधीयते॥ १३॥ § 7032

उभाभ्यामन्तर्वेदिबहिर्वेदिशब्दाभ्यां मध्यदेशो लक्ष्यते नाङ्गाङ्गिभावो विधीयते। § 7033

कुतः कृतार्थसंयोगे देशकालोपलक्षणम्।
सर्वेष्विष्टं कृतार्थौ च वेदियूपाविहान्यतः॥§ 7035

अङ्गाङ्गिभावे हि यूपो वा वेद्यङ्गं भवेद्वेदिर्वा यूपाङ्गं, न चैकमप्युपप-द्यते निराकाङ्क्षत्वाददृष्टकल्पनाद्वाक्यभेदप्रसङ्गाच्च। न तावत्पशुबन्धव्यापृतस्य यूपस्य वेदिं प्रत्यपेक्षाऽस्ति। नापि कर्तृहविस्तदुपकरणधारणव्यापृताया वेदेः सहस्रभागांशसंबन्धिनि यूपेऽपेक्षा। न चान्यतरस्य दृष्टोपकारित्वमवकल्प-ते। किं चार्धं बहिर्वेदीत्यशिष्यं, विध्यनुवादत्वासंभवात्त्वत्पक्षे। मत्पक्षे तु द्वाभ्यां विना देशविशेषोपलक्षणासंभवादवश्यं शासितव्यमेतत्। कथं, सम-स्तस्य यूपस्यान्तर्बहिर्वा माने प्राप्ते 'अर्धमन्तर्वेदि' इति नियम्यते, द्वितीय-
1084 स्यार्धस्य पुनरप्यनियमप्रसक्तौ 'अर्धं बहिर्वेदि' इत्यपि विधातव्यम्। त-तश्चानेकार्थत्वाद्वाक्यभेदो मिनोत्याख्यातानुषङ्गक्लेशश्च प्रसज्यते। पाक्षिकस्य च नित्यवदनुवादोऽनर्थकः कल्पयितव्यः। ननु चार्धस्यान्तर्वेदिसंबन्धे विहिते विध्यभावादर्धान्तरं बहिर्वेदि भविष्यति। भवेदेवं, यदि नित्यमन्तर्वेदि बहिर्वेद्येव वा यूपमानं प्रसक्तं स्यात्। समस्तान्तर्वेदिप्रसङ्गे हि सति अर्धपुनर्वचन-सामर्थ्यात्परिसंख्यायेतरस्य बहिर्मानं गम्येत। समस्तस्य वा बहिरेव प्र-

१ स्तात्स] पुरस्तादिति—'चिकीर्षया च संयोगात्' इत्यस्मिन्नधिकरण इत्यर्थः।

२ ष्ट] तद्दष्टव्यमिति—चिकीर्षाधिकरणं द्रष्टव्यमित्यर्थः।

सङ्गेऽर्धस्याविहितमिति तदवस्थमर्धान्तरमध्यवसीयेत। न ह्येतदुभयमप्यस्ति। अतश्चेदृशमवधारणमर्धमन्तर्वेद्येव न त्वर्धमेवान्तर्वेदीति। तथा सति चार्धान्तरमनियतत्वात्कदाचिदन्तरपि प्राप्नोतीति न बहिर्भावः सिध्यतीति। ननु च यदि समस्तमन्तर्वेदि मिनोति ततोऽर्धमन्तर्वेदीत्येवं विधिर्नैव कुर्यात्। कथं न करोति, यदर्धं तत्तावन्नियमतोऽन्तर्मिनोत्येतावच्च विहितं नेतरत्प्रतिषिद्धम्। तस्मादुभाभ्यां विशिष्ट एको देशोऽभिधीयत इत्येवमवाक्यभेदः॥ १४॥
§ 7036

इति अन्तर्वेदिबहिर्वेदिपदलक्षितदेशविशेषस्य यूपमानाङ्गताधिकरणम्॥ ६॥

## ०.०.१८० दक्षिणहविर्धानिदेशस्यानुवचनार्थताधिकरणम्

'उत यत्सुन्वन्ति सामिधेनीस्तदन्वाहुः' इति श्रूयते। पूर्ववदेव संदेह-
विचारनिर्णयाः। कथं न गतार्थमिति चेत्। विस्पष्टार्थद्वयानुपादानात्। न 1085
ह्यत्रैवं दृश्यत इदं परस्याशिष्यमिति। मम तु शिष्यमिति। कथं तर्हि सिद्धान्तसिद्धिः। उच्यते॥ १५॥ § 7038

सोमधारणेन तावत्प्रत्यक्षं नैरपेक्ष्यं हविर्धानस्य, सामिधेनीनां पुनः प्रकृतावेवाग्निसमिन्धनार्थत्वात्क्लृप्तं प्रयोजनमिति नास्त्यङ्गाङ्गित्वापेक्षा। हविर्धानविशेषसंबन्धपरे वाक्ये सामान्यसंबन्धशक्तिमपि कल्पयत आग्नेय्यधिकर-
णोक्तो वाक्यभेदो योज्यः। विशेषेण सामान्याक्षेपाद्वाक्यभेदं परिहरतः सिद्ध- 1086
सामान्यसंबन्धेन सिद्धान्तपक्षेणार्थापत्तिक्षयो दर्शयितव्यः। अस्ति हि प्राकृतदेशोपलक्षणत्वेन हविर्धानयोरन्यतरस्य प्राप्तिः। तत्र विशेषमात्रं सुखेन विधीयते। तस्मादपि देशलक्षणा॥ १६॥ § 7039

हविर्धानमिति, अनन्यप्रयोजनस्य तादर्थ्यव्यपदेशोऽवकल्पते। अन्यथा हि सामिधेनीधानमित्यपि स्यात्॥ १७॥ § 7040

इति दक्षिणहविर्धानिदेशस्यानुवचनार्थताधिकरणम्॥ ७॥

## ०.०.१८१ यजमानभिन्नकर्त्रन्तरप्रतिपादनाधिकरणम्

अतः परं समाख्यायाः सर्वैः सह विरोधाविरोधचिन्ता वर्तिष्यते। (होता) हौत्रमित्यादयः कथं विनियोजिका इति। तत्र प्रथमं तावदुपोद्घातः क्रियते।

---

३ धिक] ( अ० ३ पा० २ अ० ८ )।
१ व] वर्तिष्यत इति—'ते सर्वार्थाः प्रयुक्तत्वात्' इत्यधिकरणमारभ्येति शेषः।
२ त] 'शास्त्रफलं प्रयोक्तरि' इत्यादिना क्रियमाणविचारस्य बलाबलविचारत्वाभावे नासांगत्यं मनसि निधाय तदुपोद्घाततया बलाबलचिन्ताशेषत्वेन संगतिं तावदुपपादयति—तत्रेत्यादिना।

यदि होत्रादयो नानाभूता विद्यन्ते ततः क्व ते विनियुज्यन्तामिति विचारो भव-
ति। यदि तु सर्वमेव कर्म यजमानेन कर्तव्यं न कर्त्रन्तराणामवकाशोऽस्ति
ततस्तत्समाख्योत्थापितो विरोधाविरोधविचारो नैव प्रस्तोतव्य इति। तत्र
1087 दर्शपूर्णमासादीनि फलदक्षिणावन्ति कर्माण्युदाहरणम्। तेषु विचारः, किं
यजमानेनैव सर्वं प्रयोक्तव्यमुत प्रधानमात्रे यजमाननियमः किं वा प्र-
धानेष्वेव यजमानोऽन्यत्रान्य एव। किं प्राप्तं, सर्वं यजमानेनैव कर्तव्यमिति।
कुतः। प्रयोगवचनस्थं ह्यात्मनेपदं साङ्गायां भावनायां फलार्थिनं कर्तृत्वेन
प्रयुङ्क्ते। स यत्रैव कर्ता न स्यात्तत्कृतमेवोपकारं न प्राप्नुयात्। तस्मात्स्वयं
कुर्यादिति। फलस्य चोत्पद्यमानस्योत्पादयितृत्वेन प्रयोक्ता यजमान एवोच्य-
ते। होत्रादिसमाख्या च तस्यैव तत्तत्कुर्वाणस्य 'एकस्य कर्मभेदात्' इत्यनेन
न्यायेन भविष्यतीति मन्यते॥ १८॥ § 7042

प्रधानमात्रवाचिनो धातोः परेण प्रत्ययेन तन्मात्रस्यैव फलार्थिकर्तृकत्वं
नियम्यते। शेषाणां तु निर्वृत्तिमात्रं प्रतीयते न कर्तृविशेषः। तस्मात्तत्रानिय-
मः। ननु च प्रधानसमानकर्तृकत्वादेवाङ्गानामपि स एव कर्ता सेत्स्यति।
न। तत्र प्रयोजकत्वेनापि कर्तृत्वानुग्रहात्। द्रव्योत्सर्गे ह्यन्येन क्रियमाणे न
किंचिद्यजमानेन कृतं स्यादिति तं करोति। तत्र कृते परिक्रयादिना कारयन्न
1088 कर्तृत्वात्प्रच्यवते। केचित्तु सुतरामात्मनेपदेन प्रयोजकत्वमेवाभिधीयत इति
समर्थयन्ते। कर्त्रभिप्रायक्रियाफलविहितस्य ह्यात्मनेपदस्य णिजर्थ एव प्रेष-
णादिरूपेण संविधानात्मको वाच्यः। तथा च यजन्ति याजका इति प्रयोज्य-
व्यापारे परस्मैपदम्। यजते यजमान इति प्रयोजकव्यापारे, आत्मनेपदं
दृश्यते। न त्वेतद्युक्तम्। एवं हि सति प्रधानमपि यथाकथंचिदन्येरेव कार-
यितव्यं भवेत्। यदेव हि स्वयंकर्तृकं जातं तस्यैव फलं न प्राप्नुयात्। न
च यदृत्विजः कुर्वन्ति तस्य ऋत्वर्थत्वाद्यजमानगामि फलं युज्यते। कामं तु
प्रधानकारिणो यजमानस्य यथाकथंचिदनुग्रहेण प्रयोजकत्वादृत्विग्व्यापारव-
चनं परस्मैपदं णिजर्थे वर्तेत नाऽऽत्मनेपदम्। तस्मात्पूर्वेणैव व्याख्यानेन
प्रधानादन्यस्य स्वयमन्यो वा कर्ता स्यादिति। तत्रापि तु प्रत्ययप्रतिपादिता

४ णा] फलदक्षिणावन्तीति—अनेन चाग्निहोत्रे परिक्रयानाम्नानेन भाष्यकारोदाहृतस्यापि, अग्निहोत्रस्यानुदाहरणत्वं सूचितं ज्ञेयम्। वस्तुतस्तु यद्यप्यग्निहोत्रप्रकरणे तदङ्गतया दक्षिणा नाऽऽम्नायते तथाऽपि 'अहरहर्यजमानः स्वयमग्निहोत्रं जुहुयात्' पर्वणि वा। ब्रह्मचारी वा जुहुयात्। ब्रह्मणा हि स परिक्रीतो भवति। क्षीरहोता वा जुहुयात, धमेन स परिक्रीतो भवति' हत्यापस्तम्बधृतबह्वृचब्राह्मणे तत्रापि दक्षिणाकार्यस्य परिक्रयस्यैव विधानात्तद्बलेनाग्निहोत्रेऽप्यन्यस्य कर्तृत्वं संभाव्यत एवेति संभवत्येवाग्निहोत्रस्याप्युदाहरणत्वमिति खण्डदेवप्रभृतीनामभिप्रायः।

१० स्य] ( अ० ३ पा० ७ अ० ९ सू० २३ )।

५ त] तत्र कृत इति—प्रधाने तु द्रव्योत्सर्गरूपे स्वयं कृत इत्यर्थः।

५ कार] कारयन्नित्यस्य प्रागङ्गानीति शेषपूरणम्।

७ विहित] विहितस्येति—'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इत्यनया स्मृत्येर्थः।

भावना प्रत्यासन्नतया फलार्थिकर्तृत्वेन गम्यमाना कथं करणांशमात्र एवोपसंह्रियत इति वक्तव्यम्। तेनैवं व्याख्येयं, नाऽऽत्मनेपदेन फलार्थिकर्तृत्वं चोद्यते। किं तर्हि। भावनाक्षिप्तकर्तृत्वस्य स्वतः फलसंबन्धित्वम्। अतश्च फलेन कर्तुरन्यत्र न गन्तव्यम्। न तु फलार्थिनोऽन्येन व्यापारकरणं विरुध्यते। तावता च सिद्धोऽङ्गेष्वनियम इति॥ १९॥ § 7043

अन्वाहार्यद्वादशशतादिदानं कर्मसंयुक्तेभ्योऽभिधानात् 'परिक्रयार्थं वा कर्मसंयोगात्' इति दशमे वक्ष्यति। स्वभावतश्च परिक्रयः परत्र क्रियते नाऽऽत्मनि, विरोधात्। तत्र यदि कदाचित्स्वयमेवाङ्गानि यजमानः कुर्यात्ततः परिक्रयासंभवात्परिक्रयो न क्रियेत। तत्रास्य नित्यवदाम्नानं विरुध्येत। तस्मात्तन्नित्यतां कर्तुमवश्यं परिक्रयार्हाणि कर्त्रन्तराण्युपादातव्यानि। अतश्च क्वचित्स्वयंकरणात्क्वचित्संविधानाद्यजमानस्य कर्तृत्वम्। आत्मनेपदस्यापि 1089
परिक्रयवतीं भावनामाश्रितस्येदृशेनैव कर्तृत्वेन फलोपयोगः समानकर्तृक इत्यर्थो न विरोत्स्यते॥ २०॥ § 7044

इति यजमानभिन्नकर्त्रन्तरप्रतिपादनाधिकरणम्॥ ८॥

## ०.०.१८२ ऋत्विजां संख्यानियमाधिकरणम्

एकस्य द्वयोर्वोपादाने परिक्रयः शक्यः कर्तुमित्यनियमः। अथवा फलसमानकर्तृकत्वे सामानाधिकरण्यात्मनेपदाभ्यां समस्तस्य प्रयोगस्य प्राप्ते, यन्मात्रमेत्राबाधित्वा परिक्रयविधिरशक्यस्तदेव बाधितव्यम्। स चैकेन कर्त्रा यत्किंचित्कुर्वतोपपन्न इति नानेकं बाधितव्यमिति॥ २१॥ § 7046

भिन्नसमाख्यानियतकर्तृकपदार्थयुक्तभावनाविधिना तावतामुपादानमिति विहितं भवति। 'संज्ञा चोत्पत्तिसंयोगात्' इति चैष न्यायो यथा कर्मभेदं बोधयितुं समर्थस्तथा कर्तृभेदमपीति यावत्समाख्यं कर्तार उपादातव्याः॥ २२॥ § 7047

व्याप्रियमाणानामेताः समाख्या उपलभ्यन्ते। न च लोकादवगता इति 1090
यूपादिवत्कार्यतस्तावत्परिच्छिद्यन्ते। ततश्च पाचकादिवत्तत्तद्धौत्रादिकर्म कुर्वन्हौत्रादिशब्दैरभिधास्यत इत्यभेदः॥ २३॥ § 7048

यदि हि कर्मविनियोगवेलायामेतदुत्तरकालं वैताः समाख्याः श्रूयेरन्नेवं सति न भिन्द्युरपि। वरणं त्वत्यन्ताप्रवृत्तानां प्रवर्तनार्थमभ्यर्थनम्। तत्रैताः

६ रिक्र] ( अ° १० पा° २ अ° ८ सू° २३ )
२ सामाना] सामानाधिकरण्येति—फलपदसामानाधिकरण्येत्यर्थः।
३ स] स चेति—परिक्रयविधिरित्यर्थः।
२ सं] ( अ° २ पा° २ अ° ८ सू° २२ )।
२ पाच] पाचकादिवादिति—गृहिऽस्मिन्देवदत्तः पाचक इत्युक्ते योंऽस्मिन् गृहे पाककर्ता स देवदत्त इत्येवं पाककर्मसंयोगाद्यथैव देवदत्तशब्दार्थो निर्णीयते तद्वत्प्रकृतेऽपीत्यर्थः।

श्रूयन्ते ‘ब्रह्माणं वृणीते’ इत्यादि। न च तदानीं निमित्तान्तरं दृश्यते यत्कृतः
समाख्याभेदो भवेत्। वरणान्यपि चैतानि ‘एकस्यैवं पुनः श्रुतिः’ इत्येवं
‘गुणश्चापूर्वसंयोगे’ इत्येवं यावच्छ्रुति भिद्यन्ते। तद्भेदाच्चोपादेयानामृत्विजाम-
पि तत्परिमाण एव भेदः। समाख्यानामपि च प्रागनुपलब्धेरुत्तरकालं च
सिद्धवद्व्यवहाराद्वरणनिमित्ततैव गम्यते। निमित्तभेदाच्च नैमित्तिकभेदसिद्धिः।
दृष्टार्थत्वाच्च नैकस्यैव कर्तुः पुनः पुनर्वरणं कर्तुं शक्यते। सकृदुपात्तस्य पुन-
रुपादानानुपपत्तेः। उत्पत्तिवाक्यशिष्टवरीतव्यबाधविकल्पासंभवाच्च न शक्यं
तेनैव वरणेन व्रियमाणान्तरं संबन्धुम्। अतोऽपि वरणानि भिद्यन्ते। सर्वाणि
च तान्यैन्द्रवायवादिग्रहणवदपर्यायविधायिना प्रयोगवचनेन गृह्यन्ते। तद्ग्रह-
णवशेन च सर्वर्त्विजां ग्रहणम्। अतो यावद्वरणमृत्विजां भेदसिद्धिः। यत्तु
भाष्यकारेणोक्तं तस्मादेषां वरणे संकीर्तनं न विधिरित्यादि तदविहितव-
1091 रणनियमप्राप्त्यभावादयुक्तम्। न चैतावतो वाक्यराशेः कल्पितैकवाक्यत्वस्य
सुखतरोपायप्रचयलभ्यसंख्यामात्रप्रत्यायनं फल भवितुमर्हति। तेन वरण-
विधिनैवानुनिष्पादिनी प्रचयशिष्टैव संख्या सेत्स्यतीत्येतदेव समर्थयितव्यम्।
न किंचित्तया विहितया॥ २४॥ § 7049

इति ऋत्विजां संख्यानियमाधिकरणम्॥ ९॥

## ०.०.१८३ चमसाध्वर्यूणां पृथक्त्वाधिकरणम्

अध्वर्यव इति समाख्यानात्तेषां चमससंबन्धादध्वर्युपुरुषा एव चमसाध्वर्यव इति प्राप्तेऽभिधीयते। पृथक्त्वनियतत्वाद्व्यपदेशानां सर्वैश्चेतरैस्तुल्यवत्पृथक्त्वेन व्यपदेशादुत्पत्तौ च वरणान्तराम्नानात्पूर्ववदेव भेदः। यद्यपि च यजमानेन व्रियन्ते तथाऽपि तदाज्ञाकरत्वेन व्रियमाणत्वाद्भवत्येव तदीयत्वव्यपदेशः॥ २५॥ § 7051

इति चमसाध्वर्यूणां पृथक्त्वाधिकरणम्॥ १०॥

## ०.०.१८४ चमसाध्वर्यूणां बहुत्वाधिकरणम्

1092 उत्पत्तौ तु बहुश्रुतेः॥ २६॥ § 7053

२ एक] (अ० २ पा० २ अ० २ सू० २)
३ गुण] (अ० २ पा० २ अ० ९ सू० २४)
१ हु] ‘उत्पत्तौ तु बहुश्रुतेः’ इति

सूत्रस्थभाष्यस्य स्पष्टत्वादव्याख्येयतां मत्वा सूत्रपाठमात्रं कृतम्।

इति चमसाध्वर्यूणां बहुत्वाधिकरणम्॥ ११॥

## ०.०.१८५ चमसाध्वर्यूणां दशत्वनियमाधिकरणम्

बहुत्वानियमे 'प्रथमं वा नियम्येत' इति त्रित्वे प्राप्ते दशपेये ज्योतिष्टोमविकारे दशत्वानुवादात्प्रकृतौ च दश व्रियन्त इति विज्ञायते। स्वामिदशत्वाच्चमसदशत्वाच्च दशत्वप्राप्तिः॥ २७॥ § 7055

इति चमसाध्वर्यूणां दशत्वनियमाधिकरणम्॥ १२॥

## ०.०.१८६ शमितुरपृथक्त्वाधिकरणम्

शमिता च शब्दभेदात्॥ २८॥ § 7057

उत्पत्तिगता समाख्या भेदिका भवति। न चेयं तद्गता। तेन 'एकस्य 1093
कर्मभेदात्' इत्येवमेव भवति। नन्वध्यर्य्वादिषु व्याप्रियमाणेषु 'शमिता पशुं कण्ठे गृह्णाति' इति श्रवणाद्भेदः स्यात्। नैष दोषः। य एव कश्चिदव्यापृतः स एव ग्रहीष्यति। न च तदा सर्वाध्वर्युपुरुषाणां सर्वर्त्विजां वा व्यापारो विद्यते। तदेतद्वक्ष्यति 'इतरमन्यस्तेषां यतो विशेषः स्यात्' इति। प्राप्त्यभावाच्च 'यद्यब्राह्मणः स्यात्' इति लिङ्गमसाधकमतो बलाद्यजमानविषयं कल्प्यते। याजमानप्रकरणाम्नानाच्च, शामित्रस्य न कथंचिदब्राह्मणविषयत्वं विज्ञायते। हिंसात्वाद्ब्राह्मणो नेच्छेदिति चेत्तु ल्यमेतदब्राह्मणस्यापि। स हि मन्दप्रतीकारः सुतरां प्रत्यवैति। तेन यथैव शूद्रादिः कथंचिदनिच्छन्कार्यते तथैव यो दानादिवशीकृतः करिष्यति सोऽनुष्ठास्यतीत्यविरोधः। एतेनैव हेतुनाऽऽर्त्विज्यं निन्द्यते॥ २९॥ § 7058

इति शमितुरपृथक्त्वाधिकरणम्॥ १३॥

---

१ प्र] ( अ° ११ पा° १ अ° ७ सू° ४२ )।
१ ब्द] 'शमिता च शब्दभेदात्' इति सूत्रस्थं भाष्यमपि सुस्पष्टत्वादव्याख्याय पूर्वपक्षसूत्रस्य पाठमात्रं कृतम्।
१ एक] ( अ° ३ पा° ७ अ° ९ सू° २३ )।
५ इ] ( अ° ३ पा° ८ अ° १० सू° २१ )।
७ र] 'तद्ब्राह्मणाय दद्यात्, यद्यब्राह्मणः स्यात्' इति वाक्यस्येति शेषः। यजमानविषयं कल्प्यत इत्यस्य चानुषङ्गेण शेषपूरणम्।
९ न्का] कार्यत इति—शभितेति शेषः।
१० रिष्य] करिष्यतीति—आर्त्विज्यमित्यर्थः।
१० सोऽनुष्ठास्य] अनुष्ठास्यति—शामित्रमित्यर्थः।

## ०.०.१८७ उपगातॄणामृत्विग्भ्योऽनन्यत्वाधिकरणम्

1094 उपगाश्च लिङ्गदर्शनात्॥ ३०॥ § 7060

इति उपगातॄणामृत्विग्भ्योऽनन्यत्वाधिकरणम्॥ १४॥

## ०.०.१८८ सोमविक्रेतुर्वृतेभ्यः पृथक्त्वाधिकरणम्

विक्रयी त्वन्यः कर्मणोऽचोदितत्वात्॥ ३१॥ § 7062

इति सोमविक्रेतुर्वृतेभ्यः पृथक्त्वाधिकरणम्॥ १५॥

## ०.०.१८९ सर्वेषामृत्विक्शब्दावाच्यताधिकरणम्

ऋत्विक्शब्दो हि निपात्यमान एव उपपदधातुप्रत्ययसमन्वितेऽर्थे वर्तते,
ऋतौ यजन्तीति ऋत्विजः। एतस्माच्चेत्कारणादृत्विजो भवन्ति हन्त सर्वेषां
1095 तदविशिष्टमिति तदनुसारमृत्विक्त्वमपि सर्वेषामेव प्राप्तम्। अतश्चत्वारः, पञ्च,
षट्, सप्तदशेत्याद्या अवयवा अप्येतस्य महान्त इत्येवं स्तोतुमवयुत्यवादः॥
३२॥ § 7064

परिसंख्यानादिति भाष्यकारेण परिसंख्यैव व्याख्यता। सप्तदशस्त्वन्येषु
च प्राप्तवत्सु सप्तदशपुनःश्रवणं न तावन्मात्रपरिग्रहार्थं, योऽर्थादितराभावप्र-
त्ययस्तमाश्रयितुं, न सप्तदशस्वरूपं प्रत्यापयितुम्। सर्वत्र हि द्वयोः संबन्धे
कृते तत्स्वरूपं संसर्गश्च प्रतीयतेऽन्यनिवृत्तिश्च। क्वचिच्च किंचित्प्रयोजनव-
शेन विवक्ष्यते। स्वरूपसंसर्गासंभवे च बलादेव विधिरितरनिवृत्तिप्रयोजनो
भवति। अतश्च त्रिदोषत्वमदोषः। स्वार्थस्य प्राप्तत्वेनैव हेयत्वात्प्रतीतस्य च प-
1096 रार्थस्यापरिग्रहे विध्यानर्थक्यात्। परस्तु कर्मकरणमेव हेतुं परिगृह्य सति
निमित्तेऽन्येष्वपि शब्दप्रवृत्त्यवश्यंभावित्वं मत्वाऽऽह— ननु प्रतिषिध्यमानेष्व-
पीति। कार्यप्रतिषेधेनैव तावत्प्रक्रमते। सर्वत्र हि स्वरूपप्रतिषेधासंभवात्कार्यं

---

१ नात्] 'उपगाश्च लिङ्गदर्शनात्' 'विक्रयी त्वन्यः' इति सूत्रद्वयस्थमपि भाष्यं सुस्पष्टत्वादुपेक्ष्याधिकरणद्वयसूत्रमात्रस्य पाठः कृतः।

३ त्वा] चत्वार इति—दर्शपूर्णमासयोस्तावत्, ब्रह्मा—ऊध्वर्युः—होता—आग्नीध्रश्चेति चत्वारः। चातुर्मास्ये प्रतिप्रस्थात्राधिक्येन पञ्च। पशुयागे मैत्रावरुणाधिक्येन च षट्। सोमयागे च ब्रह्मगणे तावत्—ब्रह्मब्राह्मणाच्छंस्याग्नीध्रपोतारश्चत्वारः। अध्वर्युगणे—अध्वर्युप्रतिप्रस्थातृनेष्टृन्नेतारश्चत्वारः। होतृगणे—होतृमैत्रावरुणाच्छावाकप्रावस्तुतश्चत्वारः। उद्गातृगणे च—उद्गातृप्रस्तोतृप्रतिहर्तृसुब्रह्मण्याश्चत्वारः। यजमानः सप्तदश इत्याहत्य सप्तदश भवन्तीति वस्तुस्थितिः।

प्रतिषिध्यते। तद्यथा न ममैष पुत्रः, पुत्रकार्ये न प्रवर्तत इत्यर्थः। एवं योऽय-
मर्थात्सप्तदशभ्योऽधिकानां प्रतिषेधः प्रतीयते स कार्यविषयो न स्वरूपविष-
य इति द्रष्टव्यम्। वरणं तु शब्दप्रवृत्तिनिमित्तत्वादनुदाहरणमिति चेत्। न।
अस्मिन्पक्षे कर्मयोगादेव शब्दप्रयोगसिद्धेः। इतरस्तु स्वरूपाप्रतिषेधात्तन्निमित्तं
कार्यमपि दुष्प्रतिषेधमिति कथमृतौ यजतां तेषामृत्विक्त्वं न स्यादित्याह।
सिद्धान्तवादी तु तत्त्वेनोत्तरं विवक्षमाण एवं तर्हि द्विविधोऽयमित्यादि प्र-
क्रमते। यद्येष यौगिकः स्यात्ततो न कुतश्चिन्निवर्तते। संस्कारशब्दस्त्वयं,
वरणभरणे हि संस्कारौ। ते येषां न स्तो न ते सत्यपि क्रियायोगे तच्छ-
ब्दवाच्या भविष्यन्ति। ते च वरणभरणे सप्तदशानामेव यजमानेन क्रियेते।
तन्निमितत्वाश्रयणे च 'सप्तदशर्त्विजः' इत्यनुवादोऽवकल्पिष्यते। अन्यथा त्वव-
यवानुवादो मृषात्वरूपः कल्प्येत। तस्मान्नातिप्रसङ्गः। ननु च य ऋत्विजस्तेषां
वरणभरणे येषां च ते, त ऋत्विज इतीतरेतराश्रयं प्राप्नोति। नैष दोषः।
प्रथमं तावदाशस्येनैषा वचनव्यक्तिरन्विष्यते। य ऋत्विजस्तेषां वरणभरणे
इति। यदा तु वृक्षादिवत्ते लोकव्यवहारेष्वप्रसिद्धास्तदाऽर्थादयमर्थो भवति
वरणेन ऋत्विजः करोतीति। यथैवास्य सूत्रस्य शाटकं वयेत्युक्ते वानेन 1097
शाटकः क्रियत इति हि भाविनि संज्ञाविज्ञानादविरोधो विज्ञायते तथैवात्र
प्रत्येतव्यम्। एतेन 'अध्वर्युं वृणीते' इति तद्विशेषवचनानि व्याख्यातानि। एवं
च व्रियमाणानामृत्विजां द्वितीयानिर्देशोऽवकल्पिष्यते। वरणं चाऽऽधानवत्क्र-
त्वौपयिकांस्तानुत्पादयद्दृष्टार्थं भविष्यति। वेदपौर्वापर्यपर्यालोचनात्तु ते वरणेन
क्रियन्त इत्यवसानान्नाप्रसिद्धिः। न त्विदं निपातनाख्यानद्वारेण ऋतुयज-
ननिमित्तत्वं गम्यमानं सत्परित्यक्तुं युज्यते। न च वरणभरणयोः सिद्ध-
र्त्विक्संबन्धित्वेन तानुद्दिश्य श्रूयमाणयोर्विपरीता वचनव्यक्तिर्युक्ता। यच्चाप्र-
सिद्धाः संस्कर्तुं न शक्यन्त इति वरणेऽप्येवं तुल्यम्। न हि कश्चिदप्र-
सिद्धं वस्तु कुरुष्वेत्युक्तोऽप्यध्यवस्यति। नापि तेन व्यापृतेनापि तन्निमित्ता
निष्पत्तिरध्यवसीयते। यदि तु वेदवाक्यपौर्वापर्येण ज्ञायत इत्युच्यते ततः
सिद्धानामेव संस्कारः सुखतरमध्यवसीयते। जानाति ह्येवं वरणं कुर्वन्यथा
वेदस्य प्रसिद्धा एव केचिदृत्विजः। मम तु ते वरणद्वारेण प्रसिध्यन्ति, प्राक्त-
स्मादन्येनानवधारितत्वात्। अथवा तस्यापि सामान्यतोऽस्त्येव प्रसिद्धिः। सर्वो

---

३ नु] अनुदाहरणमिति—ऋत्विजो वृणीत इत्येवं भाष्योक्तं वरणभृत्विक्कार्योदाहरणं न भवतीत्यर्थः।

८ णे] भरणं—दक्षिणादानमित्यर्थः।

२० न] एवं तावद्ययाश्रुतं भाष्यार्थमुपवर्ण्याधुवा तत्र च विशेषं वक्तुं दूषणे तावदादौ वदति। नत्वित्यादिना।

२० ना] निपातनेति—'ऋत्विग्दधृक्—'इत्यनया स्मृत्या ऋत्विक्पदस्य कर्तृवाचिक्विन्नन्तत्वनिपातनेन ऋतुयजननिमित्तत्वं गम्यत इत्यर्थः।

२४ व] नाध्यस्यतीति—बुद्धिपूर्वकारी तावदप्रसिद्धं वस्तु कर्तव्यतया न जानाति, न प्रयतते चेत्यर्थः।

२४ व्या] व्यापृतेनापीति—अबुद्धिपूर्वकारिणा प्रयत्नाख्यव्यापारे यदृच्छया कियमाणेऽपि न तेन फलनिष्पत्तिर्नैकान्ताद्भवतीत्यर्थः।

हि भावः केनचिदात्मना सिध्यन्व्यवहारं साधयति। सर्वात्मिकायाः सिद्धेः
क्वचिदप्यभावात्। अतो य ऋतौ यजन्ति ये वाऽऽध्वर्यवादिकं कुर्वन्ति त
ऋत्विजः। के च ते, ये तत्समर्थाः, सामर्थ्यरहितानामनधिकारात्। के
च समर्थाः, ये विद्वांसः। तत्रापि स्मृतिप्रामाण्याद्ये ब्राह्मणास्तदविशेषप्रसङ्गे
पुनर्विशेषो भवति वरणोपात्ता य इति, ततोऽपि पुनर्दक्षिणाभिर्भ्रियमाणा
1098 इति। सेयमेतैर्विशेषैः शब्दार्थसंबन्धव्युत्पत्तिर्भवति। विज्ञानं च तद्विषयम-
न्यथाऽन्यथा च प्रसज्यमानं विशेषविषयमुपसंह्रियमाणम्। अक्रियमाणमेव
सिद्धमृत्विक्त्वम्। अपि च वरणभरणाभ्यामृत्विजो वोत्पाद्येरन्; ऋत्विक्त्वं वा।
तत्र ऋत्विजस्तावन्मातृपितृभ्यामेवोत्पादिता इति न पुनरुत्पत्तिमपेक्षन्ते। त-
था योग्यतालक्षणमृत्विक्त्वमध्ययनश्रवणाभ्यां सिद्धमिति न पुनः साधनीयम्।
वक्ष्यति च 'याजमानास्तु' इत्यत्र न योग्यतैषां यजमानेन कर्तव्येति। सर्वत्र
च यदनुत्पन्नं तदुत्पाद्यते, किं चैषां प्राग्वरणादनुत्पन्नं कर्म प्रत्यानमनम्। ननु
ऋत्विक्त्वमप्यनुत्पन्नम्। सत्यं, तत्तु पश्चादप्युत्पद्यमानं न पश्यामः। अथ य-
दुत्पद्यते तदेव ऋत्विक्त्वं, तथा सत्यानमनमेव तन्नान्यत्किंचित्। न चेदमदृष्ट-
मृत्विक्त्वम्। यस्य हि कार्यमदृष्टं भवति तत्स्वरूपमप्यदृष्टं भवेत्। ऋत्विक्कार्यं
तु कर्मनिर्वृत्तिर्दृष्टैव सा कथमदृष्टसाध्या भविष्यति। यावता च सा भवति
तत्सर्वं विद्वत्त्वब्राह्मणत्वादि दृश्यत एव। यत्त्वदृष्टं किंचित्तत्प्रकरणवशात्कर्मप्र-
योगवचनेन गृह्यमाणं तदर्थमेव नाध्वर्य्वादित्वे व्याप्रियते। न च तद्वरणभर-
णाभ्यां जायत इति तयोरनिमित्तत्वं भवति। आहवनीयादीनां त्वप्रकरणोत्प-
त्तीनामदृष्टोपकाराणामनुत्पन्नावस्थानां संस्कारविधानादुपपन्नमुत्पाद्यत्वम्। न
हि तत्र होमादिभिस्त्यज्यमानद्रव्याधारोऽपेक्षितः। तेनावश्यं तत्संबन्धाददृष्ट-
मेवाभ्युपगन्तव्यम्। न च तदग्निमात्रात्सिध्यतीति तन्निर्वृत्त्यर्थमदृष्टमेवाऽऽह-
वनीयादित्वमपेक्षितम्। अतो नैष दृष्टान्तः। यदि चादृष्टमृत्विक्त्वं वरणभर-
णाभ्यां जन्येत, ततः सत्रेऽपि यजमानेषु तदाधातव्यं, तद्विशेषाश्चाध्वर्य्वाद-
यो दीक्षावाक्येऽनूद्यन्त इति वरणभरणे कर्तव्ये स्याताम्। तत्र 'वरण-
मृत्विजामानमनार्थत्वात्सत्रे न स्यात्स्वकर्मत्वात्' 'परिक्रयश्च तादर्थ्यात्' इति

---

७ माण] उपसंह्रियमाणमिति—एभिर्विशेषैर्भवतीति पूरणीयम्।

११ माना] ( अ॰ ३ पा॰ ८ अ॰ २ सू॰ ४ )।

२१ व्याधारोऽपेक्षितः] अपेक्षित इति—देवताये त्यक्तस्य द्रव्यस्य पूर्वदेशविभजनमात्रेणापि प्रक्षेपघटितहोमपदार्थनिष्पत्तेरित्यर्थः।

२५ दीक्षा] दीक्षावाक्य इति—सत्रात्मकद्वादशाहप्रकरणे ह्येवं श्रयते 'अध्वर्युगृहपति दीक्षयित्वा ब्रह्माणं दीक्षयतितत उद्गातारं, ततो होतारं ततस्तं प्रतिप्रस्थातां दीक्षयित्वाऽर्धिनो दीक्षयति—ब्राह्मणाच्छंसिनं ब्रह्मणः, प्रस्तोतारमुद्रातुः, मैत्रावरुणं होतुः, ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति—आग्नीध्रं ब्रह्मणः, प्रतिहर्तारमुद्रातुः अच्छावाकं होतुः, ततस्तमन्नेता दीक्षयित्वा पादिनो दीक्षयति—पोतारं ब्रह्मणः सुब्रह्मण्यमुद्रातुः ग्रावस्तुतं होतुः, ततस्तमन्यो ब्राह्मणो दीक्षयति ब्रह्मचारी वाऽऽचार्यप्रोषितः, इति, तदस्मिन्वाक्य इत्यर्थः।

२६ मृ] ( अ॰ १० पा॰ २ अ॰ १० सू॰ ३४ )

२६ य] ( अ॰ १० पा॰ २ अ॰ ११ सू॰ ३५ )।

च विरुध्यते। तस्मात्कर्मयोग्यतयाऽवधारितानामेव वरणभरणाभ्यामुपादाननियमः कर्मार्थः क्रियते। ऋत्विक्शब्दश्चावैगुण्यात्तद्विषय एवोपसंह्रियमाणः सतोऽप्यन्यान्योग्यान्नाऽऽलम्बते। सत्रे तु स्वयंकर्तृकत्वाद्वरणभरणयोरनपेक्षितयोरग्रहणाद्विनैव ताभ्यामवैगुण्यमिति योग्यतामात्रेणैवाध्वर्युत्वादिसिद्धिः। तद्यथा पौर्णमास्यां विनाऽपि शाखापरिवासनेन यदेवाङ्गारापोहनक्षमं द्रव्यं 1099
स एवोपवेष इत्यदोषः। तस्माद्यथा 'यूपस्य स्वरुं करोति' इत्यत्राऽऽदाने कर्मशब्द इति वक्ष्यति तथाऽत्र भाष्यकारस्य द्रष्टव्यम्॥ ३३॥ § 7065

पक्षेणेति चेत्॥ ३४॥ § 7066

वैश्वानरद्वादशकपालाधिकारे ह्यष्टत्वादय उच्चार्यमाणाः स्वरूपेणानुपयुज्यमानाः शक्नुवन्त्यवयवत्वं गमयितुम्। स्तुत्या चोपयुज्यन्ते। न त्विह परमसंख्योपात्ता यदधिकारात्सप्तदशत्वमवयवः प्रतीयेत। स्तुत्यर्थं च स्यात्। तस्मादृत्विक्त्वोपसंहारार्थमेवैतदिति सप्तदशर्त्विजः॥ ३५॥ § 7067

इति सर्वेषामृत्विक्शब्दावाच्यताधिकरणम्॥ १६॥

## ०.०.१९० ब्रह्मादीनामेव ऋत्विक्त्वनियमाधिकरणम्

प्रकृतानां ये केचित्सप्तदशेति प्राप्तेऽभिधीयते। सामानाधिकरण्यप्रयोगान्नियमः। तच्च दक्षिणादानक्रमवाक्यगतं ब्रह्मादीनां दृश्यते न चमसाध्व- 1100
र्यूणाम्। यद्यपि च सिद्धमृत्विक्त्वमनूद्यमानं न शक्यमुपसंहर्तुमिति बुद्धिर्भवति तथाऽपि सप्तदशश्रुत्यपेक्षितविशेषावस्थानं तदेष्वेव वेदेन सिद्धवदाश्रितमतोऽस्माकमेवं परिच्छेदो भवति नूनमेत एवर्त्विज इति॥ ३६॥ § 7069

'य ऋत्विजस्ते यजमानाः' इति यजमानर्त्विक्शब्दौ समानविषयौ नियम्य यजमानसंस्कारं दीक्षां ब्रह्मादिषु क्रमार्थमनुवदन्नेतेषु तौ द्वावपीति दर्शयति। तस्माद्ब्रह्मत्वादिकरणयोग्येष्वेवर्तौ यजत्सु ऋत्विक्त्वं न सर्वेषु। तद्विषयमेव चर्तुयजनं शब्दस्य प्रवृत्तिनिमित्तम्। यथा सास्नादिमद्गमनं गोशब्दस्य,

६ स्मा] एवं तर्हि ऋत्विक्शब्दस्य यौगिकत्वे 'वरणेन ऋत्विजः क्रियन्ते' इत्यादिभाष्यस्य का गतिरिति चेदत आह—तस्मादित्यादिना।
७ व] वक्ष्यतीति—( अ° ४ पा° २ अ° १ सू° ६ ) इत्यत्रेत्यर्थः
१ चेत्] एतत्सूत्रस्थभाष्यस्य सुस्पष्टतयाऽव्याख्याय सूत्रस्य पाठमात्रं कृतम्।
१ ष्ट] अष्टत्वादय इति'वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते' इत्युपक्रम्यैवं श्रूयते' यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति, यन्नवकपालस्त्रिवृतैवास्मिंस्तेजो दधाति, यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति, यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति, यद्द्वादशकपालो जगत्यैवास्मिन्पशून् दधाति ( तै° सं° २-२-५ ) इत्यादिरिति शेषः।

1101 यथा धाय्याशब्दः सामिधेनीषु निपात्यमानस्तास्वेवेत्यवधारणान्नान्यासु धीयमानास्वपि धाय्याशब्दवाच्यत्वं भवतीत्यवधार्यते। तथैतवर्ताविव यजत्सु भवति न तु भवत्येवेत्यवधारयितव्यम्॥ ३७॥ § 7070

इति ब्रह्मादीनामेव ऋत्विक्त्वनियमाधिकरणम्॥ १७॥

## ०.०.१९१ स्वामिनः सप्तदशत्वाधिकरणम्

दीक्षादक्षिणावाक्ययोः षोडशानां संकीर्तनात्तावन्तोऽवधारिताः। सप्तदशः कस्तेषामिति न ज्ञायते। सदस्ययजमानचमसाध्वर्यवश्चावशिष्यन्ते। तत्र चमसाध्वर्यूणां तुल्यकल्पत्वादन्यतरावधारणप्रमाणं नास्तीति सदस्ययजमानयोरन्यतरः संदिह्यते। तत्र कर्मकरत्वसामान्यात्सदस्यग्रहणप्रसक्तावभिधीयते। स्वामिसप्तदशाः स्युरिति। कथं पुनः पूर्वत्रर्तुयजमानकर्मनिमित्तत्वमनभ्युपगम्याधुना तत्सामान्यात्स्वामिनः ऋत्विक्कर्माभिधीयते। 'सदस्यं वृणीते' इति चोत्पत्तिसंयोगादध्वर्य्वादिवद्भेदः। न च ब्रह्मण्यवयवप्रसिद्धिः संभवति। समुदायप्रसिद्ध्या बाधितत्वात्। न च ब्रह्मणः पुनर्वरणं विधातुमनुवदितुं वा शक्यम्। अध्वर्य्वादिष्वप्येवमेव प्रसङ्गात्। सर्वेषु चोपहवादिषु ब्रह्ममन्त्रव्यतिरेकेणास्य मन्त्रः पठ्यते। तत्र चान्याय्यो विकल्प आश्रीयेत। न च चमससंबन्धेऽपि ब्रह्मणः संकीर्तनं सदस्यशब्देनोपयुज्यते। सामर्थ्याक्षिप्तेन चोपद्रष्ट्रा सदस्येनावश्यं भवितव्यम्। सोऽपि च प्रत्यवेक्षणादृतौ यजतीति
1102 शक्यो वक्तुम्। सर्वे याज्ञिकाश्च भेदेन तं वृण्वते। तस्मादयुक्ता सदस्यनिराक्रियेति। उच्यते। § 7072

ऋत्वङ्गत्वेन नैवेह सदस्यस्य निराक्रिया।
चमसाध्वर्युवत्त्वेष नर्त्विगित्यभिधीयते॥ § 7074

सदस्यो हि भेदेन वरीतव्य एव। न च ब्रह्मा सदस्यशब्देनोच्यते। ऋतुयजने सति वरणेनर्त्विक्त्वनियमाद्दक्षिणाभागसंबन्धद्वादशाहदीक्षावाक्ययोश्चासंकीर्तनादृत्विगिति नोच्यते। यथा सत्यपि वरणे ऋतुयजनसंबन्धे च कारणद्वयासंभवाच्चमसाध्वर्यव ऋत्विजो नोक्ताः। स्वामिनस्तु यद्यपि च वरणं नास्ति तथाऽप्यन्यत्सर्वमस्तीति युक्तमृत्विक्त्वम्। यत्तु सदस्योऽपि प्र-

१ सामिधेनीषु] निपात्यमान इति—'पाय्यसांनाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु' पा॰ सू॰ ( ३-१-१२९ ) इत्यनया स्मृत्येत्यर्थः।
१० व्य] व्यतिरेकेणेति—'ब्रह्मन्नुपहवयस्व' 'सदस्योपहवयस्व' इत्यादिना ब्रह्ममन्त्रापेक्षया सदस्यमन्त्रस्य पृथगाम्नानात् 'ब्रह्माणमेव ते समामनन्ति' इत्यादिना भाष्योक्तं ब्रह्मण एव सदस्यत्वं दुरभ्युपगममित्याशयः।
१३ स] सदस्यनिराक्रियेति—ब्रह्मव्यतिरिक्तस्य सदस्यस्य निराक्रियेत्यर्थः।

त्यवेक्षणाद्यजतीति। वचनसामर्थ्यादेवासौ व्रियते, न तु कश्चित्पदार्थस्तदधीनः, येनास्य व्यपदेशः स्यात्। न च प्रत्यवेक्षणं नाम कश्चित्पदार्थो येनास्य कर्तृविशेषः केनचित्प्रमाणेन नियम्येत। तस्मात्सत्येव सदस्ये सूक्तं स्वामिसप्तदशा इति। यत्तु भाष्यकारेण किंचित्सदस्यनिराकरणपरमुक्तं तद्दृत्विक्त्वनिराकरणपरस्यातिरभसवचनमित्युपेक्षणीयम्॥ ३८॥ § 7075

इति स्वामिनः सप्तदशत्वाधिकरणम्॥ १८॥

## ०.०.१९२ समाख्ययाऽध्वर्य्वादीनां नियतपदार्थकर्तृताधिकरणम्

एवं कर्तृभेदं प्रतिपाद्येदानीं समाख्याविनियोगस्य पूर्वपक्षं रचयति स्म। तत्र 'ते सर्वार्थाः' इति न ज्ञायते किं क्रत्वर्थपुरुषार्थाभिप्रायमुत क्रत्वर्थसर्वार्थाभिप्रायम्। तत्रापि किं वाक्यसंयुक्तसर्वार्था उतासंयुक्तसर्वार्थाः। यदि तावत्पुरुषार्था अपीत्यभिप्रायः, स वरणभरणयोः प्रकरणाम्नानेन क्रत्वर्थत्वादयुक्तः। उक्तं हि 'प्रकरणविशेषाद्वा तद्युक्तस्य संस्कारो द्रव्यवत्' इत्यादिषु। तथैकादशे वक्ष्यति 'निर्देशाद्वा वैदिकानां स्यात्' इति। तस्मादेवं तावन्न सर्वार्थत्वम्। नापि संयुक्तेषु 'तान्पुरोऽध्वर्युर्विभजति' इत्यादिक- 1103 श्रुतानामन्येषामवतरणमस्तीति। यानि त्वसंयुक्तानि कार्याणि तानि यत्र तत्र वेदे पठितानि येन केनचित्कर्त्रा यथासामर्थ्यं कर्तव्यानीति सर्वार्थाः। प्रयुक्तत्वादिति—सर्वाणि हि कार्याणि शक्नुवन्ति तान्प्रयोक्तुम्। तथा तेऽपि कार्याणि। सर्वं पुरुषकार्यमिति—यद्यत्कर्मणि पुरुषैः प्राग्वचनविशेषात्स्वसामर्थ्येन शक्यते तत्तदित्येवं युज्यते, न पुरुषार्थाभिप्रायेण। ये पुनराहवनीयादयस्तेषां सर्वार्थत्वमप्रस्तुतमेव। न च प्रसङ्गादुच्यते। स्वकालत्वस्य हेतोरप्यसमर्थत्वात्। न च तस्योत्तरपक्षे कश्चित्पक्षस्य हेतोर्वा परामर्शोऽस्ति। यदि च लौकिककार्यापेक्षया सर्वार्थत्वमभिधीयते ततो 'विहारो लौकिकानामर्थं साधयेत्प्रभुत्वात्' इत्युक्त्वा 'निर्देशाद्वा वैदिका-

---

५ र] ( अ॰ ३ पा॰ ४ अ॰ ५ सू॰ १५ )।
६ थैका] तथा द्वादशे वक्ष्यतीत्येवं पाठ आवश्यकोऽप्येकादश इति पाठो लेखकभ्रान्तिमूलक इति ज्ञेयम्।
६ निर्देशा] (अ॰ १२ पा॰ २ अ॰ १ सू॰ ३ )।
१० यो] तान्प्रयोक्तुनिति-अध्वर्य्वादीनाक्षेप्तुमित्येकोऽर्थः।
११ था] प्रयुक्तत्वादित्यस्यैव द्वितीयार्थमाहतथेति। अनुष्ठातुं शक्नुवन्तीति शेषपूरणम्।
११ स] 'सर्वस्मै पुरुषकार्याय' इति भाष्यार्थमाह-सर्वमित्यादिना।
१६ विहा] ( अ॰ १२ पा॰ २ अ॰ १ सू॰ १ )
१६ निर्देशा] ( अ॰ १२ पा॰ २ अ॰ १ सू॰ ३ )।

नां स्यात्' इत्यत्र निर्णीतत्वादविचार्यम्। यदपि वेदविहिताग्निकार्यसर्वार्थत्वं प्रकृतिविकृत्योः, तदपि 'अग्निमुपनिधाय स्तुवते' इत्युदाहृत्य 'विशये लौकिकं स्यात्सर्वार्थत्वात्' *'न वैदिकमर्थनिर्देशात्' *'तथोत्पत्तिरितरेषां समत्वात्' ( धिष्ण्याग्नीनां स्यात् ) इति निर्णीतत्वादविचार्यम्। सिद्धान्तवचनमेवैतन्निराकरणोक्त्यभावात्। तस्मादेवं वर्ण्यते। नैवेदमग्नीनां सर्वार्थत्वं पूर्वपक्षीकृतम्। किं तर्हि। अधिकरणान्तरसूत्रोक्तन्यायप्रतिपादितानुमितपूर्वपक्षः सिद्धान्त एवायं सूत्रवाक्यभेदेनोच्यते। न चैतदग्निकार्यापेक्षया सर्वार्थत्वम्। किं तर्हि। प्रकृतिविकृत्यपेक्षया। तत्रानारभ्यवादन्यायेनाऽऽधानवदेव पूर्वोत्तरपक्षौ रचयितव्यौ किमाहवनीयादयः प्रकृत्यर्था आहोस्वित्सर्वार्था इति।
1104 तत्र 'तत्प्रकृत्यर्थं यथान्येऽनारभ्यवादाः' 'प्रकृतौ वा द्विरुक्तत्वात्' इत्येवं प्राप्तेऽभिधीयते। अग्नयः सर्वार्थाः—प्रकृतिविकृत्यर्था भवेयुः। कुतः। स्वकालत्वात्—स्वतन्त्रोत्पत्तित्वादित्यर्थः। तदेतद्वर्णितं 'स्वर्वार्थं वाऽऽधानस्य स्वकालत्वात्' इत्यत्र। न ह्येतत्सर्वविषयं सर्वार्थत्वमवकल्पते। § 7077

द्वारं येषु पराधीनं तेषु तत्प्राप्त्यपेक्षया।
प्राप्नुवन्तीदृशा भावा न स्वतन्त्राः कथंचन॥§ 7079

शास्त्रेण चोदिता ये हि दर्विहोमाः स्वरूपतः।
तेष्वेवाऽऽहवनीयः स्यान्न यागेष्वप्यचोदनात्॥§ 7081

यज्जुहोति तदाहवनीये इति श्रूयते। न यद्यजेरन्निति। तेनावश्यमाहवनीयचोदनया तावत्प्रतीक्षितव्यं यावत् 'चतुरवत्तं जुहोति' 'यद्गृहान् जुहोति' 'यद्यमसान् जुहोति' इति चातिदेशेन संबन्धाद्द्वारं प्राप्तम्। § 7082

ततश्चाऽऽहवनीयेन सहैवास्यातिदेशतः।
प्रकृतौ वा द्विरुक्तत्वादित्ययं निश्चयो भवेत्॥§ 7084

तथा च 'तासामग्निः प्रकृतितः प्रयाजवत्' इति सिद्धवत्प्रकृत्यर्थत्वं दर्शितम्। तथा वैकृतचरुपुरोडाशानां प्रत्यक्षहविःश्रपणविधानाद्गार्हपत्यप्राप्तिद्वारं

---

२ विश] (अ° ७ पा° ३ अ° १२ सू° ३० )।
३ *] ( अ° ७ पा° ३ अ° १२ सू° ३१ )
३ *] ( अ° ७ पा° ३ सू° ३२ )।
६ णान्त] अधिकरणान्तरेति—'प्रकृतौ वा द्विरुक्तत्वात्' ( अ° ३ पा° ६ अ° १ सू° २ ) इत्यनारभ्यवादाधिकरणसिद्धान्तसूत्रेण, खादिरत्वादेः प्रकृतिविकृत्यर्थत्वे द्विरुक्तत्वापत्तिलक्षणो योऽयं न्याय उक्तः, 'तत्प्रकृत्यर्थं यथाऽन्येऽनारभ्यवादाः' ( अ° ३ पा° ६ अ° ५ सू° १४ ) इत्याधानाधिकरणपूर्वपक्षसूत्रेण चाऽऽधानेऽतिदेशाद्दृढीकरणेन प्रतिपादितश्च, तेनानुमितः पूर्वपक्षो यस्य सिद्धान्तस्य स एवाग्नीनां सर्वार्थत्वसिद्धान्तः 'ते सर्वार्थाः प्रयुक्तत्वात्' इति सूत्रवाक्यापेक्षया थग्भूतेन 'अग्नयश्च स्वकालत्वात्' इत्यनेनोच्यत इति पदशोऽर्थ
१० कृ] (अ° ३ पा° ६ अ° ५ सू° १० )।
१० वा] ( अ° ३ पा° ६ अ° १ सू° २ )।
१२ स्व] (अ° ३ पा° ६ अ° ५ सू° १५ )।
२३ तासा] ( अ° ३ पा° ६ अ° ६ सू° १६ )।

नास्तीत्यवश्यं सगार्हपत्यमेव श्रपणं प्रकृतितः प्राप्नुवदपेक्षितव्यम्। अग्निषु पर्यवसितम्। ऋत्विक्षूत्तरं सूत्रमारभ्यते॥ ३९॥ § 7085

समाख्यासंयोगाद्व्यवस्था भवेत्। न हि हौत्रमकुर्वतो होतृसमाख्याऽर्थवती भवति। नापि तेनाक्रियमाणस्य हौत्रव्यपदेशोऽवकल्पते। तस्मादन्यथानुपपत्त्या कल्पितया श्रुत्या विनियोगः। तत्र केचिदाहुः। अन्योन्यनिरपेक्षयोरेव रूढिरूपेण कर्तृकर्मसमाख्ययोः प्रसिद्धयोरक्षरसारूप्येणोपतिष्ठमानयोर्विनियोजकत्वमिति। कुतः। § 7086

संयोगः पूर्वसिद्धो हि निमित्तत्वं प्रपद्यते।
न चेह प्राक्समाख्यानात्किंचित्संयोगकारणम्॥ § 7088

होतृशब्दस्तावन्न हौत्रनिमित्त इति राजशब्दवदेव प्रत्ययलोपप्रातिपदिकप्रत्यापत्त्योरस्मरणादवगतमेतत्। न च राजशब्दादिव राज्यशब्दो होतृशब्दाद्धौत्रशब्दः शक्यः कल्पयितुम्। न हि यथा तत्र मन्वादिभिः क्षत्रियस्य रक्षणं विहितं तद्राजकर्मत्वेन ज्ञायमानं प्रत्ययार्थत्वं प्रतिपद्यते। तथेह केनचित्सामिधेन्यनुवचनादेर्होतृकर्मत्वं प्रसिद्धं यन्निमित्ता समाख्या स्यात्। न चैवं सति समाख्या विनियोक्त्रीत्यवसीयते। कथं तर्ह्यसत्यामवयवव्युत्पत्तौ विनियोगः। उक्तमेतच्छब्दसारूप्यमात्रादिति। न त्वेतद्युक्तम्। यदि होतुः कर्म हौत्रमित्येवं न व्युत्पाद्यते ततोऽन्तरेणैव कर्तृकर्मसंबन्धं रूढ्या सारूप्यसमाख्ययोरुपपन्नत्वान्नार्थापत्तिः श्रुतिं कल्पयेत्। न हि वर्णसामान्यमात्रेण शालामालयोः कश्चित्संबन्धः। तथा च वक्ष्यति, न हि कण्वरथंतरे रथंतरसंबन्धः कश्चिदस्तीति। यदपि च कृते राज्ञः कर्मसंबन्धे राज्यशब्दः प्रवर्तत इति। तदयुक्तम्। संबन्धस्याऽऽदिमत्त्वप्रसङ्गात्। तस्माद्यथैव तत्र नित्ययोरेव शब्दार्थयोर्नित्य एव संबन्धे शास्त्रतः प्रतीयमाने साधुत्वप्रतिपत्तिवेलायां राजशब्दमन्वाख्याय राज्यशब्दोऽन्वाख्यायमानो यौगिकस्तन्निमित्तश्चोच्यमानोऽपि नित्यनिमित्तत्वान्नाऽऽदिमत्त्वं प्रतिपद्यते तथैवात्र हौत्रमिति वृद्धिदर्शनाद्धोतृशब्दात् 'तस्येदं कर्म' इत्येवमन्वाख्यानमिति गम्यते। केन तु तत्तस्य कर्मावगतमिति। समाख्यादर्शनात्तदेव तादृशं वचनमनुमास्यामहे। नन्वितरेतराश्रयं प्राप्नोति समाख्यातस्तद्वचनं, तेन क्लृप्ते संयोगे समाख्यासिद्धिरिति। नैष दोषः। समाख्या तावत्प्रतीतिरूपेण प्रत्यक्षा। सा तु केन निमित्तेन प्रवृत्तेति पूर्वप्रवृत्ततयैव निमित्तमपेक्षते। न च तदस्ति। तस्मान्नूनमीदृशी श्रुतिरस्ति, यथा होत्रा कर्तव्यमेतदिति। सर्वेष्वेव लिङ्गादिष्वेवमेतद्भवतीति व्याख्यातम्। अतो नेतरेतराश्रयत्वमिति। ननु चेदम् 'आख्या चैवं तदर्थ- 1105

१७ व] ( अ॰ १० पा॰ ४ अ॰ २३ सू॰ ४६ ) अत्रत्यं 'नासौ कण्वानां रथंतरं कण्वरथंतर मित्येवं कृत्वोच्यते' इत्येवं भाष्यमर्थतः पठति वक्ष्यतीत्यादिना।
२९ व्याख्या] व्याख्यातमिति—बलाबलाधिकरण इति शेषः।
२९ आख्या] ( अ॰ ३ पा॰ ३ अ॰ ६ सू॰ १३ )।

त्वात्' इत्यनेनैवाधिकरणेन सिद्धम्। सत्यं सिद्धं न तु तत्र विरोधाविरोधौ विचारितौ। इह तु योग्यत्वप्रकरणविशेषात्सर्वार्थत्वप्रसक्त्या विरोधमाशङ्क्य परिहरति, उत्तरविवक्षया वाऽनुवदतीत्यपुनरुक्तम्॥ ४०॥ §7089

इति समाख्ययाऽध्वर्य्वादीनां नियतपदार्थकर्तृताधिकरणम्॥ १९॥

## ०.०.१९३ सामान्यसमाख्यातकर्तुर्विशेषसमाख्यादिना बाधाधिकरणम्

1106 विशेषसमाख्याऽपि विशेषश्रुतिवदेव शीघ्रतरप्रवृत्तेर्बाधिका भवति॥ ४१॥
§7091

सामान्यसमाख्याविनियोगस्यैवैतल्लिङ्गम्। विशेषसमाख्यायां तु किंचिदन्यद्द्रष्टव्यम्॥ ४२॥ §7092

इति सामान्यसमाख्यातकर्तुर्विशेषसमाख्यादिना बाधाधिकरणम्॥ २०॥

## ०.०.१९४ प्रैषान्तानुवचनेष्वेव मैत्रावरुणस्य कर्तृतानियमाधिकरणम्

उपदेशात्सिद्धे समाख्याबाधे समस्तैकदेशविषयत्वेन विचारः। ज्योतिष्टोमप्रकरण एवैतच्छ्रूयते 'तस्मान्मैत्रावरुणः प्रैष्यति चानु चाऽऽह' इति। प्रदर्शनार्थं त्वग्नीषोमीय इत्युक्तम्। तत्र सर्वप्रैषाणामाध्वर्यवत्वं, सर्वानुवचनानां च हौत्रसमाख्यनम्। तत्किमनेनोपदेशेन समस्तविषयः समाख्ययोर्बाध उत क्वचिदेवेति। किं प्राप्तं, प्रैषानुवचनोद्देशेन मैत्राव-
1107 रुणोपादानादुद्दिश्यमानयोश्च शब्दप्रतिपादितसाहित्यविवक्षानुपपत्तेः श्रूयमाणश्च
चशब्दः समुच्चयान्वाचयमात्रं प्रतिपादयति नेतरेतरयोगसमाहारौ, नित्यं समासगम्यत्वात्। न चेहान्वाचयलक्षणमुभयोस्तुल्यत्वादुपपद्यत इति समुच्चयः स्यात्। स च पृथगपि सर्वेष्वनुष्ठीयमानेषु संभवत्येवेति सामान्यवचनात्सर्वप्रत्ययः॥ ४३॥ §7094

न सर्वप्रैषानुवचनेष्वसौ भवेत्। क्व तर्हि। पुरोनुवाक्यासु। प्रैषान्तान्यनुवचनानि पुरोनुवाक्याः। ताश्च प्रकृत्यैतद्वचनं प्रवृत्तं 'तस्मान्मैत्रावरुणः' इति। ताश्च तादृश्यो हौत्र एव पठिता इति तस्यैव केवलस्य प्राप्नुवन्ति। यस्तु

६ ब्द] शब्दप्रतिपादितेति—एकवाक्योपादानावगतत्यर्थः।

तासामन्ते यजेतिशब्दः स इष्टिप्रकृतिकेषु तावदङ्गेष्वतिदेशेनाध्वर्योः प्राप्नोति। सोमयागेष्वपि ‘प्रेषेषु च पराधिकारात्’ इत्येवं निवर्तमानः ‘तेषां यतो विशेषः स्यात्’ इत्येवं मैत्रावरुणस्यैव। अथवा प्रेषकस्योभयत्र कर्तृत्वाद्वक्ष्यमाणेन न्यायेन प्रेष्यत्वं मैत्रावरुणस्य कल्पयित्वा होतुरेव प्राप्नोति। तथाऽध्वर्योः ‘प्रेष्य’ इति प्रेषान्तराम्नानात् ‘यज’ इत्येष निवर्तमानः प्रतिप्रस्थातुः प्राप्नोति। शेषाणि तु प्रैषानुवचनानि निर्ज्ञातकर्तृविशेषत्वान्निराकाङ्क्षाण्येवेति न तेषु मैत्रावरुणविधिः संभवति। पुरोनुवाक्यानां पुनरुभयांशपातित्वादेकपदार्थत्वेन च नानाकर्तृत्वानुपपत्तेर्होतुरध्वर्योश्च प्रच्यवमानानां साकाङ्क्षत्वात्संनिधानाच्च युक्तो मैत्रावरुणाविधिः। एवं चशब्दोऽपि सहप्रयोगादपि प्रकृष्टार्थैः समर्थितो भवति, प्रैषसंनिधानात्। न च ‘प्रेष्य’ इत्यादयोऽपि प्रैषास्तस्यैवाऽऽत्मविषयाः संभवन्ति॥ ४४॥ § 7095

प्रातरनुवाके च होतृदर्शनात्॥ ४५॥ § 7096 1108

इति प्रैषान्तानुवचनेष्वेव मैत्रावरुणस्य कर्तृतानियमाधिकरणम्॥ २१॥

## ०.०.१९५ चमसहोमेष्वध्वर्युकर्तृत्वाधिकरणम्

उन्नयनासादनहोमादि यावत्किंचिदध्वर्योश्चमसेषु प्राप्नोति तत्सर्वं विशेषसमाख्यानाच्चमसाध्वर्युभिः कर्तव्यम्॥ ४६॥ § 7098

सा नाम विशेषसमाख्या सामान्यसमाख्यां बाधते या तन्निरपेक्षा प्रवर्तते। चमसाध्वर्युसमाख्या तु चमसेष्वध्वर्युवद्वृत्तिं प्रतिपादयति। तद्यदि तावदध्वर्युर्नैव जुहुयान्न तर्हि तान् जुह्वतस्ते चमसाध्वर्यवो भवन्ति। काममजुह्वत एव तद्वद्भावं लभेरन्नान्यथा। यदि तु स जुहोति ततः कदाचित्तस्य व्यापृतत्वेनाशक्तौ सत्यां ते जुह्वतस्तद्वद्भवेयुस्तस्माज्जुहोत्यध्वर्युः॥ ४७॥ § 7099

वषट्कारिणं प्रति प्रयोजनान्तराभावाद्भक्षार्थे नयने चमसाध्वर्युं नेतारं ब्रुवन्नहुतस्य भक्षणासंभवाद्य एव जुहोति स एव प्रयच्छति भक्षणार्थं तं च 1109
ग्रहीतृत्वेन चमसा ध्वर्यूणां व्यापृतत्वात्तेभ्योऽन्यमध्वर्युं दर्शयति॥ ४८॥ § 7100

अशक्तौ ते प्रतीयेरन्॥ ४९॥ § 7101

इति चमसहोमेष्वध्वर्युकर्तृत्वाधिकरणम्॥ २२॥

---

२ प्रेषेषु] ( अ॰ ३ पा॰ ८ अ॰ ११ सू॰ २२ )।

३ विशेषः] (अ॰ ३ पा॰ ८ अ॰ १० सू॰ २१ )।

१ र्श] एतत्सूत्रस्थभाष्यस्य स्पष्टत्वान्न व्याख्यातम्।

१ तीये] ‘अध्वर्युर्वा तन्न्यायत्वात्’ इति सूत्र एव ‘यदि तु स जुहोति ततः कदाचित्तस्य व्यापृतत्वेनाशक्तौ सत्याम्’ इत्यादिना व्याख्यातत्वादधुना सूत्रस्य पाठमात्रं कृतम्।

## ०.०.१९६ श्येनादौ प्राकृताङ्गेषु नानाकर्तृकत्वाधिकरणम्

‘गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग’ इत्यत्र व्याख्यातं य-
1110 थाऽङ्गानि प्रधानवेदव्यपदेशं लभन्त इति। तस्माच्छयेने सर्वे पदार्थाश्चोदक-
प्राप्ता उद्गातृभिः कर्तव्या इति॥ ५०॥ § 7103

उक्तं, वक्ष्यते चैतद्यथा जघन्यकालत्वात्प्रयोगवचनश्चोदकाद्दुर्बल इति।
प्रयोगवचनाश्रया च प्रधानसमाख्या, सा सत्यपि प्रत्यक्षत्वे दुर्बला। याव-
च्चातिदेशेन नाङ्गानि प्राप्यन्ते तावत्कस्य कर्तारं नियच्छति। यदा तु प्राप्तानि
भवन्ति तदैषां क्लृप्तकर्तृसंबन्धान्न कदाचिदपेक्षेति किं समाख्या करिष्यति।
न चात्र प्राप्तबाधो भवति, श्रुतिकल्पनेन समाख्याया विप्रकृष्टत्वात्। उक्तं
ह्येतद्यथा क्लृप्तमूलानां प्रमाणानां प्राप्तबाधो भवति न कल्प्यमूलानामिति। त-
स्मात्प्राप्तकृतग्रहणेन तदधिकारसामर्थ्याज्ज्योतिष्टोमवदेव नानाकर्तृकः स्यात्।
यद्यपि च प्रकृतावपि समाख्ययैव नानाकर्तारस्तथाऽपि क्लृप्तसंबन्धत्वादिह
श्रुतितुल्यता। यत्त्वप्राकृतं किंचिदाम्नायते तस्य प्रधानसमाख्यातकर्ता भविष्य-
तीति दर्शयन्नाह—‘अव्यक्तः शेषे’ इति। अक्लृप्तावस्थत्वादव्यक्तोऽयं कर्तृसंब-
न्धः क्लृप्तादन्यत्र भवितुमर्हति। न त्वस्य विषयः सम्यग्दृश्यते। कण्टकवितोद-
नादीनि यद्वा प्रधानसमाख्याते वेदे पठ्यन्ते, वेदान्तरे वा। यदि तावत्तत्रैव
1111 ततः समाख्ययैव तेषां कर्तृसंबन्धो न प्रधानद्वारेण। अथ तु वेदान्तरे पठ्यन्ते
ततः प्रत्यक्षत्वे सत्यपि तयैव विशेषसमाख्यया बलीयस्या भवितव्यम्। अथा-
त्रापि गुणमुख्यव्यतिक्रमन्याय आश्रीयते ततः स्तोत्रशस्त्रादीनां ज्योतिष्टोम-
स्याऽऽध्वर्यवसमाख्यानादध्वर्युकर्तृकत्वप्रसङ्गः। न चात्र ‘मन्द्रं प्रातःसवने’
इत्यादिवत्समाधानमस्ति। तस्मान्न प्रधानेनाङ्गेषु स्वसमाख्या बाध्यते। सा
त्वौत्पत्तिकेन कर्तृसंबन्धेन विनियुक्तार्था सती प्रधानेन गृह्यते। न चाङ्गानां
प्रधानद्वारेणाऽऽध्वर्यवादिसमाख्या युज्यते। न हि प्रधानान्याध्वर्यवादिस-
माख्याभिर्युज्यन्ते, गुणभूतेषु कर्तृव्यापारात्। या च प्रधानेषु न व्यापृता
सा तद्द्वारेणाङ्गेष्ववतरिष्यतीति कुत एतत्। ऋग्वेदादिसमाख्या प्रधानेष्वङ्गेषु
चाविरुद्धा। तेन क्रियत इति च तत्र व्यपदेशः। स च प्रधानप्रयोग-
वचनेन विधेयत्वादङ्गेषु युज्यते। पाठकृता चाऽऽध्वर्यवादिसमाख्या। सा
यथापाठमेव भवितुमर्हति। न चात्र गुणमुख्यव्यतिक्रमन्यायेनानभ्युपगतेन

---

१ मुख्य] ( अ° ३ पा° ३ अ° २ सू° ९ )

१ उ] उक्तमिति-गुणमुख्यव्यतिक्रमाधिकरणे स्वरचर्चायां स्वयमुक्तमित्यर्थः।

१ व] वक्ष्यत इति—( अ° ५ पा° १ अ° १० सू° १८ ) इत्यत्र भाष्यकारेणेत्यर्थः।

५ उ] ( अ° ३ पा° ३ अ° ७ ) इत्यत्र ‘अथ यत्तत्र तत्रोच्यते, इदमनेन बाध्यते’ इत्यादिभाष्यग्रन्थव्याख्यानावसरं इत्यर्थः।

१३ मा] समाख्ययैवेति—औद्गात्रमिति समाख्यायाः सर्वनामार्थविहिततद्धितान्तत्वेन सर्वनाम्नश्च बुद्धिस्थप्रकारावच्छिन्नवाचित्वात्प्र-त्येकवृत्तित्वावसायात्स्वसमाख्ययैव कर्तृप्राप्तिर्न प्रधानसमाख्ययेत्यर्थः।

१५ न्या] ( अ° ३ पा° ३ अ° २ ) अत्रत्यन्याय इत्यर्थः।

किंचिददुष्यति। कण्टकवितोदनादयश्च प्रधानवेदसमानोत्पत्तय एव द्रष्टव्याः। तदात्मना च शक्यम्, 'अव्यक्तः शेषः' इति वक्तुं, नावश्यं प्रधानादेवावतरन्ती समाख्याऽनुगृह्यते। साक्षादनुग्रहेऽप्यननुग्रहेऽपि वाऽन्याङ्गेषु कृतार्थत्वेनाविरोधात्तेन प्राकृताङ्गव्यतिरिक्तेषु समाख्या विनियोक्त्रीति सिद्धम्॥ ५१॥ §7104

इति श्येनादौ प्राकृताङ्गेषु नानाकर्तृकत्वाधिकरणम्॥ २३॥

इति श्रीभट्टकुमारिलविरचिते मीमांसाभाष्यव्याख्याने तन्त्रवार्तिके
तृतीयाध्यायस्य सप्तमः पादः।

## ०.०.१९७ दक्षिणादानस्य यजमानकर्तृकत्वाधिकरणम्

समाख्यापवादत्वेनैतदपि विचार्यते। किं परिक्रय आध्वर्यवादिष्वाम्नानात्त- 1112
त्समाख्यातैः पुरुषैः कर्तव्य उत स्वामिनेति। सिद्धे त्वेतस्मिन् 'अन्यो वा स्यात्परिक्रयाम्नानात्' इत्येतद्द्रष्टव्यम्। तथा स्वामिना लौकिक उपाय आस्थेयो यथाऽध्वर्य्वादयः स्वद्रव्येणेतरान्परिक्रीणते समाख्यानुग्रहार्थमिति प्राप्तेऽभिधीयते। §7107

लौकिकाश्रयणं तत्र यत्र नान्योऽस्ति वैदिकः।
वैदिके दक्षिणादाने सति किं लौकिकाश्रयः॥§7109

परिक्रयेण हि सर्वत्र स्वयं कर्तृत्वं यजमानस्योपपादितं यदि परिक्रयमपि न कुर्यान्न क्वचित्कर्तृत्वं प्रतिपद्यते। लौकिकेनोपायेन प्रतिपत्स्यत इति चेत्। न वचनादृते स्वयं कर्तृत्वबाधासंभवात्। तस्मात्स्वामिकर्म॥ १॥ §7110

उपदध्यादिति परस्मैपदादयाजमानत्वेऽवधारिते वरदानमृत्विक्कर्म। तत्सिद्धिश्च यदि तावच्छास्त्रीयेण परिक्रयेण लभ्यते ततोऽस्त्येव यजमानस्य कर्तृत्वम्। अथ न लभ्यते ततो लौकिक उपाय इति॥ २॥ §7111

इति दक्षिणादानस्य यजमानकर्तृकत्वाधिकरणम्॥ १॥

## ०.०.१९८ वपनादिसंस्काराणां याजमानत्वाधिकरणम्

कर्तृत्वमेवैतैर्विना। विगुणमिति यथासमाख्यं संस्काराः॥ ३॥ §7113 1113

३ स्या] ( अ° ३ पा° ७ अ° ८ सू° २० )।

पुरुषप्रधानत्वादेषां याजमानता। गुणभूते हि कर्तर्यपेक्षिते समाख्या नियामिका भवति। प्रधानत्वं च यजमानस्यासंदिग्धमवधारितम्। न चैते कर्तृत्वसंजननार्थाः। तैर्विनाऽपि सिद्धे कर्तृत्वे फलमात्रानुत्पादात्। ऋत्विक्फलं च दक्षिणालाभात्मकं विनाऽपि तैरुपलभ्यते न तु याजमानम्। तस्माद्यथैव प्रधानानि पुरुषार्थत्वाद्यजमानकर्तृकाणि भवन्ति, एवमेतेऽपीति, यथाप्राप्तरूपाणामेव चैषां यजमानगामित्वमिति न दन्तधावनमध्वर्युणा गृहीत्वा यजमानस्य दन्ताः क्षालयितव्याः। केशश्मश्रुवपनेऽपि नित्यं नापितकर्तृत्वमिति नाध्वर्योः क्षुरग्रहणापत्तिः॥ ४॥ § 7114

अध्वर्युव्यापारे च 'अभ्यनक्ति' इति परस्मैपदेन निर्देशात् 'अभ्यङ्क्ते' इत्यात्मनेपदयुक्तो विधिर्यजमानस्येति गम्यते॥ ५॥ § 7115

1114 यत्त्वितरकर्मवत्समाख्यया नियम्यत इति। तत्र समाख्या नियामिका भवति, यत्र कर्तुरपेक्षा। क्व चासौ, यदर्थः परिक्रयः। स च कर्तुः क्वचिद्गुणत्वमापादयितुं क्रियते न संस्काराय। तद्दर्शयति कल्पनीयो हि वपनादिभिः सह विनैवापेक्षया संबन्धः। इतरैः पुनः कॢप्तोऽपेक्षणादिति॥ ६॥ § 7116

प्रधानापूर्वाश्रयत्वाच्च यजमानस्य संस्काराः संनिकृष्टाः सुखमपूर्वेण ग्रहीष्यन्ते। तत्सिद्ध्यर्थत्वाद्वा तत्रैव कर्तव्या इति॥ ७॥ § 7117

अनेन च न्यायेन यजमानस्य, समाख्यया चर्त्विजां भवन्तु विरोधाभावात्। न च संस्कारत्वात्प्रतिप्रधानमावर्तमाना दोक्ष्यन्तीति चोदिते वदति। नैतद्युक्तम्। सर्वं हि यजमानेन स्वयं कर्तव्यं परिक्रयेण वा कारयितव्यम्।
1115 तद्यदि संस्कारानध्वर्य्वादयः कुर्युस्ते परिक्रयस्यायोग्यत्वेनासाध्यत्वान्न कारिता नापि कृता इत्यकर्माङ्गमेव स्युः। तस्मान्नर्त्विग्यजमानानामेते समानविधाना इति॥ ८॥ § 7118

इति वपनादिसंस्काराणां याजमानत्वाधिकरणम्॥ २॥

## ०.०.१९९ तपसो याजमानत्वाधिकरणम्

तपसो दुःखकरत्वात्कर्ता गुणभूतः समाख्यया नियम्यत इत्याशङ्कां निवर्तयति। यस्मादिदमपि संस्कारवत्फलप्रतिग्रहणयोग्यत्वं करोति। यजमानस्य च योग्यत्वमप्रतिबद्धं कर्तव्यं नर्त्विजस्तस्माद्याजमानम्। योग्यता च सर्वत्रैव द्विप्रकारा दोषापनयेन गुणान्तरोपजननेन वा भवति। तत्र संस्कारा गुणान्तरमुपजनयन्ति। तपश्च दोषनिर्घातं करोति। यो हि ज्योतिष्टोमादि करोति तस्यैकान्तेनास्मिन्नन्यस्मिन्वा जन्मनि विहिताकरणप्रतिषिद्धसेवानिमित्ता

७ ना] नापितकर्तृके प्रयोजकत्वेनैवास्य कर्तृत्वमिति क्वचित्पाठः।

४ इ] इतरैः—आरादुपकारकैरङ्गैरित्यर्थः।

दोषाः सन्ति। ते चानपनीताः क्रतुविपरीतस्वफलो पभोगदानादत्यन्ताविगुण-
स्यापि क्रतोः फलं प्रतिबध्नन्ति। सोऽयं क्रतुरप्रतिबन्धहेतुं कंचिदपेक्षते। तत्र
प्रकरणश्रुतस्यैव तपसोऽवश्यं क्रतुं प्रति कथंचिदुपकारकत्वं कल्पयितव्यम्।
तत्रापेक्षासंनिधियोग्यत्वैर्दोषक्षपणकल्पनमेव ज्यायः। शक्यं हि दुःखदानादध-
र्मस्य कार्यविरोधिनस्तपसाऽपनयनम्। यथैव प्रायश्चित्तचरणाद्दुःखेनाल्पेनापि
सतामहते दुःखान्तराय प्रवृत्तः सन्नधर्मो विनाश्यत इति वचनाद्गम्यते त- 1116
थैवात्र द्रष्टव्यम्। यानि त्वकर्माङ्गभूतान्येव तपांसि श्रूयन्ते फलसंबद्धानि वा
तेषां फलसाधनस्यापरस्याभावात्प्रतिबन्धनिराकरणापेक्षा नास्तीति स्वर्गादेव
कल्प्यते। यानि तु प्रायश्चित्ततपांसि तेषां दोषापहारमात्रमेव फलमिति न
सर्वत्रैकरूपत्वमध्यवसातव्यम्॥ ९॥ § 7120

मेधार्हत्ववाक्यशेषश्चामुमेवार्थं द्योतयति॥ १०॥ § 7121

वरदानवदेतद्द्रष्टव्यम् 'ऋत्विज उपवसन्ति' इति॥ ११॥ § 7122

इति तपसो याजमानत्वाधिकरणम्॥ ३॥

## ०.०.२०० ऋत्विक्संस्काराणां सर्वर्त्विग्धर्मताधिकरणम्

'गुणत्वे तस्य निर्देशः' इत्यनेन गतार्थमित्यन्यथा व्याचष्टे, ये सं-
स्काराः सन्तो वचनादृत्विजां जाताम्ते किं समाख्यया नियम्यन्ते नेति।
लोहितोष्णीषादयो ह्यौद्गात्रादिषु पठ्यमानाः सत्यपि संस्कारत्वे वचनादृत्विजां 1117
क्रियमाणाः समाख्याविषयतां प्रतिपद्यन्त इति प्राप्ते ब्रूमः। § 7124

संस्कारत्वादतिक्रान्ते समाख्यागोचरे सति।
वचनेनर्त्विजां येन तेनैवान्येष्वपि स्थिताः॥ § 7126

ऋत्विगुद्देशेन ह्येते विधीयमानाः प्रतिप्रधानावृत्तिन्यायात्सर्वेषां भवन्तो न
शक्याः समाख्यया बाधितुम्। तस्मादिह न व्यवस्था स्यादिति॥ १२॥ § 7127

इति ऋत्विक्संस्काराणां सर्वर्त्विग्धर्मताधिकरणम्॥ ४॥

---

१ दा] वरदानवदिति—'य एतामिष्टकामुपदध्यात्स त्रीन्वरान्दद्यात्' इति वचनाद्यथा वरदानमाध्वर्यवं तथा प्रकृतेऽपीत्यर्थः।

१ गु] ( अ॰ ३ पा॰ ८ अ॰ २ सू॰ ६ )।

३ नादृ] वचनादिति—अनेन च प्रकृतोदाहरणस्य वपनाधिकरणन्यायाविषयतया विचारविषयत्वं युक्तमिति सूचितम्।

## ०.०.२०१ गुणजन्यकामानां याजमानत्वाधिकरणम्

प्रधानकामस्य यजेतेत्यात्मनेपदात्सामानाधिकरण्यादाधानगताच्चाऽऽत्मनेपदात्प्रधानकर्तृविषयत्वेऽन्यतः सिद्धे ये गुणकामाः सदोमानविशेषादिषु श्रु-
1118 तास्तेषु मिनुयादित्यनेन समानकर्तृकत्वादविरुद्धया समाख्ययाऽध्वर्युविषयत्वे प्राप्ते, प्रधानगतेनाऽऽत्मनेपदेन समस्तप्रयोगविषयः फलसंबन्धो यजमानविषयोऽवगम्यत इति यदि कामयेत यजमान इति प्रकरणादवधार्य तद्भागित्वं गम्यते। तथा चाध्वर्युव्यापारे परस्मैपदमुपपत्स्यते। अन्यथा 'डुमिञ् प्रक्षेपणे' इत्यस्य कर्त्रभिप्रायक्रियाफलविवक्षायां ञित्वादात्मनेपदं स्यात्। अनया च श्रुत्या सामानाधिकरण्यं वाक्यगम्यं बाधितमित्यदोषः। तद्वशेन वा यजमानप्रार्थनानुसारो योऽध्वर्योः काम एष मे यजमानो वृष्टिं प्राप्नुयादिति तदपेक्षया सामानाधिकरण्यमविरुद्धम्। तथाशब्देन च पूर्वाधिकरणादेतावदतिदिश्यते समाख्यया न नियम्यत इति॥ १३॥ § 7129

अन्यत्र वचनादितरेषां स्यादिह तादृशस्य वचनस्याभावाद्व्यपदेशादित्युच्यते। वाशब्दोपादानाद्यजमानव्यतिरेकेण चाऽऽत्मग्रहणाच्चतुर्थ्या च विस्पष्टतादर्थ्यप्रतीतेः 'आत्मने वा यजमानाय वा' इति कर्तृद्वयस्य फलसंबन्ध इति शक्यं विज्ञातुम्॥ १४॥ § 7130

इति गुणजन्यकामानां याजमानत्वाधिकरणम्॥ ५॥

## ०.०.२०२ प्रोत्साहनमन्त्राणां याजमानत्वाधिकरणम्

1119 अकर्मसंयुक्ता आशीर्मन्त्राः समाख्यया नियम्यन्ते। न हि तेभ्यः फलनिष्पत्तिः। मन्त्राणामविधायकत्वादन्यस्य च फलकल्पनाहेतोरसंभवात्। यत्त्वाशासनं तद्यजमानवदध्वर्योरत्युत्साहकरत्वेनाविशिष्टमिति प्राप्ते याजमाना इत्युच्यते। ते हि फलान्तराभावात्प्रधानफलप्राप्तिमाशासते। यजमानेन च तदाशासनीयं नर्त्विजा। तदीयस्य दक्षिणालाभस्यान्यथाऽपि सिद्धत्वाद्यजमानाच्च लभ्यमानत्वेनाग्नेरप्रार्थनीयत्वात्। अथ यजमानार्थमेवासौ प्रार्थयेत तत्र 'आयुर्मे देहि' इत्यात्मविषयं सद्विरुध्येत। तस्माद्यजमानेनैव प्रधानफलप्राप्तिरूपेणाऽऽत्मोत्साहनार्थे प्रयोक्तव्या इति॥ १५॥ § 7132

आशीर्मन्त्रं च प्रवसद्यजमानाग्निहोत्रेष्वग्न्युपस्थानार्थं प्रोषितस्य दर्शयति। न चर्त्विजः प्रोषितस्य ऋत्विक्त्वं संभवति कर्मसंयोगाभावात्। यजमानस्य तु द्रव्यत्यागेनोपपद्यते। तस्मात्तत्सामान्यादितरेषु तथात्वम्॥ १६॥ § 7133

---

१ का] सौत्रस्थकामशब्देन प्रकृताधिकरणविषयं विवेचयति—प्रधानकामस्येत्यादिना। २ त्वेऽन्य] अन्यतः सिद्ध इति—'शास्त्रफलं प्रयोक्तरि' ( अ० ३ पा० ७ अ० ८ सू० १८ ) इत्यधिकरणन्यायेनेत्यर्थः। ८ श्रु] परस्मैपदश्रुत्येत्यर्थः।

इति प्रोत्साहनमन्त्राणां याजमानत्वाधिकरणम्॥ ६॥

## ०.०.२०३ द्व्याम्नातानामुभयप्रयोज्यत्वाधिकरणम्

आज्यग्रहणादिमन्त्रेषु सामान्येनाऽऽध्वर्यवे पुनर्विशेषेण याजमाने काण्डे 1120
पठ्यमानेषु किमुभौ प्रयोक्तारौ विकल्पेन समुच्चयेन वाऽथान्यतर इति। तत्राऽऽध्वर्यवत्वे विकल्पे वा प्राप्ते द्वावित्याह। ननु च विशेषसमाख्यानात्केवलयाजमानत्वमेव स्यात्। तत्र वयं विशेषसमाख्यां बलीयसीमिच्छामो यत्र सकृदाम्नानम्। ये तु सामान्ये विशेषे च भेदेनाऽऽम्नायन्ते तेषु यदि विशेषसमाख्याऽङ्गी क्रियते ततः सामान्यपाठस्याऽऽनर्थक्यमेव स्यात्। एकविषयत्वे च सामान्यं विशेषो बाधते। सत्यपि त्वत्र मन्त्राभेदे पाठभेदाद्विषयान्यत्वम्। पाठस्य हि भेदेन प्रयोजनं कल्पयितव्यम्। न च तदुभयप्रयोज्यत्वादन्यत्संभवति। तस्मादुभावपीति। ननु द्वयोः पाठयोरेकः स्वरूपप्रज्ञापनार्थ इतरो विनियोगार्थः स्यात्। तत्रापि मन्त्राणां कर्मप्रकाशनार्थत्वादङ्गप्रधानानां च समानकर्तृकत्वाद्यत्रैवाऽऽज्यग्रहणादि कार्यमाम्नातं तत्रैव समाख्यातेनैव कर्त्रा विनियोगो युक्तः। तत्रैव च मन्त्रस्य प्रयोज्यत्वेनावगतस्य कर्तृविशेषाकाङ्क्षा भवति नेतरत्र। रूपमात्रप्रज्ञापनस्यान्तरेणापि कर्मकालप्रयोगमध्ययनमात्रेणैव सिद्धत्वात्। आज्यग्रहणादि चासंदिग्धमाध्वर्यवम्। तस्मान्न यजमानेन प्रयोक्तव्या इति। उच्यते। याजमानेऽपि रूपमात्रादेवान्तरेणापि कार्यं प्रयोज्यत्वेनावधारणादस्त्येव कर्त्रपेक्षेति यजमानकर्तृत्वसिद्धिः। किं पुनस्तेषां प्रयुज्यमानानां प्रयोजनम्। उच्यते। यथैवाध्वर्युणा पदार्थाः कर्तव्यास्तथैव यजमानेनाप्रमादार्थं प्रत्यवेक्षितव्याः। तद्यत्र मन्त्रा नाऽऽम्नायन्ते तत्रोपायान्तरेण प्रत्यवेक्ष्यते, इह तु मन्त्रैरित्यर्थवत्ता॥ १७॥ § 7135

इति द्व्याम्नातानामुभयप्रयोज्यत्वाधिकरणम्॥ ७॥

## ०.०.२०४ वाजपेयादावभिज्ञस्यैव वाचनाधिकरणम्

यत्र 'यजमानं वाचयति' इति श्रूयते तत्राविद्वानपि खण्डशः शक्यो 1121
वाचयितुमित्यनियमः। अथवा विद्वान्स्वयमेव ब्रूयात्। तत्र प्रयोजकव्यापारवैयर्थ्यं भवेत्। तस्मादविद्वानेव वाचयितव्य इति प्राप्तेऽभिधीयते। न ह्यविद्वान्विहितोऽस्तीति। यदि कामश्रुतिपरिगृहीतं वेदाध्ययनं भवेत्ततः प्रयोगकालेऽप्यध्याप्येत। तत्त्वाधानवदनारभ्य विधीयते 'तस्मात्स्वाध्यायोऽध्येतव्यः' इति। तथा सति चार्थापत्त्यभावात्सिद्धमेवेदं सर्वकर्माण्यग्निवद्दहन्ति

न शिक्षणं प्रयुञ्जते। न च शिक्षितो वेदो भवति। तस्मात्प्राक्कर्मणो ये म-
न्त्राः पठितास्तेऽङ्गत्वं प्रतिपद्यन्त इति नाविदुषोऽधिकारोऽत्र। शक्यते च
तत्रापि प्रैपवत्प्रयोजकव्यापारस्यार्थवता सत्यामपि शक्तावप्रयुक्तो न ब्रूया-
दिति। तच्च प्रयोजकत्वं द्वेधा भवति, यदि वा खण्डशः समर्प्यतेऽथवा
ब्रूहीत्यभिधीयत इति यथेष्टं कर्म। क्रियता पुनर्विदितेनेति—वैशेषिकाद-
यः स्वशास्त्रेणाप्यनधिगतेनानधिकारं वदन्तीति स्पष्टनिरूपणार्थं पृच्छति। त-
त्र विद्वत्तायाः शक्त्युत्पादनद्वारेण प्रत्यक्षेणैवोपकारित्वाद्यावता विदितेनेत्याह्।
यद्यपि स्वाध्यायग्रहणेन सकलो वेदः परिगृहीतस्तथाऽपि दर्शपूर्णमासौ
कुर्वाणस्य ज्यौतिष्टोमिकमन्त्रब्राह्मणं न क्वचिदुपयुज्यत इति, असदपि ना-
1122 धिकारं व्यावर्तयति, इष्टिवेदेनैव योग्यतायाः सिद्धत्वात्। तेन तद्याजिन-
स्तावानेव स्वाध्यायः। यत्त्वसौ सकलः पठ्यते तन्नित्यकाम्यनैमित्तिकानां
कर्मणां यथोपपन्नकालत्वान्न ज्ञायते कतरत्कदा करिष्यत इति। तत्र
कदाचिद्यन्न पठितं तत्फलप्रार्थनानिमित्तं वाऽस्योपजायते तत्र तदविद्व-
त्त्वादशक्नुवन्विहन्यते, तदानीं वाऽधीयानस्य व्रतनियमवदध्ययनासंभवात्क-
र्मभिश्च विशिष्टक्रियोपात्तवेदनिराकाङ्क्षैस्तादृशस्याग्रहणाद्वैगुण्यप्रसङ्गः। काम-
श्रुत्यपरिग्रहाच्च सर्वैरनारभ्यवादविध्यधीतो वेदोऽपेक्षित इत्यवश्यं ब्रह्मचर्य-
काल एव समस्तो वेदोऽध्येतव्यः। यदि तु कश्चिदशक्तो नाधीते सकलम्,
अग्निहोत्रदर्शपूर्णमासमात्रं कथंचिदधिगच्छति न तस्य तत्रानधिकारः। एवं च
सति बाह्यज्ञानं दूरविप्रकृष्टमेव। यत्त्वात्मज्ञानं, तेन विना प्रवृत्तिरेव नास्त्यतः
सर्वकर्मार्थमङ्गीकर्तव्यम्॥ १८॥ § 7137

इति वाजपेयादावभिज्ञस्यैव वाचनाधिकरणम्॥ ८॥

## ०.०.२०५ द्वादशद्वंद्वानामाध्वर्यवत्वाधिकरणम्

उखाधिश्रयणावहन्त्यादीनां द्वादशानां कर्मद्वंद्वानां याजमान आध्वर्यवे च
पठितानां ह्याम्नातमन्त्रवदुभाभ्यां प्रयोक्तुमशक्यत्वाद्याजमानसमाख्यानाद्यज-
मानकर्तृकत्वमिति॥ १९॥ § 7139

1123 अनुत्पन्नानां द्वंद्वत्वापादनाशक्तेर्विधायकशब्दाभावाच्च नैषां याजमान
एवोत्पत्तिः। किं तर्हि। आध्वर्यवे। तत्र च कर्त्राकाङ्क्षा तदर्थश्च परिक्रय
इत्यवगते कर्तरि न द्वंद्वाम्नानवेलायामपेक्षाऽस्तीति यजमानकर्तृत्वानुपपत्तिः।
तत्र स्वरूपस्यासति यजमानसंबन्धे द्वंद्वता कथं याजमानी क्रियेत। न च

१४ त] व्रतनियमेति-अध्यायानध्यायते, शिष्योपाध्यायते, इत्यादयोऽध्ययनाङ्गभूता नियमा इत्यर्थः।
४ क] कथमिति पाठस्तु क्वचिदपि नोपलभ्यते। परं तु 'तत्र स्वरूपस्यासति' इत्यादिवार्तिकस्य 'तत्राध्वर्युः पदार्थान्' इत्यादि भाष्यग्रन्थव्याख्यानार्थस्य यथाश्रुते विवक्षितार्थालाभेन कथमित्यादिरावश्यकमिति भाति।

सा कर्त्रन्तरेण क्रियमाणानां संभवति। समासन्नकरणं हि द्वंद्वता। न चान्यकर्तृकां क्रियामन्यः समासन्नां कर्तुं समर्थः। न च समासन्नकरणानुरोधेन क्रियास्वरूपमपि याजमानं संभवति। अतोऽङ्गगुणविरोधन्यायात्तदप्याध्वर्यवमेव। यजमानस्तु स्मारयिष्यति द्वंद्वतामिति समाख्यार्थवत्ता॥ २०॥ § 7140

इति द्वादशद्वंद्वानामाध्वर्यवत्वाधिकरणम्॥ ९॥

## ०.०.२०६ होतुः करणमन्त्रानुष्ठातृत्वाधिकरणम्

‘परिवीरसि’ ‘युवा सुवासाः’ इत्येतयोः करणक्रियमाणानुवादिनोर- 1124
ध्वर्युणा होत्रा च युगपत्प्रकृतौ प्रयुक्तयोः कुण्डपायिनामयने हौत्राध्वर्यवयोरेककर्तृकत्वादशक्तेरवश्यावहेयेऽन्यतरस्मिन्कतरः प्रतिगृह्यतामिति संदेहः। तत्रानियमः प्राप्नोति। यद्वा होतुः सिद्धस्वरूपस्याऽऽध्वर्यवविधानादजहत्स्वधर्मतया हौत्र एव युक्त इति प्राप्तेऽभिधीयते। एतस्मिन्विप्रतिषेधे करणः प्रयोक्तव्यः। कुतः। समवायविशेषात्। केचिदाहुः। प्रधानप्रत्यासत्तिः समवायविशेष इति। बहिरङ्गो ह्यारादुपकारकरूपत्वात्क्रियमाणानुवादी, करणस्त्वन्तरङ्ग इति। तदकारणं, यदि हि प्रधानद्वारेणाङ्गेषु कर्ताऽवतरेत्ततः संनिकर्षविप्रकर्षावुपयुज्येयाताम्। स तु समाख्यया चोदकेन च प्रधानेष्वङ्गेषु चाविशेषेण लक्ष्यते। न च कश्चिदङ्गगुणविरोधन्यायः। उभयोरङ्गत्वाविशेषात्। न च संनिपातित्वेन क्रियान्तरगतमारादुपकारित्वं दुर्बली क्रियते। न चायमतीवाऽऽरादुपकारकः। क्रियमाणपरिव्याणस्मृत्यविच्छेदेन दृष्टसंस्कारजननात्। तस्मादानुमानिकाद्धौत्रसंबन्धात्प्रत्यक्षत्वेनैवाऽऽध्वर्यवस्य समवायस्य विशेषो भवति। कथम्। एषा ह्यत्र वचनव्यक्तिः। यदुत होत्रादयः श्रुतिवृत्ता अध्वर्य्वादिशब्दलक्षितेषु कर्मसु विधीयन्ते। तत्र हौत्रसंबन्धो होतुरानुमानिक आध्वर्यवसंबन्धस्तु प्रत्यक्षः। यत्त्वजहत्स्वधर्म एव होताऽऽध्वर्यवेण संबध्यत इति। संबध्येत, यदि तत्प्रयोगमात्रकृतमेवास्य होतृत्वं भवेत्, यदि वा हौत्रं प्रत्यध्वर्युर्विधीयेत, होतारं वोद्दिश्याध्वर्युकर्मविधिर्भवेत्, न तु तत्सर्वमस्ति। होता तावद्योग्यतामात्रेणावधारितः सत्यपि च कर्मनिमित्तत्वेऽन्यानि सहस्राणि तदुपलक्षणं करिष्यन्ति। न च हौत्रं प्रत्यध्वर्युविधिरिह, होत्रध्वर्युशब्दयोरत्यन्तविभिन्नपुरुषवचनयोर्मुख्यसामानाधिकरण्याभावादन्यतरस्यावश्यकल्पनीये लक्षणावृत्तत्वे विरोधनिमित्तत्वाल्लक्षणाक- 1125
ल्पनायाः प्रथमोच्चारिते होतृशब्दे किंचिदपि कल्पनाबीजं न पश्यामः। तेन ‘मुख्यं वा पूर्वचोदनात्’ इति तं स्वार्थवृत्तमेव गृहीत्वाऽध्वर्युशब्दः कर्म-

३ न्या] ( अ० १२ पा० २ अ० ९ सू० २७ ) अत्रत्यादिति शेषः।
१० विरो] अ० १२ पा० २ अ० ९ ) अत्रत्य इति शेषः।
२४ मु] ( अ० १२ पा० २ अ० ८ सू० २५ )।
२४ इति] तं—होतृशब्दमित्यर्थः।

लक्षणार्थोऽध्यवसीयते। तत्रापि तदुद्दिश्य होता विधीयते, तद्धि ऋत्वर्थेन प्रयोजनवन्न तथा कर्ता। प्रधानं चैवंजातीयकेषूद्दिश्यते। ततश्च गुणभूतो होतोपादीयमानो यः प्रधानाविरोधी धर्मस्तन्मात्रयुक्त एव संबध्यते। यदि तु होतुराध्वर्यवं विधीयेत ततस्तस्य कर्माविरुद्धं तत्प्रवर्तत इति न किंचिदपि हौत्रं हापयेत्। अप्राकृतकर्तृसंस्कारत्वप्रसङ्गाच्चाऽऽध्वर्यवस्य नैवं संबन्ध इति पक्षान्तरमवलम्बितम्। तस्मादाध्वर्यवसंबन्ध एव प्रत्यक्षः प्रधानं चेति सिद्धम्। अत्र चोदयन्ति। नैवात्रान्यतरस्यापि मन्त्रस्य होतृसंबन्धो बाधितव्यः। कुतः। § 7142

एककालप्रयोगे हि विरोधो मन्त्रयोर्भवेत्।
करणः प्राक् क्रियातस्तु परतश्चेतरः स्थितः॥§ 7144

करणस्य हि 'मन्त्रान्तेन कर्मादिसंनिपातः' इत्यनेन न्यायेन प्राक्परिव्याणात्प्रयोगः। क्रियमाणानुवादिनस्तु तस्मिन्क्रियमाणे। तेन द्वावपि प्रयोक्तुं समर्थो होतेति। नैतदस्ति। क्रियमाणता नाम संकल्पादेः कारकप्रचलनात्प्रभृत्यासमाप्तेः। अतश्च पूर्वपदार्थसमाप्त्यैव पर्युपस्थापितं चेत्परिव्याणं वर्तते स एव दीर्घः समस्तः क्रियमाणानुवादिनः कालः। एवमपि कारणस्य तादृश्यादेव प्राक्प्रयोगादविरोध इति यद्युच्येत। तन्न। न हि 'परिवीरसि' इत्ययं संकल्पं रशनादानं संनिहितं वा यूपमवयवक्रियामात्रप्रवृत्तं वा परिव्याणं शक्नोति प्रकाशयितुम्। तस्मात्प्रधानक्रियारम्भ एव यूपसमीपस्थेन प्रयोक्तव्यः। नन्वेवमपि दीर्घकाले कर्मण्येकदेशे करणमेकदेशे च क्रियमाणानुवादिनं प्रयुञ्जानो न विरोत्स्यते। कथं न विरुध्यते। यदा 'यूपाय परिवीयमाणायानुब्रूहि' इत्यनेन पाठक्रमात्करणः प्रैषसामर्थ्याच्चेतरो युगपदेव प्राप्यते, न च क्रियैकदेशे क्रियमाणानुवादिनः प्रयोग इत्यस्ति प्रमाणम्। स हि रशनादानानन्तरं प्रयुक्तेन प्रैषेण प्रयोजितः दीर्घत्वादापरिव्याणसमाप्तेः कालमवरुणद्धि। तदन्तकाले चाऽऽध्वर्यव आपन्नो न कथंचिदविरोधेनावतिष्ठते। ननु च युगपत्कालता बाध्यतामेककर्तृत्वं वेति वरं पदार्थप्राप्तेर्जघन्यत्वात्काल एव बाधितुं 1126 नान्तरङ्गः कर्तृसंबन्ध इति। भवेदेतदेवं, यदि प्राकृतकाल बाधमानौ मन्त्रौ स्वकार्यान्न प्रच्यवेयाताम्। तयोस्तु य एव कालान्तरे प्रयुक्तः स एव स्वसामर्थ्यप्रतिपाद्यादर्थात्प्रच्यवते। सोऽयं लिङ्गविरोध आपद्यते। ननु च 'यो होता सोऽध्वर्युः' इत्यनया श्रुत्या लिङ्गं बाध्येत। बाध्येत, यदि श्रुतिः स्यात्। वाक्यं त्विदं, तदपि लक्षणया। न ह्यत्र कस्यचिच्छब्दस्य श्रवणादिदं गम्यते हौत्राध्वर्यवे समानकर्तृके इति। किं तर्हि। होत्रध्वर्युशब्दसामानाधिकरण्यात्। सर्वत्र चैष संबन्धो वाक्यलक्षण इत्युक्तम्। तत्रापि चाध्वर्युशब्दस्य

१ दु] तदुद्दिश्यअध्वर्युपदलक्षिताध्वर्युकार्यमुद्दिश्येत्यर्थः।
११ म] ( अ॰ १२ पा॰ ३ अ॰ १० सू॰ २० ) एतत्सूत्रस्थमध्यमावयवः।
२९ श्रु] श्रुत्या—सामानाधिकरण्यात्मिकया श्रुत्येत्यर्थः।
३२ इत्यु] ( अ॰ ३ पा॰ १ अ॰ ६ ) इत्यत्रेति शेषः।

कर्मलक्षणार्थत्वाद्विप्रकृष्टता। ननु लिङ्गमप्येतच्चोदकापेक्षित्वाद्विप्रकृष्टतरं भवेत्। वाक्यं ह्यर्थविप्रकर्षाल्लिङ्गेन बाध्येत। स चेह विपरीतोऽर्थविप्रकर्षः। न हिं चोदकेनाप्राप्तयोर्मन्त्रयोरेककालप्रयोज्यत्वं गम्यते। तस्मादेककर्तृत्वमेव बलीय इति। उच्यते। सत्यमिह चोदकाङ्गीकरणं, तत्तु मन्त्रस्वरूपे न लिङ्गे। द्वयोरपि च तदविशिष्टं, प्राप्ते तु मन्त्रद्वये लिङ्गमौपदेशिकेनाविशिष्टम्। स्यादेतदेवं यदि चोदकः प्रापयेत्। स तु प्रत्यक्षवाक्यशिष्टसमानकर्तृत्वविरोधिमन्त्रद्वयं प्रापयितुमेव न शक्ष्यति। यद्यपि हि वाक्यं लिङ्गस्य नेष्टे, चोदकस्य तु स्वरूपप्रापणे पश्चाद्भाविनमपि विरोधमालोच्य शक्तं निरोधं कर्तुम्। ततश्छिन्नमूलत्वाल्लिङ्गस्य दुर्बलतेति। उच्यते। सर्वं हि विरोधवेलायां बाध्यते। न चानवगतो विरोधो बाधकारणं भवितुमर्हति। तदिह चोदकप्राप्तिवेलायां न कश्चिदपि विरोधो लक्ष्यते। यस्तु प्राप्ते विरोधस्तत्र लिङ्गं बलवत्तरमित्युक्तमेव। यदि चात्र द्वयोरपि समानकर्तृत्वं वाक्येन विधीयेत ततोऽप्येतस्य बलीयस्त्वमुद्भाव्येत। इह त्वाध्वर्यवस्य होत्रा सह संबन्धो विधीयते। न हौत्रस्यापि। स हि चोदकेन प्राप्नोति। तेन यदि प्रत्यक्षत्वादेतस्य बाधकत्वं ततः समाख्याकृतमेव क्रियमाणानुवादिनो होतृसंबन्धबाधनम्। एवं च सति लिङ्गवाक्ययोरविरोधान्न किंचिदपि बाधिष्यते। आध्वर्यवप्रयोगश्च सेत्स्यति। यथा तु लिङ्गबलीयस्त्वमाश्रितमासीत्तथाऽन्यदेवानिष्टमापद्येत। यो ह्यस्य वाक्यस्य विषयः स बाध्येत। न चास्य होतृहौत्रसंबन्धो विषयः। कस्तर्हि। होत्राध्वर्यवसंबन्धः। ततश्च यथाप्रकृत्येव प्रयोगः स्यात्। 1127 तस्मात्समाख्याक्लृप्तमेवाऽऽतिदेशिकं संबन्धं बाधित्वा समवायविशेषात्करणः प्रयोक्तव्य इति सिद्धम्॥ २१॥ § 7145

इति होतुः करणमन्त्रानुष्ठातृत्वाधिकरणम्॥ १०॥

## ०.०.२०७ प्रेषप्रेषार्थयोर्भिन्नकर्तृकत्वाधिकरणम्

प्रेषस्य प्रेषार्थस्य चाऽऽध्वर्यवसमाख्यातुल्यत्वादध्वर्युप्रयोज्यत्वेऽवधारिते कथमात्मनः प्रेष इति चेदाह—नैवायं प्रेषः। किं तर्हि। प्राप्तकालतायां लोटं वक्ष्याम इति। प्रेषवादी त्वाह—प्रत्यगात्मविषया चेत्प्राप्तकालता विवक्षिता

२१ सिद्ध] आध्वर्यवे करणमन्त्रे होत्रा क्रियमाणे तद्विरुद्धं क्रियमाणानुवादिनं कः प्रयुञ्जीयादिति शङ्कायां होतृपुरुषेषु य एव कश्चनान्तरङ्गोऽध्र्यादिः, तस्य वा कार्यान्तरव्यापृतत्वे बहिरङ्गो वा तृतीयादिः प्रयुञ्जीयादित्येबं समाधानार्थस्य ‘इतरमन्यस्तेषां यतो विशेषः स्यात्’ इत्युत्तरसूत्रावयवस्य व्याख्यार्थं ‘अथ हौत्रं विरुद्धं कः कुर्यात्’ इत्यादिभाष्यं बार्तिककारैरुपेक्षितम्। तदुपेक्षानिदीनं तु कुण्डपायिनामयने होतृपुरुषाणां मैत्रावरुणाच्छावाकग्रावस्तुन्नामकानां त्रयाणामपि वचनात्कार्यान्तरव्यापृतत्वेन तादृशपुरुषाभावात्प्रकृतोदाहरणानुपयोगरूपं द्रष्टव्यम्।

हन्तोत्तमपुरुषेण भवितव्यम्। न हि परविषययुष्मदर्थमन्तरेण मध्यमपुरुषो लभ्यते। प्रैषे तु स्वभावतः परविषयत्वात्सुलभ इति। परस्त्वाह—यदा समाख्यावगतात्समानकर्तृत्वात्प्रैषबुद्धिरपनीता तदा प्राप्तकालत्वमभिधीयमानं किं क्रियाणामभिधीयतामुत कर्तॄणामिति क्रियाणामित्येव गम्यते। ता हि चोदितत्वात्प्रयोजनवत्यः प्रथमतरं प्रतीताः। तासां चानुष्ठानार्थं प्राप्तकालत्वस्मरणं दृष्टार्थम्। कर्तृप्राप्तकालप्रकाशने तु सर्वं विपरीतम्। आख्यातेषु च प्रथमादेः पुरुषस्य कस्यचिदवश्यंभावित्वान्नान्तरीयककृत एव मध्यमपुरुषो भविष्यति। क्रियैव चोच्यते तव प्राप्तकाल इति। यदि च कर्तुः प्राप्तकालत्वमुच्येत ततः किं कर्तुमिति साकाङ्क्षमेव स्यात्, अथ प्रोक्षण्यासाद-
1128 नादि कर्तुमिति, तथा विशिष्टार्थप्रेषणाद्वाक्यभेदः स्यात्। तस्मादपि क्रियायाः प्राप्तकालत्वं प्रकाश्यते। अथापि प्रैषोऽयमाश्रीयते तथाऽप्यात्मानमेव कथंचिच्छरीरशरीरिणोरवस्थान्तराणां वा भेदेन प्रेषकं प्रेष्यं च व्यपदेक्ष्यतीति समानकर्तृकत्वे प्राप्ते, ब्रूमः। प्रैषेषु चेतरमन्यः कुर्यादिति संबन्धः। कुतः। स्वभावेतैव तेषां परविषयत्वात्परिक्रियवत्। यत्तु नैवायं प्रैष इति। तदयुक्तम्। मन्त्ररूपादेव प्रैषप्रत्ययोत्पत्तेः। यो हि समानकर्तृकतया तं बाधते तेन समाख्यया लिङ्गः बाधितं स्यात्। न च प्राप्तकालतया लिङ्गविरोधः परिहियते। मध्यमपुरुषार्थस्यासंपादनात्। न च शब्दान्तरेणानुपात्ता क्रियैवं शक्यते वक्तुं तव प्राप्तः काल इति। यद्यपि च शक्यते तथाऽपि न दृष्टः कश्चिदर्थः स्यात्, चेतनविषयत्वादीदृशस्य प्रयोगस्य। तथाऽऽत्मभेदपरिकल्पनायामपि नैव दृष्टं प्रयोजनं, गौणताऽत्र स्थितैव। मुख्यं च कार्यं मन्त्राणामित्यवधारितम्। ततश्च यद्यपि प्राप्तकालतायामेव लोट्, तथाऽपि परस्यैव सा कथ्यत इति न पराधिकारो निवर्तते। न च वाक्यभेदो विशिष्टार्थप्रेषणात्, अवश्यं चात्र विशिष्टताऽभ्युपगन्तव्या, प्रोक्षणीपदोपादानात्। न चैकपदोपात्तोऽनेकोऽर्थो वाक्यं मिनत्ति। सर्वाख्यातेषु क्रियाकर्तृसंख्योपग्रहपुरुषविशेषभावनानां युगपदुपादानस्यापरिहार्यत्वात्। न चेदृशं विशिष्टविधानं क्वचिन्नाभ्युपगन्तव्यम्। प्राप्तकालत्वे च क्रियायुष्मदर्थयोः पृथक्त्वाद्भेदेन शक्तिः कल्प्येत। प्रैषे तु तस्य नित्यमेव युष्मदर्थविषयत्वान्मध्यमपुरुषोऽनुवादः। एवं चैषा समाख्याऽनुगृह्यते। तस्माल्लिङ्गेन समाख्याबाधादन्यः प्रैषोऽन्यश्च प्रैषार्थ इति॥ २२॥ § 7147

इति प्रैषप्रैषार्थयोर्भिन्नकर्तृकत्वाधिकरणम्॥ ११॥

१० र्तुमि] इतीति—अध्याह्रियत इति शेषपूरणम्।
१० भे] वाक्यभेद इति—कर्तृक्रियाबिशिष्टाकालप्राप्तत्वोक्त्या गौरवलक्षणवाक्यभेदः स्यादित्यर्थः।
२१ धा] ( अ॰ ३ पा॰ २ अ॰ १ ) इत्यत्रेति शेषः।
२८ चैषा] एषा समाख्या—प्रैषसमाख्येत्यर्थः।

## ०.०.२०८ प्रैषस्याऽऽध्वर्यवत्वाधिकरणम्

‘यदन्वञ्चं धारयेद्वज्रेणाध्वर्युं क्षिण्वीत’ वज्रोऽध्वर्युं क्षिण्वीतेति वा पाठः। 1129
स्फ्यस्य धारणं तावदग्नीध एकान्तेन। स चाध्वर्युं क्षिण्वीतेति वदन्नग्नीधं स्फ्यवन्तं प्रेषकं दर्शयति। का त्वस्य प्राप्तिः। उच्यते। ‘अङ्गगुणेविरोधे च तादर्थ्यात्’ इत्यनेनाङ्गत्वात्प्रैषस्य कर्तृलोपो युक्तो न प्रधानस्य। बंहवंश्च प्रैषार्था एको निगदः। तेन ‘भूयसां स्यात्सधर्मत्वम्’ इत्यपि प्रैषार्थेऽध्वर्युरिति परिशेषात्प्रैषेऽग्नीत॥ २३॥ § 7149

‘मुख्यं वा पूर्वचोदनात्’ इति प्राथम्यात्प्रैषे समाख्यातः कर्ता युक्तः। न हि तदानीं विरोधः कश्चिदस्ति। तस्मिंस्तु प्रयुक्ते विरोधात्प्रैषार्थेऽन्यो भवति। प्रयोजकस्य च प्रयोज्यव्यापारेऽपि कर्तृत्वं न विहन्यत इत्युभयानुग्रहः। इतरया हि प्रैषेऽत्यन्तबाध एव स्यात्। न हि स तेन कृतो नापि कारितो भवेत्। तस्मादध्वर्युप्रेषितोऽग्नीत्कुर्यादिति। ‘वज्रेणाध्वर्युम्’ इति चाऽऽग्नीध्रमेव तत्कार्यापत्तेरभिधास्यति॥ २४॥ § 7150

इति प्रैषस्याऽऽध्वर्यवत्वाधिकरणम्॥ १२॥

## ०.०.२०९ करणमन्त्रप्रकाश्यफलस्य याजमानत्वाधिकरणम्

यथैवाकरणेषु यत्फलं तत्प्रकरणस्थं कीर्त्यते नान्यत्कल्प्यते तथा ‘म- 1130
माग्ने वर्चो विहवेष्वस्तु’ इत्यादिष्वपि। ते तु यजमानेनैव प्रयुज्यन्ते तस्यैव च फलमित्यविरुद्धाः। करणाः पुनरेकान्तेन कर्मसमानकर्तृकत्वादाध्वर्यवाः। तैर्यद्यध्वर्युणा प्रयुज्यमानैर्यजमानस्य फलमभिधीयेत ततो ममेत्यभिधानं विरुध्येत। कीदृशं त्वध्वर्थोः फलमनूद्यत इति, तद्भावभावित्वमात्रेण सुप्रचरितृत्वयशः। तच्च तस्योत्साहं करिष्यतीति निरूपयति॥ २५॥ § 7152

नैवेदमकरणवदुत्साहार्थं फलं संकीर्त्यते। किं तर्हि। मन्त्रवर्णान्नित्याङ्गाश्रयं फलमवकल्पते। कथम्। व्यतिरिक्तक्रियासाधनत्वेन हि मन्त्रश्चोदितस्तां वा तत्संबन्धि वा किंचित्प्रकाशयन्नङ्गभावं गच्छति। तस्मादिह यद्यध्वर्युयशः संकीर्त्यते नैतेन सकलेन मन्त्रेणाग्न्यन्वाधानं साधितं स्यात्। न हि तत्प्रकाशनमग्न्यन्वाधानेनापेक्षितम्। यद्यपि तावत्प्रधानफलं प्रकाशयेत्त- 1131

---

३ अ] ( अ० १२ पा० २ अ० ९ सू० २७ )।
५ भू] ( अ० १२ पा० २ अ० ७ सू० २४ ) एतःसूत्रावयवः
१ मु] ( अ० १२ पा० २ अ० ८ सू० २५ )।
१ क] अकरणवदिति—‘आयुर्दा अग्ने’ ‘अगन्म सुवः सुवरगन्म’ इत्यादयो ये, इतिकरणाद्यविनियुक्ता मन्त्रास्तद्वदित्यर्थः।
२ व्य] व्यतिरिक्तेति—स्वशक्त्या प्रकाश्यार्थव्यतिरिक्ताग्न्यन्वाधानाख्यक्रियासाधनत्वेनेत्यर्थः।

थाऽपि न संबध्येत किमुत कर्मकालानौपयिकानुनिष्पादिबाह्यऋत्विग्यशःप्रकाशनेन। तस्मात्सूक्तवाकन्यायेनैव चोदितमन्त्रकरणत्वान्यथानुपपत्त्याऽग्न्यन्वाधानस्य फलमेतत्कल्प्यते। यास्त्वाशिषस्ताः साक्षात्प्रधानाङ्गमिति तत्फलप्रकाशनेनैवाङ्गं भवन्ति। यदि पृथक्फलं साधयेयुस्ततः संयुक्तत्वान्नैव प्रकरणेन ऋत्वङ्गभावं गच्छेयुरिति वैषम्यम्। आह। सत्यपि पृथक्फलत्वे ममशब्देनाध्वर्युर्गृह्यत इति व्यपदेशन्यायेनाऽऽध्वर्यवमेव प्राप्नोति। उच्यते। लिङ्गेनाऽऽध्वर्यवत्वं प्राप्नोत्यात्मनेपदश्रुत्या याजमानत्वम्। अथोभयानुग्रहार्थं कस्मात्कर्मापि याजमानमेव न भवति। तथा सति हि ममशब्द आत्मनेपदं चोभयमपि न विरोत्स्यत इति। नैतदस्ति। यदि ह्येतन्मन्त्रपूर्वकं कर्म भवेत्तत एवं नियम्येत। प्रथमं त्वेतदुत्पद्यमानं केवलऋत्वर्थत्वप्रतीतेरविरुद्धाध्वर्युसंबन्धं समाख्यानात्प्रतिपद्यते। मन्त्रमात्रं याजमानमिति चेन्न। कर्मणाऽऽकृष्यमाणस्य तत्समानकर्तृकत्वनियमात्। फलमपि तर्ह्याकृष्येत। आकृष्येत, यद्यात्मनेपदेन न प्रतिबध्येत। तत्राऽऽत्मनेपदस्य बाधासंभवाद्गौणत्वप्रकारानुपपत्तेश्च मन्त्रगत एव ममशब्दोऽध्याहारेण वा पूर्यते गौणो वा भवति, मदीयस्य यजमानस्य मद्रूपस्यैव वा यजमानस्य वर्चो विहवेष्वस्त्विति। तस्माद्यजमानफलमेतदिति। ये च यजमानकर्तृकमेवाग्न्यन्वाधानं पक्षे वदन्ति तेषामित एव मन्त्रवर्णाद्भ्रान्तिः। अथ तु किंचिद्वचनमुपन्यस्यन्ति तथाऽपि किं कर्मविकल्पवत्फलमध्वर्युयजमानयोर्विकल्पते किं वा फलं नित्यमेव याजमानमिति विचारः॥ २६॥ § 7153

1132 सर्वाशिषामृत्विक्प्रयोज्यानां यजमानसंबन्धानुवाद एवमवकल्पिष्यते॥ २७॥ § 7154

इति करणमन्त्रप्रकाश्यफलस्य याजमानत्वाधिकरणम्॥ १३॥

## ०.०.२१० करणमन्त्रेषु कर्मोपयोगिप्रकाश्यमानफलस्य ऋत्विग्गामित्वाधिकरणम्

यत्त्वसंतापादि फलं कर्मप्रयोग एवोपयुज्यते तद्यजमानेनापि तथेष्यत एवेति नाऽऽत्मनेपदेन विरुध्यते॥ २८॥ § 7156

'व्यपदेशादितरेषाम्' इत्यत्र ब्राह्मणगतमुदाहृतमिह तु प्रस्तावत्वशेन मन्त्रगतम्। तद्धि क्लेशेन कल्प्यमानं कदाचिदुभयोर्न शक्यते कल्पयितुमित्याश-

२ न्या] ( अ० ३ पा० २ अ० ५ ) अत्रत्येनेति शेषः।
४ संयु] संयुक्तत्वादिति-'असंयुक्तं प्रकरणादितिकर्तव्यतार्थित्वात्' इति प्रकरणाधिकरणोक्तन्यायेन लिङ्गादिविनियुक्तेषु प्रकरणीवनियोज्यत्वासंभवादित्याशयः।
६ देश] ( अ० ३ पा० ८ अ ५ सू० १४ ) अत्रत्येनेति शेषः।
१६ ये] ये च—कल्पसूत्रकारा इत्यर्थः।
१ देशा] ( अ० ३ पा० ८ अ० ५ सू० १४ ) अत्रत्यन्यायेन पौनरुक्त्यं तावत्परिहरति—व्यपदेशादित्यदिना।

ङ्का स्यात्। कल्पनाहेतुस्तु युगपत्प्रवृत्तेरविशिष्ट इति न किंचिद्गौरवम्। अथ कस्मान्नोभावेव प्रयुञ्जाते। यदैकेनापि प्रयुज्यमानः शक्नोत्येवोभयगामि फलं प्रकाशयितुं तदा सिद्धेऽर्थे न किंचिदुभयकर्तृकत्वेन प्रयोजनमस्तीत्यध्वर्युनियमः॥ २९॥ § 7157

इति करणमन्त्रेषु कर्मोपयोगिप्रकाश्यमानफलस्य
ऋत्विग्गामित्वाधिकरणम्॥ १४॥

## ०.०.२११ द्रव्यसंस्काराणामङ्गप्रधानार्थताधिकरणम्

गतः समाख्याविरोधाविरोधविषयः। सर्वश्च श्रुत्यादिविरोधाविरोधविचारः 1133
प्रकृताविव विकृतिष्वपि द्रष्टव्यः। यत्तु धर्माणां सामानविध्यमङ्गप्रधानेषु पूर्वोक्तं तद्विकृतिषु कथमिति विचारे प्राप्ते सूत्रमेतत्। शक्यं तु पूर्वपक्षेऽप्येतत्समर्थायितुं यस्मात्प्रवृतौ बर्हिरादिसंस्कारः सर्वकर्मणां तस्माद्विकृतावपि तथैव स्यादिति॥ ३०॥ § 7159

इति द्रव्यसंस्काराणामङ्गप्रधानार्थताधिकरणम्॥ १५॥

## ०.०.२१२ प्राकृतधर्माणां विकृतावपूर्वपदार्थानङ्गत्वाधिकरणम्

यद्ययमङ्गोपदेश एवानुषङ्गरूपेण साधारणः स्यात्, यदि च शास्त्राण्यतिदिश्येरंस्ततः शास्त्रार्थः प्रकृतिवद्विकृतिष्वपि कल्प्यमानः सर्वार्थत्वेनावधार्यते कार्यप्राप्तिपुरःसरस्तु धर्मातिदेश इष्टः। तत्र यागगतेन व्यापारेण 1134
गृहीतेनाऽऽत्मसिद्ध्यर्थं नियमादृष्टद्वारभूतानि दृष्टान्यदृष्टानि च प्रयोजनानि गृह्यन्ते। तानि च निर्ज्ञातपरिमाणान्येव प्राप्नुवन्ति। तैश्चाऽऽत्मसिद्ध्यर्थं पदार्थाः प्राप्यमाणाः स्वात्मनियता एव प्राप्यन्ते। न च यूपावटास्तरणं नाम बर्हिषः कार्यं प्रकृतौ विज्ञातं, येन बर्हिस्तद्धर्मा वा गृह्येरन्। यैस्तु वेदिस्तरणादिभिर्गृह्यन्ते न तेषां यूपावटस्तरणमन्तरेण किंचिन्नोपपद्यत इति न तदर्थं

३ पू] ( अ॰३ पा॰ ७ अ॰ १ सू॰ २ ) इत्यत्रेति शेषः।
३ क्यं] एवं तावद्यथाभाष्यं सूत्रं प्राप्तिसूत्रतया व्याख्यायाधुनोत्तराधिकरणंपूर्वपक्षपरतयाऽपि योजयति—शक्यमित्यादिना।
१ यं] 'ये च प्रधानस्य' इत्यादि सिद्धान्तभाष्यं तात्पर्यतो व्याचष्टे-यद्ययमित्यादिना।
३ इ] इष्ट इति—सप्तमाद्ये प्रकृतिविकृतिसाधारण्यनिरासेन, दशमाद्ये च कार्यप्राप्तिपुरःसरमतिदेशोऽभिप्रेत इत्यर्थः।

प्राप्यन्ते। तस्मादिहापूर्वस्यानधिकार इति। प्रधानं हि चोदकोऽपेक्षत इत्यादिना, अपिना साधारण्यं शास्त्रातिदेशो नेत्येतन्निराकरोति। शास्त्रापेक्षायां हि सर्वमभिनवं प्रकृतिवत्पुनः कल्पयितव्यं स्यात्। दूरस्थसंबन्धादिक्लेशश्च स्थित एव। शास्त्रातिदेशात्सामानविध्याच्च, पशुधर्माणां मध्येऽग्नीषोमसंस्कारार्थः पशुपुरोडाशो देवतान्तरे न प्राप्नोति। तस्योहस्य च दर्शनं विरुध्येत। तस्मादुपकारातिदेश इति॥ ३१॥ § 7161

इति प्राकृतधर्माणां विकृतावपूर्वपदार्थानङ्गत्वाधिकरणम्॥ १६॥

## ०.०.२१३ प्रकृतावपि लवनादेरसर्वार्थताधिकरणम्

1135 इदानीं प्रकृतावपि नातीव सर्वार्थतेत्येतत्साधयति। यथालूनस्य बर्हिषस्त्रिधातु पञ्चधातु वेति सकलस्य स्तरणविधानादशक्योऽन्यविनियोग इति सामान्यभूतो विधृतिपवित्रार्थो दर्भविधिरन्यो द्रष्टव्यः। धातुरिति स्तरणचयोऽभिधीयते॥ ३२॥ § 7163

इति प्रकृतावपि लवनादेरसर्वार्थताधिकरणम्॥ १७

## ०.०.२१४

पुरोडाशधानादीनां सवनीययागार्थत्वात्पूर्वेणैव न्यायेन ग्रहणश्रयणार्थम-
न्ये पुरोडाशशकलादय इति प्राप्तेऽभिधीयते। ‘एकदेशद्रव्यं च’ इत्येनेनाप्र-
योजकलक्षणापत्तेरन्यस्य च शकलस्याभावाद्व्यवदानमात्रे च हुते शेषस्य
1136 प्रतिपाद्यमानस्य दृष्टार्थत्वाद् द्वितीयानिर्देशानुग्रहान्न कश्चिद्विरोधो दृश्यते। त-
स्मादत्र प्रकृतोपादानम्॥ ३३॥ § 7165

इति प्रकृतपुरोडाशादीनां निधानार्थताधिकरणम्॥ १८॥

---

१ धा] प्रधानं हीत्यनेन शास्त्रातिदेशः, अपि चेत्यनेनोपदेशस्य प्रकृतिविकृतिसाधारण्यं च निरस्तत इत्येवं भाष्यमवयवशो व्याख्यास्यति—प्रधानं हीत्यादिना।
२ शास्त्रा] शास्त्रातिदेश इत्यारभ्य स्थित एवेत्यन्तो ग्रन्थो काशीमुद्रितपुस्तकेऽनुपलभ्यमानोऽपि व्याख्यानाद्यवलम्बनेन स्थापितः।
३ र] स्तरणचय इति—स्तरणार्थबर्हिर्मुष्टयवयव इत्यर्थः।
१ ह] ग्रहणे’ इति पा°।
२ देश] ( अ° ४ पा° १ अ° १३ सू° २८ )।

## ०.०.२१५ उपांशुत्वस्य काम्येष्टिप्रधानमात्रार्थत्वाधिकरणम्

यत्र यत्र स्थितमुपांशुत्वं काम्यानामिष्टीनामुपकर्तुं शक्नोति तत्र तत्र कर्तव्यम्॥ ३४॥ § 7167

केचिदाहुरस्य प्रत्यक्षत्वेन प्रथमतरं प्राप्तेश्चोदकग्राह्याण्यङ्गानि न तावत्प्राप्नुवन्तीत्यचोदितत्वम्। न त्वेतत्संभवति। सर्वत्र चोदकस्य प्रथमतरं प्रवृत्तेः। तस्मादयमर्थः। प्रकृतौ हि प्रकरणात्प्रधानार्थत्वे प्राप्ते वाक्यात्सर्वार्थत्वम्। इह तु वाक्यमेव विशेषनिष्ठं, काम्या इति वचनात्। न ह्यङ्गानि कामसंबद्धानि तस्मान्न तेषामेव धर्मश्चोदित इति॥ ३५॥ § 7168

इति उपांशुत्वस्य काम्येष्टिप्रधानमात्रार्थत्वाधिकरणम्॥ १९॥

## ०.०.२१६ दृतिनवनीताज्यस्य श्येनप्रयोगान्तर्वर्त्याज्यकार्यार्थताधिकरणम्

‘दृतिनवनीतमाज्यम्’ इति प्रकरणे विशिष्टविधानात्सोमो बाधिष्यत इति 1137
मन्यते। यतस्त्वनेकार्थविध्यसंभवादाज्यमनूद्य विशेषमात्रं विधीयते। न च प्रधानस्याऽऽज्यप्राप्तिः। तस्मात् ‘आनर्थक्यात्तदङ्गेषु’ इत्येव सिद्धम्॥ ३६॥ § 7170

अवश्यं श्येनोपकारि यदाज्यमिति वक्तव्यम्। ततश्च पवमानहविराज्यमपि श्येनोपकारीति दृतिनवनीतं स्यात्॥ ३७॥ § 7171

न ह्युपकारित्वमात्रेण संबन्धः। किं तर्हि। अधिकारात्प्रकृतस्योपकारिणः, प्राकरणिकं चोदकेन संनिहितं न पवमानेष्टिगतमिति व्यवस्था॥ ३८॥ § 7172

इति दृतिनवनीताज्यस्य श्येनप्रयोगान्तर्वर्त्याज्यकार्यार्थताधिकरणम्॥ २०॥

## ०.०.२१७ सर्वेषामेव श्येनीयाज्यकार्याणां दृतिनवनीताधिकरणम्

संनिधिविशेषात्सामान्यतो दृष्टाच्च तत्कालानां लिङ्गदर्शनेन दृष्टान्तं साध- 1138
यति। पशुसाहित्यं ह्येतदीयो धर्मः सुत्याकालो दृष्टोऽग्नीषोमीयानुबन्ध्यास्थानयोरन्येनानुग्रहवचनात्। तस्मादयमप्येतद्धर्मत्वात्सुत्याकाल इति॥ ३९॥ § 7174

---

१ दृतिन] दृतिनवनीतभाज्यमिति—चर्मभाण्डस्थितनवनीतप्रकृतिकमाज्यमित्यर्थः।

३ क्या] ( अ° ३ पा° १ अ° ९ सू° १८ )।

तदुक्तं 'सर्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वात्' इति॥ ४०॥ § 7175

न्यायगम्ये लिङ्गमीदृशं साधकं भवति। आगमगम्यस्त्वयम्। न च सहाऽऽलम्भस्यैतद्धर्मत्वात्सुत्याकालता। किं तर्हि। अन्यत एव न्यायात्। न चासौ दृतिनवनीते संभवति। तं न्यायं दर्शयति। एवं वचनवर्जितो यः क्रमःसंनिकर्षलक्षणोऽनुमेयश्रुत्यर्थः सोऽनुग्रहीष्यत इति। सवनीयकाले
1139 ह्यालभ्यमानेषु न कस्यचित्पशोः कालमतिक्रम्येत। न च द्विगुणोऽध्वा भवति। इतरथा द्वयमपि स्यात्। तस्मादुपपन्नं दर्शनम्॥ ४१॥ § 7176

इति सर्वेषामेव श्येनीयाज्यकार्याणां दृतिनवनीताधिकरणम्॥ २१॥

## ०.०.२१८ सवनीयहविषां मांसमयत्वाधिकरणम्

पुरोडाशशब्दस्य धानादिष्वसमर्थत्वात्सर्वपुरोडाशविषयत्वं सत्यपि सवनीयत्वे विशेष्टुमशक्यत्वादिति प्राप्तेऽभिधीयते। सवनीयशब्दस्याप्रमादपाठात्पुरोडाशशब्दं लिङ्गसमवायाद्गौणं कृत्वा धानादीनामपि ग्रहणमिति॥ ४२॥ § 7178

अत्यन्तभिन्नत्वाद्द्रव्यान्तरेषूपचारो न युक्तो यदि वा सवनीयशब्दस्याप्यवयुत्यानुवादेन भवत्विति॥ ४३॥ § 7179

1140 'पुरोडाशानलंकुरु' इति प्रकृतौ धानादिषु लक्षणा दृष्टा न तु सवनीयशब्दस्यासवनीयेषु प्रवृत्तिः। साहित्याच्च शक्यते तेन लक्षयितुं नेतरेण। न

---

१ वें] ( अ° ३ पा° ७ अ° १ सू° २ )।

५ का] कालमतिक्रम्येतेति—प्रधानकालमित्यर्थः। अयमाशयः। ज्योतिष्टोमे, भिन्नकालानुष्ठेयानां त्रयाणामग्नीषोमीयसवनीयानूबन्ध्यानां पशूनां ज्योतिष्टोमविकारभूते श्येनयागेऽतिदिष्टानां साहित्यं श्रूयते 'सह पशूनालभते' इति। तच्च साहित्यं कस्मिन्देश इत्यपेक्षायां यत्रैवानुष्ठाने प्रधानभूतसोमयागप्रत्यासत्तिः, त्रयाणां पशुयागानां संभवति। सवनीयस्यैव तु सुत्याकालीनत्वेन तत्रैव लभ्यते। एवं सवनीयस्थान एव पूर्वोत्तरयोरनुष्ठाने द्वयोरप्यग्नीषोमीयानूबन्ध्ययोः स्वस्थानातिक्रममात्रेण तुल्यकालोत्कर्षोऽपकर्षश्च भवतः। इतरथा, अनूबन्ध्यास्थाने—अवभृथान्ते, सवनीयाग्नीषोमीययोरनुष्ठाने, सवनीयस्य स्वस्थानातिक्रममात्रं, अग्नीषोमीयस्य तु स्वस्थानातिक्रमः सवनीयस्यानातिक्रमश्च। एवमग्नीषोमीयस्थाने—औपवसथ्येऽहनि, सवनीयानूबन्ध्ययोरनुष्ठाने, सवनीयस्य स्वस्थानातिक्रममात्रं, अनूबन्ध्यायास्तु स्थानद्वयातिक्रमश्च प्रसज्येत। अतश्च प्रधानप्रत्यासत्तिस्थानातिक्रमसाभ्याभ्यां सवनीयस्थान एव त्रयाणामनुष्ठानमिति न्यायत एव सिध्यतीति।

३ स] लिङ्गमवायः—अल्पत्वम्। धानाः करम्भः परिवापः पुरोडाशः, पयस्येति पञ्च सवनीयानि हविंषि। तेषु पुरोडाशस्यैकत्वादल्पवाख्यगौणीवृत्तिनिमित्तेन पुरोडाशशब्दो गौण इत्यर्थः।

१ पुरो] गौणं लाक्षणिकं वाऽपि वाक्यभेदेन वा स्वयम्। वेदो यमाश्रयत्यर्थं को नु तं प्रतिकूलयेत् इति न्यायेन पुरोडाशशब्दस्यैव गौणत्वौचित्यं सूचयन् सिद्धान्तमाह—पुरोडाशानित्यादिना।

ह्यसवनीयस्य पुरोडाशस्य धानादिभिः सह संबन्धोऽस्ति। तस्माद्धानादीनां स्थाने तरसा इति सिद्धम्। § 7180

इति कथितबलाबलप्रवेके स्वगतसर्वविरोधबाधमार्गैः।
श्रुतिकृतदृढनिश्चयैः प्रमाणैः स्थित इह कर्मसु
शेषशेषिभावः॥ § 7182

इति सवनीयहविषां मांसमयत्वाधिकरणम्॥ २२॥

इति श्रीभट्टकुमारिलविरचिते मीमांसाभाष्यव्याख्याने तन्त्रवार्तिके
तृतीयाध्यायस्याष्टमः पादः।

संपूर्णश्च तृतीयोऽध्यायः।
समाप्तं च तन्त्रवार्तिकम्।

# The TEI Header